महामुनिपतञ्जलिविरचितम्

व्याकरणमहाभाष्यम्

(पण्डितमहेशझाशर्मप्रणीत 'धिषणा' व्याख्योपेतम्)

डॉ. उदयनाथझा 'अशोकः'

नाग पब्लिशर्स

महामुनिपतञ्जलि-विरचितम्

व्याकरण-महाभाष्यम्

(नवाह्निकान्तम्)

(पण्डितप्रवर स्व. महेशझाशर्म्म-प्रणीत-'विमला'ख्यया व्याख्यया संवलितम्)

सम्पादकः

डॉ. उदयनाथझाः 'अशोकः'

आचार्यः (द्वय), एम्. ए. (द्वय), डी. लिट्.
राष्ट्रिय-संस्कृत-संस्थानम् (मानित-विश्वविद्यालयः)
श्रीसदाशिव-परिसरः, पुरी (उत्कलः)

NAG PUBLISHERS

नाग पब्लिशर्स

11. ए., यू. ए., जवाहर नगर, दिल्ली – 110007 (भारत)

राष्ट्रिय संस्कृत संस्थान, (मानित विश्वविद्यालय) नई दिल्ली के द्वारा प्रदत्त 80 प्रतिशत वित्तीय सहयोग से प्रकाशित।

नाग पब्लिशर्स

(1) 11 ए. यू. ए. जवाहर नगर, दिल्ली – 110007
(2) जलालपुर माफी, चुनार, मिर्जापुर, उ. प्र.

दूरभाष : 011 – 23857975, 23855883

ISBN- 81-7081-660-2


प्रथम संस्करण : 2009

मूल्य : 299.00 रूपये

श्रीसुरेन्द्र प्रताप द्वारा नाग पब्लिशर्स, 11–ए, यू. ए., जवाहर नगर, दिल्ली – 110007
द्वारा प्रकाशित तथा मुद्रित जी. प्रिंट प्रौसेस, 308/2 शहजादाबाग, दिल्ली–110035

विमलाव्याख्याकारः

सर्वतन्त्रस्वतन्त्रः पण्डितमहेशझाशर्म्मा



(1901 ई० - 1983 ई०)

शब्दानुशासने नव्यन्याये काव्यानुशासने ।
नीतिशास्त्रेऽथवा सर्वतन्त्रेऽप्रतिहता गतिः ॥
यस्य सोऽयं तपोविद्याविनयैः समलङ्कृतः ।
मैथिलः श्रोत्रियो धीमान् **महेशाख्यो** महीयते ॥

समर्पणम्

विमलाकारस्य ज्येष्ठपुत्राय, पितुर्जीवनकाल एव
दिवङ्गताय **स्व० पण्डितसुरेशझाशर्म्मणे**
सम्पादितेयं कृतिः समर्पिता

मातुः पितुः कुलात् प्रज्ञामुपजीव्य तपस्तथा ।
समुत्पन्नः पितुर्दिव्यां शिक्षां दीक्षामुपेयिवान् ।।
न्याये व्याकरणे काव्येऽतुलां प्राप्तश्च वैदुषीम् ।
'विमला'कारपुत्रो यः **सुरेशा**ख्यो विदांवरः ।।
मण्डनं मिथिलाभूमेरल्पायुः प्राप्तवान् दिवम् ।
तस्मै सम्पादिता ह्येषा कृतिः श्रद्धालुना मया ।।
तत्स्मृतौ तत्पितुः स्नेहसम्बन्धात् सुसमर्प्यते ।
स्वर्गेऽसौ मुदमाप्नोतु दिव्यात्माऽनेन कर्म्मणा ।।

—उदयनाथः

उपोद्घातः

इयं सुरसरस्वती सकललोकवन्द्या भव-
न्त्यपूर्वगुणगुम्फिता हृदयकञ्जपुञ्जप्रिया ।
सुवर्णमणिमालिका लसितदिव्यशोभाश्रयो
जयत्यखिलभारती विभवभारभूरम्बिका ॥१॥

यदीयसुषमाऽसमा भवति भाविता भूतले
समस्त-जनमस्तकस्तुतमिहास्ति यस्या महः ।
यदन्तरतिविश्रुता श्रुतिरशेषसिद्धिप्रदा
समेत्य हृदि सा स्फुटं दिशतु मार्गमग्र्यं शुभम् ॥२॥

सेयं संस्कृतसरस्वती भाषान्तरप्रसूर्निजमहिम्ना कं सचेतसं विद्वांसं नाश्चर्यसागरे निमज्जयति; न वा वशीकरोत्यस्या गुणगौरवं गापयितुं तद्धृदयम्। अस्यामेव हि भाषायामधुनाऽपि विज्ञानवैभवचमत्कारैरन्धीकृतेऽस्मिन् विश्वस्मिन् दृश्यन्ते तादृशानि विश्वम्भरकृपया क्वचित्क्वचिदस्या दरिद्रविद्वद्गृहे महता प्रयत्नेन संरक्षितानि ग्रन्थरत्नानि येषामेकस्य कस्यचिद्दर्शनमहिम्ना गते १९३३ तमे वर्षे जूनमासस्य २४ तमे दिने नभसि ग्रहस्थितिं निभाल्य षड्भ्यो मासेभ्यः प्रागेव १९३४ तमवर्षस्य जनवरीमासस्य पञ्चदशे दिवसे बिहारवङ्गासामनेपालप्रान्तेषु भाविनोऽतिदुरूहस्य भूकम्पस्य वेङ्कटेश्वरसमाचारपत्रस्य संवत् १९९० श्रावणमासस्य चतुर्दशदिने प्रकाशितेऽङ्के सूचना समुद्घोषिताभूत्। किमितोऽप्यधिकं प्रत्यक्षमाहात्म्यं क्वचिदन्यत्रापि भाषायाम् ? इदमप्यतिरोहितं सर्वेषामेव विपश्चितां यदधुनास्या देवभाषायाः कीदृश्यनभिलषिताननकूला स्थितिरिति। भाषान्तरे च विद्यमानानां ग्रन्थानां

प्रचारार्थन्तु वैदेशिकाः कथमिव प्रवर्तन्ते इत्यपि न रहस्यम्। तथापि पूर्वं प्रदर्शितश्चमत्कारोऽसौ कन्न सहृदयं नास्तिकमपि संस्कृतसाहित्यगुणगौरवं स्तोतुं प्रैरिरत्। इदमेव हि साहित्यं भारतवासिनां देशान्तरेऽपि गुणगौरवख्यापनायै प्रभवति। अस्मिन् संस्कृतसाहित्ये सर्व एव लौकिका अलौकिकाश्च विषयाः सन्तीति नागोचरं विवेकशालिनां विदुषाम्। तेषु विषयेषु वेदास्तदङ्गानि च सर्वप्राधान्यमाश्रयन्तीति च सर्वसम्मतम्। तेषु वेदाङ्गेष्वपि मुखस्थानतया व्याकरणस्य प्रधानतया परिगणनमपि प्राचीननव्यविद्वद्गणाभिमतमेव। तदिदं व्याकरणं संस्कृतसाहित्यसागरं प्रवेष्टुकामानां महापोतसदृशमुपकारकमवश्यमेवावलम्बनीयं भवतीति निःसंशयं विद्मः। एतदध्ययनप्रयोजनानि तु प्रारम्भ एव श्रीमद्भगवत्पतञ्जलिमुनिना स्वमहाभाष्ये प्रोक्तानि तत एवावगन्तव्यानि न, च मयात्र संक्षिप्तभूमिकायां प्रदर्शनीयानि। तस्यैतस्य व्याकरणस्य प्राचीना नव्याश्चानेके भेदा उपलभ्यन्ते। तेषु पाणिनीयं व्याकरणमेव सम्पूर्णं संक्षिप्तं च सर्वातिशायि प्रतीयते। नैतादृशं लौकिकवैदिकशब्दसाधनपरं पूर्णमन्यद्व्याकरणमिह प्रत्यक्षगोचरम्। अस्मिन् हि व्याकरणे पाणिनीये पाणिनिना मुनिना निर्मिताष्टाध्यायी तद्विवरणपरं पतञ्जलिमुनिप्रणीतं महाभाष्यञ्च प्रचलितनिखिलग्रन्थापेक्षया मूलस्थानं मुख्यताञ्चार्हतः। एतद्ग्रन्थद्वयमेवाधीत्य महावैयाकरणतामधिगन्तुम्प्रभवति पुरुषः। मूलभूताया अतिसूक्ष्मरूपाया अष्टाध्याय्याः सुविस्तृतमर्थं परमप्रयत्नेन प्रदर्शयता महाभाष्यकारेण कियदुपकृतमिति पर्यालोचनपरायणमार्मिका एव जानन्ति। महाभाष्यसदृशस्य महानिबन्धस्यानुद्भवेऽपि पाणिनीयव्याकरणस्येदृशोऽतिव्यापको व्याकरणान्तरातिशायी प्रभावो भुवि लक्षितो भवेदेवेति न हठाद्धृदयविश्वासः। अतोऽष्टाध्याय्या इव महाभाष्यस्यापि व्याकरणग्रन्थेषु सर्वापेक्षया समुज्जृम्भमाणं प्राधान्यं लक्ष्यते। तस्यैतादृशस्य विद्वद्धृदयङ्गमस्य महाभाष्यस्यानेकाष्टीका दृष्टिपथमारोहन्ति। तासु महामहोपाध्यायकैय्यटनागेशभट्टविरचितौ प्रदीपोद्योतावेवाधिकमुपकुरुत इति तत्प्रचारोऽपि तथैव दृश्यते। परन्तु तयोरपि क्वचिदतिकाठिन्यात् क्वचिच्च विवरणीयानामप्यं-

शानामविवरणाद्बालबुद्धयश्छात्रा अनतिप्रखरमतयोऽध्यापकाश्चाध्ययनाध्यापनयोः क्लेशमनुभवन्तो दृष्टाः । तदेतेषां बहुभिः प्रेरितास्तत्रभवन्तो व्याकरणन्यायाचार्याः पण्डितशिरोमणयो श्रीमहेशझाशर्माण उपकारार्थमध्ययनाध्यापनयोः सरलतासम्पादनार्थञ्च सुविशदां विमलां नाम नवाह्निकमहाभाष्यटीकां विरचय्य प्रकाशितवन्तः । आशास्महे गुणैकपक्षपाता विद्वन्मण्डली परीक्षार्थिनश्छात्राश्च विमलामिमां गृहीत्वा विमलां बुद्धिमासादयिष्यन्तीति ।

भवदीयो—
हरिशङ्करपाण्डेयः
बिहारसंस्कृतशिक्षोपाध्यक्षः

डॉ० (प्रो०) कृष्णानन्द झा
आचार्य (व्याक./सा.) एम्.ए., पी.एच्.डी.
भूतपूर्व प्राचार्य एवं अध्यक्ष
स्नातकोत्तर - व्याकरण - भाषाविज्ञान - विभाग
का.सिं.द.सं. विश्वविद्यालय, दरभंगा (बिहार)

दूरभाष - ०६२७३-२८१२४६
मोबा० - ९९३१०६६६५०
९९३४०२६४९३

निवास - ''श्रीकृष्ण निकेतनम्'' ग्राम-गंगौली, पोस्ट-राजे, (सरिसबपाही) जिला-मधुबनी, ८४७४२४

दिनांक - श्रीनागपञ्चमी २०६६ वि.

आमुखम्

१. **भारतम्**

सनातनकृतौ ज्ञाने विज्ञाने प्रतिभारतम् ।
जयत्यनारतं राष्ट्रं भास्वरं भुवि भारतम् ।।१।।
मानवत्वस्य रक्षायै देवत्वप्राप्तयेऽनिशम् ।
यतन्ते विशदालोका लोका यत्रादिकालतः ।।२।।
कालतो देशतोऽवस्थादेहतो भिन्नतां गताः ।
अप्याचारा विराजन्ते यत्र नो खिन्नतां गताः ।।३।।
सैषा सुशोभते भव्या भारतीया हि संस्कृतिः ।
धर्मप्राणाः कृतत्राणाः प्राणिनो यत्र निर्भयाः ।।४।।
देवत्वसाधिका सेयं देववाणीमुपाश्रिता ।
संस्कृतिः, प्रथिता सूक्तिः'संस्कृतिः संस्कृताश्रिता' ।।५।।

२. **संस्कृतम्**

संस्कृतं नाम दैवी वाक् पोषिता हि महर्षिभिः ।
कल्पवल्लीव सत्कामान् सेविता सम्प्रयच्छति ।।६।।
साङ्गोपाङ्गा श्रुतिर्यत्र स्मृतिभिः परिपोषिता ।
विश्वं विश्वम्य विज्ञानं ज्ञानं च साधयत्यलम् ।।७।।

जननी विश्वभाषाणां देहेऽस्मिन् मनुजन्मनः ।
निसर्गतः प्रकृत्यैव स्थापितेयं सनातनी ॥८॥
स्थाने हि कण्ठताल्वादौ यत्नतो व्यञ्जिता स्फुटम् ।
वैखरी - वितता वाणी संस्कृता सुप्रकाशते ॥९॥
साधु शब्दान् सुसंस्कृत्य संस्कृताख्याविधायकम् ।
नित्यं व्याकरणं यस्य शङ्करेण प्रकाशितम् ॥१०॥

३. **व्याकरणम्**

सिद्धप्रयोगान् विज्ञातुं लाघवेन विभागतः ।
प्रकृतिप्रत्ययादीनां, शब्दशास्त्रं प्रकाशितम् ॥११॥
शास्त्रान्वितः सुप्रयुक्तो विज्ञातार्थः फलत्यलम् ।
शब्दस्तस्मादिदं शब्दशास्त्रमावश्यकं मतम् ॥१२॥
ऐन्द्रादि प्रथितं देववाचो व्याकरणं भुवि ।
संक्षेपान्निर्मितं भाषानियमानां प्रबोधकम् ॥१३॥
किन्तु वेदे च लोके च संस्कृतस्य स्वभावतः ।
लघुना सरलेनापि पथा साध्वनुशासनम् ॥१४॥
वार्तिकेन महाभाष्यग्रन्थेन परिवर्धितम् ।
राजते पाणिनीयं हि शास्त्रं सर्वैर्निषेवितम् ॥१५॥
प्राधान्यादुपजीव्यत्वाच्छास्त्राणां, वदनं श्रुतेः ।
वेदाङ्गप्रमुखं सर्वैः स्वीकृतं पाणिनीयकम् ॥१६॥
त्रिमुनि प्रथितं ह्येतत् पाणिनीयानुशासनम् ।
पातञ्जलं महाभाष्यं सर्वथा तत्र पूजितम् ॥१७॥
शब्देऽर्थे दर्शने शाब्दे ये सिद्धान्ता व्यवस्थिताः ।
तेषामब्धिस्वरूपं हि शास्त्रं पातञ्जलं परम् ॥१८॥
यथा धर्मार्थकामानां तथा मोक्षस्य साधकम् ।
पातञ्जलदिशोद्दिष्टं पाणिनीयानुशासनम् ॥१९॥
आश्रित्येदं हरिश्चक्रे ग्रन्थं वाक्यपदीयकम् ।
तत्त्वं दार्शनिकं भाषाविज्ञानं यत्र बोधितम् ॥२०॥

सूत्रवार्तिकयोः सम्यग् गूढाभिप्रायबोधकम् ।
व्याख्यातं कैयटेनेदं नागेशाद्यैः प्रबोधितम् ॥२१॥
मिथिलायां महाभाष्य गूढतत्त्वप्रकाशकाः ।
जयदेवादयो दीनबन्धु प्रभृतयो बुधाः ॥२२॥
कौमुद्यां काशिकायां च शब्दरत्ने च शेखरे ।
मैथिलैः सूरिभिर्भाष्यतत्त्वं व्याख्यासु बोधितम् ॥२३॥

४. **मिथिलामहिमा**

जानकीजन्मभूमिर्या सिद्धिस्थानं निषेविता ।
सिद्धैः श्रीशारदापूर्णप्रसादेन प्रकाशिता ॥२४॥
मिथिलाऽशिथिला सेयं, ज्ञाने कर्मणि विश्रुताः ।
विद्वांसः साधका यत्र याज्ञवल्क्यादयः स्थिताः ॥२५॥
गौतमोदयनाचार्य-गङ्गेशशङ्करादयः ।
जाता मनीषिणो येषामद्यापि विशदं यशः ॥२६॥
तीरभुक्ति समाख्येयं भूमिः पुण्यजलाशया ।
भुक्तिदा सर्वदा चान्ते योगतो मुक्तिदा सताम् ॥२७॥
श्रौत्रियैर्नैष्ठिकैर्विप्रैः तीर्थस्थानेषु सेविता ।
श्रीसीतावरसम्पुष्टा तुष्टान्तःकरणैर्युता ॥२८॥

५. **'विमला' व्याख्याकारपरिचयः**

तस्यां 'मधुवनी' नाम मण्डलं मण्डितं बुधैः ।
शोभते सम्पदा धर्ममर्मज्ञैश्च निषेवितम् ॥२९॥
'गङ्गौली' वसतिस्तत्र लघुकायापि गौरवम् ।
बिभ्रती बुधवर्याणां धार्मिकाणां निवासतः ॥३०॥
तत्रावदातवंशेऽभूद् झोपाख्यो वत्सगोत्रजः ।
'गङ्गाधर'स्ततो धीमान् जातो 'गुणधरो' गुणी ॥३१॥
भ्रातरौ, शाब्दनिष्णातो यस्य धीमान् 'गदाधरः' ।
'जगद्धर'श्च विख्यातो मीमांसकशिरोमणिः ॥३२॥
'विन्ध्येश्वर्या'न्ततः सम्यग् ग्रहतारासमन्विते ।

समयेऽभून्महेशाख्यः पुत्रो वंशविभूषणः ॥३३॥
प्राप्तश्रोत्रियसंस्कारो यथाकालं यथोचितम् ।
सद्गुरुभ्यो दृढं शास्त्राभ्यासात् कृतमतिर्बभौ ॥३४॥
शब्दशास्त्रे विशेषेण नव्यन्यायादिदर्शने ।
अचिराद्दस्य विद्वत्सु दिक्षु प्रसरितं यशः ॥३५॥
शिष्याणां साधुबोधाय मोदायानेन धीमताम् ।
महाभाष्यस्य 'विमला' विवृतिर्निर्मिताऽमला ॥३६॥
नव्यन्यायदिशा शाब्दसूक्ष्मतत्त्व समीक्षणे ।
'विमला'या विशेषेण शैली विद्वत्सु संस्तुता ॥३७॥
भाष्यगूढ़ार्थपङ्क्तीनां साक्षात्संलापनेऽचिरम् ।
'विमले'यं सुविख्याता व्याख्या संख्यावतां कुले ॥३८॥
न्याये तर्कप्रदीपोऽथ ग्रन्थोऽनेन विनिर्मितः ।
यत्र सूक्ष्मेक्षिका ग्रन्थकारस्य परिलक्ष्यते ॥३९॥
धर्मशास्त्रे नीतिशास्त्रे ग्रन्थाश्चानेन निर्मिताः ।
कृतयोऽस्य निगूढार्थ सम्यग्बोधाय विश्रुताः ॥४०॥
दर्शनं शब्दशास्त्रं च विषयीकृत्य वादिनाम् ।
प्रवृत्ते विदुषां वादे शास्त्रार्थोक्तिविशारदः ॥४१॥
मनीषिशेखरो धीमान् 'महेशो' विजयश्रिया ।
नैकवारं वृतो विद्वन्मूर्धन्यैरभिनन्दितः ॥४२॥
सस्नेहं शिष्यवर्गेऽस्याध्यापनं तत्त्वबोधनम् ।
कारुण्यं प्रथितं साक्षात् पुत्रवत् परिपालनम् ॥४३॥
शिष्येष्वन्यतमोऽमुष्य 'कृष्णानन्दो'ऽपि विद्यते ।
कृतकृत्योऽस्य वैदुष्य-कारुण्याभ्यां प्रपालितः ॥४४॥
सदाचारो गुरोर्भक्तिर्धर्मे श्रद्धा सनातने ।
सामाजिकैः सदा साधुर्व्यवहारः प्रशंसितः ॥४५॥
एकत्रैष गुणग्रामो गुरावस्मिन् सुविश्रुतः ।
पूज्यो जनपदे तस्मादासीदेष सदा जनैः ॥४६॥

६. **विमलाया द्वितीयं संस्करणम्**

दुष्प्राप्यतां गतेऽमुष्मिन् ग्रन्थे हि चिरकालतः ।
कृतः प्रकाशने यत्नः संस्थानेनास्य संस्तुतः ॥४७॥
सद्वंशविद्यासंस्कारैर्भूषितः शाब्दिकः सुधीः ।
श्रीमानुदयनाथोऽस्य साधु सम्पादने वृतः ॥४८॥
सम्पाद्य साधु संशोध्य मुद्रणादेरशुद्धताम् ।
ग्रन्थरत्नमिदं, सोऽयं कृतकार्योऽधुना स्थितः ॥४९॥
विद्यावाचस्पतेश्च श्रीशशिनाथस्य धीमतः ।
अहैतुकी कृपा ह्यस्याः कृतेः सम्पादने स्थिता ॥५०॥
अन्यैश्चापि बुधैरस्याः कृतेः सम्पादने मुदा ।
साहाय्यं विहितं, तेषां कृतज्ञाश्च वयं सदा ॥५१॥

— **झोपाख्यकृष्णानन्दस्य**

भूमिका

सनातनहैन्दवसंस्कृतिसंरक्षणाय तथा समाजोपकारकनिखिलतत्त्वज्ञानाय, तन्माध्यमेन निखिलमानवलोकस्य सनातनदैवऋषिमुनिप्रणीतवैदिकमार्गप्रापणद्वारा सर्वमपि मनुष्यलोकं मोक्षप्रापणाय च परमकारुणिकस्य निखिलदेवगणस्य महत्यानुकम्पया सकललोकोद्धाराय विधातृसङ्कल्पमाध्यमेन चत्वारो वेदाः परमात्ममुखान्निस्सृताः । ते च वेदाः ऋग्यजुस्सामाथर्वाख्याश्चतुर्धा व्यभाजिषत। यथा लोके सर्वेऽपि मानवास्समाजे सन्मार्गे सन्तः परमात्मतत्त्वप्रभावजसकलसत्कर्मानुष्ठानद्वारा निखिलश्रुतिस्मृत्युपदिष्टानि पूतानि सत्कर्माणि कुर्वन्तः समाजस्यादर्शभूताः पूताश्च भवन्तो निखिललोकोद्धारका भवेयुस्तदर्थं ऋषिभिर्मुनिभिश्च व्याकरणन्यायमीमांसावेदान्तादिशास्त्राणि प्रण्यनायिषत। एतान्येव शास्त्राणि दर्शनमिति नाम्ना व्यपदिश्यन्ते। एतानि दर्शनान्यास्तिकनास्तिकभेदेन द्विधा व्यभाजिषत। तत्र न्यायमीमांसावेदान्तादीन्यास्तिकदर्शनमिति नाम्ना, चार्वाकबौद्धार्हदिगम्बरसौम्यादीनि नास्तिकदर्शनमिति नाम्ना च लोके प्रसिद्धानि वर्त्तन्ते। एवं स्थिते नैके दार्शनिका व्याकरणमास्तिकदर्शनेषु, नास्तिकदर्शनेषु वा नान्तर्भूतं भवति। अतो व्याकरणं दर्शनं न भवतीति प्रौढ्या केचन जल्पन्ते। तदसत्। यतो हि भगवान् पाणिनिः व्याकरणशास्त्रस्य मौलिके अष्टाध्यायीग्रन्थे तपरस्तत्कालस्य (१-१-७०) अवङ्स्फोटायनस्य (६-१-१२३) इत्यादिसूत्रेषु मध्यमानादाभिव्यङ्ग्यमखण्डवाक्यस्वरूपं वाचकशब्दतत्त्वं स्फोटाख्यमुपदिष्टवान्। अयमेव स्फोटः अखण्डवाक्यस्वरूपः प्रणवरूपो निर्गुणो निष्क्रियो निरञ्जनो निराकारी मोक्षप्रतिपादक इत्येवं क्रमेण वार्तिकभाष्यकारादिभिः स्वस्वप्रणीतेषु ग्रन्थेषु साङ्गोपाङ्गं व्यवृण्वि। अद्वैतवेदान्तदर्शने निखिलैरनेकैः प्रमाणैरुपपत्तिभिश्च तच्छास्त्रीयग्रन्थप्रणेतृभिस्सर्वैः प्रत्यपादि यन्निर्गुणं, निष्क्रियं, निरञ्जनं, निराकारि शुद्धबुद्धमुक्तस्वरूपमन्तःकरणावच्छिन्नं शुद्धं परमात्मचैतन्यतत्त्वं तदेव मोक्षस्वरूपमित्यभिवर्णितम्। तदेवाधारीकृत्य पाणिनीयव्याकरणे सूत्रकारादारभ्याऽर्वाचीनवैयाकरणनागेशं यावत् सर्वे

वैयाकरणमूर्धन्या वेदान्तशास्त्रीयेण शुद्धतत्त्वेन सह व्याकरणशास्त्रप्रतिपादितस्य अखण्डमध्यमावाग्रूपस्य परमात्मस्वरूपस्य स्फोटतत्त्वस्य तुलनां विधाय तत्तुल्यत्वान्मोक्षप्रतिपादकाखण्डवाक्यस्फोटतत्त्वप्रतिपादकस्य व्याकरण-शास्त्रस्यापि मोक्षप्रतिपादकत्वेनेदमपि व्याकरणं दर्शनं भवतीति द्रढयन्ति। यथा शङ्करभगवत्पादादयस्तत्त्वज्ञाः स्वीयवेदान्तशास्त्रग्रन्थेषु जीवब्रह्मणोरै-क्यप्रतिपादनद्वारा वेदान्तदर्शनस्य अद्वैतत्त्वं प्रतिष्ठापयन्ति तथैव पाणिनिरपि स्वप्रणीते अष्टाध्यायीग्रन्थे 'अ अ' इति सूत्रं प्रणिनाय। तत्सूत्रे तेनाकारस्य द्विरुक्तिःकृता। शिवभक्तः पाणिनिश्शिवप्रसादलब्धमक्षरसमाम्नायमाधारीकृत्य शिवमूलकत्वेन पदशास्त्रमारभ्यान्ते 'अ अ' (८-४-६८) इति सूत्रस्थद्वितीयाकारेण विष्णुस्मरणरूपं मङ्गलमाचरन् शिवकेशवयोरभेदं प्रत्यपादयत्। तथैव शिवादिभ्योऽण् (४-१-११२) इति सूत्रे शिवस्मरणरूपं मङ्गलं विधाय वासुदेवार्जुनाभ्यां वुन्'' (४-३-८८) इति सूत्रे वासुदेवशब्द-मुच्चार्य अर्जुनशब्दस्य परनिपातत्वं, वासुदेवशब्दस्याभ्यर्हितत्वात् पूर्वनिपातत्वञ्च कृत्वा भगवतोः शिवकेशवयोरुभयोरप्यभेदपरिकल्पनाद्वारा पाणिनीयव्याकरणस्याद्वैतदर्शनत्वमपि महर्षिः पाणिनिस्समर्थयामास। एवञ्चात्र पाणिनिसूत्रेषु महर्षिपाणिनिना शिवकेशवयोर्मङ्गलाचरणस्य विहितत्वान्निर्गु-णाद्वयवादिभिरेव शिवकेशवयोरभेदस्य सर्वदा सर्वथा च समर्थितत्वान्निर्गुणा-द्वयब्रह्मवादिना पाणिनिना व्याकरणस्य प्रणीतत्वेन तत्प्रणीतं व्याकरणमा-स्तिकमद्वैतदर्शनं भवतीति सुस्पष्टं ज्ञायते। निर्गुणाद्वयवादिन एव खलु शिवकेशवयोरभेदमङ्गीकुर्वन्ति।

इदानीम्प्रकृतमनुसरामः—सुप्रथितमिदं विपश्चिदपश्चिमपश्चिमेषु यद्भाषापरिज्ञानाय व्युत्पत्तये च व्याकरणकोशयोरुपायमुख्यत्वेऽपि भाषायाः स्वरूपसंघटनं व्याकरण एव सर्वात्मना आयतत इति। व्याकरणं शब्दशास्त्रं शब्दस्यान्तरार्थं व्यवहारप्रयोजकं ज्ञानमपि दृश्यमाने नामरूपात्मकेऽस्मिन् जगति नोदेति "अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते" इति न्यायात्। शब्दराशेश्चापि सौविध्येन सम्यक्च ज्ञानं व्याकरणमन्तरा न सम्भवति। संस्कृतशब्दराशेरनायासेन बोधाय एतच्च व्याकरणमपि बहुविधं प्रसिद्धम्। तत्र —

"ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकलं पाणिनीयकम् ।।"

इति श्रीतत्त्वनिधावुक्तेः । अमरजैनेन्द्रादिकृतानि अप्युपर्युक्त-व्याकरणान्तराणि विद्यन्ते । तान्यतिरिच्यापि सुपद्मव्याकरणं जनकजाजनि-भूगरिष्ठैः आचार्यप्रवरैः पद्मनाभमिश्रैरपि प्रण्यनायि निश्चप्रचम् । परमिदानीं समुपलभ्यमानेषु पाणिनीयमेव व्याकरणन्तेषु पदशास्त्रेषु सर्वाङ्गीणं सर्वोपयोगित्वेन च प्रधानं, पठनपाठनेऽपि समादरणीयञ्च लौकिकालौकि-कसकलशब्दव्युत्पादकत्वादिति नाननुमतं केषामपि सदसद्विवेचकानाममरवाणी-प्रणयिनाम् । काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमित्यभियुक्तव्यवहारादद्यत्वे पाणिनीयमधीयानानां तदध्यापकानाञ्च नवसु व्याकरणेषु मणिरिव विराजमानं पाणिनीयं व्याकरणमेव बहूपकारकं भवति । एतादृशव्याकरणस्य सूत्रकर्ता भवति भगवान् पाणिनिः । तेन अशेषवैयाकरणानुजिघृक्षया व्याकरणे प्रथममष्टाध्यायीनामकस्सूत्रग्रन्थः प्रण्यनायि । तस्मिन् ग्रन्थे अष्टावध्यायाः, प्रत्यध्यायं चत्वारः पादाश्च वर्तन्ते। तत्र ग्रन्थे प्रथमाध्यायस्थप्रथमपाद-स्थप्रथमसूत्रादारभ्य अष्टमाध्यायस्थप्रथमपादस्थान्तिमसूत्रं यावत् पाणिनिना प्रणीतस्य सूत्रभागस्य सपादसप्ताध्यायीति अष्टमाध्यायस्थद्वितीयपादस्थ-प्रथमसूत्रादारभ्याष्टमाध्यायस्थचतुर्थपादस्याष्टचत्वारिंशत्सूत्रान्तभागस्य त्रिपादीति च पारिभाषिकनामनी शब्दशास्त्रे विराजेते । सर्वासां भाषाणां मातृस्थानापन्नायां निखिलदेवगणेन सम्भाष्यमाणायां संस्कृतभाषायामेव चत्वारो वेदाः साङ्गास्सरहस्यास्सर्वाणि शास्त्राणि च विराजन्ते। तेषु सर्वेषु विद्यमाननिखिलवैदिकलौकिकशब्दसाधुत्वान्वाख्यानायानादितो निःश्रयणीव व्याकरणमेव मूलं भवति । गच्छति काले संस्कृतवाङ्मये लौकिकभाषायां विद्यमाननिखिलासाधुशब्देभ्यो विविच्य साधुशब्दान्वाख्यानाय पाणिन्युपदिष्टे व्याकरणे स्थितान्येव सूत्राण्यधिकृत्य शब्दसाधुत्वान्वाख्यानं सुशकं, नाऽन्येन येन केनाऽप्युपायेन ।

एवं स्थिते यदा लोके भाषा दिनानुदिनप्रवर्धमाना अभूत् तदा लौकिकभाषायां केचनाधुनिका अपि साधुशब्दाः प्रादुरभूवन् । तेषां शब्दा-

नामष्टाध्यायीग्रन्थमुखेन साधुत्वान्वाख्यानमसम्भवं मन्वानः कात्यायनमुनिरष्टाध्यायीग्रन्थमधिकृत्य वार्तिकानि प्रण्यनैषीत्। तेषां वार्तिकानां चय एव वार्तिकग्रन्थ इति नाम्ना प्रसिद्धिमवाप। एतादृशवार्तिकग्रन्थस्याऽऽचार्यव्याडिना लक्षश्लोकात्मकः कश्चन संग्रहग्रन्थो व्यरचि। परन्तु स च ग्रन्थः कालक्रमेण लुप्तस्सन् नष्टप्रायोऽभूत्। भगवता भर्तृहरिणाऽपि वार्तिकग्रन्थमधिकृत्य वार्तिकोन्मेषाख्यं ग्रन्थरत्नं प्रणीतं सदपि कालक्रमे तदपि लुप्तप्रायं सत् नाममात्रमवशिष्यते। तावन्मात्रेण वार्तिकोन्मेषनामको ग्रन्थो नास्तीत्यस्माभिर्वक्तुं न शक्यते। कुत इति चेत् वाक्यपदीयव्याख्यानयोर्हेलाराजपुञ्जराजीययोः "प्रपञ्चितश्चैतदस्माभिर्वार्तिकोन्मेषे" इत्यादीनां पङ्क्तीनां दर्शनात्। दैवदुर्विपाकवशात् यदा संग्रहग्रन्थो नष्टप्रायोऽभूत् तदा बैजिसौभवहर्यक्षादयो नैयायिकाः पदशास्त्रीयपारिभाषिकपदानि स्वीकृत्य स्वस्वन्यायशास्त्रीयवासनया तन्मतानुसारं तेषां पारिभाषिकपदानां विपरीतव्याख्यानं कृत्वा व्याकरणमतखण्डने बद्धदीक्षा अभूवन्। तेषां नैयायिकादिदर्शनान्तरीयमतनिराकरणपूर्वकं पाणिनीयं मतं निर्दुष्टं प्रतिष्ठापयितुं भगवता पतञ्जलिना महाभाष्यं प्रण्यनायि। अर्थात् यदा गच्छति काले पुनर्भाषा प्रवर्धमानाऽभूत् तदा पाणिनीयसूत्रवार्तिकग्रन्थद्वयमाध्यमेन निखिलवैदिकलौकिकशब्दसाधुत्वान्वाख्यानमसम्भवं मन्यमानो भगवान् पतञ्जलिरेकस्मिन् शुचाववकाशे सूत्रवार्तिकग्रन्थयोरुपरि महाभाष्यमेतत् प्रणिनाय। ग्रन्थेऽस्मिन् यत्र यत्र सूत्रवार्तिकग्रन्थद्वयमाध्यमेन शब्दसाधुत्वान्वाख्यानं सुशकं तत्र तादृशानि सूत्राणि, वार्तिकानि, तथा सूत्रवार्तिककारयोर्मतञ्च सम्यक्तया भगवता पतञ्जलिना मूर्धाभिषेचितम्। यत्र सूत्राणां, वार्तिकानाञ्चाभावेऽपि अर्थात् सूत्रवार्तिकमाध्यमेन प्रतिपादनीयस्य वैदिकलौकिकसाधुशब्दान्वाख्यानस्यान्यथासिद्धत्वं दृश्यते तादृशस्थलेषु कतिपयसूत्राणि, कतिपयवार्तिकानि च भगवता भाष्यकृता प्रत्याख्यातानि। यानि चात्र विषये विस्तरभयादितोप्यधिकं मया नैव तन्यते।

बहूनां विदुषां मते प्राक्पाणिनीयम् एवंविधं सर्वतोमुखं व्याकरणं नासीन्न वा इन्द्रचन्द्रादयः व्याकरणशास्त्रकर्त्तारः "इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः। पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥" इति कथनात्।

म.म. गिरिधरशर्म्मचतुर्वेदमहोदया अपि कथयन्ति — "शाब्दिकत्वन्तु शब्दशास्त्रप्रौढत्वम्, शब्दशास्त्रपारङ्गतत्वम्, शब्दशास्त्रप्रचारकत्व-मित्यादिभिरनेकैः प्रकारैः शक्यं व्यवहर्तुम्। शब्दशास्त्रपदेन च न केवलं व्याकरणमेव, अपितु कोशमीमांसादिकमपि ग्रहीतुं शक्यते। ...... ये चैतेऽष्टौ शाब्दिकाः परिगणितास्तेषु विभिन्नप्रकारकमेव शाब्दिकत्वं प्रमाणान्तरैः प्रसिद्ध्यति।" इति ।

यद्वा भवतु, परन्तु एतत्तु सर्वविदितमेवास्ति यत्पाणिनिव्याकरणं त्रिमुनिव्याकरणमिति संज्ञयापि प्रसिद्धम्, तत्र पाणिनिकात्यायनपतञ्जलीनां समानयोगदानत्वादिति। अतस्तेषामत्र किञ्चित्परिचयविषयेऽपि सूत्ररूपेण विचार्यते।

तत्र प्रथमो हि भगवान्पाणिनिः कतमं जनपदं स्वजन्मना मण्डयामास, कतरच्च मेध्यं कुलं समुददीधरदित्येतद्भन्त अनुपलब्धेतिहाससाधना निश्चेतुं न पारयन्ति। अथापि गुणाढ्यविरचितबृहत्कथामाधारीकृत्य भट्टसोमदेवप्रणीते कथासरित्सागरे प्रथमे कथापीठलम्बके चतुर्थतरङ्ग एवमुपलभ्यते —

"...... अथ कालेन वर्षस्य शिष्यवर्गो महानभूत् ।
तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत् ॥२०॥
स शुश्रूषापरिक्लिष्टः प्रेषितो वर्षभार्यया ।
अगच्छत्तपसे खिन्नो विद्याकामो हिमालयम् ॥२१॥
तत्र तीव्रेण तपसा तोषितादिन्दुशेखरात् ।
सर्वविद्यामुखं तेन प्राप्तं व्याकरणं नवम् ॥२२॥" इति

कथासरित्सागरीयां कथामाधारीकृत्य एतद्वक्तुं शक्यते यत् पाणिनेः पाटलिपुत्रेऽध्ययनं जातम्, महेश्वरादभिनवव्याकरणमनेनावापि, कात्यायनेन सह शास्त्रार्थश्चास्य समजायत। नन्दराजेनापि पाणिनेस्तत्र प्रतिष्ठापनं वर्णितमिति। आर्यमञ्जुश्रीमूलकल्प इति नामके बौद्धग्रन्थेऽपि पाणिनिना माणवेन सह महापद्मस्य सौहार्दं बभूवेत्युक्तम्। तेन पाणिनेः नन्दसमकालिकत्वं, पाणिनिकात्यायनयोश्च समकालिकत्वं पाटलिपुत्रनिवासश्च प्रमाणीक्रियते।

एवं हि त्रिकाण्डशेषे कोषे पाणिनिनामसु 'शालातुरीयः' इति पठनात्, गणरत्नमहोदधावपि वर्धमानेन जैनलेखकेन "शालातुरो ग्रामः, सोऽभिजनोऽस्यास्तीति शालातुरीयस्तत्र भवान् पाणिनिरिति" तद्विवरणाच्छालातुरो ग्रामोऽस्य भगवतः पाणिनेर्जन्मस्थानमित्युररीक्रियते। काशिकाव्याख्यायां न्यासग्रन्थेऽपि च (५-१-१ इति सूत्रव्याख्यायां) "अतः शालातुरीयेण प्राक् ठजश्च इति नोक्तम्" इति पाठोऽस्ति। तेनापि पाणिनेश्शालातुरीयत्वं सिद्ध्यति। अपि च वासुदेवशरणअग्रवालमहोदयानुसारेण ३१० संवत्सरे लिखिते एकस्मिन् गुप्तशिलालेखे पाणिनीयशास्त्रकृते 'शालातुरीयतन्त्रम्' इति प्राप्यते। एवञ्च सप्तम्यां शताब्द्यां खृस्तानन्तरमिहायातः 'श्यू आन्च्वाङ्' नामकश्चीनीयात्री स्वयं शालातुरग्रामं गत्वा तत्रत्यानां जनानां किंवदन्तीमाकर्ण्य शालातुरग्राम एव पाणिनेर्जन्मस्थानमिति तेन स्वकीये यात्रावृत्तान्ते लिखितम्। अनेनैव यात्रावृत्तान्तेन एतदपि सिद्ध्यति यदयं शालातुरग्रामो गान्धारदेशे (वर्त्तमानेऽफगानिस्तानदेशस्य कान्धारप्रान्ते) उद्भाण्डपुर (नगरमिदानीं कुम्भानद्याः काबुलनद्याः वा सिन्धोश्च संगमस्थाने ओहिन्दनाम्ना प्रसिद्धोऽस्ति) इति प्रसिद्धान्नगरात्प्रायेण क्रोशद्वयान्तरे लहुरग्रामसमीपेऽस्तीति। स्वयञ्च पाणिनापि "तूदीशलातुरवर्म........." (४-३-९४) इति, "सिन्धुतक्षशिलादिभ्योऽणञौ" इति च सूत्रप्रणयनद्वारा प्रदेशाविमौ स्मृतौ।

अतो गान्धारदेशोत्पन्नस्य पाणिनेः स्वानुजेन पिङ्गलेन सह अध्ययनार्थं पाटलिपुत्राऽऽगमनं तत्र च वर्षोपवर्षोपाध्याययोश्चरणकमलेषु शास्त्राध्ययनं जातमित्यनुमीयते।

पाणिनेः प्रतिस्पर्धी वर्षोपाध्यायान्तेवासी च कात्यायनः वार्तिककाराद्भिनोऽभिन्नो वा न जाने, किन्तु शुक्लयजुः श्रौतसूत्रप्रातिशाख्यप्रभृति ग्रन्थकारात्कात्यायनाद्भिन्नोऽयं कात्यायनः वररुचिनाम्नापि स्मर्यते। पाणिनेस्सूत्रवार्त्तिककारात् स्वर्गारोहणकाव्यनिर्माताप्यभिन्न इति केषांचिन्मतम्। तथैव वररुचिरपि कौटिल्येन स्वीयेऽर्थशास्त्रे राजनीतेराचार्यत्वेन स्मृतः, अपरस्तु विक्रमनवरत्नेषु स्मर्यते। वाररुचकाव्यस्यापि एकः प्रणेता

वररुचिरासीदिति तत्राप्यैक्यं भिन्नत्वं वेति सुदृढं वक्तुं दुष्करम्। परन्तु कथासरित्सागरे पाणिनि-कात्यायनयोः समकालिकत्वं परस्परं विद्वेषः शास्त्रार्थादिकञ्चोपनिबध्यते। तत्र कात्यायनस्य कौशाम्बीनिवासित्वमुक्तम्। भाष्यकारश्च "प्रियतद्धिता दाक्षिणात्याः, यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते" इत्यादिना दाक्षिणात्यत्वेन वार्तिककारमुपहसति। अतस्तेन दाक्षिणात्यत्वं स्फुटी भवति। कौशाम्ब्याश्च प्रयागप्रान्त एव स्थितत्वात्तस्योत्तरदेशवासित्वं सम्भवति। गिरिधरशर्म्मचतुर्वेद-महाशयानुसारेण कौटिलीयार्थशास्त्रे राजनीतेराचार्यत्वेन परिगणितः वररुचि-र्वार्तिककारात्कात्यायनादभिन्न आसीदिति सम्भाव्यते पाणिनिप्रकरणोक्तरीत्या अस्य कात्यायनापरपर्यायस्य वररुचेः कौटिल्यपूर्वभवत्वसम्भवादिति।

"पुष्यमित्रं याजयामहे" इति महाभाष्यस्योदाहरणाज्ज्ञायते यद्भाष्यकारस्य पतञ्जलेः समयः नरेन्द्र-पुष्यमित्रस्य समयश्च समानावास्तामिति। एवञ्च पुष्यमित्रपुरोहितोऽयमित्यपि बहवोऽभिप्रयन्ति। राजसभा-पुष्यमित्रसभा-चन्द्रगुप्तसभाप्रभृत्युदाहरणदर्शनाच्चन्द्रगुप्त-परभवत्वं तु अस्य सिद्ध्यत्येव।

गोनर्ददेशीयोऽयं पतञ्जलिः इति ''गोनर्दीयस्त्वाह'' आदि भाष्यकृद्वचनात्स्फुटीभवति। गोनर्ददेशश्चायमिदानीं "गोण्डा" इति नाम्ना उत्तरप्रदेशे प्रसिद्धः। पुष्यमित्रस्य यद्यपि प्रधानभूता राजधानी पाटलिपुत्रमासीत्, तथापि तेनाऽयोध्यायामपि उपराज्यस्थापनं कृतमासीदिति ऐतिहासिका विवृण्वन्ति। ततश्च गोण्डाप्रान्तवासिनः पतञ्जलेस्सम्भवत्ययोध्यायां वसता पुष्यमित्रेण सम्बन्धः।

त्रिमुनिप्रणीते व्याकरणेऽपि 'यथोत्तरं मुनीनां प्राभाण्यम्' इति भट्टोजिदीक्षितादीनां मतम्। निसर्गतस्तु पाणिनिसूत्रविषये यत्र कात्यायनेन काचिद्विप्रतिपत्तिरुत्थापिता उपसंख्यानादिकं वा कृतं तत्र कात्यायनस्यैव वचनं ग्राह्यम्। यत्र वा कात्यायनवचनानि खण्डयित्वा भाष्यकारेण कश्चित्प्रयोगः समर्थितः, वार्तिकं वा प्रत्याख्यातं तत्र भाष्यकारवचनमेवानुसृत्य प्रयोगाणां साधुत्वमनुसन्धेयमिति तेषामाशयः। एतेन भाष्यकारस्य प्रामाण्यं सर्वोपरि-

स्थितमिति सिद्धम्। स्वयमेव भाष्यकारादयः पाणिनिवचनं सर्वात्मभावेन प्रमाणयन्ति। यत्र वार्त्तिककारः सूत्रकृतः पाणिनेर्न्यूनताप्रदर्शनमेवाभिलक्ष्य वार्त्तिकरूपव्याख्याकरणे प्रवृत्तः, तत्रैव महाभाष्यकारस्य तु पाणिनेर्गौरवरक्षार्थमेव प्रवृत्तिर्दृश्यते। अतएव "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण" (१/१/१/३) इत्यादिकमनेकत्र तेनोद्धृतम्। किञ्च महाभाष्यकृता पाणिनेः सूत्रं छन्दोवत्स्वीकृत्य सर्वथा तस्य प्रामाण्यं सार्थकत्वञ्च प्रतिपादितम्। तथाहि पतञ्जलिराह- "सामर्थ्ययोगान्नहि किञ्चिदत्र पस्यामिशास्त्रे यदनर्थकं स्यात्" वचनमिदं व्याचक्षाणेन भट्टश्रीनागेशेन लघुशब्देन्दुशेखरेऽभिहितम्— "किञ्चिद् दृष्टादृष्टार्थवत्, किञ्चिच्छुद्धादृष्टार्थवत् सर्वथानर्थकं न किञ्चिदिति"। अतएव व्याकरणसिद्धान्तसुधानिधौ महाभाष्यव्याख्यानेऽभिहितं— "पाणिनेः सर्वथा अभ्यर्हितत्वात्, त्रिमुनिव्याकरणम् इति प्रसिद्धेश्च त्रयाणामपि मुनीनां पूजितत्वात् यथोत्तरं मुनीनां प्रामाण्यमिति वचनस्य पूर्वपूर्वमुनीनाम् उत्तरोत्तरमुनिवाक्ये तात्पर्यमिति भावः। अतः यत्र क्वापि वैदिकलौकिकशब्दसाधुत्वान्वाख्यानविषये सूत्रवार्तिकभाष्यग्रन्थानां तत्तद्ग्रन्थकाराणाञ्च मतविरोधो यदि सञ्जायेत तदा यथोत्तरं मुनीनां प्रामाण्यमिति पदशास्त्रीयसिद्धान्तमनुसृत्यावच्छेदकावच्छेदेन सर्वथा सर्वदा च निखिलशास्त्रज्ञैः भाष्यकारमतमेव मूर्धाभिषेचनीयं भवति। अतःपाणिनीये सूत्रवार्तिकग्रन्थाभ्यामनादितो महाभाष्यग्रन्थस्यैव मूर्धन्यत्वं वरीवर्तीति विद्वज्जनविदितमेवैतत्। इदञ्च व्याकरणमहाभाष्यं यद्यपि दर्शनमात्रेण सामान्यमन्दमध्यमाधिकारिणां वैयाकरणखसूचीनां सरलमिव प्रतिभाति तथाऽपि तद्भाष्यं सकलदर्शनसिद्धान्तमूलकगूढार्थतत्त्वबोधकं भवति। भगवता पतञ्जलिनेदं महाभाष्यं सम्भाषणमूलकं व्यरच्यत। मन्दमतीनां महाभाष्यग्रन्थदर्शनमात्रेणायं ग्रन्थो यद्यप्यतीव सुलभ इव भासेत तथाऽप्यन्ततस्तद्ग्रन्थपरिशीलने तद्ग्रन्थस्थं निगूढं मर्मगर्भमाशयं मन्दमतयो ज्ञातुन्न प्रभवन्ति। अत एवेदं महाभाष्यं समुद्रायमाणं दरीदृश्यते। महाभाष्यमेतन्न केवलं व्याकरणग्रन्थमात्रम्, अपि तु सर्वाण्यपि ज्ञातव्यानि विषयजातान्यत्र स्थले - स्थले सपरिकरं विवेचितानि। लौकिकव्यवहारात्प्राक्तनेतिहासपर्यन्तं

धर्मदर्शनानां सिद्धान्ताद्गूढतमानि विज्ञानानि यावत् सर्वमेतस्मिन्महाभाष्ये सम्यक् परिचेतुं शक्यते विद्वद्भिरिति । अस्मादेव कारणाद् व्याकरणमहाभाष्यम्महाभाष्यम्भवति, अन्यानि शाबरवात्स्यायनादीनि तु भाष्याणि एव । भाष्यान्तरेभ्योऽस्य व्याकरणमहाभाष्यस्येदञ्चापि वैशिष्ट्यं यदिदं भाष्यं न केवलं व्याकरणस्य निबन्धनम् । अपि च यावत् सर्वेषां न्यायबीजानामत्र ग्रन्थे प्रक्षालनं कृत्वा नैयायिकादिदर्शनान्तरीयमतानि निरस्य निर्दुष्टं शब्दतत्त्वमत्र प्रत्यपादीत्यस्माद्धेतोरस्य ग्रन्थस्य महाभाष्यमित्यन्वर्थं नाम सञ्जातम् । अत्र महाभाष्यग्रन्थे व्याकरणशास्त्रीयपारिभाषिकपदान्येव स्वीकृत्य नैयायिकादिदर्शनान्तरीयमतरीत्या स्वस्वन्यायमीमांसाशास्त्रवासनावासितान्तःकरणास्सन्तः स्वस्वशास्त्रीयवासनया व्याकरणशास्त्रीयपारिभाषिकपदमाध्यमेन नैकान् व्याकरणशास्त्रीयसिद्धान्तान् निराकृत्य पदशास्त्रस्याप्रामाण्यमापादयामासुः । अत्र विषये स्थालीपुलाकन्यायेन कानिचन स्थलानि मयोदाह्रियन्ते । तथाहि - व्याकरणशास्त्रग्रन्थेषु प्रख्याते प्रौढमनोरमाग्रन्थे मङ्गलश्लोके द्वितीयचरणे भट्टोजीदीक्षितेन सिद्धान्तकौमुदीव्याख्यां ''कुर्मः प्रौढमनोरमाम्'' इत्युक्तम् । तत्र प्रौढमनोरमाशब्दस्य व्युत्पत्त्यर्थवेलायां मनांसि रमयतीति मनोरमा, प्रौढानां मनोरमा प्रौढमनोरमा तामिति विग्रहो ग्रन्थकर्त्रा न्यरूपि । प्रौढमनोरमाव्याख्याने लघुशब्दरत्ने प्रौढमनोरमामिति पदस्य व्याख्यानावसरे किन्नाम प्रौढत्वमित्याकाङ्क्षायां हरिदीक्षितेन ''प्रौढत्वञ्च सकलदर्शनार्थज्ञानपूर्वकमहाभाष्यगूढार्थज्ञानवत्त्वमिति'' लक्षणमुखेन प्रौढत्वं पर्यष्कारि । अनेनेदं स्पष्टं ज्ञायते यद्भगवान् पतञ्जलिः स्वप्रणीते महाभाष्ये व्याकरणशास्त्रीयपारिभाषिकपदान्येवादाय स्वस्वशास्त्रवासनया नैयायिकादिदर्शनान्तरीयैराक्षिप्तान् निखिलानाक्षेपान् संखण्ड्य व्याकरणशास्त्रीयनियमानुसारं व्याकरणसिद्धान्तान् समर्थितवान् । तथाहि—

क) वृद्धिरादैच् इति सूत्रस्थभाष्यग्रन्थे आदैच् इत्यत्र चकारस्य कुत्वशङ्कावसरे ''कुत्वं कस्मान्न भवति, चोः कुः पदस्येति । भत्वात् । कथं भसंज्ञा ? अयस्मयादीनि छन्दसि, छन्दसीत्युच्यते, न चेदं छन्दः, छन्दोवत्सूत्राणि भवन्ति'' इति भगवता भाष्यकारेण प्रोक्तम् । तत्रादैच् शब्दस्य लौकिकत्वात् पदावयवस्यान्त्यस्य चकारस्य चोःकुः इतिसूत्रेण कुत्वं प्राप्नोतीति

भाष्यस्थप्रश्नाशयः। अनन्तरं कथं भसंज्ञा इति ग्रन्थादारभ्य आदैच्छब्दस्यापि वैदिकत्वं संसाध्य चकारस्य कुत्वं भाष्यकारेण न्यवारि।

ख) एवमेव "नञ्" इति सूत्रे भाष्येऽपि नञर्थनिरूपणावसरे पाणिनीयं नञ्सूत्रमादाय तस्य स्वीयन्यायशास्त्रवासनया नैयायिकास्समस्तासमस्तनञोऽभावार्थकत्वमेव प्रत्यपादयन्।

अयमत्र नैयायिकानामाशयः यत् नञ् इति सूत्रार्थवर्णनावसरे भगवता भाष्यकारेण "निवृत्तपदार्थकः" इत्यभाणि। तद्भाष्यग्रन्थस्य व्याख्यानावसरे निपूर्वात् वृतुवर्तने इत्यस्माद्धातोः भावार्थे नपुंसके भावे क्तः इति सूत्रेण क्तप्रत्यये कृते निष्पन्नस्य निवृत्तशब्दस्य निवृत्तिरित्यर्थः। निवृत्तिर्नामाभावः। तथाच नञ् निवृत्तपदार्थकः - अभावार्थको भवति। एवञ्च समस्तासमस्तनञोऽभाव एवार्थ इति।

वस्तुतस्तु निवृत्तपदार्थक इति भाष्यस्य पूर्वपक्ष्यैकदेशयुक्तत्वेन तादृशं पूर्वपक्षप्रतिपादकं "निवृत्तपदार्थकः" इति भाष्यमादाय समस्तासमस्तनञः अभावार्थकत्वप्रतिपादनं नैयायिकम्मन्यानां सुतरामनुचितमित्याशयेनैव भगवता पतञ्जलिना समस्तासमस्तनञ आरोपितार्थकत्वमेव प्रतिष्ठापितं, नतु तस्य अभावार्थकत्वम्।

ननु वैयाकरणभूषणसारे "अभावो वा तदर्थस्तु भाष्यस्य हि तदाशयात्" इति कारिकायाः पूर्वार्धेन नञोऽभावार्थकत्वं श्रीमता कौण्डभट्टेन महता प्रबन्धेन न्यरूपि। तत्र "अभावो वा तदर्थः अस्तु" इत्यत्र वाशब्दोऽवधारणार्थकः। तथा च अभावो वा = अभाव एव, तदर्थोऽस्तु नञर्थोऽस्तु, भाष्यस्य = निवृत्तपदार्थक इति भाष्यस्य तदाशयात् = अभावार्थकत्वाशयादित्यर्थस्य निष्पन्नतया समस्तासमस्तनञोऽभावार्थकत्वमेव युक्तन्न त्वारोपितार्थकत्वमिति वैयाकरणैरपि अगत्या अङ्गीकार्यमेवेति प्रश्ने अभावो वा तदर्थोऽस्तु इति कारिकायां वा शब्दस्यानास्थेत्यर्थः। तथा चाभावो नञर्थो मास्तु, भाष्यस्य = निवृत्तपदार्थकः इति भाष्यस्य तदाशयात् = आरोपितार्थकत्वाशयात् इत्येवार्थवर्णनस्यौचित्यादभावार्थकत्वं नञः सुसङ्गतं न भवतीति नञ् इति सूत्रे भाष्ये भगवता भाष्यकारेण समस्तासमस्तनञ

आरोपितार्थकत्वमेव सिद्धान्तितम् ।

ग) एवमेव समर्थः पदविधिः इति सूत्रे भाष्ये समर्थपदार्थनिरूपणावसरे समर्थो नाम सामर्थ्यविशिष्टः । सामर्थ्यं द्विविधम्—एकार्थीभावो व्यपेक्षा चेतीति कथयन् तत्रैकार्थीभावसामर्थ्यलक्षणविवरणावसरे भाष्यकारेण ''पृथगर्थानामेकार्थीभावः, समर्थवचनं कर्त्तव्यम् । क्व पृथगर्थानि ? क्व वा एकार्थानि ? वाक्ये पृथगर्थानि, राज्ञः पुरुष इति, वृत्तावेकार्थानि राजपुरुष इति'' इत्यादिग्रन्थमुखेन कृत्तद्धितादिवृत्तिषु एकार्थीभाव एव स्वीकार्य इति महता प्रबन्धेन भाष्यकारेण प्रतिपादितम् ।

एवं स्थिते केचन जैमिनीयवचनव्याख्यातारो नव्यनैयायिकपृष्ठानुयायिनस्सन्तः क्लृप्तया अवयवशक्त्यैव राज्ञः पुरुष इत्यादौ राजसम्बन्ध्यभिन्नः पुरुष इति बोधसम्भवे क्लृप्तावयवशक्तेः त्यागद्वारा अक्लृप्ताया एकार्थीभावरूपविशिष्टशक्त्याः कल्पने वैयाकरणानामत्यन्तं गौरवमिति व्याकरणमतं बहुधा आचिक्षिपुः । मीमांसकमतानुसारं यदि वृत्तावेकार्थीभावो नाङ्गीक्रियेत तर्हि मीमांसकम्मन्यानां रथकाराधिकरणवषट्कर्त्रधिकरणारुणाधिकरणेन्द्रपीताधिकरणादीनां बह्वधिकरणानां विरोधापत्तिः । अतो मीमांसकम्मन्यैरपि वृत्तावेकार्थीभावोऽवश्यमङ्गीकार्य एवेत्याकारकं मूर्धन्यभूतो व्याकरणसिद्धान्तो महाभाष्ये पतञ्जलिना प्रत्यष्ठापि । एतादृशमहत्त्वपूर्णसिद्धान्तसंस्थापनाय मीमांसकसिद्धान्ता अप्यत्र महाभाष्ये समुल्लिकाः कथिताः ।

घ) एवमेव व्याकरणमहाभाष्ये प्रथमाध्याये प्रथमपादे ''तपरस्तत्कालस्य'', ''अवङ्स्फोटायनस्य'' इति सूत्रयोर्भाष्यार्थव्याख्यानावसरे तत्राऽप्यखण्डवाक्यस्फोटनिरूपणावसरे शारीरकभाष्यस्थदेवताधिकरणसिद्धान्तः सप्रमाणं भगवत्पादैः प्रतिष्ठापितः ।

अनया दिशा महाभाष्ये निखिलदर्शनसिद्धान्ता जलनिधौ रत्नानीव व्यराजन्त । परमपूतेऽस्मिन् महाभाष्यग्रन्थे स्वीयशब्दशास्त्रसिद्धान्तनिरूपणावसरेऽवच्छेदकावच्छेदेन गोतमजैमिनीयवचनव्याख्यातृसिद्धान्ता भाष्यकारेण नैव पर्यनुयुञ्जिषत । यत्र व्याकरणशास्त्रसिद्धान्तसमन्वयावसरे पदशास्त्रसिद्धान्तेन सह नव्यनैयायिकमीमांसकादिदर्शनान्तरीयसिद्धान्तविरोधो जायेत

तत्रैव तेषां सिद्धान्तास्तत्तन्मतानि च भाष्यकारेण महाभाष्ये पर्यनुयुञ्जिषत। यत्र च विरोधो नास्ति तत्र दर्शनान्तरीयसिद्धान्तानपि महाभाष्यकारा आशिश्रियिरे। तद्यथा चैत्रस्तण्डुलं पचति इत्यत्र कर्तरि लकारे व्यापारमात्रं धात्वर्थः, फलं कर्मप्रत्ययार्थ इति प्राचीननैयायिकास्तन्मतनिराकरणपूर्वकं फलं तदनुकूलश्शारीरो व्यापारो धात्वर्थः, कृतिरेवाख्यातार्थः। तथाच तत्र नव्यनैयायिकमतानुसारं प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोध एव न्याय्यो, नतु धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोध इति नव्यनैयायिकाश्च स्वस्वग्रन्थेषु प्रत्यपादयन्। तन्मतनिराकरणपूर्वकं महाभाष्यादिग्रन्थेषु फलावच्छिन्नव्यापार एव धात्वर्थो, नतु कृतिः। तथाच तत्र कर्तरि लकारे व्यापारमुख्यविशेष्यकशाब्दबोध एव साधीयानिति तत्तद्ग्रन्थकारैस्सम्यग्व्यवृण्वि। तावन्मात्रेण वैयाकरणानां सर्वत्र धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोधस्वीकारे नास्ति दुराग्रहः। अतएव चैत्रस्य पाकः इत्यादिभावलकारस्थले नैयायिकाभिमतो धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोध एव महाभाष्येऽस्मिन् भाष्यकारेण समर्थितः। एवञ्च महाभाष्यकारस्य परमतखण्डने एव नास्ति दुराग्रहः। यत्र स्वीयपदशास्त्रसिद्धान्तसमन्वयसन्दर्भे नैयायिकादिदर्शनान्तरीयमतविरोधः स्यात् तत्रैव नैयायिकादिदर्शनान्तरीयसिद्धान्ता भाष्यकारेण न्यराकारिषत। अन्यत्र तेषां न्यायमीमांसादिदर्शनान्तरीयसिद्धान्ता अपि स्वमतपरिपुष्टये महाभाष्ये भाष्यकारेण समर्थिता एव सन्ति। महाभाष्यमिदं वार्त्तिकानामेव व्याख्यानमिति वक्तुं शक्यते, वार्त्तिकमेवावलम्ब्य सर्वत्र भाष्यप्रवृत्तिदर्शनात्। स्वातन्त्र्येण तु क्वचिदेव सूत्राणि व्याख्यातानि। येषु - येषु सूत्रेषु वार्त्तिकानि न सन्ति न तत्र भाष्यमपि प्रायेण दृश्यते। वस्तुतः यत्र स्ववाक्यमपि व्याख्यायते तद्भाष्यमिति वदन्त्यभियुक्ताः।

'सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥' इति।

महाभाष्ये बहुत्र तथैव दृश्यते यन्महाभाष्यकृत्पूर्वं संग्राहकवाक्यमुक्त्वा ततस्तद्विवरणं वितनुते भगवान्भाष्यकृदिति। भवतु नाम, परन्त्वेतत्तु सर्वथा सत्यमेव यदद्यत्वे पाणिनीयव्याकरणस्य या प्रतिष्ठा दृश्यते, यथा च

शास्त्रेषु व्याकरणं प्रामुख्यं भजते, मुखं व्याकरणं स्मृतमित्यनेन चास्य वेदाङ्गेषु मुख्यस्थानं गण्यते, सोऽयं सर्वोऽपि कात्यायनस्य भाष्यकृतः पतञ्जलेश्च प्रभावादेव नात्र संशीतिलेशः।

महाभाष्य-व्याख्यानानि

भगवता पतञ्जलिना प्रणीतस्य व्याकरणमहाभाष्यस्योपरि सर्वप्रथमं 'दीपिका' व्याख्याग्रन्थः श्रीमता भर्तृहरिणा व्यरचि। परन्तु स च नोपलभ्यते, किन्तु वाक्यपदीयनामकं यद् व्याख्यानं गुरुर्भर्तृहरिः प्रणिनाय तदिदानीं काण्डत्रयात्मकं पठनपाठने चकास्ति। तत्र ग्रन्थे प्रथमं भवति ब्रह्मकाण्डम्। तस्मिन् ब्रह्मकाण्डे ''अनादिनिधनं ब्रह्म'' इत्यादि — कारिकामुखेन वेदान्तशास्त्रीयपरब्रह्मसममखण्डमध्यमावाग्रूपमखण्डवाक्यस्फोटात्मकं शब्दतत्त्वं भर्तृहरिः प्रादर्शयत्। तद्ग्रन्थे द्वितीयं भवति वाक्यकाण्डम्। तस्मिन् काण्डे वाक्यलक्षणानि, वाक्यस्वरूपं, दर्शनान्तरीयमतानुसारं वाक्यलक्षणनिरूपणम्, ततः तन्मतनिराकरणपूर्वकं वाक्यलक्षणानि च न्यरूपिषत। तृतीये पदकाण्डे जातिलिङ्गव्यक्तिवृत्तिक्रियासम्बन्धपुरुषलिङ्गसाधनादयश्चतुर्दश समुद्देशा वर्तन्ते। अस्य वाक्यपदीयस्योपरि नैके पण्डितप्रकाण्डमूर्धन्या नैकानि व्याख्यानानि प्रण्यनैषिषुः। ग्रन्थविस्तरभिया तेषां चर्चा अत्र नैव क्रियते। ततो गच्छति काले सम्पूर्णमहाभाष्यस्योपरि जैयटात्मजः कैयटः प्रदीपाख्यं व्याख्यानं प्रणीतवान्। व्याकरणमहाभाष्यग्रन्थस्य प्रदीपव्याख्यानमेव साक्षान्महाभाष्यग्रन्थग्रन्थिविभेदजनकं भवति। अतएव भाष्यार्थावबोधनाय महामान्यकैय्यट एवाद्यावधि शरणम्। प्रदीपसंज्ञकमिदं व्याख्यानं यदि नाभविष्यत्तर्हि महाभाष्यं बहुत्र दुरवबोधमेवाभविष्यदिति। ततो गच्छति काले वैयाकरणनागेशेन प्रदीपस्योपरि विवरणापरनामकम् उद्योतव्याख्यानं विधाय तद्ग्रन्थे महाभाष्यग्रन्थस्थमार्मिकनिगूढसिद्धान्ता दर्पणायिताः। तस्मिन्नुद्योतग्रन्थे स्थलविशेषेषु न्यायशैल्या अपि महाभाष्यस्थनिगूढसिद्धान्ता नागेशेन व्याख्यायिषत। वैद्यनाथपायगुण्डमहाभागैरपि छायाभिधानकं महाभाष्यस्य महत्त्वपूर्णं व्याख्यानं व्यरचि। आचार्यगुरुप्रसादशास्त्रिणाऽपि राजलक्ष्म्याख्या व्याख्या प्रण्यनायि। ये च

व्याख्ये अतितराञ्च सुतरां सुविदिते पण्डितपरिषदि। परन्तु तद्व्याख्यानद्वयं व्याकरणमहाभाष्यप्रथमाध्यायस्थप्रथमपादस्थनवाह्निकान्तभागस्यैव वरीवर्ति। आचार्यब्रह्मदत्तद्विवेदिमहाशयोऽपि नवाह्निकान्तभागस्य सुमनोहरं व्याख्यानं प्रणिनाय। तत्र छायाटीकायां प्रदीपोद्योतयोर्विचारिता अपि विषयाश्छायाकारेण न्यबध्नायिषत। यथा प्रथमाध्यायस्थे प्रथमेपादे तृतीयाह्निके वृद्धिरादैच् इति सूत्रे भाष्ये वृद्धिपदेन तद्भावितानां ग्रहणमुतादैज्मात्रस्य ग्रहणमिति संशय्य तत्र तद्भावितपक्षे शालीयः, मालीयः इत्यादौ शालामालाशब्दाभ्यां "वृद्धाच्छः" इत्यनेन वृद्धलक्षणश्छो न प्राप्नोति। तथैव "आम्रमयम्, शालमयम्" इत्यत्राम्लशालशब्दाभ्यां "नित्यं वृद्धशरादिभ्यः" इति सूत्रेण मयण्न प्राप्नोति, तथैव "आम्रगुप्तायनिः", "शालगुप्तायनिः" इत्यत्र आम्रगुप्तशाल-गुप्तशब्दाभ्यां "फक्फिञोरन्यतरस्याम्" इति सूत्रेण फिञ्प्रत्ययो न प्राप्नोतीति दूषणत्रयमभिधाय आदैज्मात्रस्य ग्रहणमिति द्वितीयपक्षो भाष्यकारेण सिद्धान्तितः। प्रस्तुतमहाभाष्यग्रन्थदर्शनमात्रेण मन्दमतीनां वैयाकरणानां वृद्धिरादैच् इत्यत्र तद्भावितपक्षे दोषत्रयं वर्तत इव प्रतिभाति।

एवं स्थिते छायाकारास्तद्भावितपक्षेऽपि शालीयः, मालीयः इत्यादौ शालामालाशब्दाभ्यां "वृद्धाच्छः" इत्यनेन भवार्थे छप्रत्ययस्याप्राप्तावपि प्रोक्तार्थे "तेन प्रोक्तम्" इति सूत्रेण छप्रत्यये कृते शालीयः, मालीयः इति रूपसिद्धौ न दोषः। "आम्रमयम्", "शालमयम्" इत्यत्रापि तद्भावितपक्षे आम्रशालशब्दयोरवृद्धप्रातिपदिकत्वेन तत्र "नित्यं वृद्धशरादिभ्यः" इति सूत्रेण मयटोऽप्राप्तावपि ताभ्यां शालामालाख्याभ्यामवृद्धप्रातिपदिकाभ्यां "मयड्वैतयोः भाषायाम्" इति सूत्रेण मयटः प्रवृत्त्या न दोषः। तथाच तद्भावितपक्षे प्रथमद्वितीयदोषयोरुक्तरीत्या वारणसम्भवेऽपि तृतीयदोषस्य परिहर्तुमशक्यत्वेन तद्भावितपक्षे एक एव अन्तिमदोषो भवतीत्याकारकं भाष्यकारोपज्ञं सिद्धान्तं छायायां छायाकारो जग्रन्थ। अस्मादेव कारणादनादितो महाभाष्यगूढार्थज्ञानाय छायाटीकामाश्रयन्ति वैयाकरणमूर्धन्याः। एतस्मादेव कारणात् महाभाष्यव्याख्यासु छायाटीकाया अपि महत्त्वपूर्णं स्थानं वर्तत इति विदितमेव विपश्चिदपश्चिमानाम्।

महाभाष्यव्याख्यानपरम्परायां मिथिलायामपि कातन्त्रविस्तरकारेण वर्द्धमानोपाध्यायेन महाभाष्यप्रकाशनाम्नी काचिट्टीका निरमायि, किन्तु सा दैवदुर्विपाकबलेन नोपलभ्यते। प्रवर्त्तकोपाध्यायस्य 'प्रदीपप्रकाशिका' नाम्नैवावगम्यते यत्प्रदीपव्याख्यानमेतदिति, यच्चाड्यारमहिसूरतिरुवनन्तपुरमातृकागारेषु विद्यते। 1654 विक्रमाब्दात्प्राक्स्थितस्य नारायणाचार्यस्य विवरणाख्यमपि भाष्यप्रदीपयोर्व्याख्यानं राराजते। अत्र निगदति टीकाकारः- ''इति नारायणीये श्रीमन्महाभाष्ये भाष्यप्रदीपविवरणेऽष्टमाध्यायस्य चतुर्थे पादे प्रथमाह्निकमिति।'' परन्तु दुर्योगवशादियं व्याख्या खण्डितैवोपलभ्यते। उषाहरणनाटककारदेवानन्दस्यात्मजोऽयमासीदिति केचिद्वदन्ति, केचिच्च प्रत्याचक्षते। एतादृशानामन्येषामपि तैरभुक्तानां शाब्दिकानां महाभाष्यव्याख्यानानि दृश्यन्ते श्रूयन्ते च। तत्र धनेश्वरोपाध्यायस्य महाभाष्यचिन्तामणिः, चिकनौटाग्रामवास्तव्यलालजीझाशर्म्मणः व्याख्या, कृष्णदत्तसूनु हेमदत्तस्य भाष्यालोकः(1850), शुकदेवझा (1950) शर्म्मणः महाभाष्यादर्शः, जुडाओनझामहोदयस्य महाभाष्यविमर्शः(1880), मधुकान्तझाशर्म्मणः महाभाष्यप्रकाशः(1970), अथरीग्रामनिवासिपण्डितमुक्तिनाथशर्मठक्कुरस्यापि (1875ई०) काचिदज्ञातनाम्नी व्याख्या अन्यतमाश्चोल्लेखनीयास्सन्तीति। ततो गच्छति काले ठाढ़ीग्रामवास्तव्यैः काशीहिन्दूविश्वविद्यालयाध्यापकचरैः पण्डितरुद्रधरझाशर्म्मभिः (1929-1990) नवाह्निकान्तस्थ भागस्य तत्त्वालोकनामकं भाष्यप्रदीपोद्योतानां प्रकाशात्मकं व्याख्यानं प्रण्यनायि। अयञ्च झाशर्मा महानैयायिकपण्डितविश्वनाथझाशर्म्मणः पौत्रः पण्डितदामोदरझाशर्म्ममहोदयस्यात्मजश्चासीत्।

एवं स्थिते सतीष्वपि मुनित्रयानामाशयवर्णन-परमतविदारण-मूलयोजनपरायणासु व्याख्यासु काठिन्याद्विस्तराच्च सर्वेषां पठनपाठनयोर्नोपकारो भवतीति विचिन्त्य अस्माकं पूर्वजन्मसुकृतपुण्यफलप्रभावेण निखिलवैयाकरणानुजिघृक्षया व्याकरणमहाभाष्यग्रन्थस्य महत्त्वख्यापनाय तेषां व्याकरणतत्त्वबोधाय महाभाष्यग्रन्थस्थं निगूढं तत्त्वं वैयाकरणलोकं प्रति विज्ञापयितुं, कैयटनागेशाभ्यां विरचितयोः प्रदीपोद्योतटीकयोरपर्यालोचितानां व्याकरणमहाभाष्यस्थतत्त्वानां वैयाकरणान् बोधयितुं,

निखिलवैयाकरणलोकमनुग्रहीतुं च पदवाक्यप्रमाणनिष्णातो महानैयायिकः वैयाकरणशिरोमणिः मैथिलभूसुरेषु भास्वानिव जाज्वल्यमानो निखिलशास्त्रार्णवनिमज्जननिर्मलीकृतान्तःकरणो विद्वन्मूर्द्धन्यो श्रीमन् महेशझाशर्मा व्याकरणमहाभाष्यस्योपरि निगमसदृशं विमलाख्यं व्याख्यानं प्रणीय सकलशाब्दिकसंसारमनुजग्राह। वस्तुतोऽत्र सुलतानगञ्जनगराधीशस्य राज्ञः कृष्णानन्दसिंहस्य योगदानमविस्मरणीयम्, यतो हि अनेनैव स्वराजपण्डितपण्डितगौरीनाथझाशर्म्मभागिनेयं स्वकीयमेव विद्यालयस्य प्रधानाचार्यञ्च न्यायाचार्यं पण्डितमहेशझाशर्म्ममहाभागं प्रोत्साह्याऽभिनवा व्याख्येयं १९३३-३४ तमे खृस्तवर्ष एव निर्मापिता। यस्मिन्प्रसङ्गे स्वयमनेन विमलाव्याख्यान्ते गदितमपि—

"याचकजनसुरशाखी गुणगणसिन्धुः सदब्जवनभानुः ।
श्रीमान् सिंहपदान्वित-कृष्णानन्दोऽवनीपतिर्जयति ॥

तद्भुजनिविडच्छाया-विगतश्रमजदुःखभूमा यः ।
विरचितवानहमेनां चिरमधमर्णं स मन्ये स्वम् ॥"

अनेनाऽपि पण्डितप्रवरेण पाण्डित्यपूर्णमेतद्विवरणं कृतमित्यत्र न कापि संशीतिः।

विमलाया वैशिष्ट्यम् —

व्याकरणशास्त्रे सूत्रवार्तिककाराभ्यां प्रणीतयोः सूत्रवार्तिकग्रन्थयोरुपरि भगवता पतञ्जलिना महाभाष्यं निरमायि इति पूर्वमुक्तम्। पतञ्जलिप्रणीते महाभाष्ये यद्यपि भाषा सरला भवति, परन्तु तत्रत्यो विषयः अतीव कठिनो दुरूहश्च वर्तते। विना व्याख्यानं महाभाष्यस्थसारगर्भ आशयो मन्दमध्यमाधिकारिभिर्वैयाकरणैर्ज्ञातुन्न शक्यत इति हेतोर्महाभाष्यस्य व्याख्यानापेक्षा अनिवार्या भवतीत्यभिप्रायेण बहोः कालादारभ्य भर्तृहरिप्रभृतिभिर्विद्वन्मूर्धन्यैः नैकानि महत्त्वपूर्णानि व्याख्यानान्यसार्जिषत। परन्तु तानि सर्वाणि व्याख्यानानि बुधजनमात्रैकवेदितानि सन्ति, मन्दमध्यमाधिकारिणां व्युत्पित्सूनां कृते महाभाष्यग्रन्थस्थतत्त्वार्थबोधनाय सूक्ष्माणि न भवन्ति। न

केवलं तावत्। महाभाष्यव्याख्यानयोः कैयटनागेशप्रणीतयोः प्रदीपोद्योत-योरपि कैयटनागेशाभ्यामविचारिता नैके विषया महेशझाशर्मभिः प्रणीतायां विमलाव्याख्यायां विराजन्ते। अथ च ते विषयाः पूर्वव्याख्यातृभिः प्रणीतेषु महाभाष्यव्याख्यानेषु कठिनया शैल्या प्रतिपादितास्सन्तो वैयाकरणानामति-दुरूहा भवन्ति। तान् सर्वानपि विषयान् सुलभशैल्या विमलाकारो विमलाव्याख्यायां दर्पणायितवान्। तथाहि —

क) महाभाष्ये प्रथमाध्याये प्रथमपादे प्रथमे पस्पशाह्निके ''अथ शब्दानुशासनमिति'' भाष्यव्याख्यानावसरे कैयटेन स्वीयप्रदीपव्या-ख्याने **''भाष्यकारो विवरणकारत्वात् साक्षात् प्रयोजनमाह – अथशब्दानुशासनमिति। प्रयोजनप्रयोजनादीनि रक्षोहागमादीनि पश्चाद्वक्ष्यन्ते''** इत्याकारकेण ग्रन्थेन तस्य भाष्यग्रन्थस्य साक्षात्प्रयोजनं परम्पराप्रयोजनानि च सूक्ष्मतया प्रत्यपादिषत। तस्यैव भाष्यग्रन्थस्य प्रदीपग्रन्थानुक्तं ''शब्दजिज्ञासूनामन्तेवासिनां प्रवृत्तये ग्रन्थादौ प्रतिज्ञामाह'' इत्येवं रीत्या विमलायां विमलाकारेण ग्रन्थादौ प्रतिज्ञावाक्यं, तथा कैयटो-द्योतकाराभ्यामपरिभाषित''मव्यवहितोत्तरकालकर्तव्यत्वप्रकारकज्ञानानुकूल-शब्दप्रयोगात्मको व्यापार'' इत्यादिना नव्यन्यायशैल्या प्रत्यपादि।

ख) एवमेव पस्पशाह्निके ''सिद्धे शब्दार्थसम्बन्धे'' इति वार्तिकात् पूर्वं स्थितस्य **''कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्''** इति भाष्यस्य प्रदीपोद्योतयोर्व्याख्या नैव विद्यते। परन्तु विमलाव्याख्याने शब्दार्थ-सम्बन्धं नित्यं मत्त्वेदं लक्षणं पाणिनिः प्रणीतवान् उत कार्यमित्याशयेन भगवता भाष्यकारेणायं प्रश्नः कृतः इति रीत्या तद्भाष्यं विमलाकारैस्सा-ङ्गोपाङ्गं सप्रमाणं व्याख्यातम्।

ग) एवमेव पस्पशाह्निके 'ज्ञाने धर्म उत प्रयोगे' इति विचारावसरे ज्ञाने धर्म इति चेत् तथा अधर्म इति वार्तिककारेण वार्तिके प्रणीते ''यस्तावत् साधुशब्दान् जानाति अपशब्दानप्यसौ जानाति। यथैव हि शब्दज्ञाने तस्य धर्मस्तथा अपशब्दज्ञानेऽधर्मोऽपि प्राप्नोति। अथवा भूयानधर्मः प्राप्नोति। भूयांसो-ह्यपशब्दाः, अल्पीयांसश्च साधवः, यथैकस्य शब्दस्य गौरित्यस्य

गावी, गोणी, गोता, गोपोतिलका इत्येवमादयो बहवोऽपभ्रंशाः'' इत्याकारकस्य महाभाष्यग्रन्थस्य कैयटनागेशाभ्यां प्रदीपोद्योतयोर्व्याख्यानं नैव व्यधायि। परन्तु तस्यैव भाष्यस्य ''अथवा **अपशब्दानप्यसौ जानातीति** पचतीति शब्दज्ञाने डुपचष्पाके इत्यपशब्दज्ञानस्यावश्यकत्वमिति भावः। **एवमपशब्दज्ञानेऽप्यधर्म इति,** एवञ्च अधर्महेतुतया शास्त्रस्यानुपादेयत्वमिति भावः'' इत्याकारकग्रन्थमुखेन विमलाकारा विमलाव्याख्याने शब्दस्य ज्ञानेऽधर्म इति पक्षे शास्त्रस्यानुपादेयत्वं प्रत्यपादयन्।

घ) एवमेव शब्दस्य ज्ञाने धर्म उत प्रयोगे इति पक्षद्वयविचारसन्दर्भे महाभाष्ये भाष्यकारेण प्रयोगे सर्वलोकस्य इति वार्तिकार्थवर्णनावसरे यदि शब्दस्य प्रयोगे एव धर्म इति पक्षस्स्वीक्रियेत तर्हि सर्वो लोकोभ्युदयेन युज्येत इत्युक्तम्। तद्भाष्यस्योपरि कैयटनागेशाभ्यां प्रदीपोद्योतयोः किमपि व्याख्यानं नैव विहितम्। परन्तु विमलाकारेण तद्भाष्यस्योपरि **प्रयोगे इति** धर्म इति चेदित्यस्यानुषङ्गः। **सर्वलोकस्येति** धर्मः स्यादिति शेषः इति ग्रन्थेन यदि शब्दस्य प्रयोगे एव धर्मः स्यात् तर्हि अधीतानधीतव्याकरणशास्त्राणां सर्वेषामपि साधुशब्दज्ञानरूपं फलं स्यादिति विमलायां व्याख्यातम्।

ङ) एवमेव पस्पशाह्निके ''शास्त्रपूर्वके प्रयोगे अभ्युदयस्तत्तुल्यं वेदशब्देन'' इति वार्तिकात् पूर्वं यत् पक्षद्वयनिराकरणोपसंहारभाष्यं ''नापि ज्ञाने धर्मो नापि प्रयोगे इति'' वर्तते तस्य भाष्यस्योपरि कैयटनागेशप्रणीते प्रदीपोद्योतग्रन्थद्वये कैयटनागेशाभ्यां किमपि नैव व्याख्यातम्। परन्तु विमलाकारेण महेशझामहाशयेन तद्भाष्ये किन्तर्हीति भाष्यप्रतीकमुपादाय तर्हि कः सिद्धान्त इत्यादिग्रन्थेन पक्षद्वयेऽपि दोषस्य समत्वादत्र कः सिद्धान्तपक्ष इत्याकारको भाष्याशयो विमलायां दर्पणायितः।

च) पस्पशाह्निके एव व्याकरणशब्दार्थनिरूपणावसरे केवलं सूत्रं व्याकरणमुत केवलं शब्द एव व्याकरणमिति सन्दिह्य पक्षद्वयेऽपि दोषान् समानं प्रदर्श्य ततो न केवलं सूत्रं व्याकरणं न वा केवलं शब्दः, किन्तु सूत्रमुदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितमेव व्याकरणमिति सिद्धान्तं प्रतिपाद्य ततः सूत्रं व्याकरणमिति प्रथमपक्षस्थदोषान् सर्वान्

परिहृत्य तत्र लक्ष्यलक्षणसमुदायो व्याकरणं भवति। किं वा सूत्रमेव व्याकरणमितिपक्षोपि समीचीन एव। केवलं शब्द एव व्याकरणमिति पक्ष एवासाधीयानिति सिद्धान्तो भगवता भाष्यकारेण तत्र प्रस्फुटीकृतः। परन्तु तद्विषये प्रदीपोद्योतयोः कैयटनागेशाभ्यां कापि व्याख्या नैव व्यधायि। परन्तु महाभाष्यव्याख्यायां विमलायां **''अथवेति पुनरस्तु सूत्रमि''**ति ''सूत्रस्य व्याकरणपदार्थत्वे व्याकरणस्य सूत्रमित्यत्र वचनस्यायं वृक्ष इत्यादाविवावयवावयविभावसम्बन्धे षष्ठीति व्याकरणस्य सूत्रमिति व्यवहारः—- - - - - - - - - - तैलं भुक्तं, घृतं भुक्तमित्यादाविव भाक्तत्वेनोपपादनीय इत्युभयत्रैव दोषस्य परिहारसम्भवादुभयत्रैव व्याकरणपदार्थत्वमिष्टमिति भावः'' इत्यादिना ग्रन्थेन विमलाकारेण लक्ष्यलक्षणसमुदाय एव व्याकरणमिति सिद्धान्तस्सुचारु व्याख्यातः।

छ) एवमेव व्याकरणमहाभाष्ये द्वितीये प्रत्याहाराह्निके अइउण् इति सूत्रे भाष्ये अकारस्य विवृतोपदेशप्रयोजनप्रतिपादनावसरे भाष्यकारेण अकारस्य विवृतोपदेशः कर्तव्यः, किं प्रयोजनम् ? आकारग्रहणार्थः इत्यादि—भाष्यग्रन्थेनाकारस्य विवृतोपदेशत्वं, तत्प्रयोजनञ्च प्रत्यपादि। परन्त्वस्य भाष्यग्रन्थस्योपरि कैयटनागेशाभ्यां प्रदीपोद्योतयोस्तावद्व्याख्यानं न व्यधायि यावदपेक्षितम्। परन्तु महेशझामहाशयोऽस्य भाष्यग्रन्थस्योपरि ''अइउण्'' अनुकरणत्वेनानुकार्यानुकरणयोरभेदादर्थवत्त्वाभावेन वर्णेभ्यो न विभक्त्युत्पत्तिः'' इत्यादिना ग्रन्थेन अइउण् सूत्रे अकारस्य विवृतोपदेशत्वं तस्य प्रयोजनञ्च विमलाव्याख्यायां स्पष्टीचकार ।

ज) एवमेव अस्मिन्नेवाह्निके ''ऋलृक्'' इति सूत्रे भाष्ये लृकारोपदेशप्रयोजनप्रतिपादनावसरे भाष्यकारेण ''स एष सूत्रभेदेन लृकारोपदेशः प्लुत्याद्यर्थस्सन् प्रत्याख्यायते, सैषा महतो वंशस्तम्बाल्लट्वानुकृष्यते'' इत्यादिना ग्रन्थेन लृकारोपदेशस्य अशक्तिजानुकरणार्थत्वस्य प्रधानप्रयोजनत्वं प्लुत्याद्यर्थस्य गौणप्रयोजनत्वञ्च प्रत्यपादि। परन्त्वेतद्विषये प्रदीपोद्योतग्रन्थद्वयादतिरिक्तं विमलाव्याख्यायां ''ननु मास्तु सूत्रभेदः, सवर्णग्राहकताबलेनैव प्लुत्यादिकं भविष्यति, एवमशक्तिजानुकरणार्थत्वमपि न सम्भवति

सवर्णग्राहकताबलेनैव तस्यापि सिद्धिसम्भवादिति चेन्न, अनृत इति प्रतिषेधापत्त्या लृकारे प्लुतकार्याऽसम्भवादिति ग्रन्थेन ऋलृक्सूत्रे लृकारोपदेशप्रयोजनं विमलाकारेण सम्यग्व्याख्यातम् ।

झ) अत्रैव प्रत्याहाराह्निके एओङ् ऐऔच् इति सूत्रयोर्भाष्ये अतपरोपदेशपक्षे एङो ह्रस्वादेशशासनेष्वर्ध एकारोऽर्ध ओकारो वा मा भूत् इति भाष्यव्याख्यानावसरे भाष्यकारेण तपरोपदेशपक्षं सन्दूष्यातपरोपदेशपक्षस्सिद्धान्तितः । परन्तु तद्भाष्यस्योपरि प्रदीपोद्द्योतयोर्व्याख्या नैव दृश्यते । अत्रान्तरे महेशझामहांशयेन विमलाव्याख्यायां'' **अतपर इति** जातावेकवचनम् । अतएव यद्यतपराणीति व्याख्यया न विरोधः । **एच इग्घ्रस्वादेश इति** अवादि ।

अयं भावः — सन्ध्यक्षरेषु तपरोच्चारणे मात्रिकैकारौकारयोरसमकालतया वर्णसमाम्नायस्थैकारादिना ग्रहणाभावेनानच्त्वात् ह्रस्वत्वाभावेन ह्रस्वपदेन विधानं न सम्भवतीति'' इत्यादिना ग्रन्थेन एओङ् इत्यत्रैचः अतपरोपदेशपक्षो भाष्यकारसम्मतो विमलायां स्पष्टं विवेचितः ।

ञ) एवमेव तृतीये वृद्ध्याह्निके वृद्धिरादैच् इति सूत्रे भाष्ये आदैच् इत्यत्र चकारस्य चोःकुः इति सूत्रेण पदान्तचकारस्य कुत्वं कस्मान्न भवतीत्याशङ्क्य भत्वात्, कथं भसंज्ञा इत्यादिभाष्यग्रन्थेन तत्समाधाय ततो यदि भसंज्ञा वृद्धिरादैजदेङ्गुणः इति जश्त्वमपि न प्राप्नोतीत्याशङ्क्य उभयसंज्ञान्यपि छन्दांसि दृश्यन्ते इत्यादिना ग्रन्थेन वृद्धिरादैजदेङ्गुणः इत्यत्र भपदसंज्ञाद्वयमङ्गीकृत्य तत्र पदत्वाज्जश्त्वं, भत्वात् कुत्वाभावश्च साधितः । परन्तु उभयसंज्ञान्यपि छन्दांसि दृश्यन्ते इति भाष्यमधिकृत्य कैयटनागेशाभ्यां प्रदीपोद्योतयोः किमपि नैव व्याख्यातम् ।

एवं स्थिते विमलायां महेशझाशर्मणा तद्भाष्यमधिकृत्य **उभयसंज्ञान्यपीति** संज्ञाद्वयसमावेशस्तु उभयसंज्ञान्यपि वक्तव्यानि इति वार्तिकवचनात् इत्यादिना ग्रन्थेन भगवतो भाष्यकारस्य मार्मिकः आशयो दर्पणायितः ।

ट) एवमेव महाभाष्ये चतुर्थाह्निके न धातुलोप आर्धधातुके इति सूत्रस्य प्रत्याख्यानावसरे वार्तिककारेण "अनारम्भो वा" इति वार्तिके प्रणीते तद्वार्तिकमधिकृत्य अनारम्भो वा, अयं योगो न कर्तव्य इत्यादिना ग्रन्थेन भाष्यकारेण तत्सूत्रं प्रत्याख्यातम्। परन्तु भाष्योक्तः न धातुलोप आर्धधातुके इति सूत्रप्रत्याख्यानप्रकारः कैयटनागेशाभ्यां स्वस्वप्रणीतयोः प्रदीपोद्योतयोः सुस्पष्टं नैव व्याख्यातः। एवं स्थिते महेशझाशर्मा तद्भाष्यं सम्यग्व्याख्याय न धातुलोप आर्धधातुके इति सूत्रस्योदाहरणानामन्यथासिद्धत्वादिदं सूत्रं प्रत्याख्येयमेवेति भाष्यकाराशयं विमलाव्याख्यायां सुस्पष्टं व्याचष्टे।

ठ) एवमेव पञ्चमाह्निके ईदूतौ च सप्तम्यर्थे इति सूत्रभाष्यस्थार्थग्रहण-प्रयोजनावसरे भाष्यकारेण ईदूतौ च सप्तमी इत्येव सूत्रमस्तु किमर्थमर्थ-ग्रहणेनेति पूर्वपक्षाशयं निरस्य जहत्स्वार्थायां वृत्तावितरपदार्थनिष्ठविशे-ष्यतानिरूपितप्रकारतानाश्रये प्रगृह्यसंज्ञा माभूदित्येवं रीत्या अर्थग्रहणप्रयोजनं सम्यगुपवर्णितम्। परन्त्वेतद्विषये कैयटनागेशाभ्यामपेक्षितं व्याख्यानं प्रदीपोद्योतयोर्नैव व्यधायि। अत्रान्तरे महेशझाशर्मणा स्वप्रणीतायां विमलायां ईदूतौ च सप्तम्यर्थे इति सूत्रेऽर्थग्रहणस्य वाप्यामश्वो वाप्यश्व इत्यादौ प्रगृह्यसंज्ञाया अप्रवृत्तिरूपं प्रयोजनं सम्यगुपवर्णितम्। यद्यप्यत्र विषयेऽर्थग्रहणप्रयोजनस्य भाष्यकारेणोदाहरणमदायि तथाऽपि तस्य वाप्यश्वः इत्युदाहरणं दत्वा तत्र प्रगृह्यसंज्ञाभावरूपं फलं विमलायां नव्यन्यायशास्त्री-यानुगमशैल्योपवर्णितम्।

ड) एवमेव षष्ठाह्निकेऽपि सर्वादीनि सर्वनामानि इति सूत्रे भाष्ये "अतिसर्वाय" इत्यादावतिसर्वघटकसर्वशब्दस्य "सर्वादीनि सर्वनामानि" इति सूत्रेण प्राप्तसर्वनामसंज्ञाया वारणाय वार्तिककारेण संज्ञोपसर्जनीभूतास्तु न सर्वादयः इति वार्तिके प्रणीते अस्य वार्तिकस्याभावेऽपि पूर्वपरावरदक्षि-णोत्तरापराधराणि व्यवस्थायां, असंज्ञायामिति योगविभागेन गौणस्थले अतिसर्वाय इत्यादौ सर्वशब्दस्य संज्ञावाचकत्वेनासंज्ञायामिति निषेधेनैव सर्वनामसंज्ञाया अप्राप्त्या तद्वारणाय संज्ञोपसर्जनीभूतास्तु न सर्वादयः

इति वार्तिकं प्रत्याख्येयमेवेत्यभिप्रायेण भाष्यकारेण वार्तिकमिदमेतत्सूत्रे भाष्ये प्रत्याख्यातम्। परन्तु तत्प्रत्याख्यानप्रकारः प्रदीपोद्योतयोरस्पष्टं वर्तत इति हेतोर्महेशझाशर्मणा महाभाष्यव्याख्यायां तद्वार्तिकप्रत्याख्यानं सुचारुतया विस्तारितम्।

ढ) नवाह्निकान्तभागे सप्तमाह्निके ''इग्यणः सम्प्रसारणम्'' इति सूत्रे भाष्ये ''इग्यणस्सम्प्रसारणम्'' इति सूत्रेण वर्णस्य सम्प्रसारणसंज्ञोत वाक्यस्येति सन्दिह्य वाक्यस्य सम्प्रसारणसंज्ञायां नैकान् दोषानाशङ्क्य भगवता भाष्यकारेण वर्णस्यैव सम्प्रसारणसंज्ञा सिद्धान्तिता। अत्राऽपि विषयेऽपेक्षितं तावद्व्याख्यानं कैयटनागेशाभ्यां प्रदीपोद्योतयोर्नैव व्यधायि। परन्तु महेशझामहाशयैर्विमलाव्याख्याने ''वाक्यस्य संप्रसारणसंज्ञायां प्रत्यापत्तिः'' इत्यादिग्रन्थेनान्यूनानतिरिक्ततया भाष्यकाराशयस्सम्यगुपवर्णितः।

ण) नवाह्निकान्तभागेऽष्टमाह्निके ''स्थानिवदादेशोऽनल्विधौ'' इति सूत्रे भाष्ये भाष्यकारेण स्थानिवद्भावप्रकाराणां वर्णनावसरे आदेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य कार्ये कर्तव्ये इति प्रथमस्थानिवद्भावमुपपाद्य तादृशप्रथमस्थानिवद्भावस्वीकारे पापचकः इत्यादावल्लोपस्य स्थानिवद्भावाप्राप्त्या प्राप्ताया वृद्धेर्निषेधायात्र स्थानिवत्सूत्रेण स्थानिवद्भावस्याप्राप्तावपि पञ्चमीसमासस्वीकारेण अचःपरस्मिन् पूर्वविधौ इति सूत्रेण स्थानिभूतादचः पूर्वस्मात् परस्य स्थानिवद्भावे कृते तत्र वृद्धिर्न भवतीति प्रतिपादितम्। परन्त्वेतावान् विचार एतत्सूत्रविषये कैयटनागेशाभ्याम् ्रुतवैयाकरणाभ्यां प्रदीपोद्योतयोर्नैवाकारि। अथच तत्रत्यं निगूढं महाभाष्यकाराशयं, तत्सिद्धान्तं विमलायां ग्रन्थकारेण सम्यक्तया प्रतिपाद्य विमलाव्याख्यानस्य वैशिष्ट्यमम्बरचुम्बायितम्।

त) अत्रैवाऽष्टमाह्निके न पदान्तद्विर्वचनरे इत्यादिसूत्रे पदस्य चरमावयवकार्ये कर्तव्ये, द्विर्वचनादिषु च कर्तव्येषु प्राप्तस्थानिवद्भावनिषेधस्योदाहरणानां प्रदर्शनावसरे सवर्णानुस्वारयोःस्थानिवद्भावनिषेधे शिण्ढि इत्युदाहरणं भगवता भाष्यकारेण प्रादर्शि।

एवं स्थिते एतत्सूत्रभाष्यव्याख्यानयोः प्रदीपोद्योतयोः कैयटनागेशाभ्यां सवर्णानुस्वारयोरनेन सूत्रेण प्राप्तस्थानिवद्भावनिषेधस्य ''शिण्ढि'' इत्युदाहरणमिति व्याख्यातम् ।

एवं स्थिते लघुशब्दरत्नग्रन्थस्थपङ्क्तीनामुद्धरणपूर्वकमनुस्वारस्यैवानेन सूत्रेण स्थानिवद्भावनिषेधप्रवृत्तौ ''शिण्ढि' इत्युदाहरणं भवितुमर्हति। परसवर्णस्य स्थानिवद्भावनिषेधप्रवृत्ताविदमुदाहरणं न भवति। तस्यान्यथा-सिद्धत्वादित्याकारको मार्मिको निगूढो भाष्यकाराशयो महेशझामहोदयेन विमलायां साङ्गोपाङ्गमुपवर्णितः।

थ) एवमेव नवमाह्निके अदर्शनं लोपः, तस्य लोपः इति सूत्रयोर्भाष्ये भाष्यकारेणानुबन्धानां लोपवर्णनप्रकारास्सुचारु प्रादर्शिषत। परन्तु तत्सूत्रद्वयभाष्यव्याख्यानयोः प्रदीपोद्योतयोरपेक्षितं व्याख्यानं कैयटनागेशाभ्यां नैवाकारि।

एवं स्थिते तत्सूत्रद्वयस्थभाष्यकारीयसिद्धान्तान् सर्वानपि महेशझाशर्मा महाशयो नव्यन्यायशैल्योपवर्णयामास।

इत्थं हि तत्रत्यो विमलाकारस्याशयः— ''हलन्त्यम्'' ''उपदेशेऽ-जनुनासिक इत्'' ''चुटू'' ''लशक्वतद्धिते'' इत्यादिसूत्रैर्येषामज्झलामित्संज्ञा विधीयते तेषां तस्य लोपः इति सूत्रेण लोपो भवति। अर्थाद्व्याकरणशास्त्रे यत्र क्वाप्यज्झलामित्संज्ञा विधीयते तेषामित्संज्ञकवर्णानां तस्य लोपः इति सूत्रेणैव लोपो विधेयो नान्येन येन केनापि सूत्रेण। अत्र लोपो नाम ''अदर्शनं लोपः'' इति सूत्रात् प्रसक्तानामित्संज्ञकवर्णानामदर्शनमेव। तत्र लोपो नामादर्शनम्। अदर्शनं नाम दर्शनाभावः। तथाच तत्र लोपपदेन दर्शनाभाव एव स्वीकार्यः इति स्पष्टं ज्ञायते। तत्र दर्शनाभावपदेन दर्शनप्रागभावप्रध्वंसाभावौ तथा अन्योन्याभावश्च न ग्राह्यः। तथा सत्यनेकदोष-प्रसङ्गात्। अतोऽत्र दर्शनाभावपदेन दर्शनात्यन्ताभाव एव ग्राह्यः। सोऽपि दर्शनघटोभयाभावो वा, विशिष्टाभावो वा न ग्राह्यः। एवमेव संयोगसमवाय-स्वरूपादिसम्बन्धावच्छिन्नप्रतियोगिताकदर्शनात्यन्ताभावोऽपि लोपपदेन न

ग्राह्यः। अपि तु दर्शनात्यन्ताभावे पर्याप्तिसम्बन्धनिवेशद्वारा त्रैकालिकसम्बन्धावच्छिन्नदर्शनत्वावच्छिन्नदर्शनत्वेतरधर्मानवच्छिन्नपर्याप्त्यधिकरणतावच्छेदकधर्मावच्छिन्न-दर्शननिष्ठप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्न-प्रतियोगिताको वैयधिकरण्यावच्छिन्नो दर्शनात्यन्ताभाव एवादर्शनपदेन ग्राह्य इत्यनेकप्रबन्धृप्रबन्धप्रदर्शनपूर्वकं महेशझामहाशयेन लोपपदार्थविचारस्सूचनप्रायं विमलाव्याख्याने ध्वनयामास।

द्वारबङ्गस्थ कामेश्वरसिंहसंस्कृतविश्वविद्यालय त्रैमासिकी संस्कृतपत्रिकायां विश्वमनीषायां (1988खृ०) ''महाभाष्यविमलाटीकाया वैशिष्ट्य''मिति तत्रस्थस्यैवोपाचार्यस्य (इदानीमाचार्यस्य) डॉ० सुरेश्वरझाशर्म्ममहोदयस्य सारगर्भितो निबन्धः प्रकाशितः। तमपि निबन्धमत्र पादटिप्पण्या संयोज्य विदुषां शास्त्रविनोदाय साभारमुपस्थापयामि —

''.......... उपर्युक्तासु टीकासु प्रदीपं विहाय केवलं 'विमला' एव महाभाष्ये स्वतन्त्ररूपेण विद्यतेऽन्यास्तु मुख्यरूपेण टीकोपटीकाः सन्ति। यथोद्योतः प्रदीपाशयमुद्योतयन् भाष्याशयमपि क्वचित्-क्वचित् स्पष्टयति। छाया तु उद्योताशयं प्रकटयन्ती क्वचिद्भाष्याशयं क्वचित् प्रदीपाशयं च प्रदर्शयति। तत्त्वालोकस्तु भाष्यस्य, प्रदीपस्य, उद्योतस्य च तत्त्वोपवर्णने प्रवृत्तो दृश्यते।

तासु टीकासु प्रदीपोद्योतच्छायाटीकाः विमलातः प्राचीनाः, तत्त्वालोकस्तु अर्वाचीनः, प्रदीपोद्योतच्छायासु सतीष्वपि विमलायाः प्रणयनं मिथिलादेशीयः विहारप्रान्ते मधुवनीमण्डलान्तर्गतगंगौलीग्रामवास्तव्यः, श्रोत्रियकुलावतंसः प० श्रीमहेशझाशर्मा अकार्षीदित्यत्र किंचिद् वैशिष्ट्यं भवेत्। यतो हि नवीनटीकासु प्राचीनटीकातो वैशिष्ट्य एव विदुषां छात्राणां चाकर्षणम्। उक्तमपि 'सिद्धे वस्तुनि नेच्छा किन्त्वसिद्धे'' इति। अर्थात् कस्यापि ग्रन्थस्य निरूपणीयो विषयो यावन्न कमप्यपूर्वमर्थमभिधत्ते प्रकाशयति वा तावन्न तस्य साफल्यमिति धिया विमलाटीकायामपि किमस्ति प्राचीनटीकाभ्योऽपूर्वत्वं वेति विवेचनीयमत्र। विना तद् विवेचनेन न कस्यापि विवेकिनस्तट्टीकायां प्रवृत्तिः भवितुमर्हति।

विमलाटीकाया अवलोकनेन यानि वैशिष्ट्यानि दृष्टिपथमायातानि तेषु प्रामुख्येनेमानि सन्ति—

१. अपेक्षितेऽपि व्याख्येयस्थले यत्र केनापि पूर्वव्याख्याकारेण न किंचिद्व्याख्यातन्तत्रापि व्याख्यानेन भाष्याशयप्रकटनमस्याः प्रथमं वैशिष्ट्यम्।

यथा—'वृद्धिरादैच्'[१] इति सूत्रव्याख्यानक्रमे वृद्धिसंज्ञाया आदैचोश्चा-न्योन्याश्रयवारणाय 'सिद्धं तु नित्यशब्दत्वात्[२]' इति समाधानानन्तरं 'यदि तर्हि नित्याः शब्दाः, किमर्थं शास्त्रम् ?'' इत्याक्षेपभाष्यस्य समाधानभाष्यं वर्तते—'किमर्थं शास्त्रमति चेन्निवर्तकत्वात् सिद्धम्। निवर्तकं शास्त्रम्।। कथं ? मृजिरस्मायविशेषेणोपदिष्टः। तस्य सर्वत्र मृजिबुद्धिः प्रसक्ता। तत्रानेन निवृत्तिः क्रियते, मृजेरक्ङित्सु प्रत्ययेषु मृजिप्रसङ्गे मार्जिः साधुर्भवति''[३]।। इति। अत्र केनापि व्याख्याकारेण किञ्चिदपि नोदलेखि। अतः ''अस्मै'' ''अविशेषेण'' ''उपदिष्टः'' इत्यादिपदानामर्थावबोधः स्पष्टो न भवति। विमलायान्तु भाष्यस्याशयो निम्नलिखितेन व्याख्यानेन स्पष्टो जायते। एवमस्ति अत्रत्या विमला—''अस्मै—साधुशब्दजिज्ञासवे। अविशेषेण प्रत्ययविशेषानाश्रयेण। उपदिष्ट इति 'मृजू शुद्धाविति धातुपाठ उपदिष्ट इत्यर्थः। तस्य—साधुशब्दजिज्ञासोः। सर्वत्र-क्ङित्सु तद्भिन्नेषु च। तत्र-तस्मिन् सति। अनेन मृजेर्वृद्धिरिति सूत्रेण।।''[४] इति।

एवमेव 'नवेति विभाषा[५]' इति सूत्रव्याख्याप्रसङ्गे अप्राप्तविभाषासु प्राप्ते, अप्राप्ते उभयत्र वेति कोटित्रयप्रकारकसन्देहस्थलान्युक्तानि, तेष्वेकमस्ति—'अनुपसर्गाद् वा' इति सूत्रम्[६]। तत्रास्त्येवं भाष्यम्—'प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः। कथं वा प्राप्ते ? कथं वाऽप्राप्ते कथं

१- म.भा.तृ.आ., सूत्र सं.१/१/१, पृ.१४२

२- पृ.१५७

३- पृ.१५८

४- पृ.१५८

५- ष.आ., सू.सं.-१/१/४३, पृ.४०९

६- पृ.४२९

वोभयत्र ? 'वृतिसर्गतायनेषु क्रमः' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ॥ अप्राप्ते । वृत्त्यादिष्विति निवृत्तम्[७] ॥'' इति भाष्यस्याशयः केनापि व्याख्यात्रा नोद्घाटितः । परन्तु विमलाकारेण भाष्याशय उद्घाटितः स चैवम्—

''वृत्तिसर्गतायनेषु क्रमः'' इति—अयम्भावः'' अनुपसर्गात् क्रमः आत्मने पदविधायके ''अनुपसर्गाद् वा'' इति सूत्रे वृत्तिसर्गतायनेषु क्रमः इति सम्बद्ध्यते, एवञ्च वृत्त्यादौ नित्यात्मनेपदस्य प्राप्तावेव 'अनुपसर्गाद्वा, इत्यनेन विकल्पविधानात् प्राप्तविभाषात्वम् । अथ 'वृत्तिसर्गतायनेषु इति न सम्बध्यते तदा सोपसर्गे चरितार्थस्य 'वृतिसर्गे'ति नित्यात्मनेपदस्य, वृत्त्यादिरहिते चरितार्थस्य 'अनुपसर्गाद् वा' इति विकल्पस्यानुपसर्गे वृत्त्यादौ प्राप्तौ पूर्वविप्रतिषेधेन नित्यात्मनेपदस्यैवेष्टत्वे वृत्यादिरहिते एव विकल्पः प्रवर्ततेत्यप्राप्तविभाषात्वम् । परविप्रतिषेधेन विकल्पस्यैवेष्टत्वे वृत्त्यादिषु प्राप्तविभाषात्वम्, वृत्त्यादिरहिते अप्राप्तविभाषात्वमिदमुभयत्र विभाषात्वम् इति कोटित्रयप्रकारकः सन्देह उपपद्यते''[८] इति ।

अत्र प्राप्तविभाषात्वम्, अप्राप्तविभाषात्वं च सूपपाद्यम्, परन्तु विमलां विनोभयत्र विभाषात्वं दुरुपपादमासीदन्यव्याख्यानुपलम्भात् । एवमेव अस्मिन्नेव प्रकरणे प्रायः सर्वेषु अप्राप्तविभाषास्थलेषु कोटित्रयप्रकारकसन्देहस्योपपादनं यथा दृश्यते विमलायां, न तथा पूर्वटीकासु ।

एवमेव 'न धातुलोप आर्धधातुके'[९] इत्यत्र 'आर्धधातुके इति किमर्थम्'[१०] इत्याद्यनेकभाष्यस्थलानामुपपत्तिः केवलं विमलायामेव दृश्यते इत्यस्त्यस्या वैशिष्ट्यम् ।

२. कतिपयस्थलेषु भाष्यस्योपपत्तिर्विमलायां पूर्वाचार्यकृतव्याख्यानापेक्षयाऽपररीत्या व्याख्यानेन दृश्यते इति द्वितीयं वैशिष्ट्यम् :—

७- पृ.४२९-३०

८- पृ. ४२९

९- च.आ., सू.सं. १/१/४, पृ.२००

१०- पृ.२०१

इति। अत्र प्रश्ने एका शङ्कोत्पद्यते यद् वृद्धिरिति शब्देन विहिता आदैचो वृद्धिसंज्ञका इति सूत्रार्थसत्त्वे एव तद्भावितग्रहणविषयकप्रश्नस्योपपत्तिर्भवितुमर्हतीति तादृशः सूत्रार्थश्च वृद्धिरिति पदद्वयसत्त्वे एव सम्भवति, तच्च नास्ति सूत्रे, तत्कथं प्रश्नः ? यद्यप्यस्याः शङ्काया समाधानं कृतमस्ति उद्योते, ''वृद्धिशब्दे तन्त्राद्याङ्गीकारे तद्भावितग्रहणम्। वृद्धिशब्दस्यैकत्वे द्वितीयः पक्ष इति भावः[१४]।।'' इत्युक्त्या तथापि स्पष्टोपपत्तिर्यथा दृश्यते विमलायां सा प्रशंसनीया। तथाहि — विमलायां तद्भावितग्रहणमिति प्रतीकमादाय व्याख्यातम्—वृद्धिपदमावर्तते, तत्रैकं वृद्धिपदं वृद्धिशब्देन विहितपरम्। तच्चादैचो विशेषणं, तथा च वृद्धिशब्देन विहिता ये आदैचस्ते वृद्धिसंज्ञका इति व्याख्यानेनेति भावः[१५]।।'' एवञ्च तद्भावितग्रहणविषयकप्रश्नः स्पष्टमुपपन्नो भवति।

एवमेव 'स्थानिवदादेशोऽनल्विधौ[१६]' इति सूत्रसत्त्वे ब्रूञ्धातोर्लटि मध्यमपुरुषैकवचने 'ब्रू' इत्यस्य आहादेशे, सिपःथलि च कृते आत्थ' इत्यत्र स्थानिवत्त्वेन 'आह' इत्यादेशे ब्रूञ्त्वमाश्रित्य 'ब्रुव ईट्' इत्यनेन ईट् प्राप्नोति, तथैव अस्धातोर्लुङि, तिपि, 'अस्तेर्भूः, इति सूत्रेण अस् धातोर्भू इत्यादेशे कृते, अटि च्लिप्रत्यये, तस्य सिजादेशे च कृते स्थानिवत्त्वेन भू इत्यादेशे अस्त्वमाश्रित्य 'अस्तिसिचोऽपृक्ते' इत्यनेन ईट् प्राप्नोति। अतः उभयत्र ईटः प्रतिषेधाय 'आहिभुवोरीट्प्रतिषेधः[१७]' इति वार्तिकं कर्त्तव्यम् इति—प्रसङ्गे 'आत्थ' इत्यत्र 'आहस्थ' इत्यनेन झलादिथकारे परे थत्वविधानाद्ज्ञापयत्याचार्यो यत् 'आहेरीड्न भवति' इति तेन आहेरीट्प्रतिषेधोऽनर्थकः'' इत्युक्त्वा भाष्ये अग्रे कथितम्—''भवतेश्चापि न वक्तव्यः।

११- तृ.आ., सू.सं. १/१/१, पृ.१४२

१२- पृ.१४३

१३-तत्रस्थ प्रदीपे

१४- तत्रस्थोद्योते

१५- पृ.१४४

१६- अ.आ., सू.सं. ४/४/५५, पृ.५४३

१७- पृ.५६८

अस्तिसिचोऽपृक्ते इति द्विसकारको निर्देशः ।। अस्तेः सकारान्तादिति[१८] ।। इति । अर्थात् अस्तेर्भूरित्यादेशे 'भू' इत्यस्य सकारान्तत्वाभावादेव ईट् न भविष्यतीति ईट्प्रतिषेधोऽनर्थकः । अत्र 'द्विसकारको निर्देशः' इति भाष्यस्य उद्योते एवं व्याख्यानमस्ति --- 'अस्तिस्सिच' इति सूत्रपाठ इति भावः । प्रकारान्तरे तु आदेशैरपहारात् सद्वयोच्चारणाभावेन 'निर्देश' इति भाष्यास्वारस्यम्'[१९] ।। इति ।

केचित्तु 'द्विसकारको निर्देश' इति भाष्यानुसारेण सूत्रस्य 'अस्ति सिचोऽपृक्त्वे' इति स्वरूपं मन्यन्ते।

विमलायान्तु पूर्वाचार्यप्रदर्शितव्याख्याने दोषप्रदर्शनपुरःसरमपररीत्या तत्सङ्गतिः प्रदर्शिता । तच्चैवम्—''न तावत् अस्ति सिचोऽपृक्ते, 'अस्' इत्यस्य धातुत्वाभावेन श्तिबनापत्तेः, पदमध्यप्रविष्टेन सकारेण सिचो विशेषणासम्भवे सिजाश्रयस्येटः प्रसक्तेश्च''[२०] इत्यादिना 'अस्ति सिचोऽपृक्ते' इति सूत्रस्वरूपकथनं दूषयित्वा नागेशोक्तमपि सूत्रस्वरूपं दूषितमित्यग्रिमेण ग्रन्थेन—''यदपि 'अस्तिस्सिचोऽपृक्ते' इति सूत्रपाठः । सकारस्य देहलीदीपन्यायेनोभयत्र सम्बन्धः । तथा च सकारान्तादस्तेः, श्रूयमाणसकारान्तात् सिचश्च परस्य इत्यर्थ इति न श्तिप्प्रत्ययानुपपत्तिः । यद्वा द्विसकारको निर्देश इति भाष्याक्षरस्वारस्यविरोध इति नागेशेनोक्तम्, तदपि नातिरमणीयम्, यतोहि द्विसकारको निर्देशः किं सूत्रकृता 'कृत' उत भवद्भिः करणीयः ? नाद्यः, तथा सति समाधानस्य पूर्वमेव ज्ञातत्वेनाक्षेपवार्तिकोत्थानानुपपत्तिः । नान्त्यः, तथा सति पाणिनेर्न्यूनतापत्तिः । किञ्च 'अस्तिस्सिचः' इति सूत्रपाठे सम्प्रदायावगतलघुतोच्छिद्येत'' ततो विमलाकारेण स्वकीयं मतं प्रदर्शितम्—''किन्तु अस्ति सिचस्स् इतिच्छेदः । एकस्य सकारस्य संयोगान्तलोपः । ....'अस्ति सिचोऽपृक्ते' इत्येव सूत्रपाठः । द्विसकारको निर्देश इति भाष्यन्तु व्याख्यानगम्यद्विसकारक इत्यर्थकम् । एवञ्च व्याख्यानात्

१८- तत्रैव

१९- तत्रस्थोद्योते

२०- पृ.५६८

पूर्वशङ्का, व्याख्यानेन च तस्या निवृत्तिरिति न महर्षीणां न्यूनतेत्यवधेयम्'' । इति ग्रन्थेन । व्याख्यानञ्च अस्तिसिचस्स् अपृक्ते इतिच्छेद एवेति भावः । एवं छेदे प्राप्तशङ्कानां समाधानञ्चेत्थं कृतमस्ति विमलायामेव—'स्' इत्यस्य संयोगान्तपदत्वाभावेन लोपानापत्तिवारणं तु 'संयोगान्तस्य सतः पदान्तस्य इति संयोगान्तलोपसूत्रार्थकरणेन कृतम् । रोरुत्वे कर्त्तव्ये संयोगान्त-लोपस्यासिद्धत्ववारणं तु 'संयोगान्तलोपे रोरुत्वे' इति वार्तिकेन 'हरिवो मेदिनं त्वा'[२१] इत्यादिवदसिद्धत्वनिषेधात् कृतम् । संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्' इति । संयोगान्तलोपसूत्रार्थे तु अस्तिसिचस् स् अपृक्ते'' इतिच्छेदे द्वयोः सकारयोः पर्यायेण रुत्वे कृते 'अतोरो' रित्यनेनैक एवोकारो भविष्यति । विधेयविशेषणस्यैकत्वस्य पश्वेकत्ववद् विवक्षितत्वात्; रोरिति जातिपरनिर्देशेनातः परत्वस्य पूर्वत्वस्य च सम्भवात् । जातिपरत्वे च प्रकृतनिर्देश एव प्रमाणम् । न च परत्वाद् 'हशि च' इति प्रथमस्यैव (अस्ति सिच र् र् अपृक्ते इत्यवस्थायाम्) रोरुत्वं स्यादिति वाच्यम्, रुत्वस्यासिद्धतया हश्परत्वाभावात् । न चाश्रयात् सिद्धत्वमिति वाच्यम्, स्थान्यंशे तथात्वेऽपि निमित्तभूतहशंशे तदसम्भवात् ।[२२]

एवं दृश्यते यथा विमलायां 'द्विसकारको निर्देश'' इति भाष्यस्य निर्दुष्टोपपत्तिः कृतास्ति न तथान्यासु व्याख्यासु अस्तीदमस्या वैशिष्ट्यम् ।

३. बहुत्र महाभाष्यस्य तत्तत्सन्दर्भस्यैकत्र सारांश उपस्थापित इति विमलाटीकायास्तृतीयं वैशिष्ट्यम् । यथा 'वृद्धिरादैच्'[२३] इत्यत्र 'किं पुनरिदं तद्भावितग्रहणम् ।......... आहोस्विदादैज्मात्रस्य[२४]' इत्यत्रत्यसकल-सन्दर्भस्य सारांशः प्रदर्शितो विमलायामेवम्—''तथा चायं निर्गलितोऽर्थः—आवृत्तौ गौरवापत्तेः शालीयादेरसिद्धितः । मालादीनां चेतिलिङ्गाद् व्याप्तिन्यायात्तथैव च ।। भाविसंज्ञात्वविज्ञाने गौरवञ्चेह निश्चितम् । आदैज्मात्रस्याविशेषाद् वृद्धिविज्ञाविधास्यते[२५]'' ।। इति ।

२१- पृ.५६९
२२-तत्रैव
२३-तृ.आ., सू.सं.१/१/१, पृ.१४२
२४-पृ.१४३
२५- पृ.१४५

एवमेव व्याकरणपदार्थनिश्चयप्रसङ्गे 'अथवा पुनरस्तु सूत्रम्'[२६] इति भाष्यमुपादाय तत्रत्यसकलसन्दर्भस्य सारांश एवमुपस्थापितो विमलायाम्— ''सूत्रस्य व्याकरणस्य पदार्थत्वे 'व्याकरणस्य सूत्रम्' इत्यत्र 'वनस्यायं वृक्ष' इत्यादाविवावयवावयविभावसम्बन्धे षष्ठीति व्याकरणस्य सूत्रमिति व्यवहारः, व्याख्यानस्यापि सूत्रार्थमात्राभिव्यञ्जकत्वेन 'व्याकरणाच्छब्दान् प्रतिपद्यामहे' इति व्यवहारश्चोपपद्यते। लक्ष्यलक्षणसमुदायस्य व्याकरणपदार्थत्वे सूत्रमात्रमधीयाने वैयाकरणशब्दप्रयोगः 'तैलं भुक्तम्' इत्यादाविव भाक्तत्वे-नोपपादनीय इत्युभयत्रैव दोषस्य परिहारसम्भवादुभयत्रैव व्याकरणपदार्थत्व-मिष्टमिति भावः''[२७]।। इति।

४. गूढविषयस्यापि सरलभाषयोपस्थापनमस्याः चतुर्थं वैशिष्ट्यम्। यथा 'वृद्धिरादैच् इति सूत्रे कः संज्ञी ? का संज्ञा ? इति सन्देहनिराकरणप्रसङ्गे महाभाष्ये 'लघ्वर्थं हि संज्ञाकरणम्' इत्युक्त्वा तत्राप्ययं नावश्यं गुरुलघु-तामेवोपलक्षयितुमर्हतीति। किंतर्हि ? अनाकृतितामपि'[२८] इति भाष्यस्य यो गूढाशयस्तस्योद्घाटनं विमलायामेव दृश्यते। तत्र हि एवं व्याख्यातम्—अयं= सूत्रकारः, अवश्यं = नैयत्येन, गुरुलघुतामेव = संज्ञासंज्ञित्वव्यवस्थापकत्वेनेति शेषः। उपलक्षयितुम् = स्वीकर्तुं नार्हति = न शक्नोति। अनाकृतितामपीति—एवञ्चोपसर्गसंज्ञासर्वनामसंज्ञा-सम्प्रसारणसंज्ञाकर्मप्रवचनीयसंज्ञादौ न दोष इति बोध्यम्[२९] ।। इति ।

विमलानुसारेण भाष्यस्य एवमाशयः प्रकटितः—यल्लघु सा संज्ञा, यद्गुरु स संज्ञीति नियमो न स्वीकर्तुं शक्यते, उपसर्गादिमहासंज्ञाविषये संज्ञ्यपेक्षया संज्ञानां गुरुत्वात्। अतः संज्ञासंज्ञित्वव्यवस्थापनाय एतदपि स्वीकरणीयं यद् य आकृतिमान् स संज्ञी, या अनाकृतिः सा संज्ञा इति।

एवं बहुषु स्थलेषु भाष्यस्थगूढविषयस्य सरलभाषयोद्घाटनं दृश्यते विमलायाम्।

२६-पृ.४८
२७-तत्रैव
२८-पृ.१५४
२९-तत्रैव

५. बहुत्र प्रदीपोद्योतयोरपि तात्पर्यं विमलाटीकाध्ययनानन्तरमेव स्पष्टं जायते इत्यस्याः पञ्चमं वैशिष्ट्यम्। यथा ''इको गुणवृद्धी''[३०] इतिसूत्रे 'इग्ग्रहणं किमर्थम् ? इति भाष्ये उद्योते उक्तं यन्नागेशेन गुणवृद्धिग्रहणस्योत्तरत्र निषेध्यसमर्पणायावश्यकत्वेऽपि इक्पदस्य 'इकः स्थाने' इत्यर्थार्थमावश्यकत्वेऽपि, योगविभाग-विषयकोऽयं प्रश्नो भाष्ये इग्ग्रहणमिति[३१]। तदपि विमलाया एवं व्याख्यानेन स्पष्टं भवति—''गुणवृद्धीत्यस्य 'न धातुलोप आर्धधातुके' इति सूत्रे प्रतियोगिज्ञानार्थमावश्यकत्वेऽपि इग्ग्रहणं किमर्थम् ? किञ्च गुणवृद्धीत्यस्योत्तरसूत्रमात्रार्थकत्वे 'गुणवृद्धी न धातुलोप आर्धधातुके' इत्येव वक्तव्ये पृथग्योगकरणं किमर्थमिति पृच्छति इग्ग्रहणं किमर्थमिति''[३२]।

एवमेव 'न वेतिविभाषा[३३]' इति सूत्रे अप्राप्तविभाषास्थलप्रदर्शनप्रसङ्गे विभाषोपयमने इत्यत्र कोटित्रयप्रकारकसन्देहोपपादनाय यत् कैयटेनोक्तं- ''विभाषोपयमने'' इति[३४]। यदा गन्धनाङ्गमुपयमनं गृह्यते तदा प्राप्ते, पूर्वप्रतिषेधे त्वप्राप्ते, परविप्रतिषेधे उभयत्र वेति सन्देहः'' इति। तस्य तात्पर्यं विमलयैव स्पष्टं जायते। एवं ह्यत्रत्या विमला—''अयम्भावः- स्वीकारे, विवाहे च यमः परस्य सिचः कित्त्वविधायके 'विभाषोपयमने' इति सूत्रे 'यमो गन्धने' इत्यनुवर्तते, तथा च सूचनपूर्वके विवाहे, स्वीकारे वा यमः परः सिच् किद्वेत्यर्थे 'यमो गन्धने' इत्यनेन प्राप्त एव विभाषाविधानात् प्राप्तविभाषात्वम्। 'यमो गन्धने' इत्यस्याननुवृत्तौ गन्धनमात्रे चरितार्थस्य 'यमो गन्धने' इत्यस्य, विवाहमात्रे चरितार्थस्य विकल्पस्य, गन्धनपूर्वके विवाहे युगपत्प्राप्तौ पूर्वविप्रतिषेधेन 'यमो गन्धने' इत्यस्यैवेष्टत्वे गन्धनपूर्वके विवाहे प्राप्तविभाषात्वम्, शुद्धविवाहेऽप्राप्तविभाषात्वम्। परविप्रतिषेधेन विकल्पस्यैवेष्टत्वे गन्धनपूर्वके विवाहे प्राप्तविभाषात्वम्, शुद्धविवाहे

३०- तृ.आ.,सू.सं.१/१/३,पृ.१६४

३१-तत्रस्थोद्योते

३२-प.१६४

३३-ष.आ.,सू.सं.१/१/४३,पृ.४०९

३४-उक्त वार्तिकानन्तरमुद्योते।

अप्राप्तविभाषात्वमित्युभयत्र विभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते'' इति[३५]।

एवञ्चान्यत्रापि बहुत्र प्रदीपाशयं नागेशकृतोद्योताशयञ्च मनसि निधाय सरलया सरण्या महाभाष्याशयम्प्रकटयामास विमलाकारः।

६. प्रतीयमानसिद्धान्तिभाष्यस्याप्येकदेशित्वसूचनं युक्त्या अस्या षष्ठं वैशिष्ट्यम्। यथा— 'कृन्मेजन्त[३६]' इति सूत्रे भाष्ये 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य[३७]' इति परिभाषायाः 'ग्रामणि कुलम्' इत्यत्र तुगभावरूपप्रयोजनमुक्त्वा तस्य पुनः ''नैतदस्तिप्रयोजनम्, बहिरङ्गं ह्रस्वत्वम्, अन्तरङ्गस्तुक्। ''असिद्धं बहिरङ्गमन्तरङ्गे[३८]'' इत्यग्रिमेण भाष्येण निराकरणे पुनरस्मिन् विषये अग्रे किंचित्कथनाभावेनेदं सिद्धान्तिभाष्यं प्रतीयते। परन्तु विमलायां ग्रामणि कुलमित्यपि सन्निपातपरिभाषायाः प्रयोजनमिति प्रतिपाद्य प्रयोजननिराकरण-परभाष्यस्यैकदेशित्वं सूचितम्। इत्थञ्चात्रत्या विमला—''इदमत्रालोचनीयम्— ग्रामणि कुलमित्यत्र 'इको ह्रस्व' इति विहितस्य बहिरङ्गत्वेऽपि 'ह्रस्वो नपुंसके' इति विहितस्यापरनिमित्तकत्वेनान्तरङ्गतया तस्य तुकि कर्त्तव्येऽसिद्धत्वाभावेन तुको दुर्वारतयास्य परिभाषाफलत्वमुपपद्यते। न चात्र 'ह्रस्वो नपुंसके'' इति सूत्रं परत्वाद् बाधित्वा 'इको ह्रस्व' इत्यनेनैव ह्रस्वत्वं स्यादिति, तस्य बहिरङ्गत्वेन बहिरङ्गपरिभाषयैवेष्टसिद्धिरिति वाच्यम्, एवमपि कुलं ग्रामणि इति वाक्यस्थग्रामणिपदे 'इको ह्रस्व' इत्यस्याप्राप्तेर्नपुंसकह्रस्वस्यैव वक्तव्यतया तस्य चापरनिमित्तकत्वेनान्तरङ्गतया बहिरङ्गपरिभाषया असिद्धत्वाभावेन सन्निपातपरिभाषाया एव शरणीकर्त्तव्यत्वात्। नपुंसकह्रस्वस्यान्तरङ्गत्वेन 'इको ह्रस्व' इत्यस्य तद्बाधकत्वासम्भवाच्च। न चानया ग्रामणिच्छत्रमित्यत्रापि तुकोऽभावापत्तिरिति वाच्यम्, अत्र तुगभावस्यैवेष्टत्वात्। अत एव सन्निपातपरिभाषादोषेष्वेतस्यानुक्तिरेतद्भाष्यस्यैकदेश्युक्तत्वमेवेति प्रतीमः।

३५-पृ.४२८

३६- ष.आ.,सू.सं.१/१/३९, पृ.३९२

३७-पृ.३९५

३८-पृ.३९६

सन्निपातश्चात्र न केवलं पूर्वपदयोरेव किन्तुविशेष्य-विशेषणभावोऽपीति नपुंसकह्रस्वस्यापि सन्निपातलक्षणत्वमित्यवधेयम्''[३९] । इति ।

एवमेव अस्मिन्नेव प्रकरणे नलोपो वृत्रहभिः[४०], उदुपधत्वमकिन्वस्य निकुचिते[४१], इत्याद्यनेकप्रयोजननिराकरणपरभाष्यस्यैकदेशित्वं प्रतिपादितं विमलायां तत्रैवालोकनीयं नितान्तं रमणीयं चात्रत्यं विमलोपस्कृतं भाष्यम् ।

७. महाभाष्ये सम्भावितन्यूनतायाः परिहारोऽपि दृश्यते विमलायामिति सप्तमं वैशिष्ट्यम् ।

यथा—'इको गुणवृद्धी'[४२] इत्यत्राक्षेपभाष्यं वर्तते—'किं पुनरयमलोन्त्य-शेषः ? आहोस्विदलोऽन्त्यस्यापवादः[४३] ? इति । यस्यास्ति तात्पर्यं यदस्मिन् विधिसूत्रे 'इको गुणवृद्धी' अलोऽन्त्यस्य इत्युभयसूत्रयोः विषयत्वन्तत्र 'अलोऽन्त्यस्य' इत्यनेन 'इको गुणेवृद्धी' इति विशेषणरूपेणान्वेति, अथवा 'अलोऽन्त्यस्य' इति सूत्रं प्रबाध्य 'इको गुणवृद्धी' इत्यपवादत्वेन प्रवर्तते ? शेष इत्यस्य विशेषणमित्यर्थः । अत्र भाष्ये द्वावेव पक्षावुपस्थापितौ, परन्तु विमलायां सप्त पक्षान् सम्भाव्य तेषां सर्वेषां पक्षाणामनेन, अग्रिमेण च भाष्येणान्तर्भावं कृत्वा न्यूनत्वापत्तिर्वारिता । एवमस्ति अत्रत्या विमला—''यद्यपि शेषो वा, शेषिभूता वा, तया सह समुच्चिता वा, वैकल्पिकी वा, विप्रतिषेधो वा, तदपवादो वा, पदोपस्थापिका वेति सप्त पक्षाः सम्भाव्यन्ते तथापि तच्छेषिपक्षस्यापि बहुव्रीहिणा तच्छेषपदेनैव लाभसम्भवात् पृथग्नोक्तः । मिदङ्गान्त्यस्येकश्च द्वयोरपि गुण इत्यर्थस्तृतीयः पक्षः, मिदङ्गान्त्यस्य मिदङ्गावयवस्येकः (वा) गुण इत्यर्थकश्चतुर्थः पक्षश्च अङ्गस्येति षष्ठ्याः स्थानत्वावयवत्वेनोभयार्थकत्वाभावेनासम्भवदुक्ति-कत्वान्नोक्तः । तदपवादस्तूक्त एव । पूर्वविप्रतिषेधपक्षोप्यग्रे दूषयिष्यते,

३९-पृ. ३९६-९७
४०-पृ. ३९७
४१- पृ. ३९८
४२- पृ. १६४
४३- पृ. १७२

पदोपस्थितिपक्षश्च सिद्धान्तयिष्यत इति भाष्यस्य न न्यूनतेत्यवधेयम्''[४४] ॥ इति ।

एतत्सम्भावितन्यूनतायाः प्रदर्शनं परिहारश्च अन्यस्यां कस्यामपि टीकायां नात्रलोक्यते । एवमन्यत्रापि एतद्वैशिष्ट्यं द्रष्टुं शक्यते विमलायाम् ।

एवं विवेचनया सिद्ध्यति यत् विमलाटीकायां विद्यते पूर्वाचार्यकृत-टीकाभ्योऽपूर्वत्वं वैशिष्ट्यं वा। यद्यपि अस्याः वैशिष्ट्यमधिकृत्य शोधप्रबन्धोऽपि रचयितुं शक्यते तथापि संक्षेपेणेह सुधियां मनोविनोदाय समुपस्थापितमत्रत्यं वैशिष्ट्यम्। ....'' इति ।

अस्यां भूमिकायां प्रायस्सर्वत्रावच्छेदकावच्छेदेन महाभाष्यव्याख्यानयोः प्रदीपोद्योतयोः कैयटनागेशाभ्यामविचारिता अप्रस्तुताश्च नैके विषया विमलाकारेण सम्यग्विवेचिता इति मया व्यलेखि। महानुभावयोर्निखि-लविद्यावतारयोर्मुनिकल्पयोरुपरि मया पर्यनुयोगो वा अप्रामाण्यभावना वा नैव स्थाप्यते, नैव च स्थापनीया । यत्र महाभाष्ये अतिकठिना विषयास्तानेव कैयटनागेशौ स्वप्रणीतयोः प्रदीपोद्योतयोः सम्यक् सप्रमाणं प्रत्यपादयताम् । तयोर्महानुभावयोः कैयटनागेशयोः प्रदीपोद्योतग्रन्थद्वयस्थविषयाः सर्वात्मना महाभाष्यकारीयनिगूढसिद्धान्तान् सर्वानप्यवच्छेदकावच्छेदेन दर्पणायन्ते। परन्तु अद्यत्वे मन्दमध्यमाधिकारिणोऽल्पबुद्धिमन्तश्च व्युत्पित्सवो वैयाकरणाः कैय्यटनागेशाभ्यां प्रणीताभ्यां प्रदीपोद्योताभ्यां महाभाष्यकारीयनिगूढसि-द्धान्तान् बोद्धुमशक्तास्सन्तो महाभाष्यग्रन्थस्थं निगूढं तत्त्वं न जानीयुः । तादृशानामपि मन्दमध्यमाधिकारिणां व्युत्पित्सूनां वैयाकरणानामप्यनायासेन महाभाष्यस्थनिगूढसिद्धान्ततत्त्वावबोधनायैव प्रदीपोद्योतयोरविचारितान् विषयानत्र विमलाटीकायां पण्डितमहेशझाशर्मा छात्रोपयोगितया व्यवृण्वत् । अतः कैयटनागेशाभ्यां प्रणीतयोः महाभाष्यप्रदीपोद्योतयोरप्रामाण्यं, न्यूनता वा अस्माभिर्नैव शङ्कनीया । मन्दमतीन् व्युत्पित्सून् वैयाकरणान् समुद्धर्तुमेव महेशझाशर्मणा विमलाव्याख्यानं प्रणीतम्, नतु कैयटोद्योतग्रन्थयोरुपर्यप्रा-माण्यशङ्कया, न वा द्वेषभावनयेति ।

४४- पृ.१७२-७३

मिथिलायां द्वारबंगजनपदे (इदानीम्मधुवन्याख्ये मण्डले) सरिसबपाहीग्रामनिकटे 'गङ्गौली' नामा ग्रामो न्यायरत्नपण्डितमहेशझाशर्म्मणो जन्मस्थानम्। पलिवारमहिषीमूलवंशोत्पन्नः वत्सगोत्रजातो वैदिकक्रियाकुशलो वैदिकप्रवरः लक्ष्मीकान्तझाशर्म्मनामा पण्डितः सरिसबग्रामं परित्यज्य सर्वतः पूर्वमिमं ग्राममध्यवात्सीत्। घोंघेझा - कमलनयन - लक्ष्मीकान्तान्वय ऊर्वीधरझाशर्म्मनामा कश्चन जनोऽभवत्, तत्तनयश्च गङ्गाधर आसीत्। गङ्गाधरस्य त्रयस्तनूजा अभवन् - गुणधरझाशर्म्मा, मार्कण्डेयापरनामकः गदाधरझाशर्म्मा, महामीमांसक आचार्यजगद्धरझाशर्म्मा च। तस्मात्प्रथमाद्गुणधराद् विन्देश्वरीदेव्याभिधानायां भार्यायामस्माकं चरितनायकस्य नैयायिकशिरोमणेः वैयाकरणप्रवरस्य धीमंतो महेशझाशर्म्म-महोदयस्य आषाढ़शुक्लत्रयोदश्यां तिथौ 1957 वैकमाब्दे (सन् 1308 सालवर्षे) तदनुसारं 1901 खृस्तवर्षे जन्म अभवत्। वर्षत्रयादनन्तरं महेशस्य जनकः अकाल एव परलोकमगात्। ततश्च कनिष्ठः पितृव्यः महामीमांसकः जगद्धर एव महेशं परमप्रेम्णा पर्यपोषयत्, उपाध्यायवदावश्यकं पाठ्यजातं शिक्षयन्, पौगण्डं प्रापयामास। अयञ्च महाशयः स्वीये ग्रन्थे उपोद्घातानन्तरं निवेदनाख्ये शीर्षके नवश्लोकैः स्वकीयं संक्षिप्तं परिचयं प्रददाति। यथा—

''अस्त्यधिमिथिलं प्राची श्रोत्रियसंख्यावतां वसतिः।
लघुरपि गौरवगणिता 'गङ्गौली' नामिका नगरी ॥१॥
तत्र द्विजपति 'पाली'—कुलसिन्धौ कुमुदिनीबन्धोः।
'वंशधराद्' बुधरत्नात् कृतधी'रुर्व्वीधरः' समभूत् ॥२॥
सौजन्यजन्यकीर्ति—भ्राजितभूमण्डलस्तस्मात्।
श्रुतवैदुष्यविशेषात् सुकृती 'गङ्गाधरो' जज्ञे ॥३॥
आकलितशब्दशास्त्रः परोपकारी स्थितिप्रथितः।
अभवद् यथार्थनामा शिवभक्तो 'गुणधर'स्तस्मात् ॥४॥
शाब्दिकचूड़ारत्नं स्मृतिदर्शनतत्त्वसंख्यायी।
तस्यानुजः सुमेधा विशदाचरणो 'गदाधरो' जज्ञे ॥५॥
मीमांसकः प्रणेता निगमागमबन्धरत्नानाम्।
आश्रितमिथिलाधीशस्तस्यानुजनि-जगद्धरोऽप्यभवत् ॥६॥

उज्ज्वल-'नरोन'कुलज—प्राज्ञकवे'रादिनाथस्य' ।
दुहितरि 'विन्ध्येश्वर्यां' यःकृतिनो 'गुणधरा' ज्जातः ॥७॥
वर्णाश्रमधर्मस्थिति—रक्षणदक्षोचिताचरणः ।
'श्रीनाथो' विद्वद्वर—'गौरीनाथ'श्च मातुलौ यस्य ॥८॥
यस्यानुजो 'दिनेशो' गुरुकृपया 'श्रीमहेशेन' !
व्याकरणभाष्यविवृतिस्तेनेयं तन्यते '**विमला**' ॥९॥''

शैशवे तदेव जनपदं स्वजन्मना प्रसाधयतः सर्वतन्त्रस्वतन्त्र-पण्डितमार्कण्डेयमिश्रसविधे लक्ष्मीवतीसंस्कृतविद्यालये पदवाक्यप्रमाणशास्त्रं समधीत्य सम्प्राप्तभाषीयव्युत्पत्तिवैशद्यो वाराणसीमाश्रयत्। तत्र मनीषिमण्डलमण्डनान्महामहोपाध्यायश्रीवामाचरणभट्टाचार्यमहोदाया-न्न्यायविद्याया बंगीयपरम्परां म. म. पण्डितबालकृष्णमिश्रमहोदयान्न्यायविद्याया मैथिलपरम्परां, पण्डितराजश्रीराजेश्वरशास्त्रिद्रविडमहाभागाद्दाक्षिणात्यपरम्परां, म. म. पण्डितश्रीजयदेवमिश्राच्च विशदां व्याकरणविद्याञ्च श्रमक्रमाभ्याम् आत्मसादकरोत्। अतएव स्वग्रन्थमर्पयता तेनोक्तम् —

'श्रीलक्ष्मीश्वरसिंहो यज्ञे नृपो यशोधवलितानन्तः।
आर्या तदग्रमहिला लक्ष्मीवती श्रीमती जयति ॥
अधिसरिसबविद्यामन्दिरं यत्प्रसादाद्
दुरधिगममधीतं शब्दतन्त्रं समन्तात्।
अतुलमहिमकाश्यां न्यायशास्त्रं च तस्याः
करविकसित-पद्मद्वन्द्वयोरर्प्यतेऽयम् ॥''

वाद-विवादगोष्ठीषु निबन्धलेखनप्रतियोगितासु च प्रथमस्थानलाभेन सदैव विद्यार्थिवर्गे शास्त्रीयविचारसभासु शास्त्रीयासाधारणपाण्डित्य-प्रकाशनेन तद्विद्वद्वर्गे श्रीमहेशझाशर्म्मा महतीं कीर्त्तिमार्जयत्।

न्यायाचार्यपरीक्षायामुत्तीरणानन्तरमेनं सीतामढ़ीमण्डलान्तर्गत बाराहीग्राममुख्यः संस्कृतविद्यालयाध्यक्षश्च नित्यानन्दशर्म्ममहोदयः स्वकीये सीतारामसंस्कृतविद्यालये न्यायशास्त्राध्यापकपदे 1925 तमे वर्षे न्ययोजयत्। त्रिवर्षाणि यावत्तत्राध्यापनपाटवोद्भूतेन प्रभूतेन यशसा विभूषितः

पण्डितझामहोदयः सुलतानगञ्ज(भागलपुर)स्थित-बनैलीराज-कलावती-सुरभारतीसंस्कृतविद्यालये प्रधानाचार्यपदे नियोजितोऽभवत्। अत्र पञ्चदशवर्षं यावत् (1928-1943) स्वकार्यं निर्वाह्य पण्डितझाशर्मा 1943 तमे वर्षे तत्रैव स्थिते विक्रमशिलावैदिकसंस्कृतमहाविद्यालये प्रधानाचार्यपदे नियुक्तः। यत्र 1953 खृस्तवर्षपर्यन्तमासीत्। अनन्तरं सरिसबग्रामस्थिते लक्ष्मीवतीसंस्कृतविद्यालये 1953 तः 1958 पर्यन्तं, वर्षपञ्चकं यावत्सुचारुरूपेण प्रधानाचार्यस्य कार्यं सम्पाद्य अवकाशं प्राप। सुलतानगञ्जनगरागमनस्य महेशस्य काचिद्विलक्षणैव कथा बाल्यकाले मया श्रूयते स्म। यदा एते बाराहीसंस्कृतविद्यालयेऽध्यापनरता आसन् तदा सुलतानगंजनगराधीश्वरः राजा कृष्णानन्दसिंहः कर्णपरम्परातो विशेषतः स्वराजपण्डितश्रीगौरीनाथझाशर्म्माननात् महोदयस्यास्य वैदुष्यं प्रतिभाञ्च परिज्ञाय दूतमुखेन तमाजुहाव। 'निजविचारेण निर्णीयतामखिलम्' इति जल्पन् मनस्वी सोऽयं सगौरवं राजसभामिमामातस्थौ। अथ प्रसङ्गेन राजद्वारस्थितैः परमप्रगल्भैरपि पण्डितपुण्डरीकैः सह शास्त्रविचारे सर्वाधिकं वैचक्षण्यं ख्यापयन् सोऽयं महेशझाशर्म्मा सुलतानगञ्जाधीश्वरस्य कृष्णानन्दसिंह-महोदयस्य हृदि परमं गौरवमास्थापयामास। तदैव श्रीमन्महेशझामहोदयं स्वकीये विद्यालये प्रधानोपाध्यायपदमध्यारोपयामास। एतेषामेवानुरोधेनाऽयं पातञ्जलमहाभाष्यस्य विमलानामकं व्याख्याग्रन्थं न्यबध्नात्।

मध्ययौवने देशाटनजन्यं बहुतरं लाभमुपार्ज्य सोऽयं स्वदेशं प्रत्याववृते। दरभंगाधीशस्याऽनुज्ञया विद्वद्वरोऽयं सरिसबपाहीस्थितस्य लक्ष्मीवतीसंस्कृतविद्यालये प्रधानाचार्यपदे नियोजितोऽभवत्। अस्मादवकाशग्रहणानन्तरं वर्षपञ्चकं गृहे उषित्वा पुनश्च एते 1963 तमे वर्षे द्वारबंगस्थ-मिथिलासंस्कृतविद्यापीठापरनामके मिथिलाशोधसंस्थाने सप्त वर्षाणि यावत् (1963-70) 'सम्मानितपण्डित' पदं विभूषयाञ्चकार।

शास्त्रार्थिमण्डलेऽपि लब्धप्रतिष्ठः दार्शनिकवरिष्ठः तार्किक-मूर्द्धन्यपण्डितमहेशझाशर्म्मा तर्कप्रदीपाख्यं प्रकरणग्रन्थं नव्यन्यायशास्त्रे निर्ममे, यद्धि सुप्रसिद्धं मिथिलाविद्यापीठादष्टसप्ततितमे वर्षे प्रकाशित-

मभूत्। अयञ्च शाब्दिकशिरोमणिः स्फोटवादाख्यं (स्फोटनिरूपणम्) ग्रन्थमपि निबबन्ध, धातुसारः-विषयतावादः-शब्दद्रव्यत्ववादश्चापि अस्माकं चरितनायकस्याऽपूर्वाणि ग्रन्थरत्नानि। जीवनस्य चरमे यामे सिंहव्याघ्रलक्षणग्रन्थस्य कौशिकीनामिकां व्याख्यामारेभे, यां हि विंशतिपुटात्मकमेव निर्माय रुग्गस्सन् कार्तिकवदिद्वादश्यां तिथौ (नवम्बर ३० तारिकायां) 1983 तमे वर्षे परलोकपथिकोऽभूत्। लघुशब्देन्दुशेखरस्य कारकान्ता व्याख्या, महाभारतस्यापि भीष्मपर्वान्ता चूर्णिका व्याख्या महेशझाशर्मणः अप्रकाशितौ ग्रन्थौ स्तः। केषाञ्चिन्मते दारुविहङ्गमाख्यं विमानशास्त्रमप्यनेन विरचितम्, किन्तु तन्नोपलभ्यते।

एतावता प्रबन्धेन यथाशक्ति यथामति महाभाष्यव्याख्यानेषु महेशझाशर्मणा प्रणीतस्य विमलाव्याख्यानस्य वैशिष्ट्यं महत्त्वञ्च मया प्रादर्शि। एतादृशविमलाव्याख्यानग्रन्थाध्ययनमाध्यमेनास्माभिरिदं ज्ञातुं शक्यते यत् विमलाकारो महेशझाशर्म्ममहाशयो न केवलं वैयाकरणः, अपितु स महानुभावः पदवाक्यप्रमाणपारावारपारीणश्चापि। एतादृशोऽयं स्वाध्यायतपस्वी पण्डितपुण्डरीको निखिलवैयाकरणानुजिघृक्षया महता प्रयत्नेन नवाह्निकान्तस्य भागस्य प्रामाणिकं विमलाख्यं पूतं व्याख्यानं प्रणीय पण्डितलोकमुद्धारयामास। नवमाह्निकपर्यन्तं पातञ्जलमहाभाष्यं तत्रत्यगूढार्थप्रदर्शनप्रयत्नपरायाः नूतनायाः विमलाख्यायाः व्याख्यायाः सहयोगेन सारस्वतोपासकानां सुरभारतीविदुषामन्तेवासिनाञ्च कृते दुरूहोप्यर्थो झगिति हृदयङ्गमो भविष्यति सन्तोषञ्च जनयेदिति सुदृढो मे विश्वासः। दूरीकृतसकलदोषे मुद्रणविधिकलापोषेऽस्मिन् ग्रन्थे मूलपाठप्रतीकज्ञानाय विमलायां टीकायां स्थूलाक्षरविन्यासोऽपि व्यधायि। व्याख्येयमतीव समीचीना मूलग्रन्थालापनेऽथापि क्वचिच्छिष्टविशिष्टपदार्थज्ञानसाधनमप्यध्ययनाध्यापनयोरुपकुर्यादिति मे विश्वासः। अपि च अनयाभिनवया विमलयाख्यया व्याख्यया सम्यगुपकृताः स्युर्विद्वांसश्छात्राश्चेत्यहं विश्वसिमि। यथावधानं संशोधितेऽप्यत्र ग्रन्थे मनुजसुलभेन भ्रमेण जाताऽशुद्धिरवलोक्येत चेत्तर्हि तदपनोदनभारोऽपि विद्वद्भिरेव वहनीय इति सानुनयमभ्यर्थये।

अत्र टीकाकर्तुः जीवनवृत्तलेखनप्रसङ्गे श्रीमद्भिः भवेशझाशर्मभिस्तदात्मजैः श्रीजीवेशझाशर्मभिश्च सामग्रीप्रदानसूचनाभ्यां सुबहूपकृतमिति तयोरुभयोर्निरुपधिप्रेमभावं प्रकाशितवतोरुपकाराः कथमिव न संस्मरणगोचरतां व्रजेयुः ।

एतत्सम्पादनादिविषये सुचारुभावेन वात्सल्यातिरेकेण च प्रत्यक्षपरोक्षरूपेण प्रोत्साह्य स्वीयाशीर्वचोभिः सम्यक्परामर्शैश्च ये सनाथितवन्तः, ग्रन्थगौरवाय मम उत्साहसम्बर्द्धनाय च 'आमुख' प्रदानद्वारा ये ग्रन्थमेनं विभूषितवन्तः, ते भवन्ति तत्र भवन्तः आचार्य डा० कृष्णानन्दझा 'श्याम' महोदयाः, कामेश्वरसिंहसंस्कृतविश्वविद्यालयस्य स्नातकोत्तरव्याकरणभाषाविज्ञानविभागाध्यक्षचराः सङ्कायमुख्याश्च । तेभ्यः आचार्यवर्येभ्यः वैयाकरणप्रवरेभ्यः प्रणिपातपूर्वकं कार्त्तज्ञं विनिवेदयामि ।

इतः पूर्वमस्याः व्याख्यायाः एकमेव संस्करणं प्रकाशितं, यत्र सम्पादकस्य व्यस्ततया अन्यैर्वाऽज्ञातकारणैः सम्यक् संशोधनादिकं न जातमासीत् । ईदृशस्यापरिष्कृतग्रन्थस्य सम्पादने मया महत्काठिन्यमनुभूतम्, तत्र च मम प्रार्थनया द्वितीयप्रूफसंशोधनस्य महान् भारः का.द.सं. विश्वविद्यालयस्य स्नातकोत्तरव्याकरणभाषाविज्ञानविभागाध्यक्षैः प्रो० (डॉ०) शशिनाथझाशर्म्मभिः सहर्षं स्वीकृतः, अनेके बहुमूल्याश्च परामर्शास्तैः प्रदत्ताः, इति हेतोस्तान् प्रत्यहमधमर्णोऽस्मि ।

बहुभिर्विद्वद्भिः महाभाष्यस्य विद्यमानास्वपि प्रदीपादिव्याख्यासु विमलेयं व्याख्या विशेषरूपेणानुसन्धानविषयीकृता । अस्मिन्नेव सन्दर्भे आचार्य डॉ० सुरेश्वरझाशर्म्मा सुचिरं व्याख्यामिमामनुसन्धाय प्रसङ्गेऽस्मिन् शोधनिबन्धं प्रास्तावीति । तत्र गणनाक्रमेण सप्तव्याख्यावैशिष्ट्यस्थलानि प्रस्तुतवान् । येन चासाधारणं विमलावैशिष्ट्यं प्रकाशितम्भवति । प्रासङ्गिकतया चाऽहं तदनुमत्या तं शोधनिबन्धं भूमिकायां न्यवेशयम् । किञ्चानेन शोधनिबन्धेन ममापि सम्पादनकार्ये महानुपकारः सञ्जात इति तान् प्रति भृशं भृशं कृतज्ञोऽस्मि ।

अत्राऽस्मदभिन्नहृदयाः सुहृद्वराः व्याकरणविभागीयाः अस्मत्स-

हकर्मिणः आचार्य डॉ० के. वी. सोमयाजुलुशर्ममहोदयाः सर्वथाऽविस्मरणीयास्सन्ति, ये पर्याप्तशास्त्रव्यासङ्गात्मकमसीमितं साहाय्यं विधाय मामत्यन्तमन्वग्रहीषुः। विद्याविनयसम्पन्नेभ्यस्तेभ्यः मदीयानवच्छेदकावच्छेदेन सश्रद्धं सविनयं कार्त्तज्ञं साधुवादश्च विज्ञापयामि।

प्रस्तुतग्रन्थप्रकाशनादिकर्मसु मामत्यन्तमुपकुर्वतां नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानाऽधिकारिणामुपकारातिशयं मनसि निधाय तेभ्यस्सर्वेभ्यो मान्यमान्येभ्यो मदीयान् हार्दिकधन्यवादान् प्रणामततिपुरस्सरं सविनयं सश्रद्धं व्याहरामि। यद्येनमप्यास्माकीनमुद्यमं विद्वांसः कृतार्थमकरिष्यन् भविष्यामस्तदान्यानपि इतराकरग्रन्थानुद्धर्त्तुं दृढोत्साहाः। पुनश्चैकवारं स्खलननिसर्गकत्वात्पुंसामत्रत्यं दोषगणमपहाय गुणलवमेव संगृह्णीयुस्तत्र सुधिय, इत्याशासे।

पुरी (उड़ीशा)
स्वतन्त्रतादिवसः, २००९

विद्वज्जनकृपाभिलाषुकः
अशोकोपनामा
झोपाह्वोदयनाथोपाध्यायशर्म्मा

सूचीपत्रम्

श्रीमद्भगवत्पतञ्जलिमुनिरचितम्

व्याकरण-महाभाष्यम्

पण्डितमहेशझाशर्म्मकृत-विमलाव्याख्योपेतम्

प्रथमाध्याये प्रथमपादे प्रथमाह्निकम्

(शास्त्रारम्भप्रतिज्ञाभाष्यम्)

अथ शब्दानुशासनम् ।

अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते ।
शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ।।

विमला

गजाननं गुरुं सीतां निजदेशसमुद्भवाम् ।
महेशस्तनुते नत्वा विमलां सरलामिमाम् ।।

शब्दजिज्ञासूनामन्तेवासिनाम्प्रवृत्तये ग्रन्थादौ प्रतिज्ञामाह–**अथ शब्दानुशासनमिति** । **प्रतिज्ञा** नाम अव्यवहितोत्तरकालकर्त्तव्यत्वप्रकारकज्ञानानुकूलशब्दप्रयोगात्मको व्यापारः । स चात्र–अथ शब्दानुशासनमित्याकारकः ।

"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।।"

इति भाष्यलक्षणानुसारेण अथशब्दानुशासनमित्यस्यार्थं वर्णयितुम् अथपदं तावद्व्याचष्टे–**अथेत्ययं शब्दोऽधिकारार्थ** इति । अधिकारो नाम प्रारम्भः **सोऽर्थः** प्रयोजनं यस्येति बहुव्रीहिः । **अयम्भावः** शब्दानुशासनमित्यत्र क्रियाया अनुक्तत्वात् क्रियामध्याहृत्यैव बोधः करणीयः । तत्र समाप्त्यादि– क्रियामध्याहृत्य शब्दानुशासनं समाप्तमिति ज्ञात्वा जिज्ञासुरपि कश्चिन्निवर्तेत अतः प्रारम्भद्योतकमथपदम् । न च शब्दानुशासनमधिकृतमित्येव कुतोनोक्तमिति वाच्यम्, मङ्गलार्थतया तथाभिधानात् । **न च "सकृदुच्चरितः शब्दः सकृदर्थङ्गमयतीति"** व्युत्पत्तिविरोधात्सकृदुच्चरितादथ-

पदादधिकारमङ्गलयोर्बोधो दुर्घट एवेति वाच्यम् । अधिकारमात्रबोधकस्याप्यथपदस्य अन्यार्थं नीयमानपूर्णघटस्येव मङ्गलकारकत्वसम्भवात् । इतिपदम् अथपदस्य स्वरूपेऽवस्थापनाय । अथशब्दोऽधिकारार्थ इत्युक्तौ कस्यचिदन्यस्य शब्दस्याधिकारार्थत्वमिति भ्राम्येत् । तद्वारणाय अयमिति पदम् । अनुशिष्यन्ते अपशब्देभ्यो विविच्य कथ्यन्ते साधुशब्दा अनेनेत्यनुशासनम् शास्त्रम् । शब्दानुशासनमिति व्याकरणस्यान्वर्था संज्ञा इत्येव ध्वनयितुं नामपदम् । तथा च शब्दानुशासनसंज्ञकम् । व्याकरणशास्त्रम् प्रारब्धमिति समुदितार्थः ।

(अनुशासनीयशब्दनिर्णयाधिकरणे आक्षेपभाष्यम्)

केषां शब्दानाम् ?

विमला – शब्दानुशासनम् प्रारब्धमिति प्रतिज्ञया सामान्यतः शब्दजिज्ञासूनामेव नियमतः प्रवृत्तिः स्यात्, कादाचित्की तु लौकिकवैदिकशब्दजिज्ञासूनामिव काकवाशितादि-जिज्ञासूनामपि प्रवृत्तिः स्यादिति लौकिक-वैदिक-शब्दजिज्ञासूनां नियमतः प्रवृत्तये काकवाशितादि-जिज्ञासूनां निवृत्तये च सामान्यतयोच्चरितस्यापि शब्दपदस्य विशेषेऽवस्थापयितुं शङ्कते-**केषामिति** । ननु सर्वनाम्नः प्रधानपरामर्शकतया शब्दानुशासने विशेषणीभूतस्य शब्दस्य किमा परामर्शो न स्यादत आह - **शब्दानामिति** । अथवा **दशैते राजमातङ्गास्तस्यैवामी तुरङ्गमा** इत्यादौ विशेषणीभूतस्यापि राज्ञो बुद्ध्या प्रविभज्य सर्वनाम्ना परामर्शदर्शनात् अत्रापि बुद्ध्या प्रविभज्य किमा परामर्शसम्भवात् किमा परामृष्टस्य शब्दस्य स्पष्टप्रतिपत्तये आह – **शब्दानामिति** । अथवा शब्दानुशासनस्यैव किम्पदेन परामर्शः विशेष्ये किम्पदवाच्यतावच्छेदकस्य जिज्ञासितत्वस्य बाधात् "**सविशेषणे हि विधिनिषेधौ सति विशेष्यबाधे विशेषणमुपसंक्रामत**" इति न्यायात् शिखी ध्वस्त इत्यत्र ध्वंसस्येव शब्दे जिज्ञासितत्वान्वये न किञ्चिद् बाधकमिति सूचयितुमाह– **शब्दानामिति** ।

(समाधानभाष्यम्)

लौकिकानां वैदिकानां च । तत्र लौकिकास्तावद् - गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति ।। वैदिकाः खल्वपि — "शं नो देवीरभिष्टये" । इषे त्वोर्जे

त्वा । अग्निमीले पुरोहितम् । अग्न आयाहि वीतय"
इति ।।

विमला – लौकिकानामिति । न चाभ्यर्हितत्वात् वैदिकानामित्येव प्राग्वक्तव्यमिति वाच्यम् । साधुत्वेन कामधुक्त्वस्य वक्ष्यमाणतया वैदिकवदादरसूचनाय तथाभिधानात् । वैदिकानां लौकिकत्वेऽपि प्राधान्यख्यापनाय "ब्राह्मणवसिष्ठ"- न्यायेनाह — **वैदिकानामिति** ।

(आक्षेपभाष्यम्)

अथ गौरित्यत्र कः शब्दः ?

विमला – अथ गौरित्यत्र कः शब्द इति । अथेत्यानन्तर्यार्थकम्, पृच्छ्यत इति शेषः । अनन्तरम्पृच्छ्यत इत्यर्थः । किम्पृच्छ्यते तदाह – **गौरित्यत्रेति** । गौरितिस्वरूपे-ऽन्यस्याभावाच्छङ्कैव नोदेति । किन्तु ज्ञानाभिलापकः शब्दो गौरिति, तस्य च ज्ञानस्याधारत्वम् । अत्रेत्यस्य प्रतिभासमानेष्वित्यर्थः निर्द्धारणे सप्तमी । तथा च गौरिति शब्दाभिलप्ये ज्ञाने प्रतिभासमानेषु वस्तुषु कः शब्दपदाभिधेय इति समुदितार्थः ।

(आक्षेपोपपादकभाष्यम्)

किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः ?

विमला – गौरिति शब्दाभिलप्ये ज्ञाने द्रव्यं गुणः क्रिया जातिः गौरिति पदञ्च भासन्ते । तत्र द्रव्यगुणक्रियाजातीनां शब्दत्वं निराकृत्य गौरिति शब्दे शब्दपदाभिधेयत्वं व्यवस्थापयितुं क्रमेण आक्षिपति–**किं यत्तदिति** । ननु घटादिपदादाकाशादि-विषयकशाब्दबोधवारणाय तत्पदजन्य-तद्विषयकशाब्दबोधे तत्पदनिष्ठशक्तिज्ञाना-धीनतद्विषयकोपस्थितिः कारणमित्यकामेनापि मन्तव्यम् । तथा च गवादिपदस्य गुणक्रिययोः शक्त्यभावेन कथं तयोः गवादिपदजन्यशाब्दबोधविषयत्वमिति चेदुच्यते–

"रामेतिद्व्यक्षरं नाम मानभङ्गः पिनाकिनः ।
गर्वभङ्गो भार्गवस्य शौर्य्यभङ्गश्च वालिनः ।।"

ओमित्येकाक्षरम्ब्रह्म । वृद्धिरादैच् । इत्यादि दर्शनाच्छब्दार्थयोस्तादात्म्य-मङ्गीकार्य्यम् । घट: शुक्ल: गौश्चल: इत्यादिप्रतीत्या गुणगुणिनो: क्रियाक्रियावतोश्च तादात्म्यमिति–"**तदभिन्नाभिन्नस्य तदभिन्नत्वम्**" इति न्यायेन गुणक्रिययो: शब्देन तादात्म्यं समायातमिति वैयाकरणमते तादात्म्यस्यैव शक्तिपदार्थतया गवादिपदस्य गुणक्रिययो: शक्तिरुपपन्नेति । नन्वेवमस्तु गुणक्रिययो: शाब्दबोधविषयत्वम् । शब्दस्य शाब्दबोधे भानन्तु अप्रामाणिकमेवेति चेदुच्यते-यथा हस्तिपकं दृष्ट्वा हस्तिहस्तिपकयो: संयोगसम्बन्धस्य स्मरणम्भवति तदनन्तरञ्च हस्तिस्मरणमिव संयोगस्य द्विष्ठतया हस्तिपकस्यापि स्मरणम् विनिगमनाविरहेण भवति । तथैव तादात्म्यस्यापि द्विष्ठतया तादात्म्यसम्बन्धज्ञानाधीनमपि युगपदेव शब्दार्थयो: स्मरणम्भविष्यतीति । अर्थस्येव शब्दस्यापि तत्पदनिष्ठशक्तिज्ञानाधीनोपस्थितिविषयत्वेन शाब्दबोधविषयत्वमुपपद्यते । आकृते: शाब्दबोधविषयत्वन्तु– "**पिष्टकमय्यो गाव:**" इत्यादिप्रतीत्यनुरोधेन कल्पनीयम् ।

(आक्षेपबाधकभाष्यम्)

नेत्याह । द्रव्यं नाम तत् ।।

(आक्षेपोपपादकभाष्यम्)

यत्तर्हि — तदिङ्गितं चेष्टितं निमिषितमिति[१], स शब्दः ?

(निराकरणभाष्यम्)

नेत्याह । क्रिया नाम सा ।।

(आक्षेपोपपादकभाष्यम्)

यत्तर्हि [२]तच्छुक्लो नीलः कपिलः कपोत इति, स शब्दः ?

विमला – कपोत इति चित्रेत्यर्थ: ।

---

१. 'इति' क्वाचित्क: ।

२. तदिति क्वचिन्नास्ति ।

(निराकरणभाष्यम्)

नेत्याह । गुणो नाम सः ।।

(आक्षेपोपपादकभाष्यम्)

यत्तर्हि [१]तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं, स शब्दः ?

(निराकरणभाष्यम्)

नेत्याह । आकृतिर्नाम सा ।।

विमला – द्रव्यगुणक्रियाजातीनां श्रोत्रेन्द्रियाग्राह्यत्वेन नैतेषु शब्दपदाभिधेयत्वमिति समाधातुराशयः ।

(आक्षेपोपसंहारभाष्यम्)

कस्तर्हि शब्दः ?

(समाधानभाष्यम्)

येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः ।।

विमला – येनोच्चारितेन, इति प्रकाशितेनेत्यर्थः । सम्प्रत्ययोज्ञानम् ।

(समाधानान्तरभाष्यम्)

अथवा-प्रतीतपदार्थको लोके ध्वनिः 'शब्द' इत्युच्यते । तद्यथा-शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः, इति ध्वनिं कुर्वन्नेवमुच्यते । तस्माद् ध्वनिः शब्दः ।

---

१. तदिति क्वचिन्नास्ति ।

विमला – ननु वर्णानाम्प्रत्येकव्वाँचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यम् । वर्णानामाशुतरविनाशित्वेन द्वितीयादिवर्णोच्चारणसमये पूर्ववर्णस्य नाशेन तिरोभावेन वा वर्णसमुदायरूपस्य पदस्य वाक्यस्य वोपलम्भाभावेन वाचकत्वासम्भवः पूर्वपूर्व वर्णानुभवजनित - संस्कारसहकृत - चरमवर्णस्य वाचकत्वस्वीकारे च **"ट"** शब्दो घटवाचक इत्यापद्येत । पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृत – चरमवर्णानुभवजनित स्मृतिविषयस्य पदस्य वाक्यस्य वा प्रत्यायकत्व स्वीकारे अनुभवक्रमानुसरणस्य स्मृतावभावात् लतातालनदीदीनजराराजपदानां समानार्थकत्वप्रसङ्ग इति स्फोटस्यैवार्थप्रत्यायकत्वम् अनिच्छतापि स्वीकार्यम् । तथा च तस्य लौकिकबहिर्भूतत्वेन तदनुशासने लौकिकशब्दानुशासनमितिप्रतिज्ञाविरोधापत्तिः । वर्णे च शब्दत्वव्यवहारो विश्वजनीनो विरुद्ध्येत । अत आह–"**अथवेति, प्रतीतपदार्थक इति** । पदार्थ एव पदार्थकः प्रतीतश्चासौ पदार्थकः प्रतीतपदार्थकः पदार्थकशब्दस्य पदार्थबोधके लक्षणा प्रतीत इत्यस्य प्रत्ययविषयीभूत इत्यर्थः । पदार्थबोधकत्वेव लोके प्रसिद्धः वैखरीनादः शब्दपदव्यवहारविषय इति समुदितार्थः ।

(इत्यनुशासनीयशब्दनिरूपणाधिकरणम्)

(शब्दानुशासनशास्त्रप्रयोजनाधिकरणे जिज्ञासाभाष्यम्)

कानि पुनः शब्दानुशासनस्य[१] प्रयोजनानि ? ।।

विमला – व्याकरणाध्ययनस्य शब्दज्ञानम्प्रयोजनमिति तु अथशब्दानु-शासनमितिप्रतिज्ञावाक्येनैव कथितप्रायम् । इदानीं शब्दज्ञानस्यैव किम्प्रयोजनमिति जिज्ञासते – **कानिपुनरिति** । शब्दानुशासनस्य शब्दानुशासनाध्ययनप्रयोज्य शब्दज्ञानस्येत्यर्थः ।

(समाधानभाष्यम्)

रक्षोहागमलघ्वसन्देहाः प्रयोजनम्[२] ।।

(रक्षापदार्थनिरूपणभाष्यम्)

रक्षार्थं वेदानामध्येयं व्याकरणम् ।

---

१. पाणिनीयव्याकरणस्येत्यर्थः ।

२. वार्तिकमिदमेवेति परे, भाष्यमिदमिति कैयटादयः ।

लोपागमवर्णविकारज्ञो हि सम्यग्वे-
दान्परिपालयिष्यतीति ।। (-रक्षा)

विमला – रक्षोहागमेति प्रयोजनमिति व्याकरणाध्ययनप्रयोज्यशब्दज्ञानस्येत्यादि: रक्षोहागमलघ्वसन्देहा: व्याकरणाध्ययनप्रयोज्यशब्दज्ञानस्य प्रयोजनमिति समुदितं समाधानवाक्यम् । **रक्षार्थमिति,** वेदस्य रक्षा नाम पाठान्तराकल्पनम् । अवैयाकरण: अचार्योपदिष्टे "**देवाअहुह्ले**"ति वाक्ये भ्रमशङ्कया आचार्यवचनेष्वविश्वासात् तकारमदृष्ट्वा रेफञ्च दृष्ट्वा भ्राम्यन् 'अहुर्हदिति पाठान्तरं कल्पयेत् । एवम् "**उद्ग्राभञ्च निग्राभञ्चे**" त्यत्र "**उद्ग्राहञ्च निग्राहञ्चे**" ति पाठान्तरं कल्पयेत् । वैयाकरणस्तु "**लोपस्त आत्मनेपदेष्वि**"ति तलोपे "**बहुलं छन्दसी**"ति रुटि च सति "**अदुह्ले**"ति रूपम् एवं ग्रहधातो: "**हृग्रहोर्भश्छन्दसी**"ति हस्य भादेशे "**उद्ग्राभं निग्राभमि**"तिनिश्चिन्वान: पाठान्तरं न कल्पयिष्यतीति भाव: ।।

(ऊहपदार्थनिरूपणभाष्यम्)

ऊहः खल्वपि–न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः । ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः । तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् ।। (-ऊहः)

(आगमपदार्थनिरूपणभाष्यम्)

आगमः खल्वपि – "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति ।। प्रधानं च षट्स्वङ्गेषु[1] व्याकरणम् । प्रधाने च कृतो यत्नः फलवान्भवति ।। (- आगमः[2])

विमला – आगम: खल्वपीति — प्रयोजनमिति शेष: । खल्वपीति समुदायो निश्चयार्थक: प्रयोजनशब्दश्च करणव्युत्पत्या प्रयोजकपर: । रक्षोहेति वार्तिके प्रयोजक परको फलपरकश्च प्रयोजनशब्दस्तन्त्रेण निर्दिष्ट:, एवञ्च रक्षोहादयो व्याकरणाध्ययनस्य

---

१. 'षडङ्गेषु' इति पाठान्तरम् ।

२. लुप्तप्रायोऽयं पाठ: सम्प्रति ।

फलम्, आगमः व्याकरणाध्ययनप्रयोजक इति फलति । **ब्राह्मणेनेति, निष्कारण इति** कार्यते अनुष्ठाप्यते अनेनेति व्युत्पत्या फलबोधकः कारणशब्दोऽत्र लक्षणया फलापेक्षाबोधकः, ततो निर्गत इति निष्कारणः, फलापेक्षाशून्य इत्यर्थः, अस्य च वेदविशेषणीभूतेऽध्ययने ज्ञाने चान्वयः, तथा च ब्राह्मण-कर्तृक-फलापेक्षाशून्याध्ययन-ज्ञानविषयीभूतो वेद इति समुदितार्थः । रक्षादिफलसत्त्वेऽपि प्रवृत्तौ न तदपेक्षा किन्तु नित्यत्वादेव वेदाध्ययनादौ प्रवृत्तिरितिभावः । एतेन रक्षादिफलकथनम् निष्कारणेत्यादिसन्दर्भविरुद्धमिति वदन्तः प्रत्युक्ताः । ननु नित्यत्वकाम्यत्व-योरविरोधात्कथमेकस्य कर्मणो नित्यत्वं काम्यत्वञ्चेति, अविरोधे च नित्यत्वादिना कर्मणो विभाग एव न सम्भवतीति चेन्न । नित्यत्वकाम्यत्वयोरविरोधेऽपि नित्यत्वत्वकाम्यत्वत्वयोर्विरोधेन विभागसम्भवात्, तदुक्तं हेत्वाभासगादाधर्यामपि **"उपधेयसङ्करेपि उपाधेरसाङ्कर्य्यादि"**त्यादिना ग्रन्थेन । अतएव —

"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षण" –

मिति सूत्र-विभागसत्त्वेऽपि स्वादिसूत्राणां विधिसूत्रत्वं संज्ञासूत्रत्वञ्चेति भगवता **नागेशेन** वर्णितम् । **प्रधानेचेति** व्याकरणस्य प्राधान्यञ्च मुखस्थानीयत्वेन । मुखत्वञ्चास्य –

"मुखं व्याकरणन्तस्य ज्यौतिषं नेत्रमुच्यते ।
निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे ।
शिक्षा घ्राणन्तु वेदस्य हस्तौ कल्पान् प्रचक्षते ।।"

इति शिक्षावचनादेव । अस्मदादीनां मुखं यथा जीवनाधायकं तथा वेदस्यापि व्याकरणं जीवनाधायकम् । वाक्यार्थावगमस्य व्याकरणाधीनत्वात्, वाक्यकदम्बरूपत्वाद्वेदस्येति भावः ।

(लघुपदार्थनिरूपणभाष्यम्)

लघ्वर्थं चाध्येयं व्याकरणम् । "ब्राह्मणेनावश्यं शब्दा ज्ञेयाः" इति । नचान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम् ।। (-लघु)

(असंदेहपदार्थनिरूपणभाष्यम्)

असंदेहार्थं चाध्येयं व्याकरणम् । याज्ञिकाः पठन्ति – स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति । तस्यां संदेहः – स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि वा पृषन्ति यस्याः[१] सेयं स्थूलपृषतीति ? । तां नावैयाकरणः स्वरतोऽध्यवस्यति – यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति ।।

विमला – स्थूलपृषतीति = अत्र कर्म्मधारये पृषती शब्दस्य पृषत्वत्यां लक्षणा तत्रैव च स्थौल्यान्वयः, बहुव्रीहौ तु पृषत्स्वेव स्थौल्यान्वय इति वैलक्षण्यम् ।

(व्याकरणाध्ययनसाधकागमप्रतीकभाष्यम्)

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि–तेऽसुराः । दुष्टः शब्दः । यदधीतम् । यस्तु प्रयुङ्क्ते । अविद्वांसः । विभक्तिं कुर्वन्ति । यो वा इमाम् । चत्वारि । उत त्वः । सक्तुमिव । सारस्वतीम् । दशम्यां पुत्रस्य । सुदेवो असि वरुण इति ।।

(व्याख्याभाष्यम्)

तेऽसुराः —

"तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः । तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः" ।

म्लेच्छा मा भूमेत्यध्येयं व्याकरणम् । तेऽसुराः ।

विमला – हे अरयो हे अरय इति प्रयोक्तव्ये इत्यादिः । **न म्लेच्छितवै इति**–अत्र तव्य प्रत्ययार्थे तवै प्रत्ययः नम्लेच्छितव्यमित्यर्थः, एतस्यैव विवरणम्

---

१. 'स्थूलानि पृषन्त्यस्याः' इति पाठान्तरम् ।

नापभाषितवै इति नापभाषितव्यमित्यर्थः, ब्राह्मणेन न म्लेच्छितवै इति समुदितस्यार्थस्तु ब्राह्मणकर्तृकापशब्दभाषणम् इष्टसाधनत्वाभाववत् । म्लेच्छपदार्थं निर्वक्ति – म्लेच्छो हवा इति । हवा इति निपात समुदायः प्रसिद्धौ, एषोऽपशब्दः म्लेच्छ इति प्रसिद्ध इत्यर्थः ।

(व्याख्यानभाष्यम्)

दुष्टः शब्दः —

"दुष्टः शब्दः स्वरतो वर्णतो वा
मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोपराधात् ।।"

इति दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम् ।।
(-दुष्टः शब्दः) ।

(व्याख्यानभाष्यम्)

यदधीतम् —

"यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ।।"
तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम् ।।
– यदधीतम् ।।

विमला – न तज्ज्वलतीति —

"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूत पाप्मा" ।।

इत्यादि श्रुतिभ्योऽर्थज्ञानपूर्वकशब्दप्रयोग एव धर्मप्रतिपादनेनार्थज्ञानस्य व्याकरणाधीनतया व्याकरणाध्ययनमावश्यकमिति भावः ।

(व्याख्यानभाष्यम्)

यस्तु प्रयुङ्क्ते —

"यस्तु प्रयुङ्क्ते कुशलो विशेषे
शब्दान्यथावद् व्यवहारकाले ।
सोऽनन्तमाप्नोति जयं परत्र
वाग्योगविद् दुष्यति चापशब्दैः ।।"

कः ?

वाग्योगविदेव ।

कुत एतत् ?

यो हि शब्दान् जानात्यपशब्दानप्यसौ जानाति । यथैव हि शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः । अथवा भूयानधर्मः प्राप्नोति । भूयांसोऽपशब्दाः, अल्पीयांसः शब्दा इति । एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः । तद्यथा गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्यादयो बहवोऽपभ्रंशाः । अथ योऽवाग्योगविद्, अज्ञानं तस्य शरणम् ।।

विमला – यः कुशलः शब्दव्यवहारनिपुणः व्यवहारकाले विशेषे अर्थविशेषे यथावत् योग्यतार्थकयथाशब्दात् मतुप् योग्यतावत् अर्थात् योग्यम् । क्रियाविशेषणमेतत् शब्दान् प्रयुङ्क्ते साधुत्वस्यार्थविशेषघटितत्वादितिभावः । सकुशलः अनन्तम् अविनाशि जयम् उत्कर्षम् परत्र परलोके आप्नोति वाचोयोगः प्रकृतिप्रत्ययादिसम्बन्धं वेत्तीति वाग्योगवित्, अपशब्दैः काकवाशितादिभिः दुष्यति अपकर्षं प्राप्नोति । **अपशब्दानप्यसौ जानातीति**–योहि शब्दान् जानाति, अपशब्दानप्यसौ जानात्येवेति न नियमः, किन्तु सम्भवप्रदर्शनमात्रम् ।

(बाधकभाष्यम्)

विषम उपन्यासः । नात्यन्तायाऽज्ञानं शरणं भवितुमर्हति । योह्यजानन् वै ब्राह्मणं हन्यात्सुरां वा पिबेत्सोऽपि मन्ये पतितः स्यात् ।।

(सिद्धान्तव्याख्याभाष्यम्)

एवं तर्हि —

सोऽनन्तमाप्नोति जयं परत्र
वाग्योगविद् दुष्यति चापशब्दैः ।।

कः ?

अवाग्योगविदेव । अथ यो वाग्योगविद्, विज्ञानं तस्य शरणम् ।।

(आक्षेपभाष्यम्)

क्व पुनरिदं पठितम् ?

(समाधानभाष्यम्)

भ्राजा नाम श्लोकाः ।

(आक्षेपभाष्यम्)

किंच भोः श्लोका अपि प्रमाणम् ?

किं चातः ?

यदि श्लोका अपि प्रमाणम्, अयमपि श्लोकः प्रमाणं भवितुमर्हति —

"यदुदुम्बरवर्णानां घटीनां मण्डलं महत् ।
पीतं न गमयेत्स्वर्गं किं तत् क्रतुगतं नयेत् ।।" इति ।

विमला – यदुदुम्बरवर्णानामिति उदुम्बरं (ताम्रं) वर्णो यस्याः सा उदुम्बरवर्णा तासाम् उदुम्बरवर्णानाम् रक्तवर्णानामित्यर्थः, घटीनाम् कलशीनाम् महत् विशालम् मण्डलम् लक्षणया तत्स्थं सुराद्रव्यम् पीतम् पानकर्मीभूतम् सत् यदि स्वर्गं न गमयेत् तर्हि क्रतुगतम् सौत्रामणीग्रहपात्रस्थम् स्वल्पं सुराद्रव्यं पीतं सत् किं स्वर्गं नयेत् ? ।

(समाधानभाष्यम्)

प्रमत्तगीत एष तत्रभवतः ।
यस्त्वप्रमत्तगीतस्तत्प्रमाणम् ।
– यस्तु प्रयुङ्क्ते ।।

(अविद्वांस इत्येतद्व्याख्यानभाष्यम्)

अविद्वांसः —

"अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ।।"
अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम् ।।

– अविद्वांसः ।।

विमला – प्रत्यभिवादे आशीर्वादवाक्ये नाम्नः **अभिवादकस्येत्यादि** टेरिति शेषः । ये प्लुतिंन विदुः न जानन्ति तेऽविद्वांसः विप्रोष्य कुतश्चिदागत्य स्त्रीष्विव तेषु अविद्वत्सु कामं निश्शङ्कम् नागमोत्रादिरहितम्, अयमहमभिवादये इति वदेत् उच्चारयेत् । अयम्भावः— नाम्नष्टेः प्लुतिज्ञानस्य व्याकरणाधीनतया अवैयाकरणान् अयमहमभिवादये इति वदन् प्रणामाभिनयेन प्रीणयेत्, नतु नामाद्युच्चारणपूर्वकम् तेषां पादौ गृह्णीयादिति ।

(व्याख्यानभाष्यम्)

विभक्तिं कुर्वन्ति —

याज्ञिकाः पठन्ति — "प्रयाजाः सविभक्तिकाः कार्याः" इति । न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम् । —विभक्तिं कुर्वन्ति ।।

विमला – **विभक्तिं कुर्वन्तीति** लिङर्थे लेट्, कुर्य्युरित्यर्थः ।

(व्याख्यानभाष्यम्)

यो वा इमाम् —

"यो वा इमां पदशः स्वरशोऽक्षरशश्च[1] वाचं विदधाति स आर्त्विजीनो भवति" । आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम् ।। — यो वा इमाम् ।।

विमला – योवा इमामिति । यः वै निश्चयेन इमाम् सन्निहिताम् अपरोक्षाम् वाचम् वेदरूपां वाणीम् । **पदशः** । पदम् पदम् । **स्वरशः** स्वरम् स्वरम् । **अक्षरशः** । अक्षरम् अक्षरम् । **विदधाति** । संस्करोति, स आर्त्विजीनो भवतीत्यर्थः । आर्त्विजीनो यजमानः याजकश्च । तत्र यजमानस्यादृष्टं स्वर्गादिकम् फलम्भवति, याजकस्य तु दृष्टमेव धनलाभादिकम्भवतीति । पदादिज्ञानस्य व्याकरणाधीनत्वेन दृष्टादृष्टफललाभायाध्येयव्यॉं करणमिति तात्पर्यम् ।।

(चत्वारीत्येतद्व्याख्यानभाष्यम्)

चत्वारि —

"चत्वारि शृङ्गास्त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यां आविवेश" ।। इति

चत्वारि शृङ्गाणि । चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादाः । त्रयः काला भूत-भविष्यद्वर्त्तमानाः । द्वे शीर्षे । द्वौ शब्दात्मानौ नित्यः कार्यश्च ।। सप्तहस्तासो अस्य । सप्त विभक्तयः । त्रिधा बद्धः । त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति । वृषभो वर्षणात् ।। रोरवीति शब्दं करोति ।। कुत एतत् ? ।

---

१. 'अक्षरशो वाचं' इत्यपि पाठः ।

रौतिः शब्दकर्मा ।। महोदेवो मर्त्यां आविवेशेति । महान्देवः शब्दः । मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश । महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम् ।।

विमला – चतुर्भिर्मन्त्रैर्मोक्षजनकत्वं – व्याकरणस्योपपादयति – **चत्वारीति** – ऋग्वेदे ब्रह्मणः स्वरूपं चत्वारीत्यादिना प्रतिपादितम् । एतच्च ब्रह्मणो लक्षणम् वेदान्तिनाम्मतेनेत्थं संघटते – अस्य वृषभस्य ब्रह्मणः चत्वारि शृङ्गा मनोबुद्धिरहङ्कारश्चित्तञ्चेति–त्रयः पादाः, ज्ञानम् कर्म्मोपासना चेति, द्वे शीर्षे त्रिपाद एकपादश्चेति, सान्तोऽनन्तश्चेति, सहस्रशीर्षापुरुषोऽपि मर्त्यसम्पर्कात् । द्वे शीर्षे यथा व्यापकस्य विष्णोश्शालग्रामसम्पर्कात् शालग्रामपरिमाणवत्त्वम् सप्त हस्तासः हस्ताः सप्त प्राणाः, त्रिधा त्रिप्रकारेण सत्त्वरजस्तमोभिर्बद्ध इति शब्दब्रह्मवादी भाष्यकारस्तु शब्दपरतया व्याचष्टे – **चत्वारि शृङ्गाः** नामाख्यातोपसर्गनिपाताश्चेत्यादि । रोरवीतीत्यस्य कर्ममहोदेवो मर्त्यान् आविवेशेति वाक्यम् ।।

साम्यम् । सायुज्यम् । ब्रह्मविद्ब्रह्मैव भवतीतिश्रुत्या शब्दविदो ब्रह्मत्वप्रतिपादनात् । शब्दज्ञानस्य व्याकरणाधीनतया भवतिव्याकरणाध्ययनस्य मोक्षजनकत्वमिति भावः ।

(भाष्यम्)

अपर आह —

"चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति ।।"

'चत्वारि वाक्परिमिता पदानि ।' चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च । 'तानि विदुर्ब्राह्मणा ये मनीषिणः ।' मनस ईषिणो मनीषिणः । 'गुहा त्रीणि निहिता नेङ्गयन्ति ।' गुहायां त्रीणि निहितानि

नेङ्गयन्ति, न चेष्टन्ते । न निमषन्तीत्यर्थः ।। 'तुरीयं वाचो मनुष्याः वदन्ति ।' तुरीयं वा[१] एतद्वाचो यन्मनुष्येषु वर्तते चतुर्थमित्यर्थः ।। — चत्वारि ।।

विमला – प्रतिपाद्यभेदात्प्रतिपादके भेदमारोप्य **अपर आह** – इत्युक्तम् । वाच: परिमितानि वाक्परिमितानि इति षष्ठीतत्पुरुषोत्तरम् छान्दसत्वात् शेर्लोप: । **पदजातानीत्यस्य** पदसमूहा इत्यर्थ: । पदशब्दोऽत्र द्योतकवाचकान्यतरपरम् । नतु सुबन्त तिङन्तपरम् । नामाख्यातोपसर्गनिपाताश्चेति प्रत्येकम् लक्षणया तत्समूहपरम्, तथा च वाच: शब्दस्य चत्वारि परिच्छिन्नानि पदसमूहा: ते च नामसमूहाख्यात-समूहोपसर्गसमूह–निपातसमूहाश्चेति चत्वारि इत्यर्थ: फलति । एतेन शब्दस्य चत्वारो भेदा:, नामाख्यातोपसर्गनिपाताश्चेति विभाग: प्रदर्शित: । ते पदसमूहा ये ब्राह्मणा: ब्रह्मशब्दरूपं जानन्तीति ब्राह्मणा:, मनीषिण: चित्तस्य वशीकर्त्तार:, ते विदु: जानन्ति नाम समूहादीनां चतुर्णां प्रत्येकमपि परा पश्यन्ती मध्यमा वैखर्य्यादिभेदेन चातुर्विद्ध्यम् । —

"परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया, वैखरी कण्ठ - देशगा" ।।

इति श्रवणात् । परादीनि त्रीणि कण्ठादधोदेशस्थितानीति तानि अज्ञानलक्षणायां गुहायां निहितानि अतो नेङ्गयन्ति न चेष्टन्ते । न बुद्धिविषयीभवन्तीत्यर्थ: । वाच: शब्दस्य नामादि लक्षणस्य प्रत्येकम् एतत्तुरीयम् चतुर्थं भागम् वैखरीरूपम् मनुष्येषु साधारणेषु अवैयाकरणेष्वित्यर्थ: वर्त्तते । बुद्धिविषयो भवतीत्यर्थ: । वैयाकरणास्तु अज्ञानं शास्त्रबलेन विनाश्य साकल्येन जानन्तीति, शब्दज्ञस्य ब्रह्मत्वप्रतिपादनात् भवति मोक्षजनकत्वम् व्याकरणाध्ययनस्येति ।

(उतत्व इत्येतद्व्याख्यानभाष्यम्)

उतत्वः —

"उत त्वः पश्यन्न ददर्श वाच-
मुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे
जायेव पत्य उशती सुवासाः ।।"

---

१. 'तुरीयं ह वै' इति पाठान्तरम् । ह वै – प्रसिद्धौ ।

'उत त्वः' अपि खल्वेकः पश्यन्नपि न पश्यति वाचम्[1] । अपि खल्वेकः शृण्वन्नपि न शृणोत्येनामिति । अविद्वांसमाहार्द्धम् । उतो त्वस्मै तन्वं विसस्त्रे । तनुं विवृणुते ।। जायेव पत्य उशती सुवासाः । तद्यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते, एवं वाग् वाग्विदे स्वात्मानं[2] विवृणुते । वाङ् नो विवृणुयादात्मानमित्यध्येयं व्याकरणम् ।। उत त्वः ।।

विमला – अर्धम् श्लोकार्धम्, अविद्वांसमिति, उद्दिश्येति शेषः, आहेति निन्दामित्यादिः । श्लोकार्धेन अविदुषो निन्दामाहेत्यर्थः । एतेन अविशिष्टेन श्लोकार्धेन विद्वांसं स्तौतीति ध्वनयति ।

(व्याख्याभाष्यम्)

सक्तुमिव —

"सक्तुमिव तितउना पुनन्तो
यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते
भद्रैषां लक्ष्मीर्निहिताधिवाचि ।।"

सक्तुः – सचतेर्दुर्धावो भवति, कसतेर्वा विपरीताद्विकसितो भवति । तितउ परिपवनं भवति – ततवद्वा तुन्नवद्वा । धीरा ध्यानवन्तः । मनसा प्रज्ञानेन । वाचमक्रत वाचमकृषत ।

'अत्रा सखायः सख्यानि जानते' । अत्रा सखायः सन्तः सख्यानि जानते ।

क्व ?
य एष दुर्गो मार्गः, एकगम्यो वाग्विषयः ।
के पुनस्ते ? वैयाकरणाः ।
कुत एतत् ?

---

१. इदं क्वचिन्नास्ति । २. 'स्वमात्मानं' इत्यपि पाठः ।

'भद्रैषां लक्ष्मीर्निहिताऽधिवाचि ।' एषां वाचि भद्रा लक्ष्मीर्निहिता भवति । लक्ष्मीर्लक्षणाद्भासनात्परिवृढा भवति । — सक्तुमिव ।।

(व्याख्यानभाष्यम्)

सारस्वतीम् —

याज्ञिकाः पठन्ति– "आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेद्" इति ।।

प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम् ।।

– सारस्वतीम् ।

(व्याख्यानभाष्यम्)

दशम्यां पुत्रस्य —

याज्ञिकाः पठन्ति — "दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम् । तद्धि प्रतिष्ठिततमं भवति । द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्" इति ।।

न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम् । — दशम्यां पुत्रस्य ।।

(व्याख्यानभाष्यम्)

'सुदेवो असि —

"सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ।।"

सुदेवो असि वरुण सत्यदेवोऽसि । यस्य ते सप्त सिन्धवः । सप्त विभक्तयः । अनुक्षरन्ति काकुदम् । काकुदं तालु । काकुर्जिह्वा, साऽस्मिन्नुद्यत इति काकुदम् । सूर्म्यं सुषिरामिव । तद्यथा — शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति, एवं ते सप्त सिन्धवः सप्त विभक्तयस्ताल्वनुक्षरन्ति । तेनाऽसि सत्यदेवः । सत्यदेवाः स्यामेत्यध्येयं व्याकरणम् । – सुदेवो असि ।।

विमला – सुदेवोऽअसीति । हे वरुण त्वं सुदेवः, एतस्य व्याख्या सत्यदेवोऽसीति । यतः सुषिरां सच्छिद्राम्-सूर्म्यम्-शोभनाम्-उर्म्मीम्-लौहप्रतिमाम्-अन्तः प्रविश्य अग्निर्यथा तत्रत्यं मलं दूरीकरोति तथा यस्य तव सप्तसिन्धवः सप्तसमुद्रा इव सप्तविभक्तयस्ताल्वनुप्राप्य शारीरं मलं दूरीकृत्य अनुक्षरन्ति-प्रकाशन्ते । दीव्यते द्योतते-इति देवः, विनष्टमलस्य द्योतनम्भवतीति वरुणे देवपदं सत्यमिति भवति सत्यदेवत्वं वरुणस्य तथाऽन्यस्यापि व्याकरणाध्येतुः सत्यदेवत्वेन वरुणतुल्यतया वरुणवत्स्वर्गवासित्वम्भविष्यतीति स्वर्गःफलं व्याकरणाध्ययनस्येति भावः ।

(उक्तप्रयोजनग्रन्थोपपत्तिप्रकरणम्)

(आक्षेपभाष्यम्)

किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते, न पुनरन्यदपि[१] किंचित् । ॐ इत्युक्त्वा वृत्तान्तशः शमित्येवमादीन् शब्दान्पठन्ति? ।।

विमला – न पुनरन्यदपीति । वेदमप्यधिजिगांसमानेभ्योऽपीत्यर्थः । आचार्येण – अधीष्व, इत्युक्ते **ओमित्युक्त्वेति** स्वीकृत्य । **वृत्तान्तश इति** । वीप्सायां शस् वृत्तान्तं वृत्तान्तमित्यर्थः । **शमित्येवमादीन्-शब्दान्-पठन्तीति** । एतेभ्योऽपीतिशेषः । प्रयोजनमन्वाख्यायत इत्यनुषङ्गः न पुनरेतेभ्योऽपि प्रयोजनमन्वाख्यायत इति योजना ।

---

१. केचित्तु 'किञ्चि' दित्यन्तं शङ्का, ॐ इत्युक्त्वेत्यादिना समाधानमित्याहुः ।

(समाधानभाष्यम्)

पुराकल्प एतदासीत्-संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माऽधीयते । तेभ्य[1]स्तत्तत्स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते । तदद्यत्वे न तथा । वेदमधीत्य त्वरिता वक्तारो भवन्ति—

"वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः, अनर्थकं व्याकरणम्" इति । तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद् भूत्वा आचार्य[2] इदं शास्त्रमन्वाचष्टे—इमानि प्रयोजनान्यध्येयं व्याकरणम् इति ।।

(विषयप्रयोजननिरूपणोपसंहारभाष्यम्)

उक्तः शब्दः । स्वरूपमप्युक्तम् । प्रयोजनान्यप्युक्तानि ।।

(इत्यनुबन्धचतुष्टयनिरूपणम्)

(अथ शास्त्रनिर्माणरीतिनिरूपणाधिकरणन्नाम शब्दानुशासनम्)

(शब्दानुशासनप्रकारजिज्ञासाभाष्यम्)

शब्दानुशासनमिदानीं कर्तव्यम् । तत्कथं कर्तव्यम् ? । किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशब्दोपदेशः, आहोस्विदुभयोपदेश इति ?

---

१. 'एतेभ्यः' इत्यपि पाठः ।

२. 'आचार्यः सुहृद्भूत्वा' इत्यपि पाठः ।

(समाधानभाष्यम्)

अन्यतरोपदेशेन कृतं स्यात् । तद्यथा, भक्ष्यनियमेनाऽभक्ष्यप्रतिषेधो गम्यते । 'पञ्च पञ्चनखा भक्ष्याः' इत्युक्ते गम्यत एतद्-अतोऽन्येऽभक्ष्या इति । अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः । तद्यथा, अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकरः' इत्युक्ते गम्यत एतद्-आरण्यो भक्ष्य इति ।। एवमिहापि । यदि तावच्छब्दोपदेशः क्रियते, गौरित्येतस्मिन्नुपदिष्टे गम्यत एतद्-गाव्यादयोऽपशब्दा इति । अथाप्यपशब्दोपदेशः क्रियते, गाव्यादिषूपदिष्टेषु गम्यत एतद्-गौरित्येष शब्द-इति ।।

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः ?

(समाधानभाष्यम्)

लघुत्वाच्छब्दोपदेशः[1] ।

लघीयाञ्छब्दोपदेशः । गरीयानपशब्दोपदेशः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा गौरित्यस्य शब्दस्य गावीगोणीगोतागोपोतलिकेत्ये[2] - वमाद - योऽपभ्रंशाः । इष्टान्वाख्यानं खल्वपि भवति ।।

(आक्षेपभाष्यम्)

अथैतस्मिञ्शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्त्तव्यः ? गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः ?

---

१. भाष्यवार्तिकमेतत् इति गौडाः । 'च्छब्दोपदेश एव ज्यायान्' इति पाठान्तरम् ।

२. 'गाव्यादयोऽपभ्रंशाः' इत्यपि पाठः ।

(समाधानभाष्यम्)

नेत्याह । अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते — "बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम" । बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो, न चान्तं जगाम, किं पुनरद्यत्वे[1] । यः सर्वथा[2] चिरं जीवति स वर्षशतं जीवति । चतुर्भिश्च प्रकारैर्विद्योपयुक्ता[3] भवति — आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन व्यवहारकालेनेति । तत्र चास्यागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात् । तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः ।

(आक्षेपभाष्यम्)

कथं तर्हीमे शब्दाः प्रतिपत्तव्याः ? ।।

(समाधानभाष्यम्)

किंचित्सामान्यविशेषवल्लक्षणं[4] प्रवर्त्यम् । येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् ।

किं पुनस्तत् ? । उत्सर्गापवादौ ।

कश्चिदुत्सर्गः कर्तव्यः, कश्चिदपवादः ।

विमला – महतो महत इति । आद्यः पञ्चम्यन्तो द्वितीयो द्विवचनान्तः, विशालादपि विशालानित्यर्थः ।

---

१. इदं मध्यमणिन्यायेनोभयत्रान्वेति ।

२. 'सर्वचिरं' इति पाठभेदः । सर्वेभ्यश्चिरमिति तदर्थः ।

३. 'उपयुज्यते' इति पाठान्तरम् ।

४. मतुप्प्रत्ययान्तं क्लीबलिङ्गं लक्षणविशेषणम् ।

(आक्षेपभाष्यम्)

कथंजातीयकः पुनरुत्सर्गः कर्तव्यः, कथंजातीयकोऽपवादः ? ।।

(समाधानभाष्यम्)

सामान्येनोत्सर्गः[१] कर्तव्यः । तद्यथा– "कर्मण्यण्" । तस्य विशेषेणाऽपवादः । तद्यथा – "आतोऽनुपसर्गे कः" ।।

(जातिव्यक्तिपदार्थनिर्णयाधिकरणे आक्षेपभाष्यम्)

किं पुनराकृतिः पदार्थः, आहोस्विद् द्रव्यम् ?

(समाधानभाष्यम्)

उभयमित्याह ।

(आक्षेपभाष्यम्)

कथं ज्ञायते ?

(समाधानभाष्यम्)

उभयथा ह्याचार्येण सूत्राणि पठितानि । आकृतिं पदार्थं मत्वा – "जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्" इत्युच्यते । द्रव्यं पदार्थं मत्वा "सरूपाणाम्" – इत्येकशेष आरभ्यते ।।

विमला – आक्रियते, व्यवच्छिद्यते स्वाश्रयोऽनयेत्याकृतिर्जातिः । उत्सर्गापवादयोर्लक्षणयोः प्रणयनं किं जातिपक्षमाश्रित्य उत व्यक्तिपक्षमित्याशयेन पृच्छति "**किं पुनराकृतिः पदार्थ आहोस्वित् द्रव्य**" मिति ।

---

१. 'सामान्ये उत्सर्गः' इत्यपि पाठः ।

उभयमिति । उत्सर्गापवादलक्षणघटकपदानां लक्ष्यानुरोधेन क्वच्चिज्जातिवाचकत्वाभिप्रायकत्वं क्वच्चित्तदनुरोधादेव व्यक्तिवाचकत्वमिति भाव: ।

(शब्दनित्यत्वानित्यत्वविचारे आक्षेपभाष्यम्)

किं पुनर्नित्यः शब्दः, आहोस्वित्कार्यः ? ।

(समाधानभाष्यम्)

संग्रह एतत्प्राधान्येन परीक्षितम् – नित्यो वा स्यात्कार्यो वेति । तत्रोक्ता दोषाः, प्रयोजनान्यप्युक्तानि । तत्र त्वेष[१] निर्णयः-यद्येव नित्यः, अथापि कार्यः, उभयथापि लक्षणं प्रवर्त्यमिति ।

विमला – तत्रेति । उभयत्रेत्यर्थ: । **दोषा इति** । नित्यत्वेऽविकारितयाऽऽदेशाद्यनापत्तिः, अनित्यत्वे च पूर्वशब्दस्य नाशेन आनन्तर्यस्य वक्तुमशक्यतया संहिताया अभावात्सन्ध्यनापत्तिरित्याशय इत्यर्थ: । **उभयथेति** । नित्यत्वपक्षे कार्यत्वपक्षेऽपीत्यर्थ: ।

(नित्यशब्दवादेपि शास्त्रस्य धर्मजनकताधिकरणम्)

(आक्षेपभाष्यम्)

कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम् –

विमला – कथं पुनरिदमिति । किं नित्यं शब्दार्थसम्बन्धं मत्वा पाणिनि र्लक्षणं प्रणीतवान् उत कार्यमिति प्रश्नाशय: ।

(१- आक्षेपसाधकवार्तिकप्रथमखण्डम् ।।१।।)

।।*।। ***सिद्धे शब्दार्थसम्बन्धे*** ।।*।।

(व्याख्याभाष्यम्)

सिद्धे शब्देऽर्थे संबन्धे चेति ।।

---

१. एषेति क्वचिन्न ।

विमला – सिद्धे शब्दार्थसम्बन्धे - इति । लक्षणम्प्रवृत्तमित्यध्याहारः । शब्दार्थसम्बन्धं नित्यं मत्वा लक्षणम्प्रारब्धवान् पाणिनिरिति समाधानतात्पर्यम् ।

(वार्तिकघटकसिद्धशब्दार्थनिरूपणे आक्षेपभाष्यम्)

अथ सिद्धशब्दस्य कः पदार्थः ?

(समाधानभाष्यम्)

नित्यपर्यायवाची सिद्धशब्दः ।।

(प्रश्नभाष्यम्)

कथं ज्ञायते ?

(उत्तरभाष्यम्)

यत्कूटस्थेष्वविचालिषु भावेषु वर्तते । तद्यथा – सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति ।।

(आक्षेपभाष्यम्)

ननु च भोः कार्येष्वपि वर्तते । तद्यथा – सिद्ध ओदनः, सिद्धः सूपः, सिद्धा यवागूरिति । यावता कार्येष्वपि वर्तते, तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणम्, न पुनः कार्ये यः सिद्धशब्दस्तस्य[१] इति ?

(समाधानभाष्यम्)

संग्रहे तावत्कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति । इहापि तदेव ।।

(समाधानान्तरभाष्यम्)

अथवा सन्त्येकपदान्यप्यवधारणानि । तद्यथा – 'अब्भक्षो' 'वायुभक्ष' इति – अप एव भक्षयति, वायुमेव भक्षयतीति गम्यते । एवमिहापि सिद्ध एव, न साध्य इति ।।

---

१ 'सिद्धशब्द इति' इत्यपि पाठः ।

(समाधानान्तरभाष्यम्)

अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः – अत्यन्तसिद्धः सिद्ध इति । तद्यथा – देवदत्तो दत्तः, सत्यभामा भामेति ।।

(समाधानान्तरभाष्यम्)

अथवा "व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्" इति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः ।।

(आक्षेपभाष्यम्)

किं पुनरनेन वर्ण्येन ? किं न महता कण्ठेन नित्यशब्द एवोपात्तो यस्मिन्नुपादीयमानेऽसंदेहः स्यात् ?

(समाधानभाष्यवार्त्तिकम्)

मङ्गलार्थम्[1] ।।

माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति ।।

(समाधानभाष्यशेषभाष्यम्)

अयं खलु[2] नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते ।।

किं तर्हि ? ।।

आभीक्ष्ण्येऽपि वर्तते । तद्यथा नित्यप्रहसितो नित्यप्रजल्पित इति । यावताऽऽभीक्ष्ण्येऽपि वर्तते

१. नेदं वार्तिकमित्यन्ये । २. 'खल्वपि' इत्यपि पाठः ।

तत्राप्यनेनैवार्थः स्यात् – "व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्" इति । पश्यति त्वाचार्यो मङ्गलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति, शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति । अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः ।।

(नित्यतासाधकपक्षनिर्णयाधिकरणे आक्षेपभाष्यम्)

अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते सिद्धे शब्देऽर्थे संबन्धे चेति ?

(समाधानभाष्यम्)

आकृतिमित्याह ।।

(आक्षेपभाष्यम्)

कुत एतत् ?

(समाधानभाष्यम्)

आकृतिर्हि नित्या, द्रव्यमनित्यम् ।।

(आक्षेपभाष्यम्)

अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः ?

(समाधानभाष्यम्)

सिद्धे शब्दे अर्थसंबन्धे चेति । नित्यो ह्यर्थवतामर्थैरभिसंबन्धः ।।

विमला – सिद्धे शब्देऽर्थसम्बन्धे चेतीति । नन्वर्थस्यानित्यत्वे कथं तन्निरूपितसम्बन्धस्य नित्यतेति चेन्न, सम्बन्धस्य बोधजनकतारूपस्य शब्दनिष्ठतयाऽर्थस्यानित्यत्वेऽपि सम्बन्धस्य नित्यत्वे बाधकाभावात् । तादात्म्यस्य संसर्गत्वे तस्योभयरूपत्वेऽपि बौद्धार्थेन शब्दस्य तादात्म्याभ्युपगमेन द्रव्यरूपार्थस्यानित्यत्वेऽपि बौद्धार्थस्य नित्यतया तादात्म्यस्य नित्यत्वे बाधकाभावः ।

(द्रव्यपदार्थाभ्युपगमभाष्यम्)

अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः – सिद्धे शब्दे अर्थे संबन्धे चेति । द्रव्यं हि नित्यमाकृतिरनित्या ।।

(आक्षेपभाष्यम्)

कथं ज्ञायते ?

(समाधानभाष्यम्)

एवं हि दृश्यते लोके मृत्कया चिदाकृत्या युक्ता पिण्डी भवति, पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते । तथा सुवर्ण कयाचिदाकृत्या युक्तं पिण्डी भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते । पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः । आकृतिरन्या चान्या च भवति, द्रव्यं पुनस्तदेव । आकृत्युपमर्देन द्रव्यमेवाऽवशिष्यते ।।

(आकृतिपदार्थाभ्युपगमभाष्यम्)

आकृतावपि पदार्थ एष विग्रहो न्याय्यः[१] – सिद्धे शब्दे अर्थे संबन्धे चेति ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-आकृतिरनित्या इति ?

(समाधानभाष्यम्)

नैतदस्ति । नित्याऽऽकृतिः ।।

१. न्याय्यः उचितः । समर्थयितुं शक्य इत्यर्थः ।

कथम् ? ।।

न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति । द्रव्यान्तरस्था तूपलभ्यते ।।

(समाधानसाधकनित्यलक्षणभाष्यम्)

अथवा नेदमेव नित्यलक्षणम् – ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृध्यव्यययोगि यत्तन्नित्यमिति । तदपि[1] नित्यं यस्मिंस्तत्त्वं न विहन्यते ।।

किं पुनस्तत्त्वम् ?

तद्भावस्तत्त्वम् ।। आकृतावपि तत्त्वं न विहन्यते ।।

विमला – "**मृत्कयाचिदाकृत्या युक्ता पिण्डो भवती**" त्यादिना ग्रन्थेन '**अवयव-संस्थानरूपायाः आकृते**' रनित्यत्वम् पूर्वपक्षिणा साधितम् '**नक्वचिदुपरतेति कृत्वे**' त्यादिना जातिरूपाया आकृते र्नित्यत्वम्प्रसाध्य '**अवयवसंस्थानरूपाया आकृते**' र्नित्यत्वं सिद्धान्ती समर्थयति –**अथवेति** ।

यस्मिंस्तत्वमिति । सप्तम्यर्थो वृत्तित्वम्, यद्वृत्तिधर्मस्य नाशो न भवति तदपि नित्यमित्यर्थः । अयम्भावः – जायते, अस्ति, वर्द्धते – विपरिणमते, अपक्षीयते, नश्यतीत्येवं-षड्भावविकारशून्यत्वम् । ध्वंसाप्रतियोगि सजातीयकत्वम्, इति द्विविधं नित्यलक्षणम् व्यवहारानुसारेण कल्प्यम् । अत्र प्रथम लक्षणे '**ध्रुवं कूटस्थमित्यादि**-ग्रन्थतात्पर्य्यम् । द्वितीये च '**यस्मिंस्तत्त्वमि**' त्यादेः । आद्यलक्षणं जातिरूपामाकृतिं व्याप्नोति, द्वितीयञ्च अवयवसंस्थारूपामाकृतिमिति ।

(नित्यत्वानित्यत्वविचारस्याप्रकृतत्वबोधकभाष्यम्)

अथवा[2] किं न एतेन-इदं नित्यमिदमनित्यमिति ? । यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते-सिद्धे शब्देऽर्थे संबन्धे चेति ।।

---

१. लक्षणान्तरं दर्शयति – तदपीति ।

२. 'नः' अस्माकम् 'एतेन' विचारेण किं – काक्वा न किमपि प्रयोजनमित्यर्थः ।

(प्रत्याक्षेपभाष्यम्)

कथं पुनर्ज्ञायते-सिद्धः शब्दोऽर्थः संबन्धश्चेति ? ।।

(१-प्रत्याक्षेपसमाधानवार्तिकद्वितीयखण्डम् - २)

।।*।। लोकतः ।।*।।

(वार्तिकव्याख्यानभाष्यम्)

यल्लोकेऽर्थमर्थमुपादाय शब्दान्प्रयुञ्जते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति । ये पुनः कार्या भावा निर्वृत्तौ तावत्तेषां यत्नः क्रियते । तद्यथा – घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह – कुरु घटं, कार्यमनेन करिष्यामीति । न तद्वच्छब्दान्प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह – कुरु शब्दान्प्रयोक्ष्य इति । तावत्येवार्थमुपादाय शब्दान्प्रयुञ्जते ।।

विमला – तावत्येवेति । तावति समये-एव वैयाकरणकुलगमनात्पूर्वसमय एवेति यावत् । **अर्थमुपादायेति** । अर्थम्बुद्धिविषयं कृत्वेत्यर्थः । **शब्दान् प्रयुञ्जते इति** । तथाच कार्यभावव्यवहार – विजातीयव्यवहारस्य शब्दे दर्शनेन कार्यभाव-वैजाप्यस्य नित्यत्वस्य शब्देऽनुमित्या निर्णय इति भावः ।

(आक्षेपोपसंहारभाष्यम्)

यदि तर्हि लोक एषु प्रमाणम्, किं शास्त्रेण क्रियते ?

(१-समाधानभूतं तृतीयखण्डम् - ३)

।।*।। लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः ।।*।।

(व्याख्यानभाष्यम्)

लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते ।।

(पदार्थजिज्ञासाभाष्यम्)

किमिदं धर्मनियम इति ?

(समाधानभाष्यम्)

धर्माय नियमो धर्मनियमः, धर्मार्थो वा नियमो धर्मनियमः, धर्मप्रयोजनो वा नियमो धर्मनियमः ।।

विमला – शास्त्रेण धर्म्मनियम इति । शब्दापशब्दयोरर्थप्रत्यायकत्वसाम्येऽपि शास्त्रज्ञानपूर्वकोच्चार्यमाणशब्दस्यैव धर्मजनकत्वं नापशब्दस्येति भावः ।

(१-दृष्टान्तपरं वार्तिकचतुर्थखण्डम्-४)

।।।। यथा लौकिकवैदिकेषु ।।*।।*

(वार्तिकव्याख्यानभाष्यम्)

प्रियतद्धिता दाक्षिणात्याः – 'यथा लोके वेदे चे'ति प्रयोक्तव्ये 'यथा लौकिकवैदिके'ष्विति प्रयुञ्जते[१] ।। अथवा युक्त एवात्र तद्धितार्थः । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु ।।

लोके तावद् 'अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकर' इत्युच्यते । भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते । शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम् । तत्र नियमः क्रियते-इदं भक्ष्यमिदमभक्ष्यमिति ।। तथा-खेदात्स्त्रीषु प्रवृत्तिर्भवति । समानश्च खेदविगमो गम्यायां चागम्यायां च । तत्र नियमः क्रियते-इयं गम्येयमगम्येति ।

(वैदिकदृष्टान्तप्रदर्शनभाष्यम्)

वेदे खल्वपि – "पयोव्रती ब्राह्मणो यवागूव्रती राजन्य आमिक्षाव्रतो वैश्यः" इत्युच्यते । व्रतं च

१. वार्तिककाराः ।

नामाभ्यवहारार्थमुपादीयते । शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम् । तत्र नियमः क्रियते ॥

तथा – "बैल्वः खादिरो वा यूपः स्याद्" इत्युच्यते । यूपश्च नाम पश्वनुबन्ध[1]नार्थमुपादीयते । शक्यं चानेन यत्किंचिदेव काष्ठमुच्छ्रित्याऽनुच्छ्रित्य वा पशुरनुबन्धुम् । तत्र नियमः क्रियते ॥

तथा "अग्नौ कपालान्यधिश्रित्याऽभिमन्त्रयते–भृगूणामङ्गिरसां धर्मस्य तपसा तप्यध्वम्" इति । अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि सन्तापयति । तत्र च नियमः क्रियते – एवं क्रियमाणमभ्युदयकारि भवतीति ॥

(दार्ष्टान्तिके उपसंहारभाष्यम्)

एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते – शब्देनैवार्थोऽभिधेयो नापशब्देनेति ॥ एवं क्रियमाणमभ्युदयकारि भवतीति ॥

(अनुपलब्धप्रयोगसाधुशब्दसाधकशास्त्रसार्थक्याधिकरणे आक्षेपवार्तिकम् - २ - १)

॥*॥ *अस्त्यप्रयुक्तः* ॥*॥

(व्याख्याभाष्यम्)

सन्ति वै शब्दा अप्रयुक्ताः । तद्यथा – ऊष, तेर, चक्र, पेचेति ॥

(प्रश्नाशयजिज्ञासाभाष्यम्)

किमतो यत्सन्त्यप्रयुक्ताः ?

---

१. 'बन्धार्थं' क्वचित् ।

(आशयाविष्कारभाष्यम्)

प्रयोगाद्धि भवाञ्छब्दानां साधुत्वमध्यवस्यति । य इदानीमप्रयुक्ता नाऽमी साधवः स्युः ।।

विमला – ननु प्रयुक्तानामिदमन्वाख्यानन्तर्हि किमर्थमप्रयुक्ता अपि ऊष तेर चक्र पेचेत्यादयो व्युत्पाद्यन्ते-इत्याक्षिपति "**अस्त्यप्रयुक्त**" **इति** ।

प्रश्नकर्त्तुराशयं तन्मुखादेवावगन्तुं तटस्थः शङ्कते "**किमत**" इति यदुक्तम्, "**अप्रयुक्ताः शब्दाः सन्ती**" ति । अतः अस्माद्धेतोः किम्-अर्थात् एतावता का हानिरिति प्रश्नः ।

नामीसाधवःस्युरिति तथा च धर्मजनकत्वरूपसाधुत्वस्य लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम इति वार्तिकेन प्रयुक्तशब्दे-एव बोधनेनाप्रयुक्तशब्दे धर्मजनकत्वाभावेन साधुत्वाभावात्तदनुशासने "**अथ शब्दानुशासनम्-केषां शब्दानां लौकिकानां वैदिकानाञ्चे**" ति प्रतिज्ञावाक्ये वैदिकशब्दसाहचर्येण लौकिकस्यापि साधोरेवानुशासनस्य प्रतिज्ञातत्वेन असाधूनामप्यनेनान्वाख्याने तद्विरोधापत्तिः शास्त्रस्याप्रामाण्यापत्तिश्चेति भावः ।

(आक्षेपासंगतिसूचकभाष्यम्)

इदं तावद्विप्रतिषिद्धम्-यदुच्यते-'सन्ति वै शब्दा अप्रयुक्ता इति । यदि सन्ति[१] नाऽप्रयुक्ताः, अथाऽप्रयुक्ता न सन्ति, सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम् । प्रयुञ्जान एव खलु भवानाह – सन्ति शब्दा अप्रयुक्ता इति । कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात् ?

विमला – **विप्रतिषिद्धमिति** । शब्दानां सत्त्वस्य प्रयोगैकनिबन्धनत्वात्प्रयोगाभावे शब्दस्य सत्ताङ्गीकरणं विरुद्धमिति भावः ।

---

१. यदि तावत्सन्तीति पाठान्तरम् ।

(आक्षेपासंगतिबाधकभाष्यम्)

नैतद्विप्रतिषिद्धम् । सन्तीति तावद्ब्रूमः । यदेताञ्शास्त्रविदः शास्त्रेणानुविदधते । अप्रयुक्ता इति ब्रूमः । यल्लोकेऽप्रयुक्ता इति ।। यदप्युच्यते-कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यादिति । न ब्रूमोऽस्माभिरप्रयुक्ता इति ।। किं तर्हि ? ।।

लोकेऽप्रयुक्ता इति ।।

विमला – अनुविदधत इति । संस्कुर्वन्ति, तेन च सत्त्वमेतेषामनुमीयत इति भावः । **"लोके" इति** । अर्थबोधनायेति शेषः ।

(आक्षेपभाष्यम्)

ननु च भवानप्यभ्यन्तरो लोके ? ।।

(समाधानभाष्यम्)

अभ्यन्तरोऽहं लोके, न त्वहं लोकः ।।

(३-आक्षेपबाधकवार्तिकम्-२)

।।*।। अस्त्यप्रयुक्त इति चेन्नाऽर्थे शब्दप्रयोगात् ।।*।।

(व्याख्याभाष्यम्)

अस्त्यप्रयुक्त इति चेत् । तन्न ।। किं कारणम् ? अर्थे शब्दप्रयोगात् । अर्थे शब्दाः प्रयुज्यन्ते । सन्ति चैषां शब्दानामर्था येष्वर्थेषु प्रयुज्यन्ते ।।

विमला – अर्थे शब्दप्रयोगादिति । ऊषेत्यादयः शब्दा उच्चारणकर्मतावन्तः, अर्थबोधजनकत्वात्, इत्यनुमानेन तत्र प्रयुक्तत्वं सिध्यतीति भावः ।

(४-आक्षेपसाधकवार्तिकम्-३)

।।*।। *अप्रयोगः प्रयोगान्यत्वात्* ।।*।।

(व्याख्याभाष्यम्)

अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः । कुतः ? प्रयोगान्यत्वात् । यदेषां शब्दानामर्थेऽन्याञ्छब्दान्प्रयुञ्जते । तद्यथा – ऊषेत्यस्य शब्दस्यार्थे-क्व यूयमुषिताः, तेरेत्यस्यार्थे - क्व यूयं तीर्णाः, चक्रेत्यस्यार्थे - क्व यूयं कृतवन्तः । पेचेत्यस्यार्थे - क्व यूयं पक्ववन्त इति ।।

विमला – अनुमितौ सत्प्रतिपक्षमुद्भावयति अप्रयोगः प्रयोगान्यत्वादिति । ऊषेत्यादयः शब्दा उच्चारणकर्मत्वाभाववन्तः, तदर्थबोधकशब्दत्वावच्छिन्न प्रतियोगिताकभेदवत्त्वादिति ।

(५-सिद्धान्तसमाधानवार्तिकम्-४)

।।*।। *अप्रयुक्ते दीर्घसत्रवत्* ।।*।।

(व्याख्याभाष्यम्)

यद्यप्यप्रयुक्ताः अवश्यं दीर्घसत्रवल्लक्षणेनानुविधेयाः । तद्यथा दीर्घसत्राणिवार्षशतिकानि वार्षसहस्रिकाणि च । न चाऽद्यत्वे कश्चिदपिव्यवहरति[१] । केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणाऽनुविदधते ।।

(६-सिद्धान्तसमाधानान्तरवार्तिकम्-५)

।।*।। *सर्वे देशान्तरे* ।।*।।

(व्याख्याभाष्यम्)

सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते ।।

---

१. 'कश्चिदप्याहरति' इति क्वचित् ।

विमला – ऊषेत्यादिशब्दे-उच्चारण कर्म्मत्वाभावसाधकहेतौ स्वरूपासिद्धि-मुद्भावयति-**सर्वे देशान्तर इति** ।

(आक्षेपभाष्यम्)

नचैवोपलभ्यन्ते ।।

(समाधानभाष्यम्)

उपलब्धौ यत्नः क्रियताम् ।। महान् हि शब्दस्य प्रयोगविषयः । सप्तद्वीपा वसुमती त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं नवधाऽऽथर्वणो वेदो वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः । एतावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य 'सन्त्यप्रयुक्ता' इति वचनं केवलं साहसमात्रमेव ।।

विमला – बह्वृचानामाम्नायो बाह्वृच्यम् "**छन्दोगौक्थिकयाज्ञिक-बह्वृचनटाञ्ञ्यः**" इत्यनेन चरणाद्धर्म्माम्नाययोरित्युक्तत्वादाम्नायेञ्यः प्रत्ययः ।

अथर्वणा ऋषिणा प्रोक्तो वेदः – आथर्वणस्तमधीत इति – आथर्वणिका वसन्तादित्वाट्ठक् तेषामाम्नाय आथर्वणः । "**आथर्वणिकस्ये**" त्यादिनाऽण् इग्लोपश्च ।

एतावन्तम्प्रयोगविषयमिति । नेदम्परिगणनं किन्तु दिक्प्रदर्शनम् । तेन नाटकादीनामसंग्रहेऽपि न क्षतिः ।

अननुनिशम्येति । अयम्भावः — न केवलमनुपलब्धिरेवाभावग्राहिका किन्तु योग्यानुपलब्धिः । योग्यता च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जित - प्रतियोगिकत्वरूपा, प्रतियोग्युपलम्भजनककारणकलापसत्त्वे-एव, यद्यत्र प्रतियोगी स्यात्तर्हि-उपलभ्येत इत्यापादयितुं शक्यते "नान्यथा" । अतएव घटाभावस्य नान्धकारे चाक्षुषम्प्रत्यक्षं किन्तु-आलोकादिसमवधानदशायामेवेत्युपपद्यते । प्रकृते तु सप्तद्वीपात्मक - वसुमत्यामपि यदि ते प्रयुज्यन्ते तर्हि अवश्यं तेषामुपलब्ध्या भवितव्यमित्यापादयितुं नैव शक्यते

का कथा त्रयाणां लोकानाम् । एवञ्चानुपलब्ध्या न सर्वत्र देशे शास्त्रे वा प्रयुक्तत्वाभावनिर्णयः । किन्तु यत्र देशे शास्त्रे वा आपादयितुं शक्यते तत्रैवेति ।।

(शब्दानां विषयनैयत्यप्रदर्शकभाष्यम्)

एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते । तद्यथा – शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एवैनमार्या[१] भाषन्ते शव इति । हम्मतिः सुराष्ट्रेषु । रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते । दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु ।

(प्रयोगप्रदर्शनभाष्यम्)

ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दा एतेषामपि प्रयोगो दृश्यते । क्व ? वेदे । तद्यथा – "सप्तास्ये रेवतीरेवदूष, यद्वो रेवतीरेवत्यां तमूष, यन्मे नरः श्रुत्यं ब्रह्म चक्र, यत्रा नश्चक्रा जरसं तनूनाम्" इति ।

इति शास्त्ररचनावश्यकत्वनिरूपणम् ।।

(अथ शब्दज्ञानस्य धर्मजनकताधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनः शब्दस्य ज्ञाने धर्मः, आहोस्वित्प्रयोगे ?

विमला – "**एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुष्ठुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति**" इति श्रुतौ ज्ञानप्रयोगयोरुभयोरेव श्रवणात् "**यदैकस्मादपूर्वं तदितरत्तदर्थमि**"ति न्यायेन द्वयोः फलसम्बन्धाभावात् प्रश्नः, **किम्पुनरिति** ।

(प्रत्याक्षेपभाष्यम्)

कश्चात्र विशेषः ?

---

१ 'विकार एनमार्या' इति क्वचित् ।

(७-ज्ञानपक्षदूषणवार्तिकम्-१)

।।*।। *ज्ञाने धर्म इति चेत्तथाऽधर्मः* ।।*।।

(व्याख्याभाष्यम्)

ज्ञाने धर्म इति चेत्तथाऽधर्मोऽपि प्राप्नोति । योहि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति । यथैव शब्दज्ञाने धर्म एवमपशब्दज्ञानेऽप्यधर्मः ।।

(अधर्माधिक्यप्रदर्शनभाष्यम्)

अथवा भूयानधर्मः प्राप्नोति । भूयांसो ह्यपशब्दा अल्पीयांसः शब्दाः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा गौरित्यस्य गावीगोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशाः[१] ।।

विमला – अपशब्दानप्यसौ जानातीति । पचतीति शब्दज्ञाने डुपचष् पाके इत्यपशब्दज्ञानस्यावश्यकत्वमिति भावः । "**एवमपशब्दज्ञानेऽप्यधर्म्म**" इति । एवञ्चाधर्म्महेतुतया शास्त्रस्यानुपादेयत्वं स्यादितिभावः ।

(८-ज्ञानपक्षदूषणान्तरवार्तिकम्-२)

।।*।। *आचारे नियमः* ।।*।।

(व्याख्याभाष्यम्)

आचारे पुनर्ऋषिर्नियमं वेदयते – तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः, इति ।

(इति ज्ञानपक्षनिराकरणम् ।।)

(अथ प्रयोगपक्षाङ्गीकारभाष्यम्)

अस्तु तर्हि प्रयोगे ।।

---

१. "गौरित्यस्य गाव्यादयोऽपभ्रंशाः" इत्यपि पाठः ।

विमला – पूर्वोक्तश्रुतौ प्रयोगस्य ज्ञानापेक्षयाऽतिसान्निध्यात्तस्यैव फलसम्बन्धो युक्तः । ज्ञानस्य तु प्रयोगाङ्गतायां दृष्टार्थत्वञ्चेत्यपरमनुकूलम् अत्र पक्षे ।

(९-प्रयोगपक्षे दूषणवार्तिकम - ३)

।।*।। *प्रयोगे सर्वलोकस्य* ।।*।।

(व्याख्याभाष्यम्)

यदि प्रयोगे धर्मः, सर्वो लोकोऽभ्युदयेन युज्येत ।।

विमला – **प्रयोगे इति** । धर्म्म इति चेदित्यस्यानुषङ्गः । **सर्वलोकस्येति** । धर्म्मस्स्यादिति शेषः ।

(आक्षेपभाष्यम्)

कश्चेदानीं भवतो मत्सरी, यदि सर्वो लोकोऽभ्युदयेन युज्येत ?

(समाधानभाष्यम्)

न खलु कश्चिन्मत्सरः । प्रयत्नानर्थक्यं तु भवति । फलवता च नाम प्रयत्नेन भवितव्यम् । न च प्रयत्नः फलाद्व्यतिरेच्यः ।

(समाधानबाधकभाष्यम्)

ननु च ये कृतप्रयात्नास्ते साधीयः शब्दान्प्रयोक्ष्यन्ते, त एव साधीयोऽभ्युदयेन योक्ष्यन्ते ।

(समाधानसाधकभाष्यम्)

व्यतिरेकोऽपि वै लक्ष्यते । दृश्यते हि कृतप्रयत्नाश्चाऽप्रवीणाः, अकृतप्रयत्नाश्च प्रवीणाः । तत्र फलव्यतिरेकोऽपि स्यात् ।।

विमला – **फलव्यतिरेकोऽपि स्यादिति** । फलवद्वृत्त्यभावप्रतियोगित्वं स्यादित्यर्थः ।

(पक्षद्वयनिराकरणोपसंहारभाष्यम्)

एवं¹ तर्हि–नापि ज्ञान एव धर्मो नापि प्रयोग एव ।। किं तर्हि ?

विमला – **किन्तर्हीति** । तर्हि कः सिद्धान्त इत्यर्थः ।

(१०-सिद्धान्तसमाधानवार्तिकम्-४)

।।*।। शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ।।*।।

(व्याख्याभाष्यम्)

शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते । तत्तुल्यं वेदशब्देन । वेदशब्दा अप्येवमभिवदन्ति – "योऽग्निष्टोमेन यजते य उ चैनमेवं वेद" । "योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद" ।।

विमला – शास्त्रपूर्वक इति । व्याकरणाध्ययनाधीनज्ञानपूर्वक इत्यर्थः । **प्रयोग इति** । प्रयोगानुष्ठान इत्यर्थः । **अभ्युदयः** फलम् । **अयम्भावः** ।। **एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुष्ठुप्रयुक्तः स्वर्गेलोके च कामधुग्भवति**" इति श्रुतिः न केवलं सुप्रयुक्तत्वमुद्देश्यतावच्छेदकीकृत्य शब्दे कामधुक्त्वं विधत्ते, किन्तु शास्त्रान्वितत्वं सुप्रयुक्तत्वञ्चेत्युभयमेव । शास्त्रान्वितत्वं नाम शास्त्रजन्यप्रकृति-प्रत्ययादिविभागज्ञानवत्त्वम् । एवञ्च उद्देश्यतावच्छेदकविधेययोः प्रयोज्यप्रयोजकभावस्य सर्वानुभवसिद्धतया ज्ञानधनोभयवान् सुखीत्यादौ सुखे ज्ञानधनोभयप्रयोज्यत्वस्योपपत्तये यावदुद्देश्यतावच्छेदकप्रयोज्यत्वस्य विधेये स्वीकरणीयत्वेन न ज्ञानादेव सुखं नापि धनादेव । किन्तूभयस्मादेवेत्युपपद्यते तथैव प्रकृतेऽपि न शास्त्राधीनप्रकृतिप्रत्यया-दिविभागज्ञानमात्रादेव धर्म्मो नापि प्रयोगमात्रादेव किन्तूभयस्मादेवेत्युपपद्यते इत्येव ध्वनयितुम्पूर्वमुक्तम् – "**नापि ज्ञान एव धर्म्मो नापि प्रयोग एवेति**" ।। **वेद शब्देनेति** । अग्निष्टोमादावपि ज्ञानपूर्वकानुष्ठानादेव फलमिति सिद्धान्तादिति भावः ।

१. उभयत्रापि दोषस्य सत्त्वादाह एवमिति

(व्याख्यान्तरभाष्यम्)

अपर आह – तत्तुल्यं वेदशब्देनेति । यथा वेदशब्दा नियमपूर्वकमधीताः[1] फलवन्तो भवन्त्येवं यः शास्त्रपूर्वकं शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति ।।

विमला – वेदशब्देनेत्यत्र वेदशब्दतुल्यत्वपरत्वोपपत्तये लक्षणाया: बहुव्रीहेर्वाऽऽश्रयणे गौरवमतोऽन्यथा व्याख्यायते – **अपर आहेति** । **यथा वेदशब्दा नियमपूर्वकमिति** । "आहूतश्चाप्यधीयते" त्यादि - मन्वादिबोधितनियमपूर्वकमधीता: फलं जनयन्ति, तथैव पचति देवदत्त इत्यादिलौकिकशब्दा अपि व्याकरण बोधितप्रकृतिप्रत्ययविभागज्ञानपूर्वकम्प्रयुक्ता: फलं जनयन्तीत्यर्थ: ।

(प्रथमपक्षाभ्युपगमभाष्यम्)

अथवा पुनरस्तु–ज्ञान एव धर्म इति ।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् ज्ञाने धर्म इति चेत्तथाऽधर्म इति ।।

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः, शब्दप्रमाणका वयम् । यच्छब्द आह तदस्माकम् प्रमाणम् । शब्दश्च शब्दज्ञाने धर्ममाह, नापशब्दज्ञानेऽधर्मम् ।। यच्च पुनरशिष्टाऽप्रतिषिद्धम्, नैव तद्दोषाय भवति, नाभ्युदयाय । तद्यथा हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति, नाभ्युदयाय ।।

विमला – नापशब्दज्ञानेऽधर्ममिति । "**न म्लेच्छितवै**" इत्यनेनापशब्द-प्रयोगस्यैव निषेधात् । नच पचतीति साधुशब्दज्ञानार्थम् "**डुपचष्**" इत्यादीनाम्प्रयोग[illegible]स्यावश्यक एवेति वाच्यम्, तदीयज्ञानमात्रेण निर्वाहात् । व्युत्पादनार्थं तत्प्रयोगस्य[illegible]

---

१. 'नियमपूर्वमधीता:' इति क्वचित् ।

न क्षतिः, शब्दस्वरूपपरत्वेनानुकरणतया साधुत्वाभ्युपगमात् । अनुकरणानामसाधुत्वे तु "**हेलयो हेलय**" इत्यादि श्रुतिपाठेनापि प्रत्यवेयात् ।

(समाधानान्तरवार्तिकम्)

।।*।। *अभ्युपायोवाऽपशब्दज्ञानं शब्दज्ञाने* ।।*।।

(समाधानान्तरव्याख्याभाष्यम्)

अथ वाऽभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने । यो ह्यपशब्दाञ्जानाति शब्दानप्यसौ जानाति । तदेवं "ज्ञाने धर्मः" इति ब्रुवतोऽर्थादापन्नं भवति–अपशब्दज्ञानपूर्वके, शब्दज्ञाने धर्मः, इति ।।

विमला – ननु "**एकः शब्दः सम्यग् ज्ञातः**" इति श्रुतिरेव शब्दज्ञानस्य धर्म्मजनकत्वम्बोधयन्ती तुल्यन्यायेनापशब्दज्ञानेनाधर्ममपि बोधयतीति शङ्कायामाह– **अथवेति** । **अभ्युपाय एवेति** । शब्दज्ञानेन फले जननीये ऽपशब्दज्ञानमम्युपायः सहकारिकारणमित्यर्थः । अर्थादापन्नम् । अर्थात् प्राप्तम्, किम्प्राप्तं, तदाह–**अपशब्दज्ञानपूर्वक इति** । अपशब्दज्ञानसमानाधिकरणशब्दज्ञानेन धर्म इति ।

(समाधानांन्तरवार्तिकम्)

।।*।। *कूपखानकवद्वा*[1] ।।*।।

(समाधानान्तरव्याख्याभाष्यम्)

अथवा कूपखानकवदेतद्भविष्यति । तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति । सोऽप्सु संजातासु तत एव तं गुणमासादयति । येन च स[2] दोषो निर्हण्यते; भूयसा चाभ्युदयेन योगो भवति । एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि

१. वार्तिकमिदमासीत्पूर्वमिति व्याख्याभाष्यदर्शनादनुमीयते इति गौडाः । न तु सर्वत्रेदं विद्यते ।
२. 'येन स च' इति पाठभेदः ।

यस्त्वसौ शब्दज्ञाने धर्मस्तेन च स दोषो निर्घाणिष्यते भूयसा चाभ्युदयेन योगो भविष्यति ।।

विमला – ननु शब्दज्ञानविपरीतमपशब्दज्ञानम् । शब्दज्ञानेन फले जनयितव्ये नैव सहकारिभावम्भजेत विपरीतयोः सहकारिभावस्यादर्शनादत आह **अथवेति** । **कूपखानकवदिति** एतदपशब्दज्ञानरूपं वस्तु कूपखानकेन तुल्यम्भविष्यतीत्यर्थः । **अवकीर्णो मिलितः** । **तत एव** । अद्भ्य एव तं गुणं स्नानपानादि रूपेष्टसाधनतातिशयमित्यर्थः । अयम्भावः — शब्दज्ञाननान्तरीयकापशब्दज्ञानस्य लेशतः पापजनकत्वेऽपि कूपखानकन्यायेन परिनिष्ठितप्रयोगज्ञानोत्पन्न धर्मादेव तस्य नाशः स्वर्गादिफलञ्च भविष्यतीति । कूपं खनतीति विग्रहे कर्मण्यणि प्राप्ते वासरूपन्यायेन ण्वुल् । न च शिल्पिनि ष्वुन् इति सूत्रेण ण्वुलो बाधः स्यादिति वाच्यम्, इह खननकर्तृत्वमात्रस्य विवक्षया शिल्पित्वस्याविवक्षितत्वात् । न च शब्दज्ञानस्य पापनाशकत्वे प्रमाणाभाव इति वाच्यम् । यत्कर्म्मनान्तरीयककर्म्मजन्यो यो विपरीतदोषः, स तत्कर्म्मजन्यफलनाश्यः कूपखनननान्तरीयकशरीरव्यापारजन्यमृल्लेपवदिति सामान्यतो दृष्टानुमानस्यैव प्रमाणत्वात् ।

(दूषणान्तरनिरासवार्तिकम्)

।।।। आचारे नियम इति चेद्याज्ञे कर्मणि स*

नियमोऽन्यत्राऽनियमः ।।।।*

(द्वितीयदूषणनिरासव्याख्याभाष्यम्)

यदप्युच्यते– आचारे नियम इति ।।

याज्ञे कर्मणि स नियमोऽन्यत्राऽनियमः । एवं हि श्रूयते–'यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः पराऽवरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः ।' ते तत्रभवन्तो यद्वा नस्तद्वा न इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे पुनः कर्मणि नापभाषन्ते । तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितम्, ततस्ते पराभूताः ।।

विमला – याज्ञे कर्म्मणि स नियम इति । न म्लेच्छितवा इत्यस्य क्रतुप्रकरणे पाठादिति भावः ।

यर्वाणस्तर्वाण इति । अयमाशयः, योगिन एते विरक्त्यतिशयाल्लौकिकेष्वर्थेष्वाग्रहविरहेण यथातथाऽस्माकम्भवतु-इति विवक्षवो यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुक्तवन्तस्तेन यर्वाणस्तर्वाण इति संज्ञामेव मुनयो लेभिरे इति ।

(इति शब्दज्ञानस्य धर्मजनकतानिर्णयप्रकरणम् ।)

(अथ व्याकरणपदार्थनिरूपणे आक्षेपभाष्यम्)

अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः ?

(समाधानभाष्यम्)

सूत्रम् ।।

(११-सूत्रपक्षे आक्षेपवार्तिकम् - ११)

।।*।। सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः ।।*।।

(व्याख्यानभाष्यम्)

सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते – 'व्याकरणस्य सूत्रम्' इति ।। किं हि तदन्यत्सूत्राद् व्याकरणम्, यस्याऽदः सूत्रं स्यात् ?

(१२-आक्षेपान्तरवार्तिकम् - २)

।।*।। शब्दाऽप्रतिपत्तिः ।।*।।

(व्याख्यानभाष्यम्)

शब्दानां चाऽप्रतिपत्तिः प्राप्नोति– 'व्याकरणाच्छब्दान्प्रतिपद्यामहे' इति । नहि सूत्रत एव शब्दान्प्रतिपद्यन्ते ।। किं तर्हि ? व्याख्यानतश्च ।।

(आक्षेपसाधकभाष्यम्)

ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति ।।

(आक्षेपस्थापनभाष्यम्)

न केवलानि चर्चापदानि व्याख्यानम्–वृद्धिः, आत्, ऐज् इति ।।

किं तर्हि ?

उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति ।।

(पक्षान्तरभाष्यम्)

एवं तर्हि – शब्दः ।

(१३-आक्षेपवार्तिकम्-३)

।।।। शब्दे ल्युडर्थः ।।*।।*

(व्याख्याभाष्यम्)

यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते–व्याक्रियन्ते शब्दा अनेनेति व्याकरणम् । नहि शब्देन किंचिद्व्याक्रियते ।। केन तर्हि ? सूत्रेण ।।

(१४-आक्षेपान्तरवार्तिकम्-४)

।।।। भवे च तद्धितः[1] ।।*।।*

(व्याख्याभाष्यम्)

भवे च तद्धितो नोपपद्यते–व्याकरणे भवो योगो वैयाकरणः इति । नहि शब्दे भवो योगः ।।

क्व तर्हि ? सूत्रे ।।

---

१. अयमंशः क्वचित्पुस्तके नास्ति वार्तिके ।

(१५-आक्षेपान्तरवार्तिकम्-५)

।।*।। प्रोक्तादयश्च तद्धिताः ।।*।।

(व्याख्यानभाष्यम्)

प्रोक्तादयश्च तद्धिता नोपपद्यन्ते । पाणिनिना प्रोक्तं पाणिनीयम्, आपिशलं, काशकृत्स्नमिति । नहि पाणिनिना शब्दाः प्रोक्ताः ।

किं तर्हि ? सूत्रम् ।।

(आक्षेपभाष्यम्)

किमर्थमिदमुभयमुच्यते – भवे (च तद्धितः) प्रोक्तादयश्च तद्धिताः इति । न प्रोक्तादयश्च तद्धिताः इत्येव, भवेऽपि तद्धितश्चोदितः स्यात् ?

(परिहारभाष्यम्)

पुरस्तादिदमाचार्येण दृष्टम् – भवे च तद्धितः इति, तत्पठितम् । तत उत्तरकालमिदं दृष्टम्– प्रोक्तादयश्च तद्धिताः इति, तदपि पठितम् । न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति ।।

(प्रथमाक्षेपबाधकभाष्यम्)

अयं तावददोषः – यदुच्यते शब्दे ल्युडर्थः इति । नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते ।।

किं तर्हि ?

अन्येष्वपि कारकेषु– "कृत्यल्युटो बहुलम्" इति । तद्यथा प्रस्कन्दनं प्रपतनमिति ।।

(करणल्युट्समर्थनभाष्यम्)

अथ वा शब्दैरपि शब्दा व्याक्रियन्ते । तद्यथा गौरित्युक्ते सर्वे संदेहा निवर्तन्ते, नाश्वो न गर्दभ इति ।।

(अनुद्धृतदोषप्रदर्शकं भाष्यम्)

अयं तर्हि दोषः – भवे[1] प्रोक्तादयश्च तद्धिताः इति ।।

(समाधानभाष्यम्)

किं तर्हि –

(सिद्धान्तवार्तिकम्)

।।।। लक्ष्यलक्षणे व्याकरणम् ।।*।।*

(व्याख्यानभाष्यम्)

लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति ।।

(पदार्थजिज्ञासाभाष्यम्)

किं पुनर्लक्ष्यम्, किं वा[2] लक्षणम् ? ।।

(समाधानभाष्यम्)

शब्दो लक्ष्यः, सूत्रं लक्षणम् ।।

(समाधानबाधकभाष्यम्)

एवमप्ययं दोषः – समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते । सूत्राणि चाप्यधीयान इष्यते–वैयाकरण इति ।।

(समाधानसाधकभाष्यम्)

नैष दोषः । समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तन्ते । तद्यथा – पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, तैलं भुक्तम्, घृतं भुक्तम्, शुक्लो नीलः कपिलः कृष्ण इति ।

---

१. 'भवे च तद्धितः' इति क्वचित् ।

२. वेति क्वचिन्नास्ति । क्वचिच्च 'किञ्च लक्षण' मिति पाठः ।

एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेष्वपि वर्त्तते ।।

(प्रथमपक्षाभ्युपगमभाष्यम्)

अथ वा पुनरस्तु सूत्रम् ।

विमला – अथवेति, पुनरस्तु सूत्रमिति । सूत्रस्य व्याकरणपदार्थत्वे व्याकरणस्य सूत्रमित्यत्र "वनस्यायं वृक्ष" इत्यादाविवावयवावयविभावसम्बन्धे षष्ठीति व्याकरणस्य सूत्रमिति व्यवहारः-व्याख्यानस्यापि सूत्रार्थमात्राभिव्यञ्जकत्वेन "**व्याकरणाच्छब्दान् प्रतिपद्यामहे**" इति व्यवहारश्चोपपद्यते । लक्ष्यलक्षणसमुदायस्य व्याकरणपदार्थत्वे सूत्रमात्रमधीयाने वैयाकरणशब्दप्रयोगः "तैलं भुक्तं" "घृतं भुक्त" मित्यादाविव भाक्तत्वेनोपपादनीय इत्युभयत्रैव दोषस्य परिहारसम्भवादुभयत्रैव व्याकरणपदार्थत्वमिष्ट-मिति भावः ।

(प्रथमाक्षेपस्मारणभाष्यम्)

ननु चोक्तम् – सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्न इति ।।

(प्रथमाक्षेपनिरासभाष्यम्)

नैष दोषः । व्यपदेशिवद्भावेन भविष्यति ।।

(द्वितीयाक्षेपनिरासभाष्यम्)

यदप्युच्यते – शब्दाप्रतिपत्तिः इति । नहि सूत्रत एव शब्दान्प्रतिपद्यन्ते ।। किं तर्हि ? व्याख्यानतश्चेति ।। परिहृतमेतत्-तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति ।।

(परिहारबाधकस्मारणभाष्यम्)

ननु चोक्तम्–न केवलानि चर्चापदानि व्याख्यानम्– वृद्धिः, आत्, ऐजिति । किं तर्हि ?

उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति इति ।।

(परिहारसाधकभाष्यम्)

अविजानत एतदेवं[1] भवति । सूत्रत एव हि शब्दान् प्रतिपद्यन्ते ।। आतश्च सूत्रत एव । यो ह्युत्सूत्रं कथयेन्नादो गृह्येत ।।

(इति व्याकरणपदार्थनिरूपणम् ।)

(अथ वर्णोपदेशप्रयोजनाधिकरणे आक्षेपभाष्यम्)

अथ किमर्थो वर्णानामुपदेशः ?

(१७-समाधानवार्तिकम्-१)

|||| वृत्तिसमवायार्थ उपदेशः ||*||*

(व्याख्याभाष्यम्)

वृत्तिसमवायार्थो वर्णानामुपदेशः ।।

(समासप्रश्नभाष्यम्)

किमिदं वृत्तिसमवायार्थ इति ? ।

(समाधानभाष्यम्)

वृत्तये समवायो वृत्तिसमवायः । वृत्त्यर्थो वा समवायो वृत्तिसमवायः । वृत्तिप्रयोजनो वा समवायो वृत्तिसमवायः ।।

का पुनर्वृत्तिः ? ।। शास्त्रप्रवृत्तिः ।।

अथ कः समवायः ? ।। वर्णानामानुपूर्व्येण संनिवेशः ।।

---

१ सूत्रातिरिक्तानां व्याख्यानत्वमित्येतदित्यर्थः ।

अथ क उपदेशः ? उच्चारणम् ॥

कुत एतत् ?

दिशिरुच्चारणक्रियः । उच्चार्य हि वर्णानाह–उपदिष्टा इमे वर्णा इति ॥

(१८-वर्णोपदेशप्रयोजनान्तरवार्तिकम्-२)

॥*॥ अनुबन्धकरणार्थश्च ॥*॥

(व्याख्यानभाष्यम्)

अनुबन्धकरणार्थश्च वर्णानामुपदेशः – अनुबन्धानासङ्क्ष्यामीति । [1]नह्यनुपदिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम् । स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चाऽनुबन्धकरणार्थश्च । वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम् । प्रत्याहारो वृत्त्यर्थः ॥

(१९-वर्णोपदेशप्रयोजनान्तरवार्तिकम्-३)

॥*॥ इष्टबुद्ध्यर्थश्च ॥*॥

(व्याख्यानभाष्यम्)

इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः – 'इष्टान्वर्णान् भोत्स्यामहे' इति । [2]नह्यनुपदिश्य वर्णानिष्टा वर्णाः शक्या विज्ञातुम् ॥

(२०-आक्षेपवार्तिकम्-४)

॥*॥ इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः[3] ॥*॥

---

१. नहि – न च ।

२. न चापि पाठः ।

३. 'प्लुतानामुपदेशः' इत्यपि क्वचित् ।

(व्याख्यानभाष्यम्)

इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिक-दीर्घप्लुतानामप्युपदेशः कर्तव्यः । एवंगुणा अपि हि वर्णा इष्यन्ते ॥

(२१-सिद्धान्तवार्तिकम्-५)

॥॥ आकृत्युपदेशात्सिद्धम्[1] ॥*॥*

(व्याख्यानभाष्यम्)

अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिः । तथोवर्णाकृतिः ।

(२२-आक्षेपवार्तिकम्-६)

॥॥ आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः ॥*॥*

(व्याख्यानभाष्यम्)

आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधो वक्तव्यः ॥

(संवृतादिपदार्थजिज्ञासाभाष्यम्)

के पुनः संवृतादयः ? ॥

(संवृतादिनामनिर्देशभाष्यम्)

संवृतः, कलो, ध्मात, एणीकृतोऽम्बूकृतोऽर्द्धको, ग्रस्तो, निरस्तः, प्रगीत, उपगीतः, क्ष्विण्णो, रोमश इति ।

---

१. वार्त्तिकमिदं भाष्यकृत एवाग्रिमवार्त्तिकावतारणाय, पूर्वेषामाचार्याणां वेति गौडाः ।

(व्याख्यान्तरभाष्यम्)

अपर आह[1] –

"ग्रस्तं निरस्तमवलम्बितं निर्हतमम्बूकृतं ध्मातमथो विकम्पितम् ।

संदष्टमेणीकृतमर्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः" इति ।।

अतोऽन्ये व्यञ्जनदोषाः ।।

(समाधानभाष्यम्)

नैष दोषः ।।

(२३-समाधानवार्तिकम्-७)

।।।। गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिः[2] ।।*।।*

(व्याख्याभाष्यम्)

गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति ।।

(समाधाननिरासवार्तिकम्)

।।।। समुदायसाधुत्वार्थं तु गर्गादिबिदादिपाठः[3] ।।*।।*

१. अपर आहेत्यतोऽग्रे गौडास्तु –
" ।।a।। *आकृत्युपदेशात्सिद्धमिति चेद्ग्रस्तादीनां प्रतिषेधः* ।।a।।
आकृत्युपदेशात्सिद्धमिति चेद्ग्रस्तादीनां प्रतिषेधो वक्तव्यः ।। *के पुनर्ग्रस्तादयः ? ग्रस्तं निरस्तमवलम्बितम्*" – इत्येवं पठन्ति ।

२. वार्त्तिकमिदं क्वचिदस्ति क्वचिन्नास्ति ।

३. इदं वार्त्तिकं न क्वचिदपि पुस्तके दृश्यते । अनुमायैव स्थापितमस्माभिः ।

(आक्षेपभाष्यम्)

अस्त्यन्यद् गर्गादिबिदादिपाठे प्रयोजनम् ।। किम् ? समुदायानां साधुत्वं यथा स्यादिति ।।

(एकदेशिसमाधानवार्तिकम्)

।।*।। प्रत्यापत्तिवचनम्[1] ।।*।।

(समाधानैकदेशिभाष्यम्)

एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि ।।

विमला – अवर्णस्य प्रत्यापत्तिं वक्ष्यामीति । प्रतिविधानं वक्ष्यामीत्यर्थ: । अयम्भाव:, सर्वा अज् व्यक्तयो हल् व्यक्तयश्च शास्त्रान्ते शुद्धा: पठिष्यन्ते, तेन च कलादिविशिष्टमकारादिकमुद्दिश्य शुद्धमकारादिकं करिष्यते । शास्त्रान्ते करणाच्च तस्य सम्पूर्णामष्टाध्यायीम्प्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या कलादिसत्त्वेनानुबन्धप्रयुक्तकार्य्यस्य कलादिभि निर्वाहे न किञ्चिद्बाधकम्, प्रयोगे तु शुद्धस्यैव श्रवणम् । नचात्र पक्षे गौरवमिति भ्रमितव्यम्, तद्बलेन सर्वेषामेवानुबन्धानाम्प्रत्याख्यानात् । युक्तञ्चैतत् शीङादौ ङकाराद्यनुबन्धकरणापेक्षया कृतायामीकारादिव्यक्तावेव कलत्वादिधर्मकल्पनं समुचितम् "**धर्म्मिक कल्पनातो हि धर्म्म कल्पने**" ति न्यायेन धर्मकल्पनायां लाघवात् "**ङित आत्मनेपदमि**"त्यत्र कलादात्मनेपदमिति करणाच्च नात्मनेपदहानिरिति । "**आगमा: शुद्धा: पठ्यन्त**" इत्यागमादीनां शुद्धपाठेन "**इष्टबुद्ध्यर्थश्चे**"ति । भाष्ये प्रदर्शितानुषङ्गिकफलस्यान्यथासिद्ध्युपपादनेऽपि "**वृत्तिसमवायार्थ उपदेश:**"। "**अनुबन्धकरणार्थश्चे**" ति मुख्यफलार्थमेव वर्णोपदेश इति बोध्यम् ।

इति पण्डितमहेशझाशर्म्म - विरचितायाम् महाभाष्यव्याख्यायां विमलाख्यायाम्प्रथमाध्यायस्य प्रथमे पादे प्रथममाह्निकम् ।।

---

१. वार्त्तिकमिदं 'प्रत्यापत्तिवचनात्सिद्धम्' इति वा वार्त्तिकमत्र लुप्तमिति विभाव्यास्माभिरत्रेदं वार्त्तिकं स्थापितम् ।

(प्रत्यापत्तिवचने गौरवप्रदर्शकं भाष्यम्)

सा तर्हि वक्तव्या ।।

(२४-एकदेशिनः समाधानवार्तिकम्-८)

।।*।। *लिंगार्था तु प्रत्यापत्तिः* ।।*।।

(व्याख्याभाष्यम्)

लिङ्गार्था सा तर्हि भवति ।।

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम् ।।

(समाधानभाष्यम्)

यद्यप्येतदुच्यते अथवैतर्हि अनेकमनुबन्धशतं नोच्चार्यमित्संज्ञा च न वक्तव्या, लोपश्च न वक्तव्यः । यदनुबन्धैः क्रियते तत्कलादिभिः करिष्यते ।।

(आक्षेपभाष्यम्)

सिद्ध्यत्येवम् । अपाणिनीयं तु भवति ।।

(सिद्धान्तिभाष्यम्)

यथान्यासमेवास्तु ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् – 'आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेधः' इति ।।

(समाधानभाष्यम्)

परिहृतमेतत्, – गर्गादिबिदादिपाठात् संवृतादीनां-निवृत्तिर्भविष्यति इति ।।

(समाधानबाधकभाष्यम्)

ननु चान्यद् गर्गादिबिदादिपाठे प्रयोजनमुक्तम् । किम् ? समुदायानां साधुत्वं यथा स्यादिति ।।

(समाधानसाधकभाष्यम्)

एवं तर्ह्युभयमनेन क्रियते-पाठश्चैव विशेष्यते, कलादयश्च निवर्त्यन्ते ।।

(आक्षेपभाष्यम्)

कथं पुनरेकेन यत्नेनोभयं लभ्यम्[1] ?

(उत्तरप्रत्युत्तरभाष्यम्)

लभ्यमित्याह ।। कथम् ?

द्विगता अपि हेतवो भवन्ति । तद्यथा – 'आम्राश्च सिक्ताः पितरश्च प्रीणिता' इति । तथा वाक्यानि द्विष्ठानि भवन्ति–श्वेतो धावति, अलम्बुसानां यातेति ।।

(प्रत्युक्तिभाष्यम्)

अथ वा इदं तावदयं प्रष्टव्यः – क्वेमे संवृतादयः श्रूयेरन्निति ?

आगमेषु ।
आगमाः शुद्धाः पठ्यन्ते ।।
विकारेषु तर्हि ।।
विकारा अपि शुद्धाः पठ्यन्ते ।।
प्रत्ययेषु तर्हि ।।
प्रत्यया अपि शुद्धाः पठ्यन्ते ।।

---

१. तन्त्रादिनोभयपरमित्युत्तराशयः ।

धातुषु तर्हि ।।
धातवोऽपि शुद्धाः पठ्यन्ते ।।
प्रातिपदिकेषु तर्हि ।।

प्रातिपदिकान्यपि शुद्धानि पठ्यन्ते ।।
यानि तर्ह्यग्रहणानि प्रातिपदिकानि ?

एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्तव्यः । शशः षष इति मा भूत् । पलाशः पलाष इति मा भूत् । मञ्चको मञ्जक इति मा भूत् ।।

आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः ।
उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः ।।१।।

।। इति श्रीमद्भागवत्पतञ्जलिविरचिते
व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे
पस्पशाह्निकन्नाम प्रथमाह्निकम् ।।

द्वितीयं प्रत्याहाराह्निकम्

(शिवसूत्रम्)

अइउण् ।।१।।

(२५-विवृतोपदेशप्रतिज्ञावार्तिकम् - १)

।।*।। अकारस्य विवृतोपदेश आकारग्रहणार्थः ।।*।।

(भाष्यम्)

अकारस्य विवृतोपदेशः कर्तव्यः ।

किं प्रयोजनम् ?

आकारग्रहणार्थः । आकारः सवर्णग्रहणेनाऽऽकारमपि यथा गृह्णीयात् ।।

विमला – अ इ उण् । अनुकरणत्वेनानुकार्य्यानुकरणयोरभेदादर्थवत्त्वाभावेन वर्णेभ्यो न विभक्त्युत्पत्तिः । न चानुकरणस्य सादृश्यादिनाऽनुकार्योपस्थापकतयाऽर्थवत्त्वमस्तीति वाच्यम्, तावतापि वृत्तिप्रयोज्यबोधजनकत्वरूपार्थवत्त्वाभावेन विभक्त्युत्पत्त्यसम्भवात्, अर्थवत्सूत्रे तादृशस्यैवार्थवत्त्वस्य विवक्षितत्वात् । अनुकार्य्यानुकरणयोर्भेदविवक्षापक्षे तु अनुकरणत्वभङ्गभियैव न विभक्त्युत्पत्तिः । अथवा चादिषु पाठेन निपातत्वेनाव्ययत्वादुत्पन्नाया: विभक्तेर्लुक् । श्रुतित्वेन सुपां सुलुगिति वा समाधेयम् ।

स्वरसन्धिस्तु न संहिताया अविवक्षणात् । अत एव ''**हे रोहिणि त्वमसि शीलवतीषु धन्या, एनं निवारय पतिं सखि दुर्विनीतम् । जालान्तरेण मम वासगृहम्प्रविष्टः, श्रोणीतटं स्पृशति किं कुलधर्म्म एषः ।।**'' इत्यत्र धन्या एनमित्यस्य नासाधुता । अत एवालङ्कारिकैश्च्युतिसंस्कृतत्वापेक्षया पृथगेव '**विसंधिता**' नाम दोषान्तरं गणितम् । न चानुकरणत्वेन सौत्रत्वाच्च नैतेभ्यो विभक्त्युत्पत्तिरिति पक्षेऽस्य वाक्यत्वाभावेन संहिताया अविवक्षाकर्त्तुमशक्येति वाच्यम्, – ''**संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ।।**''

इत्यत्र वाक्यपदेन परिनिष्ठित-समूहस्य ग्रहणेनादोषात् । वर्णोपदेशकालेऽजादि-संज्ञानामनिष्पादान्न स्वरसन्धिरिति कैयटोक्तन्तु न युक्तम्, वर्णोपदेशे इत्संज्ञायामच्प्रत्याहारे च निष्पन्ने प्रवर्त्तमानानां यणादीनां सुध्युपास्य इत्यादौ तटस्थ इवोद्देश्यतावच्छेदकरूपाक्रान्ते वर्णोपदेशादावपि प्रवृत्तेरावश्यकत्वात् । अन्यथा ''**तुल्यास्यप्रयत्न**''मित्यादौ सवर्णदीर्घो न स्यात् । तथाऽर्थवत्सूत्रान्तर्गतानां प्रातिपदिकत्वम् ''**प्रत्ययः परश्च**''-त्यादौ सुः प्रत्ययः ''**ङ्याप् प्रातिपदिकात्**'' '**द्व्येकयोर्द्विवचनैकवचने**' ''**बहुषु**'' इत्यादौ तत्तद्विभक्तिः ''**ससजुषोरु**'' रित्यत्र रुः ''**खरवसानयो**'' रित्यत्र विसर्गश्च न स्यादिति सर्वोपप्लवः स्यात् ।

नन्वेवं ग्रहणकशास्त्रमपि ''**अणोऽप्रगृह्यस्ये**''त्यादौ तटस्थ इव स्वस्मिन्नपि प्रवर्त्तेत ततश्च दीर्घाणामनण्त्वेन सवर्णग्राहकत्वं नेति सिद्धान्तोऽपि भज्येतेति चेन्न ग्रहणकशास्त्रजबोधात्पूर्वम् अण्पदेन दीर्घादीनामनुपस्थित्या तेषां सवर्णग्राहकत्वविधानासम्भवात् ।।

अत्र कारप्रत्ययस्तु न बाहुलकात् । केचित्तु ''**वर्णात्कार**'' इत्यस्यात्वाद्य-न्यतमधर्म्मप्रकारकबोधजननेच्छयोच्चार्यमाणात्कारप्रत्यय इत्यर्थस्तथा चैतेषां तादृशेच्छयोच्चारणाभावेन नैतेभ्यः कारप्रत्यय इत्याहुः ।

अकारस्य विवृतोपदेशः कर्त्तव्य इति । ननु ''**विवृतकरणाः स्वरास्तेभ्य एओ विवृततरौ ताभ्यामैऔ विवृततमौ ताभ्यामप्याकारः संवृतोऽकार**'' इति शिक्षावचनादाकारस्य विवृततमप्रयत्नकत्वेन अकारस्य विवृतोपदेशेऽपि तेन दीर्घादिग्रहणं दुरुपपादमेव, नच विवृततमस्यापि विवृतत्वेन तुल्यप्रयत्नकत्वानपायात्सवर्णसंज्ञायां दीर्घादिग्रहणं सुलभमिति वाच्यम्, सवर्णसंज्ञायां तुल्यत्वस्य विवृततरत्वाद्यवान्तरधर्म्म-पुरस्कारेणैव विवक्षितत्वात् । अन्यथा हकारादीनामीषद्विवृतत्वादकारादीनाञ्च विवृतत्वात्प्रयत्नभेदान्नैतेषां सावर्ण्यप्रसक्तिरिति ''**नाज्झलावि**'' ति सूत्रन्न कर्त्तव्यमिति भाष्यसिद्धान्तो व्याकुप्येतेति चेन्न, विवृतपदेन विवृततमस्य विवक्षितत्वात् । अथवा विवृतकरण-सामर्थ्यादेव दीर्घादिना विवृततमेन सावर्ण्यमुपपादनीयम् । वस्तुतस्तु, आकारो विवृत एव ''**स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्; तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव चे**''त्येव शिक्षायामुक्तं, तथा च यथाश्रुतमेव सम्यक । पूर्वोक्तन्तु न्यासकाराद्यनुरोधेनेति । अथवा ''**नाज्झला**''विति पठतः सूत्रकृतो मते

विवृततरत्वादीनामाभ्यन्तरप्रयत्नानामभावाद्विवृतत्वात्सावर्ण्यमिति न काप्यनुपपत्तिः । एदैतोः सावर्ण्यन्तु; ''**ऐऔजि**'' ति सूत्रारम्भसामर्थ्यादेव न भवति । नन्वकारस्य विवृतस्योच्चारयितुमशक्यत्वाद्विधिवैयर्थ्यमिति चेन्नकर्त्तव्य इत्यस्य प्रतिज्ञेय इत्यर्थकरणेनादोषात् ।।

(आकृतिपक्षाभिप्रायेण-आक्षेपभाष्यम्)

किं च कारणं न गृह्णीयात् ?

(व्यक्तिपक्षाश्रयेण समाधानभाष्यम्)

विवार भेदात् ।।

(न्यूनतोद्भावनाय आक्षेपभाष्यम्)

किमुच्यते – विवारभेदादिति, न पुनः कालभेदादपि । यथैव ह्ययं विवारभिन्नः, एवं कालभिन्नोऽपि ।।

(समाधानभाष्यम्)

सत्यमेव तत् । वक्ष्यति ''तुल्यास्यप्रयत्नं सवर्णम्'' इत्यत्रास्यग्रहणस्य प्रयोजनम् – 'आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्ती'ति । बाह्यश्च पुनरास्यात्कालः । तेन स्यादेव कालभिन्नस्य ग्रहणम्, न पुनर्विवारभिन्नस्य ।।

(विवृतोपदेशे आक्षेपभाष्यम्)

किं पुनरिदं विवृतस्योपदिश्यमानस्य[१] प्रयोजनमन्वाख्यायते[२], आहोस्वित् संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते[३] ?

(समाधानभाष्यम्)

विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते ।।

कथं ज्ञायते ?

---

१. सूत्रकृतोपदिश्यमानस्येत्यर्थः । २. वार्तिककृता प्रयोजनमुच्यते ।

३. वार्तिककृतोपदेशश्चोद्यते कर्त्तव्यतया ।

यदयम् - "अ अ" - इत्यकारस्य विवृतस्य संवृतताप्रत्यापत्तिं शास्ति[1] ।।

विमला – संवृतता प्रत्यापत्तिं शास्तीति । अयम्भावः । यदि सूत्रकारोऽकारस्य विवृतत्वन्नाज्ञास्यत्कथं तर्हि विवृतमकारमुद्दिश्य संवृतं व्यधास्यत् । तेन मन्यामहे सूत्रकृता विवृतोपदेशः कृतः । वार्तिककारेण तु प्रयोजनमन्वाख्यायत इति । ननु विवृतेनाकारेण दीर्घादीनामपि ग्रहणाद्दीर्घादीनामपि संवृताकारविधानापत्तिरिति चेन्न, (अद् अ) इति तपरनिर्देशनादोषात् ।

(समाधानबाधकभाष्यम्)

नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ।

किम् ?

'अतिखट्वः' 'अतिमाल' इत्यत्रान्तर्यतो विवृतस्य विवृतः प्राप्नोति, संवृतः स्यादित्येवमर्थाप्रत्यापत्तिः ।।

(समाधानसाधकभाष्यम्[2])

नैतदस्ति । नैव लोके न च वेदेऽकारो विवृतोऽस्ति ।।

कस्तर्हि ?

संवृतः । योऽस्ति, स भविष्यति । तदेतत्प्रत्यापत्तिवचनं ज्ञापकमेव भविष्यति – 'विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते' इति ।।

(आक्षेपभाष्यम्[3])

कः पुनरत्र विशेषः – 'विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते, संवृतस्योपदिश्यमानस्य वा विवृतोपदेशश्चोद्येते' ति ?

---

१. अकारस्य विवृतत्वाभावे तु कमुद्दिश्य संवृतविधानं स्यात् ।

२. ज्ञापकत्वसाधकभाष्यम् ।

३. विशेषजिज्ञासार्थम् ।

(समाधानभाष्यम्)

न खलु कश्चिद्विशेषः । आहोपुरुषिकामात्रं तु । भवानाह – 'संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यत' इति । वयं तु ब्रूमो – 'विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत' इति ।।

(२६-धात्वादिषु विवृतत्वप्रतिज्ञावार्तिकम् - २)

।।।। तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः ।।*।।*

(व्याख्याभाष्यम्)

तस्यैतस्याक्षरसमाम्नायिकस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः कर्त्तव्यः ।।

क्वान्यत्र ? धातुप्रातिपदिकप्रत्ययनिपातस्थस्य ।।

किं प्रयोजनम् ? सवर्णग्रहणार्थः । आक्षरसमाम्नायिकेनाऽस्य ग्रहणं यथा स्यात् ।।

किं च कारणं न स्यात् ?

विवारभेदादेव ।।

विमला – विवारभेदादेवेति । तथा च 'अचश्चे' ति परिभाषाया बाधादनुपस्थित्या 'शमामष्टानामि' ति दीर्घोऽलोन्त्यपरिभाषया शाम्यतीत्यादावन्त्यस्यैव स्यात् । नचाक्षरसमाम्नायिकेषु विवृतत्वप्रतिज्ञासामर्थ्यादिव धात्वादिस्थेष्वपि तत्कार्य्यप्रवृत्तिरिति वाच्यम्, 'अक:सवर्ण' इत्यादौ ककारादिलिङ्गेन अकारादौ अक्षरसमाम्नायिकत्त्व प्रत्यभिज्ञावलेन दीर्घादिग्रहणार्थतया चारितार्थ्यसम्भवे ज्ञापकत्त्वासम्भवात् ।

(धात्वादिषु विवृतत्वप्रतिज्ञाबाधकभाष्यम्)

आचार्यप्रवृत्तिर्ज्ञापयति – भवत्याक्षरसमाम्नायिकेन धात्वादिस्थस्य ग्रहणमिति । यदयम् "अकः सवर्णे दीर्घः" इति प्रत्याहारेऽको ग्रहणं करोति ।।

कथं कृत्वा ज्ञापकम् ? ।

नहि द्वयोराक्षरसमाम्नायिकयोर्युगपत्समवस्थानमस्ति ।।

(धात्वादिषु विवृतत्वप्रतिज्ञासाधकभाष्यम्)

नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ।।

किम् ?

यस्याक्षरसमाम्नायिकेन ग्रहणमस्ति तदर्थमेतत्स्यात् – 'खट्वाढकं' 'मालाढक' मिति । सति प्रयोजने न ज्ञापकं भवति । तस्माद्विवृतोपदेशः कर्तव्यः ।।

विमला – तस्माद्विवृतोपदेशः **कर्त्तव्य** इति 'अ अ' इति सूत्रस्य, इह शास्त्रे यावानकारः स सर्वोऽपि विवृत इति सामान्यापेक्षज्ञापकत्वमङ्गीकार्य्यमिति भावः ।

(आक्षेपभाष्यम्)

क एष यत्नश्चोद्यते[१], विवृतोपदेशो नाम । विवृतो वोपदिश्येत, संवृतो वा । कोन्वत्र विशेषः ?

विमला – लाघवादिनाऽन्यथाप्राप्तस्य विपरीतोच्चारणाय हि यत्नश्चोदनीयो भवति, धात्वादौ विवृतसंवृतयोरन्यतरोच्चारणे तु न किञ्चिल्लाघवमस्तीति प्रकृते चोदनायाः काऽपेक्षेति प्रष्टुराकूतम् ।

(समाधानभाष्यम्)

स एष सर्व एवमर्थो यत्नः क्रियते । यान्येतानि प्रातिपदिकान्यग्रहणानि तेषामेतेनाभ्युपायेनोपदेशश्चोद्यते, तद् गुरु भवति । तस्माद्वक्तव्यम् – 'धात्वादिस्थश्च विवृत' इति ।

---

१. गौरवं भवतीति किमुच्यते इत्यर्थः ।

विमला – एवमर्थ इति । एवम् एतत्प्रकारकोऽर्थः प्रयोजनं यस्येति बहुव्रीहिः । **एतेनाभ्युपायेनेति** । तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः कर्त्तव्य इत्यादि ग्रन्थप्रदर्शितप्रकारेणेत्यर्थः । **तदिति** । यत इत्यध्याहारः, यतस्तत् सर्वोच्चारणम् । **गुर्विति** । इदमुपलक्षणम्; असम्भवश्चेत्यस्यापि । अयम्भावः, अग्रहणप्रातिपदिकादि-घटकाकारेषूच्चार्य विवृत्वबोधनस्यासम्भवात्तदर्थमग्रहणप्रातिपदिकघटकाकारो विवृत इति रीत्यैव विवृतत्वम्बोधनीयमिति तदपेक्षया लाघवेन प्रातिपदिकघटकाकारो धातुघटकाकारश्च विवृत इति रीत्या सामान्यशब्देनैव विवृतत्वम्प्रतिज्ञेयम् । एवञ्च धात्वादौ संवृतमेव पाठ्यम् । विवृतत्वन्तु तस्य पूर्वोक्तसामान्यप्रतिज्ञयैवावगन्तव्यमिति न लेशतोऽपि गौरवसम्भावनाऽपीति ।

(२७-एकदेशिनः प्रयोजनान्तरवार्तिकम्-३)

।।*।। *दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः* ।।*।।

(व्याख्याभाष्यम्)

दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थो विवृतोपदेशः कर्त्तव्यः । दीर्घप्लुतौ संवृतौ मा भूतामिति । वृक्षाभ्याम् देवदत्ता ३ इति ।

विमला – दीर्घप्लुतवचने चेति । दीर्घप्लुतौ उच्येते यत्र प्रयोग इत्यर्थः, अधिकणे ल्युट् ।

(निराकरणभाष्यम्)

नैष दोषः[१] । नैव लोके न च वेदे दीर्घप्लुतौ संवृतौ स्तः । कौ तर्हि ? विवृतौ ।। यौ स्तस्तौ भविष्यतः ।।

(एकदेशिप्रयोजनसाधकभाष्यम्)

'स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणम्' । संवृतः स्थानी, संवृतौ दीर्घप्लुतौ प्रकल्पयेत् । 'अनुस्वारो यथा यणम्' । तद्यथा – सँय्यन्ता सँव्वत्सरः यँल्लोकं तँल्लोकमिति – अनुस्वारः स्थानी यणमनुनासिकं प्रकल्पयति ।।

---

१. 'नैष दोषः' इति क्वचिन्नास्ति ।

(प्रयोजननिराकरणभाष्यम्)

विषम[१] उपन्यासः। युक्तं यत्सतस्तत्र प्रक्लृप्तिर्भवति। सन्ति हि यणः सानुनासिका निरनुनासिकाश्च। दीर्घप्लुतौ पुनर्नैव लोके नैव च वेदे संवृतौ स्तः। कौ तर्हि? विवृतौ। यौ स्तस्तौ भविष्यतः॥

(आक्षेपभाष्यम्)

एवमपि कुत एतत् - तुल्यस्थानौ प्रयत्नभिन्नौ भविष्यतः, न पुनस्तुल्यप्रयत्नौ स्थानभिन्नौ स्याताम् ईकार ऊकारौ वेति?

(समाधानभाष्यम्)

वक्ष्यति "स्थानेऽन्तरतमः" इत्यत्र स्थान इत्यनुवर्तमाने, पुनः स्थानेग्रहणस्य प्रयोजनम्- 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयो भवति' इति॥

इति विवृतत्वप्रतिज्ञानिरूपणम्

(वर्णसमाम्नाये जातिपक्षाधिकरणम्)

(२८-पूर्वपक्ष्याक्षेपवार्तिकम्)

॥॥ तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमानणत्वात् ॥*॥*

(व्याख्याभाष्यम्)

तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति - 'अस्य च्वौ' 'यस्येति च'॥ किं कारणम्?

---

१. दृष्टान्तदार्ष्टान्तिकयोरस्त्यत्र महद्वैषम्यमित्यर्थः।

अनण्त्वात् । न ह्येतेऽणो येऽनुवृत्तौ । के तर्हि ? येऽक्षरसमाम्नाये उपदिश्यन्ते ।।

विमला – तत्रानुवृत्तिनिर्देश इति । प्रत्याहारमद्वारीकृत्य लक्ष्यसंस्कारकबोधजनकनिर्देश इत्यर्थः । **सवर्णाग्रहणमनण्त्वादिति** । प्रत्युच्चारणं वर्णानां भेदेन ''**अस्यच्वौ**''वित्यादावकारादेर्वर्णसमाम्नायाघटकत्वेनाण्पदबोध्यत्वाभावेन सवर्णग्राहकत्वन्न स्यात् ।

(२९-एकदेशिसमाधानवार्तिकम्-२)

।।*।। एकत्वादकारस्य सिद्धम् ।।*।।

(व्याख्याभाष्यम्)

एकोऽयमकारो, यश्चाक्षरसमाम्नाये, यश्चानुवृत्तौ, यश्च धात्वादिस्थः ।

(३०-आक्षेपवार्तिकम्-३)

।।*।। अनुबन्धसंकरस्तु ।।*।।

(व्याख्याभाष्यम्)

अनुबन्धसङ्करस्तु प्राप्नोति । 'कर्मण्यण्' 'आतोऽनुपसर्गे कः' इति केऽपि णित्कृतं प्राप्नोति ।।

(३१-द्वितीयाक्षेपवार्तिकम्-४)

।।*।। एकाजनेकाज्ग्रहणेषु चानुपपत्तिः ।।*।।

(व्याख्याभाष्यम्)

एकाजनेकाज्ग्रहणेषु चानुपपत्तिर्भवति ।। तत्र को दोषः ? 'किरिणा' 'गिरिणे'त्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोति । इह च 'घटेन तरति घटिक' इति द्व्यज्लक्षणष्ठंन् न प्राप्नोति ।।

(३२-तृतीयाक्षेपवार्तिकम्-५)

॥*॥ *द्रव्यवच्चोपचाराः* ॥*॥

(भाष्यम्)

द्रव्यवच्चोपचाराः प्राप्नुवन्ति । तद्यथा – द्रव्येषु नैकेन घटेनाऽनेको युगपत्कार्यं करोति । एवमिममकारं नाऽनेको युगपदुच्चारयेत् ॥

(३३-प्रथमाक्षेपनिराकरणवार्तिकम्-६)

॥*॥ *विषयेण तु नानालिंगकरणात्सिद्धम्* ॥*॥

(व्याख्याभाष्यम्)

यदयं विषये विषये नानालिङ्गमकारं करोति – "कर्मण्यण्" "आतोऽनुपसर्गे क" इति । तेन ज्ञायते- नानुबन्धसङ्करोऽस्तीति । यदि हि स्यात् नानालिङ्ग-करणमनर्थकं स्याद्, एकमेवाऽयं सर्वगुणमुच्चारयेत् ॥

(ज्ञापकनिराकरणभाष्यम्)

नैतदस्ति ज्ञापकम् । इत्संज्ञाप्रक्लृप्त्यर्थमेतत्स्यात् । न ह्ययमनुबन्धैः शल्यकवच्छक्य उपचेतुम् । इत्संज्ञायां हि[1] दोषः स्याद् । आयम्य हि द्वयोरित्संज्ञा स्यात् ॥

कयोः ?

आद्यन्तयोः ॥

विमला – शल्यकवदिति । शल्यको नाम सर्वाङ्गव्याप्तकण्टकः प्राणिविशेषः ।

(आक्षेपनिराकरणवार्तिकव्याख्यान्तरभाष्यम्)

एवं तर्हि –

---

१. 'तु' इति पाठान्तरम् ।

* विषयेण तु[1] पुनर्लिङ्गकरणात्सिद्धम् *

यदयं विषयेविषये पुनर्लिङ्गमकारं करोति – 'प्राग्दीव्यतोऽण्' 'शिवादिभ्योऽण्' इति, तेन ज्ञायते – 'नानुबन्धसङ्करोऽस्ती' ति । यदि हि स्यात्पुनर्लिङ्गकरणमनर्थकं स्यात् ।

(प्रथमव्याख्याभ्युपगमभाष्यम्)

अथवा पुनरस्तु –

* विषयेण तु नानालिङ्गकरणात्सिद्धम् * इत्येव ।

(ज्ञापकनिराकरणस्मारणभाष्यम्)

ननु चोक्तम् – 'इत्संज्ञाप्रक्लृप्त्यर्थमेतत् स्याद्'- इति ।।

(ज्ञापकसाधकभाष्यम्)

नैष दोषः । लोकत एतत्सिद्धम् । तद्यथा लोके कश्चिदेवं देवदत्तमाह-'इह मुण्डो भव', 'इह जटिलो भव', 'इह शिखी भवे' ति, यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपतिष्ठते । एवमयमकारो यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपस्थास्यते ।

(खण्डनाय द्वितीयाक्षेपानुवादभाष्यम्)

यदप्युच्यते – एकाजनेकाज्ग्रहणेषु चानुपपत्तिः इति ।।

(३४-द्वितीयाक्षेपनिराकरणवार्तिकम्-७)

।।।। एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात् ।।*।।*

---

१. 'तु' इति क्वचिन्नास्ति ।

(व्याख्याभाष्यम्)

एकाजनेकाज्ग्रहणेषु चावृत्तेः संख्यानादनेकाचूत्त्वं भविष्यति । तद्यथा – 'सप्तदश सामिधेन्यो भवन्ति' इति, 'त्रिःप्रथमामन्वाह त्रिरुत्तमाम्' इत्यावृत्तितः सप्तदशत्वं भवति । एवमिहाप्यावृत्तितोऽनेकाचूत्वं भविष्यति ।।

(आक्षेपभाष्यम्)

भवेदावृत्तितः कार्यं परिहृतम् । इह तु खलु 'किरिणा' 'गिरिणे'त्येकाजूलक्षणमन्तोदात्तत्वं प्राप्नोत्येव ।।

(एकत्ववादि समाधानभाष्यम्)

एतदपि सिद्धम् ।।

कथम् ?

लोकतः । तद्यथा[1] - ऋषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो दत्त्वा तया सर्वे ते सहस्रदक्षिणास्सम्पन्नाः । एवमिहाप्यनेकाऽचूत्वं भविष्यति ।

विमला – सहस्रदक्षिणा इति । सहस्रदक्षिणत्वन्तु वित्तेन क्रीत्वा क्रीत्वा पुनःपुनर्दानेनैवोपपादनीयः, न तु परस्परं दानेन, गोसहस्रसत्रे दीक्षितस्य "**न कर्मणि कर्म्मारम्भ**" इति निषेधेन प्रतिग्रहीतृत्वासम्भवात् । एवञ्च तत्र ऋषिसहस्रेषु सहस्रदक्षिणत्वव्यवहारबलेन "**गौण्यप्युत्तरा संख्या पूर्वां संख्यां बाधत**" इति बाध्यबाधकभावस्य कल्पनीयतया किरिणा गिरिणेत्यादावावृत्तितोऽनेकाच्त्वे सम्पादितेनैकाच्त्वनिबन्धनमन्तोदात्तत्वमितिभावः ।

(तृतीयाक्षेपनिराकरणभाष्यम्)

यदप्युच्यते-द्रव्यवच्चोपचाराः प्राप्नुवन्तीति ।। भवेद् यदसंभवि कार्यं तन्नानेको युगपत्कुर्यात् । यत्तु खलु संभवि कार्यमनेकोऽपि तद्युगपत्करोति । तद्यथा–घटस्य

१. 'तद्यथा लोके' इति पाठान्तरम् ।

दर्शनं स्पर्शनं वा । संभवि चेदं कार्यमकारस्योच्चारणं नाम । अनेकोऽपि तद्युगपत्करिष्यति ।।

(३५-पूर्वपक्षिसंमतनानात्वसाधकवार्तिकम्-८)

।।।। आन्यभाव्यं तु कालशब्दव्यवायात् ।।*।।*

(व्याख्याभाष्यम्)

आन्यभाव्यं त्वकारस्य ।। कुतः ? कालशब्द-व्यवायात् । कालव्यवायाच्छब्दव्यवायाच्च । काल-व्यवायात्-'दण्ड अग्रम्' । शब्दव्यवायाद्-'दण्डः' । नचैकस्यात्मनो व्यवायेन भवितव्यम् । भवति चेद्भवत्यान्यभाव्यमकारस्य ।।

विमला – नन्वकार: कदाचिदुपलभते मध्ये व्यञ्जकाभावान्नोपलभते पुनर्व्यञ्जक-सद्भावादुपलभत इत्युपलब्ध्योरेव कालेन शब्देन वा व्यवधानं नाकारस्य, उपलब्ध्यो-र्व्यवधानन्तु न विषयस्य भेदसाधक: प्रदीपसन्निधानादुपलब्धस्य, मध्ये तदसन्निधाना-दनुपलब्धस्य पुनस्तत्सन्निधानेनोपलब्धस्य घटस्य भेदाप्रतीते: किन्तूपलब्ध्योरेवेति चेन्न, उदात्तत्वानुदात्तत्वादिविरुद्धधर्म्माध्यासेनाकारादौ भेदानुमितिसम्भवात् ।

(३६-नानात्वहेतुवार्तिकम्-९)

।।।। युगपच्च देशपृथक्त्वदर्शनात् ।।*।।*

(व्याख्याभाष्यम्)

युगपच्च देशपृथक्त्वदर्शनान्मन्यामहे-'आन्यभाव्य-मकारस्ये' ति । यदयं युगपद्देशपृथक्त्वेषूपलभ्यते – अश्वः, अर्कः अर्थ इति । न ह्येको देवदत्तो युगपत्स्रुघ्ने च भवति मथुरायां च ।।

विमला – **युगपच्चेति** । एककालावच्छेदेन नानादेशेषूपलब्धिरेवाकारादौ नानात्वसाधिकेति भाव: ।

(एकत्ववादिशेषपूरणभाष्यम्)

यदि पुनरिमे वर्णाः –

(३७-वर्णैकत्ववादिन एकत्वसाधकवार्तिकम् - १०)

॥॥ शकुनिवत्स्युः ॥*॥*

(व्याख्याभाष्यम्)

तद्यथा – शकुनय आशुगामित्वात्पुरस्तादुत्पतिताः पश्चाद्दृश्यन्ते । एवमयमकारो 'द' इत्यत्र दृष्टो 'ऽड' इत्यत्र दृश्यते ॥

विमला – शकुनिवत्स्युरिति । शकुनय इवाकारोप्युत्प्लुत्योप्लुत्य गच्छतीत्यंशे नायं दृष्टान्तः, वर्णानां विभुत्वेनेतस्ततो गमनासम्भवात् । किन्तु नानादेशेषूपलब्धि-र्भेदसाधिका न भवत्येतावन्मात्रे दृष्टान्तः । **इदमत्रालोचनीयम्** – यथा शतहस्तपरिमित-दण्डस्य मूलावच्छेदेनाग्रावच्छेदेन चालोकसंयोगो यदा भवति तदा देशभेदेन दण्डस्योपलब्धिर्भवति । न च तत्रास्ति दण्डे भेदः । तथैव वर्णस्याऽपि विभोर्युगपन्नानादेशेषु व्यञ्जकध्वनिसन्निधानादेव नानादेशेषूपलब्धिर्भविष्यतीति नैतावता वर्णस्य नानात्वं साधयितुमीष्टे । उदात्तत्वाऽनुदात्तत्वादिविरुद्धधर्माध्यासोऽपि नाकारादिवर्णे भेदसाधनाय प्रभवति तस्य तत्तद्ध्वनिधर्मत्वाभ्युपगमात् । न च तस्य ध्वनिधर्मत्वे "**अकारोऽनुदात्तः**" इत्यादि व्यवहारविलयप्रसङ्ग इति वाच्यम्, जपाकुसुमसन्निधाने 'रक्तः स्फटिक' इति व्यवहारवदेवान्यदीयरूपेणैव तादृशव्यवहारसम्भवात् । नचान्यदीयरूपेणा-कारादेर्भाने स्फटिकस्येवाकारादिवर्णस्याऽपि संसर्गाऽनित्यत्वप्रसङ्ग इति वाच्यम् । यतोहि न केवलमन्यदीयरूपेण भानं संसर्गाऽनित्यत्वापादकं किन्तु स्वरूपम्परिभूयान्यदीय-रूपेण भानमेव तथा । अन्यथा "**नीलं नभः**" इति नभसोऽप्यन्यदीयरूपेण भानादनित्यत्वापत्तिः । तथा स्वीकारे च नभसो रूपाभावेन तत्परिभूयान्यदीयरूपेण भानासम्भवेन न तस्यानित्यत्वम्, स्फटिकस्य तु स्वगतश्वेतरूपम्परिभूय जपाकुसुमरूपेण भानं सम्भवतीति तस्यानित्यत्वमित्युपपद्यते । तथा च वर्णस्यापि रूपाभावेनान्यदीयरूपेण भानेऽपि 'नभ' इव नित्यत्वे न किञ्चिद्बाधकम् ॥

(नानात्ववादिभाष्यम्[1])

नैवं शक्यम् । अनित्यत्वमेवं स्यात् । नित्याश्च शब्दाः । नित्येषु च शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । यदि चायं 'द' इत्यत्र दृष्टो 'ण्ड' इत्यत्र दृश्येत, नायं कूटस्थः स्यात् ।।

विमला – शकुनिवत्स्युरिति दृष्टान्तबोधकवाक्यस्याऽक्षरार्थानुसारेणाऽऽशङ्कते – नैवं शक्यमिति । अनित्यत्वमेवं स्यादिति ।

(एकत्ववादिनो वार्तिकशेषपूरणभाष्यम्)

यदि पुनरिमे वर्णाः –

(३८-एकत्ववादिमतवार्तिकम्[2]-११)

|||| आदित्यवत्स्युः ||*||*

(व्याख्याभाष्यम्)

तद्यथा एक आदित्योऽनेकाधिकरणस्थो युगपद्देशपृथक्त्वेषूपलभ्यते ।।

विमला – शङ्कानुसारेणोत्तरयति यदि पुनरिमे वर्णाः 'आदित्यवत्स्युरिति ।

(नानात्ववादि जातिस्फोटवादिभाष्यम्)

विषम उपन्यासः – नैको द्रष्टा आदित्यमनेकाधिकरणस्थं युगपद्देशपृथक्त्वेषूपलभते । अकारं पुनरुपलभते ।।

(एकत्ववादिमीमांसकमतानुयायिभाष्यम्)

अकारमपि नोपलभते । किं कारणम् ? 'श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशःशब्दः' । एकं च पुनराकाशम् ।।

---

१. जात्येकत्ववादिभाष्यम् ।   २. मीमांसकमतसाधनाय ।

विमला – **श्रोत्रोपलब्धिरिति** । उपलभ्यतेऽनेनेत्युपलब्धिः, करणे क्तिन् । श्रोत्रम्-उपलब्धिर्यस्येति बहुव्रीहिः, श्रोत्रकरणकसाक्षात्कारविषय इत्यर्थः । **बुद्धिनिर्ग्राह्य इति** । **प्रयोगेणाभिज्वलित इति** । प्रयुज्यत इति प्रयोगो वैखरीनादस्तेनाभिव्यक्त इत्यर्थः । **आकाशदेश इति** । आकाशो देशो यस्य स तथोक्तः, आकाशमात्र-वृत्तिरित्यर्थः । एते च चत्वारः खले कपोतन्यायेन शब्दे विशेषणम् । इदन्तु बोध्यम् । आत्माऽवृत्तिविशेषगुणानां स्व सजातीयगुणाऽसामानाधिकरण्यनियमात् । यथा-एकस्मिन् घटे न नानारूपादयस्तथैवाकाशेऽपि न नानाशब्दाः किन्त्वेक एव व्याप्यवृत्तिः । कत्वादिकम्, उदात्तत्वादिकम्, ह्रस्वत्वादिकञ्च सर्वे व्यञ्जकध्वनिधर्मा एव स्फटिकादौ जपाकुसुमरक्तिमेव शब्दे प्रतिभासन्ते इति न कुत्रापि वर्णे कस्यापि वर्णस्य भेदः, भाष्येऽकारस्येत्युपलक्षणं ककारादीनामपि । तत्रैतावान्विशेषः ककारादिभ्योऽकारस्य परमार्थतो भेदाभावेऽपि ककाराद्यभिव्यक्तिजनकवायुसंयोगादीनामकाराद्यभिव्यक्तिजनक-वायुसंयोगाद्यपेक्षया विजातीयत्वेन ककारादिभेदोऽकरादौ संलक्ष्यते इति ककारादौ नाण्त्वग्रहः वर्णसमाम्नायस्थाकाराद्यभिव्यक्तिजनकवायुसंयोगाद्यपेक्षया ''**अस्य च्वा**''-विति सूत्रस्थाकाराद्यभिव्यक्तिजनकवायुसंयोगादीनां सजातीयत्वेन तयो र्भेदज्ञानस्याप्यभावेन तत्सूत्रस्थाकारेऽण्त्वग्रहः सुलभ इति ।

(नानात्ववादिजातिस्फोटवादिभाष्यम्)

आकाशदेशा अपि बहवः । यावता बहवः, तस्मादान्यभाव्यमकारस्य ।।

(३९-सिद्धान्तसमाधानवार्तिकम्-१२)

।।*।। *आकृतिग्रहणात्सिद्धम्* ।।*।।

(व्याख्याभाष्यम्)

अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिः, तथोवर्णाकृतिः ।।

विमला – **आकृतिग्रहणात्सिद्धमिति** । सर्वत्रप्रदेशे कण्ठादिजन्यतावच्छेदिका दीर्घप्लुतसाधारणी जातिः निर्दिश्यते सा च जातिराश्रयतया सर्वमेवावर्णकुलं ग्रहीष्यतीति, ''**अस्य च्वौ**'' इत्यादौ न दोष इति भावः । न च दीर्घादिसाधारणव्यापकजातिनिर्देशे ''**दीर्घादीनामनण्त्वेन सवर्णग्राहकत्वं नास्ती**'' ति सिद्धान्तो व्याकुप्येत इति वाच्यम्,

व्यक्तिपक्षाभिप्रायेण तथाभिधानात् । जातिपक्षे तु-अण्ग्रहणप्रत्याख्यानस्यैव वक्ष्यमाणतयाऽनण्त्वेन सवर्णग्राहकत्वन्नेत्यसङ्गतमेव । न च जातिपक्षादरेऽपि ''**उपसर्गादृतिधाता**'' वित्यादौ–ऋकारेण लृवर्णग्रहणायाऽण्ग्रहणस्यावश्यकत्वम् । न च ''**ऋलृवर्णयो**'' रितिसावर्ण्यविधानसामर्थ्यादेव तद्ग्रहणमिति वाच्यम् । ''**अकः सवर्ण**'' इति दीर्घविधानेनैव तस्य कृतार्थत्वादिति वाच्यम्, जाति पक्षे सावर्ण्यवचनस्थाने लृवर्णस्य-ऋवदितिकरणेन लृकारे ऋत्वजात्यतिदेशेनादोषात् । अत्र पक्षेऽण्ग्रहणप्रत्याख्यानेऽपि योगविभागेन विधेयीभूतेनाकारादिना दीर्घादिग्रहणनिषेधार्थम् ''**अप्रत्यय**'' इति कर्त्तव्यमेवेति ''**त्यदादीनाम**'' इत्यादौ न दोषः ।

(सिद्धान्तसाधकवार्तिकद्वितीयखण्डम्-१२)

।।*।। *तद्वच्च तपरकरणम्* ।।*।।

(व्याख्याभाष्यम्)

एवं च कृत्वा तपराः क्रियन्ते – आकृतिग्रहणेनाऽतिप्रसक्तमिति ।।

(ज्ञापकता-सिद्धान्तदूषकभाष्यम्)

ननु च सवर्णग्रहणेनाऽतिप्रसक्तमिति कृत्वा तपराः क्रियेरन् ।।

(सिद्धान्तदूषकभाष्यम्)

प्रत्याख्यायते तत् * सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वाच्च * इति ।।

(४०-आकृतिवादिनः सिद्धान्तवार्तिकम्-१३)

।।*।। *हल्ग्रहणेषु च* ।।*।।

(व्याख्याभाष्यम्)

किम्[1] ? ।। "आकृतिग्रहणात्सिद्धम्" इत्येव । 'झलोझलि' । अवात्ताम् अवात्तम् अवात्त । अत्रैतन्नास्ति[2] – अण् सवर्णान्गृह्णाति-इति ।।

---

१. इतः पूर्वं 'हल्ग्रहणेषु च ।' इति योजनीयम्, यश्च पाठः क्वचिदपि नोपलभ्यते ।

२. 'यत्रैतन्नास्ति' इति पाठभेदः ।

(४१-सिद्धान्तसमाधानवार्तिकम्-१८)

।।*।। रूपसामान्याद्वा ।।*।।

(व्याख्याभाष्यम्)

रूपसामान्याद्वा सिद्धमेतत् । तद्यथा – 'तानेव शाटकानाच्छादयामः, ये मथुरायाम्' 'तानेव शालीन् भुञ्ज्महे, ये मगधेषु' 'तदेवेदं भवतः कार्षापणं यन्मथुरायां गृहीतम्' । अन्यस्मिंश्चाऽन्यस्मिन् रूपसामान्यात् 'तदेवेदम्' इति भवति । एवमिहापि रूपसामान्यात्सिद्धम् ।।१।।

(शिवसूत्रम्)

ऋलृक् ।।२।।

(वार्तिकावतरणाय आक्षेपभाष्यम्)

अथ लृकारोपदेशः किमर्थः ? ।।

विमला – ऋलृक् । किमर्थ इति । ग्रहणकशास्त्रबलेन दीर्घादीनामिव ऋकारेण-लृकारस्याऽपि ग्रहणम्भविष्यतीति नार्थ लृकारोपदेशेन । न च भिन्नस्थानतया सावर्ण्यविरहादग्रहणमिति वाच्यम्, प्राल्कारीयतीत्यादौ "वासुप्यापिशले" रित्यस्य प्रवृत्त्यर्थमृकारलृकारयोर्वाचनिकसावर्ण्यबोधनस्यावश्यकत्वादिति: प्रश्नाशय: ।

(आक्षेपबाधकभाष्यम्)

किं विशेषेण लृकारोपदेशश्चोद्यते, न पुनरन्येषामपि वर्णानामुपदेशश्चोद्यते ? यदि किंचिदन्येषामपि वर्णानामुपदेशे प्रयोजनमस्ति लृकारोपदेशस्यापि तद् भवितुमर्हति । को वा विशेषः ?

(विशेषप्रदर्शनाय आक्षेपसाधकभाष्यम्)

अयमस्ति विशेषः । अस्य हि लृकारस्याल्पीयांश्चैव प्रयोगविषयः । यश्चापि प्रयोगविषयः सोऽपि

क्लृपिस्थस्यैव । कृपेश्च लत्वमसिद्धम् । तस्याऽसिद्धत्वादृकारस्यैवाऽच्कार्याणि भविष्यन्ति । नार्थ लृकारोपदेशेन ।।

विमला – ननु व्यक्तिपक्षे सावर्ण्यवचनस्याऽनित्यत्वज्ञापनार्थम्, जातिपक्षे चाण्ग्रहणप्रत्याख्यानात्प्राल्कारीयतीत्यादौ वृद्धिसम्पादनार्थतया कृतस्य ''**लृवर्णस्य ऋवदि**'' ति-लृकारे-ऋत्वजात्यतिदेशविधायकस्य वचनस्यानित्यत्वबोधनार्थञ्च तदुपदेशोऽस्तु, एवञ्च पत्लृप्रभृतिषु ''**नाग्लोपी**'' ति न ह्रस्व निषेधः । लृकारस्येत्संज्ञा चोपपद्यत इति वर्णान्तरोपदेशस्येव-लृकारोपदेशस्यापि प्रयोजनं सम्भवतीत्यत आह – ''**अयमस्ति विशेष इति**'' । लत्वस्यासिद्धत्वादेव प्राल्कारीयतीत्यत्र वृद्धिः । ''**पुषादि द्युताद्य् लृदित**'' इति निर्देशादित्संज्ञानुवादेन–अङ्विधानसामर्थ्याच्च गम्लृप्रभृतीनाम् लृकारस्येत्संज्ञा, पृथगनुबन्धकरणाच्च-ऋदित्वप्रयुक्तकार्य्यस्य-लृदित्वप्रयुक्तकार्यस्य चासांकर्य्यमपि भविष्यतीति लृकारोपदेशो न कर्त्तव्य इति भावः ।

(वार्तिकावतरणभाष्यम्)

अत उत्तरं पठति –

(४२-समाधानवार्तिकम्-१)

।।*।। लृकारोपदेशो यदृच्छाऽशक्तिजानुकरणप्लुत्याद्यर्थः ।।*।।

(व्याख्याभाष्यम्)

लृकारोपदेशः क्रियते यदृच्छाशब्दार्थोऽशक्तिजानुकरणार्थः, प्लुत्याद्यर्थश्च ।।

यदृच्छाशब्दार्थस्तावत्–यदृच्छया कश्चिद् लृतको नाम । तस्मिन्नच्कार्याणि यथा स्युः – दध्य्लृतकाय देहि मध्वलृतकाय देहि, उदङ्ङ्लृतकोऽगमत्, प्रत्यङ्ङ्लृतकोऽगमत् । चतुष्टयी शब्दानां प्रवृत्तिः – जातिशब्दा, गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चतुर्थाः ।।

विमला – यदृच्छाशब्दार्थ इति । प्रकृत्याद्यनपेक्षायाम् एकस्यां व्यक्तौ परिभाषितः शब्दो यदृच्छाशब्दस्तत्र च ''**कृपोरोलः**'' इति लत्वाभावेन लत्वासिद्ध्या-ऋकार-बुध्याऽच्कार्योपपादनस्य वक्तुमशक्यतया दध्य्लृतकाय देहीत्यत्र यण्सम्पत्तये लृकारोपदेशः कर्त्तव्य इति भावः ।।

(भाष्यम्)

अशक्तिजाऽनुकरणार्थः – अशक्त्या कयाचिद् ब्राह्मण्या, 'ऋतक' इति प्रयोक्तव्ये 'लृतक' इति प्रयुक्तम् । तस्याऽनुकरणं 'ब्राह्मण्यलृतक इत्याह', कुमार्य्लृतक इत्याहेति ।

(भाष्यम्)

प्लुत्याद्यर्थश्च लृकारोपदेशः कर्त्तव्यः ।। के पुनः प्लुत्यादयः ? ।।

प्लुतिद्विर्वचनस्वरिताः । क्लृ३प्तशिखः । क्लृप्प्तः । प्रक्लृप्तः । प्लुत्यादिषु कार्येषु कृपेर्लत्वं सिद्धम् । तस्य सिद्धत्वादचृकार्याणि न सिद्ध्यन्ति । तस्माद् लृकारोपदेशः क्रियते ।।

विमला – कृपेर्लत्वं सिद्धमिति । न च ''**कृपोरोल**'' इति सूत्रम् ''अ अ'' इत्यस्मात्पूर्वमेव पाठ्यम्, एवञ्च प्लुत्यादिकम्प्रत्यपि लत्वस्यासिद्धतया-लृकारबुद्ध्यैव प्लुत्यादिकम्भविष्यतीति न कोऽपि दोष इति वाच्यम्, - एवं सति ''**ग्रो यङी**'' । त्यस्याप्युत्कर्षापत्त्या तस्यासिद्धत्वात् । निजेगिल्यते इत्यत्र ''**हलि चे**'' ति दीर्घापत्तेः । **अच्कार्याणि न सिद्ध्यन्तीति** । न च सवर्णग्राहकताबलेनैव प्लुतादिकम्भविष्यतीति वाच्यम्, तथा सति अनृत इति निषेधादेव प्लुतत्वाप्राप्तेः ।

(अथ प्रयोजननिराकरणवार्तिकावतरणभाष्यम्)

नैतानि सन्ति प्रयोजनानि ।

(४३-प्रयोजनप्रत्याख्यानवार्तिकम्-२

।।*।। न्याय्यभावात्कल्पनं संज्ञादिषु ।।*।।

(व्याख्याभाष्यम्)

न्याय्यस्य ऋतकशब्दस्य भावात् कल्पनं संज्ञादिषु – साधु मन्यन्ते – ऋतक एवासौ, न लृतक इति ।।

(व्याख्यान्तरभाष्यम्)

अपर आह – न्याय्य ऋतकशब्दः शास्त्रान्वितोऽस्ति । स कल्पयितव्यः साधुः संज्ञादिषु – ऋतक एवासौ, न लृतकः ।।

(प्रत्याख्यानबाधकभाष्यम्)

अयं तर्हि यदृच्छाशब्दोऽपरिहार्यः – लृफिडः लृफिड्डश्चेति ।।

(प्रत्याख्यानसाधकभाष्यम्)

एषोऽपि ऋफिडः, ऋफिड्डश्च । कथम् ? । अर्तिप्रवृत्तिश्चैव हि लोके लक्ष्यते । फिडफिड्डावौणादिकौ प्रत्ययौ ।। त्रयी च शब्दानां प्रवृत्तिः – जातिशब्दा गुणशब्दाः क्रियाशब्दा इति । न सन्ति यदृच्छाशब्दाः ।।

विमला – अर्त्तेरिति ऋधातोः । **प्रवृत्तिरिति** । प्रकृतित्वेन प्रवृत्तिरित्यर्थः । एवकारो भिन्नक्रमः । चकारोऽपि भिन्नक्रमोऽप्यर्थकः तथा च ऋधातोः प्रकृतित्वेन प्रवृत्तिर्लोकेऽपि लक्ष्यत एवेति समुदितार्थः ।

(प्रयोजनवादिभाष्यम्)

अन्यथा कृत्वा प्रयोजनमुक्तम्, अन्यथा कृत्वा परिहारः । 'सन्ति यदृच्छाशब्दा' इति कृत्वा प्रयोजनमुक्तम्, 'न सन्ती'ति परिहारः । समाने चाऽर्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्तको भवति । तद्यथा देवदत्तशब्दो 'देवदिण्ण'शब्दं निवर्तयति, न गाव्यादीन् ।।

(प्रत्याख्यानभाष्यम्)

नैष दोषः । पक्षान्तरैरपि परिहारा भवन्ति ।।

इति यदृच्छाशब्दनिराकरणम्

(४४-द्वितीयप्रयोजनप्रत्याख्यानवार्तिकम्-३)

।।*।। अनुकरणं शिष्टाऽशिष्टाऽप्रतिषिद्धेषु यथा लौकिकवैदिकेषु ।।*।।

(व्याख्याभाष्यम्)

अनुकरणं हि शिष्टस्य वा साधु भवति । अशिष्टाप्रतिषिद्धस्य वा, नैव तद्दोषाय भवति, नाऽभ्युदयाय ।। 'यथा लौकिकवैदिकेषु' । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु । लोके तावद् – य एवमसौ ददाति, य एवमसौ यजते, य एवमसावधीते, इति । तस्याऽनुकुर्वन् दद्याच्च यजेत चाऽधीयीत च सोऽप्यभ्युदयेन युज्यते ।। वेदेऽपि – "य एवं विश्वसृजं सत्त्राण्यध्यासते" इति, तेषामनुकुर्वन् तद्वत्सत्त्राण्यध्यासीत । सोऽप्यभ्युदयेन युज्यते ।। अशिष्टाऽप्रतिषिद्धं यथा – य एवमसौ हिक्कति, य एवमसौ हसति, य एवमसौ कण्डूयतीति । तस्यानुकुर्वन् हिक्केच्च हसेच्च कण्डूयेच्च, नैव तद्दोषाय स्यान्नाऽभ्युदयाय ।। यस्तु खल्वेवमसौ ब्राह्मणं हन्ति एवमसौ सुरां पिबतीति तस्यानुकुर्वन् ब्राह्मणं हन्यात्सुरां वा पिबेत्, सोऽपि मन्ये पतितः स्यात् ।।

(प्रयोजनसमर्थनभाष्यम्)

विषम उपन्यासः । यश्चैवं हन्ति, यश्चानुहन्ति, उभौ तौ हतः । यश्चापि पिबति, यश्चानुपिबति, उभौ तौ

पिबतः । यस्तु खल्वेवमसौ ब्राह्मणं हन्ति एवमसौ सुरां वा पिबतीति तस्यानुकुर्वन्स्नातानुलिप्तो माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात्पयो वा पिबेत्, न स मन्ये पतितः स्यात् ।।

(प्रयोजनप्रत्याख्यानशङ्काभाष्यम्)

एवमिहापि य एवमसावपशब्दं प्रयुङ्क्ते इति तस्याऽनुकुर्वन्नपशब्दं प्रयुञ्जीत, सोऽप्यपशब्दभाक् स्यात् ।।

(समाधानभाष्यम्)

अयं त्वन्योऽपशब्दपदार्थकः शब्दो, यदर्थ उपदेशः कर्त्तव्यः । न चाऽपशब्दपदार्थकः शब्दोऽपशब्दो भवति । अवश्यं चैतदेवं विज्ञेयम् । यो हि मन्यते'ऽपशब्दपदार्थकः शब्दोऽपशब्दो भवती'ति, 'अपशब्द' इत्येव तस्याऽपशब्दः स्यात् । न चैषोऽपशब्दः ।।

(प्रयोजनप्रदर्शनभाष्यम्)

अयं खल्वपि भूयोऽनुकरणशब्दोऽपरिहार्यः, यदर्थ उपदेशः कर्त्तव्यः– 'साध्वॢकारमधीते' 'मध्वॢकारमधीते' इति ।।

(खण्डनभाष्यम्)

क्वस्थस्य पुनरेतदनुकरणम् ? ।।

(समाधानभाष्यम्)

क्लृपिस्थस्य ।।

(खण्डनवादिनः प्रयोजनखण्डनभाष्यम्)

यदि क्लृपिस्थस्य, क्लृपेश्च लत्वमसिद्धम् । तस्याऽसिद्धत्वादृकार एवाऽचूकार्याणि भविष्यन्ति ।।

(प्रयोजनस्थापनभाष्यम्)

भवेत्तदर्थेन नार्थः स्यात् । अयं त्वन्यः क्लृपिस्थ-पदार्थकः शब्दो यदर्थ उपदेशः कर्त्तव्यः ।।

(खण्डनभाष्यम्)

न कर्त्तव्यः । इदमवश्यं कर्त्तव्यम् — "प्रकृतिवदनुकरणं भवति" इति । किं प्रयोजनम् ? 'द्विः पचन्त्वित्याह' । "तिङ्ङतिङः" इति निघातो यथा स्यात् । 'अग्नी इत्याह' । "ईदूदेद्द्विवचनं प्रगृह्यम्" इति प्रगृह्यसंज्ञा यथा स्यात् ।।

विमला – **प्रकृतिवदनुकरणंभ्भवतीति** । नन्वेवमपि यत्र "**गम्लृ**" घटक-लृकारमनुकृत्य साध्व्लृकारमधीत इति प्रयुङ्क्ते तत्र प्रकृतिवदित्यतिदेशेनापि लत्वा-सिद्धत्वस्योपपादयितुमशक्यतया यणनापत्तिः । न च "**पुषादिद्युताद्यलृदित**" इति निर्देशादित्संज्ञानुवादेनाङ्विधानसामर्थ्याच्च-लृकारोऽच् कार्यं लभते, इति सामान्यापेक्षज्ञापनेनैव यण् स्यादिति वाच्यम्, एवं सति "**ऋत्यक**" इति निर्देशात् "**इदितोनुम्**" इत्यनुवादाच्च-इकारोऽच्कार्य्यं लभत इति सामान्यापेक्षज्ञापनेनैव सिद्धौ-इकारोपदेशस्यापि प्रत्याख्यानप्रसङ्गादिति चेन्न, तस्य प्रयोगाभावेनासाधुतया तदनुकरणस्य सुतरामसाधुतया तत्र शास्त्राप्रवृत्तेः साधौ शास्त्राणि प्रवर्तन्त इति सिद्धान्तादिति भावः ।

(खण्डनोपसंहारभाष्यम्)

यदि- 'प्रकृतिवदनुकरणं भवती'त्युच्यते, अपशब्द एवाऽसौ भवति 'कुमार्य्लृतक इत्याह' 'ब्राह्मण्य्लृतक इत्याह' । अपशब्दो ह्यस्य प्रकृतिः ।।

(प्रयोजनभाष्यम्)

न चाऽपशब्दः प्रकृतिः । नह्यपशब्दा उपदिश्यन्ते । न चाऽनुपदिष्टा प्रकृतिरस्ति ।।

विमला – नचानुपदिष्टाप्रकृतिरस्तीति । एवञ्च कुमार्युक्तस्य प्रकृतित्वाभावेन तदनुकरणेऽपशब्दत्वस्यातिदेष्टुमशक्यतया तत्राऽच्कार्य्यप्रवृत्त्यर्थलृकारोपदेश इति भावः ।

इत्यशक्तिजानुकरणखण्डनमण्डनम् ।

(४५-तृतीयप्रयोजनप्रत्याख्यानवार्तिकम्-४)

॥*॥ एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः ॥*॥

(व्याख्याभाष्यम्)

"एकदेशविकृतमनन्यवद्भवति" इति प्लुत्यादयोऽपि भविष्यन्ति ॥

(प्रयोजनवाद्याक्षेपभाष्यम्)

यदि 'एकदेशविकृतमनन्यवद्भवति' इत्युच्येत, "राज्ञः क च" । राजकीयम् । "अल्लोपोऽनः" इति लोपः प्राप्नोति ॥

(प्रत्याख्यातृसमाधानभाष्यम्)

एकदेशविकृतमनन्यवत् षष्ठीनिर्दिष्टस्य[१] ॥

(प्रयोजनवादिभाष्यम्)

यदि–'षष्ठीनिर्दिष्टस्ये'त्युच्यते, क्लृ३प्तशिख' इति प्लुतो न प्राप्नोति । नह्यत्र ऋकारः षष्ठीनिर्दिष्टः ॥ कस्तर्हि ? रेफः ॥

(प्रयोजनप्रत्याख्यातृभाष्यम्)

ऋकारोऽप्यत्र षष्ठीनिर्दिष्टः ॥ कथम् ? अविभक्तिको निर्देशः-कृप उः रः लः "कृपो रो ल" इति ॥

१. इदं वार्तिकमिति परे ।

(प्रत्याख्यातुरेव भाष्यम्)

अथवा पुनरस्तु अविशेषेण ।।

विमला – नन्वेकदेशविकृतन्यायो यदि षष्ठी निर्दिष्टस्येत्यपेक्षेत तर्हि लौकिकत्वमेवास्य हीयेत, छिन्नपुच्छदृष्टान्तमपि न संगच्छेत, नहि तत्र षष्ठी निर्दिष्टस्यापेक्षाऽस्ति । किञ्च कर्त्तारावित्यादौ गुणे कृते "**अप्तृन्नि**" ति दीर्घो न स्यात् । नहि गुणविधौ तृन्तृचौ षष्ठीनिर्दिष्टौ अत आह – **अथवेति** ।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तं – "राज्ञः क च" राजकीयम् "अल्लोपोऽनः" इति प्राप्नोतीति ।।

(आक्षेपबाधकभाष्यम्)

नैष दोषः । वक्ष्यत्येतत् – "श्वादीनां संप्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम्" इति । तत्प्रकृतमुत्तरत्राऽनुवर्तिष्यते – "अल्लोपोऽनः" । नकारान्तस्येति ।

(प्रयोजनवाद्याक्षेपभाष्यम्)

इह तर्हि क्लृ३प्तशिखः । "अनृत" इति प्रतिषेधः[१] प्राप्नोति ।

(४६-प्रत्याख्यातृसमाधानवार्तिकम्-५)

।।*।। रवत्प्रतिषेधाच्च ।।*।।

(व्याख्याभाष्यम्)

रवत्प्रतिषेधाच्चैतत्सिध्यति । "गुरोरवतः" इति वक्ष्यामि ।।

विमला – **गुरोररवत इति** । पुच्छवत्त्वमिव रवत्वमपि "एकदेशविकृत"-न्यायेन लब्धुमशक्यमिति भावः ।

---

१. ऋत्वेन लृकारस्य प्लुतप्रतिषेधः ।

(आक्षेपभाष्यम्)

यदि 'अरवतः' इत्युच्यते, होतृ – ऋकार 'होतृ३-कारः' अत्र न प्राप्नोति ।

(आक्षेपबाधकभाष्यम्)

"गुरोररवतो ह्रस्वस्य" इति वक्ष्यामि ।।

(सिद्धान्तिभाष्यम्)

स एष सूत्रभेदेन लृकारोपदेशः प्लुत्याद्यर्थः सन्प्रत्याख्यायते, सैषा महती वंशस्तम्बाल्लट्वानुकृष्यते ।।२।।

विमला – सूत्रभेदेनेति । ननु मास्तु सूत्रभेदः सवर्णग्राहकताबलेनैव प्लुत्यादिकम्भविष्यति, एवमशक्तिजानुकरणार्थत्वमपि न सम्भवति सवर्णग्राहकताबलेनैव तस्यापि सिद्धिसम्भवादिति चेन्न, तथासति "**अनृत**" इति प्रतिषेधापत्त्यालृकारे प्लुतकार्य्यासम्भवात् । न च लृकारोपदेशेऽपि प्राल्कारीयतीत्यादौ वृद्ध्यर्थम् सावर्ण्यवचनस्यावश्यकतया "अनृत" इति प्रतिषेधो दुर्वार एवेति वाच्यम्, तदुपदेशस्य सावर्ण्यवचनानित्यत्वज्ञापनार्थत्वात् ।।

(शिवसूत्रे)

एओङ् ।। ३ ।। ऐऔच् ।। ४ ।।

(संध्यक्षरेषु अतपरत्वातपरत्वस्थापनभाष्यम्)

इदं विचार्यते – 'इमानि सन्ध्यक्षराणि तपराणि वोपदिश्येरन् 'एत् ओत् ङ्' 'ऐत् औत् च्'' इति, अतपराणि वा यथान्यासम्' – इति ।।

(विशेषजिज्ञासाभाष्यम्)

कश्चात्र विशेषः ?

(४७-तपरोपदेशपक्षदूषणवार्तिकम् - १)

।।।। सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम् ।।*।।*

(व्याख्याभाष्यम्)

सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणं कर्त्तव्यम् ।

(४८-तपरत्वपक्षदूषणवार्तिकम्-२)

॥॥ प्लुत्यादिष्वज्विधिः ॥*॥*

(व्याख्याभाष्यम्)

प्लुत्यादिष्वजाश्रयो विधिर्न सिध्यति ॥ गो३त्रात नौ४त्रात इत्यत्र "अनचि च" इत्यच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं न प्राप्नोति । इह च 'प्रत्यङ्ङै४तिकायन' 'उदङ्ङौ४पगव' इति "अचि" इति ङमुडागमो न प्राप्नोति ॥

विमला – एओङ् ऐऔच् । कैमुतिकन्यायेनाह-**प्लुत्यादिष्वज्विधिरिति** । तपरोच्चारणे प्लुतस्य त्रिमातृकत्वेनासमकालतया वर्णसमाम्नायस्थेनाग्रहणात् । प्लुत्यादिविषयेऽजाश्रितं द्वित्वं ङमुट् च न स्यादितिभावः ।

(४९-तपरत्वपक्षदूषणवार्तिकम्-३)

॥॥ प्लुतसंज्ञा च ॥*॥*

(व्याख्याभाष्यम्)

प्लुतसंज्ञा च न सिध्यति[1] ॥ ऐ३ तिकायन औ ३ पगव "ऊकालोऽज्ह्रस्वदीर्घप्लुतः" इति प्लुतसंज्ञा न प्राप्नोति ॥

विमला – **प्लुतसंज्ञा चेति** । त्रिमातृकस्याच्त्वाभावेन प्लुतसंज्ञैव न स्यादिति भावः ।

(अतपरपक्षाभ्युपगमभाष्यम्)

सन्तु तर्ह्यतपराणि ।

---

१. आस्तां प्लुत्यादिष्वज्विधिः प्लुतसंज्ञैव तावन्न प्राप्नोतीत्यर्थः ।

(५०-अतपरपक्षदूषणवार्तिकम्-४)

।।*।। अतपर एच इग्घ्रस्वादेशे ।।*।।

(व्याख्याभाष्यम्)

यद्यतपराणि "एच इग्घ्रस्वादेशे" इति वक्तव्यम् ।। किं प्रयोजनम् ? एचो [1]ह्रस्वादेशशासनेष्वर्ध एकारोऽर्ध ओकारो वा मा भूदिति ।।

विमला – अतपर इति । जातावेकवचनम् । अतएव **यद्यतपराणीति** व्याख्यया न विरोधः । **एच इग्घ्रस्वादेश इति** । अयम्भावः, सन्ध्यक्षरेषु तपरोच्चारणे मातृकैकारौकारयोरसमकालतया वर्णसमाम्नायस्थैकारादिना ग्रहणाभावेनानच्त्वात् ह्रस्वत्वाभावेन ह्रस्वपदेन विधानं न सम्भवतीति । "**ह्रस्वो नपुंसके प्रातिपदिकस्ये**" ति विधीयमानो ह्रस्वस्तालुस्थानजन्यत्वादिनाऽऽन्तरतम्यादेङ् इगेव स्यादिति सूत्रन्नापूर्वम् । अतपरोच्चारणे तु, मातृकैकारौकारयोरपि वर्णसमाम्नायस्थेन ग्रहणात्तयोरप्यच्त्वेन ह्रस्वसंज्ञायां ह्रस्वपदेन विधानं सम्भवतीतीकाराद्यपेक्षयाऽऽन्तरम्यादेङः स्थाने तयोरेव विधानम्माभूदिति सूत्रमावश्यकमिति ।

(प्रतिवन्दीसमाधानभाष्यम्)

ननु च यस्यापि तपराणि, तेनाप्येतद्वक्तव्यम् । इमावैचौ समाहारवर्णौ — मात्राऽवर्णस्य, मात्रेवर्णोवर्णयोस्तयोर्ह्रस्वादेशशासनेषु कदाचिदवर्णः स्यात् कदाचिदिवर्णोवर्णौ, मा कदाचिदवर्णो भूदिति ।।

विमला – ननु चेति । अयम्भावः, तपरपक्षेऽप्यैकारस्यावर्णेवर्णघटितसमुदायात्मकत्वेनोभयोरन्तरतमस्यैकस्य ह्रस्वस्याभावेन पर्य्यायेणावर्णेवर्णौ भविष्यतः । एवमौकारस्याप्यवर्णोवर्णघटितसमुदायात्मकत्वेन तस्य स्थानेऽपि पर्य्यायेणैवावर्णोवर्णौ भविष्यत इति पक्षेऽनिष्टं सूत्रँव्विना दुर्वारमेव । इयांस्तु विशेषः । अतपरपक्षे एङर्थं सूत्रमारब्धव्यम्; तपरपक्षे-ऐजर्थं सूत्रमारब्धव्यमित्युभयपक्षे सूत्रस्यावश्यकतयाऽयं विशेषोऽकिञ्चित्करः ।

---

१. 'गोस्त्रियोः' 'ह्रस्वो नपुंसके' इत्यादिषु ह्रस्वविधिषु ।

(प्रतिवन्दीनिराकरणभाष्यम्)

प्रत्याख्यायत एतत्, – "ऐचोश्चोत्तरभूयस्त्वात्", इति ।।

(समाधानसिद्धान्तिभाष्यम्)

यदि प्रत्याख्यानपक्षः, इदमपि प्रत्याख्यायते — "सिद्धमेङः सस्थानत्वात्" इति ।।

(आक्षेपभाष्यम्)

ननु चैङः सस्थानतरावर्ध एकारोऽर्ध ओकारः ।।

(समाधानभाष्यम्)

न तौ स्तः । यदि हि तौ स्यातां तावेवाऽयमुपदिशेत् ।।

विमला – तावेवायमुपदिशेदिति । वर्णसमाम्नाये 'ए ओ' इति दीर्घयोः पाठे मात्राचतुष्टयम् । एङित्यत्र सार्द्धद्वयीति संकलनया सार्द्धषण्मात्राः । वर्णसमाम्नाये मातृकयोस्तयोः पाठे तु गुणसंज्ञायां दीर्घविकारौकारौ पठनीयाविति वर्णसमाम्नायस्थयोर्मात्राद्वयम् । गुणसंज्ञाशास्त्रस्थयोर्मात्राचतुष्टयमिति संकलनया षडेव मात्राः गुणसंज्ञायां ङकारानुच्चारणेनात्र पक्षेऽर्धमात्रालाघवमिति । "**अणुरपी**" ति न्यायेनैवमेवोपदिशेदिति भावः ।

(आक्षेपभाष्यम्)

ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते — सुजाते एश्वसूनृते, अध्वर्यो ओद्रिभिः सुतम्, शुक्रं ते एन्यद्, यजतं ते एन्यत् — इति ।।

(समाधानभाष्यम्)

पार्षदकृतिरेषा तत्रभवताम् । नैव हि लोके नान्यस्मिन्वेदेऽर्ध एकारोऽर्ध ओकारो वाऽस्ति ।।

(५१-अतपरपक्षदूषणवार्तिकम्-५)

॥*॥ एकादेशे दीर्घग्रहणम् ॥*॥

(व्याख्याभाष्यम्)

एकादेशे दीर्घग्रहणं कर्तव्यम् – "आद्गुणो दीर्घः" 'वृद्धिरेचि दीर्घः' इति ॥

किं प्रयोजनम् ?

आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति । खट्वा + इन्द्रः खट्वेन्द्रः, खट्वा + उदकं खट्वोदकं, खट्वा + ईषा खट्वेषा, खट्वा + ऊढा खट्वोढा, खट्वा + एलका खट्वैलका, खट्वा + ओदनः खट्वौदनः, खट्वा + ऐतिकायनः खट्वैतिकायनः, खट्वा + औपगवः खट्वौपगव इति ॥

(जिज्ञासाभाष्यम्)

तत्तर्हि दीर्घग्रहणं कर्तव्यम् ?

(समाधानभाष्यम्)

न कर्तव्यम् । उपरिष्टाद्योगविभागः करिष्यते — "अकः सवर्णे" एको भवति ॥ ततो — "दीर्घः" । दीर्घश्च स भवति, यः स 'एकः पूर्वपरयोः' इत्येवं निर्दिष्ट इति ॥

(आशङ्काभाष्यम्)

इहापि तर्हि प्राप्नोति-पशुं, विद्धं, पचन्तीति ॥

(समाधानभाष्यम्)

नैष दोषः । इह तावत्पशुमिति, "अम्येकः" इतीयता सिद्धम् । सोऽयमेवं सिद्धे सति यत्पूर्वग्रहणं

करोति तस्यैतत्प्रयोजनम् — यथाजातीयकः पूर्वस्तथाजातीयक उभयोर्यथा स्यादिति ।

'विद्ध'मिति । 'पूर्व' इत्येवानुवर्तते ।। अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति — 'नानेन संप्रसारणस्य दीर्घो भवती'ति । यदयं हल उत्तरस्य संप्रसारणस्य दीर्घत्वं शास्ति ।।

'पचन्ती'ति । "अतो गुणे परः" इतीयता सिद्धम् । सोऽयमेवं सिद्धे सति यद्रूपग्रहणं करोति, तस्यैतत्प्रयोजनम् — 'यथाजातीयकं परस्य रूपं तथाजातीयकमुभयोर्यथा स्या'दिति ।।

(आक्षेपभाष्यम्)

इह तर्हि-खट्वश्यों मालश्यं इति दीर्घवचनादकारो न, अनान्तर्यादेकारौकारौ न ।। तत्र को दोषः ? विगृहीतस्य श्रवणं प्रसज्येत ।।

विमला – **इह तर्हीति** । योगविभागेनैकादेशः दीर्घो भवतीति पक्षे, पशुम् विद्धम्-पचन्तीत्यादौ पूर्वोक्तयुक्त्या दोषवारणेऽपि खट्वश्यों मालश्यं इत्यत्रान्तर्य्यात् । "**स्थानेऽन्तरतम**" परिभाषाविरोधादेकारौकारौ न भविष्यतः, अदीर्घत्वात्, अकारोऽपि न स्यादिति, विशेषाभावकूटस्य सामान्याभावहेतुतया गुणाभाव एव स्यात् । "**उरण् रपर**" इति सूत्रन्तु "**उरदि**" त्यादिना विधीयमानेऽकारादौ रपरत्वविधानेन चरितार्थम् । अकारस्य गुणसंज्ञाविधानन्तु, अकारे परे "**अतोगुणे**" इति पररूपविधानेन चरितार्थम् । इति न तयोः सामर्थ्यम् । "**अदेङ्गुणो दीर्घः**" इति पृथग् दीर्घग्रहणपक्षे तु, अकारस्य तपरत्वेन समकालस्यैव बोधकतयाऽकारांशे विरोधात्, दीर्घ इति न सम्बध्यते । किन्त्वेङंशे एवेति खट्वश्यं इत्यादौ न दोष इति भावः ।

(समाधानभाष्यम्)

न ब्रूमो — 'यत्र क्रियमाणे दोषस्तत्र कर्तव्य'मिति ।। किं तर्हि ? यत्र क्रियमाणे न दोषस्तत्र कर्तव्यमिति ।

(आक्षेपभाष्यम्)

क्व च क्रियमाणे न दोषः ?

(समाधानभाष्यम्)

संज्ञाविधौ । "वृद्धिरादैज् दीर्घः", 'अदेङ्गुणो दीर्घ' इति ।।

(आक्षेपभाष्यम्)

तत्तर्हि[1] दीर्घग्रहणं कर्तव्यम् ?

विमला – तत्त्वजिज्ञासया पृच्छति – तत्तर्हीति ।

(सिद्धान्तिसमाधानभाष्यम्)

न कर्तव्यम् ।।

(आक्षेपभाष्यम्)

कस्मादेवान्तर्यतस्त्रिमात्र[2]चतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति ?

(समाधानभाष्यम्)

तपरे गुणवृद्धी ।।

(आक्षेपभाष्यम्)

ननु च तः परो यस्मात्सोऽयं तपरः ।।

(समाधानभाष्यम्)

नेत्याह, तादपि परस्तपर इति ।।

विमला – **तादपि परस्तपर इति** । "**सहिवहोरोदवर्णस्ये**" ति वर्णग्रहणेन तादपि परस्तपर इति पक्षो ज्ञाप्यते इति भावः । नन्वेङैचोरेव तकारात्परत्वेन ताभ्यां

---

१ वार्तिकोक्तमित्यर्थः । २. 'खट्वेन्द्रः' इत्यादौ ।

समकालस्यैवोपस्थितिरस्तु ताभ्यामुपस्थितानान्तु तकारपरत्वाभावेन तेभ्योऽसमकालस्य ग्रहणं दुर्वारमेव । न च तेषामुच्चारणाभावेन ग्राहकत्वमेव न सम्भवतीति वाच्यम्, दीर्घाज्जसि चेतिज्ञापकेन प्रत्याहारैरुपस्थितानामनुच्चारितानामपि ग्राहकत्वाभ्युपगमात् । न च यथा ङमुटि कृतं टित्वं सामर्थ्यान्ङम्पदबोध्ये ङकारादौ पर्यवस्यति तथैव तकारोच्चारणसामर्थ्यादैजादिपदबोध्यानां तकारपरत्वाभावेऽपि समकालबोधकत्व-म्भविष्यतीति वाच्यम्, अकारस्य दीर्घत्वेनानण्त्वात्सवर्णाग्राहकतया "**वृद्धिरादैजि**"-त्यत्र तपरकरणस्यैज्मात्रार्थकतया तथा कल्पयितुं सामर्थ्यसम्भवेऽपि "**अदेङ्गुण**" इत्यत्र तु अकारस्याण्त्वेन सवर्णग्राहकतावारणाय तपरकरणस्य चारितार्थ्येन सामर्थ्योपक्षयात् । एङ्पदगृहीतानामसमकालबोधकत्वे बाधकाभावादिति चेन्न । **अणुदित्सूत्रे** ऽशब्दसंज्ञेत्यनुवर्त्य शब्दशास्त्रीयसंज्ञायां विधेयायामण्सवर्णान्न गृह्णातीत्यर्थकरणेनादोषात् । एवञ्च "**आदैजि**"त्यादौ तपरकरणं स्पष्टार्थमेव, "**ईदूदेदि**" ति वत् । अन्यथा सन्धौ सन्देहः स्यात् । आत्माभिमानिनस्तु "**वृद्धिरादैजि**"ति सूत्रस्थतपरकरणस्य तात्परशब्दबोध्यो वर्णः समकालस्यैव ग्राहक इति सामान्यापेक्षज्ञापकत्वं स्वीकृत्यैङ्पदगृहीतानामप्यसमकालबोधकत्वं निवार्य्य '**अणुदित्**' सूत्रेऽशब्दसंज्ञेत्यनुवृत्तिं खण्डयन्ति ।

(आक्षेपभाष्यम्)

यदि तादपि परस्तपरः, "ऋदोरप्" इतीहैव स्यात्-यवः, स्तवः । लवः, पव इत्यत्र न स्यात् ।।

(समाधानभाष्यम्)

नैष तकारः ।। कस्तर्हि ? दकारः ।।

विमला – कस्तर्हि ? दकार इति । अत्र केचित्, 'तिति प्रत्ययग्रहणं कर्त्तव्यम्' इह मा भूत् "**दिव उत्**" **द्युभिरिति** पूर्वपक्षयित्वा दित्त्वमाश्रित्य "**तिति प्रत्ययग्रहणमि**" ति प्रत्याख्याय कृते दित्त्वे "**भाव्यमानोप्युकारः सवर्णान् गृह्णाती**" ति सवर्णग्राहकता स्यादित्याशंक्य तपरसूत्रे चर्त्वेन दकारोऽपि प्रश्लिष्ट इति समाहितम् "**तिस्त्वरितमि**" ति सूत्रे भाष्ये, प्रकृते तु "**ऋदोरप्**" इत्यत्र दकारनिर्द्देशेन **तपरसूत्रस्य** प्रवृत्तिर्वार्य्यत इति विरोधपरिहाराय दकार इत्यस्य धकारस्थानिको दकार इत्याशयं वर्णयन्ति । वस्तुतस्तु–उदित्युकारस्य संज्ञा, तद्बोध्य

उकार: ''दिवउत्'' इत्यनेन विधीयते । न च तद्विहितस्य तित्त्वमस्तीति द्युभिरित्यादौ ''तित्स्वरितमि'' त्यस्याप्राप्त्या ''तिति प्रत्ययग्रहणमि'' ति वार्तिकस्येवानुत्थानात्तत्प्रत्याख्यानाय ''दिवउत्'' इत्यादौ दकारनिर्देशाभावेन तपरसूत्रे दकारप्रश्लेषस्याप्रामाणिकतया प्रकृते थकारस्थानिको दकार इति व्याख्यानमापातरमणीयमेवेति बोध्यम् ।

(आक्षेपभाष्यम्)

किं दकारे प्रयोजनम् ?

(प्रतिबन्दीसमाधानभाष्यम्)

अथ किं तकारे ? यद्यसंदेहार्थस्तकारः, दकारोऽपि । अथ मुखसुखार्थस्तकारः, दकारोऽपीति ।।

इति संध्यक्षरेष्वतपरपाठनिर्णय:

(अथ वर्णैकदेशग्रहणाऽग्रहणनिर्णय:)

(विचारभाष्यम्)

इदं विचार्यते — 'य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतय एतेषामवयवग्रहणेन ग्रहणं स्याद्वा न वे'ति ।।

कुतः पुनरियं विचारणा ?

इह हि समुदाया अप्युपदिश्यन्ते, अवयवा अपि । अभ्यन्तरश्च समुदायेऽवयवः । तद्यथा वृक्षः प्रचलन् सहावयवैः प्रचलति । तत्र समुदायस्थस्यावयवस्यावयवग्रहणेन ग्रहणं स्याद्वा न वेति जायते विचारणा ।।

विमला – **अवयवग्रहणेनेति** । अवयवसदृशवर्णग्राहकशब्देनेत्यर्थ: । ग्रहणम्बोध: । **वर्णैकदेशा** इति । ''**तस्यादित उदात्तमर्द्धह्रस्वमि**'' ति सूत्रप्रमाणात् ''**ऐचोश्चोश्चोत्तरभूयस्त्वादि**'' ति वार्तिकप्रमाणादैतो: कण्ठतालुना ओदौतो: कण्ठोष्ठेन क्रमेणोपलम्भाच्चाज्वर्णा: सांशा इष्यन्ते । अंशानाम्परस्परं भेदग्रहस्तु सजातीयसम्मेलनादेव न भवति सम्पृक्तनीरक्षीरयो: परस्परं भेदग्रहवत् । सन्ध्यक्षरे

एकत्वप्रत्ययस्तु ''इदमेकं वनमि'' ति वदुपपद्यते, यत्र तु विजातीयानां सम्मेलनन्तत्रानुभविकानां भेदग्रहोऽपि भवति । यथा एक्षु तत्रापि यत्रान्यतरांशस्याधिक्यन्तत्र भेदोऽपि स्फुटम्प्रतिभासते यथा ऐक्षु तथा चैचामंशेष्वत्वादिजात्यभिव्यञ्जकस्य कण्ठस्थानजन्यत्वादि-विशिष्टमातृकत्वस्य सत्त्वेन ग्रहणपक्षस्य तालुस्थानजन्यत्वप्रयोज्यैत्वादिजात्यभिव्यक्तिप्रयोजकत्वाच्चाग्रहणपक्षस्य चोदयेन ग्रहणं स्याद्वा न वेति सन्देह उपपद्यते इति बोध्यम् ।

(विशेषजिज्ञासाभाष्यम्)

कश्चात्र विशेषः ?

(५२-ग्रहणपक्ष आक्षेपवार्तिकम्-६)

।।।। वर्णैकदेशा वर्णग्रहणेन चेत्सन्ध्यक्षरे समानाक्षरविधिप्रतिषेधः ।।*।।*

(व्याख्याभाष्यम्)

वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षराश्रयो विधिः प्राप्नोति । स प्रतिषेध्यः ।। अग्ने इन्द्र, वायो उदकम् । ''अकः सवर्णे दीर्घः'' इति दीर्घत्वं प्राप्नोति ।।

(५३-आक्षेपान्तरवार्तिकम्-७)

।।।। दीर्घे ह्रस्वविधिप्रतिषेधः ।।*।।*

(व्याख्याभाष्यम्)

दीर्घे ह्रस्वाश्रयो विधिः प्राप्नोति, स प्रतिषेध्यः । आलूय, प्रलूय । ''ह्रस्वस्य पिति कृति तुग्'' इति तुक् प्राप्नोति ।।

(आक्षेपबाधकभाष्यम्)

नैष दोषः, आचार्यप्रवृत्तिर्ज्ञापयति—'न दीर्घे ह्रस्वाश्रयो विधिर्भवति, इति । यदयं दीर्घाच्छे तुकं शास्ति ।।

विमला – दीर्घ इति । दीर्घ घटकीभूतस्य ह्रस्वस्य ह्रस्वाश्रयो विधि: प्राप्नोतीत्यर्थ: ।

(आक्षेपसाधकभाष्यम्)

नैतदस्ति ज्ञापकम्, अस्ति ह्यन्यदेतस्य[1] वचने प्रयोजनम् ।। किम् ? "पदान्ताद्वा" इति विभाषां वक्ष्यामीति ।।

(आक्षेपबाधकभाष्यम्)

यत्तर्हि योगविभागं करोति । इतरथा हि "दीर्घात्पदान्ताद्वा" इत्येव ब्रूयात् ।।

(आक्षेपान्तरभाष्यम्)

इह तर्हि – खट्वाभिः, मालाभिः, "अतो भिस ऐस्" इत्यैस्भावः प्राप्नोति ।।

(आक्षेपबाधकभाष्यम्)

तपरकरणसामर्थ्यान्न भविष्यति ।।

(दोषान्तरप्रदर्शनभाष्यम्)

इह तर्हि — याता, वाता । "अतो लोप" "आर्धधातुके" इत्यकारलोपः प्राप्नोति ।।

(दूषणोद्धारभाष्यम्)

ननु चाऽत्रापि तपरकरणसामर्थ्यादेव न भविष्यति ।।

(आक्षेपसाधकभाष्यम्)

अस्ति ह्यन्यत्तपरकरणे प्रयोजनम् ।। किम् ? सर्वस्य लोपो मा भूदिति ।।

(प्रयोजनबाधकभाष्यम्)

अथ क्रियमाणेऽपि तपरे परस्य लोपे कृते पूर्वस्य कस्मान्न भवति ?

---

१. दीर्घादित्यस्य ।

(प्रयोजनसाधकभाष्यम्)

परलोपस्य स्थानिवद्भावादसिद्धत्वाच्च ।।

(समाधानसाधकभाष्यम्)

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति-'नाकारस्थस्याऽकारस्य लोपो भवति' इति । यदयम् "आतोऽनुपसर्गे कः" इति ककारमनुबन्धं करोति ।। कथं कृत्वा ज्ञापकम् ? कित्करणे एतत्प्रयोजनम्-'कितीत्याकारलोपो यथा स्या'दिति । यद्याकारस्थस्याऽकारस्य लोपः स्यात्, कित्करणमनर्थकं स्यात् । परस्याऽकारस्य लोपे कृते द्वयोरकारयोः पररूपे हि सिद्धं रूपं स्याद् — गोदः कम्बलद इति । पश्यति त्वाचार्यो – नाऽऽकारस्थस्याऽकारस्य लोपः स्यादिति, अतः ककारमनुबन्धं करोति ।।

(समाधानबाधकभाष्यम्)

नैतदस्ति ज्ञापकम् । उत्तरार्थमेतत्स्यात् "तुन्दशोकयोः परिमृजाऽपनुदोः" इति ।।

(समाधानसाधकभाष्यम्)

यत्तर्हि "गापोष्टग्" इत्यनन्यार्थं ककारमनुबन्धं करोति ।।

(५४-आक्षेपवार्तिकम्-८)

।।*।। एकवर्णवच्च ।।*।।

(व्याख्याभाष्यम्)

'एकवर्णवच्च दीर्घो भवती'ति वक्तव्यम् ।। किं प्रयोजनम् ? वाचा तरतीति – द्व्यज्लक्षणष्ठन्मा भूदिति । इह च वाचो निमित्तम्, "तस्य निमित्तं संयोगोत्पातौ" इत्यनुवर्तमाने "गोद्व्यचः" इति द्व्यज्लक्षणो यन्मा भूदिति ।।

विमला – एकवर्णवच्चेति । दीर्घे द्व्यज्लक्षणकार्य्यस्य प्रतिषेधो वाच्य इति तात्पर्य्यम् । नातो दीर्घे, एकवर्णत्वस्य सिद्धत्वेऽप्यतिदेशवैयर्थ्यम् । **वाचातरतीति** । वाचा तरतीत्यर्थे ''**तेन तरती**''त्यधिकारे **नौद्व्यचष्ठन्निति** विहितद्व्यज्लक्षण-ष्ठन्माभूदित्यर्थः । **इह च वाचो निमित्तमिति** । अस्य इत्यर्थे इति शेषः ।

(समाधानभाष्यम्)

अत्रापि गोनौग्रहणं ज्ञापकम्—'दीर्घाद् द्व्यज्लक्षणो विधिर्न भवति' इति ।।

(सर्वाक्षेपपरिहारवार्तिकावतरणभाष्यम्)

अयं तु सर्वेषामेव परिहारः —

(५५-सिद्धान्तसमाधानवार्तिकम्-९)

।।।। नाव्यपवृक्तस्यावयवे तद्विधिर्यथा द्रव्येषु ।।*।।*

(व्याख्याभाष्यम्)

नाऽव्यपवृक्तस्यावयवस्यावयवाश्रयो विधिर्भवति । 'यथा द्रव्येषु' । तद्यथा द्रव्येषु – ''सप्तदश सामिधेन्यो भवन्ति'' इति, न सप्तदशाऽरत्निमात्रं काष्ठमग्नावभ्या-धीयते ।।

(दृष्टान्तवैषम्यभाष्यम्)

विषम उपन्यासः, प्रत्यृचं चैव हि तत्कर्म चोद्यते । असंभवश्चाऽग्नौ वेद्यां च ।।

(दृष्टान्तान्तरभाष्यम्)

यथा तर्हि ''सप्तदश प्रादेशमात्रीराश्वत्थीः समिधोऽभ्यादधीत'' इति, न सप्तदशप्रादेशमात्रं काष्ठमग्नावभ्याधीयते ।।

(दृष्टान्तवैषम्यभाष्यम्)

अत्रापि प्रतिप्रणवं चैतत्कर्म चोद्यते । तुल्यश्चासंभवोऽग्नौ वेद्यां च ।।

(सिद्धान्तिदृष्टान्तभाष्यम्)

यथा तर्हि "तैलं न विक्रेतव्यम्" "मांसं न विक्रेतव्यम्" इति । व्यपवृक्तं च न विक्रीयते, अव्यपवृक्तं — गावः सर्षपाश्च विक्रीयन्ते । तथा "लोमनखं स्पृष्ट्वा शौचं कर्तव्यम्" इति । व्यपवृक्तं स्पृष्ट्वा नियोगतः कर्तव्यम्, अव्यपवृक्ते कामचारः ।।

(आक्षेपभाष्यम्)

यत्र तर्हि व्यपवर्गोऽस्ति ।। क्व च व्यपवर्गोऽस्ति ? सन्ध्यक्षरेषु ।।

(५६-समाधानवार्तिकम्-१०)

।।*।। सन्ध्यक्षरेषु विवृतत्वात् ।।*।।

(व्याख्याभाष्यम्)

(सन्ध्यक्षरेषु[1]) यदत्राऽवर्णम्, विवृततरं तदन्यस्मादवर्णात् । ये अपीवर्णोवर्णे, विवृततरे ते अन्याभ्यामिवर्णोवर्णाभ्याम् ।।

विमला – अत्र सन्ध्यक्षरेषु तत् अवर्णम् । अन्यस्मात् स्वतन्त्रोच्चारितात् अवर्णाद्विवृततरमित्यर्थः । येऽत्रेवर्णोवर्णे ते स्वतन्त्रोच्चारिताभ्यामिवर्णोवर्णाभ्यां विवृततरे इत्यर्थः । अयम्भावः, आकारादिघटकाकारादावत्वादिजातिसत्त्वेऽपि तेषामवयविनि तिरोहितत्वात्स्वतन्त्रवर्णाश्रयकार्याणान्तत्राप्रसङ्गः । ऐक्ष्ववयवानां स्फुटप्रतिभाससत्त्वेऽपि तेषां विवृततरप्रयत्नकत्वेन प्रयत्नभेदादेव स्वतन्त्रवर्णेन न ग्रहणम् । ऋकारादि- घटकरेफादिभागस्य तु स्फुटप्रतिभासात्स्वतन्त्रोच्चारितरेफेण ग्रहणम्भवतीति मातॄणामित्यादौ णत्वादिकमुपपद्यते ।

१. क्वचिदित्यपि पाठः ।

(अग्रहणपक्षाभ्युपगमभाष्यम्)

अथवा पुनर्न गृह्यन्ते ।

विमला – अथवा पुनर्न गृह्यन्त इति । अयम्भाव:, स्फुट प्रतिभासमाना व्यक्ति र्जातिं व्यञ्जयतीति-आकाराद्यवयवस्य स्फुटप्रतिभासाभावेन तत्रात्वादिज्ञात्यभिव्यक्ति: । ऐकाराद्यवयवस्य स्फुटप्रति-भाससम्भवेऽपि न तत्राप्यत्वादिजात्यभिव्यक्ति: सम्भवति यथा गवयस्य गोसदृशत्वेऽपि गोत्वजात्यभिव्यञ्जकावयवसमुदायान्तर्गताया: सास्नाया अभावेन न गोत्वजात्यभिव्यञ्जकत्वम्, तथैव मातृकत्वे सति कण्ठस्थानजन्यत्वे च सति विवृतप्रयत्नजन्यत्वादेरेवात्वादि जात्यभिव्यञ्जकतयैतस्य विवृततरप्रयत्न-जन्यत्वेनात्वादिजात्यभिव्यञ्जकत्वासम्भवात् । ऋकारावयवरेफस्य तु स्फुटप्रति-भाससत्त्वेन मूर्द्धस्थानजन्यत्वेनेषत्स्पृष्टजन्यत्वेन च भवति रत्वजात्यभिव्यञ्जकत्वम् वक्ष्यमाणो 'न गृह्यन्त' इति निषेधस्त्वादेज्विषयक इति तत्त्वम् ।

(५७-अग्रहणपक्षदूषणवार्तिकम्-११)

॥*॥ अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणम् ॥*॥

(व्याख्याभाष्यम्)

अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणं कर्तव्यम् । "तस्मान्नुड् द्विहलः" 'ऋकारे चे'ति वक्तव्यम् ॥ इहापि यथा स्यात् – आनृधतुः, आनृधुरिति । यस्य पुनर्गृह्यन्ते 'द्विहलः' इत्येव तस्य सिद्धम् ॥

(अग्रहणपक्षदूषणोद्धारभाष्यम्)

यस्यापि न गृह्यन्ते, तस्याप्येष न दोषः । द्विहल्ग्रहणं न करिष्यते । तस्मान्नुड् भवतीत्येव ॥

(आक्षेपभाष्यम्)

यदि न क्रियते, आटतुः, आटुरित्यत्रापि प्राप्नोति ॥

(आक्षेपबाधकभाष्यम्)

अश्नोतिग्रहणं नियमार्थं भविष्यति — 'अश्नोतेरेवाऽवर्णोपधस्य नान्यस्याऽवर्णोपधस्ये'ति ।। (नुड्विधिः) ।।

(आक्षेपवार्तिकखण्डनभाष्यम्)

लादेशे च ऋकारग्रहणं कर्तव्यम् । "कृपो रो लः" 'ऋकारस्य चे'ति वक्तव्यम् । इहापि यथा स्यात् — क्लृप्तः क्लृप्तवानिति । यस्य पुनर्गृह्यन्ते, 'र' इत्येव तस्य सिद्धम् ।

(आक्षेपनिरासभाष्यम्)

यस्यापि न गृह्यन्ते तस्याप्येष न दोषः । ऋकारोऽप्यत्र निर्दिश्यते ।। कथम् ? अविभक्तिको निर्देशः — कृप, उः, रः, लः = "कृपो रो लः" इति ।। अथवा उभयतः स्फोटमात्रं निर्दिश्यते- 'रश्रुतेर्लश्रुतिर्भवती'ति ।। (लादेशः) ।

विमला – लाघवादाह – **अथवेति** । **उभयत इति** । उभयोरित्युभयतः सार्वविभक्तिकस्तसिः स्थान्यादेशयोरित्यर्थः । **स्फोटमात्रमिति** । मात्रपदेन रत्वादिजातिविशिष्टस्य ध्वनेर्व्यवच्छेदः । **रश्रुतेरिति** । रेफावभासिन इत्यर्थः । **लश्रुतिरिति** । लकारावभासीत्यर्थः ।

(आक्षेपवार्तिकखण्डनभाष्यम्)

विनामे ऋकारग्रहणं कर्तव्यम् । "रषाभ्यां नो णः समानपदे" ।। "ऋकाराच्चे"ति वक्तव्यम् । इहापि यथा स्यात्–मातृणां पितृणामिति । यस्य पुनर्गृह्यन्ते 'रषाभ्या'मित्येव तस्य सिद्धम् ।।

(अग्रहणवादिभाष्यम्)

न सिध्यति । यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वान्न प्राप्नोति ।।

विमला – यत्तद्रेफात्परमिति । तद्रेफादृकारावयवरेफात्, भक्तेः भागात् । परमित्यस्य विद्यमान इति शेषः । यदित्यस्य अजिति शेषः, एवञ्च तादृशंभागात्परं विद्यमानो यदच् तेन व्यवधानान्न प्राप्नोतीत्यर्थः ।

(ग्रहणवादिभाष्यम्)

मा भूदेवम् । अड्व्यवाय इत्येव सिद्धम् ।।

(अग्रहणवादिभाष्यम्)

न सिध्यति । वर्णैकदेशाः के वर्णग्रहणेन[1] गृह्यन्ते, ये व्यपवृक्ता अपि वर्णा भवन्ति । यच्चापि रेफात्परं भक्तेः, न तत्क्वचिदपि व्यपवृक्तं दृश्यते ।।

विमला – यच्चापीति । रेफाद्भक्तेः भागात् परं विद्यते यदज्रूपमित्यर्थः ।

(ग्रहणवादिभाष्यम्)

एवं तर्हि योगविभागः करिष्यते, "रषाभ्यां नो णः समानपदे" । ततः – "व्यवाये" । व्यवाये च रषाभ्यां नो णो भवतीति । ततः – "अट्कुप्वाङ्नुम्भिः" इति ।

इदमिदानीं किमर्थम् ?

नियमार्थम् – 'एतैरेवाक्षरसमाम्नायिकैर्व्यवाये, नान्यैः इति ।

(अग्रहणवादिभाष्यम्)

यस्यापि न गृह्यन्ते तस्याप्येष न दोषः । आचार्यप्रवृत्तिर्ज्ञापयति – 'भवत्यृकारान्नो णत्व'मिति । यदयं क्षुभ्नादिषु नृनमनशब्दं पठति ।।

(ग्रहणवादिभाष्यम्)

नैतदस्ति ज्ञापकम् । वृद्ध्यर्थमेतत्स्यात् – नार्नमनिः ।।

---

१. क्वचिन्न नास्ति ।

विमला – वृद्ध्यर्थमेतत्स्यादिति । वृद्धौ कृतायां रेफात्परस्य नस्य णत्वप्राप्तौ तन्निवृत्त्यर्थमित्यर्थः ।

(अग्रहणवादिभाष्यम्)

यत्तर्हि तृप्नोतिशब्दं पठति ।

(एकदेशिभाष्यम्)

यच्चापि नृनमनशब्दं पठति ।।

(बाधकस्मारणभाष्यम्)

ननु चोक्तम् – 'वृद्ध्यर्थमेतत्स्यात्' ।।

(समाधानभाष्यम्)

बहिरङ्गा वृद्धिरन्तरङ्गं णत्वम् । "असिद्धं बहिरङ्गमन्तरङ्गे" ।। अथवा उपरिष्टाद्योगविभागः करिष्यते — "ऋतः" । (ऋतो) नो णो भवति । ततः — "छन्दस्यवग्रहात्" । ऋत इत्येव ।।

विमला – बहिरङ्गा वृद्धिरिति । एवञ्च वृद्धेरसिद्धत्वाद्रेफात्परत्वाभावेन वृद्धेरप्राप्तौ क्षुभ्नादिगणे नृनमन शब्दस्य पाठो व्यर्थः सञ्ज्ञापयति – "**ऋवर्णान्नस्य णत्वं वाच्यमिति**" तेन मातृणामित्यादौ न दोष इति भावः ।

(५८-आक्षेपान्तरवार्तिकम्-१२)

।।।। प्लुतावैच इदुतौ ।।*।।*

(व्याख्याभाष्यम्)

[1]एतच्च वक्तव्यम् । यस्य पुनर्गृह्यन्ते, 'गुरोष्ठे'रित्येव प्लुत्या तस्य सिद्धम् ।।

(आक्षेपबाधकभाष्यम्)

यस्यापि न गृह्यन्ते तस्याप्येष न दोषः । क्रियत एतन्न्यास एव ।।

---

१. इतः पूर्वं (प्लुतावैच इदुतौ) इति योजनीयम् । मन्ये लुप्तं भवेदिति ।

(५९-आक्षेपवार्तिकम्-३)

॥*॥ तुल्यरूपे संयोगे द्विव्यञ्जनविधिः ॥*॥

(व्याख्याभाष्यम्)

तुल्यरूपे संयोगे द्विव्यञ्जनाश्रयो विधिर्न सिध्यति- कुक्कुटः पिप्पली पित्तमिति । यस्य पुनर्गृह्यन्ते तस्य द्वौ ककारौ, द्वौ पकारौ, द्वौ तकारौ ॥

(आक्षेपबाधकभाष्यम्)

यस्यापि न गृह्यन्ते तस्यापि द्वौ ककारौ, द्वौ पकारौ, द्वौ तकारौ । कथम् ? मात्राकालोऽत्र गम्यते । न च मात्रिकं व्यञ्जनमस्ति । अनुपदिष्टं सत्कथं शक्यं विज्ञातुम् ? असच्च कथं शक्यं प्रतिपत्तुम् ?

(आक्षेपसाधकभाष्यम्)

यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रैतन्नास्ति — 'अणु सवर्णान् गृह्णाति' इति । इह तु कथम् सँय्यन्ता, सँव्वत्सरः यँल्लोकम्, तँल्लोकमिति यत्रैतदस्त्यणु सवर्णान् गृह्णातीति ?

(आक्षेपबाधकभाष्यम्)

अत्रापि मात्राकालो गृह्यते । न च मात्रिकं व्यञ्जनमस्ति । अनुपदिष्टं सत्कथं शक्यं विज्ञातुम् । असच्च कथं शक्यं प्रतिपत्तुम् ? ॥४॥

(शिवसूत्रम्)

हयवरट् ॥५॥

(अथ हकारस्य द्विरुपदेशाधिकरणम्)

(आक्षेपभाष्यम्)

सर्वे वर्णाः सकृदुपदिष्टाः, अयं हकारो द्विरुपदिश्यते – पूर्वश्चैव परश्च । यदि पुनः पूर्व एवोपदिश्येत, पर एव वा । कश्चात्र विशेषः ?

(६०-पूर्वात्रानुपदेशे दूषणवार्तिकम्-१)

//// हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणम् //*//*

(व्याख्याभाष्यम्)

हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणं कर्तव्यम् – "आतोऽटि नित्यम्" "शश्छोऽटि" "दीर्घादटि समानपादे" हकारे चेति वक्तव्यम् ।। इहापि यथा स्यात् महाँ हि सः ।।

(६१-पूर्वात्रानुपदेशे दूषणान्तरवार्तिकम्-२)

//// उत्त्वे च //*//*

(व्याख्याभाष्यम्)

उत्त्वे च हकारग्रहणं कर्तव्यम् । "अतो रोरप्लुतादप्लुते" "हशि च" "हकारे चे"ति वक्तव्यम् । इहापि यथा स्यात्-पुरुषो हसति, ब्राह्मणो हसतीति ।

(पूर्वोपदेशाङ्गीकारभाष्यम्)

अस्तु तर्हि पूर्वोपदेशः ।

(६२-६३-परत्रानुपदेशे दूषणवार्तिकम्-३-४)

//// पूर्वोपदेशे कित्त्वक्सेड् विधयो झल्ग्रहणानि च //*//*

(व्याख्याभाष्यम्)

यदि पूर्वोपदेशः कित्त्वं विधेयम्–स्निहित्वा, स्नेहित्वा सिस्निहिषति सिस्नेहिषति । "रलोऽव्युपधाद्धलादेः" इति कित्त्वं न प्राप्नोति ।।

क्सविधिः — क्सश्च विधेयः — अधुक्षत्, अलिक्षत् । "शल इगुपधादनिटः क्सः" इति क्सो न प्राप्नोति ।।

इड्विधिः – इट् च विधेयः — रुदिहि । वलादिलक्षण इण् न प्राप्नोति ।।

झल्ग्रहणानि च ।।

किम् ?

अहकाराणि स्युः ।।

तत्र को दोषः ?

"झलो झलि" इतीह न स्यात् – अदाग्धाम्, अदाग्धम् । तस्मात्पूर्वश्चैवोपदेष्टव्यः परश्च ।।

विमला – कित्त्वक्सेड्विधय इति । कित्त्वञ्च क्सश्च इट्चेत्येतेषामितरेतरयोगद्वन्द्वे आर्षत्वादेकवचने कित्त्वक्सेट् । पृथक्पदमिदम् । विधीयन्ते ये ते विधयः । कित्त्वक्सेटो विधेया इति समुदायार्थः । अतएव कित्त्वं विधेयम् । इट् च विधेय इत्युक्तम् भाष्यकृतेति बोध्यम् ।

(उपसंहारभाष्यम्)

यदि च किंचिदन्यत्राप्युपदेशे प्रयोजनमस्ति, तत्राप्युपदेशः कर्त्तव्यः ।।

इति हकारस्य द्विरुपदेशाधिकरणम्

(अथ रेफोपदेशस्थानाधिकरणम्)

(पूर्वापरपाठविचारभाष्यम्)

इदं विचार्यते — अयं रेफो यकारवकाराभ्यां पूर्व एवोपदिश्येत – 'हरयव'डिति, पर एव वा यथान्यासमिति । कश्चात्र विशेषः ? ।।

विमला – पूर्व एवोपदिश्येतेति । यण् घटिता इको यणचीत्यादयो रण्घटिता एव पाठ्याः । नन्वि**कोरणची**ति पाठे **स्थानेऽन्तरतमयथासंख्य**परिभाषयोर्विरोधात्परत्वाद्यथा**संख्य**परिभाषाप्रवृत्ताविकारस्य रेफापत्तिः । यथा श्रुते तु परिभाषयोर्विरोधाभावेन बाध्यबाधकभावान्न दोषः । न चेदानीम् '**अइ उण्**' इत्यत्र '**अऋइण्**' **ऋलृ**गित्यत्र '**उलृक्**' इत्येव पाठ्यम् । '**इकोयणची**'त्यत्र "**ऋकोरणची**" त्येव पाठ्यम्, एवञ्च परत्वाद्यथासंख्यप्रवृत्तावपि न दोष इति वाच्यम्, तथा सति अणि ऋकारग्रहणापत्तौ तृढोवृढ इत्यत्र **ढ्रलोप** इति दीर्घापत्तेः, शम्भूराजते इत्यत्र दीर्घानापत्तेश्चेति चेन्न । यथासंख्यसूत्रे 'स्वरितेन' इत्यपकृष्य स्वरितत्वविशिष्टानां समसंख्यकानां सम्बन्धो यथासंख्यम्भवतीति व्याख्यानेन **यथासंख्यपरिभाषाया** असार्वत्रिकत्व-कल्पनेनादोषात् । अतएव तत्र तत्र निमित्तकार्यिणोस्तु न यथासंख्यमित्यादयः संगच्छन्ते ।

(६४-यथान्यासोपदेशदूषणवार्तिकम्-५)

।।*।। रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः ।।*।।

(व्याख्याभाष्यम्)

रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णानां प्रतिषेधो वक्तव्यः ।।

अनुनासिकस्य — स्वर्णयति प्रातर्णयति । "यरोऽनुनासिकेऽनुनासिको वा" इत्यनुनासिकः प्राप्नोति ।।

द्विर्वचनस्य – मद्रह्लदः भद्रह्लदः । "यरः" इति द्विर्वचनं प्राप्नोति ।

परसवर्णस्य–कुण्डं रथेन, वनं रथेन, 'अनुस्वारस्य ययि' – इति परसवर्णः प्राप्नोति ।।

विमला – **द्विर्वचनं प्राप्नोतीति** । न च ''**व्यञ्जनात्परस्यैकस्यानेकस्य वोच्चारणे विशेषो नास्ती**'' ति न्यायेन नायं दोष इति वाच्यम्, ''**शरोची**''त्यस्य ''**हलो यमामि**'' त्यादीनाञ्च शास्त्राणां वैयर्थ्यापत्या विशेषो नास्तीत्यस्य सूक्ष्मत्वाद्दुर्लक्ष्ये विशेष इत्यर्थस्य कल्पनीयतया दोषस्य दुरुद्धरत्वात् । **कुण्डं रथेनेति** । न च ''**रेफोष्मणां सवर्णा न सन्ती**'' ति निषेधाद्रेफसवर्णाप्रसिद्ध्या नात्र परसवर्णप्रसक्तिरिति वाच्यम् यतो हि रेफोष्मणां विजातीयेन वर्णेन स्थानप्रयत्नसाम्याभावेन नाज्झलाविति सावर्ण्यनिषेधेन वा नैतेषां सावर्ण्यप्रसक्तिरित्येतदनुवादकमेव ''**रेफोष्मणां सवर्णा न सन्ती**'' ति नैतावता सजातीयेन तुल्यस्थानप्रयत्नेन ''**तुल्यास्ये**'' ति प्राप्तां सवर्णसंज्ञां निवारयितुमीष्टे । **एवञ्च कुण्डं रथेनेत्यत्र** रेफ एव परसवर्णः स्यादिति भावः ।

इति यथान्यासे दूषणानि

(यकारात्पूर्वत्र पाठाभ्युपगमभाष्यम्)

अस्तु तर्हि पूर्वोपदेशः ।

(६५,६६-पूर्वोपदेशदूषणवार्तिके-६,७)

।।*।। पूर्वोपदेशे कित्त्वप्रतिषेधो, व्यलोपवचनं च ।।*।।

(व्याख्याभाष्यम्)

यदि पूर्वोपदेशः कित्त्वं प्रतिषेध्यम् । देवित्वा, दिदेविषति । ''रलोऽव्युपधा''दिति कित्त्वं प्राप्नोति ।।

(दूषणनिराकरणभाष्यम्)

नैष दोषः, नैवं विज्ञायते — 'रलः व्युपधाद्' इति ।। किं तर्हि ?

''रलः – अव् व्युपधात्'' इति ।।

किमिदम् – "अव् व्युपधाद्" इति ? अवकारान्ता-द्व्युपधादव्युपधादिति ।।

(वार्तिकाऽपरखण्डव्याख्याभाष्यम्)

'व्लोपवचनं च' ।। व्योश्च लोपो वक्तव्यः । गौधेरः, पचेरन्, यजेरन्, 'जीवेरदानुः' — जीरदानुः । वलीति लोपो न प्राप्नोति ।।

विमला – वलीति लोपो न प्राप्नोतीति । अत्र रलीति न्यासे हय गतौ हय्यादित्यत्र यलोपापत्तिः ।

(दूषणनिराकरणभाष्यम्)

नैष दोषः, रेफोऽप्यत्र निर्दिश्यते — "लोपो व्योर्वलि" इति । रेफे च वलि चेति ।।

विमला – रेफोऽप्यत्र निर्दिश्यत इति । "**लोपो व्योर्वली**"त्यत्र र्वलीति सरेफं पदं छित्त्वा सौत्रत्वादेकवचनं वाङ्गीकृत्येति भावः । यद्यप्येवं रेफस्य पूर्वोपदेश-पक्षोपि समर्थयितुं शक्यते, तथापि बहुषु पाणिनीयसूत्रभेदकल्पनाया अन्याय्यतयाऽयुक्तोऽयं पक्षः । अत एव तत्र तत्र "**सिद्ध्यत्येवमपाणिनीयन्तु भवतीति**" भाष्यकृतोक्तम्, अतः कल्पान्तरमनुसरति – **अथवेति** ।

(यथाश्रुतन्यासाऽभ्युपगमभाष्यम्)

अथवा[१] पुनरस्तु परोपदेशः ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् 'रेफस्य परोपदेशेऽनुनासिकद्विर्वचन-परसवर्णप्रतिषेधः' इति ।।

(समाधानभाष्यम्)

अनुनासिकपरसवर्णयोस्तावत्प्रतिषेधो न वक्तव्यः, रेफोष्मणां सवर्णा न सन्ति ।।

---

१. 'रेफोष्मणामिति । अस्य च ' इत्यपि क्वचित् ।

विमला – अनुनासिक परसवर्णयोरिति । यद्यपि पूर्वपक्षक्रमेणैव परिहारः समुचितस्तथाप्यनुनासिकपरसवर्णयोरेक - परिहारानिवार्य्यत्वात् व्युत्क्रमेणैव परिहृतम् । अन्यथा **रेफोष्मणां सवर्णा न सन्तीति** ग्रन्थस्य स्थलद्वये लेखने ग्रन्थगौरवं स्यात् । **प्रतिषेधो न वक्तव्य इति** । अनुनासिकविधौ सवर्णपदापकर्षणात् सवर्णोऽनुनासिको भवतीत्यर्थे कृते रेफस्य सवर्णानुनासिकाप्रसिद्ध्या स्वर्नयतीत्यादौ नानुनासिकः प्राप्नोति, एवं परसवर्णविधौ स्थानेन्तरतम - परिभाषोपस्थितौ रेफसवर्णस्य स्थानिनोऽनुस्वा-रान्तरतमस्य च वर्णस्याभावेन कुण्डं रथेनेत्यादौ न परसवर्णः प्राप्नोतीति प्रतिषेधो व्यर्थ इति भावः । एतेन रेफस्य विजातीयसवर्णाभावेऽपि कुण्डं रथेनेत्यादौ रेफ एव परसवर्णः स्यादिति वदन्तः प्रत्युक्ताः ।

(भाष्यम्)

द्विर्वचनेऽपि । नेमौ रहौ कार्यिणौ द्विर्वचमस्य ।। किं तर्हि ? निमित्तमिमौ रहौ द्विर्वचनस्य । तद्यथा – "ब्राह्मणा भोज्यन्तां, माठरकौण्डिन्यौ परिवेविषाताम्" इति । नेदानीं तौ भुञ्जाते ।।

विमला – द्विर्वचनेऽपीति प्रतिषेधो न वक्तव्य इत्यस्यानुषङ्गो **नेमाविति यतः** इत्यादिः । **माठरकौण्डिन्यौ परिवेविषातामिति** । वस्तुतस्तु **माठरपरिवेष-णन्यायोऽपि तक्रन्यायस्यैवोपलक्षकः** । तक्रन्यायातिरिक्त**माठरपरिवेषण-**न्यायस्वीकारे मानाभावात् । **तक्रन्यायश्च** सप्तम्यन्तपदाप्रयोज्य–विषयतयोर्यत्र व्याप्यव्यापकभावस्तत्रैव प्रवर्तते । एवञ्चान्तवृद्धीयञित्णित् प्रत्ययत्वावच्छिन्न विषयताया उपधावृद्धीयतादृशविषयतायाश्च सप्तम्यन्तपदप्रयोज्यत्वेन न्यायेन बाधेऽसिद्धे-ऽनुशतिकादिगणे पुष्करसच्छब्दस्य पाठसामर्थ्येन बाधः साधित इति न तत्रत्यभाष्यविरोधः । प्रकृते च रत्वावच्छिन्नविषयताया यर्त्वावच्छिन्नविषतायाश्च सप्तम्यन्तपदा-प्रयोज्यत्वेन व्याप्यव्यापकभावसत्त्वेन च न्यायेन बाधः सुघटः । परत्वपूर्वत्वासंकुचिताया एव रत्वावच्छिन्नविषयताया यर्त्वावच्छिन्नविषयताव्याप्यत्वेन तादृश्योरेव विषयतयोर्बाध्यबाधकभाव इति अहेर्णेत्यादौ यरः पूर्वत्वसङ्कुचितविषयताया अभावेऽपि रत्वावच्छिन्नविषयतायाः सत्त्वेन तयैव कार्यित्ववाधान्न दोषः ।

अच्त्वावच्छिन्न निमित्तत्तायाः सप्तम्यन्तपदप्रयोज्यत्वेन न्यायेन बाधाप्राप्तौ न्यायेन तदभावसाधनं कैयटस्य प्रमादः । अतएव मनोरमायाम् 'तस्मादित्युत्तरस्येति' ज्ञापकान्न

बाध्यते इति कैयटः । इति स्वारुचिबोधनाय कैयटशब्दाभिधानम् । अत्र विषयतयो व्याप्यव्यापकभावो न, येन केनापि सम्बन्धेन विवक्षितः कालिकसम्बन्धेन व्याप्यव्यापकभावमादायातिप्रसङ्गापत्तेः । नापि स्वरूपसम्बन्धेन, प्रथमैकाच्त्वावच्छिन्न-विषयतायाः द्वितीयैकाच्त्वावच्छिन्नविषयतया बाधो न स्यात् । तयोः स्वरूपसंबन्धेन सामानाधिकरण्यस्याप्यभावेन व्याप्यव्यापकभावस्य सुदूरपराहतत्वात् । किन्तु येन संबन्धेन व्याप्यत्वाश्रयणे न लक्ष्यासिद्धिः स एव संबन्धः व्याप्यतावच्छेदकतया विवक्षितः । प्रथमैकाच्त्वावच्छिन्न विषयतानिष्ठव्यापकता-निरूपितव्याप्यतावच्छेदकतया स्वाश्रयावधिकपूर्वत्वविशिष्टादिभूताज्घटितत्वसंबन्धो विवक्ष्यते । एवञ्चैतादृशसंबन्धेन द्वितीयैकाच्त्वावच्छिन्नविषयतैव प्रथमैकाच्त्वावच्छिन्नविषयता व्याप्या नत्वादिभूताच्त्वावच्छिन्नविषयतापीति आटतुरित्यादौ न दोषः । नन्वेवम**प्यकः सवर्ण** इति शास्त्रीयायाः अक्त्वावच्छिन्नविषयतायाः '**इकोयणची**' ति शास्त्रीयया इक्त्वावच्छिन्नविषयतया बाधापत्तिः । इक्त्वावच्छिन्नविषयतायाः अक्त्वावच्छिन्नविषयताव्याप्यत्वादिति चेन्न । व्यापकतावच्छेदकतया-स्वप्रयोज्य-शाब्दबोधीयविषयतावत्त्वसंसर्गस्य विवक्षणीयत्वेनादोषात् । तथाहि अक्त्वावच्छिन्न-विषयताप्रयोज्या या अग्निष्ठा शाब्दबोधीया विषयता सा सवर्णाच्त्वावच्छिन्नविषयतया संकुचितेति तस्याः सुधीकारे तेन संबन्धेनासत्त्वात्तत्र चेक्त्वावच्छिन्नविषयतायाः सत्त्वेन व्यभिचारेणाव्यापकतया बाधकत्वासम्भवः ।

(अथाऽयोगवाहोपदेशाधिकरणम्)

(विचारभाष्यम्)

इदं विचार्यते — इमेऽयोगवाहा न क्वचिदुपदिश्यन्ते, श्रूयन्ते च । तेषां कार्यार्थ उपदेशः कर्तव्यः ।। के पुनरयोगवाहाः ? विसर्जनीयजिह्वामूलीयोपध्मानी-यानुस्वारनासिक्ययमाः[१] ।। कथं पुनरयोगवाहाः ? यदयुक्ता वहन्ति, अनुपदिष्टाश्च श्रूयन्ते ।।

---

१. नासिक्यपदेन 'हुँ' इति ऋक्शाखाप्रसिद्धं ग्राह्यम् । 'हुं इति नासिक्यः' इति कात्यायनप्रातिशाख्यात् ।

(आक्षेपभाष्यम्)

क्व पुनरेषामुपदेशः कर्त्तव्यः ?

(६७-सिद्धान्तवार्तिकम्-८)

॥*॥ अयोगवाहानामट्सु णत्वम् ॥*॥

(व्याख्याभाष्यम्)

अयोगवाहानामट्सूपदेशः कर्त्तव्यः ॥ किं प्रयोजनम्? णत्वम्। उरः केण, उर ᳵकेण, उरःपेण, उर ᳶपेण 'अड्व्यवाये' इति णत्वं सिद्धं भवति।

(६७-सिद्धान्तिनः प्रयोजनवार्तिकम्-९)

॥*॥ शर्षु जश्भावषत्वे ॥*॥

(व्याख्याभाष्यम्)

शर्षूपदेशः कर्त्तव्यः ॥ किं प्रयोजनम्? जश्भावषत्वे। अयमुब्जिरुपध्मानीयोपधः पठ्यते। तस्य जश्त्वे कृते उब्जिता उब्जितुमित्येतद् रूपं यथा स्यात्।

(उपध्मानीयोपधदूषणभाष्यम्)

यद्युब्जिरुपध्मानीयोपधः पठ्यते, उब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोति। दकारोपधे पुनर् "नन्द्राः संयोगादयः[1]" इति प्रतिषेधः सिद्धो भवति।

(दकारोपधदूषणभाष्यम्)

यदि दकारोपधः पठ्यते, का रूपसिद्धिः – उब्जिता उब्जितुमिति ?

---

१ 'संयोगादयः' इति पदं क्वचिन्नास्ति।

विमला – का रूपसिद्धिरिति । उब्जितेत्यादिरूपसिद्धिः किमाकारेति प्रश्नः ।

(दकारोपधदूषणनिराकरणभाष्यम्)

"असिद्धे भ उद्जेः"[१] । इदमस्ति – "स्तोः श्चुनाश्चुः" इति, ततो वक्ष्यामि "भ उद्जेः" । उद्जेः श्चुना सन्निपाते भो भवतीति ।

विमला – भ उद्जेरिति । स्तोरित्यनुवर्तते श्चुनेति च, तथा वोद्जेःस्तोःश्चुना सन्निपाते भो भवतीति वाच्योऽर्थः, वस्तुतस्तु प्रक्रियालाघवाय "**ब उद्जेरि**" त्येव वक्तव्यम् । नेन्द्रेति सूत्रदृष्ट्या भत्वस्य बत्वस्य वाऽसिद्धतया दकारस्य द्वित्वनिषेधेन जिशब्दस्यैव द्वित्वमित्युब्जिजिषतीत्यादौ न दोष इति भावः ।

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम् ?

(समाधानभाष्यम्)

न वक्तव्यम्, निपातनादेव सिद्धम् ।। किं निपातनम् ? "भुजन्युब्जौ पाण्युपतापयोः" इति ।।

विमला – निपातनादेव सिद्धमिति । न चैवं सति बत्वस्यासिद्धत्वाभावेन बकारविशिष्टस्यैव द्वित्वापत्तिरिति वाच्यम्, दकारोपदेशसामर्थ्येनैव वारणात् । अभ्युद्ग इत्यादौ दकारोपदेशस्य चारितार्थ्यं नाशंकनीयम्, गमेर्ड प्रत्ययेन तस्य सिद्धेः । अकुत्वविषये तन्निपातनमिति पक्षे तु, असिद्धप्रकरणे भ उद्जेरिति वक्तव्यमेवेति ।

(समाधानबाधकभाष्यम्)

इहापि तर्हि प्राप्नोति-अभ्युद्ग समुद्ग इति ।।

(समाधानसाधकभाष्यम्)

अकुत्वविषये तन्निपातनम् ।। अथवा नैतदुब्जे रूपं, गमेरेतद् द्व्युपसर्गाड्डो विधीयते । अभ्युद्गतोऽभ्युद्गः समुद्गतः समुद्ग इति ।

---

१. क्वचिद् वार्तिकमिदम् ।

विमला – अकुत्वविषये तन्निपातनमिति । श्रुनायोग एव दकारस्य वत्वन्निपात्यतेऽभ्युद्र इत्यादौ तदभावान्न वत्वप्राप्तिरिति भावः । **गमेरेवेति** । उपसर्गद्वयपूर्वकाद्गमधातोरेव ड प्रत्ययो विधीयत इत्यर्थः । तथा चायोगवाहानां शर्षूपदेशस्य जश्भावरूपं प्रयोजनं वार्तिककारोक्तं भाष्यमते नास्तीति फलितम् ।

(षत्वप्रयोजनभाष्यम्)

षत्वं च प्रयोजनम् । सर्पिःषु धनुःषु । 'शर्व्यवाये' इति षत्वं सिद्धं भवतीति । "नुम्विसर्जनीयशर्व्यवायेऽपि" इति विसर्जनीयग्रहणं न कर्त्तव्यं भवति ।।

विमला – षत्वञ्च प्रयोजनमिति । अस्यायोगवाहानां शर्षूपदेशस्येत्यादिः ।

(आक्षेपभाष्यम्)

नुमश्चापि तर्हि ग्रहणं शक्यमकर्तुम् ।

कथं सर्पींषि धनूंषि ?

अनुस्वारे कृते 'शर्व्यवाये' इत्येव सिद्धम् ।।

(समाधानभाष्यम्)

अवश्यं नुमो ग्रहणं कर्त्तव्यम् । अनुस्वारविशेषणं नुम्ग्रहणम्, नुमो योऽनुस्वारस्तत्र यथा स्याद्, इह मा भूत्पुंस्विति ।।

(अभ्युपगमभाष्यम्)

अथवाऽविशेषेणोपदेशः कर्तव्यः ।।

विमला – अविशेषेणेति । प्रयोजनविशेषमनपेक्ष्येत्यर्थः । **उपदेश इति** । अयोगवाहानामित्यादिः । स चाट्शरीरेव वक्ष्यमाणप्रयोजनानां तयोरेव पाठेन गतार्थत्वात् ।

(प्रयोजनजिज्ञासाभाष्यम्)

किं प्रयोजनम् ?

(६६-सिद्धान्तवार्तिकम्-१०)

।।*।। अविशेषेण संयोगोपधासंज्ञाऽलोन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः ।।*।।

(व्याख्याभाष्यम्)

अविशेषेण संयोगसंज्ञा प्रयोजनम् । उउब्जकः । "हलोऽनन्तराः संयोगः" इति संयोगसंज्ञा, "संयोगे गुर्विति" गुरुसंज्ञा, "गुरो" रिति प्लुतो भवति ।।

विमला – संयोगसंज्ञेति । इदञ्च प्रयोजनं वार्तिकरीत्या, भाष्यरीत्या तु 'उद्ज्' धातोर्दकारोपधत्वेन संयोगसंज्ञा निराबाधैव ।

(प्रयोजनभाष्यम्)

उपधासंज्ञा च प्रयोजनम् – दुष्कृतं, निष्कृतं, दुष्पीतं, निष्पीतम् । "इदुदुपधस्य चाऽप्रत्ययस्ये" ति षत्वं सिद्धं भवति ।।

(उक्तप्रयोजननिरासभाष्यम्)

नैतदस्ति प्रयोजनम् । न[1] इदुदुपधाग्रहणेन विसर्जनीयो विशेष्यते ।। किं तर्हि ?

सकारो विशेष्यते – 'इदुदुपधस्य सकारस्य यो विसर्जनीय' इति ।।

अथवोपधाग्रहणं न करिष्यते, इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः — 'इदुद्भ्यामुत्तरस्य विसर्जनीयस्ये'ति ।।

(प्रयोजनभाष्यम्)

अलोन्त्यविधिश्च प्रयोजनम् – वृक्षस्तरति । प्लक्षस्तरति । अलोन्त्यस्य विधयो भवन्तीत्यलोन्त्यस्य सत्वं सिद्धं भवति ।।

---

१. 'नेह' इति क्वचित् ।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् — "निर्दिश्यमानस्यादेशा भवन्ति" इति विसर्जनीयस्यैव भविष्यति ।।

विमला – एतदपि नास्ति प्रयोजनमिति । तथा चाविशेषेणेत्यादिना वार्तिकोक्तानाम्पञ्चानाम्प्रयोजनानाम्मध्ये त्रीणि प्रयोजनान्यन्यथासिद्धानि, वक्ष्यमाणे द्वे एव प्रयोजने भाष्यमते स्थिते । तत्रापि विसर्गादीनां द्विरुच्चारणस्यादर्शनाद्वक्ष्यमाणं द्विर्वचनप्रयोजनमपि साम्भावनिकम् । स्थानिवद्भावप्रतिषेधः प्रयोजनन्तु शिरसा वोढव्यमित्यवगन्तव्यम् ।

(द्विर्वचनप्रयोजनभाष्यम्)

द्विर्वचनं प्रयोजनम् — उर ≍ ≍ कः । उर ≍ ≍ पः । "अनचि च" अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं सिद्धं भवति ।।

(प्रयोजनभाष्यम्)

स्थानिवद्भावप्रतिषेधश्च प्रयोजनम् – यथेह भवति- उरःकेण, उरःपेणेति – "अड्व्यवाये" इति णत्वम्, एवमिहापि स्थानिवद्भावात्प्राप्नोति-व्यूढोरस्केन महोरस्केनेति । तत्र "अनल्विधौ" इति प्रतिषेधः सिद्धो भवति ।।

इत्ययोगवाहोपदेशाधिकरणम्

(अथ वर्णार्थवत्ताधिकरणम्)

(वर्णार्थवत्ताविचारभाष्यम्)

(इदं विचार्यते –)[१] किं पुनरिमे वर्णा अर्थवन्तः, आहोस्विदनर्थकाः ?

विमला – किम्पुनरिमे वर्णा इति । सन्देहस्थले इदं विचार्यत इति लेखस्य भाष्यशैलीसिद्धतयाऽत्रापि प्रथममिदं विचार्यत इति पाठः समीचीन इत्यवगम्यते ।

---

१ अयम्पाठः मन्ये विलुप्तः भवेदिति । नाऽयं सर्वत्र विद्यते ।

(७०-अर्थवत्तासाधकं प्रथमवार्तिकम् - ११)

||*|| अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात् ||*||

(व्याख्याभाष्यम्)

अर्थवन्तो वर्णाः ।।

कुतः ?

धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थ दर्शनात् ।।

धातव एकवर्णा अर्थवन्तो दृश्यन्ते – एति, अध्येति, अधीत इति ।।

प्रातिपदिकान्येकवर्णान्यर्थवन्ति – आभ्याम्, एभिः, एषु ।।

प्रत्यया एकवर्णा अर्थवन्तः,–औपगवः, कापटवः ।।

निपाता एकवर्णा अर्थवन्तः, – अ अपेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ, अ[1] अपक्राम । धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनान्मन्यामहे – 'अर्थवन्तो वर्णाः' – इति ।

विमला – अर्थवन्तो वर्णा इति । वर्णाः, अर्थवन्तः, वर्णत्वात्, इङ्धात्वादिवत् । इति त्रयो न्यायावयवाः ।

(७१-अर्थवत्तासाधकं द्वितीयवार्तिकम् - १२)

||*|| वर्णव्यत्यये चार्थान्तरगमनात्[2] ||*||

१. 'ए' क्वचिदयं पाठः ।
२. इतः परं 'कूपः सूपो यूप इति' क्वचिदधिकम् ।

(व्याख्याभाष्यम्)

वर्णव्यत्यये चार्थान्तरगमनान्मन्यामहे 'ऽर्थवन्तोवर्णा' इति । 'कूपः सूपो यूप' इति । 'कूप' इति सककारेण कश्चिदर्थो गम्यते । 'सूप' इति ककारापाये सकारोपजने चार्थान्तरं गम्यते । 'यूप' इति ककारसकाराऽपाये यकारोपजने चार्थान्तरं गम्यते । ते मन्यामहे-'यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्ये'ति ॥

विमला – वर्णव्यत्यय इति । अर्थवन्तो वर्णा इत्यनुकृष्यते । तथा च वर्णा अर्थवन्तोऽर्थान्वयव्यतिरेकानुविधायित्वादित्यर्थे वर्णव्यत्ययेचार्थान्तरगमनात् । वर्णानुपलब्धौ चानर्थगतेरिति वार्तिकयोस्तात्पर्यमवसेयम् ।

(७२-अर्थवत्तासाधकं तृतीयवार्तिकम्-१३)

॥*॥ वर्णानुपलब्धौ चानर्थगतेः

वृक्ष ऋक्षः काण्डीर आण्डीर इति[1] ॥*॥

(व्याख्याभाष्यम्)

वर्णानुपलब्धौ चानर्थगतेर्मन्यामहे "ऽर्थवन्तो वर्णा" इति । वृक्ष ऋक्षः, काण्डीर आण्डीरः (इति)[2] । 'वृक्ष' इति सवकारेण कश्चिदर्थोऽव[3] गम्यते, 'ऋक्ष' इति वकारापाये सोऽर्थो न गम्यते । 'काण्डीर' इति सककारेण कश्चिदर्थो गम्यते, 'आण्डीर' इति ककारापाये सोऽर्थो न गम्यते ॥

(आक्षेपभाष्यम्)

किं तर्ह्युच्यते – 'अनर्थगतेः' इति । न साधीयो ह्यत्राऽर्थस्य गतिर्भवति ।

---

१. इदं भाष्यमेव न वार्तिकखण्डमिति प्राञ्चः । नव्यास्तु वार्तिकखण्डमेवैतदिति ।

२. पदमिदं क्वचिदपि न दृश्यते ।   ३ 'अव' इति क्वचिन्नास्ति ।

विमला – न साधीय इति । क्रियाविशेषणमेतत् । अत्र ऋक्ष आण्डीरादौ अर्थस्य गतिरवगतिः साधीयः साधुतरं यथास्यात्तथा न भवति । अपितु भवत्येवेति काक्वा व्यज्यते ।

(समाधानभाष्यम्)

एवं तर्हीदं पठितव्यं स्यात् – ''वर्णानुपलब्धौ चाऽतदर्थगतेः'' इति ।।

किमिदम् – 'अतदर्थगते'रिति ! ।।

तस्यार्थस्तदर्थः, तदर्थस्य गतिस्तदर्थगतिः, न तदर्थगतिरतदर्थगतिरतदर्थगतेरिति । अथवा सोऽर्थस्तदर्थस्तदर्थस्य गतिस्तदर्थगतिर्न तदर्थगतिरतदर्थगतिरतदर्थगतेरिति ।

विमला – यद्यप्यनर्थगतेरित्यस्यातदर्थगतेरित्यर्थकत्वं सम्भवति, तथापि तुष्यतु दुर्जनन्यायेनाह - **एवन्तर्हीति** । इष्टार्थमुपपत्तये इति शेषः ।

(आक्षेपभाष्यम्)

स तर्हि तथा निर्देशः कर्तव्यः ? ।।

(सिद्धान्तिसमाधानभाष्यम्)

न कर्तव्यः । उत्तरपदलोपोऽत्र द्रष्टव्यः । तद्यथा – उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः । खरमुखः । एवमतदर्थगतेरनर्थगतेरिति ।।

विमला – न कर्तव्य इति । अस्याग्रे किन्त्वर्थशब्दस्य तदर्थे लक्षणा कर्त्तव्येति पूरणीयम् । प्रकृते तत्पदस्योत्तरपदत्वाभावेनोत्तरपदलोपेन तथार्थकत्वस्य कल्पयितुमशक्यत्वात् । भाष्ये – उत्तरपदलोपोऽत्र द्रष्टव्य इति दृष्टान्तप्रदर्शनमिति बोध्यम् । यद्यपि न सोऽसः असश्चासावर्थश्चेत्यनर्थः अनर्थस्य गतिरनर्थगतिरिति समासे – उत्तरपदलोपेनापि निर्वाहः सम्भवतीति लक्षणायां न मानम् । तथापि तस्यार्थस्तदर्थः, तदर्थस्य गतिस्तदर्थगतिः न तदर्थगतिरतदर्थगतिरिति । अथवा सोऽर्थस्तदर्थः तदर्थस्य गतिस्तदर्थगतिः न तदर्थगतिरदर्थगतिरिति भाष्योक्तपक्षद्वये लक्षणैव शरणमिति विभावनीयम् ।

(७३-अर्थवत्तासाधकं चतुर्थवार्तिकम् - १४)

।।*।। *संघातार्थवत्त्वाच्च* ।।*।।

(व्याख्याभाष्यम्)

संघातार्थवत्त्वाच्च मन्यामहे 'ऽर्थवन्तो वर्णा' इति । येषां संघाता अर्थवन्तोऽवयवा अपि तेषामर्थवन्तः ।। येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः । तद्यथा – एकश्चक्षुष्मान्दर्शने समर्थः तत्समुदायश्च शतमपि समर्थम् । एकश्च तिलस्तैलदाने समर्थः तत्समुदायश्च खार्यपि तैलदाने समर्था । येषां पुनरवयवा अनर्थकाः, समुदाया अपि तेषामनर्थकाः । तद्यथा — एकोऽन्धो दर्शनेऽसमर्थस्तत्समुदायश्च शतमप्यसमर्थम्, एका च सिकता तैलदानेऽसमर्था, तत्समुदायश्च खारीशतमप्यसमर्थम् ।

विमला – संघातार्थवत्त्वाच्चेति । अर्थवन्तो वर्णा इत्यनुषज्यते, तथा च प्रयोगः– वर्णा अर्थवन्तोऽर्थवत्समुदायारम्भकत्वात्, यन्नैवं तन्नैवम् ।

(अर्थवत्तादूषणभाष्यम्)

यदि तर्हीमे वर्णा अर्थवन्तः, अर्थवत्कृतानि प्राप्नुवन्ति ।।

कानि ?

"अर्थवत्प्रातिपदिकम्" इति प्रातिपदिकसंज्ञा, "प्रातिपदिकाद्" इति स्वाद्युत्पत्तिः, "सुबन्तं पदम्" इति पदसंज्ञा ।।

तत्र को दोषः ?

"पदस्य" इति नलोपादीनि प्राप्नुवन्ति-धनं वनमिति ।

विमला – स्वाद्युत्पत्तिरिति । न चैकाजद्विर्वचनन्यायेन समुदायादेव स्वाद्युत्पत्तिरिति वाच्यम्, यत्र समुदायकार्येणावयवानामप्युपकारस्तत्रैव तत्प्रवृत्तेः । प्रकृते समुदायाद्विभक्त्युत्पत्तावप्यवयवानां संख्यान्वयाऽनुग्रहासम्भवात् ।

(७४-अर्थवत्तायां दोषनिराकरणवार्तिकम्-१५)

।।*।। संघातस्यैकार्थ्यात्सुबभावो वर्णात् ।।*।।

(व्याख्याभाष्यम्)

संघातस्यैकत्वमर्थः । तेन वर्णात्सुबुत्पत्तिर्न भविष्यति ।।

विमला – संघातस्यैकत्वमर्थ इति । विभक्तिर्हि प्रकृतिबोध्यप्रकृत्यर्थनिष्ठसंख्याया द्योतिका भवति । पञ्चकम्प्रातिपदिकार्थ इति सिद्धान्तात् । संख्या संघातस्यार्थो नावयवानामित्यवयवादुत्पन्ना विभक्तिर्निरर्थिकैव स्यात्तथा तु नोचितमेकवचनमित्यादिमहासंज्ञानुरोधादिति नावयवेभ्यो विभक्त्युत्पत्तिरिति भावः ।

(७५-अनर्थकतासाधकप्रथमवार्तिकम्-१६)

।।*।। अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः ।।*।।

(व्याख्याभाष्यम्)

अनर्थकास्तु वर्णाः ।।

कुतः ? 'प्रतिवर्णमर्थानुपलब्धेः' ।

न हि प्रतिवर्णमर्था उपलभ्यन्ते । किमिदं प्रतिवर्णमिति ?

वर्णं वर्णं प्रति प्रतिवर्णम् ।।

विमला – अर्थानुपलब्धेरिति । यद्यर्था भवेयुस्तर्ह्युपलभ्येरन् । नोपलभ्यन्तेऽतस्ते न सन्ति योग्यानुपलब्धेरभावग्राहकत्वादिति भावः । **किमिदम्प्रतिवर्णमिति** । प्रतिशब्दस्यानेकार्थत्वात्सन्देहेन समुदायद्वाराऽवयवे प्रश्नः । **वर्णं वर्णमिति** । तथा च वीप्सार्थकोऽत्र प्रतिरित्युत्तरम् ।

(७६-अनर्थकत्वसाधकं द्वितीयवार्तिकम् - १७)

।।*।। *वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात्* ।।*।।

(व्याख्याभाष्यम्)

वर्णव्यत्ययाऽपायोपजनविकारेष्वर्थदर्शनान्मन्यामहे – 'अनर्थका वर्णा' इति ।। वर्णव्यत्यये – कृतेस्तर्कः, कसेः सिकताः, हिंसेः सिंहः । वर्णव्यत्ययो नार्थव्यत्ययः । अपायो लोपः – हतः, घ्नन्ति, घ्नन्तु, अघ्नन् । वर्णापायो नार्थापायः ।। उपजन आगमः – लविता, लवितुम् । वर्णोपजनो नाऽर्थोपजनः ।। विकार आदेशः । घातयति घातकः । वर्णविकारो नार्थविकारः ।। यथैव वर्णव्यत्ययाऽपायोपजनविकारा भवन्ति तद्वदर्थव्यत्ययापायोपजनविकारैर्भवितव्यम् । न चेह तद्वत् । अतो मन्यामहे – 'अनर्थका वर्णा' इति ।

(तटस्थाक्षेपभाष्यम्)

उभयमिदं वर्णेषूक्तम् — 'अर्थवन्तोऽनर्थका' इति च ।। किमत्र न्याय्यम् ?

(समाधानभाष्यम्)

उभयमित्याह ।। कुतः ?

स्वभावतः[१] । तद्यथा समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते, अपरे न । न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुम्, कश्चिद्वाऽनर्थक इति कृत्वा सर्वैरनर्थकैः । तत्र किमस्माभिः शक्यं कर्तुम् – यद्धातुप्रातिपदिकप्रत्ययनिपाता एकवर्णा अर्थवन्तोऽतोऽन्येऽनर्थका इति । स्वाभाविकमेतत् ।।

---

१. एतद्वार्तिकमित्यन्ये, अपरे तु भाष्यं भाष्यवार्त्तिकं वेति ।

(आक्षेपभाष्यम्)

कथं य एष भवता वर्णानामर्थवत्तायां हेतुरुपदिष्टः – 'अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चाऽर्थान्तरगमनाद्वर्णानुपलब्धौ चाऽनर्थगतेः संघातार्थवत्त्वाच्च' इति ?

(समाधानभाष्यम्)

संघातान्तराण्येवैतान्येवंजातीयकानि अर्थान्तरेषु वर्तन्ते — कूपः सूपो यूप इति । यदि हि वर्णव्यत्ययकृतमर्थान्तरगमनं स्यात्, भूयिष्ठः कूपार्थः सूपे स्यात्, सूपार्थश्च कूपे, कूपार्थश्च यूपे, यूपार्थश्च कूपे, सूपार्थश्च यूपे, यूपार्थश्च सूपे । यतस्तु खलु न किंचित्सूपस्य वा यूपे, यूपस्य वा कूपे, कूपस्य वा यूपे, सूपस्य वा कूपे, कूपस्य वा सूपे, यूपस्य वा सूपे । अतो मन्यामहे – 'संघातान्तराण्येतान्येवंजातीयकान्यर्थान्तरेषु वर्तन्त' इति । इदं खल्वपि – भवता वर्णानामर्थवत्तां ब्रुवता साधीयोऽनर्थकत्वं द्योतितम् । यो हि मन्यते – यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति । ऊपशब्दस्त्वस्याऽनर्थकः स्यात् ।।

(दोषस्मारणभाष्यम्)

तत्रेदमपरिहृतम् — 'संघातार्थवत्त्वाच्च' इति ।।

(समाधानभाष्यम्)

एतस्यापि प्रातिपदिकसंज्ञायां परिहारं वक्ष्यति ।।

विमला – परिहारं वक्ष्यतीति । तत्र हि ''**दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः**'' अतदर्थेन गमनासमर्थेन रथाङ्गेन गुणिनो रथस्यार्थभावः गमनसामर्थ्यं

यथाभवति । सुरारम्भकद्रव्यस्य प्रत्येकमुन्मादजननसामर्थ्यविरहेऽपि तत्समुदायस्य सुराद्रव्यस्योन्मा-दजननसामर्थ्यं यथा भवति तथैव वर्णस्य निरर्थकत्वेऽपि समुदायस्याऽर्थवत्त्वं स्यादिति परिहार उक्तः ।

इति वर्णनामर्थवत्ताधिकरणम् ।।

(अथ प्रत्याहारेष्वित्संज्ञकग्रहणाभावाधिकरणम्)

(सूत्रचतुष्टयप्रतीकभाष्यम्)

अइउण् ऋलृक् एओङ् ऐऔच् ।

(७७-आक्षेपवार्तिकम्-१८)

।।*।। प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ।।*।।

(व्याख्याभाष्यम्)

य एतेऽक्षु प्रत्याहारार्था अनुबन्धाः क्रियन्ते, एतेषामज्ग्रहणेन ग्रहणं कस्मान्न भवति ?

किं च स्यात् ?

दधि णकारीयति, मधु णकारीयति । "इको यणचि" इति यणादेशः प्रसज्येत ।।

विमला – प्रत्याहारेऽनुबन्धानामिति । प्रत्याहारपदं वर्णसमाम्नायोपलक्षकम् । अच्पदञ्च-अइउणित्यादि सूत्रचतुष्टयानुबन्धकृतप्रत्याहारमात्रोपलक्षकम् । ग्रहणेष्वित्यस्य ग्राहकेष्वित्यर्थः । कथमित्यस्य ग्रहणमिति शेषः । तच्च प्रत्यासत्त्याऽजादिष्वेव । तथा च वर्णसमाम्नायेऽजादिपञ्चदशप्रत्याहारग्राहकेषु सूत्रचतुष्टयेषु पठितानामनुबन्धा-नामजादिषु कथं ग्रहणन्नेति समुदायार्थः । हल्षु तु नाशङ्काया: प्रवृत्तिः, हकारादौ पुनः पुनरकारोच्चारणेनोच्चारणार्थवर्णरहितहलां हकारादिघटितप्रत्याहारे ग्रहणाभावात् । यत्तु – अचोऽन्यत्रानुबन्धग्रहणे फलाभावेनाऽच्पदं नोपलक्षकमिति तन्न, अड्ग्रहणे चकारस्यापि ग्रहणेन रुचीनामित्यत्र 'अडव्यवाये' इति णत्वस्येण्ग्रहणे चकारग्रहणात् रुरुचिध्वे-

इत्यादौ विभाषेट इति विकल्पेन ढत्वस्य च फलस्य सम्भवात् । चुटुतुलशर्व्यवाये नेति तु वर्णान्तरे चरितार्थमिति प्रत्यहारघटकवर्णेषु न प्रवर्तते । एवम्प्रत्याहारान्तरेष्वपि यथा सम्भवम्फलमूहनीयम् ।

(७८-सिद्धान्तसमाधानवार्तिकखण्डम्-१९)

॥*॥ आचारात् ॥*॥

(भाष्यम्)

किमिदमाचारादिति ? ॥

आचार्याणामुपचारात् । नैतेष्वाचार्या अच्कार्याणि कृतवन्तः ॥

विमला – आचारादिति । आचारोऽत्र सूत्रकृतो निर्देशः '**उणादयो बहुल**' मिति णकारे परे उकारस्य '**तृषिमृषिकृषेरि**' त्यत्र ककारे परे इकारस्य '**ङसिङसोश्चे**'-ति ङकारे परे इकारस्य यणकरणादनुबन्धानामच्पदबोध्यत्वन्नेति ज्ञाप्यते ।

(७९-सिद्धान्तसमाधानवार्तिकखण्डम्-२०)

॥*॥ अप्रधानत्वात् ॥*॥

(व्याख्याभाष्यम्)

अप्रधानत्वाच्च । न खल्वप्येतेषामक्षु प्राधान्येनोपदेशः क्रियते ॥

क्व तर्हि ? हल्षु ॥

कुत एतत् ?

एषा ह्याचार्यस्य शैली लक्ष्यते — यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति – अचोऽक्षु हलो हल्षु ॥

विमला – अप्रधानत्वादित्यस्य हेत्वन्तरत्वमिति प्रकटयितुं चकारमन्तर्भाव्य पठति – अप्रधानत्वाच्चेति । तथा चाऽत्रन्यायप्रयोगः—अनुबन्धाः प्रत्याहारजन्यबोधविषयत्वाभाववन्तोऽप्रधानत्वात्, प्रधानाप्रधानयोः प्रधान एव कार्यप्रवृत्तेः । न

खल्विति । **एतेषामिति** । हलामित्यर्थः । **अक्ष्विति** । अजादिसंज्ञार्थसूत्रेष्वित्यर्थः । प्राधान्येनेति । ग्रहणार्थत्वेनेत्यर्थः । **उपदेश इति** । उच्चारणम् । **हल्ष्विति** । हलादिसंज्ञार्थसूत्रेष्वित्यर्थः । अस्य हलामित्यादिः । प्राधान्येनोपदेश इति शेषः । अनुबन्धानान्तु नात्रापि ग्रहणार्थत्वेनोपदेशः तथोपदेशे हलादिपदेनानुबन्धानामग्रहणे भगवतो भ्रान्तत्वापत्तेरिति बोध्यम् । **उपदिशतीति** । अस्य प्राधान्येनेत्यादिः । हल्ष्वप्यनुबन्धानान्तथा नोपदेश इति हकारादौ पुनः पुनरकारोच्चारणेन बोध्यते इत्यवगन्तव्यम् । यत्तु '**तृषिमृषिकृषेरि**' ति निर्देशस्य सौत्रत्वेनाप्युपपत्तिसम्भवात्, **आचारादिति** हेतुर्न स्वार्थसाधक इत्यरुचेराह – **अप्रधानत्वादिति** । तत्र निर्देशेन साक्षाच्छास्त्रबाधकल्पनापेक्षयाऽनुबन्धानामजादिपदबोध्यत्वाभाव इति ज्ञापनद्वारैव शास्त्रबाधकल्पनौचित्यादिति ।

(८०-सिद्धान्तसमाधानवार्तिकतृतीयखण्डम्-२१)

।।।। लोपश्च बलवत्तरः ।।*।।*

(भाष्यम्)

लोपः खल्वपि तावद्भवति ।।

विमला – लोपश्च बलवत्तर इति । अनुबन्धाः प्रत्याहारजन्यबोधविषयत्वाभाववन्तो लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वादिति प्रयोगः । **तावद्भवतीति** । परत्वान्नित्यत्वादन्तरङ्गत्वाच्च लोपे कृते संज्ञाप्रवृत्तिकालेऽनुबन्धानामसत्त्वादेव तेषामजादिसंज्ञा नेति भावः । नन्वेवं सति तेन संज्ञाऽपि न सिद्ध्येदिति चेन्न । **आदिरन्त्येने**त्यस्यान्त्येत्सदृशेन सहित आदिसदृशः स्वघटकानुयोगिकसादृश्यप्रतियोगित्वेन विवक्षितवर्णनिष्ठान्तता-निरूपकस्य स्वघटकानुयोगिकसादृश्यप्रतियोगित्वेन विवक्षितवर्णनिष्ठादितानिरूपकस्य च समुदायस्य घटकानां संज्ञेत्यर्थकरणेनादोषात् । अनुबन्धेन प्रत्याहाराश्रयणे तु तेषामित्संज्ञकत्वेन वैयाकरण इत्यत्र चित्स्वरापत्तिर्व्यक्तिपक्षे गत्यन्तराभावश्चेति ।

(८१-सिद्धान्तसमाधानरीत्यन्तरवार्तिकम्-२१)

।।।। ऊकालोऽजिति वा योगस्तत्कालानां यथा भवेत् । अचां ग्रहणमच्कार्यं तेनैषां न भविष्यति ।।*।।*

(व्याख्याभाष्यम्)

अथवा योगविभागः करिष्यते – "ऊकालोऽच्" । उ ऊ उ ३ इत्येवं कालोऽज्भवति । ततो 'ह्रस्वदीर्घप्लुतः' । ह्रस्वदीर्घप्लुतसंज्ञश्च भवति – ऊकालोऽच् ।।

विमला – प्रधानाऽप्रधानयोरिति न्यायाद्यनभिज्ञम्प्रति समाधानान्तरमाह – **ऊकालोऽजिति** । **ऊकालोऽज्ह्रस्वदीर्घप्लुत इत्यत्र** योगविभागः करिष्यते 'ऊकालोजि' त्येको योगः । ऊकालस्याच्संज्ञाविधायकः, आदिरन्त्येनैवाऽच्संज्ञासिद्धावयं योगो नियमार्थः । ऊकाल एवाच्संज्ञकः स्यादिति तेनाऽनुबन्धानामच्संज्ञा न भविष्यति । ततो ह्रस्वदीर्घप्लुतः, ऊकालोऽजित्यनुवर्तते, ऊकालोऽच् ह्रस्वदीर्घप्लुतसंज्ञश्च भवतीति द्वितीययोगस्यार्थः ।

(आक्षेपभाष्यम्)

एवमपि कुक्कुट इत्यत्रापि प्राप्नोति ।।

विमला – अत्रैकदेशी दोषमाह – **एवमपीति** । वस्तुतो **न मात्रिकं व्यञ्जनमस्तीति** भाष्याद्व्यञ्जने मात्रिकत्वं वचनसहस्रेणापि प्रतिपादयितुमशक्यमिति नायं दोषः ।

(समाधानभाष्यम्)

तस्मात्पूर्वोक्त एव परिहारः ।।

विमला – **तस्मात्** । न मात्रिकं व्यञ्जनमस्तीतिभिप्रायस्थहेतोः । पूर्वोक्तः = आचारादित्यादिनोक्तः परिहार एवेत्यर्थः । तथा चैवकारस्य क्रियासंगतत्वेनात्यन्तायोगव्यवच्छेदार्थकतया **नीलं सरोजम्भवत्येवेत्यत्र** कदाचिदन्यादृशगुणयुक्तसरोजस्येवात्राप्ययमपि परिहार इति गम्यते । अथवा पूर्वोक्त एवेत्यस्य **'एओङ्'** सूत्रोक्तः **न मात्रिकं व्यञ्जनमस्तीति** परिहार एवात्र न परिहारान्तरापेक्षेति भावः ।

(भाष्यम्)

एष एवार्थः ।। अपर आह —

।।*।। ह्रस्वादीनां[1] वचनात् प्राग्यावत्तावदेव योगोऽस्तु । अच्कार्याणि यथा स्युस्तत्कालेष्वक्षु कार्याणि ।।*।।

विमला – पूर्वोक्तयोगविभागेन समाधानस्यादुष्टत्वं द्रढयितुमृष्यन्तरसंवादमाह – **ह्रस्वादीनाँव्वचनादिति** । ह्रस्वदीर्घप्लुत इति वचनात्पूर्वम् । "**ऊकालोजि**"-त्येतन्मात्रमेको योगोऽस्त्वित्यर्थः । **अच् कार्याणीति** । अज्निमित्तकार्याणि तत्कालेषु, ऊकालेषु, कार्याणि, कर्त्तुमर्हाणि यथा स्युरित्यर्थः ।

इति प्रत्याहारेष्वितां ग्रहणाभावाधिकरणम्

('अणुदित्' सूत्रेऽण्पदप्रयोजनाधिकरणम्)

(जिज्ञासाभाष्यम्)

अथ किमर्थमन्तःस्थानामणूपदेशः क्रियते ?

विमला – **अथ किमर्थमिति** । अन्तःस्थानामिति । बोधनायेति शेषः । अण्सूपदेशोऽण्शब्देषूच्चारणं किमर्थं क्रियत इत्यन्वयः । अणुदिदित्यत्र अजुदिदित्येव कर्त्तव्यमिति प्रश्नाशयः । यत्तु इण् इत्येव सूत्रं कर्त्तव्यम् । यवरलट् इति ततोऽग्रे कर्त्तव्यम् । तेन तेषामट्त्वस्याश्त्वस्य हल्त्वस्याल्त्वस्य च सिद्धिः । शर्व्यवायेऽपीत्यत्र रप्रश्लेषेण द्विरेफनिर्देशेन रोरीति लोपे सौत्रत्वाद्दीर्घे, इणि रेफाग्रहणेऽपि गीर्ष्वित्यत्र न दोष इति प्रश्नतात्पर्यमिति **छायाकारेणोक्तं** तन्न मनोरमम्, तथा **न्यासे**-इणि लकार ग्रहणाऽनापत्तौ कमल्ष्वित्यत्र षत्वानापत्तेः ।

(समाधानभाष्यम्)

इह सँय्यूँयन्ता सँव्वूँवत्सरः यँल्लूँलोकं तँल्लँलोकमिति परसवर्णस्यासिद्धत्वादनुस्वारस्यैव द्विर्वचनम् । तत्र परस्य परसवर्णे कृते तस्य ययूग्रहणेन ग्रहणात् पूर्वस्यापि परसवर्णो यथा स्यात् ।।

विमला – **यथा स्यादिति** । अन्यथा वर्णसमाम्नाये निरनुनासिकस्यैव पाठेन सानुनासिकस्य यय्त्वाभावेनात्र परसवर्णो न स्यादिति भावः ।

---

१. 'ऊकालोजिति' इति वार्तिकान्तरोक्त एवार्थो 'ह्रस्वादीनां' इत्यपरोक्तवार्त्तिकस्येत्यर्थः ।

(समाधानबाधकभाष्यम्)

नैतदस्ति प्रयोजनम् । वक्ष्यत्येतत्, 'द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम्' इति । यावता सिद्धत्वमुच्यते परसवर्ण एव तावद्भवति ।।

(समाधानसाधकभाष्यम्)

परसवर्णे तर्हि कृते तस्य यर्ग्रहणेन ग्रहणाद्द्विर्वचनं यथा स्यात् ।।

विमला – यावता ग्रन्थेन सिद्धत्वमुच्यते तावता ग्रन्थेन परसवर्ण एव समुपपादितम्भवति, न तु द्विर्वचनम् । परसवर्णस्य यत्त्वाभावेन द्विर्वचनं न स्यादेव । अणुदिदिति यथान्यासे तु परसवर्णस्य यर्ग्रहणेन ग्रहणात् । द्विर्वचनमपि सिद्ध्यतीति भावः ।

(समाधानबाधकभाष्यम्)

माभूद् द्विर्वचनम् ।।

(समाधानसाधकभाष्यम्)

ननु च भेदो भवति — सति द्विर्वचने त्रियकारकम्, असति द्विर्वचने द्वियकारकम् ।।

विमला – ननु च भेदो भवतीति । व्यञ्जनपरस्यैकस्यानेकस्य वोच्चारणे विशेषो नास्तीति तु सूक्ष्मत्वेन दुर्लक्ष्यत्वप्रतिपादक इति न तद्विरोध इति भावः ।

(समाधानबाधकभाष्यम्)

नास्ति भेदः । सत्यपि द्विर्वचने द्वियकारकमेव ।। कथम् ?

"हलो यमां यमि लोपः" इत्येवमेकस्य लोपेन भवितव्यम् ।।

(समाधानसाधकभाष्यम्)

एवमपि भेदः । सति द्विर्वचने कदाचिद्द्वियकारकम्, कदाचित् त्रियकारकम् । असति द्वियकारकमेव ।। स

एष कथं भेदो न स्यात् ? यदि नित्यो लोपः स्यात् । विभाषा च स लोपः ।।

(समाधानबाधकैकदेशिभाष्यम्)

यथाऽभेदस्तथाऽस्तु ।।

(समाधानसाधकसिद्धान्तिवार्तिकम्)

।।*।। अनुवर्तते विभाषा, शरोऽचि यद्वारयत्ययं द्वित्वम् ।।*।।

(व्याख्याभाष्यम्)

यदयं "शरोऽचि" इति द्विर्वचनप्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यो – 'ऽनुवर्तते विभाषे'ति ।।

विमला – अनुवर्तते विभाषेति । झयो होऽन्यत्तरस्यामिति सूत्रादित्यादिः । शरोऽचीत्ययं यद्द्वित्वं वारयतीत्यन्वयः । झरोझरीत्यत्र विभाषानुवृत्तौ मध्यपठिते हलोयमामिति सूत्रेऽपि विभाषानुवृत्तिर्यातैवेति बोध्यम् ।

(जिज्ञासाभाष्यम्)

कथं कृत्वा ज्ञापकम् ? ।

(तस्यैव हेतुसूचकमुत्तरार्द्धवार्तिकम्)

।।*।। नित्ये हि तस्य लोपे, प्रतिषेधार्थो न कश्चित्स्यात् ।।*।।

(व्याख्याभाष्यम्)

यदि नित्यो लोपः स्यात्, प्रतिषेधवचनमनर्थकं स्यात् । अस्त्वत्र द्विर्वचनम्, "झरो झरि सवर्णे" इति लोपो भविष्यति । पश्यति त्वाचार्यः – 'विभाषा स लोपः' इति, ततो द्विर्वचनप्रतिषेधं शास्ति ।

(समाधानबाधकभाष्यम्)

नैतदस्ति ज्ञापकम् । नित्येऽपि तस्य लोपे स प्रतिषेधोऽवश्यं वक्तव्यः । यदेतद् "अचो रहाभ्याम्" इति द्विर्वचनम्, लोपापवादः स विज्ञायते ।।

कथम् ?

'यर' इत्युच्यते ! एतावन्तश्च यरः । यदुत झरो वा यमो वा । यदि चाऽत्र लोपः स्याद्द्विर्वचनमनर्थकं स्यात् ।।

किं तर्हि तयोर्योगयोरुदाहरणम् ?

यदकृते द्विर्वचने त्रिव्यञ्जनः संयोगः – प्रत्तम्, अवत्तम्, आदित्यः ।

इहेदानीं कर्त्ता हर्त्तेति द्विर्वचनसामर्थ्याल्लोपो न भवति । एवमिहापि लोपो न स्यात्कर्षति वर्षतीति । तस्मान्नित्येऽपि लोपेऽवश्यं स प्रतिषेधो वक्तव्यः ।।

विमला – लोपापवाद इति । आरम्भसामर्थ्याल्लोपशास्त्रे स्वविहितकार्याश्रयातिरिक्तत्वेन संकोचक इत्यर्थः । स विज्ञायते, भवतीत्यर्थः । **त्रिव्यञ्जनः संयोग इति** । द्वित्वमन्तरैव व्यञ्जनत्रयघटितः समुदाय इत्यर्थः ।

(उपसंहारभाष्यम्)

तदेतदत्यन्तं संदिग्धं वर्त्तते – आचार्याणां 'विभाषाऽनुवर्त्तते न वे'ति ।।५।।

विमला – तदिति । लोपस्य नित्यत्वेऽपि "शरोची" ति निषेधस्यावश्यकत्वादित्यर्थः । **एतदिति** । अन्यतरस्यां ग्रहणानुवर्तनम् ।

इतिपरिभाषाधिकरणम्

(शिवसूत्रम्)

लण् ।।६।।

(व्याख्यानतइतिपरिभाषाधिकरणम्)

(आक्षेपभाष्यम्)

अयं णकारो द्विरनुबध्यते-पूर्वश्चैव परश्च । तत्राऽणूग्रहणेषु इणूग्रहणेषु च संदेहो भवति – 'पूर्वेण वा स्युः, परेण वे'ति ।

विमला – संदेहो भवतीति । अकारादिपूर्व-णकारान्तसमुदायघटकवर्णवृत्तिजात्य-वच्छिन्नबोधतात्पर्येणोच्चारितम् आहोस्वित् - अकारादिपरणकारान्तसमुदायघटकवर्ण-वृत्तिजात्यवच्छिन्नबोधतात्पर्येणेति तात्पर्यसंदेह इत्यर्थः ।

(प्रत्याक्षेपभाष्यम्)

कतमस्मिंस्तावदण् ग्रहणे संदेहः ?

(प्रत्याक्षेपसमाधानभाष्यम्)

"ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति ।।

(८२-सिद्धान्तिसमाधानवार्तिकम्-१)

।।*।। *असंदिग्धम्* ।।*।।

(व्याख्याभाष्यम्)

असंदिग्धम् — पूर्वेण, न परेण ।।

(हेत्वाक्षेपभाष्यम्)

कुत एतत् ?

(८३-सिद्धान्त्येकदेशिहेतुसूचकं वार्तिकम्-२)

।।*।। *पराऽभावात्* ।।*।।

(व्याख्याभाष्यम्)

नहि ढ्रलोपे (परे) परेऽणः सन्ति ।।

विमला – असंदिग्धं पराभावात्सवर्णेऽण् तु परं ह्युर्ऋत् । य्वोरन्यत्र परेणेण् स्याद्व्याख्यानाच्च द्विरुक्तितः ।। इति वार्तिकं खण्डशो व्याख्यायते– **असंदिग्धमिति । पराऽभावादिति** । परणकारकृतप्रत्याहारानाश्रयणे यादृशलक्ष्या-सिद्धिस्तादृशलक्ष्याभावादिति लक्ष्योऽर्थः । ननु वृहू उद्यमने-इत्यतस्तृऽच्यूदित्वादिडभावे गुणे ढत्वधत्वष्टुत्वढलोपेषु कृतेषु रेफस्य दीर्घे स्थानसाम्यादृकारे ढलोपस्यासिद्धत्वात् "उपधायाश्चे" तीत्वे रपरे पूर्वेण 'आद्गुण' इति गुणे वेर्ढेति यथास्यादित्यर्थम्परेणाण् ग्रहणं स्यादिति चेन्न, अन्तरङ्गपरिभाषया पूर्वगुणस्यासिद्धत्वेन वर्ढेत्यस्यैवेष्टत्वात् ।

(हेतुनिरासभाष्यम्)

ननु चायमस्ति – 'आतृढ आवृढ' इति ।।

(सिद्धान्तिसमाधानभाष्यम्)

एवं तर्हि सामर्थ्यात्पूर्वेण, न परेण । यदि हि परेण स्यादणूग्रहणमनर्थकं स्याद्, "ढ्रलोपे पूर्वस्य दीर्घोऽचः" – इत्येव ब्रूयात् ।। अथ वैतदपि न ब्रूयात् । अचो ह्येतद्भवति–'ह्रस्वो दीर्घः प्लुत' इति ।

(आक्षेपभाष्यम्)

अस्मिंस्तर्ह्यणूग्रहणे संदेहः - 'केऽणः' इति ।

(समाधानभाष्यम्)

असंदिग्धं पूर्वेण, न परेण ।।

(प्रश्नतदुत्तरभाष्यम्)

कुत एतत् ?

'पराऽभावात्' ।।

नहि के परेऽणः सन्ति ।।

विमला – पराऽभावादिति । अत्रापि पराभावादित्यस्यानुपदोक्त एवार्थः । अत्र प्रकरणे सर्वत्रैव पराभावादित्स्यैवमेवार्थः करणीयः । **नहीति** । ककाराव्यवहित-

पूर्वत्वविशिष्टा: परणकारकृतप्रत्याहारसंग्राह्या: पूर्वणकारकृतप्रत्याहारासंग्राह्या वर्णा न सन्तीत्यर्थ: ।

(हेतुनिरासभाष्यम्)

ननु चायमस्ति – 'गोका' 'नौके'ति ।।

(सिद्धान्तिसमाधानभाष्यम्)

एवं तर्हि सामर्थ्यात्पूर्वेण, न परेण । यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात् । "केऽचः" इत्येव ब्रूयात् । अथवैतदपि न ब्रूयात् । अचो ह्येतद्भवति – 'ह्रस्वो दीर्घः प्लुत' इति ।।

(आक्षेपभाष्यम्)

अस्मिंस्तर्ह्यण्ग्रहणे सन्देहः – अणोऽप्रगृह्यस्यानुनासिकः' इति ।।

(समाधानभाष्यम्)

असंदिग्धं पूर्वेण, न परेण ।।

कुत एतत् ?

'पराऽभावात्' । न हि पदान्ताः परेऽणः सन्ति ।।

विमला – पदान्ता इति । अवसानस्य तत्रैव सम्भवादिति भाव: । एतेन पदान्ता इत्यस्य सूत्रेऽधिकाराभावेन पदान्ता इति कथनमसंगतमिति वदन्त: प्रत्युक्ता: । पदचरमावयवीभूता: परणकारकृतप्रत्याहारसंग्राह्या पूर्वणकारकृतप्रत्याहारासंग्राह्या वर्णा न सन्तीत्यर्थ: । एतस्यैकदेश्युक्तित्वेन न वृक्षवाद्यनभिधानकल्पकत्वम् । एतेन "**न पदान्तापरेऽण: सन्तीति**" भाष्याद्वृक्षवादेरनभिधानमेवञ्च यकाराभावेन "**नय्वाभ्यामि**" ति सूत्रस्यैव वैयर्थ्यापत्तिरित्याशङ्क्य पदान्ता इत्यस्य कार्यभाज इति शेष इति कल्पयन्त: परास्ता: । एतस्यैकदेश्युक्तित्वादेवाग्रे **ननु चायमस्ति कर्तृ हर्तृ** इत्यादिनैतस्य खण्डनं भगवता कृतमित्यवधेयम् ।

(हेतुनिरासभाष्यम्)

ननु चायमस्ति – 'कर्तृ हर्तृ' इति ।

(सिद्धान्तिसमाधानभाष्यम्)

एवं तर्हि सामर्थ्यात्पूर्वेण, न परेण । यदि हि परेण स्याद्, अणूग्रहणमनर्थकं स्याद्, "अचोऽप्रगृह्यस्यानुनासिकः" इत्येव ब्रूयात् । अथवैतदपि न ब्रूयात्, अच एव हि प्रगृह्या भवन्ति ।।

विमला – **कर्तृ हर्त्रिति** । अग्ने, वायो इत्यस्याप्युपलक्षणमिदम् । **अच एव प्रगृह्या भवन्तीति** । अप्रगृह्यस्येति पर्युदासादिति भावः ।

(आक्षेपभाष्यम्)

अस्मिंस्तर्ह्यणूग्रहणे संदेहः – "उरण्रपरः" इति ।।

(समाधानभाष्यम्)

असंदिग्धं[1] पूर्वेण, न परेण ।।

कुत एतत् ? 'पराभावात्' ।

न ह्युः स्थाने परेऽणः सन्ति ।।

(हेतुनिरासभाष्यम्)

ननु चायमस्ति – 'कर्त्रर्थं' 'हर्त्रर्थ'मिति ।

(आपत्तिप्रश्नभाष्यम्)

किं च स्याद् यद्यत्र रपरत्वं स्यात् ?

(अनिष्टापत्तिप्रदर्शनभाष्यम्)

द्वयो रेफयोः श्रवणं प्रसज्येत ।।

---

१. 'असन्दिग्धम्' इदं वार्तिकमेवेति गौड़ाः, आधुनिकास्तु भाष्यमेवेति ।

(आपत्तिबाधकभाष्यम्)

"हलो यमां यमि लोपः" इत्येवमेकस्याऽत्र लोपो भविष्यतीति ।।

(आपत्तिसाधकभाष्यम्)

विभाषा स लोपः, विभाषा श्रवणं प्रसज्येत ।।

(आपत्तिबाधकभाष्यम्)

अयं तर्हि नित्यो लोपः "रो रि" इति ।।

(आपत्तिसाधकभाष्यम्)

'पदान्तस्ये'त्येवं सः ।।

(आपत्तिबाधकभाष्यम्)

न शक्यः स 'पदान्तस्ये'त्येवं विज्ञातुम् । इह हि लोपो न स्यात्, – जर्गृधेर्लङ् अजर्घाः, पास्पर्द्धेः अपास्पाः इति ।।

(आपत्तिसाधकभाष्यम्)

इह तर्हि – मातॄणां पितॄणामिति रपरत्वं प्रसज्येत ।।

विमला – इह तर्हीति कर्त्रर्थं हर्त्रर्थमित्यत्र लोपेन निर्वाहेऽपि मातॄणामित्यत्र दीर्घस्य ऋकारस्थाने जायमानवेनाण्त्वेन च रपरत्वापत्तिः स्यादेवेति भावः ।

(आपत्तिबाधकभाष्यम्)

आचार्यप्रवृत्तिर्ज्ञापयति – 'नाऽत्र रपरत्वं भवती'ति । यदयम् "ऋत इद्धातोः" इति धातुग्रहणं करोति ।।

कथं कृत्वा ज्ञापकम् ?

धातुग्रहणस्यैतत्प्रयोजनम् – इह माभूत् – मातॄणां पितॄणामिति । यदि चात्र रपरत्वं स्याद्धातुग्रहणमनर्थकं स्यात् । रपरत्वे कृतेऽनन्त्यत्वादित्त्वं न भविष्यति ।

पश्यति त्वाचार्यो – 'नात्र रपरत्वं भवती'ति । ततो धातुग्रहणं करोति ।।

(आपत्तिसाधकभाष्यम्)

इहापि तर्हि न प्राप्नोति – 'चिकीर्षति जिहीर्षती'ति ।।

(आपत्तिबाधकभाष्यम्)

माभूदेवम् । 'उपधायाश्च' इत्येवं भविष्यति ।

(आपत्तिसाधकभाष्यम्)

इहापि तर्हि प्राप्नोति – 'मातॄणां पितॄणा'मिति ।। तस्मात्तत्र धातुग्रहणं कर्तव्यम् ।

विमला – धातुग्रहणं कर्तव्यमिति । मातृणामित्यत्र रपरत्वेऽनन्त्यत्वादेव "**ऋत इदि**" त्यस्याप्राप्तौ धातुग्रहणं व्यर्थं सदधातोर्ऋकारस्य रपरत्वं नेति ज्ञापयत्येतावतैव मातृणामित्यत्रेत्ववारकत्वेन धातुग्रहणस्य चारितार्थ्यसम्भवे ऋकारस्य रपरत्वं नेति सामान्यकल्पनायां सामर्थ्याभावेन चिकीर्षतीत्यत्र 'अज्झने' ति दीर्घस्य रपरत्वं स्यादेवेति, "**ऋत इदि**" त्यनेनेत्त्वाप्राप्तिः । "**उपधायाश्चे**" त्यनेनेत्वविधाने तेनैव मातृणामित्यत्रापीत्वापत्तिरिति '**उपधायाश्चे**' त्यत्र धातुग्रहणसम्बन्धाय "**ऋत इदि**" ति सूत्रे धातुग्रहणमावश्यकमित्यधातोर्ऋकारस्य रपरत्वं नेति ज्ञापकत्वासम्भवेन "उरण्र५र" इत्यत्र परेणाण् ग्रहणे मातृणामित्यत्र रपरत्वं प्राप्नोत्येवेति भावः ।

(सिद्धान्तिसमाधानभाष्यम्)

एवं तर्हि — सामर्थ्यात्पूर्वेण, न परेण । यदि परेण स्याद्, अण्ग्रहणमनर्थकं स्यात् । "उरत्रपरः" इत्येव ब्रूयात् ।

विमला – "**उरण्रपर**" इत्यत्र पराभावादेव सन्देहाभावेन पूर्वेणैवाण्ग्रहणमिति पक्षस्य मातृणामित्यत्र परस्याप्यणः सम्भवेन खण्डनं कृतम् । एवञ्च "**उरण्रपर**" इत्यत्रापि पूर्वेण वा स्यात् परेण वेति सन्देहस्य दुरुद्धरत्वेन तदुद्धाराय सिद्धान्ती समाधानमभिधातुं प्रक्रमते **एवन्तर्हीति** । एवमुच्यते चेत्तर्हीदं समाधानमित्यर्थः ।

"**उरज्रपर**" इत्येव ब्रूयादिति । अयम्भाव: — हकारयकारवकाराणामृकारस्थाने जायमानत्वाभावेनैव न तदर्थमण् ग्रहणं रेफलकारयोर्ऋकारस्थाने जायमानत्वेऽपि तत्र रोरीत्यनेनैव निर्वाह इति भाव: । इदमत्र चिन्त्यम् । एचोऽप्यृकारस्थाने जायमानत्वाभावेन "**उरग्रपर**" इत्येव कुतो नोक्तमिति ।

(आक्षेपभाष्यम्)

अस्मिंस्तर्ह्यण्ग्रहणे संदेहः — "अणुदित्सवर्णस्य चाप्रत्ययः" इति ।

(समाधानभाष्यम्)

असंदिग्धं परेण, न पूर्वेण ॥

(हेत्वाक्षेपभाष्यम्)

कुत एतत् ?

(८४-सिद्धान्तवार्तिकम्-३)

॥*॥ *सवर्णेऽण् तपरं ह्युऋृत्* ॥*॥

(व्याख्याभाष्यम्)

यदयम् "उऋृद्" इत्यृकारे तपरकरणं करोति, तज्ज्ञापयत्याचार्यः — 'परेण, न पूर्वेणे'ति ॥

(आक्षेपभाष्यम्)

इण्ग्रहणेषु तर्हि संदेहः ॥

(समाधानभाष्यम्)

असंदिग्धम्, परेण, न पूर्वेण ॥

(हेतुजिज्ञासाभाष्यम्)

कुत एतत् ?

(८५-सिद्धान्तहेतुवार्तिकम्-४)

॥॥ य्वोरन्यत्र परेणेण् स्यात् ॥*॥*

(व्याख्याभाष्यम्)

यत्रेच्छति पूर्वेण, संमृद्य ग्रहणं तत्र करोति — 'य्वो'रिति । तच्च गुरु भवति ॥

कथं कृत्वा ज्ञापकम् ?

तत्र विभक्तिनिर्देशे संमृद्यग्रहणे चार्द्धचतस्रो मात्राः, प्रत्याहारग्रहणे पुनस्तिस्रो मात्राः । सोऽयमेवं लघीयसा न्यासेन सिद्धे सति यद्गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यः — 'परेण, न पूर्वेण' इति ॥

विमला – संमृद्येति । इकारोकारौ यणा निवर्त्येत्यर्थः । **ग्रहण इति** । य्वोरिति निर्देश इत्यर्थः । **प्रत्याहारग्रहण इति** । इण इति निर्देशे इत्यर्थः ।

(आक्षेपभाष्यम्)

किं पुनर्वर्णोत्सत्ताविवाऽयं णकारो द्विरनुबध्यते ?

विमला – वर्णान्तरोच्छेदे-एकमेव णकारं द्विरनुबध्यागत्या गुरुभूतेनापि व्याख्यान-रूपायासेन सन्देहं निवर्त्य निर्वोढव्यः वर्णान्तरसत्त्वे तु वर्णान्तरानुबन्धकरणे सन्देहाभावेन व्याख्यानापेक्षाभावेन लाघवसम्भवे किमर्थं गुरुभूता पद्धतिराश्रीयते-इत्याशयेन पृच्छति – **किम्पुनरिति** । वर्णोत्सत्तौ वर्णान्तरोच्छेदे यथाण कारो द्विरनुबन्धनीयस्तथा किमर्थमेकमेव णकारो द्विरनुबध्यते । अस्य वर्णान्तरमेवैकत्र कुतो नानुबध्यत इति शेषः ।

(८६-समाधानवार्तिकम्-५)

॥॥ व्याख्यानाच्च द्विरुक्तितः ॥*॥*

(व्याख्याभाष्यम्)

एतज्ज्ञापयत्याचार्यो – भवत्येषा परिभाषा — "व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम्" इति ।-"अणुदित्सवर्णस्य" इत्येतत्परिहाराय पूर्वेणाऽण्-

ग्रहणम्, परेणेण् ग्रहणम्" इति व्याख्यास्यामः ।।६।।

विमला – व्याख्यानत इति । "परेणैवेण् ग्रहाः सर्वे पूर्वेणैवाण् ग्रहा मता । ऋतेऽणुदित्सवर्णस्येत्येतदेकम्परेण तु ।।" इत्यादि व्याख्यानेनेत्यर्थः ।

(शिवसूत्रे)

ञमङणनम् ।।७।। झभञ् ।।८।।

(आक्षेपभाष्यम्)

किमर्थमिमौ मुखनासिकावचनावुभावनुबध्येते, न ञकार एवानुबध्येत ? ।।

(प्रत्याक्षेपभाष्यम्)

कथं — यानि मकारेण ग्रहणानि ?

(प्रत्याक्षेपसमाधानभाष्यम्)

(सन्तु ञकारेण ।।)[1]

(आक्षेपभाष्यम्)

(कथं) "हलो यमां यमि लोपः" इति ।।

(इष्टापत्तिभाष्यम्)

अस्तु ञकारेण – "हलो यञां यञि लोपः" इति ।।

(इष्टापत्तिबाधकभाष्यम्)

नैवं शक्यम् । झक. भकारपरयोरपि झकारभकारयोर्लोपः प्रसज्येत ।।

(इष्टापत्तिसाधकभाष्यम्)

न झकारभकारौ झकारभकारयोः स्तः ।।

---

१. नहि सर्वत्रैतत् ।

(आक्षेपभाष्यम्)

कथं — "पुमः खय्यम्परे" इति ?

(इष्टापत्तिभाष्यम्)

एतदप्यस्तु ञकारेण – "पुमः खय्यञ् परे" इति ।।

(इष्टापत्तिबाधकभाष्यम्)

नैवं शक्यम् । झकारभकारपरेऽपि हि खयि रुः प्रसज्येत ।।

(इष्टापत्तिसाधकभाष्यम्)

न झकारभकारपरः खयस्ति ।।

(समाधानदूषणाय आक्षेपभाष्यम्)

कथं — "ङमो ह्रस्वादचि ङमुण्नित्यम्" इति ?

(इष्टापत्तिभाष्यम्)

एतदप्यस्तु ञकारेण – "ङञो ह्रस्वादचि ङञुण्नित्यम्" इति ।।

(इष्टापत्तिबाधकभाष्यम्)

नैवं शक्यम् । झकारभकारयोरपि हि पदान्तयो-र्झकारभकारावागमौ स्याताम् ।।

(इष्टापत्तिसाधकभाष्यम्)

न झकारभकारौ पदान्तौ स्तः ।।

(इष्टापत्तिबाधकैकदेशिभाष्यम्)

एवमपि पञ्चागमास्त्रय आगमिनो, वैषम्यात्संख्या-तानुदेशो न प्राप्नोति ।।

विमला – पञ्चागमा इति । पञ्चानां ङञ्बोध्यत्वादिति भावः । **त्रय आगमिन इति** । आगमिनो ङञः पञ्चत्वसत्त्वेऽपि झकारभकारयोः पदान्तत्वाभावेन त्रय आगमिनोऽवशिष्टा इति भावः ।

(इष्टापत्तिसाधकैकदेशिभाष्यम्)

सन्तु तावद्येषामागमानामागमिनः सन्ति । झकारभकारौ पदान्तौ न स्त इति कृत्वा आगमावपि न भविष्यतः ।

(अथाक्षरशब्दनिर्वचनम्)

(आक्षेपभाष्यम्)

अथ किमिदमक्षरमिति ?

(८७-सिद्धान्तसमाधानवार्तिकम्-१)

।।।। अक्षरं न क्षरं विद्यात् ।।*।।*

(व्याख्याभाष्यम्)

न क्षीयते न क्षरतीति वाऽक्षरम् ।।

विमला – न क्षीयते न क्षरतीति वेति । अनश्वरमित्यर्थः । स्फोटस्य नित्यतया भवत्यक्षरत्वम् । ध्वनौ तु स्फोटाभिव्यञ्जकत्वेनारोपितोऽक्षरपदप्रयोग इति भावः ।

(८८-सिद्धान्तिसमाधानान्तरवार्तिकम्-२)

।।।। अश्नोतेर्वा सरोऽक्षरम् ।।*।।*

(व्याख्याभाष्यम्)

अश्नोतेर्वा पुनरयमौणादिकः 'सरन्' प्रत्ययः । अश्नुते इत्यक्षरम् ।।

विमला – अश्नोतेर्वेति । एतत्पक्षेऽक्षरपदं व्यापकार्थकम् । अशूव्याप्तौ धातुनिष्पन्नत्वादिति बोध्यम् ।

(८९-सिद्धान्तसमाधानान्तरवार्तिकम्-३)

||*|| वर्णं वाऽऽहुः पूर्वसूत्रे ||*||

(व्याख्याभाष्यम्)

अथवा पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते ।।

(इत्यक्षरशब्दनिर्वचनम्)

(अथाक्षरसमाम्नायोपदेशप्रयोजनम्)

(९०-प्रश्नवार्तिकम्-१)

||*|| किमर्थमुपदिश्यते ? ||*||

अथ किमर्थमुपदेशः क्रियते ?

(९१-समाधानवार्तिकम्-२)

***||*|| वर्णज्ञानं वाग्विषयो, यत्र च ब्रह्म वर्तते ।
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते ||*||***

(व्याख्याभाष्यम्)

सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चाऽस्य ज्ञाने भवति, मातापितरौ चाऽस्य स्वर्गे लोके महीयेते ।।

।। इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे प्रत्याहाराह्निकन्नाम द्वितीयमाह्निकम् ।।२।।

विमला – वर्णज्ञानमिति । वर्णा येन ज्ञायन्ते तद्वर्णज्ञानं नाम व्याकरणशास्त्रम् । वाग्विसीयत आबध्यतेऽनेनेति वाग्विषयः, वाचः पदवाक्यात्मकस्य प्रतिपादक इत्यर्थः । वाचः स्वरूपं दर्शयति – **यत्र चेति** । ब्रह्म वेदः वर्तत इति वेदस्य वाक्यसमूहरूपतया

तस्यावयवरूपायां वाचि विद्यमानत्वादिति भाव: । अथवा ब्रह्म परमात्मा । वर्तत इत्यस्य प्रतिपादकता सम्बन्धेनेत्यादि: ।

तदर्थमिति । तत्पदेन वर्णज्ञानस्य शास्त्रस्य प्रवृत्ते: परामर्श: । शास्त्रप्रवृत्त्यर्थमित्यर्थ: । **इष्टबुध्यर्थमिति** । इष्टस्य कलादिदोषरहितस्य वर्णस्य ज्ञानार्थमित्यर्थ: । **लघ्वर्थमिति** । प्रत्याहारसिद्ध्यर्थमित्यर्थ: । वर्णज्ञानमित्यस्याक्षरसमाम्नाय इति विवरणम् । वाग्विषय इत्यस्य वाक्समाम्नाय इति विवरणम् ।।

इति पण्डितमहेशझाशर्म्म-विरचितायाम्
महाभाष्यव्याख्यायां विमलाख्यायाम् प्रथमाऽध्यायस्य
प्रथमपादे द्वितीयमाह्निकम् ।

।। इति माहेश्वरीयं विधिशेषप्रकरणम् ।।

अथ तृतीयमाह्निकम्

(अथ पाणिनीयं विधिशेषप्रकरणम्)

(वृद्धिसंज्ञासूत्रम्)

वृद्धिरादैच् ।।१।१।१।।

(असाधुत्वनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

कुत्वं कस्मान्न भवति "चोः कुः, पदस्य" इति ?

(समाधानभाष्यम्)

भत्वात् ।।

(आक्षेपभाष्यम्)

कथं भसंज्ञा ?

(समाधानभाष्यम्)

"अयस्मयादीनि च्छन्दसि" इति ।।

(समाधानबाधकभाष्यम्)

'छन्दसी'त्युच्यते, न चेदं छन्दः ।।

(समाधानसाधकभाष्यम्)

[१]छन्दोवत्सूत्राणि भवन्ति ।।

विमला – छन्दोवदिति । इष्टिरियं भाष्यकृतः । अथवा "**अयस्मयादीनि छन्दसी**" त्यत्र छन्दः पदे स्वरितत्वं प्रतिज्ञाय स्वरितेनाधिकं कार्यमिति छन्दोऽङ्गस्यापि व्याकरणस्य छन्दश्शब्देन ग्रहणमिति बोध्यम् ।

---

१. इतः पूर्वं 'छन्दोवत्सूत्राणि' इति वार्तिकं क्वाचित्कम् ।

(आक्षेपभाष्यम्)

यदि भसंज्ञा, "वृद्धिरादैजदेङ् गुणः" इति जश्त्वमपि न प्राप्नोति ।।

(समाधानवार्त्तिकम्)

।।*।। *उभयसंज्ञान्यपि च्छन्दांसि* ।।*।।

(व्याख्याभाष्यम्)

उभयसंज्ञान्यपि छन्दांसि दृश्यन्ते । तद्यथा 'स सुष्टुभा स ऋक्वता गणेन' । पदत्वात्कुत्वम्, भत्वाज्जश्त्वं न भवति । एवमिहापि पदत्वाज्जश्त्वम्, भत्वात्कुत्वं न भविष्यति ।।

विमला – उभयसंज्ञान्यपीति । संज्ञाद्वयसमावेशस्तु "**उभयसंज्ञान्यपीति वक्तव्यमि**" ति वार्तिकवचनात् । "**षष्ठीयुक्त**" इति सूत्रे "**छन्दसि वे**" ति यागं विभज्यैका संज्ञेति नियमश्छन्दसि विकल्प्यत इत्यर्थकरणाद्वा । सुष्टुभासेत्युभयसंज्ञा समावेशस्याऽयं दृष्टान्तः ।

इत्यसाधुत्वनिराकरणम्

(अथ तद्भावितपक्षनिराकरणाधिकरणम्)

(उभयपक्षस्वरूप[1]-तद्भावितपक्षदूषणभाष्यम्)

किं पुनरिदं तद्भावितग्रहणम् – वृद्धिरित्येवं ये आकारैकारौकारा भाव्यन्ते, तेषां ग्रहणम्, आहोस्विदादैज्मात्रस्य ?

किं चातः ?

यदि तद्भावितग्रहणम्, शालीयो मालीय इति वृद्धलक्षणश्छो न प्राप्नोति । आम्रमयम्, शालमयम्, वृद्धिलक्षणो मयण्न प्राप्नोति । आम्रगुप्तायनिः, शालगुप्तायनिः, वृद्धलक्षणः फिञ् न प्राप्नोति ।।

1. ग्रहणाऽग्रहणोद्भावनरूपेत्यर्थः ।

विमला – तद्भावितग्रहणमिति । वृद्धिपदमावर्तते तत्रैकं वृद्धिपदं वृद्धिशब्देन विहितवृद्धिपरम् । तच्चादैचो विशेषणन्तथा च वृद्धिशब्देन विहिता ये आदैचस्ते वृद्धिसंज्ञका इति व्याख्यानेनेति भाव: ।

(आदैज्मात्रग्रहणे दूषणभाष्यम्)

अथादैज्मात्रस्य ग्रहणम्, सर्वो भासः सर्वभास इति, "उत्तरपदवृद्धौ सर्वं च" इत्येष विधिः प्राप्नोति ।। इह च तावती भार्या यस्य तावद्भार्यः, यावद्भार्यः । "वृद्धिनिमित्तस्य" इति पुंवद्भावप्रतिषेधः प्राप्नोति ।

(सिद्धान्तभाष्यम्)

अस्तु तर्हि – आदैज्मात्रस्य ग्रहणम् ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्– "सर्वो भासः सर्वभास" इति, "उत्तरपदवृद्धौ सर्वं च" इत्येष विधिः प्राप्नोतीति ।।

(समाधानभाष्यम्)

नैष दोषः । नैवं विज्ञायते — 'उत्तरपदस्य वृद्धिरुत्तरपदवृद्धिरुत्तरपदवृद्धा'विति ।।

कथं तर्हि ?

'उत्तरपदस्य' इत्येवं प्रकृत्य या वृद्धिस्तद्वत्युत्तरपदे, इत्येवमेतद्विज्ञायते ।। अवश्यं चैतदेवं विज्ञेयम् । तद्भावितग्रहणे सत्यपीह प्रसज्येत — सर्वः कारकः सर्वकारक इति ।।

(द्वितीयदूषणनिराकरणभाष्यम्)

यदप्युच्यते — इह तावती भार्या यस्य तावद्भार्यः, यावद्भार्य इति च "वृद्धिनिमित्तस्य" इति

पुंवद्भावप्रतिषेधः प्राप्नोतीति ।। नैष दोषः । नैवं विज्ञायते – वृद्धेर्निमित्तं वृद्धिनिमित्तं, वृद्धिनिमित्तस्येति ।। कथं तर्हि ?

वृद्धेर्निमित्तं यस्मिन्सोऽयं वृद्धिनिमित्तः, वृद्धिनिमित्तस्येति ।।

किं च वृद्धेर्निमित्तम् ?

योऽसौ ककारो ञकारो णकारो वा ।।

अथवा – यः कृत्स्नाया वृद्धेर्निमित्तम् ।।

कश्च कृत्स्नाया वृद्धेर्निमित्तम् ?

यस्त्रयाणामाकारैकारौकाराणाम् ।।

विमला – वृद्धेर्निमित्तं यस्मिन्निति । "**वृद्धेस्तद्धितस्य**" ति कथनेऽपि वृद्धिरूप-तद्धिताभावेन वृद्धिनिमित्तस्यैव तद्धितस्य ग्रहणं भविष्यतीति निमित्तग्रहण-सामर्थ्यादेव व्यधिकरणपदो बहुव्रीहिः, न च दण्डः प्रहरणमस्या इत्यर्थे क्रीडायां णप्रत्यये कृते टापि दीर्घे एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्दण्डा क्रीड़ा यस्येति बहुव्रीहौ वृद्धिरूपस्तद्धितः सम्भवतीति वाच्यम् । विकारप्रतिषेधसामर्थ्यादेव तथाऽग्रहणादिति बोध्यम् ।

कृत्स्नाया वृद्धेरिति । न च वैयाकरणभार्य्यः, सौवश्वभार्य्य इत्यादौ पुंवत्वप्रतिषेधाभावाय" फलोपहितवृद्धिनिमित्तस्यैव ग्राह्यतया परिषदो ण्यः पारिषद्या पारिषद्या भार्या यस्येति बहुव्रीहौ तद्धितस्याकारमात्रोपहितत्वेन सकलवृद्ध्युपहितत्वाभावेन पुंवत्त्वप्रतिषेधानापत्तिरिति वाच्यम् । कृत्स्नवृद्धिस्वरूपयोग्यस्य यत्किञ्चिद्वृद्ध्युपहितस्य तद्धितस्य लक्ष्यानुरोधेन ग्रहणेनादोषात् । तथा चायं निर्गलितोऽर्थः ।

आवृत्तौ गौरवापत्तेः शालीयादेरसिद्धितः ।
मालादीनाञ्चेति लिङ्गाद्व्याप्तिन्यायात्तथैव च ।।
भाविसंज्ञात्वविज्ञाने गौरवाच्चेह निश्चितम् ।
आदैज्मात्रस्याविशेषाद् वृद्धिसंज्ञा विधीयते ।।

इति तद्भावितपक्षनिराकरणम् ।।

(अथ संज्ञासूत्रत्वसाधनाधिकरणम्)

(९२-आक्षेपवार्तिकप्रथमखण्डम्-१)

॥*॥ *संज्ञाधिकारः संज्ञासंप्रत्ययार्थः* ॥*॥

(व्याख्याभाष्यम्)

"अथ संज्ञा" इत्येवं प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः ॥

किं प्रयोजनम् ?

'संज्ञासंप्रत्ययार्थः' । वृद्ध्यादीनां शब्दानां 'संज्ञा' इत्येष संप्रत्ययो यथा स्यात् ॥

विमला – 'अथ संज्ञा' इत्येवं प्रकृत्येति । **'अथ संज्ञा'** इत्यधिकारसूत्रम्पूर्वं कृत्वेत्यर्थः । **वृद्ध्यादय** इति । **पठितव्या** इति । वृद्ध्यादिशब्दघटितानि सूत्राणि कर्त्तव्यानि इत्यर्थः ।

संज्ञासंप्रत्ययार्थ इति । ज्ञानार्थ इत्यर्थः । **वृद्ध्यादीनां संज्ञेत्येष सम्प्रत्ययो यथा स्यादिति** । वृद्ध्यादीनां संज्ञात्वेन ज्ञानं यथा स्यादित्यर्थः ।

(९२-आक्षेपसाधकवार्तिकद्वितीयखण्डम्-१)

॥*॥ *इतरथा ह्यसंप्रत्ययो यथा लोके* ॥*॥

(व्याख्याभाष्यम्)

अक्रियमाणे हि संज्ञाधिकारे वृद्ध्यादीनां संज्ञेत्येष संप्रत्ययो न स्यात् ॥

इदमिदानीं बहुसूत्रमनर्थकं स्यात् ॥

'अनर्थक'मित्याह ॥ कथम् ?

'यथा लोके' ॥ लोके ह्यर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते । अर्थवन्ति तावत् — 'देवदत्त गामभ्याज शुक्लां दण्डेन' 'देवदत्त गामभ्याज कृष्णाम्'

इति । अनर्थकानि — 'दश दाडिमानि, षडपूपाः, कुण्डमजाजिनं, पललपिण्डः, अधरोरुकमेतत्कुमार्याः, स्फैयकृतस्य पिता प्रतिशीनः' इति ।।

विमला – **इतरथेति** । वार्तिकस्य यथाश्रुतार्थकत्वे "**यथा लोके**" इति दृष्टान्तासंगतिः । लोके संज्ञाधिकारं विना असंप्रत्ययस्यादृष्टत्वादतो भाष्यकारः दृष्टान्तं सङ्गमयितुं वाक्यमध्याहरति – **इदमिदानीं बहुसूत्रमनर्थकं स्यादिति** । अनर्थकवाक्यस्य लोके दर्शनेनानर्थकत्वे लोको दृष्टान्तः संगच्छत इति बोध्यम् । इदानीम् संज्ञाधिकाराभावे । **बहुसूत्रम्** । बहूनि सूत्राणि यत्र प्रकरणे तादृशम् । **इदम्** । संज्ञाप्रकरणम् । **अनर्थकं स्यात्** । **अनर्थकमित्याहेति** । अत्रेष्टापत्तिरेवेत्याहेतिभावः । ननु विधिसूत्राणां सार्थकत्वात्तदेककर्तृकस्य संज्ञाप्रकरणस्य कथमनर्थकत्वमित्याशयेनाशङ्कते – **कथमिति** । आक्षेप्ता समाधत्ते – **यथालोके इति** । अर्थवद्वाक्यप्रयोक्तृप्रयुक्तमप्यनर्थकं वाक्यं यथा लोके दृश्यते तथा शास्त्रेऽपि सार्थकविधिशास्त्रप्रणेतृप्रणीतमपि संज्ञाप्रकरणमनर्थकं स्यादिति को विरोध इति भावः । **असंदेहो वक्तव्य इति** । न सन्देहो येन स वक्तव्य इत्यर्थः । अर्थात् "परोच्चारिता संज्ञा" इति वक्तव्यम्, इति भावः ।

(९३-आक्षेपान्तरवार्तिकम्-२)

||*|| *संज्ञासंज्ञ्यसंदेहश्च* ||*||

(व्याख्याभाष्यम्)

क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसन्देहो वक्तव्यः ।। कुतो ह्येतत् – 'वृद्धिशब्दः संज्ञा, आदैचः संज्ञिन' इति । न पुनरादैचः संज्ञा, वृद्धिशब्दः संज्ञीति ।

(आक्षेपनिराकरणवार्तिकावतरणभाष्यम्)

यत्तावदुच्यते – 'संज्ञाधिकारः कर्तव्यः संज्ञासंप्रत्ययार्थः' इति ।। न कर्तव्यः ।

(४९-सिद्धान्तसमाधानवार्तिकप्रथमखण्डम्-३)

||*|| *आचार्याचारात्संज्ञासिद्धिः* ||*||

(व्याख्याभाष्यम्)

आचार्याचारात्संज्ञासिद्धिर्भविष्यति । किमिदम् – 'आचार्याचारा'दिति ? आचार्याणामुपचारात् ।

(सिद्धान्तिवार्तिकद्वितीयखण्डम् - ३)

।।*।। *यथा लौकिकवैदिकेषु* ।।*।।

(व्याख्याभाष्यम्)

तद्यथा लौकिकेषु वैदिकेषु च कृतान्तेषु ।। लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते – 'देवदत्तो' 'यज्ञदत्त' इति । तयोरुपचारादन्येपि जानन्ति – 'इयमस्य संज्ञे'ति ।। वेदे याज्ञिकाः संज्ञां कुर्वन्ति – 'स्फ्यो यूपश्चषाल' इति । तत्रभवतामुपचारादन्येऽपि जानन्ति – 'इयमस्य संज्ञे'ति ।।

विमला – संवृतेऽवकाश इति । सम्यगावृते गृहादावित्यर्थः । **स्फ्य इति** । खादिरं खड्गसदृशं यज्ञसाधनकाष्ठम् । **यूप इति** । तक्षणादिसंस्कृतपशुनियोजन-काष्ठम् । **चषाल इति** । यूपाग्रे स्थाप्यमानं यूपवलयसंज्ञकं काष्ठम् इति ।

(दार्ष्टान्तिकभाष्यम्)

एवमिहापि – इहैव तावत्केचिद्व्याचक्षाणा आहुः — 'वृद्धिशब्दः संज्ञा, आदैचः संज्ञिन' इति ।। अपरे पुनः "सिचि वृद्धिः" इत्युक्त्वाऽऽकारैकारौकारानुदाहरन्ति । तेन मन्यामहे – 'यया प्रत्याय्यन्ते सा संज्ञा, ये प्रतीयन्ते ते संज्ञिन' इति ।।

(आक्षेपान्तरानुवादभाष्यम्)

यदप्युच्यत – 'क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञि-नोरसंदेहो वक्तव्य' इति ।। (न वक्तव्यः ।) ।।

(९५-सिद्धान्तसमाधानवार्तिकम्-४)

//// संज्ञासंज्ञ्यसंदेहश्च //*//*

(व्याख्याभाष्यम्)

संज्ञासंज्ञिनोश्चाऽसंदेहः सिद्धः ।।

कुतः ?

'आचार्याचारादेव' । उक्त आचार्याचारः ।।

(९६-सिद्धान्तहेतुसूचकवार्तिकप्रथमखण्डम्)

//// अनाकृतिः //*//*

(व्याख्याभाष्यम्)

अथवाऽनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः । लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य 'देवदत्त' इति संज्ञा क्रियते ।।

विमला – अनाकृतिः संज्ञेति । कः संज्ञी का संज्ञेति सन्देहस्य - 'अनाकृतिः' एतावन्मात्रकथनेनानिवृत्तेः संज्ञेति पूरितम् । **आकृतिमत इति** । आकृतिपदस्य भेदलक्षकत्वाद् भिन्नाः संज्ञिन इत्यर्थः । देवदत्तादौ भेदश्चावस्थाभेदेनोपपादनीयः ।

(सिद्धान्तिहेतुवार्तिकद्वितीयखण्डम्-५)

//// लिंगेन वा //*//*

(व्याख्याभाष्यम्)

अथवा — किंचिल्लिङ्गमासज्य वक्ष्यामि – 'इत्थंलिङ्गा संज्ञे'ति । वृद्धिशब्दे च तल्लिङ्गं करिष्यते, नादैच्छब्दे ।।

विमला – लिङ्गेन वा इति । असन्देह इत्यनुषङ्गः ।

(आक्षेपभाष्यम्)

इदं तावदयुक्तम् । यदुच्यते – 'आचार्याचारा'-दिति ।।

किमत्राऽयुक्तम् ?

तमेवोपालभ्य 'अगमकं ते सूत्रम्' इति, तस्यैव पुनः प्रमाणीकरणमित्येतदयुक्तम् । अपरितुष्यन् खल्वपि भवाननेन परिहारेण – "अनाकृतिर्लिङ्गेन वा" इत्याह ।।

विमला – किमत्रायुक्तमिति । शब्दार्थयोर्मध्ये किमयुक्तमित्यर्थः । **तमेवोपालभ्येति** । सूत्रकारं सनिन्दमुक्त्वेत्यर्थः । **अगमकमिति** शाब्दबोधाजनकमित्यर्थः ।

(तृतीयहेतौ गौरवाक्षेपभाष्यम्)

तच्चापि वक्तव्यम् ।।

विमला – तच्चापि वक्तव्यमिति । प्रतिसंज्ञं किञ्चिल्लिङ्गं कर्त्तव्यम् । इत्थंलिङ्गासंज्ञेति च वक्तव्यमित्यर्थः ।

(तृतीयहेतुस्वीकारे लाघवप्रदर्शकभाष्यम्)

यद्यप्येतदुच्यते । अथवैतर्हि इत्संज्ञा न वक्तव्या । लोपश्च न वक्तव्यः । संज्ञालिङ्गमनुबन्धेषु करिष्यते । न च संज्ञाया निवृत्तिरुच्यते । स्वभावतः संज्ञा संज्ञिनं प्रत्याय्य स्वयं निवर्तते । तेनानुबन्धानामपि निवृत्तिर्भविष्यति ।।

विमला – यद्यप्येतदुच्यते इति । लिंगेन वेति तृतीयपक्षेऽपि यत्नद्वयं कर्त्तव्यम्भवति, प्रथमपक्षे च "**अथ संज्ञा**" इत्यधिकारसूत्रम् । "**परा संज्ञेति**" सन्देहनिवर्त्तकं वार्तिकञ्च कर्त्तव्यमिति, यत्नद्वयमेव तत्रापि पक्षे इति प्रथमपक्षापेक्षया यद्यपि तृतीयपक्षे न किञ्चिल्लाघवमिति प्रथमपक्षमुपेक्ष्य तृतीयपक्षाश्रयणमयुक्तमित्याशङ्कायां लाघवम्प्रदर्श्य तृतीयपक्षं स्थापयति । **अथवैतर्हीति** । एतस्मिन्पक्षे हीत्यर्थः तृतीयपक्ष इति यावत् ।

(आक्षेपभाष्यम्)

सिद्ध्यत्येवम् । अपाणिनीयं तु भवति ।।

(सिद्धान्तिसमाधानभाष्यम्)

यथान्यासमेवाऽस्तु ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् – "संज्ञाधिकारः संज्ञासंप्रत्ययार्थ इतरथा ह्यसंप्रत्ययो यथा लोके" इति ।।

(समाधानभाष्यम्)

न च यथा लोके, तथा व्याकरणे । प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्राऽशक्यं वर्णेनाऽप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण ।।

किमतो यदशक्यम् ?

अतः संज्ञासंज्ञिनावेव ।।

विमला – न च यथालोके इति । अयम्भावः लौकिकवाक्यानामानर्थक्यं हि वक्तृदोषादेव भवति वक्तृदोषश्च भ्रमप्रमादविप्रलिप्सादिरूपोऽनेकविधस्तत्रैकमपि व्याकरण-प्रणेतुराचार्यस्य नास्तीति तत्कृतव्याकरणे आनर्थक्यं न सम्भवतीति । व्याकरणप्रणेतरि दोषाभावमुपपादयति – **प्रमाणभूत इति** । अनेन भ्रमरूपदोषो नास्तीति सूचितम् । **आचार्य इति** । अनेन विप्रलिप्सकत्वं निराकृतम् । **दर्भपवित्रपाणिरिति** । कुशपवित्र-हस्तः । **शुचाविति** शुद्धभूमावित्यर्थः । **अवकाश इति** । गृहादौ न तु जनाकीर्णे । एतेन पदत्रयेण प्रमादाभावो दर्शितः । पवित्रताया एकान्तस्य च प्रमादाभाव-प्रयोजकत्वात् ।

प्राङ्मुख उपविश्येति । अनेन देवानुकूल्यं दर्शितम् । **प्राचीं देवा अभजन्त पितरोऽवाचीमिति** श्रुत्या प्राच्यां देवानां स्थितत्वागमात् । तदभिमुखस्य तदानुकूल्य-दर्शनात् । **महता प्रयत्नेनेति** । अनेन मनः प्रणिधानं दर्शितम् ।

(आक्षेपभाष्यम्)

कुतो नु खल्वेतत् — 'संज्ञासंज्ञिनावेवे'ति । न पुनः साध्वनुशासनेऽस्मिञ्शास्त्रे साधुत्वमनेन क्रियते ? ॥

विमला – कुतो नु खल्वेतदिति । साधुत्वप्रतिपादनेनाप्यर्थवत्त्वसम्भवात् संज्ञासंज्ञिनावेवेति कथं निर्णय इति भावः । **क्रियत इति** । "**क्षय्यजय्यौ शक्यार्थे**" इतिवदित्यर्थः ।

(आक्षेपनिराकरणभाष्यम्)

कृतमनयोः साधुत्वम्[1] ॥

कथम् ?

वृधिरस्मायविशेषेणोपदिष्टः प्रकृतिपाठे, तस्मात् क्तिन्प्रत्ययः । आदैचोऽप्यक्षरसमाम्नाये उपदिष्टाः ।

(आक्षेपभाष्यम्)

प्रयोगनियमार्थं तर्हीदं स्यात् — 'वृद्धिशब्दात्परे आदैचः प्रयोक्तव्या' – इति ॥

(आक्षेपनिराकरणभाष्यम्)

नेह प्रयोगनियम आरभ्यते ॥ किं तर्हि ? संस्कृत्य – संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसंबन्धो भवति । तद्यथा – 'आहर पात्रम्', 'पात्रमाहरे'ति ॥

(आक्षेपोद्भावनभाष्यम्)

आदेशास्तर्हीमे स्युः । वृद्धिशब्दस्याऽऽदैच आदेशाः ॥

(आक्षेपनिराकरणभाष्यम्)

षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते । न चात्र षष्ठीं पश्यामः ॥

---

१. वार्त्तिककृद्वार्त्तिकमिदमिति केचित् ।

विमला – षष्ठीनिर्दिष्टस्यादेशा उच्यन्त इति । अत्र षष्ठीपदं स्थानिपरं निर्दिष्ट-पदञ्चार्थपरम् । वाचका इत्यध्याहारः । तथा च स्थान्यर्थस्य वाचका आदेशा उच्यन्त इत्यर्थो लभ्यते । अन्यथा **नाभि नभञ्चे**त्यादौ दोषः स्यात् । **न चात्र षष्ठीमिति** । अत्र आदैच्पदे **षष्ठीम्** । वृद्धिपदार्थम् । **न पश्याम इति** । वाचकता-सम्बन्धेनेत्यादिः । स्थान्यर्थाभिधानसमर्थस्यैवादेशतेति सिद्धान्तादिति भावः । अथवा षष्ठीनिर्दिष्टस्यादेशा उच्यन्त इति भाष्यं बाहुल्याभिप्रायेण प्रवृत्तम्, तेन "**नाभि नभञ्चे**" त्यादौ क्वचित् षष्ठीनिर्देशाभावेऽपि न क्षतिरिति तत्त्वम् ।

(आक्षेपभाष्यम्)

आगमास्तर्हीमे स्युर्वृद्धिशब्दस्याऽऽदैच आगमाः ।।

(आक्षेपनिरासभाष्यम्)

आगमा अपि षष्ठीनिर्दिष्टस्यैवोच्यन्ते । लिङ्गेन च[१] । न चात्र षष्ठीं, न खल्वप्यागमलिङ्गं पश्यामः ।।

(सिद्धान्तसमाधानभाष्यम्)

इदं खल्वपि भूयः – सामानाधिकरण्यमेकविभक्तित्वं च । द्वयोश्चैतद्भवति ।।

कयोः ?

विशेषणविशेष्ययोर्वा संज्ञासंज्ञिनोर्वा ।।

तत्रैतत्स्याद्विशेषणविशेष्ये इति ।।

तच्च न, द्वयोर्हि प्रतीतपदार्थकयोर्लोके विशेषणविशेष्यभावो भवति । न चादैच्छब्दः प्रतीतपदार्थकः । तस्मात्संज्ञासंज्ञिनावेव ।।

विमला – इदं खल्वपीति । खल्वपिशब्दो निश्चयार्थकः । **तच्च नेति** । विशेषणविशेष्यभावो नेत्यर्थः । अत्र हेतुमुपपादयति द्वयोर्हीत्यादिना द्वयोर्मध्ये एकस्यासम्भवे परिशेषात्संज्ञासंज्ञिनावेवेति निर्णीयत इत्याह – **तस्मात्संज्ञासंज्ञि-नावेवेति** ।

---

१. 'वे'ति क्वचित् ।

(सम्भाव्य-सन्देहोत्थापनभाष्यम्)

तत्र त्वेतावान्सन्देहः – 'कः संज्ञी का संज्ञे'ति ।। स चापि क्व सन्देहः? यत्रोभे समानाक्षरे ।। यत्र त्वन्यतरल्लघु सा संज्ञा, यद्गुरु स संज्ञी ।।

कुत एतत्?

लघ्वर्थं हि संज्ञाकरणम्[१] । तत्राप्ययं नावश्यं गुरुलघुतामेवोपलक्षयितुमर्हति ।। किं तर्हि? अनाकृतितामपि । 'अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः'[१] । लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते ।।

विमला – यत्र उद्देश्यविधेययोर्मध्ये । **उभे** विधेयोद्देश्ये । अयं सूत्रकारः । अवश्यं नैयत्येन । **गुरुलघुतामेवेति** । संज्ञासंज्ञिव्यवस्थापकत्वेनेति शेषः । उपलक्षयितुम् । स्वीकर्तुम् । **नार्हति** । न शक्नोति । **अनाकृतितामपीति** । एवञ्चोपसर्गसंज्ञासर्वनामसंज्ञासंप्रसारणसंज्ञाकर्मप्रवचनीयसंज्ञादौ न दोष इति बोध्यम् ।

(द्वितीयसमाधानवार्त्तिकखण्डम्)

।।।। आवर्तिन्यः सञ्ज्ञाः ।।*।।*

(समाधानान्तरभाष्यम्)

अथवाऽऽवर्तिन्यः संज्ञा भवन्ति । वृद्धिशब्दश्चावर्तते, नादैच्छब्दः । तद्यथा – इतरत्रापि देवदत्तशब्द आवर्तते, न मांसपिण्डः ।।

विमला – एतत्पक्षस्य प्राग्दूषितत्वात्पक्षान्तरमाह – **अथवेति** । **आवर्तिन्य इति** । प्रदेशेषु पुनः पुनरुच्चार्यमाणाः ।

---

१. वार्त्तिकमित्येतदित्यन्ये ।

(समाधानान्तरभाष्यम्)

अथवा 'पूर्वोच्चारितः संज्ञी, परोच्चारिता संज्ञा'[१] ।।

कुत एतत् ? सतो हि कार्यिणः कार्येण भवितव्यम् । तद्यथा – इतरत्रापि सतो मांसपिण्डस्य 'देवदत्त' इति संज्ञा क्रियते ।

(आक्षेपभाष्यम्)

कथं 'वृद्धिरादैज्' इति ?

(समाधानवार्त्तिकम्)

।।।। वृद्धिरादैजिति मङ्गलार्थम् ।।*।।*

(समाधानभाष्यम्)

एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते, वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि चाऽध्येतारश्च वृद्धियुक्ता यथा स्युरिति ।। सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी, परोच्चारिता संज्ञा – 'अदेङ्गुणः' इति यथा ।।

(सिद्धान्तिभाष्यम्)

दोषवान्खल्वपि संज्ञाधिकारः । अष्टमेऽपि हि संज्ञा क्रियते – 'तस्य परमाम्रेडितम्' इति । तत्रापीदमनुवर्त्यं स्यात् ।।

(समाधानान्तरभाष्यम्)

अथवाऽस्थानेऽयं यत्नः क्रियते । न हीदं लोकाद्भिद्यते । यदीदं लोकाद्भिद्येत ततो यत्नार्हं

१. वार्त्तिकमित्येतदित्यन्ये ।

स्यात् । तद्यथा - अगोज्ञाय कश्चिद्गां सक्थनि कर्णे वा गृहीत्वोपदिशति -- 'अयं गौ'रिति । न चास्मायाचष्टे 'इयमस्य संज्ञा' इति । भवति चाऽस्य संप्रत्ययः ।।

विमला – **अस्थाने** । अनवसरे । सन्देहशून्यविषय इति यावत् ।

(आक्षेपभाष्यम्)

तत्रैतत्स्यात् – 'कृतस्तत्र पूर्वैरभिसम्बन्धः' इति ।।

विमला – तत्र । लोके । **एतदिति** । वक्ष्यमाणवैषम्यमित्यर्थः । वैषम्यमेवाह – **कृतस्तत्र पूर्वैरभिसम्बन्ध इति** ।

(समाधानभाष्यम्)

इहापि – कृतः पूर्वैरभिसंबन्धः ।।

कैः ? आचार्यैः ।।

विमला – वैषम्याभावमुपपादयति – **इहापीति** ।

(आक्षेपभाष्यम्)

तत्रैतत्स्यात् - 'यस्मै तर्हि सम्प्रत्युपदिशति तस्याऽकृत' इति ।।

विमला – पुनर्वैषम्यमुपपादयति – **तत्रैतत्स्यादिति** ।

(समाधानभाष्यम्)

लोकेऽपि हि यस्मै सम्प्रत्युपदिशति तस्याऽकृतः । अथ तत्र कृतः, इहापि कृतो द्रष्टव्यः ।।

विमला – वैषम्यं परिहरति । **लोकेऽपीति** ।

इति संज्ञाधिकारसंज्ञासंज्ञिसंदेहाऽपाकरणाधिकरणम् ।।

(अथ अन्योन्याश्रय-परिहाराधिकरणम्)

(८९-आक्षेपवार्तिकम् - १)

।।*।। सतो वृद्ध्यादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः ।।*।।

(व्याख्याभाष्यम्)

सतः संज्ञिनः संज्ञाभावात् । तदाश्रये संज्ञाश्रये संज्ञिनि वृद्ध्यादिष्वितरेतराश्रयत्वादप्रसिद्धिः ।। का इतरेतराश्रयता ? सतामादैचां संज्ञया भवितव्यम्, संज्ञया चादैचो भाव्यन्ते । तदेतदितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते । तद्यथा – नौर्नावि बद्धा नेतरत्राणाय भवति ।।

(इतराश्रयिदृष्टान्तभाष्यम्)

ननु च भो इतरेतराश्रयाण्यपि कार्याणि दृश्यन्ते । तद्यथा – 'नौः शकटं वहति, शकटं च नावं वहति' ।।

(दृष्टान्तनिरासभाष्यम्)

अन्यदपि तत्र किंचिद्भवति जलं वा स्थलं वा । स्थले शकटं नावं वहति । जले नौः शकटं वहति ।।

(इतरेतराश्रयिदृष्टान्तान्तरभाष्यम्)

यथा तर्हि – त्रिविष्टब्धकम् ।।

(दृष्टान्तान्तरनिराकरणभाष्यम्)

तत्राप्यन्ततः सूत्रकं भवति ।।

(आक्षेपोपसंहारभाष्यम्)

इदं पुनरितरेतराश्रयमेव ।।

(९८-अन्योन्याश्रयवारकसिद्धान्तिवार्तिकम्-२)

।।*।। सिद्धं तु नित्यशब्दत्वात् ।।*।।

(व्याख्याभाष्यम्)

सिद्धमेतत् ।। कथम् ?

'नित्यशब्दत्वात्' । नित्याः शब्दाः, नित्येषु शब्देषु सतामादैचां संज्ञा क्रियते, न च संज्ञया आदैचो भाव्यन्ते ।।

(आक्षेपभाष्यम्)

यदि तर्हि नित्याः शब्दाः, किमर्थं शास्त्रम् ?

(९९-आक्षेपवारकसिद्धान्तिवार्तिकम् - ३)

।।।। किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम् ।।*।।*

(व्याख्याभाष्यम्)

निवर्तकं शास्त्रम् ।।

कथम् ? ।।

मृजिरस्मायविशेषेणोपदिष्टः । तस्य सर्वत्र मृजिबुद्धिः प्रसक्ता । तत्रानेन निवृत्तिः क्रियते, 'मृजेरक्ङित्सु प्रत्ययेषु मृजिप्रसङ्गे मार्जिः साधुर्भवती'ति ।।

विमला – अस्मै । साधुशब्दजिज्ञासवे । अविशेषेण । प्रत्ययविशेषानाश्रयणेन । उपदिष्ट इति मृजू शुद्धाविति धातुपाठ उपदिष्ट इत्यर्थः । तस्य । साधुशब्द जिज्ञासोः । सर्वत्र । क्ङित्सु तद्भिन्नेषु च । तत्र । तस्मिन् सति । अनेन । मृजेर्वृद्धिरिति सूत्रेण ।

इत्यन्योन्याश्रयनिराकरणाधिकरणम्

(अथ समुदितसंज्ञानिराकरणाधिकरणम्)

(१००-आक्षेपवार्त्तिकम् - ४)

।।*।। वृद्धिगुणसंज्ञयोः प्रत्येकं वचनम्[1] ।।*।।

(भाष्यम्)

(वृद्धिगुणसंज्ञयोः प्रत्येकं ग्रहणं कर्तव्यम्[2] ।।) प्रत्येकं वृद्धिगुणसंज्ञे भवत इति वक्तव्यम् ।।

किं प्रयोजनम् ?

समुदाये मा भूतामिति ।।

(१०१-आक्षेपवारकसिद्धान्तिवार्तिकम्-५)

।।*।। अन्यत्र सहवचनात्समुदाये संज्ञाऽप्रसङ्गः ।।*।।

(व्याख्याभाष्यम्)

अन्यत्र सहवचनात्समुदाये वृद्धिगुणसंज्ञयोरप्रसङ्गः । यत्रेच्छति सहभूतानां कार्यं करोति तत्र 'सह'ग्रहणम् । तद्यथा "सह सुपा" "उभे अभ्यस्तं सह" इति ।।

(१०२-आक्षेपवारकसिद्धान्तिवार्त्तिकम्-६)

।।*।। प्रत्यवयवं च वाक्यपरिसमाप्तेः ।।*।।

(व्याख्याभाष्यम्)

प्रत्यवयवं च वाक्यपरिसमाप्तिर्दृश्यते । तद्यथा – 'देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्ता'मिति । न चोच्यते – 'प्रत्येक'मिति । प्रत्येकं च भुजिः परिसमाप्यते ।।

(आक्षेपभाष्यम्)

ननु चायमप्यस्ति दृष्टान्तः — "समुदाये वाक्यपरिसमाप्तिः" इति । तद्यथा – 'गर्गाः शतं

१. 'प्रत्येकं वृद्धिगुणसञ्ज्ञावचनं कर्त्तव्यम्' इति पाठान्तरम् ।

२. '(प्रत्येकं वृद्धिगुणसञ्ज्ञावचनं कर्त्तव्यम्)' इति पाठ ।

दण्डयन्ताम्' इति । अर्थिनश्च राजानो हिरण्येन भवन्ति । न च प्रत्येकं दण्डयन्ति ।

(समाधानभाष्यम्)

सत्येतस्मिन्दृष्टान्ते यदि तत्र सह ग्रहणं क्रियते, इहापि प्रत्येकमिति वक्तव्यम् । अथ तत्रान्तरेण सहग्रहणं सहभूतानां कार्यं भवति, इहापि नार्थः प्रत्येकमिति वचनेन ।

इति समुदायसंज्ञानिराकरणाधिकरणम्

(अथ तपरग्राह्यनिराकरणीयाऽधिकरणम्)

(आक्षेपभाष्यम्)

अथ किमर्थमाकारस्तपरः क्रियते ? ।।

(१०३-सिद्धान्तसमाधानवार्तिकम्-१)

।।।। आकारस्य तपरकरणं सवर्णार्थम् ।।*।।*

(व्याख्याभाष्यम्)

आकारस्य तपरकरणं क्रियते ।

किं प्रयोजनम् ?

सवर्णार्थम् ।। 'तपरस्तत्कालस्य' इति तत्कालानां सवर्णानां ग्रहणं यथा स्यात् ।।

केषाम् ?

उदात्ताऽनुदात्तस्वरितानाम् ।।

(कारणजिज्ञासाभाष्यम्)

किं च कारणं न स्यात् ?

(१०४-कारणप्रदर्शकैकदेशिवार्तिकम्-२)

॥॥ भेदकत्वात्स्वरस्य ॥*॥*

(व्याख्याभाष्यम्)

भेदका उदात्तादयः ॥

कथं पुनर्ज्ञायते — 'भेदका उदात्तादय' इति ?

एवं हि दृश्यते लोके, — य उदात्ते कर्तव्येऽनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटां ददाति – 'अन्यत्वं करोषी'ति ॥

विमला – भेदकत्वादिति । स्वरस्योदात्तत्वादेर्विजातीयनिवर्तकत्वादित्यर्थः । **खण्डिकोपाध्यायः** । आथर्वणवेदाध्यापकः । **तस्मै** । अनुदात्तकर्त्रे । **चपेटामिति** । चपेटा नाम करतलसंयोगः ।

(भाष्यम्)

अस्ति प्रयोजनमेतत् ? किंतर्हि इति ?

(१०५-कारणप्रदर्शकवार्तिकन्यासान्तरम्-२)

॥॥ भेदकत्वाद्गुणस्य[1] ॥*॥*

(व्याख्याभाष्यम्)

भेदकत्वाद्गुणस्येतिवक्तव्यम् ॥

किं प्रयोजनम् ? ॥

आनुनासिक्यं नाम गुणः, तद्भिन्नस्यापि ग्रहणं यथा स्यात् ॥

किं च कारणं न स्यात् ?

'भेदकत्वाद्गुणस्य' । भेदका गुणाः । कथं पुनर्ज्ञायते – 'भेदका गुणा' इति ? एवं हि दृश्यते लोके,

---

१. वार्तिकमिदं क्वचिदस्ति क्वचिन्नास्ति ।

एकोऽयमात्मा = उदकं नाम, तस्य गुणभेदादन्यत्वं भवति — 'अन्यदिदं शीतम्', 'अन्यदिदमुष्ण'मिति ।

(अभेदकत्वाक्षेपसिद्धान्तिभाष्यम्)

ननु च भो अभेदका अपि गुणा दृश्यन्ते । तद्यथा – देवदत्तो मुण्ड्यपि जट्यपि शिख्यपि स्वामाख्यां न जहाति, तथा बालो युवा वृद्धो वत्सो दम्यो बलीवर्द इति ।।

(आक्षेपभाष्यम्)

उभयमिदं गुणेषूक्तम् – 'भेदकाः', 'अभेदका' इति । किं पुनरत्र न्याय्यम् ?

(सिद्धान्तसमाधानभाष्यम्)

'अभेदका गुणा' इत्येव न्याय्यम् ।।

कुत एतत् ?

यदयम् — "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः" इत्युदात्तग्रहणं करोति, तज्ज्ञापयत्याचार्योऽभेदका गुणा इति । यदि हि भेदका गुणाः स्युः, उदात्तमेवोच्चारयेत् ।।

(आक्षेपभाष्यम्)

यदि तर्ह्यभेदका गुणा, अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत्स्वरितादेः स्वरितान्ताच्च प्राप्नोति ।।

विमला – अनुदात्तादेरिति । अनुदात्तत्वादेर्गुणत्वेनाव्यावर्त्तकतया अज्मात्रस्यैव तत्कार्य्यं भवदविशेषादुदात्तस्वरितयोरपि स्यादितिभावः ।

(अभेदवादिनः समाधानभाष्यम्)

नैष दोषः । आश्रीयमाणो गुणो भेदको भवति । तद्यथा — 'शुक्लमालभेत' 'कृष्णमालभेत' । तत्र यः

शुक्ल आलब्धव्ये कृष्णमालभते, न हि तेन यथोक्तं कृतं भवति ।।

(एकदेशिसमाधानभाष्यम्)

असन्देहार्थस्तर्हि तकारः । 'ऐ'जित्युच्यमाने सन्देहः स्यात् – किमिमावैचावेव, आहोस्विदाकारोऽप्यत्र निर्दिश्यत इति ?

(समाधानबाधकभाष्यम्)

संदेहमात्रमेतद्भवति । सर्वसन्देहेषु चेदमुपतिष्ठते – 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति । त्रयाणां ग्रहणमिति व्याख्यास्यामः । अन्यत्रापि ह्ययमेवंजातीयकेषु सन्देहेषु न कंचिद्यत्नं करोति । तद्यथा – "औतोम्शसोः" इति ।।

(सिद्धान्तिसमाधानभाष्यम्)

इदं तर्हि प्रयोजनम् – आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति । खट्वा इन्द्रः खट्वेन्द्रः, खट्वा उदकं खट्वोदकम्, खट्वा ईषा खट्वेषा, खट्वा ऊढा खट्वोढा, खट्वा एलका खट्वैलका, खट्वा ओदनः खट्वौदनः, खट्वा ऐतिकायनः खट्वैतिकायनः, खट्वा औपगवः खट्वौपगव इति ।।

(आक्षेपभाष्यम्)

अथ क्रियमाणेऽपि तकारे कस्मादेव त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति ?

(समाधानभाष्यम्)

'तपरस्तत्कालस्य' इति नियमात् ।।

(समाधानबाधकभाष्यम्)

ननु तः परो यस्मात्सोऽयं तपरः ।।

(समाधानसाधकभाष्यम्)

'ने'त्याह । तादपि परस्तपरः ।।

(इष्टानुपपत्तिसाधकभाष्यम्)

यदि तादपि परस्तपरः 'ऋदोरप्' इतीहैव स्यात् – यवः स्तवः, लवः पव इत्यत्र न स्यात् ।

(अनुपपत्तिबाधकभाष्यम्)

नैष तकारः ।। कस्तर्हि ? दकारः ।।

(आक्षेपभाष्यम्)

किं दकारे प्रयोजनम् ?

(प्रतिबन्द्या समाधानभाष्यम्)

अथ किं तकारे ? यद्यसंदेहार्थस्तकारः, दकारो-ऽपि । अथ मुखसुखार्थस्तकारः, दकारोऽपि । (वृद्धिरादैच्) ।।१।।

(इक्परिभाषासूत्रम्)

इको गुणवृद्धी ।। १।१।३ ।।

(योगविभागप्रयोजनाधिकरणम्)

(जिज्ञासयाऽऽक्षेपभाष्यम्)

इग्ग्रहणं किमर्थम् ? ।।

विमला – गुणवृद्धीत्यस्य '**न धातुलोप आर्धधातुके**' इति सूत्रे प्रतियोगिज्ञानार्थ-मावश्यकत्वेऽपि इग्ग्रहणं किमर्थम् । किञ्च गुणवृद्धीत्यस्योत्तरसूत्रमात्रार्थकत्वे '**गुणवृद्धी न धातुलोप आर्धधातुके**' इत्येव वक्तव्ये पृथग्योगकरणं किमर्थमिति – पृच्छति **इग्ग्रहणं किमर्थमिति** ।

(१०५-समाधानवार्तिकम्-१)

॥*॥ इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम् ॥*॥

(व्याख्याभाष्यम्)

इग्ग्रहणं क्रियते ॥

किं प्रयोजनम् ?[1] ॥

आकारनिवृत्त्यर्थं, सन्ध्यक्षरनिवृत्त्यर्थं, व्यञ्जननिवृत्त्यर्थं च ॥

(प्रथमप्रयोजनोपपादनभाष्यम्)

आकारनिवृत्त्यर्थं तावद् – याता, वाता । आकारस्य गुणः प्राप्नोति । इग्ग्रहणान्न भवति ॥

विमला – आकारनिवृत्त्यर्थमिति । आकारस्य गुणनिवृत्त्यर्थमित्यर्थः ।

(द्वितीयप्रयोजनोपपादनभाष्यम्)

सन्ध्यक्षरनिवृत्त्यर्थम् – ग्लायति, म्लायति । सन्ध्यक्षरस्य गुणः प्राप्नोति । इग्ग्रहणान्न भवति ।

विमला – संध्यक्षरनिवृत्त्यर्थमिति । एचो गुणनिवृत्त्यर्थमित्यर्थः ।

(तृतीयप्रयोजनोपपादनभाष्यम्)

व्यञ्जननिवृत्त्यर्थम् – उम्भिता, उम्भितुम्, उम्भितव्यम् । व्यञ्जनस्य गुणः प्राप्नोति । इग्ग्रहणान्न भवति ।

(प्रथमप्रयोजननिराकरणभाष्यम्)

आकारनिवृत्त्यर्थेन तावन्नार्थः । आचार्यप्रवृत्तिर्ज्ञापयति – 'नाकारस्य गुणो भवती'ति । यदयम् "आतोऽनुपसर्गे कः" इति ककारमनुबन्धं करोति ॥

---

१ इतः परं 'आत्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम्' इति क्वचिद्विशेषः ।

कथं कृत्वा ज्ञापकम् ?

कित्करण एतत्प्रयोजनम् – 'किती'त्याकारलोपो यथा स्यात् । यदि चाऽऽकारस्य गुणः स्यात्, कित्करणमनर्थकं स्यात् । गुणे कृते द्वयोरकारयोः पररूपेण सिद्धं रूपं स्याद् – 'गोदः' 'कम्बलद' इति । पश्यति त्वाचार्यो – 'नाकारस्य गुणो भवती'ति, ततः ककारमनुबन्धं करोति ।।

(द्वितीयप्रयोजननिराकरणभाष्यम्)

सन्ध्यक्षरनिवृत्त्यर्थेनापि नाऽर्थः । उपदेशसामर्थ्यात्सन्ध्यक्षरस्य गुणो न भवति ।।

(तृतीयप्रयोजननिराकरणभाष्यम्)

व्यञ्जननिवृत्त्यर्थेनाऽपि नाऽर्थः । आचार्यप्रवृत्तिर्ज्ञापयति – 'न व्यञ्जनस्य गुणो भवती'ति । यदयं जनेर्डं शास्ति ।।

कथं कृत्वा ज्ञापकम् ?

डित्करण एतत्प्रयोजनम्–'डिती'ति टिलोपो यथा स्यात् । यदि व्यञ्जनस्य गुणः स्यात्, डित्करणमनर्थकं स्यात् । गुणे कृते त्रयाणामकाराणां पररूपेण सिद्धं रूपं स्याद् – उपसरजो मन्दुरज इति । पश्यति त्वाचार्यो – 'न व्यञ्जनस्य गुणो भवती'ति । ततो जनेर्डं शास्ति ।।

(प्रथमप्रयोजनबाधकज्ञापकनिराकरणभाष्यम्)

नैतानि सन्ति ज्ञापकानि । यत्तावदुच्यते – 'कित्करणं ज्ञापकं नाऽकारस्य गुणो भवती'ति ।। उत्तरार्थमेतत्स्यात् – "तुन्दशोकयोः परिमृजापनुदोः" इति ।।

विमला – उत्तरार्थमेतदिति । अस्य तदयुक्तम्, यत इत्यादिः । **तुन्दशोकयोः परिमृजापनुदोरिति** । एवञ्च तुन्दपरिमृज इत्यादौ गुणाभावाय कित्करणमिति भावः । इदमत्र बोध्यम् । वक्ष्यमाणमपि ज्ञापकनिराकरणभाष्यम् । ''**तुन्दशोकयोः परिमृजापनुदोः**'' इत्यत्राऽपकर्षणीयम् । एवञ्च ज्ञापकनिराकरणप्रकरणे ''**गापोष्टक्**'' इति ज्ञापकान्तरदाने प्रकरणविच्छेद इति शङ्कया नाऽवसरः । केचित्तु नैतानि सन्ति ज्ञापकानि । इत्यादिना प्रारब्धज्ञापकनिराकरणमहाप्रकरणान्तर्गतावाऽन्तरज्ञापकनिराकरण-स्यावसाने तत्रार्थे ज्ञापकान्तरदानेपि महाप्रकरणस्याऽविच्छेदः, तदाहि विच्छेदः स्यात् । यदि महाप्रकरणेन खण्डनीयो यावान् ज्ञापकस्तत्तज्ज्ञापकेन लब्धो यावानर्थस्तेषु सर्वत्रैव ज्ञापकान्तरदानप्रकरणमारभेत तथा तु नास्ति, किन्तु यस्यार्थस्य ज्ञापकखण्डनं समाप्तं तत्राऽर्थे ज्ञापकान्तरं दीयते, तावता महाप्रकरणस्य विच्छेदो नास्तीति वदन्ति ।

(प्रथमप्रयोजनबाधकज्ञापकान्तरभाष्यम्)

यत्तर्हि ''गापोष्टग्'' इत्यनन्यार्थं ककारमनुबन्धं करोति ॥

विमला – ''गापोष्टगि'' ति । अत्र हि कित्करणं सामग इत्यादावाकारलोपार्थं, यदित्वाकारस्य गुणः स्यात्तर्हि द्वयोरकारयोः पररूपेण 'सामग' इत्यस्य सिद्धौ कित्करणं व्यर्थमेव स्यादिति भावः ।

(द्वितीयप्रयोजनबाधकसामर्थ्यदूषकभाष्यम्)

यदप्युच्यते – 'उपदेशसामर्थ्यात्संध्यक्षरस्य गुणो न भवती'ति ॥ यदि – यद्यात्संध्यक्षरस्य प्राप्नोति, तत्तदुपदेशसामर्थ्याद्बाध्यते । आयादयोऽपि तर्हि न प्राप्नुवन्ति ॥

(सामर्थ्यदूषणनिराकरणभाष्यम्)

नैष दोषः । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते । यस्य तु विधेर्निमित्तमेव नासौ बाध्यते । गुणं च प्रत्युपदेशोऽनर्थकः, आयादीनां पुनर्निमित्त-मेव ॥

(तृतीयप्रयोजनबाधकज्ञापकनिराकरणभाष्यम्)

यदप्युच्यते – जनेर्डवचनं ज्ञापकम् – 'न व्यञ्जनस्य गुणो भवती'ति ।। सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति । न च जनेर्गुणेन सिद्ध्यति । कुतो ह्येतत् – 'जनेर्गुण उच्यमानोऽकारो भवति, न पुनरेकारो वा स्यादोकारो वे'ति ?

(ज्ञापकसाधकभाष्यम्)

आन्तर्यतोऽर्धमात्रिकस्य व्यञ्जनस्य मात्रिकोऽकारो भविष्यति ।।

(ज्ञापकबाधकभाष्यम्)

एवमप्यनुनासिकः प्राप्नोति ।।

(ज्ञापकसाधकभाष्यम्)

पररूपेण शुद्धो भविष्यति ।।

(ज्ञापकबाधकभाष्यम्)

एवं तर्हि गमेरप्ययं डो वक्तव्यः । गमेश्च गुण उच्यमान आन्तर्यत ओकारः प्राप्नोति । तस्मादिग्ग्रहणं कर्तव्यम् ।।

विमला – तस्मादिग्ग्रहणं कर्त्तव्यमिति ।अत्रेदमवधेयम् । इग्ग्रहणस्याकारस्यैचो व्यञ्जनस्य च गुणनिवृत्त्यर्थत्वमिति प्रयोजनत्रयं वार्तिककृतोक्तम् । भाष्यकृता तु "**गापोष्टगि**"ति कित्करणेनाकारस्योपदेशसामर्थ्येनैचश्च गुणनिवृत्तिसिद्धौ न तदर्थमिग्ग्रहणं; किन्तु जनेर्डवचनस्य गम्यर्थमावश्यकतया गुणाभावज्ञापकत्वासम्भवेन "**उम्भिते**" त्यादौ व्यञ्जनस्य गुणनिवृत्तिमात्रार्थमिग्ग्रहणमिति निरटङ्कि ।

इति योगविभागप्रयोजननिरूपणाधिकरणम्

(अथ इक्पदोपस्थापकलिङ्गाधिकरणम्)

(आक्षेपभाष्यम्)

यदीग्ग्रहणं क्रियते – द्यौः, पन्थाः, सः, इममिति, एतेऽपीकः प्राप्नुवन्ति ।।

(१०६-सिद्धान्तसमाधानवार्तिकम्-२)

||*|| संज्ञया विधाने नियमः ||*||

(व्याख्याभाष्यम्)

संज्ञया ये विधीयन्ते तेषु नियमः ।।

विमला – संज्ञया । गुणवृद्धिशब्देन । ये आदैचः **विधीयन्ते इति** । **तेषु नियम इति** । गुणवृद्धिग्रहणानुवृत्त्यैव सिद्धे पुनर्गुणवृद्धिग्रहणसामर्थ्यादिति भावः । यत्तु पूर्वसूत्राभ्यां गुणवृद्धिपदेऽनुवर्त्य गुणो यो गुणो वृद्धि र्या वृद्धिरिति योजनया-ईदृशार्थलाभ इति तत्तुच्छम् । द्वन्द्वे समूहस्य विशेष्यतया गुणस्य वृद्धेश्च पदार्थैकदेशत्वेन तत्र गुणाद्यन्वयाऽसम्भवात् । द्वन्द्वे समूहस्य विशेष्यत्वादेव "**कुक्कुटमयूर्याविमे**" इत्यत्र "**गोस्त्रियो ह्रस्व**" इति ह्रस्ववारणाय "**द्वन्द्वे न**" इति वचनं भाष्यकृता कृतम् । अन्यथोपसर्जनत्वाभावादेवाप्राप्तौ किन्तेन । समूहे च गुणादीनां बाधात् । असमानविभक्तिकत्वाच्च सामानाधिकरण्येनान्वयासम्भवात् ।

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत् ?

विमला – उक्ताशयानभिज्ञ आह – **किमिति** ।

(समाधानभाष्यम्)

नहि ।।

कथमनुच्यमानं गंस्यते ?

गुणवृद्धिग्रहणसामर्थ्यात् ।।

(आक्षेपसाधकभाष्यम्)

कथं पुनरन्तरेण गुणवृद्धिग्रहणमिको गुणवृद्धी स्याताम् ?

(समाधानसाधकभाष्यम्)

प्रकृतं गुणवृद्धिग्रहणमनुवर्तते ।।

विमला – प्रकृतम् । पूर्वोपात्तम् ।

क्व प्रकृतम् ?

"वृद्धिरादैजदेङ्गुणः" इति ।।

(आक्षेपभाष्यम्)

यदि तदनुवर्तते "अदेङ्गुणौ वृद्धिश्च" इत्यदेङां वृद्धिसंज्ञाऽपि प्राप्नोति ।।

विमला – धाराप्रवाहन्यायेन अनुवृत्तिम्मत्वा शङ्कते – **यदीति** ।

(समाधानवार्त्तिकम्)

।।।। सम्बन्धमनुवर्तिष्यते[1] ।।*।।*

(समाधानभाष्यम्)

संबन्धमनुवर्तिष्यते – "वृद्धिरादैच्" । "अदेङ्गुणः" इति । वृद्धिरादैच् । ततः — "इको गुणवृद्धी" इति । गुणवृद्धिग्रहणमनुवर्त्तते, आदैजदेङ्ग्रहणं निवृत्तम् ।।

(समाधानान्तरवार्त्तिकम्[2])

।।।। मण्डूकगतयोऽधिकाराः ।।*।।*

(समाधानान्तरभाष्यम्)

अथवा मण्डूकगतयोऽधिकाराः । यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः ।।

विमला – आदैच्सम्बद्धवृद्धिपदानुवृत्तौ "इक" इति सूत्रेऽपि तथैवानुवृत्तिः स्यादिति इष्टार्थालाभोऽत आह **अथवेति** । **मण्डूकगतय इति** ।

---

१. वार्त्तिकमिदं लुप्तं भवेदिति केचित् ।

२. भाष्यवार्त्तिकं कात्त्यायनवार्त्तिकं वेदमिति केचित्, केचिच्च भाष्यमेव वदन्ति ।

(एकदेशिसमाधानान्तरभाष्यम्)[१]

अथवैकयोगः करिष्यते – 'वृद्धिरादैजदेङ्गुणः'' । ततः ''इको गुणवृद्धी'' इति । न चैकयोगेऽनुवृत्ति-र्भवति ।।

विमला – मण्डूकानुवृत्तौ सम्बन्धसम्बन्धाभावकल्पनायां गौरवादाह – **अथवैक-योगः करिष्यत इति** ।

(समाधानान्तरभाष्यम्)

अथवा —

अन्यवचनाच्चकाराऽकरणाच्च प्रकृतापवादो विज्ञायते, यथोत्सर्गेण प्रसक्तस्याऽपवादो बाधको भवति ।।

अन्यस्याः संज्ञायाः वचनाच्चकारस्य चानुकर्षणार्थस्याऽकरणात्प्रकृताया वृद्धिसंज्ञाया गुणसंज्ञा बाधिका भविष्यति । यथोत्सर्गेण प्रसक्तस्या-ऽपवादो बाधको भवति ।।

विमला – एकयोगेऽपि ''**तदस्यात्यस्मिन्**'' इत्यत्रानुवृत्तिदर्शनादाह – **अथवा-ऽन्यवचनादिति** ।

(समाधानान्तरभाष्यम्)

अथवा वक्ष्यत्येतत् — ''अनुवर्तन्ते च नाम विधयः । न चानुवर्तनादेव भवन्ति । किं तर्हि ? यत्नाद्भवन्ति'' इति ।।

विमला – आकाडारसूत्रेणान्यत्र संज्ञानां बाध्यबाधकभावाभावज्ञापनादाह — **अथवा वक्ष्यत्येतदिति** ।

---

१. अत्र 'एकयोगो वा' इति वार्त्तिकं लुप्तं भवेदिति गौड़ाः ।

(समाधानान्तरभाष्यम्)

अथवा — उभयं निवृत्तम् । तदपेक्षिष्यामहे ।।

विमला – उभयम् । आदैजदेङ् ग्रहणम् । निवृत्तमिति । अनुवृत्तिप्रयोजकस्वरितत्वाभावादिति भावः । **तत्** । गुणवृद्धिग्रहणमपेक्षिष्यामह इत्यर्थः ।

इतीक्पदोपस्थापकलिङ्गाधिकरणम्

(अथ परिभाषात्वसाधकाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरयमलोऽन्त्यशेषः, आहोस्विदलोन्त्याऽपवादः ?

विमला – किम्पुनरयमलोन्त्यशेष इति । अयम्भावः । "**सार्वधातुकार्धधातुकयो**" रित्यादौ "**अङ्गस्ये**" ति षष्ठीनिर्देशाल्लिङ्गादुपस्थितालोन्त्यपरिभाषाया विधेयताप्रयोजकगुणपदश्रवणादुपस्थितेक्परिभाषायाश्च लक्ष्यसंस्कारकमहावाक्यार्थबोधे– इगन्ताङ्गस्य गुणो भवति । स च भवन्नन्त्यस्येत्येवं विशेष्यविशेषणभावः, अङ्गान्त्यस्य गुणो भवति, '**इकः**' इत्येवं वोभयथाप्यलोऽन्त्यशेषपक्षे पर्यवसानम् । अलोऽन्त्यशेषपदेऽलोऽन्त्येति नियमः शेषो विशेषणं यस्येतिबहुव्रीहेरलोऽन्त्येति नियमस्य शेषो विशेषणमिति तत्पुरुषस्य च तन्त्रेण सम्भवात् । **आहोश्विदलोऽन्त्यापवाद इति** । अपवादशब्दो बाधकपरोऽलोऽन्त्यस्य बाधक इत्यर्थः । अयम्भावः – "**मिदेर्गुण**" इत्यादौ इगन्तस्याङ्गस्य, अङ्गान्तस्येकोऽभावात् । अङ्गस्येति न स्थानषष्ठी किन्तु-इगपेक्षयाऽवयवषष्ठ्येव । ततश्च स्थानषष्ठीरूपनिमित्ताभावादलोऽन्त्यपरिभाषाया अप्रवृत्तिः । एवञ्च सम्भावितप्राप्तिकशास्त्रस्याप्रवृत्तिजनकत्वरूपम्बाधकत्वमलोऽन्त्यसूत्रस्यात्र शास्त्रे गतम् । अस्ति चात्र यदीक्परिभाषा न भवेत्तर्हि स्थानषष्ठीत्वं तन्मूलकालोऽन्त्यपरिभाषोपस्थितिश्च स्यादिति प्रवृत्तिसम्भावना । एवमेव द्वन्द्वापवाद एकशेष इति व्यवहार उपपद्यते । न ह्यनुत्पन्नायां विभक्तावेकशेषप्रवृत्तिसमये द्वन्द्वस्य प्राप्तिरस्ति, किन्तु यद्येकशेषो न स्यात्तर्हि प्रत्येकं विभक्तिः स्याद् द्वन्द्वश्च प्रवर्तेतेति प्राप्तेः सम्भावनैव । युक्तञ्चैतत् । नहि वचनेन प्राप्तस्य बाधः सम्भवति शास्त्रस्याप्रामाण्यप्रसङ्गादिति । यद्यपि शेषो वा । शेषिभूता वा । तया सह समुच्चिता वा । वैकल्पिकी

वा । विप्रतिषेधो वा । तदपवादो वा । पदोपस्थापिका वेति सप्तपक्षाः सम्भाव्यन्ते, तथापि तच्छे षि पक्षस्यापि बहुव्रीहिणा तच्छेषपदेनैव लाभसम्भवात् पृथग्नोक्तः । मिदङ्गान्त्यस्येकश्च द्वयोरपि गुण इत्यर्थकस्तृतीयः पक्षः । मिदङ्गान्त्यस्य, मिदङ्गावयवस्येको गुण इत्यर्थकश्चतुर्थः पक्षश्च । अङ्गस्येति षष्ठ्याः स्थानत्वावयवत्वोभयार्थकत्वाभावेनासम्भवदुक्तिकत्वान्नोक्तः । तदपवादपक्षस्तूक्त एव । पूर्वविप्रतिषेधपक्षोप्यग्रे दूषयिष्यते, पदोपस्थितिपक्षश्च सिद्धान्तयिष्यत इति भाष्यस्य न न्यूनतेत्यवधेयम् ।

(प्रत्याक्षेपभाष्यम्)

कथं चाऽयं[1] तच्छेषः स्यात्, कथं वा तदपवादः ?

विमला – कथं चायमिति । गुणानाञ्च परार्थत्वादिति न्यायेनैतयोः परस्परं सम्बन्धस्यैवाभावेन तच्छेषपक्षो न सम्भवतीति प्रश्नाशयः ।

(प्रत्याक्षेपसमाधानभाष्यम्)

यद्येकं वाक्यम् — तच्चेदं च, 'अलोन्त्यस्य विधयो भवन्ति' । 'इको गुणवृद्धी अलोन्त्यस्य' इति । ततोऽयं तच्छेषः ।। अथ नानावाक्यम् – तच्चेदं च, अलोन्त्यस्य विधयो भवन्ति, 'इको गुणवृद्धी, अन्त्यस्य चानन्त्यस्य[2] च' इति । ततोऽयं तदपवादः ।।

(भाष्यम्)

कश्चात्र विशेषः ?

(१०७-तच्छेषपक्षदूषणवार्तिकम् - ३)

।।*।। वृद्धिगुणावलोन्त्यस्येति चेन्मिदिमृजिपुगन्तलघूपधच्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणम् ।।*।।

---

१. 'कथं वाऽय' मिति क्वाचित्कः ।

२. 'अनन्त्यस्य चे' ति क्वचिदस्ति क्वचिन्नास्ति ।

(व्याख्याभाष्यम्)

वृद्धिगुणावलोन्त्यस्येति चेन्मिदिमृजिपुगन्तलघू-पधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं कर्तव्यम् ।।

"मिदेर्गुणः", "इक इति वक्तव्यम्", अनन्त्यत्वाद्धि न प्राप्नोति ।। 'मृजेर्वृद्धिः', 'इक इति वक्तव्यम्', अनन्त्यत्वाद्धि न प्राप्नोति ।।

पुगन्तलघूपधस्य गुणः, "इक इति वक्तव्यम्" अनन्त्यत्वाद्धि न प्राप्नोति ।।

ऋच्छेर्लिटि गुणः, "इक इति वक्तव्यम्", अनन्त्यत्वाद्धि न प्राप्नोति ।।

"ऋदृशो ङि गुणः", "इक इति वक्तव्यम्" अनन्त्यत्वाद्धि न प्राप्नोति ।।

क्षिप्रक्षुद्रयोर्गुणः, "इक इति वक्तव्यम्" अनन्त्यत्वाद्धि न प्राप्नोति ।।

विमला – वृद्धिगुणावलोऽन्त्यस्येति ।इक इति शेषः ।**इक इति वक्तव्यमिति** । मिद्धातावन्ते-इकोऽभावेनाऽलोऽन्त्यसंबद्धया "**इको गुणवृद्धी**" ति परिभाषया '**इक**' इत्यस्य लाभासम्भवेन सम्पूर्णस्य गुणव्यावृत्त्यर्थम् '**इक**' **इति** वचनं कर्तव्यमिति भावः ।**ऋच्छेर्लिटीति** ।ऋच्छ् धातौ लिटि गुणविधायके '**ऋच्छत्यृतामि**' ति सूत्रे '**इक' इति वक्तव्यम्**' इक इति वचनं कर्त्तव्यमिति भावः ।**क्षिप्रक्षुद्रयोरिति** । **स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं लुप्यते पूर्वस्य च गुण** इति सूत्रेण रेफस्य लोपेऽवशिष्टस्येगन्तत्वाभावेन पुनरनेन गुणो न स्यात् ।एवञ्च 'क्षेपिष्ठः' 'क्षोदिष्ठः' इत्यादि न सिद्ध्येत्, अतोऽत्र '**इक**' इति वक्तव्यमिति भावः ।

(१०७-तच्छेषपक्षदूषणान्तरवार्तिकम् - ४)

।।।। सर्वादेशप्रसंगश्चानिगन्तस्य ।।*।।*

(एकदेशिव्याख्याभाष्यम्)

सर्वादेशश्च गुणोऽनिगन्तस्य प्राप्नोति – याता वाता ।।

किं कारणम् ?

"अलोन्त्यस्य" इति षष्ठी चैव ह्यन्त्यमिकमुपसंक्रान्ता, अङ्गस्येति च स्थानषष्ठी । तद्यदिदानीमनिगन्तमङ्गं तस्य गुणः सर्वादेशः प्राप्नोति ।।

विमला – सर्वादेशप्रसङ्गश्चेति ।अयम्भावः । '**सार्वधातुकार्धधातुकयोरि**'ति सूत्रं सार्वधातुकार्धधातुकान्यतराव्यवहितपूर्वत्वविशिष्टाङ्गघटितो यावान् लक्ष्यस्त वत्संख्यकं स्वभेदं कल्पयति । एवञ्च भवत्याद्यर्थकल्पित '**सार्वधातुकार्धधातुकयोरि**' ति सूत्रे विशेष्यविशेषणभावापन्ने **इको ''गुणवृद्धी'' 'अलोऽन्त्यस्ये'** ति परिभाष उपतिष्ठेते यातेत्याद्यर्थं कल्पिते '**सार्वधातुकार्धधातुकयोरि**' ति सूत्रे तु अयोग्यत्वादिक्परिभाषाया अनुपस्थितौ तत्संबद्धालोऽन्त्यपरिभाषाऽपि नोपतिष्ठते सम्बन्धापरित्यागेनोपस्थानमेव तच्छेषत्वम् । एकस्या असम्भवे द्वितीयाऽपि नोपतिष्ठते इति तच्छेषवादिनां सिद्धान्तात् । एवञ्चानिगन्तेषु '**अङ्गस्ये**' ति स्थानषष्ठी संकोचेनान्त्येऽलि कार्यविधायिका नेति सम्पूर्णस्याङ्गस्यैव यातेत्यादौ गुणः स्यादिति ।

उपसंक्रान्ता । संबद्धा अन्त्यस्येकः कार्यनियामिकेति यावत् । परिभाषयोः परस्परं संबद्धयोरेवोपस्थितिरिति भावः ।

(दूषणोद्धारभाष्यम्)

नैष दोषः, यथैव ह्यलोन्त्यस्येति षष्ठी अन्त्यमिकमुपसंक्रान्ता, एवमङ्गस्येत्यपि स्थानषष्ठी । तद्यदिदानीमनिगन्तमङ्गं तत्र षष्ठ्येव नास्ति, कुतो गुणः, कुतः सर्वादेशः ?

विमला – स्थानषष्ठीति । अन्त्यमिकमुपसक्रान्तेत्यनुकर्षः इगन्ताङ्गस्य कार्यविधायिकेत्यर्थः । **तत्रेति** । अनिगन्तमङ्गं तत्पदार्थः । विषयत्वं सप्तम्यर्थः ।

षष्ठ्येवेति । अत्र षष्ठीपदं षष्ठीघटितलक्षणपरम् । तथा चानिगन्ताङ्गविषयकषष्ठी-घटितलक्षणमेव नास्तीति समुदितार्थः ।

(वार्तिकसङ्गमनभाष्यम्)

एवं तर्हि नाऽयं दोषसमुच्चयः ।।

किं तर्हि ? ।

पूर्वापेक्षोऽयं दोषः । ह्यर्थे चायं 'चः' पठितः – 'मिदिमृजिपुगन्तलघूपधार्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं सर्वादेशप्रसङ्गो ह्यनिगन्तस्य' इति ।

मिदेर्गुणः 'इक' इति वचनादन्त्यस्य न, 'अलोन्त्यस्य' इति वचनादिको न । उच्यते च गुणः । स सर्वादेशः प्राप्नोति । एवं सर्वत्र ।।

विमला – **एवं तर्हीति** । एवं सतीत्यर्थः । **अयम्** । सर्वादेशप्रसङ्गेति वार्तिकबोध्यः । दोषसमुच्चयो नेत्यन्वयः । एवञ्चात्रत्यश्चकारो न समुच्चयार्थक इति भावः । **पूर्वापेक्षोऽयमिति** । मिदमृजीत्यादौ । '**इग्ग्रहणं कर्तव्यमि**' ति वार्तिकसापेक्ष इत्यर्थः । '**सर्वादेश प्रसङ्गश्चानिगन्तस्ये**' ति वार्तिकं दोषान्तरदानाय नोपन्यस्तं, किन्तु तत्सूत्रे '**इग्ग्रहणं कर्तव्यमि**' ति वार्तिकानुक्तावनिगन्तस्य सर्वादेशगुणः प्रसज्येत इत्यापत्तिदानायेति भावः । ननु तर्हि चकारस्य कोऽर्थोऽत आह ह्यर्थे चायं चः पठित इति । हेरर्थेऽर्थे चकारः पठितः । हेत्वर्थकोऽत्र चकार इति भावः । अस्य पूर्वापेक्षत्वे समस्तवार्तिकपाठमाह — **मिदिमृजीत्यादि** । यतोऽनिगन्तस्य सर्वादेशप्रसङ्गोऽतो-मिदिमृजीत्यादौ 'इक' इति वक्तव्यमिति वार्तिकं कर्तव्यमिति समुदितार्थः । अनिगन्तस्य सर्वादेशप्रसङ्गे हेतुमुपपादयति – '**मिदेर्गुण' इति** । मिद्धातावन्ते इकोऽभावेनान्त्यस्य गुणे इको गुणो न स्यादिति । मिथो विशेष्यविशेषणभावापन्नयो-र्द्वयोरेवाप्रवृत्तौ स्थाने योगा इत्यनया सम्पूर्णस्याङ्गस्य गुणः प्राप्नोतीति भावः ।

इति तच्छेषपक्षदूषणम्

(अथ तदपवादपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि तदपवादः ।।

(अथ तदपवादपक्षदूषणवार्तिकम्)

।।*।। इङ्मात्रस्येति चेज्जुसिसार्वधातुकार्धधातुक-ह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधः ।।*।।

(व्याख्याभाष्यम्)

इङ्मात्रस्येति चेज्जुसिसार्वधातुकार्धधातुकह्रस्वाद्यो-र्गुणेष्वनन्त्यप्रतिषेधो वक्तव्यः ।।

जुसिगुणः[1] – स यथेह भवति – 'अजुहवुः अबिभयुः' इति । एवम् 'अनेनिजुः पर्यवेविषुः' – अत्रापि प्राप्नोति ।।

सार्वधातुकार्धधातुकयोर्गुणः – स यथेह भवति – 'कर्ता हर्ता नयति तरति' इति । एवम् – 'ईहिता ईहितुम् ईहितव्यम्' इत्यत्रापि प्राप्नोति ।।

ह्रस्वस्य गुणः – स यथेह भवति – 'हे अग्ने हे वायो' इति । एवं 'हे अग्निचित् हे सोमसुत्' इत्यत्रापि प्राप्नोति ।

जसि गुणः – स यथेह भवति – 'अग्नयो वायवः' इति । एवं 'अग्निचितः सोमसुतः' इत्यत्रापि प्राप्नोति ।।

ऋतो ङिसर्वनामस्थानयोर्गुणः – स यथेह भवति – 'कर्तरि कर्तारौ कर्तारः' इति, एवं 'सुकृति सुकृतौ सुकृतः' इत्यत्रापि प्राप्नोति ।।

घेर्ङिति गुणः – स यथेह भवति – 'अग्नये वायवे' इति । एवम् 'अग्निचिते सोमसुते' इत्यत्रापि प्राप्नोति ।।

ओर्गुणः – स यथेह भवति – 'बाभ्रव्यो माण्डव्यः' इति । एवं 'सुश्रुत् सौश्रुतः' इत्यत्रापि प्राप्नोति ।।

---

१. जुसिचेतिगुणः । एवमग्रेऽपि ।

विमला – अस्तु तर्हि तदपवाद इति । एवञ्च '**मिदेर्गुण**' इत्यादौ '**अङ्गस्ये**'-ति षष्ठ्या इगपेक्षयाऽवयवार्थकत्वेन स्थानषष्ठीत्वाभावादलोऽन्त्यपरिभाषानुपस्थितौ मिदङ्गावयवस्येको गुण इत्यर्थस्य परिभाषयैव लाभसम्भवात्, '**इक इति वक्तव्यमि**'-ति वार्तिकं न कर्तव्यमिति भावः । **इङ्मात्रस्येति** । मात्रपदं कात्स्न्यार्थकम्, '**मात्रं कात्स्न्र्येऽवधारणे' इति** कोशात् । इङ्मात्रस्य न त्वलोऽन्त्यपरिभाषासहकारेणान्त्यस्यैवेको गुण इति नियम इति भावः । **जुसीति** । '**जुसि च' सार्वधातुकार्धधातुकश्च ह्रस्वादिश्च ओर्गुणश्चेत्येतेषामितरेतरयोगद्वन्द्वः** । ह्रस्वादीत्यत्र '**जुसि च**' '**ऋतोङि सर्वनामस्थानयोः**' '**घेर्ङिति**' इति गुणत्रयमादिशब्दार्थः । **ह्रस्वस्य गुण इति** । नन्वकारस्य गुणेऽपि क्षत्यभावेन हलां ह्रस्वत्वाभावेनैव गुणाप्राप्तौ न तद्व्यावृत्त्यर्थत्वस्यापि प्रत्याशेति निष्फलत्वादिक्परिभाषा नोपतिष्ठेतेति चेन्न, इक्परिभाषोपस्थितावङ्गस्येगपेक्षयाऽवयवषष्ठीत्वेनाङ्गावयवस्य ह्रस्वस्येको गुण इत्यर्थे हेऽग्निचिदित्यादौ ह्रस्वस्येत्यस्याङ्गविशेषणत्वेन ह्रस्वान्ताङ्गावयवस्येको गुण इत्यर्थे 'हे इन्द्र' हे उपगो, इत्यादावनन्त्यस्येको गुणसम्पादनेन सफलतया प्रवृत्तिसम्भवात् । नहि व्यावर्तनमेव फलं न सम्पादनमिति राजाज्ञास्ति । परिभाषाया अनियमे नियमकारिणीत्वमित्यपि प्रवादः सफलत्वमूलक एव । **एतेन ह्रस्वस्य** गुण इत्यादीनां निर्दिष्टस्थानिकत्वेनेक्परिभाषा नोपतिष्ठेत, परिभाषाया अनियमे नियमकारिणीत्वादित्यपास्तम् । इदञ्च वार्तिकं जुसीत्यादीनामप्रत्ययानामङ्गविशेषणत्वाभिप्रायेण प्रवृत्तम् । तेषामप्राधान्यादिग्विशेषणत्वे तु तदपवादपक्षे न कोऽपि दोष इति बोध्यम् ।

(भाष्यम्)

नैष दोषः ।

(१०९-सिद्धान्त्येकदेशिवार्तिकम्-६)

॥*॥ पुगन्तलघूपधग्रहणमनन्त्यनियमार्थम् ॥*॥

(व्याख्याभाष्यम्)

पुगन्तलघूपधग्रहणमनन्त्यनियमार्थं भविष्यति – 'पुगन्तलघूपधस्यैवानन्त्यस्य नान्यस्याऽनन्त्यस्ये'-ति ॥

(नियमदूषणभाष्यम्)

प्रकृतस्यैव नियमः स्यात् ।।

किं च प्रकृतम् ?

"सार्वधातुकार्धधातुकयोः" इति ।। तेन भवेदिह नियमान्न स्यात् – 'ईहिता, ईहितुम्, ईहितव्यम्' इति । ह्रस्वाद्योर्गुणस्त्वनियतः, सोऽनन्त्यस्यापि प्राप्नोति ।।

विमला – प्रकृतस्यैवेति । अनन्तरस्यैवेत्यर्थः, "**अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति**' न्यायादिति भावः ।

(नियमान्तरदूषणभाष्यम्)

अथाप्येवं नियमः स्यात् – 'पुगन्तलघूपधस्य सार्वधातुकार्धधातुकयोरेवे'ति ।। एवमपि सार्वधातुकार्ध-धातुकयोर्गुणोऽनियतः सोऽनन्त्यस्यापि प्राप्नोति – ईहिता ईहितुम् ईहितव्यमिति ।

विमला – सोऽनन्त्यस्यापीति । नियमस्य सजातीयापेक्षतया सार्वधातुकार्ध-धातुकयोरजुपधस्य चेत्पुगन्तलघूपधस्यैवेति नियमस्तेन चेतेत्यादौ नियमेन न व्यावृत्तिः, किन्तु दीर्घोपधस्य व्यावृत्तिः । यत एवकारस्ततोऽन्यत्र नियम इति सार्वधातुका-धातुकयोरित्यस्य नियमो भवति न तु पुगन्तलघूपधस्येति, सार्वधातुकाधातुका-र्धधातुकातिरिक्ते संबुद्धौ परे हेऽग्निचिदित्यादौ '**ह्रस्वस्यगुण**' इत्यादिनाऽनन्त्यस्य गुणो दुर्निवार एवेति भावः ।

(उभयविधनियमदूषणभाष्यम्)

अथाप्युभयतो नियमः स्यात् – 'पुगन्तलघूपधस्यैव सार्वधातुकार्धधातुकयोः' । सार्वधातुकार्धधातुकयोरेव पुगन्तलघूपधस्येति ।। एवमप्ययं जुसिगुणोऽनियतः सोऽनन्त्यस्यापि प्राप्नोति – 'अनेनिजुः पर्यवेविषुः' इति ।।

विमला – उभयतो नियम इति । उभयोरित्युभयतः सार्वविभक्तिकस्तसिः । **जुसि गुणोऽनियत इति** । नियमव्यावर्त्यो न भवतीत्यर्थः । न तु नियमानाक्रान्त इत्यर्थः । जुसः सार्वधातुकत्वेनाङ्गस्य लघूपधत्वेन च नियमप्राप्तेरक्षतत्वादिति बोद्धव्यम् ।

इति तदपवादपक्षदूषणप्रकरणम् ।।

(अथासंबद्धपरिभाषापक्षनिराकरणाधिकरणम्)

(भाष्यम्)

एवं तर्हि – नायं तच्छेषः, नापि तदपवादः । अन्यदेवेदं परिभाषाऽन्तरमसंबद्धमनया परिभाषया ।।

विमला – क्रोष्ट्रीयसम्मतं पूर्वविप्रतिषेधपक्षमुत्थापयति **एवं तर्हीति** । तच्छेषतदपवादपक्षयोर्दुष्टत्वे एवमुच्यत इत्यर्थः । **अन्यदेवेदमिति** । अस्य किन्त्वित्यादिः । अन्यदेवेत्यस्य विवरणम् – असंबद्धमनया परिभाषयेति ।

(भाष्यम्)

परिभाषान्तरमिति च मत्वा क्रोष्ट्रीयाः पठन्ति –

।।।। नियमादिको गुणवृद्धी भवतो विप्रतिषेधेन ।।*।।*

इति ।। यदि चायं तच्छेषः स्यात्तेनैव तस्याऽयुक्तो विप्रतिषेधः । अथापि तदपवादः, उत्सर्गापवादयोरप्युक्तो विप्रतिषेधः ।। तत्र नियमस्यावकाशः – "राज्ञः क च" राजकीयम् । "इको गुणवृद्धी" इत्यस्यावकाशः – 'चयनं, चायको, लवनं, लावकः' इति । इहोभयं प्राप्नोति – 'मेद्यति मार्ष्टि' इति । "इको गुणवृद्धी" इत्येतद्भवति विप्रतिषेधेन ।।

विमला – अत्रार्थे क्रोष्ट्रीयसम्मतिं दर्शयति – **परिभाषान्तरमिति मत्वेति** । च एवार्थे परिभाषान्तरमित्येव हृदि निधायेत्यर्थः । **नियमात्** । नियम इत्यलोऽन्त्यपरिभाषायाः पूर्वाचार्यसंज्ञा अलोऽन्त्यस्येति सूत्रादित्यर्थः । **भवत इति** ।

विधेयगतं द्वित्वं सूत्रे आरोप्य द्विवचनम् । वस्तुत एकवचनमेव न्याय्यम् । अतएव **'इकोगुणवृद्धीत्येत-द्भवति विप्रतिषेधेने'ति भाष्यकृद्वक्ष्यति** । नन्वेतावता परिभाषान्तरमित्येव क्रोष्ट्रीयसम्मतमिति कथमवगम्यते, तच्छेषतदपवादयोरपि विप्रतिषेधसम्भवादित्या-शङ्कायामाह **यदि चायमिति** । **स्यादिति** । तर्हीति शेषः । **तदपवाद इति** । स्यात्तर्हीति शेषः । अयम्भावः — विप्रतिषेधो नाम तुल्यबलयोर्विरोधः । तुल्यबलत्वञ्च परस्पर-लब्धावकाशत्वम् । विरोधो नाम असम्भवात्सहानवस्थानम् । यद्यनयोः शेषशेषिभावः स्यात्तर्ह्येकवाक्यतयैव विधानं स्यादित्यसम्भवाभावेन विरोधाभावाद्विप्रतिषेधो न स्यात् । यदि चानयोरुत्सर्गापवादभावः स्यात्तदा परस्परलब्धावकाशत्वाभावेन विप्रतिषेधो न स्यादिति नियमा**दिको गुणवृद्धी** विप्रतिषेधेनेतिवदता क्रोष्ट्रीयेण स्पष्टमेव स्वाभिप्रायमाविष्कृतम् । अनयोरुत्सर्गापवादभावो वा शेषशेषिभावो वा नास्तीति ।

(विप्रतिषेधबाधकभाष्यम्)

नैष युक्तो विप्रतिषेधः । ''विप्रतिषेधे परम्'' इत्युच्यते । पूर्वश्चायं योगः, परो नियमः ।।

विमला – सिद्धान्ती विप्रतिषेधं दूषयति-नैष युक्तो विप्रतिषेध इति । अत्रैकदेशी हेतुमाह – **विप्रतिषेधेपरमिति** ।

(विप्रतिषेधसाधकभाष्यम्)

इष्टवाची परशब्दः । 'विप्रतिषेधे परं यदिष्टं तद्भवती'ति ।

विमला – विप्रतिषेधवादी-एकदेश्युक्तं हेतुं खण्डयति-इष्टवाचीति ।

(विप्रतिषेधबाधकभाष्यम्)

एवमप्ययुक्तो विप्रतिषेधः । द्विकार्ययोगो हि विप्रतिषेधः । न चात्रैको द्विकार्ययुक्तः ।।

विमला – सिद्धान्ती स्वोक्तं द्रढयति – **एवमप्ययुक्तो विप्रतिषेध इति** । एकदेशी हेतुमाह – **द्विकार्ययोगो हीति** । अत्र मेद्यतीत्यादौ । 'एकः'

इकारदकारान्यतररूप: ।

(विप्रतिषेधसाधकभाष्यम्)

नावश्यं द्विकार्ययोग एव विप्रतिषेधः ।।

किं तर्हि ?

असंभवोऽपि । स चास्त्यत्रासंभवः ।।

कोऽसावसंभवः ?

इह तावत् – 'वृक्षेभ्यः प्लक्षेभ्य' इति – एकः स्थानी, द्वावादेशौ, न चास्ति संभवो यदेकस्य स्थानिनो द्वावादेशौ स्याताम् । इहेदानीं – 'मेद्यति, मेद्यतः, मेद्यन्ति' इति । द्वौ स्थानिनौ, एक आदेशः, न चास्ति संभवः, द्वयोः स्थानिनोरेक आदेशः स्यादित्येषोऽसंभवः । सत्येतस्मिन्नसंभवे युक्तो विप्रतिषेधः ।।

विमला – विप्रतिषेधवादी एकदेश्युक्तं हेतुं खण्डयति **नावश्यमिति** । **द्वावादेशौ स्यातामिति** । एवञ्चात्र यथाऽसंभवाद्विप्रतिषेधो भवति तथैव मेद्यतीत्यादावप्यसम्भवाद्विप्रतिषेध: स्यादितिभाव: ।

(विप्रतिषेधबाधकभाष्यम्)

एवमप्ययुक्तो विप्रतिषेधः । द्वयोर्हि सावकाशयोः समवस्थितयोर्विप्रतिषेधो भवति । अनवकाशश्चायं योगः ।।

विमला – सिद्धान्ती आह – **एवमपीति** । असम्भवमात्रसत्त्वेऽपीत्यर्थ: । सिद्धान्ती हेतुमाह - **द्वयोर्हीति** । **समवस्थितयोरिति** । युगपदेकत्रप्राप्तयोरित्यर्थ: ।

(विप्रतिषेधसाधकभाष्यम्)

ननु च – इदानीमेवास्याऽवकाशः प्रक्लृप्तः – चयनं चायको लवनं लावक इति ।।

(विप्रतिषेधबाधकभाष्यम्)

अत्रापि नियमः प्राप्नोति । नाप्राप्ते नियमेऽयं योग आरभ्यते । यावता च नाप्राप्ते नियमेऽयं योग आरभ्यते, ततस्तस्यापवादोऽयं योगो भवति । उत्सर्गापवादयोश्चाऽयुक्तो विप्रतिषेधः । अथापि कथंचिद् "इको गुणवृद्धी" इत्यस्यावकाशः स्यात् । एवमपि यथेह विप्रतिषेधादिको गुणो भवति मेद्यति मेद्यतः मेद्यन्ति, इति, एवमिहापि स्यात् – अनेनिजुः पर्यवेविषुरिति ।।

विमला – **अत्रापीति** । अफलत्वेऽपि पर्यन्यवन्न्यायेनेति भावः । **कथञ्चिदिति** । चयनमित्यादावफलत्वान्नियमानुपस्थित्येति भावः ।

इत्यसंबद्धपरिभाषापक्षनिरासाधिकरणम् ।।

(अथ सिद्धान्तभूतपदोपस्थितिपक्षनिरूपणम्)

(सिद्धान्तिभाष्यम्)

एवं तर्हि – 'वृद्धिर्भवति गुणो भवती'ति यत्र ब्रूयाद् 'इकः' इत्येतत्तत्रोपस्थितं द्रष्टव्यम् ।।

किं कृतं भवति ?

द्वितीया षष्ठी प्रादुर्भाव्यते ।। तत्र कामचारः – गृह्यमाणेन वेकं विशेषयितुम्, इका वा गृह्यमाणम् । यावता कामचारः, इह तावन्मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेषु गृह्यमाणेनेकं विशेषयिष्यामः – 'एतेषां य इ'गिति । इहेदानीं जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्विका गृह्यमाणं विशेषयिष्यामः– "एतेषां गुणो भवति, 'इकः' इगन्ताना"मिति ।।

विमला – सिद्धान्ती निर्दुष्टम्पदोपस्थितिपक्षं व्याख्यातुमारभते – **एवन्तर्हीति** । **द्वितीयाषष्ठीति** । द्वितीयं षष्ठ्यन्तं पदमित्यर्थः । **प्रादुर्भाव्यते** उपस्थापयति । **गृह्यमाणेनेकं विशेषयिष्याम इति** । अयम्भावः । **मिदेर्गुण** इत्यादावन्तरङ्गत्वादिक्परिभाषया इगुपस्थितौ तदपेक्षयाऽङ्गस्येत्यत्र षष्ठ्या अवयवार्थकत्वे जाते स्थानषष्ठी-

रूपनिमित्ताभावादलोऽन्त्यपरिभाषा नोपतिष्ठते । '**जुसि च**' इत्यादौ तु-इक्परिभाषयोपस्थितस्येक इति षष्ठ्यन्तस्याङ्ग सामानाधिकरण्येनैवान्वयाद् विशेषणेन तदन्तविधौ इगन्ताङ्गस्य गुणो भवति, जुसि अत्राङ्गस्येति षष्ठ्याः स्थानार्थकत्वेनाऽलोऽन्त्यपरिभाषोपस्थितावन्त्यस्य गुणो भवतीति, परिभाषाद्वयमप्यत्रोपतिष्ठत इति ।

एतेषामिति । अनुवृत्तस्याङ्गस्येत्यस्य सूत्रभेदेन भेदात्तदभिप्रायेण बहुवचनम् । अङ्गानामित्यर्थः । **इक इति** । उपतिष्ठत इति शेषः । **इगन्तानामिति** । एवञ्चेगन्तानामेतेषां गुणो भवतीति योजना ।

(तच्छेषपक्षोक्तदूषणनिराकरणभाष्यम्)

अथवा सर्वत्रैवात्र स्थानी निर्दिश्यते । इह तावन्मिदेरित्यविभक्तिको निर्देशः – मिद् एः – मिदेरिति ।। अथवा षष्ठीसमासो भविष्यति – मिद इः – मिदिः, मिदेरिति ।।

पुगन्तलघूपधस्येति । नैवं विज्ञायते – 'पुगन्ताङ्गस्य लघूपधस्य चे'ति ।।

कथं तर्हि ?

पुकि अन्तः पुगन्तः, लघ्वी उपधा लघूपधा, पुगन्तश्च लघूपधा च पुगन्तलघूपधम्, पुगन्तलघूपधस्येति । अवश्यं चैतदेवं विज्ञेयम्, अङ्गविशेषणे सतीह प्रसज्येत – भिनत्ति, छिनत्तीति ।।

ऋच्छेरपि प्रश्लिष्टनिर्देशोऽयम् – ऋच्छति ऋ ॠ ॠताम् – "ऋच्छत्यॄताम्" इति ।।

दृशेरपि योगविभागः करिष्यते, – 'उरङि गुणः' । उः अङि गुणो भवति । ततो – "दृशेः", दृशेश्चाऽङि गुणो भवति ।। 'उ'रित्येव ।।

क्षिप्रक्षुद्रयोरपि – "यणादि परं गुणः" इतीयता सिद्धम् । सोऽयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति

तस्यैतत्प्रयोजनम् – 'इको यथा स्यादनिको मा भू'-दिति ।।

विमला – कश्चिदेकदेशी तच्छेषपक्षोक्तदूषणमुद्धृत्य तत्पक्षं स्थापयितुं यतते-**अथवेति** । मृज्यंशे दोषापरिहारेण तत एव तत्पक्षपरित्यागस्य युक्तत्वेनैवास्यैकदेशयुक्तत्वं वक्ष्यमाणरीत्या तत्परिहारे तु ततो लाघवाद्वरं पदोपस्थितिपक्ष एव । **सर्वत्रेति** । बहुष्वित्यर्थः । एवकारो भिन्नक्रमः क्रियापदोत्तरं द्रष्टव्यम् । तेन क्वचित्तथा निर्देशाभावेऽपि न क्षतिः । अत्र पूर्वोक्तस्थलेषु **स्थानी निर्दिश्यत इति** । एवञ्च तेष्वन्त्यस्येकोऽभावान्नियमेन शेषशेषिभावापन्नाया इक्परिभाषाया अनुपस्थितावपि न दोष इति भावः । **पुगन्ताङ्गस्येति** । पुङ्निष्ठचरमावयवतानिरूपकाभिन्नो योऽङ्गः लघूपधाघटितसमुदायाभिन्नश्च योऽङ्गस्तदवयवस्येको गुण इति नार्थ इत्यर्थः । **पुकि अन्त इति** । पुगव्यवहितपूर्वत्वविशिष्टो योऽन्त इत्यर्थः । **लघ्वी उपधा लघूपधेति** । कर्मधारयोऽयं न बहुव्रीहिरितिभावः, एवं व्याख्याने सूत्रार्थस्तु सार्वधातुकार्धधातुकान्यतराव्यवहितपूर्वत्वविशिष्टो योऽङ्गस्तस्यावयवो यः पुगव्यवहितपूर्वत्वविशिष्टोऽन्तस्तस्य, तादृशाङ्गावयवीभूता या लघ्वी उपधा तस्याश्च गुण इति । एवञ्च भिनत्तीत्यादाविकारस्योपधात्वाभावेन न गुणः । अकारस्य गुणेऽपि क्षत्यभावेन दीर्घाणामुपधात्वेऽपि लघूपधत्वाभावेनैव गुणव्यावर्त्तनेन चात्रेक्परिभाषानुपस्थितावपि न दोष इति भावः । **अवश्यं चैतदेवं विज्ञेयमिति** । इक्परिभाषोपस्थितिवादिनापीत्यादिः । **अङ्गविशेषणे सतीति** । लघ्वी उपधा यस्येति बहुव्रीह्याश्रयणे यदवयवो लघूपधा तस्य सार्वधातुकार्धधातुकान्यतरपूर्वत्वविशिष्टाङ्गस्यावयवो य इक् तस्य गुण इत्यर्थे भिनत्तीत्यादावङ्गस्य लघूपधावयवकत्वेन सार्वधातुकाव्यवहितपूर्वत्वेन च तदवयवस्येको गुणो दुर्वार एव । अधुना लघूपधाया यत्पदार्थे विशेषणतया तत्रेकोऽन्वयासम्भवात् । कर्मधारयाश्रयणे तु लघूपधायामिकोऽन्वयसम्भवात् । इको लघूपधात्वाभावेन भिनत्तीत्यादौ न दोष इत्येतदर्थमिक्परिभाषोपस्थितिवादिनाऽपि लघ्वी उपधेत्येव वक्तव्यम् । न च सार्वधातुकार्धधातुकयोरित्यस्येकि विशेषणे सार्वधातुकार्धधातुकान्यतरपूर्वत्वविशिष्टस्य लघूपधाङ्गावयवस्येको गुण इत्यर्थे न दोष इति वाच्यम् । सार्वधातुकार्धधातुकयोरित्यस्याङ्गांशे उत्थिताकाङ्क्षत्वेन तत्रैवान्वयस्यौचित्यात् लक्ष्यानुरोधेनाकाङ्क्षाविपरीतान्वयकल्पने तु ततो वरं कर्मधारयाश्रयणमेवेति भावः । **इहेति** । अस्येक्परिभाषोपस्थितावपीत्यादिः । **ऋच्छेरपीति** । स्थानी निर्दिश्यत इत्यनुषज्यते, यत इति शेषः । ऋच्छेरपि स्थानी निर्दिश्यते, यतः प्रश्लिष्टनिर्देशोऽयमिति समुदितँव्वाक्यम् ।

प्रश्लिष्टनिर्देशोऽयमिति । तथाहि – आ च ऋतश्चेति ऋतः । ऋच्छतेरा ऋच्छत्या । ऋच्छत्या च ऋतश्चेति षष्ठीतत्पुरुषद्वन्द्वोभयगर्भो द्वन्द्वः । एवञ्च ऋच्छेर्ऋकारस्य ऋधातोर्ऋताञ्च गुणः स्यादित्यर्थे– इक्परिभाषा ऽनुपस्थितावपि न दोष इति भावः । **ऽरङिग्गुण इति** । **ततो दृशेरिति** । इदं गुरुभूतयोगविभागकरणमप्येकदेशयुक्तत्वं सूचयति **क्षिप्रक्षुद्रयोरपीति** । स्थानी निर्दिश्यते इत्यनुषज्यते ।

(वृद्धिपदप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ वृद्धिग्रहणं किमर्थम् ?

विमला – **अथवेत्यादिना** तच्छेषपक्षोक्तदूषणोद्धारमध्ये क्रमप्राप्तमृज्यंशदोषस्यानुद्धारेण तस्य दुरुद्धरत्वभ्रममपाकर्तुमेकदेशी भूमिकां रचयति – **अथ वृद्धिग्रहणं किमर्थमिति** ।

(प्रत्याक्षेपभाष्यम्)

किं विशेषेण वृद्धिग्रहणं चोद्यते, न पुनर्गुणग्रहणमपि । यदि किंचिद्गुणग्रहणस्य प्रयोजनमस्ति, वृद्धिग्रहणस्यापि तद्भवितुमर्हति । को वा विशेषः ?

विमला – तटस्थः पूर्वपक्षिणमाक्षिपति – **किं विशेषेणति** ।

(प्रत्याक्षेपसमाधानभाष्यम्)

अयमस्ति विशेषः । गुणविधौ न क्वचित्स्थानी निर्दिश्यते, तत्राऽवश्यं स्थानिनिर्देशार्थं गुणग्रहणं कर्तव्यम् । वृद्धिविधौ पुनः सर्वत्रैव स्थानी निर्दिश्यते – 'अचोञ्णिति' 'अत उपधायाः' 'तद्धितेष्वचामादेः' इति ।।

विमला – एकदेशी स्वाशयमाविष्करोति – **अयमस्ति विशेष इति** । सर्वत्रैवेति । बहुष्वित्यर्थः ।

(समाधानवार्त्तिकावतरणभाष्यम्)

अत उत्तरं पठति —

(११०-सिद्धान्तिसमाधानवार्तिकखण्डम्-६)

//*// *वृद्धिग्रहणमुत्तरार्थम्* //*//

(भाष्यम्)

वृद्धिग्रहणं क्रियते ।। किमर्थम् ? उत्तरार्थम् । 'क्ङिति' इति प्रतिषेधं वक्ष्यति । स वृद्धेरपि यथा स्यात् ।।

विमला – **उत्तरार्थमिति** । उत्तरस्य निषेधसूत्रस्य स्वविषये प्रवृत्त्यर्थमित्यर्थः । **यावतेति** । सर्वत्रेत्यर्थः ।

(पूर्वपक्षिभाष्यम्)

कश्चेदानीं क्ङित्प्रत्ययेषु वृद्धेः प्रसङ्गः । यावता 'ञ्णिति' इत्युच्यते ?

(११०-सिद्धान्तिसमाधानवार्तिकद्वितीयखण्डम्-७)

//*// *तच्च मृज्यर्थम्* //*//

(भाष्यम्)

मृजेर्वृद्धिरविशेषेणोच्यते । सा क्ङिति मा भून् मृष्टः मृष्टवानिति ।।

(१११-सिद्धान्तिसमाधानान्तरवार्तिकम्-८)

//*// *इहार्थं चापि* //*//

(भाष्यम्)

इहार्थं चापि मृज्यर्थं वृद्धिग्रहणं कर्तव्यम् । मृजेर्वृद्धिरविशेषेणोच्यते । सेको यथा स्यात्, अनिको मा भूदिति ।।

विमला – इह्वार्थञ्चापीति । एवञ्चेकपरिभाषायां वृद्धिग्रहणमिग्लक्षणत्वसम्पादनद्वारा मृष्टवानित्यादौ क्ङिति वृद्धिप्रतिषेधार्थम् । स्थान्युपस्थानद्वारा मृजिजकारस्यालोऽन्त्य-परिभाषया प्राप्तवृद्धिवारणार्थञ्चेति भावः ।

(११२-अन्यथोपत्तिवार्तिकम्-९)

॥*॥ मृज्यर्थमितिचेद्योगविभागात्सिद्धम् ॥*॥

(व्याख्याभाष्यम्)

मृज्यर्थमिति चेद्योगविभागः करिष्यते – "मृजेर्वृद्धिरचः" । (मृजेर्वृद्धिरचो भवति ।) । ततः – "ञ्णिति" । ञिति णिति च वृद्धिर्भवति । 'अचः' इत्येव ॥

विमला – द्वितीयं फलं खण्डयति – मृज्यर्थमितिचेदिति ।

(११२-अन्यथोपपत्तिबाधकभाष्यम्)

यद्यचो वृद्धिरुच्यते, 'न्यमार्ट्' । अटोऽपि वृद्धिः प्राप्नोति ॥

(अन्यथोपपत्तिसाधकशेषवार्तिकम्)

॥*॥ अटि चोक्तम् ॥*॥

(भाष्यम्)

किमुक्तम् ?

'अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवति' इति ॥

(११३-सिद्धान्तवार्तिकम्-११)

॥*॥ वृद्धिप्रतिषेधानुपपत्तिस्त्विक्प्रकरणात् तस्मादिग्लक्षणा वृद्धिः ॥*॥

(व्याख्याभाष्यम्)

वृद्धेस्तु प्रतिषेधो नोपपद्यते ।

किं कारणम् ?

इक्प्रकरणात् । इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः । न चैवं सति मृजेरिग्लक्षणा वृद्धिर्भवति । तस्मान्मृजेरिग्लक्षणा वृद्धिरेषितव्या ॥

विमला – वृद्धिरेषितव्येति । अस्य निषेधस्य सिद्धये इति शेषः । एवञ्च मृष्टवानित्यादौ निषेधस्य सिद्धये इक्परिभाषायां वृद्धिग्रहणस्याऽऽवश्यकत्वे तयैवानिको वृद्ध्यभावे सिद्धे "मृजेर्वृद्धिरचः" ततः 'ञ्णिति' इति योगविभागो न कर्तव्य इति भावः ।

(इक्परिभाषानुपस्थितिसूचकभाष्यम्)

एवं तर्हि – इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्ते – परिमृजन्ति, परिमार्जन्ति, परिमृजन्तु, परिमार्जन्तु, परिममृजतुः, परिममार्जतुरित्याद्यर्थम् ॥ तदिहापि साध्यम् । तस्मिन् साध्ये योगविभागः करिष्यते – ('मृजेर्वृद्धिरचः') । मृजेर्वृद्धिरचो" भवति ॥

ततः – "अचि क्ङिति" । अजादौ च क्ङिति मृजेर्वृद्धिर्भवति । परिमार्जन्ति, परिमार्जन्तु, परिममार्जतुः । किमर्थमिदम् ?

नियमार्थम् । अजादावेव क्ङिति, नान्यत्र ॥

क्वान्यत्र मा भूत् ?

मृष्टः मृष्टवानिति ॥

ततो "वा" । वाऽचि क्ङिति मृजेर्वृद्धिर्भवति ।

परिमृजन्ति परिमार्जन्ति परिममृजतुः परिममार्जतु-रिति ।।

विमला – फलद्वयं खण्डयति – **एवं तर्हीति** । **इहेति** मृजिविषये इत्यर्थः । **मृजेरजादौ संक्रमे विभाषेति** । **संक्रमो** क्ङितः प्राचां संज्ञा तथा चाजादौ क्ङिति मृजेर्वृद्धिः विकल्पेन स्यादित्यर्थः । **तदिति** । "**अजादौ क्ङिति वेति**" वचनमिहाप्यस्मिन् व्याकरणेऽपि साध्यं कर्त्तव्यम् । मृजेर्वृद्धिरित्यनेन जकारस्य वृद्धिवारणार्थम् ।

'**मृजेर्वृद्धिरचः**' । '**ततोऽञ्णिति**' इति, योगविभागस्तु कृत एव तन्मध्ये '**अचिक्ङिति वे**' ति पाठ्यमिति भावः । '**मृजेर्वृद्धिरचोऽचि क्ङिति वा**' इति समुदितपाठे मार्ष्टीत्यादौ निमित्ताभावाद् वृद्धिर्न स्यादत आह – **तस्मिन्साध्ये योगविभागः करिष्यत इति** । **दाधिमथास्तु**, अत्रापूर्ववचनस्य करणीयत्वमभिप्रेतश्चेत् साध्यमित्यनुक्त्वा वाच्यमित्येव वदेत् । वाच्यमित्यनुक्त्वा साध्यमिति कथनेन पाणिनीयाक्षरैरेव साध्यं न त्वपूर्ववचनेनेति सूचितम् । पाणिनीयाक्षरैः सिद्धिस्तु "**मृजेर्वृद्धिरचः**" इत्यत्र '**आतोङितः**' इत्यतो विभक्तिविपरिणतस्य ङित इत्यस्य '**अचिरऋतः**' इत्यतोऽचीत्यस्य "**जराया**" इत्यतोऽन्यतरस्यामित्यस्यानुवृत्त्या **क्ङिति चे**त्यस्यापकर्षेण "**मृजेर्वृद्धिरचोऽचिक्ङित्यन्यतरस्या**" मिति सूत्रे निष्पन्ने मार्ष्टीत्यादि सिद्ध्यर्थं योगविभागं कृत्वा **भवतीति** वदन्ति ।

(इक्परिभाषोपस्थितिसूचकभाष्यम्)

इहार्थमेव तर्हि सिजर्थं वृद्धिग्रहणं कर्तव्यम् । 'सिचि वृद्धिरविशेषेणोच्यते सेको यथा स्याद्, अनिको मा भू'दिति ।।

विमला – **इहार्थमिति** । स्थानिविशेषलाभार्थमित्यर्थः । एवोऽप्यर्थे प्रथमफलस्यातिगुरुभूतन्यासेन खण्डितत्वात्तदपि फलमक्षतमेवेति तत्संग्राहकोऽपि । अथवा एवकारः कर्त्तव्यमित्यस्यानन्तरं द्रष्टव्यः । उत्तरार्थं वृद्धिग्रहणस्याऽनावश्यकत्वे**पीहार्थं** कर्त्तव्यमेवेति भावः ।

(इक्परिभाषानुपस्थितिभाष्यम्)

कस्य पुनरनिकः प्राप्नोति ?

(इक्परिभाषोपस्थितिभाष्यम्)

अकारस्य । अचिकीर्षीत् अजिहीर्षीत् ।।

(खण्डनभाष्यम्)

नैतदस्ति । लोपोऽत्र बाधको भविष्यति ।।

(अन्यत्राऽतिव्याप्तिप्रदर्शनभाष्यम्)

आकारस्य तर्हि प्राप्नोति – अयासीत् अवासीत् ।।

(तत्खण्डनभाष्यम्)

नास्त्यत्र विशेषः – सत्यां वृद्धावसत्यां वा ।

(अतिप्रसङ्गान्तरभाष्यम्)

संध्यक्षरस्य तर्हि प्राप्नोति ।।

(तत्खण्डनभाष्यम्)

नैव संध्यक्षरमन्त्यमस्ति ।।

(लक्ष्यप्रदर्शनभाष्यम्)

ननु चेदमस्ति – ढलोपे कृते – उदवोढाम् उदवोढम् उदवोढेति ।।

(तत्खण्डनभाष्यम्)

नैतदस्ति । असिद्धो[1] ढलोपः । तस्यासिद्धत्वान्नैतदन्त्यं भवति ।।

(लक्ष्यान्तरप्रदर्शनभाष्यम्)

व्यञ्जनस्य तर्हि प्राप्नोति – अभैत्सीत्, अच्छैत्सीत् ।।

(तत्खण्डनभाष्यम्)

---

१. त्रिपादिस्थत्वादसिद्धः ।

हलन्तलक्षणा वृद्धिर्बाधिका भविष्यति ॥

(आक्षेपभाष्यम्)

यत्र तर्हि सा प्रतिषिध्यते – "नेटि" इति, अकोषीत्, अमोषीत् ॥

(तत्खण्डनभाष्यम्)

सिचि वृद्धेरप्येष प्रतिषेधः ॥

कथम् ?

लक्षणं हि नाम ध्वनति, भ्रमति, मुहूर्त्तमपि नावतिष्ठते ।

(समाधानभाष्यम्)

अथवा "सिचि वृद्धिः परस्मैपदेषु" इति सिचि वृद्धिः प्राप्नोति । तस्या हलन्तलक्षणा वृद्धिर्बाधिका । तस्या अपि "नेटि" इति प्रतिषेधः ॥

(पूर्वपक्षिणं प्रत्यनुयोगभाष्यम्)

अस्ति पुनः क्वचिदन्यत्रापि, अपवादे प्रतिषिद्धे उत्सर्गोऽपि न भवति ?

(समाधानभाष्यम्)

'अस्ती'त्याह,

सुजाते अश्वसूनृते,

अध्वर्यो अद्रिभिः सुतम् ।

शुक्रं ते अन्यदिति ।

पूर्वरूपे प्रतिषिद्धेऽयादयोऽपि न भवन्ति ।

(प्रयोजनान्तरभाष्यम्)

उत्तरार्थमेव तर्हि सिजर्थं वृद्धिग्रहणं कर्तव्यम् । सिचि

वृद्धिरविशेषेणोच्यते सा क्ङिति मा भूत् – न्यनुवीत्, न्यधुवीदिति ।।

(प्रयोजनान्तरनिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम् । अन्तरङ्गत्वादत्रोवङादेशे कृतेऽनन्त्यत्वाद्वृद्धिर्न भविष्यति ।।

(सिद्धान्तिभाष्यम्)

यदि तर्हि सिच्यन्तरङ्गं भवति – 'अकार्षीत्, अहार्षीत् । गुणे कृते रपरत्वे चाऽनन्त्यत्वाद्वृद्धिर्न प्राप्नोति ।।

(पूर्वपक्षिभाष्यम्)

मा भूदेवम् । "हलन्तस्य–" इत्येवं भविष्यति ।

(खण्डनभाष्यम्)

इह तर्हि – न्यस्तारीत् न्यदारीत् । गुणे कृते रपरत्वे चाऽनन्त्यत्वाद्वृद्धिर्न प्राप्नोति । हलन्तलक्षणायाश्च 'नेटि' इति प्रतिषेधः ।।

(दूषणनिराकरणभाष्यम्)

मा भूदेवम् । 'ल्रान्तस्य' इत्येवं भविष्यति ।।

(दूषणान्तरदानभाष्यम्)

इह तर्हि – अलावीत् अयावीत् । गुणे कृतेऽवादेशे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति । हलन्तलक्षणायाश्च 'नेटि' इति प्रतिषेधः ।

(दूषणनिराकरणभाष्यम्)

मा भूदेवम् । 'ल्रान्तस्य' इत्येवं भविष्यति ।।

(निराकरणबाधकभाष्यम्)

लृान्तस्य इत्युच्यते, न चेदं लृान्तम् ।।

(निराकरणभाष्यम्)

"लृान्तस्य" इत्यत्र वकारोऽपि निर्दिश्यते ।।

किं वकारो न श्रूयते ?

लुप्तनिर्दिष्टो वकारः ।।

(निराकरणबाधकभाष्यम्)

यद्येवम् - मा भवानवीत्, मा भवान् मवीत् । अत्रापि प्राप्नोति ।।

(निराकरणसाधकभाष्यम्)

'अविमव्योर्ने'ति वक्ष्यामि ।।

(आक्षेपभाष्यम्)

तद्वक्तव्यम् ।

विमला – तदिति 'अविमव्योर्नेति' वचनम् । **वक्तव्यमिति** । अस्याधिकमित्यादि-स्तथा च गौरवमिति भावः ।

(समाधानबाधकभाष्यम्)

न वक्तव्यम् । 'णिश्विभ्यां तौ निमातव्यौ' ।

यद्यप्येतदुच्यते – अथवैतर्हि णिश्व्योः प्रतिषेधो न वक्तव्यो भवति । गुणे कृतेऽयादेशे च 'यान्तानां ने'त्येव प्रतिषेधो भविष्यति ।।

विमला – न वक्तव्यमिति । अस्याधिकमित्यादिः । **णिश्विभ्यामिति** । अस्य किन्त्वित्यादिः । **निमातव्याविति** । **ह्ययन्तेति** सूत्रे णिश्विग्रहणेनाविमवी परिवर्तनीयावित्यर्थः । तथा च न गौरवमिति भावः ।

(ज्ञापकतापरभाष्यम्)

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति – 'न सिच्यन्तरङ्गं भवति' – इति । यदयम् "अतो हलादेर्लघोः" इत्यकारग्रहणं करोति ।।

कथं कृत्वा ज्ञापकम् ?

अकारग्रहणस्यैतत्प्रयोजनम् । इह मा भूत् – अकोषीत्, अमोषीत् । यदि सिच्यन्तरङ्गं स्याद्, अकारग्रहणमनर्थकं स्यात् । गुणे कृतेऽलघुत्वाद्वृद्धिर्न भविष्यति । पश्यति त्वाचार्यो 'न सिच्यन्तरङ्गं भवति' इति । ततोऽकारग्रहणं करोति ।।

विमला – गुणे कृते इति । अस्यान्तरङ्गत्वादित्यादिः । सिच्यन्तरङ्गप्रवृत्तेः स्वीकारादिति भावः । सिच्यन्तरङ्गाप्रवृत्तौ तु गुणात्पूर्वमेव वृद्धिप्राप्तौ तदानीं यान्तत्वाभावेन निषेधाप्राप्त्या वृद्धिवारणार्थं णिश्विग्रहणं कर्त्तव्यमेवेति बोध्यम् ।

(ज्ञापकनिराकरणभाष्यम्)

नैतदस्ति ज्ञापकम् । अस्त्यन्यदेतस्य वचने प्रयोजनम् ।।

किम् ?

यत्र गुणः प्रतिषिद्ध्यते तदर्थमेतत्स्यात् – न्यकुटीत्, न्यपुटीत् ।।

विमला – एकदेशी ज्ञापकं खण्डयति – **नैतदस्ति ज्ञापकमिति** । अस्यैकदेश्युक्त्वं तु '**यच्च करोत्यकारग्रहणं लघोरिति कृतेऽपीति** ग्रन्थेनानुपदमेव स्फुटी भविष्यति ।

(ज्ञापकान्तरभाष्यम्)

यत्तर्हि णिश्व्योः प्रतिषेधं शास्ति । तेन 'नेहान्तरङ्गमस्ति' इति दर्शयति ।।

विमला – सिद्धान्त्येकदेशी ज्ञापकान्तरं दर्शयति – **तर्हीति** । **नेहान्तरङ्गमस्तीति** । सिच्यन्तरङ्गं नास्तीत्यर्थः । अस्यैकदेश्युक्तत्वं त्वत्रैवोद्द्योते निरूपितम् ।

(पूर्वोक्तज्ञापकसमर्थनभाष्यम्)

यच्च करोत्यकारग्रहणं 'लघो'रिति कृतेऽपि ।।

विमला – सिंहावलोकनन्यायेन निरस्तं ज्ञापकमेकदेशी समर्थयते । **यच्चेति** । **लघोरिति कृतेऽपीति** । न्यकुटीदित्यत्र वृद्धिबाधकस्य गुणस्य निषेधे '**भ्रष्टावसर-न्यायेन**'' वृद्धेरप्राप्तेः । सिद्धान्ते न्यायाभावेऽपि 'अकोषीदि'त्यादौ व्यञ्जनस्य वृद्धिवारणाय बाध्यविशेषचिन्तापक्षे सिचिवृद्ध्यपवादहलन्तलक्षणायाः वृद्धेः '**नेटी**'-ति निषेधे सिचिवृद्ध्य प्राप्तेः स्वीकारेणेदानीं न्यायस्वीकारस्याऽऽवश्यकतयाऽद्ग्रहणस्य ज्ञापकत्वसम्भवादिति भावः । अस्यैकदेशयुक्तत्वं तु **एतेने**त्यादिनाऽत्रैव कैयटे **निरूपितम्** । सिद्धान्ते तु '**येन नाप्राप्तिन्यायेन**' बाद्ध्यसामान्यचिन्तापक्षमाश्रित्य सकलान्तरङ्गस्य बृद्ध्या बाध इति बोध्यम् ।

(सिद्धान्तिन उपसंहारवार्तिकम्)

।।।। तस्मादिग्लक्षणा वृद्धिः ।।*।।*

(भाष्यम्)

तस्मादिग्लक्षणा वृद्धिरास्थेया ।।

विमला – तस्मादिति । अकोषीदित्यादौ व्यञ्जनस्य गुणव्यावृत्तये ÷ **इहार्थम्**-न्यनुवीदित्यादौ ''**येन नाप्राप्ति न्यायेन**'' उवङ बाधित्वा प्राप्ताया वृद्धेर्वारणायो-त्तरार्थञ्च । इत्यभिप्रायस्थहेतोरित्यर्थः । **इग्लक्षणेति** । इक् लक्षणं स्थानी यस्याः सा इग्लक्षणा वृद्धिः, **आस्थेया** स्वीकार्येत्यर्थः । उत्तरार्थमात्रतयोपसंहारे तु तस्य पूर्वग्रंथेनैव प्रतिपादनादुपसंहारस्यानर्थक्यं स्यादत इहार्थतयाऽप्युपसंहृतमिति बोध्यम् ।

इति पदोपस्थितिस्थापनाधिकरणम् ।।

(अथ स्वतन्त्रविधित्वनिराकरणाधिकरणम्)

(११४-आक्षेपवार्तिकम्-२२)

।।।। षष्ठ्याः स्थानेयोगत्वादिङ्निवृत्तिः ।।*।।*

(भाष्यम्)

षष्ठ्याः स्थानेयोगत्वात्सर्वेषामिकां निवृत्तिः प्राप्नोति । अस्यापि प्राप्नोति – दधि मधु ।।

(अस्य स्वतन्त्रत्वे दूषणभाष्यम्)

पुनर्वचनमिदानीं किमर्थं स्यात् ?

(११४-स्वतन्त्रत्वे दूषणसमाधानवार्तिकम्-१३)

।।।। अन्यतरार्थं पुनर्वचनम् ।।*।।*

(भाष्यम्)

अन्यतरार्थमेतत्स्यात् – 'सार्वधातुकार्धधातुकयोर्गुण एवे'ति ।।

(११९-आक्षेपवार्तिकप्रथमखण्डम्-१४)

।।।। प्रसारणे च ।।*।।*

(भाष्यम्)

प्रसारणे च सर्वेषां यणां निवृत्तिः प्राप्नोति । अस्यापि प्राप्नोति – याता वाता ।।

(स्वातन्त्र्ये दूषणभाष्यम्)

पुनर्वचनमिदानीं किमर्थं स्यात् ?

(११५-स्वातन्त्र्ये दूषणनिराकरणवार्तिकम्-१५)

।।।। विषयार्थं पुनर्वचनम् ।।*।।*

(भाष्यम्)

विषयार्थमेतत्स्यात् – 'वचिस्वपियजादीनां कित्येवे'ति ।।

(११६-आक्षेपान्तरवार्तिकम्-१६)

।।।। उरण्रपरे च ।।*।।*

(भाष्यम्)

उरण्रपरे च सर्वेषामृकाराणां निवृत्तिः प्राप्नोति । अस्यापि प्राप्नोति -- कर्तृ हर्तृ ।।

विमला – उरण् रपरं चेति । यद्यपि "**उरण् रपर**" इति सूत्रस्य षष्ठ्यधिकारे कृतत्वान्नास्त्यत्र शङ्काया अवसरस्तथापि पूर्वोक्तयोगद्वयस्यापि षष्ठ्यधिकारे करणेन दोषपरीहार-इति सूचयितु तत्रापि शङ्कितमिति बोध्यम् । **निवृत्तिः प्राप्नोतीति** । उरण् भवति स रपर इति व्याख्यानेनेति भावः ।

(सिद्धान्तिनः समाधानवार्त्तिकम्)

।।।। सिद्धन्तु षष्ठ्यधिकारे वचनात् ।।*।।*

(भाष्यम्)

सिद्धमेतत् ।। कथम् ?

('षष्ठ्यधिकारे वचनात्' ।) षष्ठ्यधिकारे इमे योगाः कर्तव्याः । एकस्तावत् क्रियते तत्रैव । इमावपि योगौ षष्ठ्यधिकारमनुवर्तिष्येते ।।

विमला – षष्ठ्यधिकारमनुवर्तिष्यत इति । तथा च, यथा यत्र षष्ठीनिर्दिष्टस्य उरण् विधीयते, तत्र रपर इत्युपतिष्ठते । एवं यत्र स्थानषष्ठीनिर्दिष्टस्य गुणवृद्धी विधीयेते तत्रेकः इति षष्ठ्यन्तम्पदमुपतिष्ठते । यत्र स्थानषष्ठी निर्दिष्टस्य सम्प्रसारणं विधीयते तत्रेग्यण इत्युपतिष्ठते इति रीत्या बोधः । एवञ्चैषां न विधित्वं, किन्तु पदोपस्थापकत्वमितिभावः ।

(समाधानान्तरभाष्यम्)

अथवा – षष्ठ्यधिकारे इमौ योगावपेक्षिष्यामहे ।।

विमला – अधिकारो द्विविधो -- लौकिकः शास्त्रीयश्च । तत्र शास्त्रीयाधिकारमाश्रित्य '**सिद्धन्तु षष्ठ्यधिकारे वचनादि**' ति वार्तिककृता विधित्व निराकृतम् । परन्तु तत्र पक्षे बहुषु स्वरितत्वकल्पनायां गौरवम् । अधिकृतस्य चास्य मध्येऽसम्बन्धाय लक्ष्यानुरोधाश्रयणे लक्षणैकचक्षुष्काणां दुर्ज्ञेयत्वमिति दोषद्वयमनुसन्धायाकाङ्क्षालक्षण लौकिकाधिकारपक्षमाश्रित्यास्य विधित्वं निराकरोति भगवान् पतञ्जलि । **अथवेति** ।

ननु ''**षष्ठी स्थानेयोगा**'' इत्यस्याकांक्षाभावेनाकाङ्क्षा निबन्धनलौकिकाधिकारपक्षोऽत्र न सम्भवतीति चेदुच्यते । ''**षष्ठी स्थानेयोगा**'' इत्यत्र योगविभागः करिष्यते, ''**षष्ठी**'' त्यको योगस्ततः ''**स्थानेयोगा**'' इति द्वितीयः । अत्र पूर्वो योगः साकाङ्क्ष इति लौकिकाधिकारपक्षः सम्भवतीति ।

(समाधानान्तरभाष्यम्)

अथवेदं तावदयं प्रष्टव्यः — 'सार्वधातुकार्धधातुकयोर्गुणो भवति' इतीह कस्मान्न भवति–याता वाता ? इदं तत्रापेक्षिष्यते, 'इको गुणवृद्धी' इति । यथैव तर्हीदं तत्रापेक्षिष्यते । एवमिहापि तदपेक्षिष्यामहे 'सार्वधातुकार्धधातुकयोः' इति ।। (इको गुणवृद्धी ।)

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे तृतीयमाह्निकम् ।।३।।

विमला – स्वातन्त्र्यसम्भावनैव नास्तीत्याह–अथवेति ।

इति पण्डितमहेशझाशर्म्म-विरचितायाम् महाभाष्यव्याख्यायां विमलाख्यायाम् प्रथमाऽध्यायस्य प्रथमपादे तृतीयाह्निकम् ।

अथ चतुर्थमाह्निकम्

(परिभाषासूत्रम्)

न धातुलोप आर्धधातुके ।।१।१।४।।

विमला – न धातुलोप आर्धधातुक इति । नन्वयं निषेध: प्राधान्यात्प्रसज्यप्रतिषेधीयस्य नञ: क्रियायामेवान्वयाच्चेक्परिभाषोपस्थितेरेव, तथाच धात्वंशलोपनिमित्ते आर्धधातुके इक्पदं नोपतिष्ठत इत्यर्थ: । एवञ्च बेभिदितेत्यादौ व्यञ्जनस्य गुणो दुर्वार एवेति चेन्न **'अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ती' ति** प्रातिपदिकार्थसूत्रस्थ भाष्यरीत्याऽत्रापि भवत इत्यस्योपस्थितिसत्त्वेन तत्र नञर्थान्वयस्वीकारेणादोषात् । गुणवृद्धयोर्भवनस्य निषेधे गुणवृद्ध्योरेव निषेध: फलतीति गुणवृद्ध्योरयं निषेध इत्युच्यते । इक्पदोपस्थिति निषेधे तु ''**दीधीवेवीटामि**'' ति सूत्रं व्यर्थमेव स्यात्तत्रेक्पदोपस्थितिनिषेधेऽपि ''**अलोऽन्त्य**''परिभाषयेको गुणस्यानिवृत्ते: । यत्तु कैयटेनोक्तम्- गुणवृद्ध्यो: प्राधान्यादयं निषेध इति । यच्च नागेशेन व्याख्यातम्प्राधान्यञ्च पदसंस्कार्य्यत्वरूपमिति तदसमञ्जसं शाब्दप्राधान्यस्यैवान्वयनियामकत्वस्योचिततत्वात् । अतएव राजपुरुषमानये-त्यादावर्थत: प्रधानस्यापि राज्ञ आनयनेनान्वयो भवतीति विभावनीयम् ।

अत्र धातुलोपशब्देन धात्ववयवलोप एवाभिमत: । तल्लाभश्च स्वाव॰ ये धातुत्वस्यारोपेण धातौ स्वावयववृत्तिलोपस्यारोपेण वा सम्भवति । यद्यपि दु:खेन ईयते प्राप्यते दूरमित्यत्र दु:शब्दे उपपदे ''**दूरीणोलोपश्च**'' इत्यनेन, इणोलोपोरक् प्रत्ययश्च भवतीति कृत्स्नस्य धातोरपि लोप: सम्भवति । तथापि तत्र गुणवृद्ध्यो: प्राप्तिविरहेण निषेधस्यानावश्यकतया तथाविवक्षणे सूत्रस्यैव वैयर्थ्यं स्यादित्यवगन्तव्यम् ।

(अथ पदकृत्यनिर्वचनाधिकरणम्)

(आक्षेपभाष्यम्)

धातुग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

इह मा भूत् – 'लूञ्' लविता लवितुम् । 'पूञ्' पविता पवितुम् ।।

(आक्षेपभाष्यम्)

आर्धधातुक इति किमर्थम् ?

विमला – नन्वाऽऽर्धधातुके इति पदाभावेऽपि धातुलोपपदे धातोर्लोपो यस्मिन्निति बहुव्रीहिमाश्रित्य धातुलोपनिमित्ते गुणवृद्धी न स्त इत्यर्थे रोरवीतीत्यत्र गुणस्यानिमित्तकत्वेन निषेधाप्राप्त्याऽऽर्धधातुक इति व्यर्थमित्याशयेनाशङ्कते **आर्धधातुक इति किमर्थमिति** ।

(समाधानभाष्यम्)

'त्रिधा बद्धो वृषभो रोरवीति'[१] ।।

विमला – **रोरवीतीति** । अयम्भावः, आर्धधातुके इति पदाभावे धातुलोपशब्दे लाघवात्तत्पुरुष एव स्यात् । एवञ्च धातोर्लोपे सति गुणवृद्धी न स्त इत्यर्थे रोरवीतीत्यत्र धात्वंशस्य यङो लोपसत्त्वाद् गुणनिषेधापत्तिरिति ।

(अथार्धधातुकपदार्थान्वयविचाराधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरिदमार्धधातुकग्रहणं लोपविशेषणम् — 'आर्धधातुकनिमित्ते लोपे सति ये गुणवृद्धी प्राप्नुतस्ते न भवतः' इति ।

आहोस्वित् – गुणवृद्धिविशेषणमार्धधातुकग्रहणम्- 'धातुलोपे सत्यार्धधातुकनिमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत' इति ?

विमला – **ये गुणवृद्धीति** । अस्य यत्किञ्चिन्निमित्तके इत्यादिः । **धातुलोपे इति** । अस्य यत्किञ्चिन्निमित्तके इत्यादिः ।

(विशेषप्रश्नभाष्यम्)

किं चातः ?

विमला – अन्यतरपक्षे विशेषम्पृच्छति – **किञ्चात इति** ।

---

१. ऋ. सं. – ४/५८/३ ।

(विशेषप्रदर्शनसमाधानभाष्यम्)

यदि लोपविशेषणम् – 'उपेद्धः, प्रेद्धः' अत्रापि प्राप्नोति ।

अथ गुणवृद्धिविशेषणम् – 'क्नोपयति' इत्यत्रापि प्राप्नोति ।।

विमला – अन्यतरपक्षे विशेषं दर्शयति – **यदीति** । अस्मिन्पक्षे धातुग्रहणं न कर्त्तव्यमित्यग्रे वक्ष्यते । **प्राप्नोतीति** । अस्य "**आद्गुण**" इति गुणस्य निषेध इत्यादि: । प्रपूर्वादिन्धे: क्तप्रत्यये तन्निमित्तके "**अनिदिता**" मिति नलोपे प्राप्नुवन् गुणोऽपि निषिद्ध्येत । तस्याकारस्थानिकत्वेऽपि "**प्रासादवासिन्यायेन**" इक्स्थानिकत्वाक्षतेरितिभाव: । यदि चेक्पदमुच्चार्य विधीयमानगुणस्यैवानेननिषेध इति प्रेद्ध इत्यत्र न दोष इत्याग्रहस्तर्हि भेद्यत इत्यत्र भिदेर्ण्यन्तात्कर्मणि यकि भिद् इ-य इति स्थिते "**उपसंजनिष्यमाणनिमित्तोऽप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधते**" इति न्यायेन पूर्वं णिलोपे तत: प्रत्ययलक्षणेन क्रियमाणस्य "**पुगन्तेति**" गुणस्य निषेध आपादनीय: । **क्नोपयतीति** । कनुयीशब्दे अस्माण्णिचि पुकि "**लोपोव्योर्वली**"-ति यलोपे णिज्रूपार्धधातुकनिमित्तकस्य "**पुगन्ते**" ति गुणस्य निषेध: प्राप्नोतीति भाव: ।

(उभयत्रेष्टापत्तिभाष्यम्)

यथेच्छसि तथास्तु ।।

विमला – तथास्त्विति । उभयथा दोष: सुपरिहर इति भाव: ।

(प्रथमपक्षाङ्गीकारभाष्यम्)

अस्तु लोपविशेषणम् ।।

(आक्षेपभाष्यम्)

कथम् — 'उपेद्धः प्रेद्धः' इति ?

(समाधानभाष्यम्)

बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः । 'असिद्धं बहिरङ्गमन्तरङ्गे' ।।

विमला – **असिद्धं बहिरङ्गमन्तरङ्ग इति** । **नाजानन्तर्य इति** परिभाषा तु नेह प्रवर्तते पश्चात्प्रवर्तमाने निषेधेऽच आनन्तर्य्याभावात् । यत्रान्तरङ्गे बहिरङ्गे वाऽचोरानर्यन्तत्र वहिष्ट्वप्रक्लृप्तिर्न भवतीति, हरदत्तव्याख्यानन्तु-इत एव भाष्यविरोधात्, पचावेदमित्यादौ बहिरङ्गत्वेन गुणस्यासिद्धत्वादेत ऐत्वं नेति स्वग्रन्थविरोधाच्चोपेक्ष्यम् ।

(लाघवप्रदर्शनभाष्यम्)

यद्येवं, नार्थो धातुग्रहणेन ।।

विमला – लोपविशेषणे लाघवं दर्शयति – यद्येवमिति ।

(आक्षेपभाष्यम्)

इह कस्मान्न भवति – 'लूञ्' लविता लवितुम् ?

(समाधानभाष्यम्)

अर्धधातुकनिमित्ते लोपे प्रतिषेधः । न चैष आर्धधातुकनिमित्ती लोपः ।।

(द्वितीयपक्षस्वीकारभाष्यम्)

अथवा – पुनरस्तु गुणवृद्धिविशेषणम् ।।

विमला – **यथेच्छसि तथाऽस्त्विति ग्रन्थेन** प्रतिज्ञातयोः पक्षद्वयसमर्थनयोराद्यं पक्षं समर्थ्य द्वितीयं पक्षं समर्थयति – **अथवेति** ।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् – 'क्नोपयतीत्यत्रापि प्राप्नोति' इति ।।

(समाधानभाष्यम्)

नैष दोषः, निपातनात्सिद्धम् ।।

किं निपातनम् ? "चेले क्नोपेः" इति ।।

विमला – **निपातनात्सिद्धमिति** । वर्णमात्राश्रयेऽन्तरङ्गे यलोपे कर्त्तव्ये बहिरङ्गस्य पुकोऽसिद्धत्वाद् यलोपार्थं निपातनमावश्यकमिति तेनैव गुणोऽपि भविष्यतीति भावः ।

यद्यप्यत्र पक्षे धातुग्रहणमावश्यकमिति गौरवन्तथापि "भेद्यते" इत्यादौ निषेधाप्रवृत्तये-उभयपक्षेऽपि परिगणनस्यावश्यकतया तत एवानुबन्धलोपेऽपि दोषवारणसम्भवान्नात्रापि पक्षे धातुग्रहणं कर्तव्यमिति बोध्यम् ।

इत्याऽऽर्धधातुकपदार्थान्वयविचाराधिकरणम् ।।

(अथ परिगणनाधिकरणम्)

(भाष्यम्)

परिगणनं कर्तव्यम् —

विमला – परिगणनं कर्तव्यमिति । अस्योभयपक्षेऽपीत्यादिः । यस्य लोपे निषेध इष्टस्तस्य परिगणनं कर्तव्यमित्यर्थः । एवञ्च धातुग्रहणाभावेऽपि न दोष इति भावः ।

(११८-परिगणनपूर्वपक्षिवार्तिकम्-२)

।।*।। यङ्यक्क्यवलोपे प्रतिषेधः ।।*।।

(भाष्यम्)

यङ्यक्क्यवलोपे प्रतिषेधो वक्तव्यः ।

यङ् – बेभिदिता मरीमृजः ।।

यक् – कुषुभिता मगधकः ।।

क्य – समिधिता दृषदकः ।।

वलोपे – जीरदानुः ।।

विमला – यङ्यक्क्यवलोपे प्रतिषेध इति । **"न यङ्यक्क्यवलोप आर्धधातुके"** इति सूत्रं कर्त्तव्यमिति भावः । **जीरदानुरिति** । जीवधातोरदानुः प्रत्ययः । **"लोपोव्योर्वली"** ति वलोपः ।

(भाष्यम्)

किं प्रयोजनम् ?

(११८-परिगणनसाधकं वार्तिकद्वितीयखण्डम्-१)

//// नुम्लोपस्त्रिव्यनुबन्धलोपेऽप्रतिषेधार्थम् //*//*

(भाष्यम्)

नुम्लोपे स्त्रिव्यनुबन्धलोपे च प्रतिषेधो मा भूदिति ।।

नुम्लोपे – अभाजि, रागः, उपबर्हणम् ।।

स्त्रिवेः — आस्त्रेमाणम् ।।

अनुबन्धलोपे — लूञ् लविता लवितुम् ।।

(आक्षेपभाष्यम्)

यदि परिगणनं क्रियते, 'स्यदः', 'प्रश्रथः', 'हिमश्रथः' इत्यत्रापि प्राप्नोति ।।

विमला – **प्राप्नोतीति** । एतेषां परिगणनानन्तर्गतत्वेन निषेधाप्रवृत्त्या वृद्धिः प्राप्नोतीति भावः ।

(समाधानभाष्यम्)

वक्ष्यत्येतत् – 'निपातनात्स्यदादिषु' इति ।।

(आक्षेपभाष्यम्)

तत्तर्हि परिगणनं कर्तव्यम् ? ।।

विमला – तत्त्वजिज्ञासया पृच्छति – **तत्तर्हीति** ।

(परिगणनप्रत्याख्यानभाष्यम्)

न कर्तव्यम् ।।

(आक्षेपभाष्यम्)

नुम्लोपे कस्मान्न भवति ?

विमला – **नुम्लोपे कस्मान्न भवतीति** । अस्य निषेध इत्यादिः ।

(११९-सिद्धान्तसमाधानवार्तिकम्-३)

॥*॥ *इक्प्रकरणान्नुम्लोपे वृद्धिः* ॥*॥

(भाष्यम्)

इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः । न चैषेग्लक्षणा वृद्धिः ॥

विमला – **इक्प्रकरणान्नुम्लोपे वृद्धिरिति** । यत इत्याध्याहारस्तथा च यतः स्थानिनियामिकेक्परिभाषाम्प्रस्तुत्य निषेधारम्भोऽत इक्परिभाषाविषयत्वं निषेधप्रकरणस्येति नुम्लोपे' अभाजि राग इत्यादौ । **वृद्धिरिति** । अस्य निषेधाविषयत्वादित्यादिः ।

(आक्षेपभाष्यम्)

यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः – 'स्यदः, प्रश्रथः हिमश्रथः' इत्यत्र न प्राप्नोति ॥

इह च प्राप्नोति – 'अवोदः, एधः, ओद्मः' इति ॥

(१२०-सिद्धान्तसमाधानवार्तिकम्-४)

॥*॥ *निपातनात्स्यदादिषु* ॥*॥

(भाष्यम्)

निपातनात्स्यदादिषु प्रतिषेधो भविष्यति, न च भविष्यति ॥

विमला – **निपातनादिति** । ''अवोदैधौद्मप्रश्रथहिमश्रथाः'' **स्यदो जवे इति** निपातनादित्यर्थः । **प्रतिषेधो भविष्यतीति** । नलोपार्थं निपातनस्यावश्यकतया तेनैव स्यदादिषु प्रतिषेधो भविष्यतीति' अवोदादिषु च न भविष्यतीति भावः ।

(आक्षेपभाष्यम्)

यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः, स्त्रिव्यनुबन्धलोपे कथम् ?

विमला – **स्त्रिव्यनुबन्धलोपे कथमिति** । तत्र गुणस्येग्लक्षणत्वादिति भावः ।

(१२१-सिद्धान्तसमाधानवार्तिकम्-५)

॥॥ प्रत्ययाश्रयत्वादन्यत्र सिद्धम् ॥*॥*

(भाष्यम्)

आर्धधातुकनिमित्ते लोपे प्रतिषेधः । न चैष आर्धधातुकनिमित्तो लोपः ॥

विमला – प्रत्ययाश्रयत्वादिति । 'आर्धधातुके' इत्यस्य लोपविशेषणत्वादिति भावः । एतेन 'आर्धधातुके' इत्यस्य गुणवृद्धिविशेषणत्वपक्षे धातुग्रहणवत्परिगणनाश्रयणमपि गौरवमिति लाघवाल्लोपविशेषणत्वपक्ष एव युक्त इति सूचितम् ।

(आक्षेपभाष्यम्)

यद्यार्धधातुकनिमित्ते लोपे प्रतिषेधः, 'जीरऽदानुः'[1] अत्र न प्राप्नोति ॥

विमला – अत्र न प्राप्नोतीति । प्रतिषेध इति शेषः ।

(१२३-सिद्धान्तसमाधानवार्तिकम्-६)

॥॥ रकि ज्यः संप्रसारणम् ॥*॥*

(भाष्यम्)

नैतज्जीवे रूपम्, रक्येतज्ज्यः संप्रसारणं भवति ॥

(एकदेशिभाष्यम्)

यावता चेदानीं रकि, जीवेरपि सिद्धं भवति ॥

विमला – इदानीम् परिगणनप्रत्याख्यानकाले । लोपो व्योरितिसूत्रे वकारस्य प्रत्याख्यानादस्यैकदेश्युक्तत्वमिति बोध्यम् ।

(पूर्वपक्षभाष्यम्)

कथमुपबर्हणम् ?

---

१. ऋ. सं. – ५/८३/१ ।

(सिद्धान्तिभाष्यम्)

बृहिः प्रकृत्यन्तरम् ॥

विमला – प्रकृत्यन्तरमिति । एवञ्च बृह् धातुनिष्पन्ने उपबर्हणमिति प्रयोगे लोपाभावेन निषेधस्य प्राप्तिरेव नेति तन्निवारणार्थं परिगणनमसङ्गतमिति भावः ।

(आक्षेपभाष्यम्)

कथं ज्ञायते – 'बृहिः प्रकृत्यन्तर'मिति ?

(सिद्धान्तिभाष्यम्)

'अची'ति हि लोप उच्यते, अनजादावपि दृश्यते – निबृह्यते ।

अनिटीति चोच्यते, इडादावपि दृश्यते – निबर्हिता निबर्हितुमिति ।

अजादावपि न दृश्यते – बृंहयति बृंहकः ॥

विमला – लोप उच्यत इति । ''बृंहेरच्यनिटि'' इति वार्तिकेनेति भावः । अजादावपि न दृश्यत इति । एवञ्चाव्याप्त्यतिव्याप्तिदर्शनात् ''बृंहेरच्यनिटी'' ति वार्तिकं नाश्रयणीयमिति भावः ।

(उपसंहारभाष्यम्)

तस्मान्नार्थः परिगणनेन ॥

(आक्षेपभाष्यम्)

यदि परिगणनं न क्रियते, 'भेद्यते' 'छेद्यते' – अत्राऽपि प्राप्नोति ॥

(समाधानभाष्यम्)

नैष दोषः । 'धातुलोप' इति नैवं विज्ञायते – ''धातोर्लोपो धातुलोपो, धातुलोपे'' इति ॥

कथं तर्हि ?

'धातोर्लोपो यस्मिंस्तदिदं धातुलोपं धातुलोपे' इति ॥

विमला – धातोर्लोपो यस्मिन्निति । तथा च यदार्धधातुकनिमित्तको धातुलोपस्तदार्धधातुकनिमित्तके गुणवृद्धी न स्त इति फलितोर्थः । भेद्यत इत्यादौ च स्थानिवद्भावेन णिज्निमित्तको गुणो यग्निमित्तको णिलोप इत्युभयोरेकनिमित्तकत्वाभावान्न निषेध इत्यवधेयम् ।

(उपसंहारभाष्यम्)

तस्मादिग्लक्षणा वृद्धिः ॥

विमला – बहुव्रीह्यङ्गीकारेऽपीग्लक्षणैव वृद्धिः प्रतिषेध्याऽन्यथा 'अभाजी'-त्याद्यसिद्धिरित्युपसंहरति – **तस्मादिति** ।

इति परिगणनाधिकरणम् ॥

(अथेग्लक्षणत्वे दोषनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

यदि तर्हीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः, 'पापचकः, पापठकः, मगधकः, दृषदकः' अत्र न प्राप्नोति ॥ (नैष दोषः) ॥

विमला – न प्राप्नोतीति । अत उपधाया इति वृद्धेरनिग्लक्षणत्वान्निषेधो न प्राप्नोतीत्यर्थः ।

(१२३-सिद्धान्तिसमाधानवार्तिकम्-७)

॥*॥ अल्लोपस्य स्थानिवत्त्वात् ॥*॥

(भाष्यम्)

अकारलोपे कृते तस्य स्थानिवत्त्वाद् गुणवृद्धी न भविष्यतः ॥

विमला – अकारलोप इति । परत्वात् ''**यस्य हल**'' इति यकारलोपोत्तर-मित्यादिः ।

इतीग्लक्षणत्वे दोषनिराकरणम् ।।

(अथ सूत्रप्रत्याख्यानाधिकरणम्)

(१२४-सिद्धान्तवार्तिकम्-८)

।।*।। अनारम्भो वा ।।*।।

(भाष्यम्)

अनारम्भो वा पुनरस्य योगस्य न्याय्यः ।।

(आक्षेपभाष्यम्)

कथं 'बेभिदिता मरीमृजकः कृषुमिता समिधिता' इति ?

(समाधानभाष्यम्)

अत्राऽप्यकारलोपे कृते तस्य स्थानिवद्भावाद् गुणवृद्धी न भविष्यतः ।।

(आक्षेपभाष्यम्)

यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः ।।

क्व च स्थानिवद्भावो नास्ति ?

यत्र हलचोरादेशः – 'लोलुवः पोपुवः मरीमृजः सरीसृप' इति ।।

विमला – यत्र हलचोरादेश इति । यङोचीत्यनेन सस्वरस्यैव यङो लुग्भवतीति भावः ।

(समाधानभाष्यम्)

अत्राप्यकारलोपे कृते तस्य स्थानिवद्भावाद् गुणवृद्धी न भविष्यतः ।।

(समाधानबाधकभाष्यम्)

लुकि कृते न प्राप्नोति ॥

(समाधानसाधकभाष्यम्)

इदमिह संप्रधार्यम् – 'लुक् क्रियतामल्लोप' इति । किमत्र कर्तव्यम् ? परत्वादल्लोपः ॥

(समाधानबाधकभाष्यम्)

नित्यो लुक् । कृतेऽप्यल्लोपे प्राप्नोति, अकृतेऽपि प्राप्नोति ॥

(समाधानसाधकभाष्यम्)

लुगप्यनित्यः ॥ कथम् ? अन्यस्य कृतेऽल्लोपे प्राप्नोति, अन्यस्याऽकृते ॥ "शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति" ॥

(समाधानबाधकभाष्यम्)

अनवकाशस्तर्हि लुक् ॥

(समाधानसाधकभाष्यम्)

सावकाशो लुक् ॥

कोऽवकाशः ? अवशिष्टः ॥

विमला – अवशिष्ट इति । यकार इत्यर्थः ।

(अभ्युपेत्य समाधानभाष्यम्)

अत्रापि कथंचिदनवकाशो लुक् स्यादेवमपि न दोषः । अल्लोपे योगविभागः करिष्यते – "अतो लोपः" (अतो लोपो भवति[1]) । ततो "यस्य" । यस्य च लोपो भवति । 'अत' इत्येव ॥

---

१. इत्यंश क्वचिदधिकः ।

किमर्थमिदम् ?

लुकं वक्ष्यति तद्बाधनार्थम् ।।

ततो "हलः" । 'हल उत्तरस्य यस्य च लोपो भवती'ति ।।

विमला – अल्लोप इति । अल्लोपनिमित्तमित्यर्थः । **योगविभाग इति** । अस्य **यस्य हल इति** सूत्रे इत्यादिः । **किमर्थमिदमिति** । **अतोलोप** इत्यनेनैवाल्लोपसिद्धेरिति भावः ।

(आक्षेपभाष्यम्)

इहापि तर्हि परत्वाद्योगविभागाद्वा लोपो लुकं बाधेत – "कृष्णो नोनाव वृषभो यदीदम्"[1] । नोनूयतेर्नोनाव ।। एवञ्चाचो ञ्णितीति वृद्धिर्न स्यादल्लोपस्य स्थानिवत्त्वात् ।।

विमला – नोनूयतेरिति । लिटीति शेषः ।

(समाधानभाष्यम्)

समानाश्रयो लुग्लोपेन बाध्यते ।।

कश्च समानाश्रयः ?

यः प्रत्ययाश्रयः । अत्र च प्रागेव प्रत्ययोत्पत्तेर्लुग्भवति ।।

विमला – समानाश्रय इति । समानकालिक इत्यर्थः । **प्रागेवेति** । **यङोऽचि** चेत्यस्य यङोऽचि प्रत्यये लुक्स्याच्चकारात्तं विनापि क्वचिदित्यर्थस्वीकारादिति भावः ।

लुग्भवतीति । एवञ्च नैतयोः समानकालिकत्वमिति नास्य लुको लोपेन बाधः । "लोलुव" इत्यादौ तु अच्प्रत्यये परे लुग्विधानात्तदानीमार्धधातुकस्य सत्त्वेन लुग्लोपयोः समानकालिकत्वेन भवति तयोर्बाध्यबाधकभाव इति भावः ।

---

१. ऋ. सं. – १/७९/२ ।

(आक्षेपभाष्यम्)

कथम् – 'स्यदः' 'प्रश्रथः' 'हिमश्रथः' 'जीरदानुः'[1] 'निकुचित' इति ?

विमला – निकुचित इति । कुञ्च्धातोः क्तप्रत्यये नलोपे "**उदुपधाद्भावादिकर्मणो**" रिति क्तप्रत्ययस्याकित्त्वाद् गुणे प्राप्ते सूत्रसत्त्वे "**न धातुलोप आर्धधातुके**" इति निषेधान्न भवति । प्रत्याख्यानपक्षे तु गुणो दुर्वार इति भावः ।

(१२५-समाधानवार्तिकम्-६)

॥॥ उक्तं शेषे ॥*॥*

(भाष्यम्)

किमुक्तम् ?

'निपातनात्स्यदादिषु' ।

प्रत्ययाश्रयत्वादन्यत्र सिद्धम् ।

'रकि ज्यः सम्प्रसारणम्' इति ॥

निकुचितेऽप्युक्तम् ।

किम् ?

'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्ये'ति ॥ (न धातुलोप) ॥४॥

विमला – सन्निपातेति । कित्त्वसंन्नियोगेन नलोपे सति जातमुदुपधत्वं कित्त्वस्य विघातकं न भविष्यतीति भावः ॥

(परिभाषासूत्रम्)

क्ङिति च ॥ १/१/५ ॥

विमला – चर्त्वेन गकारस्यापि प्रश्लेषाद्गित्यपि गुणनिषेध इति "**ग्लाजिस्थश्चग्स्नुरि**" ति सूत्रस्थ सिद्धान्तवार्तिकानुरोधेन "**क्ङ्ति**" ककारद्वयवानेवात्र पाठः समुचितस्तथा

---

१. ऋ. सं. – ५/८३/१ ।

च वार्तिकम् — "क्स्नोर्गित्वान्नस्थ ईकारः क्ङितोरीत्वनुशासनात् । गुणाभावस्त्रिषु स्मार्य्यः श्र्युकोऽनिट्त्वं गकोरितोः ।। इति । वामनस्तु "ग्लाजिस्थश्चे" त्यत्र 'स्थाआ' इत्याकारम्प्रश्लिष्य क्स्नुप्रत्ययान्तस्य तिष्ठतेराकारविधानसामर्थ्येनेत्त्वबाधेन स्थास्नुरित्यस्य सिद्धौ गकारस्य प्रश्लेषाभावेनैक ककारवानेव पाठ इति मेने ।

(अथ सप्तम्यानिमित्तार्थत्वाधिकरणम्)

(१२५-आक्षेपवार्तिकम्-१)

।।*।। क्ङिति प्रतिषेधे तन्निमित्तग्रहणम् ।।*।।

(उपधारोरवीत्यर्थम्)

(आक्षेपभागव्याख्याभाष्यम्)

क्ङिति प्रतिषेधे तन्निमित्तग्रहणं कर्तव्यम् । 'क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत' इति वक्तव्यम् ।।

विमला – **तन्निमित्तग्रहणं कर्त्तव्यमिति** । ननु '**क्क्ङिती**' त्यत्र '**यस्य च भावेने**' ति ज्ञापकत्वार्थकसप्तम्येवास्तु ज्ञापकत्वञ्च सम्बन्धं विना अनुपपन्नमिति विधिशास्त्रक्लृप्तनिमित्तत्वसम्बन्धं कल्पयतीति निमित्ततयाक्क्ङिद्ज्ञाप्ये गुणवृद्धी न स्त इति व्याख्यानेनैव सर्वेष्टसिद्धौ निमित्तग्रहणं मास्त्विति चेन्न, "**उपपदविभक्तेरि**"-ति न्यायेन परसप्तम्याः सतिसप्तमीबाधकत्वात् । न च निमित्तग्रहणेऽपि "**तस्मिन्निति**" परिभाषोपस्थितौ क्क्ङिन्निमित्ताव्यवहिते पूर्वस्य ये गुणवृद्धी प्राप्नुतस्ते नेत्येवार्थ इति उपधारोरवीत्यादौ दोष एवेति वाच्यम्, निमित्तग्रहणसामर्थ्यादेव '**तस्मिन्निति**' परिभाषानुपस्थानात् । तत्प्रत्याख्याने तु क्नोः कित्करणादेव परिभाषानुपस्थानमिति दिक् ।

(भाष्यम्)

किं प्रयोजनम् ?

(१२५-आक्षेपवार्तिकप्रयोजनखण्डम्-१)

।।*।। उपधारोरवीत्यर्थम् ।।*।।

(प्रयोजनखण्डव्याख्याभाष्यम्)

उपधार्थं रोरवीत्यर्थं च ।।

(प्रथमप्रयोजनसमन्वयभाष्यम्)

उपधार्थं तावत् – भिन्नः भिन्नवानिति ।। किं पुनः कारणं न सिध्यति ?

क्ङितीत्युच्यते । यत्र क्ङित्यनन्तरो गुणभावीगस्ति तत्रैव स्यात् – चितम्, स्तुतम् । इह तु न स्यात् – भिन्नः, भिन्नवानिति ?

(प्रथमप्रयोजनबाधकभाष्यम्)

ननु च-यस्य गुण उच्यते, तं क्ङित्परत्वेन विशेषयिष्यामः । पुगन्तलघूपधस्य चाऽङ्गस्य गुण उच्यते । तच्चात्र क्ङित्परम् ।।

(प्रथमप्रयोजनसाधकभाष्यम्)

पुगन्तलघूपधस्येति नैवं विज्ञायते – 'पुगन्तस्याऽङ्गस्य लघूपधस्य चे'ति ।।

कथं तर्हि ?

पुकि अन्तः पुगन्तः । लघ्वी उपधा लघूपधा । पुगन्तश्च लघूपधा च पुगन्तलघूपधं, पुगन्तलघूपधस्येति ।। अवश्यं चैतदेवं विज्ञेयम् । अङ्गविशेषणे हि सतीहापि प्रसज्येत – भिनत्ति, छिनत्तीति ।।

(द्वितीयप्रयोजनसमन्वयभाष्यम्)

रोरवीत्यर्थं वा[1] । 'त्रिधा बद्धो वृषभो रोरवीति ।।

१. 'च' इति पाठान्तरम् ।

(आक्षेपभाष्यम्)

यदि तन्निमित्तग्रहणं क्रियते, शचङन्ते दोषः – रियति पियति धियति, प्रादुद्रुवत् प्रासुस्रुवत् । अत्र न प्राप्नोति ।।

विमला – शचङन्ते दोष इति । शप्रत्ययान्ते चङ्ङन्ते चेत्यर्थः । तथाहि रि + अति द्रु + अत् – इत्यवस्थायाम् 'रि + अ' इत्यस्य, द्रु अ, इत्यस्य च, लघूपधत्वेन तदवयवस्य तिपि परे गुणः प्राप्तः । निमित्तग्रहणाभावे शस्य चङश्च ङित्त्वात् क्ङितीति निषेधेन न भवति, निमित्तग्रहणे त्वस्य गुणस्य क्ङिन्निमित्तकत्वाभावान्निषेधो न स्यादिति भावः ।

(१२६-सिद्धान्तसमाधानवार्तिकम्-२)

|||| शचङन्तस्यान्तरंगलक्षणत्वात् (सिद्धम्) ||*||*

(भाष्यम्)

अन्तरङ्गलक्षणत्वादत्रेयङुवङोः कृतयोरनुपधात्वाद् गुणो न भविष्यति ।।

(तन्निमित्तग्रहणस्य निर्दोषतोपसंहारभाष्यम्)

एवं क्रियते चेदं तन्निमित्तग्रहणम् । न च कश्चिद्दोषो भवति ।।

विमला – एवं क्रियते इति । उपधा रोरवीत्यर्थं क्रियत इत्यर्थः । न च कश्चिदिति । क्रियमाणे तन्निमित्तग्रहणे न कश्चिद्दोषो भवतीत्यर्थः ।

(फलान्तरप्रदर्शकभाष्यम्)

इमानि च भूयस्तन्निमित्तग्रहणस्य प्रयोजनानि – 'हतो हथः उपोयते औयत लौयमानिः पौयमानिः नेनिक्त' इति ।।

विमला – तन्निमित्तग्रहणस्य मुख्यफलानि व्यवस्थाप्य गौणानि फलानि दर्शयति – **इमानि चेति** ।

(फलान्तरप्रत्याख्यानभाष्यम्)

नैतानि सन्ति प्रयोजनानि । इह तावद् - 'हतो' 'हथ' इति । प्रसक्तस्याऽनभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुम् । अत्र च धातूपदेशावस्थायामेवाऽकारः ॥

विमला – **नैतानि सन्तीति** । गौणानीति शेषः । **अनभिनिर्वृत्तस्य**, अनिष्पन्नस्य ।

(भाष्यम्)

इह चोपीयते औयत लौयमानिः पौयमानिरिति । बहिरङ्गे गुणवृद्धी, अन्तरङ्गः प्रतिषेधः । 'असिद्धं बहिरङ्गमन्तरङ्गे' ॥

नेनिक्त इति । परेण रूपेण व्यवहितत्वान्न भविष्यति ॥

(अथ तन्निमित्तग्रहणप्रत्याख्यानभाष्यम्)

उपधार्थेन तावन्नाऽर्थः । धातोरिति वर्तते । धातुं क्ङित्परत्वेन विशेषयिष्यामः ॥

विमला – तन्निमित्तग्रहणस्य गौणानि फलानि निराकृत्य मुख्यानि फलानि निराकरोति – **उपधार्थेन तावन्नार्थ इति** ।

(आक्षेपभाष्यम्)

यदि धातुर्विशेष्यते, विकरणस्य न प्राप्नोति – 'चिनुतः सुनुतः लुनीतः पुनीत' इति ॥

(समाधानभाष्यम्)

नैष दोषः । विहितविशेषणं धातुग्रहणम् – 'धातोर्यो विहित' इति ॥

(आक्षेपभाष्यम्)

धातोरेव तर्हि न प्राप्नोति ॥

(समाधानभाष्यम्)

नैवं विज्ञायते – 'धातोर्विहितस्य क्ङिती'ति ॥

कथं तर्हि ? धातोर्विहिते क्ङितीति ॥

(समाधानान्तरभाष्यम्)

अथवा – कार्यकालं संज्ञापरिभाषं, यत्र कार्यं तत्र द्रष्टव्यम् । "पुगन्तलघूपधस्य गुणो भवति" इत्युपस्थितमिदं भवति "क्ङिति न" इति ॥

विमला – धातुग्रहणस्य सूत्रस्य च प्रत्याख्यानात्समाध्यन्तरमाह – अथवेति ।

(समाधानान्तरभाष्यम्)

अथवा यदेतस्मिन्योगे क्ङिद्ग्रहणं क्रियते तदनवकाशम् । तस्यानवकाशत्वाद् गुणवृद्धी न भविष्यतः ॥

विमला – पूर्वोत्तरसूत्रसाहचर्य्येण क्ङितीत्यस्य निषेधसूत्रत्वमेव युक्तं, न परिभाषासूत्रत्वमिति कार्य्यकालपक्षाश्रयणमयुक्तमत आह – अथवेति ।

(समाधानान्तरभाष्यम्)

अथवाचार्यप्रवृत्तिर्ज्ञापयति – 'भवत्युपधालक्षणस्य गुणस्य प्रतिषेधः' इति । यदयं – "त्रसिगृधिधृषिक्षिपेः क्नुः" 'इको झल्' 'हलन्ताच्च' इति क्नुसनौ कितौ करोति ॥

कथं कृत्वा ज्ञापकम् ?

कित्करण एतत्प्रयोजनम् – गुणः कथं न स्याद् इति । यदि चाऽत्र गुणप्रतिषेधो न स्यात्, कित्करणमनर्थकं

स्यात् । पश्यति त्वाचार्यो – 'भवत्युपधालक्षणस्यापि गुणस्य प्रतिषेध' – इति । ततः क्नुसनौ कितौ करोति ।।

(द्वितीयप्रयोजनप्रत्याख्यानभाष्यम्)

रीरवीत्यर्थेनापि नाऽर्थः । क्ङितीत्युच्यते, न चाऽत्र क्ङितं पश्यामः ।।

(आक्षेपभाष्यम्)

प्रत्ययलक्षणेन प्राप्नोति ।।

(समाधानभाष्यम्)

"न लुमता तस्मिन्" इति प्रत्ययलक्षणप्रतिषेधः ।

अथापि "न लुमताऽङ्गस्य" इत्युच्यते, एवमपि न दोषः ।।

कथम् ?

न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते ।।

किं तर्हि ?

योऽसौ लुमता लुप्यते तस्मिन्यदङ्गं तस्य यत्कार्यं तन्न भवतीति ।। अथाऽप्यङ्गाधिकारः प्रतिनिर्दिश्यते । एवमपि न दोषः ।।

कथम् ? ।।

"कार्यकालं संज्ञापरिभाषम्" यत्र कार्यं तत्र द्रष्टव्यम् । "सार्वधातुकार्धधातुकयोर्गुणो भवति" इत्युपस्थितमिदं भवति "क्ङिति न" इति ।।

विमला – **न लुमता तस्मिन्निति** । लुमता लुप्ते तन्निमित्तकं पूर्वस्य कार्यं नेत्यर्थः । उक्तन्यासस्यापाणिनीयत्वादाह – **अथापीति** । **प्रतिनिर्दिश्यत इति** । अङ्गपदे स्वरितत्वं प्रतिज्ञायाङ्गाधिकारपरत्वकल्पनायां गौरवात् फलाभावाच्चेति भावः ।

तुष्यतुदुर्जनन्यायेनाऽऽह–**अथाप्यङ्गाधिकार इति** । **क्ङिति नेतीति** । अङ्गपदे स्वरितत्वप्रतिज्ञा-बलेनैवाङ्गाधिकारस्थैकवाक्यतापन्नस्याप्यङ्गाधिकारपदेन ग्रहणमिति भावः ।

(समाधानान्तरभाष्यम्)

अथवा छान्दसमेतत् । दृष्टानुविधिश्छन्दसि भवति ।।

विमला – अस्य परिभाषात्वेनाप्रसिद्धत्वादाह – **अथवा छान्दसमेतदिति** ।

(समाधानान्तरभाष्यम्)

अथवा – बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः । "असिद्धं बहिरङ्गमन्तरङ्गे" ।।

विमला – छान्दसत्वस्यागतिकगतित्वादाह – **अथवेति** ।

(समाधानान्तरभाष्यम्)

अथवा पूर्वस्मिन्योगे यदार्धधातुकग्रहणं, तदनवकाशम् । तस्याऽनवकाशत्वाद् गुणो भविष्यति ।

विमला – निषेधस्य निषेध्यापेक्षतया निषेध्यस्य बहिरङ्गत्वे निषेधेऽपि बहिरङ्गत्वमक्षतमतः समाधानान्तरमाह – **अथवेति** । **पूर्वस्मिन्योग इति** । न धातुलोपसूत्र इत्यर्थः । **गुणो भविष्यतीति** । आर्धधातुकग्रहणाभावेऽपि **एकाचोद्वे** इत्यत्रेव धातुलोपपदे बहुव्रीहिसिद्धौ पूर्वसूत्रे आर्धधातुकग्रहणं योगविभागेन "**धात्वेकदेशलोपे सति प्रत्यासत्या लुप्तधात्वेकदेशनिमित्तो गुणवृद्धिनिषेधश्चेदार्धधातुक एवेति**" नियमार्थम् । योगविभागसामर्थ्यात् '**क्ङिति चे**' ति सूत्रान्तरप्राप्तनिषेधस्याऽपि तेन नियम इति **रोरवीतीत्यत्र** न दोष इति भावः ।

(आक्षेपभाष्यम्)

इह कस्मान्न भवति – 'लैगवायनः' कामयते' ?

विमला – तद्धितकाम्योरितिवार्तिकमवतारयति – **इह कस्मान्नेति** । **लैगवायनः कामयत इति** । लिगुशब्दात् नड़ादित्वात्फकि '**किति चे**' त्यनेन वृद्धौ '**ओर्गुणः**'

इत्यनेन गुणे अवादेशे लैगवायन इति । कमेर्णिङि '**अत उपधायाः**' इति वृद्धौ कामयते । आद्ये '**ओर्गुण**' इति गुणस्य फकः कित्त्वेन किन्निमित्तकत्वान्निषेधः स्यादिति भावः ।

(१२७-सिद्धान्तिसमाधानवार्तिकम्-३)

॥*॥ तद्धितकाम्योरिक्प्रकरणात् ॥*॥

(भाष्यम्)

इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः । न चैते इग्लक्षणे ॥

विमला – तद्धितकाम्योरिति । यत **इक्** परिभाषाम्प्रस्तुत्य निषेधारम्भोऽत **इक्** परिभाषाविषयत्वं निषेधशास्त्राणाम् । **तद्धितकाम्योर**तथात्वान्न निषेध इति भावः ।

इति निमित्तार्थत्वनिराकरणम् ॥

(अथ स्थानिवत्त्वप्राप्तदोषवारणम्)

(१२८-आक्षेपवार्तिकम्-४)

॥*॥ लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसंगः ॥*॥

(भाष्यम्)

लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावः प्राप्नोति – अचिनवम् असुनवम् अकरवम् ॥

(१२९-एकदेशिसमाधानवार्तिकम्-५)

॥*॥ लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसंग इति चेद्यासुटो ङिद्वचनात्सिद्धम् ॥*॥

(भाष्यम्)

यदयं यासुटो ङिद्वचनं शास्ति तज्ज्ञापयत्याचार्यो – 'न ङिदादेशा ङितो भवन्ती'ति ॥

(आक्षेपभाष्यम्)

यद्येतज्ज्ञाप्यते, कथं – "नित्यं ङितः" "इतश्च" इति ?

(समाधानभाष्यम्)

'ङितो यत्कार्यं तद्भवति, ङिति यत्कार्यं तन्न भवती'ति ।।

विमला – ङितो यत्कार्यं तद्यथा स्यादिति । वस्तुतस्तु यासुटो ङिद्वचनं न ङिदादेशा ङितो भवन्तीत्येव ज्ञाप्यते । 'नित्यं ङित' इत्यस्य ङितो लकारस्येत्याद्येवार्थः । ङित आदेशस्येति व्याख्याने पचावः पचन्तीत्यादौ लोपः स्यादिति विभावनीयम् ।।

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत् ? ।

(समाधानभाष्यम्)

नहि ।

(आक्षेपभाष्यम्)

कथमनुच्यमानं गंस्यते ?

(समाधानभाष्यम्)

यासुट एव ङिद्वचनात् । अपर्याप्तश्चैव हि यासुट् समुदायस्य ङित्त्वे, ङितं चैनं करोति । तस्यैतत्प्रयोजनम् – 'ङितो यत्कार्यं तद्यथा स्याद्, ङिति यत्कार्यं तन्माभू'दिति ।। (क्ङिति च) ।।५।।

(परिभाषासूत्रम्)

दीधीवेवीटाम् ।।१।१।६ ।।

विमला – इट् चात्रागमो न धातुः । ननु धातुसाहचर्याद्धातुरेव गृह्यतामिति चेन्न । 'द्विस्त्रिचतु' रिति सूत्रे कृत्वोऽर्थग्रहणेन साहचर्यपरिभाषाया असार्वत्रिकत्वज्ञापनात् । अतएवागमापेक्षया प्रकृतेरभ्यर्हितत्वेन दीधीङः पूर्वनिपातः सूत्रे कृतः । इटोऽपि

धातुत्वे तु प्रकृतित्वाविशेषेऽल्पाच्तरत्वात्तस्यैव पूर्वनिपातः स्यात् । अत्र दीधीवेव्योरेव ग्रहणं न तु 'दीङ्क्षये' धीङ् अनादरे'' वेञ् तन्तु सन्ताने, वी गत्यादिषु' इति चतुर्णामवयवप्रसिद्ध्यपेक्षया समुदायप्रसिद्धेर्बलवत्त्वात् ।

''आदीध्यकः आवेव्यकः'' इति शुद्धाभ्यामेव ण्वुलि रूपं न तु ण्यन्ताभ्याम् । ण्यन्ताभ्यामादीधकः ''आवेवकः'' इत्येवेति ''नाग्लोपि'' सूत्रे भाष्ये व्युत्पादितत्वात् ।

(आक्षेपभाष्यम्)

किमर्थमिदमुच्यते ?

(समाधानभाष्यम्)

'गुणवृद्धी मा भूता'मिति । आदीध्यनम् आदीध्यकः । आवेव्यनम् आवेव्यकः ।।

(दीधीवेवीप्रत्याख्यानभाष्यम्)

अयं योगः शक्योऽकर्तुम् ।।

कथम् ?

विमला – एकदेश्युक्तम् दीधीवेव्योरेव फलं श्रुत्वाऽसहमानः सिद्धान्ती इटः फलमश्रुत्वैवाह – **अयं योगः शक्योऽकर्तुमिति** ।अत्र युज्यते इति योगः कर्मणि घञ्-दीधी-वेवीरूपयुग्ममित्यर्थः । तेन **इटश्चापि ग्रहणं शक्यमकर्त्तुमिति** वक्ष्यमाणग्रन्थेन न पौनरुक्त्यम् । इड्ग्रहणस्यावश्यकत्वेऽपि योगप्रत्याख्याने एकदेश्युक्तत्वञ्च न । वक्ष्यमाणेड्ग्रहणप्रत्याख्यानन्त्वेकदेशिनो न सिद्धान्तिन इत्यवधेयम् ।

(१३०-सिद्धान्तवार्तिकम्-१)

।।।। दीधीवेव्योश्छन्दोविषयत्वाद् दृष्टानुविधित्वाच्च छन्दसश्छन्दस्यदीधेददीधयुरिति च गुणदर्शनादप्रतिषेधः ।।*।।*

(भाष्यम्)

'दीधीवेव्योश्छन्दोविषयत्वात्' । दीधीवेव्यौ छन्दोविषयौ । दृष्टानुविधित्वाच्चच्छन्दसः ।

दृष्टानुविधिश्च छन्दसि भवति । अदीधेददीधयुरिति च गुणस्य दर्शनादप्रतिषेधः । अनर्थकः प्रतिषेधः अप्रतिषेधः । "प्रजापतिर्वै यत्किंचन मनसादीधेत्" । "होत्राय वृतः कृपयन्न दीधेत्"[1] । "अदीधयु-र्दाशराज्ञे वृतासः"[2] ।।

(आक्षेपभाष्यम्)

भवेदिदं युक्तमुदाहरणम् – 'अदीधे'दिति । इदं त्वयुक्तम् – 'अदीधयु'रिति । अयं जुसि गुणः प्रतिषेधविषय आरभ्यते, स यथैव "क्ङिति न" इत्येतं प्रतिषेधं बाधते, एवमिममपि बाधेत ।।

(समाधानभाष्यम्)

नैष दोषः, जुसि गुणः प्रतिषेधविषय आरभ्यमाण-स्तुल्यजातीयं प्रतिषेधं बाधते ।।

कश्च तुल्यजातीयः प्रतिषेधः ?

यः प्रत्ययाश्रयः । प्रकृत्याश्रयश्चायम् ।।

(समाधानान्तरभाष्यम्)

अथवा – येन नाऽप्राप्ते तस्य बाधनं भवति । न चाऽप्राप्ते 'क्ङिति ने'त्येतस्मिन्प्रतिषेधे जुसि गुण आरभ्यते । अस्मिन्पुनः प्राप्ते चाऽप्राप्ते च ।।

(आक्षेपभाष्यम्)

यदि तर्ह्ययं योगो नारभ्यते । कथं — 'दीध्य'दिति ?

(१३१-सिद्धान्तसमाधानवार्तिकम्-२)

।।*।। दीध्यदिति च श्यन्व्यत्ययेन ।।*।।

---

१. ऋ. सं. – १०/९८/७ । २. ऋ. सं. – ७/३३/५ ।

(भाष्यम्)

दीध्यदिति च श्यन् व्यत्ययेन भविष्यति ।।

(एकदेशिप्रत्याख्यानभाष्यम्)

इटश्चापि ग्रहणं शक्यमकर्तुम् ।।

विमला – कश्चिदेकदेशी शङ्कते — इटश्चापीति ।

(आक्षेपभाष्यम्)

कथम् — अकणिषम्, अरणिषम्, कणिता श्वः, रणिता श्व इति ?

(समाधानभाष्यम्)

"आर्धधातुकस्येडवलादेः" इत्यत्र इडित्यनुवर्तमाने पुनरिड्ग्रहणस्य प्रयोजनम् – 'इड् इडेव यथा स्यात्, यदन्यत्प्राप्नोति तन्मा भू'दिति ।।

किं चान्यत्प्राप्नोति ?

गुणः ।।

विमला – कश्चिदेकदेशी समाधत्ते – आर्धधातुकस्येडिति ।

(आक्षेपभाष्यम्)

यदि नियमः क्रियते, 'पिपठिषतेरप्रत्ययः – पिपठीः' दीर्घत्वं न प्राप्नोति ।।

(समाधानभाष्यम्)

नैष दोषः । आङ्गं यत्कार्यं तन्नियम्यते । न चैतदाङ्गम् ।।

(समाधानान्तरभाष्यम्)

अथवा – असिद्धं दीर्घत्वं, तस्याऽसिद्धत्वान्नियमो न भविष्यति ।। (दीधीवेवीटाम्) ।।६।।

(संयोगसंज्ञासूत्रम्)

हलोऽनन्तराः संयोगः ॥१।१।७॥

(अनन्तरपदार्थनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

अनन्तरा इति। कथमिदं विज्ञायते — अविद्यमानमन्तरं येषामिति, आहोस्विदविद्यमाना अन्तरैषामिति ?

(प्रत्याक्षेपभाष्यम्)

किं चातः ?

(प्रत्याक्षेपसमाधानभाष्यम्)

यदि विज्ञायते – 'अविद्यमानमन्तरं येषा'मिति। अवग्रहे संयोगसंज्ञा न प्राप्नोति – 'अप्स्वित्यप्ऽसु'[1] इति। विद्यते इति[2]। विद्यते ह्यत्रान्तरम् ॥

अथ विज्ञायते – 'अविद्यमाना अन्तरैषा'मिति, न दोषो भवति ॥

(द्वितीयपक्षाभ्युपगमभाष्यम्)

यथा न दोषस्तथास्तु।

(प्रथमपक्षनिर्दुष्टत्वसाधकभाष्यम्)

अथवा पुनरस्तु – 'अविद्यमानमन्तरं येषा'मिति ॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् – अवग्रहे संयोगसंज्ञा न प्राप्नोति – 'अप्स्वित्यप्ऽसु' इति। विद्यते ह्यत्रान्तरमिति ॥

---

१. ऋ. सं. पद. – १/२३/१९। २. पदमिदमधिकं प्रतिभाति।

(आक्षेपबाधकभाष्यम्)

नैव दोषो न प्रयोजनम् ।।

विमला – नैव दोषो न प्रयोजनमिति । ननु संयोगसंज्ञायाम् ''**संयोगे गुरु**'' इति गुरुसंज्ञायाम् ''**गुरोरनृत**'' इति प्लुतसिद्धिः प्रयोजनमस्तीति चेन्न '**गुरोरनृत**' इति सूत्रे ''**दूराद्धूते**'' इत्यस्यानुवृत्तौ दूरादाह्वानस्य सम्बोधनोपलक्षकत्वेन सम्बोधने प्रथमाया एव साधुत्वेन 'अप्सु' इत्यस्य सप्तम्यन्तत्वेन तत्रास्याप्रवृत्तेः । न च विचार्यमाणानामित्यनेनैव गुरुत्वात्प्लुतत्वं स्यादिति वाच्यम्, ''**वाक्यस्य टे**'' रित्यस्य तत्र सम्बन्धेन ''गुरोरनृत'' इत्यस्यासम्बन्धेन च 'अप्सु' इत्यस्य वाक्यत्वाभावेनाप्रवृत्तेः । न च अप्सु भवोऽप्सव्यो दिगादिषु पाठाद्यत् '**अपो योनियन्मतुषु**' इत्यनेन सप्तम्या अलुक्, ततः सम्बुद्धौ 'हे अप्सव्य' इत्यत्र सम्बोधनसत्त्वेन तत्र 'अप्सु य' इत्यवग्रहे '**गुरोरनृत**' इति प्लुतसंज्ञा फलम्भविष्यतीति वाच्यम् । सम्प्रदायानुसारेणाऽत्राव-ग्रहाऽभावात् ।

(अथ प्रत्येकं संयोगसंज्ञानिराकरणाधिकरणम्)

(१३२-'सह' ग्रहणवादिन आक्षेपवार्तिकम्-१)

।।*।। संयोगसंज्ञायां सहवचनं यथाऽन्यत्र ।।*।।

(भाष्यम्)

संयोगसंज्ञायां सहग्रहणं कर्तव्यम् । "हलोनन्तराः संयोगः सह' इति वक्तव्यम् ।। किं प्रयोजनम् ? सहभूतानां संयोगसंज्ञा यथा स्यादेकैकस्य मा भूदिति ।। 'यथाऽन्यत्र' । तद्यथा अन्यत्रापि यत्रेच्छति सहभूतानां कार्यं, करोति तत्र 'सह'ग्रहणम् । तद्यथा – 'सह सुपा' 'उभे अभ्यस्तं सह' इति ।।

विमला – ब्राह्मणा भोज्यन्तामित्युक्तौ भुजिक्रियायाः प्रतिब्राह्मणम्परिसमाप्तिदर्शना-दज्भिरव्यवहिता हलः संयोगसंज्ञा भवन्तीत्युक्तावपि प्रतिहलं संयोगसंज्ञा स्यादिति सहभूतानां संज्ञासिद्ध्यर्थं सहग्रहणं कर्त्तव्यमित्याक्षिपति **संयोगसंज्ञायामिति** ।

(दूषणप्रश्नभाष्यम्)

किं च स्याद् यद्येकस्य संयोगसंज्ञा स्यात् ?

विमला – द्वयो: सन्निधाने प्रत्येकं संयोगसंज्ञायामपि तमेव गुरुमादाय '**शिक्षा**' इत्यादौ '**गुरोश्चहल:**' इत्यप्रत्यय: स्यादेवेति सह ग्रहणं न कार्य्यमित्याशयेन पृच्छति – **किञ्च स्यादिति** ।

(दोषप्रदर्शनभाष्यम्)

इह – निर्यायात्, निर्वायात् । 'वान्यस्य संयोगादे:' इत्येत्वं प्रसज्येत ।।

इह च संह्वषीष्टेति, 'ऋतश्च संयोगादे:' इतीट् प्रसज्येत ।।

इह च संह्वियत इति, 'गुणोऽर्तिसंयोगाद्यो:' इति गुणः प्रसज्येत ।।

इह च दृषत्करोति, समित्करोति – 'संयोगान्तस्य' इति लोपः प्रसज्येत ।।

इह च शक्ता वस्तेति, 'स्को: संयोगाद्योरन्ते च' इति लोपः प्रसज्येत ।।

इह च निर्यातो निर्वातः – 'संयोगादेरातो धातोर्यण्वत:' इति निष्ठानत्वं प्रसज्येत ।।

विमला – **निर्यायादिति** । न चात्र '**अचो रहाभ्यामि**' ति द्वित्वे सिद्धान्तेऽप्येत्वं दुर्वारमेवेति वाच्यम्, '**पूर्वत्रासिद्धमि**' ति द्वित्वस्यासिद्धत्वेन सिद्धान्ते दोषाभावात् । ''**पूर्वत्रासिद्धीयमद्वित्वे**'' इति तु द्वित्वेऽन्यदसिद्धन्न द्वित्वन्त्वसिद्धमेवेत्यर्थकमिति तेनात्रासिद्धत्ववारणासम्भवात् ।

(दोषबाधकभाष्यम्)

नैष दोषः । यत्तावदुच्यते – इह तावन्निर्यायात् निर्वायात् ''वान्यस्य संयोगादे:'' इत्येत्वं प्रसज्येतेति ।।

नैवं विज्ञायते – संयोग आदिर्यस्य सोऽयं संयोगादिः संयोगादेरिति ।।

कथं तर्हि ?

संयोगावादी यस्य सोऽयं संयोगादिः संयोगादेरिति । एवं तावत्सर्वमाङ्गं परिहृतम् ।।

विमला – संयोगावादी यस्येति । संयोगत्वेनानेकसंयोगग्रहणमिति सूचयितुमिदम् । विग्रहस्तु संयोग आदिर्यस्येत्येव द्वित्ववत्त्वेन संयोगग्रहणार्थत्वे तु '**स्त्यायात्**' '**स्त्येयादि**' त्यत्र संयोगे त्रित्वादव्याप्तिः स्यादिति बोध्यम् ।

(द्वितीयदूषणोद्धारभाष्यम्)

यदप्युच्यते – इह च दृषत्करोति समित्करोति "संयोगान्तस्य" – इति लोपः प्रसज्येतेति ।। नैवं विज्ञायते — संयोगोऽन्तो यस्य तदिदं संयोगान्तं संयोगान्तस्येति ।।

कथं तर्हि ?

संयोगावन्तौ यस्य तदिदं संयोगान्तं संयोगान्तस्येति ।।

विमला – संयोगावन्तौ यस्येति । इदमपि संयोगत्वेनानेकसंयोगलाभार्थमेव विग्रहस्त्वेकवचनान्तेनैवेति बोध्यम् ।

(तृतीयदूषणोद्धारभाष्यम्)

यदप्युच्यते — इह च शक्ता वस्तेति "स्कोः संयोगाद्योः" – इति लोपः प्रसज्येतेति ।। नैवं विज्ञायते – संयोगावादी संयोगादी, संयोगाद्योरिति ।।

कथं तर्हि ?

संयोगयोरादी संयोगादी संयोगाद्योरिति ।।

(चतुर्थदूषणोद्धारभाष्यम्)

यदप्युच्यते — इह च निर्यातो निर्वात इति "संयोगादेरातो धातोर्यण्वतः" इति निष्ठानत्वं प्रसज्येतेति ।। नैवं विज्ञायते – संयोग आदिर्यस्य सोऽयं संयोगादिः संयोगादेरिति ।।

कथं तर्हि ?

संयोगावादी यस्य सोयं संयोगादिः संयोगादेरिति ।

(आक्षेपभाष्यम्)

कथं कृत्वा एकैकस्य संयोगसंज्ञा प्राप्नोति ?

विमला – प्रत्येकम् संयोगसंज्ञाभभ्युपेत्य सहग्रहणस्य निष्फलत्वमुक्तम् । इदानीम्प्रत्येकम् संयोगसंज्ञैव सूत्रस्वारस्यविरुद्धमिति सिद्धान्ती शङ्कते – **कथं कृत्वेति** । कीदृशार्थमवलम्ब्येत्यर्थः ।

(समाधानभाष्यम्)

'प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टा' इति । तद्यथा वृद्धिगुणसंज्ञे प्रत्येकं भवतः ।।

विमला – एकदेशी सूत्रस्वारस्यमपर्यालोच्य केवलं दृष्टान्तबलेनैव प्रत्येकं संयोगसंज्ञापक्षं सम्भावयति – **प्रत्येकमिति** ।

(समाधानबाधकप्रतिबन्दीसिद्धान्तिभाष्यम्)

ननु चायमप्यस्ति दृष्टान्तः – 'समुदाये वाक्यपरिसमाप्तिः' इति । तद्यथा – गर्गाः शतं दण्ड्यन्ताम् । अर्थिनश्च राजानो हिरण्येन भवन्ति । न च प्रत्येकं दण्डयन्ति ।।

विमला – गर्गाः शतं दण्ड्यन्तामिति । अनन्तरापदस्वारस्येन "गर्गदण्डन" न्याय एवात्राश्रयितुं युक्त इति भावः ।

(सहग्रहणप्रत्याख्यानभाष्यम्)

सत्येतस्मिन्दृष्टान्ते यदि तत्र 'प्रत्येक'मित्युच्यते । इहापि 'सह'ग्रहणं कर्त्तव्यम् । अथ तत्रान्तरेण प्रत्येकमितिवचनं प्रत्येकं गुणवृद्धिसंज्ञे भवतः, इहापि नार्थः सहग्रहणेन ।।

विमला – इहापि नार्थः सहग्रहणेनेति । यथा वृद्धिसंज्ञायाम् "**ब्राह्मणभोजन**"-न्यायेन प्रत्येकं वृद्धिसंज्ञा भवतीति **प्रत्येकमिति**वचनं न क्रियते, तथैव "**गर्गदण्डन**"-न्यायेन समुदायस्य संयोगसंज्ञा भविष्यतीति सहग्रहणं न कार्य्यमिति भावः ।

(आक्षेपभाष्यम्)

अथ यत्र बहूनामानन्तर्यं, किं तत्र द्वयोर्द्वयोः संयोगसंज्ञा भवति, आहोस्विदविशेषेण ?

विमला – बहूनामानन्तर्यस्थले बहूनां संयोगसंज्ञा, 'द्वयोर्द्वयोरेव वा', बहूनामपि द्वयोर्द्वयोरपीति वा इति त्रयः पक्षाः सम्भाव्यन्ते, तत्र पक्षद्वयं दूषयित्वा द्वितीयं सिद्धान्तयितुमाक्षिपति – **अथ यत्र बहूनामानन्तर्य्यमिति** । **अविशेषेणेति** । बहूनामेवेत्यर्थः । **एकाज्द्विर्वचन** न्यायादरे प्रथमपक्ष एव सिद्ध्यति । वैषम्यात्तदनादरे फलानुरोधेन द्वयोर्द्वयोरेव संयोगसंज्ञा स्यादिति द्वितीयः पक्षः सिद्ध्यति । तृतीय-पक्षस्यातिफल्गुत्वादाक्षेपग्रंथे सिद्धान्तिना नोट्टङ्कितः एकदेशिना तृतीयोऽपि पक्षो वक्ष्यते इत्यवधेयम् ।

(विशेषजिज्ञासाभाष्यम्)

कश्चात्र विशेषः ?

(१३३-आक्षेपवार्तिकम्-२)

।।*।। *समुदाये संयोगादिलोपो मस्जेः* ।।*।।

(भाष्यम्)

समुदाये संयोगादिलोपो मस्जेर्न सिद्ध्यति । मङ्क्ता मङ्क्तुम् ।।

इह च निर्ग्लेयात् निर्ग्लायात् निर्म्लेयात् निर्म्लायादिति, "वान्यस्य संयोगादेः" इत्येत्वं न प्राप्नोति ।।

इह च 'संस्वरिषीष्टे'ति, "ऋतश्च संयोगादेः" इतीट् न प्राप्नोति ।।

इह च 'संस्वर्यते' इति, "गुणोऽर्तिसंयोगाद्योः" इति गुणो न प्राप्नोति ।।

इह च गोमान्करोति यवमान्करोतीति, "संयोगान्तस्य लोपः" इति लोपो[1] न प्राप्नोति ।।

इह च निर्ग्लानो निर्म्लान इति, "संयोगादेरातो धातोर्यण्वतः" इति निष्ठानत्वं न प्राप्नोति ।।

विमला – समुदाय इति । समुदाये संयोगसंज्ञा स्वीकार इत्यर्थः । **एत्वन्न प्राप्नोतीति** । **''पूर्वं धातुरूपसर्गेण युज्यते'' इति पक्षे** साधनबोधकप्रत्ययोत्पत्तेः पूर्वमेव रगलानां संयोगसंज्ञा स्यादित्यङ्गस्य संयोगादित्वाभावेनैत्वं न प्राप्नोतीति भावः । **गोमान् करोतीति** । वाक्यसंस्कारपक्षे नतकानां संयोगसंज्ञा स्यादिति तकारस्य संयोगान्तत्वाभावेन लोपो न प्राप्नोतीति भावः ।

(प्रथमपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि — द्वयोर्द्वयोः संयोगः ।।

(१३४-आक्षेपवार्तिकम्-३)

।।*।। द्वयोर्हलोः संयोग इति चेद्द्विर्वचनम् ।।*।।

(भाष्यम्)

द्वयोर्हलोः संयोग इति चेद्द्विर्वचनं न सिद्ध्यति । इन्द्रमिच्छति इन्द्रीयति । इन्द्रीयतेः सन् –

---

१. यकारलोपः ।

इन्दिद्रीयिषति । "नन्द्राः संयोगादयः" इति द्विर्वचनं न प्राप्नोति ।।

(१३५-समाधानवार्तिकम्-४)

॥॥ न वाऽज्विधेः ॥*॥*

(भाष्यम्)

न वा एष दोषः ।। किं कारणम् ?

'अज्विधेः' । न्द्राः संयोगादयो न द्विरुच्यन्ते । 'अजादे'रिति वर्तते ।।

विमला – **अजादेरिति वर्तत इति** । तेनादेरचः परे नदराः संयोगादयो न द्विरुच्यन्त इति सूत्रार्थः । एवञ्च **इन्दिद्रीयिषती**'त्यत्र दकारस्याचः परत्वाभावेन द्वित्वनिषेधाप्राप्तिरिति भावः ।

(आक्षेपभाष्यम्)

अथ यद्येवं बहूनां संयोगसंज्ञा, अथापि द्वयोर्द्वयोः, किं गतमेतदियता सूत्रेण । आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम् ?

विमला – नन्वेवं द्वयोर्द्वयोरिति पक्षस्य निर्दुष्टत्त्वेऽपि सूत्रे हल इति बहुवचनसत्त्वात्सूत्रतस्तस्यालाभ एवेति गूढ़ाशयेन पृच्छति — **अथ यद्येवमिति** । **किं गतमेतदियता सूत्रेणेति** । यथा श्रुतेन सूत्रेणैवैतत्पक्षद्वयं किं लभ्यत इत्यर्थः । भूयः सूत्रं कर्त्तव्यमिति अथवाऽनयोरेकः पक्षो यथाश्रुतेन सूत्रेण लभ्यते । अपरपक्षे त्वितो गुरुतरं सूत्रान्तरं प्रणेतव्यमिति भावः ।

(समाधानभाष्यम्)

गतमित्याह ।। कथम् ?

यदा तावद्बहूनां संयोगसंज्ञा, तदैवं विग्रहः करिष्यते – 'अविद्यमानमन्तरमेषाम्' इति ।।

विमला – गतमित्याहेति । पक्षद्वयमपि यथाश्रुतसूत्रादेव लब्धमित्यर्थः । **बहूनामिति** । बहूनामेवेत्यर्थः । **अविद्यमानमन्तरमेषामिति** । यद्यपि वर्णशून्यकालार्थकान्तरपदेन '**अविद्यमानमन्तरमेषामिति**' विग्रहे वर्णशून्यकालाभावस्य द्वयोर्बहुषु च सम्भवेन द्वयोर्बहूनाञ्च विशेषेण संयोगसंज्ञा प्राप्नोति । **हल इति** बहुवचनेन बहूनामेव स्यादिति तु न वाच्यम् । यत्रद्व योरेवानन्तर्यं तत्र संयोगसंज्ञासम्पत्तये तस्याविवक्षिततत्वात् । समुदायद्विर्वचनवद् बहूनामेवेत्यपि न वक्ष्यमाणमदुक्तहेतोः तथापि पूर्वपक्षिणस्तादृशहेतु-ज्ञानाभावादविद्यमानमन्तरमेषामिति विग्रहे बहूनामेव स्यादित्युक्तमित्यवधेयम् ।

(समाधानशेषभाष्यम्)

यदा द्वयोर्द्वयोः संयोगसंज्ञा, तदैवं विग्रहः करिष्यते — 'अविद्यमाना अन्तरैषाम्' इति द्वयोश्चैवान्तरा कश्चिद्विद्यते वा, न वा ।।

विमला – द्वयोश्चैवान्तरेति । अवधित्वत्वेनावधित्वस्य विषयत्वविवक्षायामेव "**अन्तराऽन्तरेणे**" ति द्वितीया भवति, प्रकृते तु सम्बन्धत्वेनैवावधित्वस्य विषयत्वविवक्षेति द्वितीयाया अप्राप्तौ षष्ठ्येव भवतीति बोध्यम् । **कश्चिद्विद्यते वा न वेति** । अन्तरा कश्चिद्विद्यत इति द्वयोरेव भवतीति संसर्गवद्विप्रयोगस्याऽपि विशेषाव-गतिहेतुत्वमिति न विद्यत इत्यपि द्वयोरेवेति भावः ।

(आक्षेपभाष्यम्)

एवमपि बहूनामेव प्राप्नोति । यान् हि भवानत्र षष्ठ्या प्रतिनिर्दिशति, एतेषामन्येन व्यवाये न भवितव्यम् ।।

विमला – एवमपीति । संसर्गवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वस्वीकारेऽपीत्यर्थः । **प्राप्नोतीति** । एवकारो भिन्नक्रमः, बहूनां प्राप्नोत्येवेत्यर्थः । यथाश्रुतार्थकत्वे तु निर्ग्लेयात् इत्यादौ दोषोदुरुद्धरः । बहूनां संयोगसंज्ञा प्राप्तौ हेतुमाह – **यान् हीति** । हि यतः यान् बहून् वर्णान् षष्ठ्या समुदाययोरित्यर्थकेन द्वयोरिति षष्ठ्यन्तेन **प्रतिनिर्दिशति** प्रतिगृह्यन्ते । **एतेषाम्** बहूनाम् । **अन्येन** भिन्नजातीयेन अचा **व्यवाये** व्यवधाने सति **न भवितव्यमिति** । अस्य संयोगसंज्ञयेत्यादिः । एवञ्च भिन्नजातीयेनाव्यवधाने

संयोगसंज्ञया भवितव्यमेवेत्यर्थः फलति । अयम्भावः, यत्र बहूनां संयोगसंज्ञा कर्त्तव्या तत्र तद्घटकवर्णानां समसंख्यकयोर्विषमसंख्यकयोर्वा समुदाययोर्मध्ये यदि भिन्नजातीयोऽज् भवेत्तदा तेन व्यवधानाद् बहूनां संयोगसंज्ञा मा भवतु, यत्र तन्नास्ति तत्र **द्वयोश्चैवान्तरा काश्चिद्विद्यते न वेति** स्वीकारेऽपि समुदाययोरानन्तर्यमस्तीति वक्तुं शक्यते । समुदाययोरानन्तर्ये तद्घटकानां सर्वेषामेव हलामानन्तर्यसत्त्वात् **अविद्यमाना अन्तरा एषामिति** विग्रहेऽपि बहूनां संयोगसंज्ञा निराबाधैव । यत्र तु बहूनामानन्तर्येऽपि द्वयोरेव संयोगसंज्ञा कर्त्तव्या तत्र वर्णयोरेवानन्तर्य्यं ग्राह्यम् । एवञ्चाविद्यमाना अन्तरा एषामिति विग्रहेऽपि द्वयोर्बहूनाञ्चाविशेषेणैव संयोगसंज्ञा प्राप्नोतीति **द्वयोर्द्वयोरिति** पक्षे लक्ष्यासिद्धिवारणेऽपि यथाश्रुतसूत्रस्वारस्य वैरुद्ध्यमस्त्येवेति ।

(समुदायसंज्ञाभ्युपगमभाष्यम्)

अस्तु तर्हि समुदाये संज्ञा ।।

विमला – एवञ्च द्वयोर्द्वयोरिति पक्षे दूषिते **समुदायसंज्ञेत्याद्यपक्षमेव स्वीकरोति** – **अस्तु तर्हीति** । **समुदाये संज्ञेति** । समुदाये एव संज्ञेत्यर्थः । एकाज्द्विर्वचनन्यायेन तस्य सूत्रतो लाभसम्भवादिति भावः ।

(समुदायसंज्ञादूषणस्मारणभाष्यम्)

ननु चोक्तं – 'समुदाये संयोगादिलोपो मस्जेः' इति ।।

(समुदायसंज्ञादूषणनिराकरणसिद्धान्तिभाष्यम्)

नैष दोषः । वक्ष्यत्येतत् — "अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम्" इति ।

विमला – **वक्ष्यत्येतदिति** । यत इत्यादिः । **'मिदचोऽन्त्यात्पर'** इति सूत्रे वार्तिककृतेति शेषः ।

(समुदायसंज्ञादूषणनिराकरणैकदेशिभाष्यम्)

अथवाऽविशेषेण संयोगसंज्ञा विज्ञास्यते — द्वयोरपि, बहूनामपि । तत्र द्वयोर्या संयोगसंज्ञा, तदाश्रयो लोपो भविष्यति ।।

विमला – ‘**अन्त्यात्पूर्व**’ इति वार्तिकाकरणेन लाघवादाह – **अथवेति** । **द्वयोर्द्वयोरपीति** । समुदाये द्विरुक्तेऽवयवा अपि द्विरुक्ता भवन्तीति, ‘‘वृक्षप्रचलन’’-न्यायेन समुदायस्यैव द्विर्वचनम्भवति । इह तु समुदायस्य संयोगसंज्ञायामपि नावयवनां संयोगसंज्ञाप्रयुक्तकार्यसिद्धिरिति वैषम्यादेकाज् द्विर्वचनन्यायस्यात्राप्रवृत्तिरिति भावः । **लोपो भविष्यतीति** । एवञ्च ‘अन्त्यात्पूर्व’ इति वार्तिकं न कर्त्तव्यमिति भावः । अनुषङ्गलोपार्थम् ‘‘**अन्त्यात्पूर्वो मस्जेर्मिदि**’’ ति वार्तिकस्यावश्यकतया लाघवाभावादस्यैकदेशित्वमिति बोध्यम् ।

(समुदायसंज्ञापक्षोक्तदूषणान्तरनिराकरणसिद्धान्तिभाष्यम्)

यदप्युच्यते — ‘इह च निर्ग्लेयात् निर्ग्लायात् निर्म्लेयात् निर्म्लायादिति ‘‘वान्यस्य संयोगादेः’’ इत्येत्वं न प्राप्नोति’ इति ।। अङ्गेन संयोगादिं विशेषयिष्यामः – अङ्गस्य संयोगादेरिति ।। एवं तावत्सर्वमाङ्गं परिहृतम् ।।

यदप्युच्यते — इह च गोमान्करोति यवमान्करोतीति, ‘‘संयोगान्तस्य लोपः’’ इति लोपो न प्राप्नोति इति ।। पदेन संयोगान्तं विशेषयिष्यामः — पदस्य संयोगान्तस्येति ।।

यदप्युच्यते — ‘इह च निर्ग्लानो निर्म्लान इति ‘‘संयोगादेरातो धातोर्यण्वतः’’ इति निष्ठानत्वं न प्राप्नोति इति ।। धातुना संयोगादिं विशेषयिष्यामः – ‘धातोः संयोगादे’रिति ।।

विमला – **अंगेन संयोगादिं विशेषयिष्याम इति** । एवञ्च बहूनां संयोगसंज्ञायाः शास्त्रविषयत्वेऽपि संज्ञायाः कार्य्यार्थतया बहूनां संनिधानेऽपि द्वयोरेव संज्ञा भवतीत्यवधेयम् ।

इति समुदायसंज्ञापक्षस्थापनम् ।।

(अथानन्तरशब्दार्थनिरूपणम्)

(१३६-आक्षेपवार्तिकम्-५)

॥*॥ *स्वरानन्तर्हितवचनम्* ॥*॥

(भाष्यम्)

स्वरैरनन्तर्हिता हलः संयोगसंज्ञा भवन्तीति वक्तव्यम् ॥

किं प्रयोजनम् ?

व्यवहितानां मा भूत् । पचति पनसम् ॥

(आक्षेपबाधकभाष्यम्)

ननु चानन्तरा इत्युच्यते । तेन व्यवहितानां न भविष्यति ॥

(१३६-आक्षेपसाधकवार्तिकद्वितीयखण्डम्-६)

॥*॥ *दृष्टमानन्तर्यं व्यवहितेऽपि* ॥*॥

(भाष्यम्)

व्यवहितेऽप्यनन्तरशब्दो दृश्यते । तद्यथा — 'अनन्तराविमौ ग्रामौ' इत्युच्यते, तयोश्चैवाऽन्तरा नद्यश्च पर्वताश्च भवन्तीति ॥

(आक्षेपबाधकभाष्यम्)

यदि तर्हि व्यवहितेऽप्यनन्तरशब्दो भवति । आनन्तर्यवचनमिदानीं किमर्थं स्यात् ?

(१३७-आक्षेपसाधकवार्तिकम्-६)

॥*॥ *आनन्तर्यवचनं किमर्थमिति चेदेकप्रतिषेधार्थम्* ॥*॥

(भाष्यम्)

एकस्य हलः संयोगसंज्ञा मा भूदिति ॥

किं च स्यात् यद्येकस्य हलः संयोगसंज्ञा स्यात् ?

इयेष उवोष । "इजादेश्च गुरुमतोऽनृच्छः" इत्याम् प्रसज्येत ।।

(१३८-समाधानवार्तिकम्-८)

।।।। नवाऽतज्जातीयव्यवायात् ।।*।।*

(भाष्यम्)

न वा एष दोषः ।।

किं कारणम् ?

'अतज्जातीयस्य व्यवायात्' । अतज्जातीयकं हि लोके व्यवधायकं भवति ।।

(अनुयोगभाष्यम्)

कथं पुनर्ज्ञायते – 'अतज्जातीयकं लोके व्यवधायकं भवती'ति ?

(उत्तरभाष्यम्)

एवं हि कंचित् कश्चित्पृच्छति — 'अनन्तरे एते ब्राह्मणकुले' इति । स आह – 'नाऽनन्तरे, वृषलकुलमनयोरन्तरा' इति ।।

(आक्षेपभाष्यम्)

किं पुनः कारणं – क्वचिदतज्जातीयकं व्यवधायकं भवति, क्वचिन्न ?

(समाधानभाष्यम्)

सर्वत्रैव ह्यतज्जातीयकं व्यवधायकं भवति ।।

(आक्षेपभाष्यम्)

कथम् – 'अनन्तराविमौ ग्रामा'विति ?

(समाधानभाष्यम्)

ग्रामशब्दोऽयं बह्वर्थः । अस्त्येव शालासमुदाये वर्तते,

तद्यथा – 'ग्रामो दग्ध' इति । अस्ति वाटपरिक्षेपे वर्तते, तद्यथा 'ग्रामं प्रविष्ट' इति । अस्ति मनुष्येषु वर्तते, तद्यथा – 'ग्रामो गतो ग्राम आगत' इति । अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते, तद्यथा – 'ग्रामो लब्ध' इति ।। तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्यैतत्प्रयुज्यते – 'अनन्तराविमौ ग्रामा' विति । सर्वत्रैव ह्यतज्जातीयकं व्यवधायकं भवति ।। (–हलोऽनन्तराः) ।।७।।

(मुखनासिकावचनशब्दार्थनिरूपणम्)

(अनुनासिकसंज्ञासूत्रम्)

मुखनासिकावचनोऽनुनासिकः ।।१।१।८।।

(आक्षेपभाष्यम्)

किमिदं 'मुखनासिकावचनः' इति ?

(समाधानभाष्यम्)

मुखं च नासिका च मुखनासिकम् । मुखनासिकं वचनमस्य सोऽयं मुखनासिकावचनः ।।

(आक्षेपभाष्यम्)

यद्येवं 'मुखनासिकवचन' इति प्राप्नोति ।।

(समाधानभाष्यम्)

निपातनाद्दीर्घत्वं भविष्यति ।।

(समाधानान्तरभाष्यम्)

अथ वा – मुखनासिकमावचनमस्य सोऽयं मुखनासिकावचनः ।।

विमला – अन्यथा तदुपपत्तौ निपातनकल्पनमनुचितमित्यस्वरसादाह – **अथवेति** ।

(आक्षेपभाष्यम्)

अथ किमिदमावचनमिति ?

(समाधानभाष्यम्)

ईषद्वचनमावचनमिति, किंचिन्मुखवचनं किंचिन्नासिकावचनम् ।

विमला – **किञ्चिन्मुखमिति** । '**तस्यादित**' इति सूत्रस्वरसाद्वर्णानां सभागत्वाभ्युपगमादिति भावः ।

(समाधानान्तरभाष्यम्)

मुखद्वितीया वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः ।।

विमला – '**अकुहे**' त्यादिना सम्पूर्णस्यैव मुखादिवचनत्वोक्तेर्निपातनकल्पनमन्तरा गत्यन्तराभाव इत्याशङ्कायामाह – **मुखद्वितीयेति** ।

(समाधानान्तरभाष्यम्)

मुखोपसंहिता वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः ।।

विमला – अनुनासिकस्य स्थानान्तरत्वं वदतां मतेनाह – **मुखोपसंहिता वेति** ।

(पदकृत्यनिर्वचनायाक्षेपभाष्यम्)

अथ मुखग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

'नासिकावचनोऽनुनासिकः' इतीयत्युच्यमाने यमानुस्वाराणामेव प्रसज्ज्येत । मुखग्रहणे पुनः क्रियमाणे न दोषो भवति ।।

(नासिकाग्रहणे आक्षेपभाष्यम्)

अथ नासिकाग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

'मुखवचनोऽनुनासिकः' इतीयत्युच्यमाने कचटतपानामेव प्रसज्येत । नासिकाग्रहणे पुनः क्रियमाणे न दोषो भवति ।।

(मुखग्रहणप्रत्याख्यानभाष्यम्)

मुखग्रहणं शक्यमकर्तुम् ।।

विमला – मुखग्रहणं शक्यमकर्त्तुमिति । तस्यादित इति सूत्रेणाज्वर्णस्यैव सांशत्वावगमेन हल्वर्णस्य निरवयवत्वस्यैवोचितत्वेन मुखनासिकोभयवचनत्वमिति तृतीयपक्षस्यैव युक्ततया "**प्रासादवासिन्यायेनो**"भयवचनस्य नासिकावचनग्रहणेन ग्रहणसम्भवान्मुखग्रहणं न कार्यमिति भावः ।।

(आक्षेपभाष्यम्)

केनेदानीमुभयवचनानां भविष्यति ?

(समाधानभाष्यम्)

प्रासादवासिन्यायेन । तद्यथा — केचित्प्रासादवासिनः, केचिद् भूमिवासिनः, केचिदुभयवासिनः । तत्र ये प्रासादवासिनो, गृह्यन्ते ते प्रासादवासिग्रहणेन । ये भूमिवासिनो, गृह्यन्ते ते भूमिवासिग्रहणेन । ये तूभयवासिनः, गृह्यन्त एव ते प्रासादवासिग्रहणेन भूमिवासिग्रहणेन च ।। एवमिहापि केचिन्मुखवचनाः, केचिन्नासिकावचनाः, केचिदुभयवचनाः । तत्र ये मुखवचना, गृह्यन्ते ते मुखग्रहणेन । ये नासिकावचना, गृह्यन्ते ते नासिकाग्रहणेन । ये उभयवचना, गृह्यन्त एव ते मुखग्रहणेन, नासिकाग्रहणेन च ।।

विमला – ननु मुखग्रहणप्रत्याख्यानपक्षे यमानुस्वारयोरप्यनुनासिकत्वेन फलैक्याय सूत्रकारमतेऽपि तस्यानुनासिकत्वोपपत्तयेऽनुनासिकपदे योगाश्रयणस्यावश्यकतया

तेनैवोभयवचनानामपि "**प्रासादवासिन्यायेना**"ऽनुनासिकत्वसिद्धौ मुखग्रहणप्रत्याख्यानवत्सूत्रस्यापि प्रत्याख्यानं समुचितमिति चेन्न, क्रियाप्रवृत्तिनिमित्तकत्वेन प्रसिद्धशब्दघटितत्वरूपक्रियाशब्दत्वविशिष्टेष्वेव "**प्रासादवासिन्याय**"स्य प्रवृत्तिस्वीकारेण नासिकावचनशब्दस्य तादृशवचनशब्दघटितत्वेन क्रियाशब्दतया तत्र "**प्रासादवासिन्याय**"स्य प्रवृत्तावप्यनुनासिकशब्दस्य यौगिकत्वस्वीकारेऽपि तादृशशब्दघटितत्वाभावेन क्रियाशब्दत्वाभावान्न्यायाविषयत्वेन सूत्रवैयर्थ्योपपादनासम्भवात् । यत्तु अनु पश्चान्नासिका व्याप्रियते यस्मिन्निति योगस्य ञमङणनेषु निरूपयितुमशक्यत्वेऽपि नासिकामभिहत्य वायुनाऽभिव्यञ्जित इति योगस्य ञमङणनेषु सम्भवेनानुनासिकपदस्याभिव्यक्तिरूपक्रियाप्रवृत्तिनिमित्तकत्वेन क्रियाशब्दतया "**प्रासादवासिन्याय**" विषयत्वेन सूत्रवैयर्थ्यं सम्भवत्येवेति तन्न, पारिभाषिकक्रियाशब्दत्वस्योक्तस्य तावताऽप्युपपादनासम्भवात् । एवञ्चोपजीव्यत्वेनानुनासिकसंज्ञाया एव प्राग् वक्तव्यत्वे "**उपदेशेऽजनुनासिक इदि**"-तीत्संज्ञाभिधानं **कौमुदीकारस्या**ऽसङ्गतम् । योगाश्रयणेनैव गतार्थत्वादनुनासिकसंज्ञाभिधानम्मन्दप्रयोजनमिति ध्वनयितुमित्संज्ञायाः प्रागभिधानमिति मनोरमाग्रन्थोप्यसङ्गतः । अतएव भगवान् सूत्रकारोऽनुनासिकसंज्ञामभिधायैव "**उपदेशेऽजनुनासिक इदि**" तीत्संज्ञामभिहितवानिति बोध्यम् ।

(आक्षेपभाष्यम्)

भवेदुभयवचनानां सिद्धम् । यमानुस्वाराणामपि प्राप्नोति ।।

(समाधानभाष्यम्)

नैव दोषो न प्रयोजनम् ।।

(१३९-अन्योन्याश्रयपरिहारायाक्षेपवार्तिकम् - १)

।।*।। *इतरेतराश्रयं तु*[1] ।।*।।

(भाष्यम्)

इतरेतराश्रयं तु भवति ।।

१. इदं क्वचिन्न दृश्यते । भाष्यकृच्छैलीमनुरुध्यैव प्रकल्प्याऽस्माभिस्स्थापितम् ।

का इतरेतराश्रयता ?

सतोऽनुनासिकस्य संज्ञया भवितव्यम् । संज्ञया च नामाऽनुनासिको भाव्यते । तदितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्प्यन्ते ।।

(सिद्धान्तसमाधानवार्त्तिकम्)

।।*।। अनुनासिकसंज्ञायामितरेतराश्रये उक्तम् ।।*।।

(प्रश्नभाष्यम्)

किमुक्तम् ?

'सिद्धं तु नित्यशब्दत्वात्' इति ।

(प्रकृतोपयुक्तव्याख्याभाष्यम्)

नित्याः शब्दाः । नित्येषु शब्देषु सतोऽनुनासिकस्य संज्ञा क्रियते । न संज्ञयाऽनुनासिको भाव्यते ।।

(आक्षेपभाष्यम्)

यदि तर्हि नित्याः शब्दाः । किमर्थं शास्त्रम् ?

(९९-सिद्धान्तवार्तिकम्-५)

।।*।। किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम् ।।*।।

(भाष्यम्)

निवर्तकं शास्त्रम् ।।

कथम् ?

आङस्मायविशेषेणोपदिष्टोऽननुनासिकः । तस्य सर्वत्राऽननुनासिकबुद्धिः प्रसक्ता । तत्रानेन निवृत्तिः

क्रियते – 'छन्दस्यचि परत आङोऽननुनासिकस्य प्रसङ्गेऽनुनासिकः साधुर्भवती'ति ।। (मुखनासिकावचनोऽनुनासिकः ।।८।।)

विमला – अस्मै साधुशब्दजिज्ञासवे ।

(तुल्यास्यप्रयत्नपदार्थनिरूपणाधिकरणम्)

(सवर्णसंज्ञाप्रकरणम्)

(सवर्णसंज्ञासूत्रम्)

तुल्यास्यप्रयत्नं सवर्णम् ।।१।१।९।।

(आक्षेपभाष्यम्)

किमिदं तुल्यास्यप्रयत्नमिति ? ।।

(समाधानभाष्यम्)

तुलया संमितं तुल्यम् । आस्यं च प्रयत्नश्च आस्यप्रयत्नम् । तुल्यास्यं च तुल्यप्रयत्नं च (तुल्यास्यप्रयत्नं) सवर्णसंज्ञं भवति ।।

विमला – तुल्यमिति । रूढोऽयं सदृशवाची, **तुलया संमितमिति** तु व्युत्पत्तिप्रदर्शनमात्रम्, न त्ववयवार्थाऽनुगमः । स्थानादीनान्तुलाकरणकमानकर्मत्वासम्भवादित्यवधेयम् । **आस्यप्रयत्नमिति** । तुल्यमास्यप्रयत्नं यस्येति द्वन्द्वगर्भो बहुव्रीहिरिति भावः ।

तुल्यास्यञ्च तुल्यप्रयत्नञ्चेति । द्वन्द्वान्वितपदार्थस्य प्रत्येकं द्वन्द्वघटकसर्वपदार्थेऽन्वय इति भावः ।

(आक्षेपभाष्यम्)

किं पुनरास्यम् ?

(समाधानभाष्यम्)

लौकिकमास्यम् । ओष्ठात्प्रभृति प्राक्काकलकात् ।।

(आक्षेपभाष्यम्)

कथं पुनरास्यम् ?

(समाधानभाष्यम्)

अस्यन्त्यनेन वर्णानिति आस्यम् ।। अन्नमेतदास्यन्दत इति वाऽऽस्यम् ।।

विमला – अस्यन्त्यनेनेति । एवञ्चास्यपदं मुखे योगरूढमिति भावः ।

(आक्षेपभाष्यम्)

अथ कः (पुनः) प्रयत्नः ?

(समाधानभाष्यम्)

प्रयतनं प्रयत्नः । प्रपूर्वाद्यततेर्भावसाधनो नङ् प्रत्ययः ।

विमला – प्रयतनमिति । यत्नमात्रमित्यर्थः ।

(आक्षेपभाष्यम्)

यदि लौकिकमास्यं, किमास्योपादाने प्रयोजनम् ? सर्वेषां हि तत्तुल्यम् ।।

(समाधानभाष्यम्)

वक्ष्यत्येतत् – 'प्रयत्नविशेषणमास्योपादान'मिति ।

(१४०-आक्षेपवार्तिकम्-१)

।।।। सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसंगः प्रयत्नसामान्यात् ।।*।।*

(भाष्यम्)

सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गो भवति । जबगडदशाम् ।।

किं कारणम् ?

'प्रयत्नसामान्यात्' । एतेषां हि समानः प्रयत्नः ।।

(१४१-न्यासान्तरेण समाधानवार्तिकम्-२)

||*|| सिद्धं त्वास्ये तुल्यदेशप्रयत्नं सवर्णम् ||*||

(भाष्यम्)

सिद्धमेतत् । कथम् ? ('आस्ये तुल्यदेशप्रयत्नं सवर्णम्' ।)

आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्तीति वक्तव्यम् ।।

(आक्षेपभाष्यम्)

एवमपि किमास्योपादाने प्रयोजनम् ?

सर्वेषां हि तत्तुल्यम् ।

(समाधानभाष्यम्)

प्रयत्नविशेषणमास्योपादानम् । सन्ति हि आस्याद् बाह्याः प्रयत्नाः । ते हापिता भवन्ति । तेषु सत्स्वसत्स्वपि सवर्णसंज्ञा सिद्धा भवति ।।

के पुनस्ते ?

विवारसंवारौ, श्वासनादौ, घोषवदघोषता, अल्पप्राणता, महाप्राणतेति ।।

तत्र वर्गाणां प्रथमद्वितीया विवृतकण्ठाः, श्वासानुप्रदाना अघोषाश्च ।। एकेऽल्पप्राणाः, अपरे महाप्राणाः । तृतीयचतुर्थाः संवृतकण्ठानादानुप्रदाना घोषवन्तः । एकेऽल्पप्राणाः, अपरे महाप्राणाः ।।

यथा तृतीयास्तथा पञ्चमा आनुनासिक्यवर्जम् । आनुनासिक्यमेषामधिको गुणः ।।

(आक्षेपभाष्यम्)

एवमप्यवर्णस्य सवर्णसंज्ञा न प्राप्नोति, बाह्यं हि आस्यात्स्थानमवर्णस्य ।।

(समाधानभाष्यम्)

सर्वमुखस्थानमवर्णमेक इच्छन्ति ।।

(आक्षेपभाष्यम्)

एवमपि व्यपदेशो न प्रकल्पते – "आस्ये येषां तुल्यो देशः" इति ।।

(समाधानभाष्यम्)

व्यपदेशिवद्भावेन व्यपदेशो भविष्यति ।।

(आक्षेपभाष्यम्)

सिध्यति । सूत्रं तर्हि भिद्यते ।।

(सिद्धान्तिसमाधानभाष्यम्)

यथान्यासमेवास्तु ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् – 'सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसामान्यात्' इति ।।

(सिद्धान्तिसमाधानभाष्यम्)

नैष दोषः ।। न हि लौकिकमास्यम् ।।

किं तर्हि ?

'तद्धितान्तमास्यम्' । आस्ये भवमास्यम् । "शरीरावयवाद्यत्" ।।

किं पुनरास्ये भवम् ?

स्थानं करणं च ।।

(आक्षेपभाष्यम्)

एवमपि प्रयत्नोऽविशेषितो भवति ।।

(समाधानभाष्यम्)

प्रयत्नश्च विशेषितः ।। कथम् ?

न हि प्रयतनं प्रयत्नः ।। किं तर्हि ?

प्रारम्भो यत्नस्य प्रयत्नः ।।

(आक्षेपभाष्यम्)

यदि प्रारम्भो यत्नस्य प्रयत्नः, एवमप्यवर्णस्य एङोश्च सवर्णसंज्ञा प्राप्नोति ।।

(समाधानभाष्यम्)

प्रश्लिष्टाऽवर्णावेतौ ।।

(आक्षेपभाष्यम्)

अवर्णस्य तर्ह्यैचोश्च सवर्णसंज्ञा प्राप्नोति ।।

(समाधानभाष्यम)

विवृततराऽवर्णावेतौ ।।

(आक्षेपभाष्यम्)

एतयोरेव तर्हि मिथः सवर्णसंज्ञा प्राप्नोति ।।

(समाधानभाष्यम)

नैतौ तुल्यस्थानौ ।।

(आक्षेपभाष्यम्)

उदात्तादीनां तर्हि सवर्णसंज्ञा न प्राप्नोति ?

विमला – सवर्णसंज्ञा न प्राप्नोतीति । यावत्स्थानैक्यवद् यावत्प्रयत्नैक्यस्यापि विवक्षणेनोदात्तादिजनक - यत्नानामाभ्यन्तरकार्यकरत्वेनाभ्यन्तरतयोदात्तानुदात्त-योर्यावत्प्रयत्नैक्याभावेन सवर्णसंज्ञा न स्यादिति प्रश्नाशयः ।

(समाधानभाष्यम)

अभेदका उदात्तादयः ।।

(एकदेशिसमाधानभाष्यम्)

अथवा किं न एतेन — 'प्रारम्भो यत्नस्य प्रयत्न' इति ।। प्रयतनमेव प्रयत्नः । तदेव च तद्धितान्तमास्यम् । यत्समानं तदाश्रयिष्यामः ।।

किं सति ?

'भेदे सती'त्याह । सत्येव हि भेदे सवर्णसंज्ञया भवितव्यम् ।।

कुत एतत् ?

भेदाधिष्ठाना हि सवर्णसंज्ञा, यदि हि यत्र सर्वं समानं तत्र स्यात्सवर्णसंज्ञावचनमनर्थकं स्यात् ।।

विमला – किं सतीति । किमित्यव्ययं कस्मिन् सतीत्यर्थः ।

(सिद्धान्तिन आक्षेपभाष्यम्)

यदि तर्हि – 'सति भेदे किञ्चित्समानम्' इति कृत्वा सवर्णसंज्ञा भविष्यति । शकारच्छकारयोः षकारठकारयोः सकारथकारयोः सवर्णसंज्ञा प्राप्नोति । एतेषां हि सर्वमन्यत्समानं करणवर्जम् ।।

(एकदेशिसमाधानभाष्यम्)

एवं तर्हि – प्रयतनमेव प्रयत्नः । तदेव हि तद्धितान्तमास्यम् । न त्वयं द्वन्द्वः – 'आस्यं च प्रयत्नश्च आस्यप्रयत्न'मिति ।

किं तर्हि ?

त्रिपदोऽयं बहुव्रीहिः - 'तुल्य आस्ये प्रयत्न एषा'-मिति ।

(समाधानान्तरभाष्यम्)

अथवा पूर्वस्तत्पुरुषस्ततो बहुव्रीहिः – तुल्य आस्ये तुल्यास्यस्तुल्यास्यः प्रयत्न एषामिति ।।

(परिहारभाष्यम्)

अथवा परस्तत्पुरुषस्ततो बहुव्रीहिः – 'आस्ये प्रयत्न आस्यप्रयत्नः, तुल्य आस्यप्रयत्न एषा'मिति ।।

विमला – उदात्तादीनां सवर्णसंज्ञोपपत्तये प्रारम्भो यत्नोऽस्येति क्लिष्टकल्पनामपेक्ष्य लाघवाय चैकदेशिना क्रमेण त्रयः पक्षाः समुपस्थापिताः । त्रिष्वपि पक्षेषु **आस्ये भवमित्यास्यमिति** क्लिष्टव्याख्यायां गौरवम् । **तुल्यः आस्ये प्रयत्नः एषामिति** त्रिपदबहुव्रीहिपक्षे आस्ये प्रयत्नः आस्यप्रयत्नः तुल्यः आस्यप्रयत्नः एषामिति परस्ततपुरुष-स्ततो बहुव्रीहिरिति पक्षे च स्थाने तुल्यत्वलाभायास्यपदसामर्थ्यकल्पनायां गौरवम् । त्रिपदबहुव्रीहिपक्षे सप्तम्यन्तस्य पूर्वनिपातापत्तिश्च । तुल्यः आस्ये तुल्यास्यः, तुल्यास्यः प्रयत्नः एषामिति पूर्वस्ततपुरुषस्ततो बहुव्रीहिरिति पक्षे मयूरव्यंसकादित्वम्प्रकल्प्यैव समास उपपादनीयः । किञ्चौत्सर्गिकस्य ततपुरुषे उत्तरपदार्थप्राधान्यस्य त्यागश्चेत्यगतिक-गतित्वमिति दूषणग्रस्तत्वात्त्रयाणामपि पक्षाणामेकदेशयुक्तत्वमवधेयम् ।

इति तुल्यास्यप्रयत्नशब्दार्थनिरूपणम् ।।

(अथानिष्टसावर्ण्यनिराकरणाधिकरणम्)

(१४२-आक्षेपवार्तिकम् - ३)

॥॥ तस्य ॥*॥*

(भाष्यम्)

तस्येति तु वक्तव्यम् ।।

किं प्रयोजनम् ?

यो यस्य तुल्यास्यप्रयत्नः स तस्य सवर्णसंज्ञो यथा स्यात्, अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञो मा भूत् ।

(१४३-समाधानवार्तिकम्-४)

//*// *तस्याऽवचनं वचनप्रामाण्यात्* //*//

(भाष्यम्)

तस्येति न वक्तव्यम् ।।

अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः कस्मान्न भवति ?

'वचनप्रामाण्यात्' । सवर्णसंज्ञावचनसामर्थ्यात् । यदि हि अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः स्यात् । सवर्णसंज्ञावचनमनर्थकं स्यात् ।।

(१४४-समाधानान्तरवार्तिकम्-५)

//*// *संबन्धिशब्दैर्वा तुल्यम्* //*//

(भाष्यम्)

संबन्धिशब्दैर्वा पुनस्तुल्यमेतत् । तद्यथा — संबन्धिशब्दाः "मातरि वर्तितव्यम्" "पितरि शुश्रूषितव्यम्" इति । न चोच्यते – 'स्वस्यां मातरि' 'स्वस्मिन्पितरि' इति । संबन्धाच्चैतद्गम्यते — 'या यस्य माता, यश्च यस्य पिते'ति ।। एवमिहापि "तुल्यास्य प्रयत्नं सवर्णम्" इत्यत्र संबन्धिशब्दावेतौ तत्र संबन्धादेतद्गन्तव्यम् – 'यत्प्रति यत्तुल्यास्यप्रयत्नं तत्प्रति तत्सवर्णसंज्ञं भवती'ति ।।

(ऋलृवर्णयोः सावर्ण्याधिकरणम्)

(१४५-आक्षेपवार्तिकम्-६)

।।*।। ऋकारलृकारयोः[1] सवर्णविधिः ।।*।।

(भाष्यम्)

ऋकारलृकारयोः सवर्णसंज्ञा विधेया । होतृ लृकारः होतृकार इति ।।

किं प्रयोजनम् ?

"अकः सवर्णे दीर्घः" इति दीर्घत्वं यथा स्यात् ।।

(सावर्ण्यखण्डनभाष्यम्)

नैतदस्ति प्रयोजनम् । वक्ष्यत्येतत् – सवर्णदीर्घत्वे "ऋति ऋ वा वचनम्" "लृति लृ वा वचनम्" इति ।।

विमला – ऋति ऋ वा वचनमिति । अत्र वा शब्दः समुच्चयार्थकः, दीर्घ इत्यनुवर्तते, तथा च ऋति परे पूर्वपरयोः स्थाने ॠः दीर्घश्चादेशः, एवम् लृति परे पूर्वपरयोः स्थाने लृः दीर्घश्चादेश इति वाक्यार्थबोधे निष्पन्ने लृकारस्य दीर्घस्याभावादृकारस्थाने आन्तरताम्यादृकार एव दीर्घो भविष्यतीति होतृकार इत्यस्य सिद्धौ ऋकारलृकारयोः सवर्णसंज्ञा विधानमनर्थकमिति भावः ।

(सावर्ण्यमण्डनभाष्यम्)

तत्सवर्णे यथा स्यात् । इह मा भूद् – दध्य्लृकारः मध्व्लृकार इति ।।

विमला – तत्सवर्णे यथा स्यादिति । अयम्भावः, ऋलृवर्णयोः सावर्ण्या विधाने '**ऋति ऋवा**' '**लृति लृवे**' त्युभया त्राप्यनग्व्यावृत्त्यर्थमकोऽनुवृत्तावप्ययोग्यत्वादुत्तर-वार्तिके सवर्ण इत्यस्यानुवृत्तिर्न स्यादिति । दध्य्लृकारो मध्व्लृकार इत्यत्रापि '**लृति लृवे**' त्यादेशापत्तिरिति '**ऋति ऋवा**' '**लृति लृवेति**' वचनद्वयं कुर्वतापि ऋकार-लृकारयोः सवर्णसंज्ञा वक्तव्या, एवञ्च **लृति लृवे**त्यादौ सवर्ण इत्यनुवृत्तौ दध्य्लृकार इत्यादौ नापत्तिरिति ।

---

१. 'ऋकारलृवर्णयोः' इति पाठभेदः ।

(सावर्ण्यखण्डनभाष्यम्)

यदेतत्सावर्णदीर्घत्वे 'ऋती'ति, एतदृत इति वक्ष्यामि ।। ततः — "लृतिः" । लृकारे परत लृकारो वा भवतीति । 'ऋत' इत्येव ।।

विमला – ऋत इति वक्ष्यामीति । **ऋति ऋवेत्यत्र ऋतीत्यपनीय ऋत** इति पञ्चम्यन्तः पठनीयः, सवर्ण इति चानुवर्तते । तेन धात्रंश इत्यादौ नातिप्रसङ्गः । लृति लृवेत्युत्तरवार्तिके ऋत इत्यनुवर्तते, सवर्ण इति निवृत्तम् । तेन दध्य्लृकारादौ नातिप्रसङ्ग इति ऋकारलृकारयोः सवर्णसंज्ञाविधानं विफलमिति भावः ।

(सावर्ण्यविधिस्थापनभाष्यम्)

तन्न वक्तव्यं भवति ।।

विमला – तन्नवक्तव्यमिति । ऋलृवर्णयोः सावर्ण्यविधाने होतृ लृकार इत्यादौ **'अकः सवर्णे दीर्घः'** इत्यनेनैव कदाचिद्विवृतस्य ऋकारस्य स्थाने विवृतः, कदाचित् लृकारान्तरतमो लकारद्वयगर्भ ईषत्स्पृष्टो दीर्घो भविष्यतीति रूपद्वयस्य सिद्धौ **लृति लृवेति** वचनं नारम्भणीयमिति भावः ।

(सावर्ण्यविधिखण्डनभाष्यम्)

अवश्यं तद्वक्तव्यम् । 'ऊकालोज्झ्रस्वदीर्घप्लुतसंज्ञो भवति' इत्युच्यते । न च ऋकार लृकारो वाऽजस्ति ।।

विमला – ऋकारः लृकारो वाऽजस्तीति । अस्येषत्स्पृष्ट इत्यादिः । ईषत्स्पृष्टस्य ऋकारस्य लृकारस्य वाऽच्त्वाभावेन दीर्घत्वाभावाद्दीर्घशब्देन तयोर्विधानं न सम्भवतीति । ऋलृवर्णयोः सवर्णसंज्ञावादिनापि **'ऋति ऋवा' 'लृति लृवे'**ति वार्तिकद्वयं वक्तव्यमिति सवर्णसंज्ञावचनमनर्थकमिति भावः ।

(सावर्ण्यविधिमण्डनभाष्यम्)

ऋकारस्य लृकारस्य चाऽच्त्वं वक्ष्यामि ।। तच्चावश्यं वक्तव्यम् । प्लुतो यथा स्यात् । होतृ ऋकारः होतृकारः । होतृ३कारइति । होतृ लृकारः होत्लृकारः । होत्लृ३कार इति ।।

विमला – तच्चावश्यमिति । '**ऋति ऋवा**' '**लृति लृवे**'ति वार्तिकद्वयकरणेऽपि ईषत्स्पृष्टयोस्तयोरच्त्वं वक्तव्यम्, अन्यथा तयो: प्लुतसंज्ञा न स्यात्, किञ्च प्लुतसंज्ञासिद्ध्यर्थमेव सवर्णग्रहणार्थमण्सु पाठ: कर्तव्य: । तत्र पाठे कृते तु त्रिमात्रयोरपि ग्रहणात्प्लुतसंज्ञायां सत्यां पक्षे ईषत्स्पृष्टौ प्लुतौ भवत: । एवञ्च '**ऋति ऋवा**' '**लृति लृवे**'ति वचनद्वयं मास्तु, तद्विधेययोरपि दीर्घतया '**अक: सवर्णे दीर्घ**' इत्येव सिद्धेरिति भाव: ।

(आक्षेपभाष्यम्)

किं पुनरत्र ज्याय: ?

विमला – उभयथापीष्टनिर्वाहे किमङ्गीकरणीयमिति तटस्थ: पृच्छति – **किम्पुनरत्र ज्याय** इति । न च ऋलृवर्णयो: सवर्णसंज्ञाविधाने षाष्ठवार्तिकद्वयं न कर्त्तव्यमिति सवर्णसंज्ञाविधानपक्षे लाघवस्य स्पष्टत्वात्, किम्पुनरत्र ज्याय इत्याक्षेपोऽसङ्गत इति वाच्यम् । **ऋति ऋवे**ति वार्तिकस्य सावर्ण्यवचनाभावेऽपि प्रत्याख्यानसम्भवेनोत्तरवार्तिक-प्रत्याख्यानमात्रस्यैव सावर्ण्यवचनप्रयुक्तत्वेनोभयोस्तुल्यत्वेन **किम्पुनर्ज्याय** इत्याक्षेप-सम्भवात् ।

(समाधानभाष्यम्)

सवर्णसंज्ञावचनमेव ज्याय: । दीर्घत्वं चैव हि सिद्धं भवति । अपि च ऋकारग्रहणेन लृकारग्रहणं संनिहितं भवति । "ऋत्यक:" – खट्वऋश्य: मालऋश्य: । इदमपि सिद्धं भवति — खट्वलृकारी माललृकार इति ।। "वा सुप्यापिशले:" । उपर्कारीयति उपार्कारीयति । इदमपि सिद्धं भवति — उपल्कारीयति उपाल्कारीयति ।।

विमला – दीर्घत्वमिति । हि यतो वचनद्वयं, तत्र दीर्घानुवृत्तिं विनापि दीर्घत्वं सिद्धमेव भवतीत्यर्थ: । सावर्ण्यवचनपक्षे ऋ लृ वर्णयो: सावर्ण्यमात्रं विधेयम् । **लृति लृवे**ति वार्तिकस्वीकारपक्षे तु दीर्घत्वं लृकारश्चेति विधेयद्वयमिति सावर्ण्यवचनपक्षे लाघवमिति भाव: । **इदमपि सिद्धं भवतीति** । लाघवार्थमिव लक्ष्यसिद्ध्यर्थमपि सावर्ण्यवचनमङ्गीकरणीयमिति भाव: ।

(एकदेशिन आक्षेपभाष्यम्)

यदि तर्हि ऋकारग्रहणेन लृकारग्रहणं संनिहितं भवति, — "उरण्रपरः" – लृकारस्यापि रपरत्वं प्राप्नोति ।।

(समाधानभाष्यम्)

लृकारस्य लपरत्वं वक्ष्यामि । तच्चाऽवश्यं वक्तव्यम् । असत्यां सवर्णसंज्ञायां विध्यर्थम् । तदेव सत्यां रेफबाधनार्थं भविष्यति ।।

विमला – लपरत्वं वक्ष्यामीति । '**लृकारस्याण् लपर:**' इति वचनं करिष्यामीत्यर्थ: । **अवश्यं वक्तव्यमिति** । ऋकारलृकारयो: सवर्णसंज्ञासद्भावेऽसद्भावे चेत्यादि: । पक्षद्वये वचनारम्भफलं क्रमेण दर्शयति – **असत्यामिति** । अयं ग्रन्थो रप्रत्याहारवादिकैयटमते नैव संघटते इति सुधीभिराकलनीयम् । अत्र **दाधिमथा**: —

भाष्यकारस्य रप्रत्याहारे संमतौ लृकारस्य रपरत्वे इष्टे '**लृकारस्य रपरत्वं प्राप्नोति**' इत्यत्रानिष्टतासूचकं '**प्राप्नोति**' इति भगवान् भाष्यकारोऽपि नोच्चारयेत् । किं च लपरत्वे सिद्धे 'सिद्धमेव' इत्यनुक्त्वा '**वक्ष्यामि**' इति साधनीयतासूचकं लृटं नो प्रयुञ्जीत ।। इति सिद्धान्तकौमुदीव्याख्यायां दाधिमथ्यां विस्तृतम् ।।

अस्ति रप्रत्याहार इत्यत्र नैव भाष्यकृत: सम्मति: । अत एव "**लृकारस्यापि रपरत्वं प्राप्नोति**" इति पूर्वपक्षिशङ्कापनोदनाय "**लृकारस्य लपरत्वं वक्ष्यामि**" इति सिद्धान्तिना समाहिते "अपूर्ववचनं करिष्यामि" इत्यर्थके लृट्प्रयोग: संगच्छते ।। रप्रत्याहारसत्त्वे तु '**लृकारस्य लपरत्वं भविष्यति**' इत्येव "**मात्रच** इत्येवं **भविष्यति**" इतिवद् भूधातोरेव प्रयोगं कुर्यात् ।। किं च – "**लृकारस्यापि रपरत्वं प्राप्नोति**" इत्याक्षेपमिव "**ऋकारस्य लपरत्वमपि प्राप्नोति**" इत्याक्षेपमपि कुर्यात् ।। तथाऽकरणेन रपदस्य रेफमात्रपरत्वमेव भाष्यसम्मतमिति स्पष्टं प्रतीयते ।। किं च द्वयोरुद्देश्ययोर्द्वयोर्विधेययोश्च सत्त्वे यथासंख्येन, "**स्थानेऽन्तरतम**" सूत्रेण च निर्वाहे "**रपरत्वं प्राप्नोति**" इति शङ्काया एवोत्थानं न संभवति ।। यदि च रप्रत्याहाराज्ञानेन पूर्वपक्ष्युक्ति: संगच्छत इत्युच्यते, तदा "रप्रत्याहारस्याज्ञानं किं,

रप्रत्याहारासत्त्वेन, उत वा "**आदिरन्त्येन**" – इत्येतद्वाक्यार्थानुत्पत्त्या । तत्र "**आदिरन्त्येन**" – इत्येतद्वाक्यार्थज्ञानम् "**अण्**" प्रत्याहारज्ञानाय जातमेवेति रप्रत्याहारज्ञानाय कुतो न प्रभवति, इति रप्रत्याहारस्यासत्त्वमेव तद्बीजम् ।। "**रपरत्वं प्राप्नोति**" "**रेफबाधनार्थं भविष्यति**" इति द्वयोर्भाष्ययोरेकवाक्यतासमवलोकने सूत्रे "र" पदं रेफपरमेवेति प्रतीयते ।। किं च – "र" इत्यस्य प्रत्याहारत्वे लृकारस्य स्थानेऽपि रपरत्वस्येष्टत्वेन "**प्राप्नोति**" इत्यनिष्टतासूचकपद-प्रयोगोऽनुपपन्नः ।। लण् सूत्रस्थाकारस्यानुनासिकत्वे "तुल्यजातीयांस्तुल्य-जातीयेषूपदिशति" इति भाष्यं विरुध्येत ।।

अत एव पूर्वपक्षिणः प्रत्याहारज्ञानाभावेऽपि "**मात्रच् इति नेदं प्रत्ययग्रहणम् । किं तर्हि ? प्रत्याहारग्रहणम्**" "**अनुमः इति नेदमागमग्रहणम् । किं तर्हि ? प्रत्याहारग्रहणम्**", "**तृन् इति नेदं प्रत्ययग्रहणम् । किं तर्हि प्रत्याहारग्रहणम्**" ? "**कृञ् इति नेदं धातुग्रहणम् । किं तर्हि ? प्रत्याहारग्रहणम्**" इत्येवं रीत्यैव सर्वत्र प्रत्याहारग्रहणस्य सिद्धान्तितत्वेन प्रकृतविषये स्वप्रकृतिसिद्धशैलीत्यागेन **रेफबाधनार्थं भविष्यति**" इत्यत्र वर्णाधिकारविहितस्य इफप्रत्यस्य दर्शितत्वेन 'रपरः' इत्यत्र वर्णपरतैव दर्शिता ।। किंच प्रत्याहारपरत्वेन रेफलकारोभयपरकत्वविधाने प्रकृतसूत्रे ऋशब्देन लृकारग्रहणाभावेन केवलस्य ऋवर्णस्य स्थाने प्रसज्यमानस्य अणो रेफलकारान्यतरपरकत्वापत्तिर्निर्बाधा स्यादिति । मनायी मनावीत्यत्रेव कदाचि-त्कृष्णल्धिः' इत्येवमपि रूपापत्तिः स्यात् ।। न च '**ऋलृवर्णयोः सावर्ण्यम्**' इति वार्तिकेन सवर्णसंज्ञायाम् '**अणुदित्सवर्णस्य**' इत्यनेन सवर्णग्रहणेन ऋपदस्य ऋकारलृकारोभयपरत्वेन यथासंख्येन सर्वदोषपरिहारः इति वाच्यम् । अवात्तामित्या-दिसिद्धये अत्यावश्यके वर्णसमाम्नाये जातिपरत्वे "**सवर्णेऽण्ग्रहणमपरिभाष्य-माकृतिग्रहणात्**" इति वार्तिकभाष्यसंमते "**उदित्सवर्णस्य**" इत्येवमेव सूत्रे जातेऽण्ग्रहणाभावे ऋकारेण लृकारग्रहणस्यासंभवात् । अत एव भाष्यकृता ऋकारेण लृकारग्रहणस्योदाहरणं **तपरसूत्रप्रवृत्त्यैव** दर्शितम् । अत एव 'उरण्' सूत्रे ऋकारग्रहणेन लृकारग्रहणस्यासिद्धान्तभूतव्यक्तिपक्षे 'अणुदित्–' इत्येव सूत्रन्यासे संभवेनैवारुच्या '**यदि तर्हि**' इति भङ्ग्या आक्षेपे कृते समाधानं सिद्धान्तिना 'यक्षानुरूपो बलिः' इति न्यायेनैवाभाणीति । "**उपल्कारीयति**" इत्यादिसिद्ध्यर्थम् "**लृकारस्य स्थाने प्रसज्यमानोऽण् लपरः**" इत्यपूर्वं वचनमेव करणीयमिति भाष्यसिद्धान्त इति संक्षेपः इति विचारयन्तु ।

(एकदेशिन आक्षेपभाष्यम्)

इह तर्हि – "रषाभ्यां नो णः समानपदे" इत्यृकारग्रहणं चोदितं मातृणां पितृणामित्येतदर्थम् । तदिहापि प्राप्नोति – 'क्लृप्यमानं पश्ये'ति ।

(प्रतिबन्दीभाष्यम्)

अथाऽसत्यामपि सवर्णसंज्ञायाम् इह कस्मान्न भवति – 'प्रक्लृप्यमानं पश्ये'ति ?

(प्रतिबन्दीसमाधानेनाक्षेपनिरासभाष्यम्)

'चुटुतुलशर्व्यवाये न' इति वक्ष्यामि । अपर आह — 'त्रिभिश्च मध्यमैर्वर्गैर्लशसैश्च व्यवाये न इति वक्ष्यामी'ति । वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्त इति योऽसौ लृकारे लकारस्तदाश्रयः प्रतिषेधो भविष्यति ।।

(सिद्धान्तोपसंहारभाष्यम्)

यद्येवं, नार्थो रषाभ्यां णत्वे ऋकारग्रहणेन । वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्त इति योऽसौ ऋकारे रेफः तदाश्रयं णत्वं भविष्यति ।। (तुल्यास्य प्रयत्नम् ।।९।।)

विमला – नार्थ इति । सवर्णसंज्ञावादिमतेऽपीत्यादिः । **णत्वं भविष्यतीति** । तथा च सवर्णसंज्ञावादिमते महल्लाघवमिति भावः ।

(शकारसावर्ण्यनिषेधनिराकरणम्)

(संज्ञानिषेधसूत्रं परिभाषासूत्रं वा)

नाज्झलौ १।१।१० ।।

विमला – नाज्झलाविति । अज्झल्त्वावच्छेदेन सावर्ण्यनिषेधाय नेदम्, सवर्णसंज्ञाविधानवैयर्थ्यापत्तेः । आरम्भसामर्थ्येन वैकल्पिकत्वकल्पनायामपि लाघवात् । तुल्यास्यप्रयत्नं वेत्येव सिद्धे गौरवस्य दुरुद्धरत्वात् । नाप्यचामज्भिर्हलां हल्भिः

सावर्ण्यमनेन निषिद्ध्यते । **नाज्झलावित्यत्रैव** सूत्रे सवर्णदीर्घस्य **झयोह** इति पूर्वसवर्णादेशस्य च निर्देशात् । किन्तु परिशेषादज्झलोर्मिथः सवर्णसंज्ञा निषिद्ध्यते । यत्तु **नाण् शलावित्येव** कुतो न सूत्रितमिति तन्न, पूर्व-णकारेणात्राण्-प्रत्याहाराश्रयणे कर्तृषट्कमित्याद्य-सिद्ध्यापत्तेः । परणकारेण प्रत्याहाराश्रयणेऽजपेक्षया व्यक्तिगौरवमेव स्यादित्यज्ग्रहणमपनीयाऽण्ग्रहणं क्रियतामिति शंकाया एवाऽयुक्तत्वात् । शलंशे व्यक्तिलाघवात् **नाक्शलावित्येव** सूत्रयितुमुचितमिति तु विभावनीयम् ।

(१४६-आक्षेपवार्तिकम्-१)

॥॥ अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात्*

(तत्र सवर्णलोपे दोषः)[1] *॥*॥*

(आक्षेपवार्तिकाद्यभागव्याख्याभाष्यम्)

अज्झलोः प्रतिषेधे शकारस्य शकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति ॥

किं कारणम् ?

'अज्झल्त्वात्' । अच्चैव हि शकारो हल्च ॥

कथं तावदच्त्वम् ?

'इकारः सवर्णग्रहणेन शकारमपि गृह्णाती'त्येवमच्त्वम् । हल्षु चोपदेशाद्धल्त्वम् ॥

विमला – शकारस्य शकारेणेति । शकारपदं शरामुपलक्षकम्, शरां शर्भिरित्यर्थः । शरतिरिक्तानां केषाञ्चिद्धलामज्ग्रहणेन ग्रहणासम्भवेन केषाञ्चिच्च सत्यपि सवर्णसंज्ञानिषेधे क्षत्यभावेनोपस्थितमपि हलं नोपलक्षयति शकारपदम् । शरस्तु अज्ग्रहणेन ग्रहणसम्भवेन सति च सवर्णसंज्ञानिषेधे (**परश्शतानि**) (**रामष्षष्ठः**) **यशश्शारमित्यादौ** (**झरोझरि**) इत्यस्याप्रवृत्तिरूपदोषसम्भवेन चाक्षेपसाधकवार्तिकस्थशकारपदस्य युज्यते शर उपलक्षकतेत्यवधेयम् ।

---

१. कोष्ठकांश केचिदधिकं पठन्ति ।

(परिशिष्टवार्तिकांशावतरणभाष्यम्)

तत्र को दोषः ?

(१४६-आक्षेपसाधकवार्तिकद्वितीयखण्डम्-१)

॥॥ तत्र सवर्णलोपे दोषः ॥*॥*

(व्याख्याभाष्यम्)

तत्र सवर्णलोपे दोषो भवति — 'परश्शतानि कार्याणि'। 'झरो झरि सवर्णे' इति लोपो न प्राप्नोति॥

(१४७-समाधानवार्तिकम्-२)

॥॥ सिद्धमनच्त्वात् ॥*॥*

(भाष्यम्)

सिद्धमेतत्॥ कथम् ?

अनच्त्वात्॥ कथमनच्त्वम् ?

"स्पृष्टं करणं स्पर्शानाम्"। 'ईषत्स्पृष्टमन्तःस्थानाम्' 'विवृतमूष्मणाम्'॥ ईषदित्येवानुवर्तते॥ 'स्वराणां च विवृतम्'। ईषदिति निवृत्तम्॥

(१४८-समाधानान्तरवार्तिकम्-३)

॥॥ वाक्याऽपरिसमाप्तेर्वा ॥*॥*

(भाष्यम्)

वाक्याऽपरिसमाप्तेर्वा पुनः सिद्धमेतत्॥

किमिदं वाक्यापरिसमाप्तेरिति ?

वर्णानामुपदेशस्तावत्। उपदेशोत्तरकालेत्संज्ञा। इत्संज्ञोत्तरकाल "आदिरन्त्येन सहेता" इति प्रत्याहारः। प्रत्याहारोत्तरकाला सवर्णसंज्ञा। सवर्णसंज्ञोत्तरकालम्

"अणुदित्सवर्णस्य चाप्रत्ययः" इति सवर्णग्रहणम् । एतेन सर्वेण समुदितेन वाक्येनाऽन्यत्र सवर्णानां ग्रहणं भवति । न चाऽत्रेकारः शकारं गृह्णाति ।।

(आक्षेपभाष्यम्)

यथैव तर्हीकारः शकारं न गृह्णाति । एवमीकारमपि न गृह्णीयात् ।।

तत्र को दोषः ? ।

कुमारी ईहते कुमारीहते । "अकः सवर्णे" (इति) दीर्घत्वं न प्राप्नोति ।।

(समाधानभाष्यम्)

नैष दोषः । यदेतद् "अकः सवर्णे दीर्घः" इत्यत्र प्रत्याहारग्रहणं, तत्रेकार ईकारं गृह्णाति ।। शकारं न गृह्णाति ।।

(व्याख्यान्तरभाष्यम्)

अपर आह —

"अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात्" ।

अज्झलोः प्रतिषेधे शकारस्य शकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति ।।

किं कारणम् ?

'अज्झल्त्वात्' । अच्चैव हि शकारो हल्च ।।

कथं तावदच्त्वम् ?

इकारः सवर्णग्रहणेन शकारमपि गृह्णातीत्येवमच्त्वम्, हल्षु चोपदेशाद्धल्त्वम् ।।

तत्र को दोषः ?

"तत्र सवर्ण लोपे दोषः" ।।

तत्र सवर्णलोपे दोषो भवति । 'परश्शतानि कार्याणि' । "झरो झरि सवर्णे" इति लोपो न प्राप्नोति ।।

'सिद्धमनच्त्वात्' ।

सिद्धमेतत् ।। कथम् ?

अनच्त्वात् ।। कथमनच्त्वम् ?

"वाक्यापरिसमाप्तेर्वा" । उक्ता वाक्याऽपरिसमाप्तिः ।।

विमला – अनच्त्वेन वाक्यापरिसमाप्त्या च सावर्ण्यनिषेधाभावमुपपाद्यानच्त्वमेव वाक्याऽपरिसमाप्त्याः साधयितुं पक्षान्तरमुपन्यस्यति – **अपर आहेति** । अस्मिन् व्याख्याने **वाक्यापरिसमाप्तेर्वेति** समुच्चयार्थकवेत्यस्य समर्थनाय सावर्ण्यनिषेध-समुच्चायकं वेति वक्ष्यते, प्रतिज्ञाविकल्पार्थो वा शब्द इति च कैयटेन व्याख्यास्यते । तत्तु न समञ्जसम्, शर्षु सावर्ण्यनिषेधानिषेधयोः फलाविशेषेऽपि दण्डाग्रमित्यादि न सिद्ध्येत्, तदर्थं सूत्रप्रत्याख्यानस्य वाक्यापरिसमाप्तिन्यायस्य वाश्रयणे आवश्यके शरां शर्भिः सावर्ण्याभावाभ्युपगमो निर्मूल एवेत्यपरितोषात् – **अपर आहेत्युक्तमित्यवधेयम्** ।

इति पण्डितमहेशझाशर्म्म - विरचितायाम् महाभाष्यव्याख्यायां विमलाख्यायां प्रथमाध्यायस्य प्रथमपादे चतुर्थमाह्निकम् ।

(आक्षेपभाष्यम्)

अस्मिन्पक्षे --- 'वे'त्येतदसमर्थितं भवति ।।

(समाधानभाष्यम्)

एतच्च समर्थितम् ।।

कथम् ?

अस्तु वा सकारस्य शकारेण सवर्णसंज्ञा, मा वा भूत् ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् – 'परश्शतानि कार्याणि' । "झरो झरि सवर्णे" इति लोपो न प्राप्नोतीति ?

(आक्षेपबाधकभाष्यम्)

मा भूल्लोपः ।।

(आक्षेपसाधकभाष्यम्)

ननु च भेदो भवति — सति लोपे द्विशकारकम्, असति लोपे त्रिशकारकम् ।।

(आक्षेपबाधकभाष्यम्)

नास्ति भेदः, — असत्यपि लोपे द्विशकारकमेव ।।

कथम् ?

विभाषा द्विर्वचनम् ।।

(आक्षेपसाधकभाष्यम्)

एवमपि भेदः । असति लोपे – कदाचिद्द्विशकारकम्, कदाचित् त्रिशकारकम् । सति लोपे – द्विशकारकमेव ।।

(तटस्थाक्षेपभाष्यम्)

स एष कथं भेदो न ?

(तटस्थाक्षेपनिरासभाष्यम्)

स्याद् भेदो यदि नित्यो लोपः स्यात् । विभाषा तु स लोपः ।।

(समाधानभाष्यम्)

यथाऽभेदस्तथास्तु ।। (नाज्झलौ ।।१०।।)

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये

प्रथमाध्यायस्य प्रथमे पादे चतुर्थमाह्निकम् ।।४।।

अथ पञ्चमाह्निकम्

(अथ प्रगृह्यसंज्ञाप्रकरणम्)

(प्रगृह्यसंज्ञासूत्रम्)

ईदूदेद्द्विवचनं प्रगृह्यम् ।।१।१।११।।

(अथ तपरपाठप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थमीदादीनां तपराणां प्रगृह्यसंज्ञोच्यते ?

(समाधानभाष्यम्)

"तपरस्तत्कालस्य" इति तत्कालानां सवर्णानां ग्रहणं यथा स्यात् ।। केषाम् ?

उदात्तानुदात्तस्वरितानाम् ।।

विमला - तत्कालानां सवर्णानां ग्रहणं यथा स्यादिति । वृत्तिकारास्तु तपरकरणमसंदेहार्थम्, अन्यथा यणादेशे कृते ह्रस्वस्यायं निर्देश इत्यपि सम्भाव्येत । ततश्चाकुर्वह्यत्रेत्यादावतिप्रसङ्गः स्यात् । व्यक्तिः पदार्थो भेदकाश्च गुणा इति पक्षमाश्रित्य गुणान्तरयुक्तानां संग्रहार्थं तपरकरणमिति मतेऽपि तात्पर इति पञ्चमी समासस्यापि स्थितत्वादूदेतोस्तपरकरणस्याऽसन्देहार्थत्वस्यैवाभ्युपगन्तव्यतया ऐक्यरूप्यार्थमी-दंशेऽप्यसन्देहार्थत्वमेव युक्तमिति वदन्ति । एतस्मिन् पक्षेऽपि घटायोन्मीलितचक्षुषा पटदर्शनवदसन्देहाय क्रियमाणमपि तपरकरणं प्लुतं व्यावर्तयेदेवेत्यवधेयम् ।

(भाष्यम्)

अस्ति प्रयोजनमेतत् ?

किं तर्हीति ।।

(१४९-आक्षेपवार्तिकम्-१)

।।*।। प्लुतानां तु प्रगृह्यत्वाऽप्रसंगोऽतत्कालत्वात् ।।*।।

(भाष्यम्)

प्लुतानां तु प्रगृह्यसंज्ञा न प्राप्नोति ।।

किं कारणम् ?

'अतत्कालत्वात्' । न हि प्लुतास्तत्कालाः ।।

(आक्षेपबाधकभाष्यम्)

असिद्धः प्लुतः । तस्याऽसिद्धत्वात्तत्काला एव भवन्ति ।।

(आक्षेपसाधकभाष्यम्)

सिद्धः प्लुतः स्वरसन्धिषु ।।

कथं ज्ञायते—'सिद्धः प्लुतः स्वरसंधिषु'–इति ? यदयं "प्लुतः प्रकृत्या" इति प्लुतस्य प्रकृतिभावं शास्ति ।।

कथं कृत्वा ज्ञापकम् ?

सतो हि कार्यिणः कार्येण भवितव्यम् ।।

विमला- स्वरसन्धिष्विति । स्वरसन्धिप्रकरणेष्वित्यर्थः । **प्लुतस्य प्रकृतिभावं शास्तीति** । प्लुतमुद्दिश्य प्रकृतिभावविधानसामर्थ्यादित्यर्थः । यत्तु असिद्धत्वादेव प्लुतस्य सन्धिकार्याप्राप्तौ प्लुतस्य प्रकृतिभावविधानसामर्थ्यात्स्वरसन्धिप्रकरणेषु नासिद्धत्वमिति तन्न, **सतो हि कार्यिण** इत्यनुपदवक्ष्यमाणभाष्यविरोधात् । न च प्रकृतिभावस्य स्वरसन्धिप्रकरणानन्तर्गतत्वेन स्वरसन्धिप्रकरणेषु प्लुतस्य सिद्धत्वेऽपि प्रकृतिभावम्प्रत्यसिद्धत्वानपायान्नैतज्ज्ञापनं सुवचमिति वाच्यम्, सन्निहितसापेक्ष-शास्त्रसमुदायस्यैव प्रकरणतया प्रकृतिभावस्यापि स्वरसन्ध्यपवादत्वेन सापेक्षतया सन्निहिततया च स्वरसन्धिप्रकरणान्तर्गतत्वात् ।

(ज्ञापनप्रयोजन-जिज्ञासाभाष्यम्)

किमेतस्य ज्ञापने प्रयोजनम् ?

विमला - किमेतस्येति । स्वरसन्धिप्रकरणविषयत्वेन ज्ञापनस्य किम्प्रयोजनमित्यर्थः ।

(लाघवमूलकतत्समाधानभाष्यम्)

'अप्लुतादप्लुत' इत्येतन्न वक्तव्यं भवति ।।

(आक्षेपबाधकभाष्यम्)

किमतो—यत्सिद्धः प्लुतः स्वरसन्धिषु, संज्ञाविधावसिद्धः । तस्याऽसिद्धत्वात्तत्काला एव भवन्ति ।।

विमला - किमत इति । स्वरसन्धिषु प्लुतः सिद्धोऽतः किम् ? यत्—यतः संज्ञाविधावसिद्ध इत्यन्वयः ।

(आक्षेपसाधकभाष्यम्)

संज्ञाविधौ च सिद्धः ।

कथम् ?

"कार्यकालं हि संज्ञापरिभाषम्" यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्, "प्रगृह्याः प्रकृत्या" इत्युपस्थितमिदं भवति – "ईदूदेद्द्विवचनं प्रगृह्यम्" इति ।।

(आक्षेपबाधकभाष्यम्)

किं पुनः प्लुतस्य प्रगृह्यसंज्ञावचने प्रयोजनम् ?

(आक्षेपसाधकभाष्यम्)

प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात् ।।

(आक्षेपबाधकभाष्यम्)

मा भूदेवम् । प्लुतः प्रकृत्येत्येत्वं भविष्यति ।।

(आक्षेपसाधकभाष्यम्)

नैवं शक्यम् । उपस्थिते हि दोषः स्यात् — "अप्लुतवदुपस्थिते" इति । अत्र पठिष्यति ह्याचार्यः— 'वद्वचनं प्लुतकार्यप्रतिषेधार्थम् । प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसङ्गोऽन्येन विहितत्वाद्' इति । तस्मात्प्लुतस्य प्रगृह्यसंज्ञैषितव्या । प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात् ।।

विमला - प्लुतकार्यप्रतिषेधार्थमिति । फलितार्थकथनमिदम् । अप्लुतवदित्यनेन प्लुतसादृश्यविधानस्यैव शब्दमर्यादया लाभात् । अप्रगृह्यप्लुतस्याप्लुतसादृश्य-विधानेऽप्लुतविधाने वा विशेषाभावात्प्रगृह्यप्लुते वद्ग्रहणफलं दर्शयति— **प्रगृह्यप्लुतेति** । भाविप्रगृह्यसंज्ञकप्लुतप्रतिषेधप्रसङ्ग इति शाब्दोऽर्थः । प्रगृह्यसंज्ञया प्रकृतिभावेऽप्लुतविधाने प्लुतस्य श्रवणं न स्यात् । अप्लुतवद्विधाने तु प्लुतस्य श्रवणं भवतीति वैषम्यमस्तीति भावः । नन्वप्लुतवद्भावेन सूत्रस्यैकत्वात् प्लुताश्रयस्येव प्रगृह्याश्रयस्यापि प्रकृतिभावस्य निवृत्तिः स्यात् । यद्वा प्रकृतिभावत्वेन तस्यैक्यात् तत्प्रकृतिभावस्यापि प्लुत-कार्य्यत्वान्निवृत्तिः स्यात् । यद्वा तस्य निषेधेऽपि प्रगृह्याश्रयप्रकृतिभावं परत्वाद्बाधित्वाऽ-प्लुतवद्भावे तस्यापि निवृत्तिः स्यात्तथाच दीर्घादिकं स्यादत आह— **अन्येनेति** । **प्रगृह्यः प्रकृत्येति** । लक्षणान्तरेणेत्यर्थः । प्रथमद्वितीयप्रश्नयोरेवेदमुत्तरम् । अन्त्यस्य तु इति शब्दसापेक्षाप्लुतवद्भावापेक्षया वर्णमात्रापेक्षप्रकृतिभावस्यान्तरङ्गतया न दोष इत्युत्तरम्बोध्यम् ।

(आक्षेपबाधकरीत्यन्तर-निराकरणभाष्यम्)

यदि पुनर्दीर्घाणामतपराणां प्रगृह्यसंज्ञोच्येत, एवमप्येकार एव एकः सवर्णान्गृह्णीयाद्, ईकारोकारौ न गृह्णीयाताम् ।।

किं कारणम् ?

अनण्त्वात् ।।

विमला - प्लुतसंग्रहार्थं प्रकारान्तरं सम्भाव्य पूर्वपक्ष्येव निराकरोति – **यदिपुनरिति** । **दीर्घाणामिति** । एवञ्च दीर्घोच्चारणप्रयत्नाधिक्याद्ध्रस्वानां न भविष्यतीति भावः । **अतपराणामिति** । तथा च प्लुतानामपि भविष्यतीति भावः । **गृह्णीयादिति** । तस्याण्त्वादिति भावः । **न गृह्णीयातामिति** । जातिपक्षादरेऽपि ह्रस्वानां प्रगृह्यसंज्ञावारणम् लाघवाय ह्रस्व एव प्रयोक्तव्ये गुरुदीर्घोच्चारणेन दीर्घ व्यक्तेर्जातौ विशेषणतया विवक्षाद्वारैवेति वक्तव्यम्, एवञ्च दीर्घव्यक्तिविशिष्टायाः जातेः ह्रस्वव्यक्ताविव प्लुतव्यक्तावप्यभावेन प्लुतानां संग्रहो दुर्लभ एवेत्यवधेयम् ।

(आक्षेपबाधकरीत्यन्तरनिराकरणभाष्यम्)

यदि पुनर्ह्रस्वानामतपराणां प्रगृह्यसंज्ञोच्यते ?

नैवं शक्यम् । इहापि प्रसज्येत—अकुर्वहि अत्र, अकुर्वह्यत्रेति ॥

विमला - पूर्वपक्ष्येव पुनरन्यामपि तटस्थकरणीयां शंकां सम्भाव्य निराचष्टे—**यदि पुनर्ह्रस्वानामिति** ।

(आक्षेपोपसंहारभाष्यम्)

तस्माद्दीर्घाणामेव तपराणां प्रगृह्यसंज्ञा वक्तव्या । दीर्घाणां चोच्यमाना प्लुतानां न प्राप्नोति ॥

विमला - पूर्वपक्षी स्वाक्षेपमुपसंहरति—**तस्माद्दीर्घाणामेवेति** ।

(समाधानभाष्यम्)

एवं तर्हि किं न एतेन यत्नेन यत् – 'सिद्धः प्लुतः स्वरसंधिषु' इति । असिद्धः प्लुतः । तस्याऽसिद्धत्वा-त्तत्काला एव भवन्तीति ॥

विमला - सिद्धान्ती समाधत्ते—**एवन्तर्हीति** । **असिद्धः प्लुतः स्वरसन्धिष्विति** । नचाऽस्मिन्पक्षे वक्ष्यमाणरीत्या प्रकृतिभावस्य कथञ्चिदुपपादनेऽपि **दण्ड आढकमित्यादौ** प्लुतस्य दीर्घादिना निवृत्तिर्न स्यात् प्लुतस्यासिद्धतया द्विमात्रे एव कार्यप्रवृत्तेरिति वाच्यम्, शास्त्रासिद्धत्वाश्रयणेन प्लुते जातेऽपि शास्त्रेऽसिद्धत्वेन तत्प्रवृत्तिबुद्ध्यभावेन

प्लुतबुद्ध्यभावात्स्थानिबुद्ध्यैव प्लुतस्यादेशेन प्लुतनिवृत्तिसिद्धेः । केवलं प्लुतो मयाऽपह्रियते इति बुद्धिः परं दीर्घादिशास्त्रस्य नास्तीत्यवधेयम् ।

(आक्षेपभाष्यम्)

कथं यत्तज्ज्ञापकमुक्तम्–"'प्लुतप्रगृह्या अचि' इति ?"

(समाधानभाष्यम्)

'प्लुतभावी प्रकृत्ये'त्येवमेतद्विज्ञायते ।।

विमला - प्लुतभावीति । प्लुतशब्देन लक्षणया प्लुतभाविनो ग्रहणमिति भावः । न चैवं सति लक्षणैव दोष इति वाच्यम्, श्रुतार्थापत्तिमूलकवाक्यान्तरकल्पनापेक्षायां लक्षणायामेव लघुत्वादित्यवधेयम् ।

(आक्षेपभाष्यम्)

कथं यत्तत्प्रयोजनमुक्तम् ?

विमला - तटस्थः पूर्वपक्ष्युक्तप्रयोजनस्य का गतिरिति पृच्छति—**कथं यत्तत्प्रयोजनमिति** । **अप्लुतादप्लुत** इत्येतन्न वक्तव्यमिति लाघवरूपमित्यर्थः ।

(समाधानभाष्यम्)

क्रियते तन्न्यास एव—"अप्लुतादप्लुते" इति ।।

विमला - सिद्धान्ती इष्टापत्त्या तत्प्रयोजनं खण्डयति । **क्रियते एतन्न्यास एवेति** । **सिद्धः प्लुतः स्वरसन्धिष्विति** ज्ञापनापेक्षया लाघवात् प्लुतशब्दस्य प्लुतभाविनि लक्षणाकृते **पश्चादप्लुतादप्लुते** इति न्यासकरणेऽपि फलमुखगौरवस्यादोषत्वान्न क्षतिरिति भावः ।

(आक्षेपभाष्यम्)

एवमपि यत्सिद्धे प्रगृह्यकार्यं तत्प्लुतस्य न प्राप्नोति– "'अणोऽप्रगृह्यस्यानुनासिकः' इति ।।

विमला - एवमपीति । पूर्वपक्ष्युक्तज्ञापकनिराकरणेऽपीत्यर्थः । **यत्सिद्ध इति** । यत्प्रगृह्यकार्यदृष्ट्या प्लुतः सिद्धस्तत्प्रगृह्यकार्यं प्लुतस्य न प्राप्नोतीत्यर्थः ।

(समाधानभाष्यम्)

एवं तर्हि किं न एतेन यत्नेन—'कार्यकालं संज्ञापरिभाषम्' इति । यथोद्देशमेव संज्ञापरिभाषम् । अत्र चाऽसावसिद्धः । तस्याऽसिद्धत्वात्तत्काला एव भवन्ति ।।

विमला - तत्काला एव भवन्तीति । अग्नी इत्यत्र कार्यकालपक्षे '**अणोऽप्रगृह्ये**'-त्यनुनासिकस्य दुर्वारतया यथोद्देशपक्षस्यैवाऽभ्युपगन्तव्यतया तत्र पक्षे संज्ञाशास्त्रस्य स्वदेशस्थत्वेन स्वरसन्धिप्रकरणान्तर्गतत्वेन स्वरसन्धिप्रकरणेषु प्लुतस्य सिद्धत्वज्ञापनेऽपि संज्ञां प्रत्यसिद्धत्वानपायात् तत्काला एव भवन्तीति न प्लुतासंग्रहो दोष इति भावः । यत्तु यथोदेशपक्षे प्लुतात्प्रागेव संज्ञा प्रवृत्तौ ततः प्लुते कृते तमेव द्विमात्रत्वेन पश्यन्त्या अपि संज्ञायाः '**लक्ष्ये लक्षणस्ये**' ति न्यायविरोधेन पुनः प्रवृत्तौ बीजाभावेन यथोद्देशपक्षेऽपि '**ई ई ३ द, ऊ ऊ ३ दि**' ति दीर्घात्परभागे प्लुतप्रश्लेषेणैव प्लुतसंग्रहः कार्य इति कार्यकालपक्षेऽपि तथान्यासेन प्लुतसंग्रहः सम्भवतीति कार्यकालपक्षम्विहाय यथोद्देशपक्षाश्रयणं निर्य्युक्तिकमिति तन्न फलानुरोधिन्याः प्रगृह्यसंज्ञायाः प्लुतात्प्राक् प्रवृत्त्यभावेन यथोद्देशपक्षे गुरुभूतन्यासानाश्रयणात् ।

(इति तपरप्रयोजननिरूपणम्)

(अथ अर्थनिर्णयार्थविचारः)

(अथ द्विवचनविशेषणताविचारभाष्यम्)

कथं पुनरिदं विज्ञायते—ईदादयो यद् द्विवचनम् इति, आहो स्विदीदाद्यन्तं यद्द्विवचनमिति ।।

(विशेषजिज्ञासाभाष्यम्)

कश्चात्र विशेषः ? ।

(१५०-प्रथमपक्षे दोषप्रदर्शकवार्तिकम् - २)

।।*।। ईदादयो द्विवचनं प्रगृह्या इति चेदन्त्यस्य विधिः ।।*।।

(भाष्यम्)

ईदादयो द्विवचनं प्रगृह्या इति चेद् अन्त्यस्य प्रगृह्यसंज्ञा विधेया–पचेते इति, पचेथे इति ।।

(दूषणबाधकभाष्यम्)

वचनाद्भविष्यति ।।

(दूषणसाधकभाष्यम्)

अस्ति वचने प्रयोजनम् ।।

किम् ?

खट्वे इति, माले इति ।।

(द्वितीयपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि—'ईदाद्यन्तं यद्द्विवचनम्' इति ।

(१५१-द्वितीयपक्षे दूषणवार्तिकम्-३)

।।*।। ईदाद्यन्तमिति चेदेकस्य विधिः ।।*।।

(भाष्यम्)

ईदाद्यन्तं द्विवचनमिति[1] चेदेकस्य प्रगृह्यसंज्ञा विधेया–खट्वे इति, माले इति ।।

(१५२-द्वितीयपक्षे समाधानवार्तिकम्-४)

।।*।। न वाऽऽद्यन्तवत्त्वात् ।।*।।

(भाष्यम्)

---

१. क्वचिदिदं नास्ति ।

न वा एष दोषः ।।

किं कारणम् ?

आद्यन्तवत्त्वात् । आद्यन्तवदेकस्मिन्कार्यं भवतीत्येवमेकस्यापि[1] भविष्यति ।।

(पक्षान्तराभ्युपगमभाष्यम्)

अथवा एवं वक्ष्यामि—ईदाद्यन्तं यद्द्विवचनान्तम्-इति ।

(१५३-आक्षेपवार्तिकम्-५)

।।।। ईदाद्यन्तं द्विवचनान्तमिति चेल्लुकि प्रतिषेधः ।।*।।*

(भाष्यम्)

ईदाद्यन्तं द्विवचनान्तमिति चेल्लुकि प्रतिषेधो वक्तव्यः । कुमार्योरगारं कुमार्यगारम् । वध्वोरगारं वध्वगारम् । एतद्धीदाद्यन्तं च श्रूयते, द्विवचनान्तं च भवति प्रत्ययलक्षणेन ।।

(१५४-समाधानवार्तिकम्-६)

।।।। सप्तम्यामर्थग्रहणं ज्ञापकं प्रत्ययलक्षणप्रतिषेधस्य ।।*।।*

(भाष्यम्)

यदयम् "ईदूतौ च सप्तम्यर्थे" इत्यर्थग्रहणं करोति, तज्ज्ञापयत्याचार्यो न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवतीति ।।

---

१. 'भवतीत्येकस्यापि' इत्यपि क्वचित् ।

(आक्षेपभाष्यम्)

तत्तर्हि ज्ञापकार्थमर्थग्रहणं कर्तव्यम् ।।

(समाधानभाष्यम्)

न कर्तव्यम् । ईदादिभिर्द्विवचनं विशेषयिष्यामः, ईदादिविशिष्टेन च द्विवचनेन तदन्तविधिर्भविष्यति– 'ईदाद्यन्तं यद्द्विवचनं तदन्तमीदाद्यन्तम्' इति ।।

(आक्षेपभाष्यम्)

एवमप्यशुक्ले वस्त्रे शुक्ले समपद्येतां शुक्ल्यास्तां वस्त्रे इत्यत्र प्राप्नोति । अत्र हीदादि च द्विवचनं, तदन्तं च भवति प्रत्ययलक्षणेन ।।

(समाधानभाष्यम्)

अत्राप्यकृते शीभावे लुग्भविष्यति ।।

(आक्षेपसाधकभाष्यम्)

इदमिह संप्रधार्यं लुक् क्रियतां, शीभाव इति ।।

किमत्र कर्तव्यम् ?

परत्वाच्छीभावः ।।

(समाधानसाधकभाष्यम्)

नित्यो लुक् । कृतेऽपि शीभावे प्राप्नोत्यकृतेऽपि प्राप्नोति ।।

(आक्षेपसाधकभाष्यम्)

अनित्यो लुग् । अन्यस्याकृते शीभावे प्राप्नो-

त्यन्यस्य कृते[1] । शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । शीभावोऽप्यनित्यः । न हि कृते लुकि प्राप्नोति । उभयोरनित्ययोः परत्वाच्छीभावः । शीभावे कृते लुक् ।।

(आक्षेपदादूर्यदर्शिभाष्यम्)

अथापि कथंचिन्नित्यो लुक्स्यात् । एवमपि दोषः ।। वक्ष्यत्येतत्, 'पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थम्' इति । इदं चापि प्रत्ययग्रहणम् । अयं चापि संज्ञाविधिः । अवश्यं खल्वस्मिन्नपि पक्षे आद्यन्तवद्भाव एषितव्यः ।। तस्मादस्तु स एव मध्यमः पक्षः ।। (ईदूदेत् ०।।११।।)

विमला - स एवेति । आद्यन्तवद्भाववानेवेत्यर्थः । द्वितीयचतुर्थपक्षयोः प्रत्ययांशे तदन्तविधिसत्त्वेन साम्यादभेदमारोप्य द्वितीयस्य मध्यमत्वमुपपादनीयम् ।

(प्रगृह्यसंज्ञासूत्रम्)

अदसो मात् ।।१।१।१२।।

(मूत्वमीत्वयोरसिद्धत्वनिराकरणाधिकरणम्)

(१५५-आक्षेपवार्तिकम्)

।।*।। मात्प्रगृह्यसंज्ञायां तस्यासिद्धत्वादयावेकादेशप्रतिषेधः ।।*।।

(भाष्यम्)

मात्प्रगृह्यसंज्ञायां तस्य ईत्वस्य ऊत्वस्य चाऽसिद्धत्वादयावेकादेशाः प्राप्नुवन्ति, तेषां प्रतिषेधो वक्तव्यः । अमी अत्र, अमू अत्र, अमी आसते, अमू आसाते[2] ।।

---

१. 'अन्यस्य कृते....त्यन्यस्याऽकृते' इत्यपि क्वचित् ।

२. 'अमी अत्र, अमी आसते, अमू अत्र, अमू आसते' इति पाठान्तरम् ।

(आक्षेपबाधकभाष्यम्)

ननु च प्रगृह्यसंज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति ।।

विमला - प्रगृह्यसंज्ञावचनसामर्थ्यादिति । न तावत्प्रगृह्यसंज्ञावचनम् '**संज्ञाम्प्रति मूत्वस्यासिद्धत्वन्ने**'ति ज्ञापयति – तावताप्यायादिकम्प्रत्यसिद्धत्वानपाया-न्मूत्वादिकमसिद्धं कृत्वाऽयादिके कृते संज्ञायाश्चारितार्थ्यासम्भवात् । नाऽपि मूत्वादिकं नासिद्धमिति सामान्यत एवासिद्धत्वाभावं ज्ञापयति – '**नमुने**' इत्यस्य वैयर्थ्यप्रसङ्गात् । किन्तु संज्ञामयादिकञ्च प्रति मूत्वादिकं नासिद्धमित्येव, लघुरूपेण ज्ञापनासम्भवे गुरुरूपेणापि ज्ञापनस्य शरणीकर्त्तव्यत्वात् । एवञ्च पदसंस्कारपक्षे जातस्य मूत्वादेरसिद्धत्वा-भावेनायाद्यप्राप्तौ संज्ञायाश्चारितार्थ्यं जातमित्यवधेयम् ।

(१५५-आक्षेपसाधकवार्तिकद्वितीयखण्डम्-१)

।।।। वचनार्थो हि सिद्धे ।।*।।*

(भाष्यम्)

नेदं वचनाल्लभ्यम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ।।

किम् ?

यत्सिद्धे प्रगृह्यसंज्ञाकार्यं तदर्थमेतत्स्यात्— 'अणोऽप्रगृह्यस्यानुनासिकः'' इति ।।

विमला - कार्यकालपक्षे संज्ञावचनस्य चारितार्थ्यं शङ्कते—**वचनार्थो हीति** । **यत्सिद्धे प्रगृह्येति** । सिद्धे सिद्धकाण्डे इत्यादौ सति यत्प्रगृह्यकार्य्यं यत्कार्य्यदृष्ट्या ईत्वादिकं सिद्धं तदर्थं वचनमित्यर्थः ।

(आक्षेपबाधकभाष्यम्)

नैकं प्रयोजनं योगारम्भं प्रयोजयति । यद्येताव-

त्प्रयोजनं स्यात्तत्रैवायं ब्रूयाद्—"अणोऽप्रगृह्यस्यानुनासिकोऽदसो न[1]" इति ॥

विमला - अदसो नेति । नन्वेतस्मिन्पक्षे हे असुका असुक इत्यत्र सूत्रमतेन सिद्धस्यानुनासिकस्याप्रसङ्ग इति चेन्न, तयोरनभिधानात्सूत्रमतेऽपि तत्रानुनासिकाप्राप्तेः । अदस इत्यावर्त्य न विद्यते दस्य स्थाने सो यस्येति व्याख्यानेन स्वमतेऽपि तत्रानुनासिकं सम्पाद्य फलभेदवारणन्तु न युक्तम्, आवृत्तौ व्याधिकरणबहुव्रीहिकल्पनायाञ्च प्रमाणाभावात् । यत्तु त्यदादीनां सम्बोधनविभक्तिविरहस्यौत्सर्गिकत्वात्तादृशप्रयोगासम्भव इति तन्न, '**अदस औ सुलोपश्च**'त्यत्र सूत्रे भाष्ये '**हे असौ**' इति सम्बोधनदर्शनेन तस्य प्रायिकपरत्वात् । एवञ्च कार्यकालपक्षेऽपि ज्ञापकत्वमुपपन्नमित्यवधेयम् ।

(१५६-समाधानवार्तिकम्-२)

॥*॥ *विप्रतिषेधाद्वा (प्रगृह्यसंज्ञा[2])* ॥*॥

(भाष्यम्)

अथवा प्रगृह्यसंज्ञा क्रियताम् अयादयो वेति । प्रगृह्यसंज्ञा भविष्यति विप्रतिषेधेनेति ॥

विमला - विप्रतिषेधेनेतीति । इति हेतौ, यतो विप्रतिषेधेन प्रगृह्यसंज्ञा भविष्यत्यतोऽयादीनाम्प्रतिषेधो न वक्तव्यः इत्यर्थः ।

(समाधानबाधकभाष्यम्)

नैष युक्तो विप्रतिषेधः । "विप्रतिषेधे परम्" इत्युच्यते ॥ पूर्वा च प्रगृह्यसंज्ञा, परेऽयादयः ॥

(समाधानसाधकभाष्यम्)

परा प्रगृह्यसंज्ञा करिष्यते ॥

(समाधानबाधकभाष्यम्)

---

१. 'अणोऽप्रगृह्यादसोरनुनासिकः' इति सूत्रं कुर्यादित्यर्थः ।

२. क्वचिन्नेदम् ।

सूत्रविपर्यासः कृतो भवति ।।

(समाधानसाधकभाष्यम्)

एवं तर्हि परैव प्रगृह्यसंज्ञा ।।

कथम् ?

“कार्यकालं संज्ञापरिभाषम्” । यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् । “प्रगृह्यः प्रकृत्या” इत्युपस्थितमिदं भवति “अदसो मात्” इति ।

विमला - तर्हीत्यप्यर्थे । एवमपि—सूत्रपिर्यासे कृतेऽपीत्यर्थः ।

(समाधानबाधकभाष्यम्)

एवमप्ययुक्तो विप्रतिषेधः ।।

कथम् ?

द्विकार्ययोगो हि विप्रतिषेधः । न चात्रैको द्विकार्ययुक्तः । एचामयादयः, ईदूतोः प्रगृह्यसंज्ञा ।।

(समाधानसाधकभाष्यम्)

नावश्यं द्विकार्ययोग एव विप्रतिषेधः ।।

किं तर्हि ?

असंभवोऽपि । स चास्त्यत्राऽसंभवः ।।

कोऽसावत्राऽसंभवः ?

प्रगृह्यसंज्ञाऽभिनिर्वर्त्तमाना अयादीन् बाधते, अयादयोऽभिनिर्वर्त्तमानाः प्रगृह्यसंज्ञाया निमित्तं विघ्नन्तीत्येषोऽसंभवः । सत्यसंभवे युक्तो विप्रतिषेधः ।।

(समाधानबाधकभाष्यम्)

एवमप्ययुक्तो विप्रतिषेधः । सतोर्हि विप्रतिषेधो भवति । न चात्रेत्वोत्वे स्तः, नापि मकारः । उभयमप्यसिद्धम् ।।

विमला - एवमपीति । असम्भवस्य विप्रतिषेधविषयत्वस्वीकारेऽपीत्यर्थः । **विप्रतिषेधाद्वा प्रगृह्यसंज्ञेति** वार्तिकस्थप्रगृह्यसंज्ञापदम् प्रगृह्यसंज्ञाप्रयोजकमूत्वादौ लाक्षणिकम् । **विप्रतिषेधा**दित्यस्य, अयादिभ्य इत्यादिः । तथा चायादिभ्यो विप्रतिषेधान्मूत्वादिकमित्यर्थः । अथवा प्रगृह्यसंज्ञापदम्प्रगृह्यसंज्ञाकार्ये प्रकृतिभावे लाक्षणिकम्, तथा चायादिभ्यो विप्रतिषेधात्प्रकृतिभाव इत्यर्थः । अथवा प्रगृह्यसंज्ञापदं यथाश्रुतार्थकमेवेति व्याख्यानत्रयेऽपि विप्रतिषेधबाधकं **सतो र्हीति** भाष्यं सुयोजम् । तथाहि प्रथमपक्षे—सतोरित्यस्य विद्यमानयोरित्यर्थः । तथा च विद्यमानयोर्विप्रतिषेधो भवति । **अत्रेत्वोत्वे नच स्तो नापि मकार इति**— अयादिभ्यो मूत्वादेर्विप्रतिषेधोऽयुक्त इत्यर्थः । द्वितीयपक्षे तु सतोरित्यस्य युगपत्प्राप्तयोरित्यर्थः । तथा च युगपत्प्राप्तयोरेव विप्रतिषेधो भवति । न चात्रेत्वोत्वे स्तो नापि मकारः **पूर्वत्रासिद्धमित्यनेनासिद्धत्वादिति** मूत्वादिभ्यः पूर्वमेवाऽयादेः प्राप्तिः प्रकृतिभावस्य तु मूत्वाद्यनन्तरमिति युगपत्प्राप्त्य- भावेनाऽयादिभ्यः प्रकृतिभावस्य विप्रतिषेधोऽयुक्त इत्यर्थः । तृतीयपक्षेऽपि **सतोरित्यस्यैवमेव** व्याख्यानम् । परन्त्वत्र पक्षे **नचात्रेत्यत्र** प्रगृह्यसंज्ञेत्यध्याहारः (**मकार**) इत्यत्रापि नापीत्यस्याऽऽवृत्तिरितिबोध्यम् ।

(१५७-समाधानसाधकवार्तिकप्रथमखण्डम्-३)

।।*।। आश्रयात्सिद्धत्वं च[1] यथा रोरुत्वे ।।*।।

(भाष्यम्)

आश्रयात्सिद्धत्वं भविष्यति[2] । तद्यथा रोरुत्वे आश्रयात्सिद्धो भवति ।।

विमला - आश्रयासिद्धत्वमिति । इदमपि भाष्यम्पक्षत्रये सुयोजमित्यूहनीयम् । इदमत्रावधेयम्, अयादिभ्यो विप्रतिषेधान्मूत्वादिकमित्यसंगतम्, मूत्वशास्त्रस्य

१. 'च' इति क्वचिन्नास्ति ।

२. इतः परं 'यथा रोरुत्वे' इति लुप्तं स्यात् ।

त्रिपादीस्थतया विप्रतिषेधसूत्राप्रवृत्तेः **'पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्ये'**-ति सिद्धान्तात् । किञ्चायादिकम्प्रति मूत्वादेः सिद्धत्वं ज्ञापयित्वैवायादिभ्यो विप्रतिषेधान्मूत्वादिकमिति वक्तव्यमिति गौरवमतो नागेशेन प्रकृतिभावपरतया प्रगृह्यसंज्ञापदं व्याख्यातम् । संज्ञायाः साक्षादयादिभ्यो विरोधाभावात् स्वकार्य्यप्रकृतिभावद्वारैव विरोधो वक्तव्यः । किञ्च संज्ञायाः कार्यकालत्वमाश्रित्यैव परत्वमुपपादनीयमिति यथोद्देशपक्षे दोषो दुरुद्धरः । यद्यप्येकतरपक्षेण लक्ष्यसिद्धौ पक्षान्तरेण दोषदानमनुचितन्तथापि पक्षद्वयेऽपि नागेशरीत्या दूषणोद्धारसम्भवे एकतरपक्षमाश्रित्य तत्करणे ग्रन्थे न्यूनतापत्तिरतः प्रगृह्यसंज्ञापदस्य यथाश्रुतार्थपरतया वर्णनमपि न साधु, किन्तु **नागेशव्याख्यान**मेव समीचीनमिति प्रतिभाति ।

(समाधानबाधकाक्षेपभाष्यम्)

किं पुनः कारणं रुत्वे आश्रयात्सिद्धो भवति, न पुनर्यत्रैव रुः सिद्धः, तत्रैवोत्वमप्युच्यते ?

(भाष्यम्)

नैवं शक्यम् ॥

(१५७-समाधानसाधकवार्तिकखण्डम्-३)

॥*॥ असिद्धे ह्युत्वे आद्गुणाऽप्रसिद्धिः ॥*॥

(भाष्यम्)

असिद्धे ह्युत्वे आद्गुणस्याऽप्रसिद्धिः स्यात्—वृक्षोऽत्र प्लक्षोऽत्र । तस्मात्तत्राश्रयात्सिद्धत्वमेषितव्यम् । यथा[1] तत्राश्रयात्सिद्धत्वं भवति । एवमिहाप्याश्रयात्सिद्धत्वं[2] भविष्यति ॥

विमला - तस्मादिति । पाठविपर्य्यासेनोपपत्त्यभावादित्यर्थः । तत्र रुत्वे । इहापीति । मूत्वादावपीत्यर्थः ।

---

१. 'तत्र यथाश्रयात्' इति क्वचित् ।

२. 'एवमिहापि भविष्यति' इति पाठभेदः ।

(१५८-समाधानान्तरवार्तिकम्-४)

।।*।। वचनसामर्थ्याद्वा[1] ।।*।।

(भाष्यम्)

अथवा प्रगृह्यसंज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति ।।

विमला - आश्रयात्सिद्धत्वेनायादीन् संज्ञाञ्च प्रति सिद्धत्वमाश्रित्य विप्रतिषेधेनाऽयाद्यभावकल्पनापेक्षया, लाघवादाह—**वचनसामर्थ्याद्वेति** । उद्योतदर्शितदिशा पूर्ववार्तिकस्य व्याख्याने तु वाक्यसंस्कारपक्षे विप्रतिषेधेनाऽनिर्वाहादाह— **वचनसामर्थ्याद्वेति** । अत्र तु वचनसामर्थ्यात्साक्षादेव तदभावः सिद्ध इति भावः । **प्रगृह्यसंज्ञावचनसामर्थ्यादिति** । न चाऽत्र '**ननु च प्रगृह्यसंज्ञावचनसामर्थ्यादि**' ति पूर्वग्रन्थेन कथं न पौनरुक्त्यमिति वाच्यम्, पूर्वोक्तस्य भाष्यकारीयत्वात् ।

(१५९-समाधानान्तरवार्तिकम्)

।।*।। योगविभागाद्वा ।।*।।

(भाष्यम्)

अथ वा योगविभागः करिष्यते । "अदसः"— अदस ईदादयः प्रगृह्यसंज्ञा भवन्तीति[2] । ततो "मात्' — माच्च परे ईदादयः प्रगृह्यसंज्ञा भवन्तीति[2] । अदस इत्येव ।

किमर्थो योगविभागः ?

एको यत्तत्सिद्धे प्रगृह्यकार्यं तदर्थः ।। अपरो यदसिद्धे ।।

---

१. लुप्तं स्यात् ।

२. 'इति' क्वचिन्नास्ति ।

विमला - ननु वचनसामर्थ्यादित्यस्य प्रकृतिभावोपस्थितसंज्ञायां तयोर्निमित्तत्वेनाश्रयणरूपवचनसामर्थ्यादित्युद्योतानुमोदितव्याख्याने कार्यकालपक्षेऽप्यनुनासिकप्रतिषेधेन चारितार्थ्यशङ्कैव नावतरतीति समाधानान्तरं नापेक्षितम्, तथापि तादृशव्याख्यानस्य क्लिष्टतया स्पष्टप्रतिपत्तये आह—**योगविभागाद्वेति** ।

(आक्षेपभाष्यम्)

इहापि[1] तर्हि प्राप्नोति—अमुया अमुयोरिति ॥

किंच स्यात्, यद्यत्र[2] प्रगृह्यसंज्ञा स्यात् ?

प्रगृह्याश्रयः प्रकृतिभावः प्रसज्येत ॥

(आक्षेपनिरासभाष्यम्)

नैष दोषः । पदान्तप्रकरणे प्रकृतिभावः । न चैष पदान्तः ॥

(आक्षेपभाष्यम्)

एवमप्यमुकेऽत्र, अत्रापि प्राप्नोति ॥

(आक्षेपबाधकभाष्यम्)

द्विवचनमिति वर्तते ॥

(आक्षेपसाधकभाष्यम्)

यदि द्विवचनमिति वर्त्तते – अमी अत्र, अत्र न प्राप्नोति[3] ॥

(आक्षेपबाधकभाष्यम्)

एवं तर्हि एदन्तमिति निवृत्तम् ॥

---

१. योगाविभागाङ्गीकारेऽपि ।

२. 'अत्र' इति क्वचिन्न ।

३. 'अमी अत्रेति न' इति पाठान्तरम् ।

(१६०-समाधानान्तरवार्तिकम्-६)

।।*।। मार्थदीदाद्यर्थानां वा ।।*।।

(भाष्यम्)

अथवाऽऽहायम्-"अदसो मात्" इति । न च ईत्वोत्वे स्तः । नापि मकारः । त एवं विज्ञास्यामः- 'मार्थादीदाद्यर्थानाम्'-इति ।।

विमला - योगविभागाश्रयणे गौरवात्समाधानान्तरमाह—**मार्थादीति** ।

(१६१-समाधानान्तरवार्तिकम्-७)

।।*।। उक्तं वा ।।*।।

उक्तं वा[1] । किमुक्तम् ?

'अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे सिद्धे वक्तव्ये प्रगृह्यसंज्ञायां[2] च' इति ।।

विमला - नन्वस्मिन्पक्षेऽपि सूत्रस्थ 'म' पदस्येदूत्पदस्य च लक्षणा कर्त्तव्या । किञ्च प्रदेशस्थप्रगृह्यपदस्य यथाश्रुतार्थकत्वे '**अमी अत्रे**' त्यत्र प्रकृतिभावो न प्राप्नोति तदर्थं तस्य प्रगृह्यस्थानिके लक्षणायाम् '**हरी + एता**' वित्यादौ न प्रवर्तेत । नैकम् प्रगृह्यपदं प्रगृह्यं प्रगृह्यस्थानिकञ्च बोधयितुमीष्टे इत्युभयसंग्रहार्थं तन्त्राद्याश्रयणीयमित्य-तिगौरवमतः समाधानान्तरमाह—**उक्तं वेति** । अस्य '**स्वरितो वे**'ति सूत्रे वार्तिककृतेति शेषः । **सिद्धे वक्तव्ये इति** । एवञ्च पदसंस्कारपक्षे स्वरकार्य्यस्य प्राप्तिरेव नास्ति, वाक्यसंस्कारपक्षे तु विप्रतिषेधसूत्रमेव शरणम् । अत्रोक्तेषु समाधानेषु **वचनसामर्थ्याद्वेति** समाधानमेव साधुतरमित्यवगन्तव्यम् ।

(अनिष्टापत्तिनिवारणाधिकरणम्)

---

१. 'उक्तं वे' ति लुप्तं स्यात् ।

२. वैपरीत्यं क्वचित्, यथा-'प्रगृह्यसंज्ञायां सिद्धे वक्तव्ये' इति । 'च' इति क्वचिन्न । 'सिद्धे वक्तव्ये' इत्यंशस्तु भाष्यकृतो वार्तिकार्थपूर्त्तयेऽध्याहारग्रन्थ इत्यन्ये ।

(१६२-आक्षेपवार्तिकम्-८)

।।।। तत्र सकि दोषः ।।*।।*

(भाष्यम्)

तत्र सककारे दोषो भवति—अमुकेऽत्र ।।

(१६३-समाधानवार्तिकम्-९)

।।।। न वा ग्रहणविशेषणत्वात् ।।*।।*

(भाष्यम्)

न वा एष दोषः ।। किं कारणम् ?

'ग्रहणविशेषणत्वात्' । न माद्ग्रहणेन ईदाद्यन्तं विशेष्यते ।।

किं तर्हि ?ईदादयो विशेष्यन्ते-'मात्परे ये ईदादय'- इति ।। अदसो मात् ।।१२।।

(प्रगृह्यसंज्ञासूत्रम्)

शे ।।१।१।१३।।

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

इह कस्मान्न भवति—काशे, कुशे[1], वंशे इति ?

विमला - इह कस्मान्न भवतीति ।श्रुतानुमितयो: श्रुतसम्बन्धस्य बलीयस्त्वेनेहैव कस्मान्न भवतीत्यर्थ: ।

(१६४-समाधानवार्तिकम्-१)

।।।। शेऽर्थवद्ग्रहणात् ।।*।।*

---

१. 'कृशे' इति क्वचित् ।

(भाष्यम्)

अर्थवतः शेशब्दस्य ग्रहणम् । न चैषोऽर्थवान्[1] ।।

(आक्षेपभाष्यम्)

एवमपि हरिशे, बभ्रुशे इत्यत्रापि प्राप्नोति ।।

(समाधानभाष्यम्)

एवं तर्हि 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव' इत्येवं न भविष्यति ।।

(पूर्वोक्तसमाधानाभ्युपगमभाष्यम्)

अथ वा पुनरस्तु—'अर्थवद्ग्रहणे नानर्थकस्य' इति ।।

कथं तर्हि[2]—हरिशे बभ्रुशे इति ?

एकोऽत्र विभक्त्यर्थेनार्थवान्, अपरस्तद्धितार्थेन । समुदायोऽनर्थकः ।। —शे ।।१३।।

(प्रगृह्यसंज्ञासूत्रम्)

निपात एकाजनाङ् १।१।१४।।

(पदकृत्याधिकरणम्)

(आक्षेपभाष्यम्)

निपात इति किमर्थम् ?

(समाधानभाष्यम्)

चकारोऽत्र जहारोऽत्र ।।

---

१. 'न चायमर्थवान्' इति पाठान्तरम् ।

२. 'तर्हि' इति क्वचिन्न ।

(आक्षेपभाष्यम्)

एकाजिति किमर्थम् ?

(आक्षेपबाधकभाष्यम्)

प्रेदं ब्रह्म । प्रेदं क्षत्रम् ।।

(आक्षेपबाधोपपत्तिभाष्यम्)

एकाजित्यप्युच्यमानेऽत्रापि प्राप्नोति । एषोऽपि ह्येकाच् ।।

(आक्षेपबाधानुपपत्तिभाष्यम्)

एकाजिति नायं बहुव्रीहिः—एकोऽज् यस्मिन् सोऽयमेकाच्[१], एकाजिति ।।

किं तर्हि ?

तत्पुरुषोऽयं समानाधिकरणः— एकः अच् एकाच्[२], एकाजिति ।।

(आक्षेपभाष्यम्)

यदि तत्पुरुषोऽयं[३] समानाधिकरणो, नार्थ एकग्रहणेन ।।

(प्रत्याक्षेपभाष्यम्)

इह कस्मान्न भवति—प्रेदं ब्रह्म । प्रेदं क्षत्रम् ?

(प्रत्याक्षेपबाधकभाष्यम्)

'अजेव यो निपात' इत्येवं विज्ञायते[४] ।।

---

१. 'सोऽयमेकाजिति' पाठान्तरम् ।

२. 'एकोऽजेकाजिति' पाठान्तरम् ।

३. 'अयमि'ति क्वचिन्नास्ति ।

४. क्वचित् 'यो' इति नास्ति, क्वचिद् 'विज्ञास्यते' पाठः ।

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत् ?

(समाधानभाष्यम्)

नहि ?

(आक्षेपभाष्यम्)

कथमनुच्यमानं गंस्यते ?

(समाधानभाष्यम्)

'अज्ग्रहणसामर्थ्यात्' । यदि हि अच्चाऽन्यच्च तत्र स्याद्, अज्ग्रहणमनर्थकं स्यात् ।।

(सामर्थ्यानुपपत्तिभाष्यम्)

अस्ति[१] ह्यन्यदज्ग्रहणस्य प्रयोजनम् ।।

किम् ?

अजन्तस्य यथा स्यात् । हलन्तस्य माभूत् ।।

(सामर्थ्योपपत्तिभाष्यम्)

नैवं दोषो न प्रयोजनम् ।।

(सामर्थ्यानुपपत्तिभाष्यम्)

एवमपि कुत एतत्—द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः "आद्यन्तवदेकस्मिन्" इति "येन विधिस्तदन्तस्य" इति च—इयमिह परिभाषा भविष्यति-"आद्यन्तवदेकस्मिन्" इति । इयं च न भविष्यति-"येन विधिस्तदन्तस्य" इति ?।।

---

१. 'हि' इति क्वचिन्न ।

विमला - एवमपीति । हलन्तस्य संज्ञाव्यावृत्त्यर्थत्वाभावेऽपीत्यर्थः ।

ननु हलन्तस्य संज्ञाव्यावृत्त्यर्थकतया माभूदजिति विशेषणस्य साफल्यं व्यपदेशिवद्भावाऽप्रवृत्तिसम्पादनद्वाराऽज्मात्रस्य संज्ञावारणार्थतया तु तत्स्यादित्याशयेनाऽऽशङ्कते—**कुत एतदिति** । यद्यप्यचो विशेषणत्वे '**येनविधि**'-रिति तदन्तविधावपि व्यपदेशिवद्भावेनाज्मात्रस्यापि संज्ञा दुर्वारैवेत्यज्ग्रहणं व्यर्थं सदचो विशेषणत्वं ज्ञापयतीति विशेष्येण तदन्तविध्यभावादजन्तस्य संज्ञाव्यावृत्तिः फलं सिध्यतीति मतखण्डनाय '**कुत एतदि**' ति भाष्यम्प्रवृत्तम् । तत्र च **येन विधिरि**त्यस्य प्रवृत्तावेव '**आद्यन्तवदि**'त्यस्य प्रवृत्तिरुद्भावितेति '**इयमिह**' **परिभाषा भविष्यति— आद्यन्तवदिति, इयञ्च न भविष्यति येन विधिरिति**' कथनमसंगतन्तथापि यथाऽर्थवादवाक्यसमुदायस्य लक्षणया प्राशस्त्यमात्रार्थकत्वं तथैव '**इयमिह परिभाषा भविष्यति, आद्यन्तवदेकस्मिन्नि**'त्यस्यासहायेऽपि संज्ञा भविष्यतीत्यर्थकत्वम् । '**इयञ्च न भविष्यति येन विधिस्तदन्तस्ये**'त्यस्य तु मुख्यतदन्तस्य न भविष्यतीत्यर्थकत्वमिति नासङ्गतत्वम् । एवञ्चाज्ग्रहणसामर्थ्येन मुख्याजन्तस्यैव संज्ञा भवतु न पुनरसाहायेऽपि संज्ञेति विपरीतं काक्वा व्यज्यत इत्यवधेयम् ।

(सामर्थ्यानुपपत्तिनिराकरणभाष्यम्)

आचार्यप्रवृत्तिर्ज्ञापयति—इयमिह परिभाषा भवति— "आद्यन्तवदेकस्मिन्" इति, इयं च[1] न भवति, "येन विधिस्तदन्तस्य" इति । यदयम्—'अनाङ्' इति प्रतिषेधं शास्ति ।।

विमला - अत्रापि **इदमिहे**त्यादि **येन विधिस्तदन्तस्ये**त्यन्तं पूर्ववदेव व्याख्येयम् ।

अनाङ् इति प्रतिषेधं शास्तीति । **अनाङ्** इति प्रतिषेध सामर्थ्येनाज्ग्रहणेन मुख्याजन्तस्य ग्रहणमिति ज्ञापनासम्भवादचो विशेष्यत्वमित्येव ज्ञापयतीति **येनविधिरि**-त्यस्याप्रवृत्तिः फलतीति भावः । इदमत्रालोच्यताम् । अज्ग्रहणसामर्थ्येन मुख्याजन्तस्य परिग्रहे '**आद्यन्तवदि**'त्यस्य साक्षादेव बाधः । अचो विशेष्यत्वमिति ज्ञापने तु **येनविधिरित्यस्य** प्राप्तिरेव नास्तीति न साक्षाच्छास्त्रबाध इत्यपरमनुकूलमिति ।

---

१. 'च' इति क्वचिन्न ।

(समाधानभाष्यम्)

एवं तर्हि—सिद्धे सति यदज्ग्रहणे क्रियमाणे एकग्रहणं करोति, तज्ज्ञापयत्याचार्यः—'अन्यत्र वर्णग्रहणे जातिग्रहणं भवति' इति ।।

किमेतस्य ज्ञापने प्रयोजनम् ?

'दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात् सिद्धम्' इति यदुक्तं, तदुपपन्नं भवति ।।

विमला - एवन्तर्हीति । अज्ग्रहणमात्रे क्रियमाणे प्रेदमित्यादौ दोषवारणे सिद्धे सतीत्याद्यर्थः ।

तज्ज्ञापयत्याचार्य इति । लाघवादेकाच्पदे-एकः अच् एकाजिति समानाधिकरणे तत्पुरुषे कृते पश्चादेकग्रहणस्य ज्ञापकत्वेऽपि फलमुखगौरवस्यादोषत्वान्न क्षतिः । वस्तुतस्तु अपृक्तसंज्ञायामेकग्रहणस्य 'वर्णग्रहणे जातिग्रहण' मित्यर्थे ज्ञापकत्वं स्वीकृत्य प्रकृतसूत्रे एकग्रहणस्य परित्याग एव ज्यायानिति बहुव्रीहिशङ्कैव नावतरतीति बोध्यम् ।।

(आक्षेपभाष्यम्)

अनाङिति किमर्थम् ?

(समाधानभाष्यम्)

आ उदकान्ताद् ओदकान्तात् ।।

(आक्षेपभाष्यम्)

इह कस्मान्न भवति—आ एवं नु मन्यसे, आ एवं किल तदिति ?

(समाधानभाष्यम्)

सानुबन्धकस्येदमाकारस्य ग्रहणम्, अननुबन्धकश्चात्राऽऽकारः ।।

एवमपि–अगौः गौः समपद्यत गोऽभवद् । अत्र प्राप्नोति ॥

विमला - एवमपीति । वर्णग्रहणेऽपि **लक्षणप्रतिपदो**क्त परिभाषायाः प्रवृत्तिं स्वीकृत्य अदोऽभवदित्यत्र दोषवारणेऽपीत्यर्थः । **अत्र प्राप्नोतीति** । **गमेर्डो** इति निष्पन्नस्यौतः प्रतिपदोक्तत्वादिति भावः । नन्वोदिति वर्णपुरस्कारेण विधीयमाना प्रगृह्यसंज्ञा कथं गौणार्थवृत्तेर्न्न भवेत् । **गौणमुख्यन्यायस्य** तु विशिष्टरूपोपादानविषयत्वात् वर्णग्रहणे न प्रवृत्तिः । न च निपात इति विशिष्टरूपोपादानसत्त्वान्न्यायप्रवृत्तिः स्यादिति वाच्यम्, तस्य शब्दशास्त्रीयसंज्ञात्वेन '**स्वंरूपमि**'त्यस्याप्रवृत्तौ तन्मूलकस्यास्य न्यायस्य सुतरामप्रवृत्तेः । निपातपदस्य निपातपदत्वेनैव चाद्युपस्थापकत्वेन तस्य विशिष्टरूपोपादानत्वाभावाच्च । किञ्चैवं श्वसुरसदृशस्यापत्यमित्यर्थके श्वासुरिरित्यादौ '**अत इञि**' ति न स्यात् प्रातिपदिकपदस्य तादृशस्य सत्त्वात्, निपातपदप्रातिपदिक-पदयोस्तुल्यत्वात् । किञ्च **गौणमुख्यन्यायेन** निपातपदेन च्व्यन्तस्याग्रहणे प्रगृह्यसंज्ञावदव्ययसंज्ञाऽपि तस्य न स्यादिति च्व्यन्तस्य निपातसंज्ञाविधानमपि व्यर्थं स्यात् । किञ्च निपातपदस्य च्व्यन्तत्वावच्छिन्ने शक्तिः तस्य शक्यतावच्छेदकं च्व्यन्तत्वं तस्य स्वसमानाधिकरणगुणसन्धानप्रयोज्यारोपाभावेन स्वशक्यतावच्छेदकसमाना-धिकरणगुणप्रतिसन्धानप्रयोज्य स्वशक्यतावच्छेदकारोपीयविशेष्यताश्रयत्वरूपगौणत्वस्य प्रकृतेऽभावेन न्यायप्रवृत्तेः सर्वथा दुरुपपादतया **गोऽभवदि**त्यादौ दोषो दुरुद्धर इति चेन्न, एतद्भाष्यस्यैकदेश्युक्तत्वेन सिद्धान्ते प्रगृह्यप्रतिषेधवार्तिकस्यैव शरणीकर्त्तव्यत्वात् । अथवा पूर्वसूत्रेऽनाङितिपर्युदासादाङ्सदृशाः प्रतिपदोक्ता एव निपाता गृह्यन्ते । इहाप्यर्थाधिकारेणानाङ् ग्रहणानुवृत्त्या वा तथैव गृह्यन्ते इति न दोषः ।

(समाधानभाष्यम्)

एवं तर्हि "गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः"[१] इति । तद्यथा– 'गौरनुबन्ध्योऽग्नीषोमीयः'[२] इति न वाहीकोऽनुबध्यते ॥

(समाधानबाधकभाष्यम्)

कथं तर्हि वाहीके वृद्ध्यात्वे भवतः,–गौस्तिष्ठति, गामानयेति ?

(समाधानान्तरभाष्यम्)

अथवा प्रतिषिद्धार्थोऽयमारम्भः । ओ षु यातं मरुतः । ओ षु यातं बृहती शक्वरी च । ओ चित्सखायं सख्या ववृत्त्याम्[1] ।।

विमला - प्रतिषिद्धार्थमिति । प्रतिषिद्धा प्रगृह्यसंज्ञा यस्य तदर्थमेतत्सूत्रप्रणयनमित्यर्थः । लक्ष्यं निर्दिशति–**ओषुयातमिति** । न चात्र फलाभावान्न प्रगृह्यसंज्ञेति वाच्यम्, क्वचिच्छाखायाम् '**ओ अयातमि**'त्येव पाठसत्त्वेन प्रकृतिभावस्यैव फलत्वसम्भवात् । **ओषु यातमिति**पाठेऽपि **प्रगृह्यं चर्चायामितिना पदेषु** इति प्रातिशाख्यात्पदपाठे प्रगृह्यपदोत्तरमिति शब्दप्रयोगस्याऽऽवश्यकतयाऽस्य फलत्वे बाधकाभावात् ।

(च्व्यन्ते सूत्रप्रवृत्तिनिराकरणाधिकरणम्)

(१६५-आक्षेपवार्तिकम्-१)

।।।। ओतश्च्विप्रतिषेधः ।।*।।*

(भाष्यम्)

'ओदन्तो निपात' इत्यत्र च्व्यन्तस्य प्रतिषेधो वक्तव्यः । अनदः अदः अभवत्-अदोऽभवत्, अतिरः तिरः अभवत्-तिरोऽभवत् ।

विमला - प्रतिषेधो वक्तव्य इति । च्व्यन्तस्यापि '**ऊर्यादिच्विडाचश्च**'त्यनेन चकारेण निपातसंज्ञाविधानादिति भावः ।

(आक्षेपबाधकभाष्यम्)

न वक्तव्यः । 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य' इत्येवं न भविष्यति ।।

(आक्षेपसाधकभाष्यम्)

---

१. ऋ०१०।१०।१ ।।

(आक्षेपभाष्यम्)

क्व पुनरयं सानुबन्धकः, क्व निरनुबन्धकः ?

(समाधानभाष्यम्)

'ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्' ॥१॥

—निपात० ॥१४॥

(संज्ञासूत्रम्)

ओत् ॥१।१।१५॥

(सूत्रवैयर्थ्यनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

किमुदाहरणम् ?

(समाधानभाष्यम्)

आहो इति, उताहो इति ॥

(समाधानबाधकभाष्यम्)

नैतदस्ति प्रयोजनम् । निपातसमाहारोऽयम् । आह उ—आहो इति । उत आह उ—उताहो इति । तत्र "निपात एकाजनाङ्" इत्येव सिद्धम् ॥

(समाधानसाधकभाष्यम्)

एवं तर्ह्येकनिपाता इमे ॥

विमला - तर्ह्येकनिपाता इति । अत एव आम् आहो देवदत्तेत्यत्र 'आम एकान्तरमामन्त्रितमनन्तिके' इति निपातप्रतिषेधः सिद्ध्यति । अन्यथाऽनेकव्यवधानान्न स्यात् । अतएव च **ओषुमरुत** इत्यत्र **ओ** इत्यस्यैकपद्येन पाठोऽप्युपपद्यते ।

विमला - वाहीके इति । वाहीकबोधकगोपद इत्यर्थः ।

(समाधानसाधकभाष्यम्)

अर्थाश्रय एतदेवं भवति । यद्धि शब्दाश्रयम्, शब्दमात्रे तद्भवति । शब्दाश्रये च वृद्ध्यात्वे ।। औत् ।।१५।।

विमला - अर्थाश्रये एतदेवं भवतीति । अर्थवत्त्वयोग्यपदाश्रये **गौणमुख्यन्यायेन** मुख्यस्यैव ग्रहणम्भवतीत्यर्थः । **शब्दाश्रयमिति** । मुख्यव्यपदेशरहितस्वार्थबोधकप्रातिपदिकरूपशब्दाश्रयमित्यर्थः । **शब्दमात्रे इति** । मात्रपदं कृत्स्नार्थकम् । तथाहि ''**मात्रं कृत्स्नेऽवधारण**'' इत्यमरः । गौणे मुख्ये च तद्भवतीत्यर्थः, न तु मुख्ये एवेति भावः । **वृद्ध्यात्वे इति** । तथा च शब्दमात्रे ते स्यातामिति भावः । केचित्तु, **अर्थाश्रये** अर्थबोधप्रयोजकविशिष्टरूपोपादाने । **शब्दाश्रयम्** । वर्णाश्रयम्, वर्णोद्देश्यकमितियावत् । **शब्दाश्रये च वृद्ध्यात्वे** इति । वर्णाश्रये वृद्ध्यात्वे इत्यर्थः । **गोतोणिदित्यत्र** गकारस्याविवक्षितत्वाद्वर्णाश्रयत्वं वृद्धेः । अतएव ''**ओतोणिदिति वाच्यमि**'' ति वार्तिककृताभिहितम् । एवञ्च **पदकार्येष्वयं न्यायो न प्रातिपदिककार्ये** इत्यत्र न किञ्चित्प्रमाणम् ।

किञ्चास्य प्रातिपदिककार्येऽप्रवृत्तौ '**एकाच्च प्राचामि**' ति सूत्रे एकशब्दाड्डतरडतमविधायके '**एकादि**' ति निर्देशोऽपि नोपपद्येत तत्रैकशब्दस्य संज्ञोपसर्जनाभ्याम्व्यावृत्तत्त्वेन सर्वनामसंज्ञायाः दुर्वारत्वात् । **असंज्ञायामिति** पर्युदासेनास्य न्यायस्यानित्यतया '**सान्तमहत**' इत्यादावप्रवृत्तौ वैकल्पिकत्वाच्च्विप्रत्ययाभावपक्षे '**अमहान् महान् भूत**' इत्यादौ दीर्घादिकमप्युपपद्यत एवेति न तदप्यस्य पदकार्यविषयकत्वे प्रमाणम् । यदप्युक्तं परिनिष्ठितस्य पदान्तरसम्बन्धे हि गौर्वाहीक इत्यादौ गौणत्वप्रतीतिर्न तु प्रातिपदिकसंस्कारवेलायामित्यन्तरङ्गत्वाज्जातसंस्कारबाधायोगः प्रातिपदिककार्ये प्रवृत्त्यभावे बीजमिति, तदपि न, गाम्पाठय इत्यादौ पाठनक्रियान्वयकाल एव प्रयोक्तुर्गौणार्थत्वप्रतीतेः । न च पाठनक्रियान्वयकाले प्रयोक्तुर्गौणार्थत्वावगतावप्यपदस्याप्रयोगेण बोद्धुः पदे एव गौणार्थकत्वग्रहः, यदा च बोद्धुर्गौणार्थकत्वग्रहस्तदैव '**गौणमुख्यन्यायस्य**' प्रवृत्तिरिति वाच्यम्, प्रमाणाभावात्, प्रयोक्तुर्गौणार्थकत्वग्रहस्यैव

प्रयोगनियामकत्वस्य युक्तत्वाच्च । यत्तु कारकादिमात्रप्रयोगे योग्यसर्वक्रियाध्याहारे प्रसक्ते नियमार्थः क्रियावाचकादिप्रयोग इत्येतत्तात्पर्यकेणार्थवत्सूत्रभाष्येण सामान्यतः क्रियाजन्यफलाश्रयत्वमात्रविवक्षायां द्वितीयादीनां साधुत्वान्वाख्यानमित्यर्थलाभेन पाठनक्रियान्वयकाले पदस्यैव गौणार्थत्वप्रतीतिः प्रयोक्तुरपीति, तन्न, विचारासहत्वात् । तथाहि यदि प्रयोक्ता पाठनक्रियान्वयात्पूर्वम् गोपदस्य वाहीकार्थकत्वं न जानाति, अपितु गोत्वावच्छिनार्थकत्वमेव, तर्हि अयोग्यत्वात्पाठनक्रियाऽध्याहारासम्भवेन पाठनक्रियावाचकस्य नियामकत्वानुपपत्त्या पूर्वोक्तभाष्यविरोधापत्तिः । किञ्च वाक्यार्थबोधे पदार्थज्ञानं कारणम् नह्यन्यादृशपदार्थज्ञानमन्यादृशं वाक्यार्थम्बोधयितुं प्रभवतीत्यलम्पर-दोषनिरीक्षणेनेति वदन्ति ।

(प्रगृह्यसंज्ञादेशिसूत्रम्)

उञ ॐ ।।१।१।१७।।

(अनिष्टापत्तिवारणाधिकरणम्)

(आक्षेपभाष्यम्)

इह कस्मान्न भवति—आहो इति, उताहो इति ?

(आक्षेपबाधकभाष्यम्)

'उञ' इत्युच्यते । न चाऽत्रोञं पश्यामः ।।

(आक्षेपसाधकभाष्यम्)

उञोऽयमन्येन सहैकादेश उञ्ग्रहणेन गृह्यते ।।

(आक्षेपबाधकभाष्यम्)

आचार्यप्रवृत्तिर्ज्ञापयति–'नोञ एकादेश[1] उञ्ग्रहणेन गृह्यते' इति । यदयम् "ओत्" इत्योदन्तस्य निपातस्य प्रगृह्यसंज्ञां शास्ति ।

---

१. 'न चोञेका' नचोञैका वा इत्यपि पाठः ।

(आक्षेपसाधकभाष्यम्)

नैतदस्ति ज्ञापकम् । उक्तमेतत्—'प्रतिषिद्धार्थोऽयमारम्भः' इति ।। दोषः खल्वपि स्याद्, यद्युञेकादेश उञ्ग्रहणेन गृह्येत । जानु उ अस्य रुजति, जानू अस्य रुजति, जान्वस्य रुजति । "मय उञो वो वा" इति वत्वं न स्यात् ।।

(सामाधानभाष्यम्)

एवं तर्ह्येकनिपाता इमे ।।

अथ वा द्वावुकाराविमौ । एकोऽननुबन्धकः । अपरः सानुबन्धकः । तद्योऽननुबन्धकस्तस्यैष एकादेशः ।।

(योगविभागाधिकरणम्)

(१६६-सिद्धान्त आक्षेपवार्तिकम् - २)

।।।। उञ इति योगविभागः ।।*।।*

(भाष्यम्)

'उञ' इति योगविभागः कर्तव्यः । "उञः" । (उञः[1]) शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञा भवति । उ इति, विति ।। ततः "ऊँ" । उञ 'ऊँ' इत्ययमादेशो[2] भवति शाकल्यस्याचार्यस्य मतेन दीर्घोऽनुनासिकः प्रगृह्यसंज्ञकश्च[3] । ऊँ इति ।।

(योगविभागवैयर्थ्यभाष्यम्)

---

१. लुप्तं स्यात् ।

२. 'इत्यमादेशो' पाठान्तरम् ।

३. 'प्रगृह्यसंज्ञश्च' पाठान्तरम् ।

किमर्थो योगविभागः ?

(१६ ६-आक्षेपप्रयोजनवार्तिकद्वितीयखण्डम्-१)

।।।। ऊँ वा शाकल्यस्य ।।*।।*

(भाष्यम्)

शाकल्यस्याऽऽचार्यस्य मतेन 'ऊँ' विभाषा यथा स्यात् । ऊँ इति उ इति । अन्येषामाचार्याणां मतेन—विति ।। —उञ ऊँ ।।१७।।

विमला - वितीति । तथा च रूपत्रयसिद्ध्यर्थं योगविभाग इति भावः । इदमत्रावधेयम् । 'उञ ऊँ' इत्यस्यैकयोगत्वेनेहानुवृत्तमपि प्रगृह्यपदमादेशेन सम्बध्येत '**प्रगृह्य संज्ञकश्चे**'-ति भाष्यस्वरसात् तथोञ् इत्यपि श्रुतत्वादादेशे न सम्बध्यते तथा च उञ इतौ परे प्रगृह्यत्वविशिष्टो दीर्घोऽनुनासिकश्चोंञ् आदेशो वेत्यर्थे, सत्यादेशे 'ऊँ **इति**' आदेशाभावपक्षे निपात इत्यनेन प्रगृह्यत्वे '**उ इति**' इतिरूपं सिद्ध्यति तथा चैतन्मते **वितीत्यस्य** सिद्ध्यर्थं योगविभागः । यदि च प्रगृह्यपदस्य साक्षादुद्देश्यसम्बन्धस्य क्लृप्तत्वेन विधेयविशेषणत्वे मानाभावेन उञ इतौ परे प्रगृह्यसंज्ञा ऊँ आदेशश्च विधीयते भाष्ये प्रगृह्य संज्ञकश्चेति तु स्थानिवद्भावेन लब्धार्थकथनमेव उञ इति विशिष्टरूपा-श्रयणादनल्विधावित्यस्य न प्रवृत्तिस्तदैतस्य '**निपात एकाजिति**' प्रगृह्यसंज्ञापवाद-त्वाद्विकल्पशास्त्रस्य पक्षे तदभावेऽपि तात्पर्यात्प्रगृह्यसंज्ञयेव पक्षे तदभावेन बाधितत्वादेतदभावेऽपि '**निपात एकाजि**' त्यस्य न प्रवृत्तिरित्युच्यते, तर्हि '**उ इती**'त्यस्य सिद्ध्यर्थं योगविभागः । योगविभागे कृतेऽपि द्वितीययोगे यदि शाकल्यपदम् प्रगृह्यपदमुञ्चेत्युभयमपि नानुवर्तेत तदा उञ् मात्रस्य नित्यमूँविधानात्प्रगृह्यस्येवा-प्रगृह्यस्याप्यादेशापत्तिः । तत्र प्रगृह्यस्यादेशे '**ऊँ इती**'त्यस्य सिद्धावपि '**उ इति**' '**विती**'ति च न स्यात् । किञ्चाप्रगृह्यस्यादेशे यणि '**विती**'त्यापत्तिः । अथ प्रगृह्यपदमात्रमनुवर्त्तेत तदापि प्रगृह्यस्योञो नित्यमादेशे '**ऊँइति**' **वितीति** द्वे एव रूपे स्याताम् नतु '**उ इती**'ति तृतीयम् । शाकल्यग्रहणमात्रानुवृत्तौ तु उमात्रस्य विकल्पेनादेशविधानापत्त्या प्रगृह्यस्य '**ऊँइति**' '**उइती**' ति द्वयम् । अप्रगृह्यस्य '**विति**' '**विती**'ति द्वयमिति संकलनया चत्वारि रूपाण्यापद्येयुः । यत्तु योगविभागाभावेऽपि

सानुबन्धकस्य '**ऊँइति**' '**विती**'ति, निरनुबन्धकस्य '**निपात एकाजनाङ्**' इति प्रगृह्यत्वे '**उइति**' इति रूपत्रयं स्यादेवेति योगविभागो व्यर्थ इति तन्न, सानुबन्धकादेवेष्टस्य रूपत्रयस्यानापत्तेः ।

(प्रगृह्यसंज्ञासूत्रम्)

ईदूतौ च सप्तम्यर्थे ॥१।१।१८॥

(अर्थग्रहणप्रयोजननिरूपणाधिकरणम्)

(१६७-आक्षेपवार्तिकम्-१)

॥॥ 'ईदूतौ सप्तमीत्येव'[१] ॥*॥*

(भाष्यम्)

ईदूतौ सप्तमीत्येव सिद्धम्, नार्थोऽर्थग्रहणेन ॥

विमला - ननु सप्तम्याः प्रत्ययत्वेन '**प्रत्ययग्रहण**' परिभाषया तदन्तविधौ ईदूदन्तं यत्सप्तम्यन्तमित्यर्थे **सोमोगौरी** इत्यादि सिद्धेऽर्थग्रहणं मास्त्वित्याशयेनाऽऽशंकते— **ईदूतौ सप्तमीत्येवेति** ।

(१६८-समाधानवार्तिकम्-२)

॥॥ लुप्तेऽर्थग्रहणाद्भवेत्[१] ॥*॥*

(भाष्यम्)

लुप्तायां सप्तम्यां प्रगृह्यसंज्ञा न प्राप्नोति ॥

क्व ?

सोमो गौरी अधिश्रितः[२] । इष्यते चात्रापि स्यादिति । तच्चाऽन्तरेण यत्नं न सिध्यतीत्येवमर्थमर्थग्रहणम् ॥

---

१. श्लोकवार्तिकमेतत् ।

२. ऋ०९।१२।२ ॥

विमला - अत्रोत्तरमाह — **लुप्त इति** । '**संज्ञा विधावि**' ति तदन्तविधिनिषेधात् सप्तम्या एव संज्ञा स्यादिति **सोमो गौरी अधिश्रित** इत्यादौ लुप्ते सुपि संज्ञा न स्यादित्यर्थग्रहणमावश्यकमित्यभिप्रायः ।

(समाधानबाधकभाष्यम्)

नाऽत्र सप्तमी लुप्यते ।। किं तर्हि ?

पूर्वसवर्णोऽत्र भवति ।।

(१६९-समाधानसाधकवार्तिकम्-३)

।।*।। पूर्वस्य चेत् सवर्णोऽसावाडाऽऽम्भावः प्रसज्यते ।।*।।

(भाष्यम्)

यदि पूर्वसवर्णः, आट् आम्भावश्च प्राप्नोति ।।

विमला - ननु यथा '**धीति**' '**मती**'त्यादौ धीत्या मत्येति प्राप्ते विभक्तेः पूर्वसवर्णे कृतेऽकः **सवर्णे दीर्घ** इति दीर्घे '**धीती**' '**मती**'त्यादिकं सिद्धयति, तथैव **सोमो गौरी अधिश्रित** इत्यादावपि विभक्तेः पूर्वसवर्णे दीर्घे तस्यादिवद्भावात्सप्तमीग्रहणेन ग्रहणात्प्रगृह्यसंज्ञा भविष्यतीत्याशङ्कायामाह–**पूर्वस्य चेदिति** । पूर्वसवर्णे परत्वादन्तरङ्गत्वाच्च दीर्घम्बाधित्वाऽऽडागमौ स्यातामित्यर्थः ।।

(समाधानबाधकभाष्यम्)

एवं तर्हि आहायम्-ईदूतौ सप्तमीति । न चास्ति सप्तमी ईदूतौ, तत्र वचनाद्भविष्यति ।।

(१७०-सामधानवार्तिकम्-४)

।।*।। वचनाद्यत्र दीर्घत्वम् ।।*।।

(भाष्यम्)

नेदं वचनाल्लभ्यम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ।।

किम् ? यत्र सप्तम्या दीर्घत्वमुच्यते—"दृतिं न शुष्कं सरसी शयानम्"[१] इति । सति प्रयोजने इह न प्राप्नोति—'सोमो गौरी अधिश्रितः'[२] इति ।।

विमला - ननु तथाप्यर्थग्रहणम्मास्तु वचनसामर्थ्यादेव संज्ञाविधावपि तदन्तविधिर्भविष्यतीत्याशङ्क्याऽऽह—**वचनादिति** । **यत्रदीर्घत्वमिति** । अस्य सप्तम्या इत्यादिः । यत्र सप्तम्या दीर्घत्वं तत्रैव वचनात्स्यादित्यर्थः । एवञ्च **सोमो गौरीत्यादौ** न स्यादितिभावः ।

(१७१-समाधानबाधकवार्तिकम्-५)

।।*।। तत्रापि सरसी यदि ।।*।।

(भाष्यम्)

तत्रापि सिद्धम् ।

कथम् ?[३]

यदि सरसीशब्दस्य प्रवृत्तिरस्ति । अस्ति च लोके सरसीशब्दस्य प्रवृत्तिः ।

कथम् ?

दक्षिणापथे हि महान्ति सरांसि 'सरस्य' इत्युच्यन्ते[४] ।।

विमला - एतद्दूषयति—**तत्रापीति** । **सरसी यदीति** । अयम्भावः । सरसीति न सरस् शब्दात्परस्य सप्तम्येकवचनस्येयाडियाजीकाराणामुपसंख्यानमितीकादेशेन सिद्ध्यति किन्तु स्वतन्त्रोऽयमीकारान्तः सरसी शब्दो लुप्तविभक्तिकः । अन्यथेकारस्य

---

१. ऋ० ७।१०३।२ ।।

२. ऋ० ९।१२।३ ।।

३. इतः परं 'सरसी यदि' । इति प्रायः लुप्तं स्यात् ।

४. 'इत्युच्यते' इति पाठान्तरम् ।

सुप्त्वेनानुदात्ततया सरस् शब्दस्य च सृधातोरसुनि व्युत्पादितस्य नित्स्वरेण सरसीति पदमाद्युदात्तं प्रसज्येत । गौरादिषु **पिप्पल्यादयश्चेति** पाठात् पिप्पल्याद्यन्त:पातिन: सर: शब्दान्ङीन्, ङीषि त्वन्तोदात्तमिष्यते तथैव वेदे पाठादिति तत्रापि सूत्रस्य चारितार्थ्यं दुर्न्निरूपमिति वचनात्तदन्तविधिरित्युपपन्नम् ।।

(१७२-समाधानवार्तिकम्-६)

।।*।। ज्ञापकं स्यात् तदन्तत्वे ।।*।।

(भाष्यम्)

एवं तर्हि ज्ञापयत्याचार्यो 'न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवति' इति ।।

किमेतस्य ज्ञापने प्रयोजनम् ?

कुमार्योरगारं कुमार्यगारम् । वध्वोरगारम् वध्वगारम् । प्रत्ययलक्षणेन प्रगृह्यसंज्ञा न भवति ।।

विमला - एवन्तर्हि प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणं नास्तीति ज्ञापनायेदमर्थग्रहणमित्याह—**ज्ञापकं स्यादिति** । अस्य प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणाभावस्येतिशेष: । ज्ञापनस्योपयोगं दर्शयति—**तदन्तत्वे इति** । तदन्तगर्भे **ईदूदेदन्तं द्विवचनान्तं प्रगृह्यमिति** पक्षे **ईदूदेदन्तं यद्द्विवचनं तदन्तं प्रगृह्यमिति** पक्षे चेत्यर्थ: । उपयोग इति शेष: । प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणाभावज्ञापने पूर्वोक्तपक्षद्वये **कुमार्योरगारं** कुमार्यगारमित्यत्र **अशुक्ले शुक्ले सम्पद्येतां शुक्ल्यास्तां वस्त्रे** इत्यत्र च नातिव्याप्तिरिति भाव: ।।

(१७३-समाधानवार्तिकम्-७)

।।*।। 'मा वा पूर्वपदस्य भूत्' ।।*।।

(भाष्यम्)

अथ वा — पूर्वपदस्य मा भूदित्येवमर्थमर्थग्रहणम् । वाप्यामश्वो वाप्यश्व:, नद्यामातिर्नद्यातिः ।।

विमला - ननु संज्ञाविधाविति निषेधादुक्तपक्षद्वयमेव न प्रामाणिकमित्यपरितोषादाऽऽह—**मा वा पूर्वपदस्येति** । **नद्यातिरिति** । आतिर्बलाका '**शरारिरातिराटिश्च बलाकाविसकण्टिके**' ति कोशात् । व्यर्थं सदर्थग्रहणं ''**सप्तम्यर्थमात्रबोधकत्वे एवेदूदेदन्तस्य संज्ञा यथास्यान्न तदधिकार्थबोधकत्वे**'' इति ज्ञापयति तेन **वाप्यश्व**: इत्यादौ पूर्वपदस्य संज्ञाव्यावृत्तिः फलं सिद्धयतीतिभावः ।

(आक्षेपभाष्यम्)

अथ क्रियमाणेऽप्यर्थग्रहणे कस्मादेवाऽत्र न भवति ?

(समाधानभाष्यम्)

जहत्स्वार्था वृत्तिरिति ।।

(आक्षेपभाष्यम्)

अथाऽजहत्स्वार्थायां वृत्तौ दोष एव ।।

(समाधानभाष्यम्)

अजहत्स्वार्थायां च न दोषः[1] । समुदायार्थोऽभिधीयते ।।

'ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद्भवेत् ।

पूर्वस्य चेत् सवर्णोऽसावाडाम्भावः प्रसज्यते ।।

वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि ।

ज्ञापकं स्यात् तदन्तत्वे मा वा पूर्वपदस्य भूत्' ।।

ईदूतौ च सप्तम्यर्थे ।।१८।।

(इति प्रगृह्यसंज्ञाप्रकरणम्)

---

१. 'अजहत्स्वार्थायामपि न दोषः' इति क्वचित् ।

(घुसंज्ञासूत्रम्)

दा धा घ्वदाप् ।।१।१।१९।।

विमला - सूत्रकारमते डुदाञ्, दाण्, दो, देङ्, धातूनामनुकरणं कृत्वा ''**प्रकृतिवदनुकरणमि**''त्यतिदेशेन धातुत्वादात्वे कार्य्यविशेषपुरस्कारेणातिदेशिकधातुत्वसत्त्वेऽपि प्रातिपदिकसंज्ञायां धातुत्वाभावेनाधातुरिति पर्युदासाविषयत्वेन प्रातिपदिकसंज्ञायां दाश्च दाश्च दाश्च दाश्चेत्येकशेषेण दाः इति । एवम् **डुधाञ्, धेट्** इत्यनयोरनुकरणे आतिदेशिकधातुत्वेन धेट आत्वे प्रातिपदिकसंज्ञायामेकशेषे, धाविति । दाश्च धौचेति द्वन्द्वे ''**दाधाः**'' **इति** । एवञ्चानुकरणस्यानुकार्य्यार्थकत्वेन **दो देङ् धेटश्च** घुसंज्ञासिद्धैवेति प्रकृतिग्रहणस्य नावश्यकता । वार्तिककारस्तु एजन्तानुकरणे प्रमाणाभावात्प्रक्रियागौरवाच्च प्रयोगस्थानामाकारान्तानामेवानुकरणमिदमितिमन्वानः **प्रणिद्यति प्रणिधयती**त्यादावात्वविरहाद्घुत्वं न प्राप्नोतीत्यत आह—**घुसंज्ञायामिति** । सूत्रकारमते ''**लक्षणप्रतिपदोक्त**'' परिभाषा तु नेह प्रवर्तते एजन्तानुकरणसामर्थ्यात् । एवम् **निरनुबन्धक** परिभाषाऽपीति बोध्यम् । ननु सूत्रकारमते अदाबितिघुसंज्ञाप्रतिषेधो व्यर्थस्तेषामनुकरणाभावेन घुत्वाप्राप्तेरिति चेन्न, यतोहि **अदाबिति** प्रतिषेधाभावे दाब्दैपोरप्यनुकरणामिदमिति सम्भाव्येत । व्याख्यानेन निर्णीय सिद्धस्य प्रत्याख्यानं तु न शोभते ।

(इष्टानुपपत्तिनिराकरणाधिकरणम्)

(१७४-आक्षेपवार्तिकम्-१)

।।।। घुसंज्ञायां प्रकृतिग्रहणं शिदर्थम् ।।*।।*

(भाष्यम्)

घुसंज्ञायां प्रकृतिग्रहणं कर्तव्यम् । दाधाप्रकृतयो घुसंज्ञा भवन्तीति वक्तव्यम् ।।

किं प्रयोजनम् ?

आत्वभूतानामियं संज्ञा क्रियते । सा आत्वभूतानामेव स्याद्, अनात्वभूतानां न स्यात् ।।

ननु च भूयिष्ठानि घुसंज्ञाकार्याणि आर्द्धधातुके । तत्र चैत आत्वभूता दृश्यन्ते ।।

"शिदर्थम्" । शिदर्थं प्रकृतिग्रहणं कर्तव्यम् । शित्यात्वं प्रतिषिध्यते तदर्थम् । प्रणिदयते प्रणिद्यति[1] प्रणिधयतीति ।।

(भारद्वाजीयवार्तिकावतरणभाष्यम्)

भारद्वाजीयाः पठन्ति—

(भारद्वाजीयोक्तमाक्षेपवार्तिकम् - १)

।।।। घुसंज्ञायां प्रकृतिग्रहणं*

शिद्विकृतार्थम् ।।।।*

(भाष्यम्)

घुसंज्ञायां प्रकृतिग्रहणं क्रियते ।

किं प्रयोजनम्[2] ?

शिदर्थं विकृतार्थं च । शित्युदाहृतम् ।। विकृतार्थं खल्वपि—प्रणिदाता प्रणिधाता ।

किं पुनः कारणं न सिध्यति ?

'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव' इति, प्रतिपदं ये आत्वभूतास्तेषामेव स्याद्, लक्षणेन ये आत्वभूतास्तेषां न स्यात् ।।

(प्रत्याक्षेपभाष्यम्)

---

१. प्रणिद्यतीति क्वचिन्न ।

२. इतः परं 'शिद्विकृतार्थम्' इति पाठो लुप्तः स्यात् ।

अथ क्रियमाणेऽपि प्रकृतिग्रहणे कथमिदं विज्ञायते–दाधाः प्रकृतय इति, आहोस्विद्दाधां प्रकृतय इति ?

किं चातः ?

यदि विज्ञायते–'दाधाः' प्रकृतय इति, स एव दोषः—आत्वभूतानामेव स्याद् अनात्वभूतानां न स्यात् ।। अथ विज्ञायते–'दाधां प्रकृतय' इति, अनात्वभूतानामेव स्यादात्वभूतानां न स्यात् ।।

(प्रत्याक्षेपसमाधानभाष्यम्)

एवं तर्हि, नैवं विज्ञायते–'दाधाः प्रकृतय' इति, नापि 'दाधां प्रकृतय' इति ।।

कथं तर्हि ?

दाधा घुसंज्ञा भवन्ति, प्रकृतयश्चैषामिति ।।

विमला - प्रकृतयश्चैषामिति । सूत्रन्तु ''दाधाप्रकृतयो ध्वधाप्'' इत्येव कर्त्तव्यम् सन्निधानाच्च दाधामेव प्रकृतय इति व्याख्येयम् ।

(प्रश्नभाष्यम्)

तत्तर्हि प्रकृतिग्रहणं कर्तव्यम् ?

(आक्षेपोपसंहारभाष्यम्)

न कर्तव्यम् । इदं प्रकृतमर्थग्रहणमनुवर्तते ।।

क्व प्रकृतम् ?

विमला - प्रकृतिग्रहणमिति नेर्गदेति सूत्र इत्यादिः ।

(समाधानभाष्यम्)

''ईदूतौ च सप्तम्यर्थे'' इति । ततो वक्ष्यामि —

"दाधा घ्वदाप्" "अर्थ" इति ॥

(समाधानबाधकभाष्यम्)

नैवं शक्यम् । ददातिना समानार्थान् रातिरासति-दासतिमंहतिप्रीणातिप्रभृतीनाहुः । तेषामपि घुसंज्ञा प्राप्नोति । तस्मान्नैवं शक्यम् । न चेदेवं, प्रकृतिग्रहणं कर्तव्यमेव ॥

(समाधानसाधकभाष्यम्)

न कर्तव्यम् । शिदर्थेन तावन्नाऽर्थः प्रकृति-ग्रहणेन । अवश्यं तत्र माऽर्थं प्रकृतिग्रहणं कर्तव्यम्, प्रणिमयते प्रण्यमयतेत्येवमर्थम् । तत् पुरस्तादपक्रक्ष्यते, घुप्रकृतौ माप्रकृतौ चेति ।

(आक्षेपभाष्यम्)

यदि प्रकृतिग्रहणं क्रियते — प्रनिमिनोति प्रनिमी-नाति — अत्रापि प्राप्नोति ॥

(प्रतिबन्दीभाष्यम्)

अथाऽक्रियमाणेऽपि प्रकृतिग्रहणे इह कस्मान्न भवति,–प्रनिमाता प्रनिमातुं प्रनिमातव्यमिति ॥

विमला - प्रनिमातेति । 'मा माने' इत्यस्येदं रूपमिति बोध्यम्।

(प्रतिबन्दीसमाधानभाष्यम्)

आकारान्तस्य ङितो ग्रहणं विज्ञायते[१] ॥

विमला - आकारान्तस्य ङित इति । नेर्गदनदघुप्रकृतिमाङ्स्यन्ती-त्यादिसूत्रम्पठिष्यते इत्यर्थः ।

---

१. 'विज्ञास्यते' इति क्वचित् ।

(समाधानभाष्यम्)

यथैव तर्हि अक्रियमाणे प्रकृतिग्रहणे आकारान्तस्य ङित्तो ग्रहणं विज्ञायते । एवं क्रियमाणेऽपि प्रकृतिग्रहणे आकारान्तस्य ङित्तो ग्रहणं विज्ञास्यते[1] ।

(भारद्वाजीयप्रयोजननिराकरणभाष्यम्)

विकृतार्थेन चाऽपि नार्थः । दोष एवैतस्याः परिभाषाया "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव" इति– "गामादाग्रहणेष्वविशेषः" इति ।।

(यदागमन्यायाधिकरणम्)

(१७५-आक्षेपवार्तिकम्-२)

।।।। समानशब्दप्रतिषेधः ।।*।।*

(भाष्यम्)

समानशब्दानां प्रतिषेधो वक्तव्यः । प्रनिदारयति प्रनिधारयति । दाधा घुसंज्ञा भवन्तीति घुसंज्ञा प्राप्नोति ।।

(१७६-समाधानवार्तिकम्-३)

।।।। समानशब्दाऽप्रतिषेधोऽर्थवद् ग्रहणात् ।।*।।*

(भाष्यम्)

समानशब्दानामप्रतिषेधः, अनर्थकः प्रतिषेधोऽप्रतिषेधः ।।

घुसंज्ञा कस्मान्न भवति ?

---

१. क्वचिद्विज्ञायते ।

'अर्थवद्ग्रहणात्' । अर्थवतोर्दाधोर्ग्रहणात्[1] । न चैतावर्थवन्तौ ।

(१७७-समाधान हेत्वन्तरवार्तिकम्-४)

||||अनुपसर्गाद्वा ||*||*

(भाष्यम्)

अथवा यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा भवति[2] । न चैतौ दाधौ प्रति क्रियायोगः ।।

(आक्षेपभाष्यम्)

[यद्येवम्[3]] इहापि तर्हि न प्राप्नोति—प्रणिदापयति प्रणिधापयतीति । अत्रापि नैतौ दाधावर्थवन्तौ, नाप्येतौ दाधौ प्रति क्रियायोगः ।।

(१७८-समाधानवार्तिकम्-५)

||||न वाऽर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते यथाऽन्यत्र ||*||*

(भाष्यम्)

न वा एष दोषः ।

किं कारणम् ?

अर्थवत आगमस्तद्गुणीभूतोऽर्थवद्ग्रहणेन गृह्यते । यथान्यत्र । तद्यथा—अन्यत्रापि अर्थवत आगमोऽर्थवद्ग्रहणेन गृह्यते ।।

---

१. 'ग्रहणं' क्वचित् ।

२. 'संज्ञे भवतः' इति क्वचित् । 'संज्ञा भवन्ति' इत्यपि क्वचिच्च ।

३. क्वचिन्न ।

क्वान्यत्र ?

लविता चिकीर्षितेति ।

विमला - अर्थवद्ग्रहणेन गृह्यत इति । एवञ्च **प्रणिदापयतीत्यादौ** पुग्विशिष्टस्य दाग्रहणेन ग्रहणाद् घुसंज्ञोपपद्यते । **प्रनिदारयतीत्यत्र** तु रेफस्य दाशब्दमुद्दिश्य विहितत्वाभावेन रेफविशिष्टस्य न दाग्रहणेन ग्रहणमिति न घुसंज्ञा प्रसक्तिः । अधिकं **परिभाषेन्दुशेखरविजयायां** द्रष्टव्यम् ।

(आदेशवादिन आगमवादिनं प्रत्याक्षेपभाष्यम्)

युक्तं पुनर्यन्नित्येषु नाम शब्देष्वागमशासनं स्यात् । न । नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । आगमश्च नामाऽपूर्वः शब्दोपजनः ?

(आगमवादिन आदेशवादिनं प्रत्याक्षेपभाष्यम्)

अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः ?

(आदेशवादिनः समाधानभाष्यम्)

बाढं युक्तम् । शब्दान्तरैरिह भवितव्यम् । तत्र शब्दान्तरे शब्दान्तरस्य प्रतिपत्तिर्युक्ता ।।

(सिद्धान्तोपसंहारभाष्यम्)

आदेशास्तर्हीमे भविष्यन्ति अनागमकानां सागमकाः ।।

तत् कथम् ?

'सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।

एकदेशविकारे हि नित्यत्वं नोपपद्यते' ।।

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(१३३-आक्षेपवार्तिकम्-२)

॥॥ दीङः प्रतिषेधः स्थाघ्वोरित्त्वे ॥*॥*

(भाष्यम्)

दीङः प्रतिषेधः स्थाघ्वोरित्त्वे वक्तव्यः ॥ उपादास्ताऽस्य स्वरः शिक्षकस्येति । "मीनातिमिनोति" इत्यात्त्वे कृते "स्थाघ्वोरिच्च" इतीत्त्वं प्राप्नोति ॥

विमला - दीङः प्रतिषेध इति । शिन्मात्रार्थकत्वं प्रकृतिग्रहणस्येतिवार्तिकमते "**लक्षणप्रतिपदोक्त**" - परिभाषाऽत्र न प्रवर्तते, अन्यथा **प्रणिदाते**त्यस्य सिद्ध्यर्थं **दीङः प्रतिषेध** इति वचनमावश्यकं स्यादिति बोध्यम् । दीङस्तृजादावात्वे प्रणिदातेत्यत्र भाष्यकृता सह फलाभेदाय **स्थाघ्वोरित्त्वे** इति विशेषोक्तिः । अन्यथा वार्तिककारमते **दीङ** इति वचनेन घुत्वनिषेधात् **शेषेविभाषे**तिवैकल्पिकं णत्वम्, भाष्यमते तु घुसंज्ञायां **नेर्गदे**ति नित्यं णत्वमिति फलभेदः स्यात् । सूत्रकारमते तु दीङोऽनुकरणादुपादास्तेत्यत्र घुसंज्ञायाः प्राप्तिरेव नास्तीति निषेधवचनस्य नावश्यकता एवम् **विकृतार्थञ्चा- पि शिद्ग्रहणमिति** भारद्वाजीयमतेऽपि नैव घुसंज्ञायाः प्राप्तिः '**लक्षणप्रतिपदोक्त**'-परिभाषया निषेधात् ।

(प्रत्याक्षेपभाष्यम्)

कुतः पुनरयं दोषो जायते—किं प्रकृतिग्रहणाद्, आहोस्विद्रूपग्रहणात् ?

(प्रत्याक्षेपसमाधानभाष्यम्)

रूपग्रहणादित्याह ॥

(प्रकृतिग्रहणदोषभाष्यम्)

इह खलु प्रकृतिग्रहणाद्दोषो जायते । उपदिदीषते । "सनि मीमाघुरभलभ" इति ॥

(दोषनिराकरणभाष्यम्)

नैष दोषः । दाप्रकृतिरित्युच्यते । न चेयं दाप्रकृतिः । आकारान्तानामेजन्ताः प्रकृतयः, एजन्तानामपीकारान्ताः, न च प्रकृतेः प्रकृतिः प्रकृतिग्रहणेन गृह्यते ।।

(आक्षेपोपसंहारभाष्यम्)

स तर्हि प्रतिषेधो वक्तव्यः ?

(समाधानभाष्यम्)

न वक्तव्यः ।।

(आक्षेपभाष्यम्)

घुसंज्ञा कस्मान्न भवति ?

(समाधानभाष्यम्)

"सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य" इत्येवं न भविष्यति ।।

विमला - न भविष्यतीति । एवञ्चोपादास्तेत्यत्र सूत्रकारमते भारद्वाजीयमते च घुसंज्ञायाः प्राप्तिरेव नास्ति । वार्तिकमते प्राप्तापि वचनेन निषिद्धैव । भाष्यकारमते वचनाभावेऽपि **सन्निपात**परिभाषयैव निषिद्धेति सर्वेषां फलाभेदः । नन्वेवमपि दीङस्तृजादावात्वे कृते प्रणिदातेत्यादौ भाष्यवार्तिककृतोर्मते घुसंज्ञा भवति **सन्निपात**परिभाषाया अप्रवृत्तेः । **स्थाघ्वोरित्वे** इति विशेषोक्तेश्च । सूत्रकारमते तु दीङोऽनुकरणान्नैव घुत्वप्रवृत्तिरिति **शेषे विभाषेति** वैकल्पिकं णत्वमिति फलभेदः । एवम् **प्रणिदीन** इत्यत्र वार्तिकमते ईकारान्तानामाकारान्तप्रकृतित्वाभावान्नैव घुसंज्ञा प्रवर्तते । एवं सूत्रकारमतेऽपीति तयोर्मते वैकल्पिकं णत्वम्, भाष्यकारमते तु **नेर्गदेति** सूत्रे प्रकृतिग्रहणादीकारान्तानामप्येजन्तप्रकृतित्वावगमाच्च नित्यमेव णत्वमिति फलभेदोऽस्त्येवेति चेन्न, **शेषे विभाषे**त्यस्य व्यवस्थितविभाषात्वमभ्युपगम्य प्रणिदाता प्रणिदीन इत्यादौ **शेषे विभाषे**त्यनेनापि नित्यस्यैव णत्वस्य विधानात् । एकवाक्यतया निर्वाहसम्भवे मतभेदकल्पनाया अन्याय्यत्वात् ।।

(नानुबन्धकृतमनेजन्तत्वन्यायाधिकरणम्)

(१८०-आक्षेपवार्तिकम्-७)

॥*॥ दाप्प्रतिषेधे न दैप्यनेजन्तत्वात् ॥*॥

(भाष्यम्)

दापूप्रतिषेधे दैपि प्रतिषेधो न प्राप्नोति—अवदातं मुखम् ॥

ननु चाऽऽत्त्वे कृते भविष्यति ॥

तद्ध्यात्त्वं न प्राप्नोति ॥

किं कारणम् ? 'अनेजन्तत्वात्' ॥

(१८१-समाधानवार्तिकम्-८)

॥*॥ सिद्धमनुबन्धस्याऽनेकान्तत्वात् ॥*॥

(भाष्यम्)

सिद्धमेतत् ॥ कथम् ?

'अनुबन्धस्यानेकान्तत्वात्' । अनेकान्ता अनुबन्धाः ॥

(१८२-समाधानवार्तिकम्-९)

॥*॥ पित्प्रतिषेधाद्वा ॥*॥

(भाष्यम्)

अथवा "दाधा घ्वपित्" इति वक्ष्यामि । तच्चाऽवश्यं वक्तव्यम् । अदाबिति ह्युच्यमाने इहापि प्रसज्येत–प्रणिदापयतीति ॥

(आवश्यकतानिराकरणभाष्यम्)

शक्यं तावदनेनाऽदाबिति ब्रुवता बान्तस्य प्रतिषेधो विज्ञातुम् ।।

(आक्षेपभाष्यम्)

सूत्रं तर्हि भिद्यते ।।

(सिद्धान्तिभाष्यम्)

यथान्यासमेवास्तु ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् "दाप्प्रतिषेधे न दैपि" इति ।।

(परिहारस्मारणभाष्यम्)

परिहृतमेतत् —"सिद्धमनुबन्धस्याऽनेकान्तत्वात्' इति ।।

(आक्षेपभाष्यम्)

अथैकान्तेषु दोष एव ।।

(समाधानभाष्यम्)

एकान्तेष्वपि न दोषः । आत्त्वे कृते भविष्यति ।।

(समाधानानुपपत्तिभाष्यम्)

ननु चोक्तम्—'तद्धयात्वं न प्राप्नोति, किं कारणम् ? अनेजन्तत्वाद्–' इति ।।

(समाधानोपपत्तिभाष्यम्)

पकारलोपे कृते भविष्यति ।।

(आक्षेपभाष्यम्)

नह्ययं तदा दाब् भवति ।।

(समाधानभाष्यम्)

भूतपूर्वगत्या भविष्यति ।।

(समाधानसाधकभाष्यम्)

एतच्चात्र युक्तम्—यत्सर्वेष्वेव सानुबन्धकग्रहणेषु भूतपूर्वगतिर्विज्ञायते ।। अनैमित्तिको ह्यनुबन्धलोपस्तावत्येव भवति ।।

(समाधानान्तरभाष्यम्)

अथ वाऽऽचार्यप्रवृत्तिर्ज्ञापयति— 'नानुबन्धकृतमनेजन्तत्वम्' इति । यदयम् "उदीचां माङो व्यतीहारे" इति मेङः सानुबन्धकस्याऽऽत्त्वभूतस्य ग्रहणं करोति ।।

(समाधानान्तरभाष्यम्)

अथ वा दाबेवायम् । न दैबस्ति ।।

कथम्—"अवदायति' इति ?

श्यन्विकरणो भविष्यति ।। दाधा घ्वदाप् ।।१९।।

(अतिदेशसूत्रम्)

आद्यन्तवदेकस्मिन् ।।१।१।।२०।।

विमला - आद्यन्तवदेकस्मिन्निति । व्यपदेशातिदेशोऽयम्, अत्रैकस्मिन्नित्यस्याभावे सभासन्नयनशब्दस्यापि वृद्धादित्वापत्तौ तस्माद्भवार्थे छः प्रत्ययः प्रसज्येत । न च वृद्धसंज्ञायामादिग्रहणसामर्थ्ये नानातिदेशिकस्यैवादेर्ग्रहणमिति नाऽयं दोष इति वाच्यम् । तथा सति जानातीति ज्ञा, ज्ञाया इदं ज्ञीय इति न सिद्ध्येदातिदेशिकस्यैवादित्वस्य सत्त्वात् । अत्रैकस्मिन्नित्युक्तौ तु वृद्धिसंज्ञासूत्रेऽप्यादिग्रहणं सभासन्नयनशब्दस्य वृद्धसंज्ञावारणायार्थतया सार्थकमिति दिक् ।

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थमिदमुच्यते ?

(१८३-समाधानवार्तिकम्-१)

।।।। सत्यन्यस्मिन्नाद्यन्तवद्भावादेकस्मिन्नाद्यन्तवद्वचनम् ।।*।।*

(भाष्यम्)

सत्यन्यस्मिन् यस्मात् पूर्वं नास्ति परमस्ति स आदिरित्युच्यते । सत्यन्यस्मिन् यस्मात् परं नास्ति पूर्वमस्ति सोऽन्त इत्युच्यते । 'सत्यन्यस्मिन्नाद्यन्तवद्भावात्'–एतस्मात् कारणाद् एकस्मिन्नाद्यन्तापदिष्टानि कार्याणि न सिध्यन्ति । इष्यन्ते च स्युरिति । तान्यन्तरेण यत्नं न सिध्यन्ति इत्येकस्मिन्नाद्यन्तवद्वचनम् । एवमर्थमिदमुच्यते ।।

विमला - एतस्मात्कारणादिति । असहाये सत्यन्यस्मिन्निति विशेषणाभावेन विशिष्टभावादित्यर्थः ।

(आक्षेपभाष्यम्)

अस्ति प्रयोजनमेतत् ?

(समाधानभाष्यम्)

किं तर्हीति ।।

(१८४-आक्षेपवार्तिकं प्रथमखण्डम्-२)

।।।। तत्र व्यपदेशिवद्वचनम् ।।*।।*

(भाष्यम्)

तत्र व्यपदेशिवद्भावो वक्तव्यः । व्यपदेशिवदेकस्मिन् कार्यं भवतीति वक्तव्यम् ।।

विमला - तत्रेति । प्रयोजने सतीत्यर्थः । **व्यपदेशिवद्भावो वक्तव्य इति** । वक्ष्यमाणफलार्थं व्यपदेशिवद्भाववचनस्यावश्यं वक्तव्यतया तेनैवाद्यन्तवद्भाववचनप्रयोजनस्यापि सिद्धौ आद्यन्तवद्भाववचनं नाऽऽरब्धव्यमिति भावः ।

(भाष्यम्)

किं प्रयोजनम् ?

विमला - किम्प्रयोजनमिति । आद्यन्तवद्भाववचनेनानिर्वाह्यं व्यपदेशिवद्भावस्य प्रयोजनं किमित्यर्थः ।

(१८४-प्रयोजनवार्तिकं द्वितीयखण्डम् - ३)

।।*।। *एकाचो द्वे प्रथमार्थम्* ।।*।।

(भाष्यम्)

वक्ष्यति-'एकाचो द्वे प्रथमस्येति' बहुव्रीहिनिर्देश इति । तस्मिन् क्रियमाणे इहैव स्यात्—पपाच पपाठ; इयाय आर इत्यत्र न स्यात् । व्यपदेशिवदेकस्मिन् कार्यं भवतीत्यत्रापि सिद्धं भवति ।।

(१८४-प्रयोजनवार्तिकं तृतीयखण्डम् - ४)

।।*।। *षत्वे चाऽऽदेशसंप्रत्ययार्थम्* ।।*।।

(भाष्यम्)

वक्ष्यति-'आदेशप्रत्यययोरित्यवयवषष्ठ्येषा-' इति[1] । एतस्मिन् क्रियमाणे इहैव स्यात्-करिष्यति हरिष्यति, इह न स्याद् 'इन्द्रो मा वक्षत्'[2] 'स देवान्यक्षत्'[3]

---

१. 'षष्ठ्येवेति' इति क्वचित् ।

२. ऋ०१।१३५।४ ।।

३. ऋ-३।४।३ ।।

इति । व्यपदेशिवदेकस्मिन् कार्यं भवतीत्यत्रापि सिद्धं भवति ।।

(आक्षेपोपसंहारभाष्यम्)

स तर्हि व्यपदेशिवद्भावो वक्तव्यः ?

(सिद्धान्तिसमाधानभाष्यम्)

न वक्तव्यः ।।

(१८५-समाधानवार्तिकम्-५)

।।।। अवचनाल्लोकविज्ञानात् सिद्धम् ।।*।।*

(भाष्यम्)

अन्तरेणैव वचनं लोकविज्ञानात् सिद्धमेतत् ।।

विमला - अवचनादिति । वचननिरपेक्षाल्लोकव्यवहारादेव व्यपदेशिवद्भावसिद्धेराद्यन्तवदिति, व्यपदेशिवदिति चोभयमपि न वक्तव्यमित्यर्थः । उपलक्षणञ्चैतत् '**इट् ईटी**'ति ज्ञापकस्यापि । अन्यथा सिचोवल्रूपत्वेऽपि वलादित्वाभावादिटोऽप्राप्तौ सूत्रं व्यर्थमेव स्यादिति बोध्यम् ।

(एकदेशिदृष्टान्तभाष्यम्)

तद्यथा लोके—'शालासमुदायो ग्रामः'— इत्युच्यते । भवति चैतदेकस्मिन्नपि-''एकशालो ग्रामः'' -इति ।।

(उक्तदृष्टान्तविघटनभाष्यम्)

विषम उपन्यासः । ग्रामशब्दोऽयं बह्वर्थः । अस्त्येव शालासमुदाये वर्तते । तद्यथा-'ग्रामो दग्धः' इति ।।

अस्ति वाटपरिक्षेपे वर्तते । तद्यथा—'ग्रामं प्रविष्टः' इति ।।

विमला - वाटपरिक्षेप इति । सर्वतो मार्गप्रतिरोधनार्थं यत्परितः क्षिप्यते । परिखेति यावत् ।

(अनुवर्त्तनभाष्यम्)

अस्ति च[1] मनुष्येषु वर्तते । तद्यथा—'ग्रामो गतो, ग्राम आगतः'—इति ।।

अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते । तद्यथा—'ग्रामो लब्धः'—इति ।।

तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते, तमभिसमीक्ष्यैतत्प्रयुज्यते– 'एकशालो ग्रामः' इति ।।

(एकदेशिदृष्टान्तान्तरभाष्यम्)

यथा तर्हि—'वर्णसमुदायः पदम्' 'पदसमुदाय ऋक्,' 'ऋक्समुदायः सूक्तम्' इत्युच्यते । भवति चैतदेकस्मिन्नपि—'एकवर्णं पदम्,' 'एकपदा ऋक्,' 'एकर्चं सूक्तम्' इति ।।

(दृष्टान्तान्तरविघटनभाष्यम्)

अत्राप्यर्थेन युक्तो व्यपदेशः । पदं नामाऽर्थः, ऋङ् नामार्थः, सूक्तं नामार्थ इति ।।

विमला - अत्रापीति । एकवर्णम्पदमित्यादावपीत्यर्थः । **अर्थेनेति** । उपचारात्पदत्वादेरर्थवृत्तित्वेनेत्यर्थः । **युक्तो व्यपदेश इति** । व्यपदेशिवद्भावमन्तरेणैव सिद्ध इत्यर्थः । अत्रहेतुमाह—**पदं नामार्थ इति** । अस्य यत इत्यादिः । अपीतिशेषः । तथा च यतः पदं नाम अर्थोऽपि अतस्तत्र व्यपदेशो युक्त इत्यर्थः ।

---

१. 'च' इति क्वचिन्नास्ति ।

अयम्भाव: — पदत्वस्योपचारादर्थेऽपि वृत्तित्वेनार्थतात्पर्येण पदशब्दप्रयोगात्तस्य चान्यपदार्थत्वसम्भवादेकवर्णं पदमिति व्यवहारो व्यपदेशिवद्भावमन्तरेणैव सिद्ध इति तव दृष्टान्त: साध्यविकल इति ।

(सिद्धान्तिदृष्टान्तभाष्यम्)

यथा तर्हि–बहुषु पुत्रेष्वेतदुपपन्नं भवति–अयं मे ज्येष्ठोऽयं मे मध्यमोऽयं मे कनीयानिति । भवति चैतदेकस्मिन्नपि–'अयमेव मे ज्येष्ठोऽयमेव मे मध्यमोऽयमेव मे कनीयान्' इति ।।

(सिद्धान्तिदृष्टान्तान्तरभाष्यम्)

तथाऽसूतायामसोष्यमाणायां च भवति— 'प्रथमगर्भेण हता' इति ।।

(सिद्धान्तिदृष्टान्तान्तरभाष्यम्)

तथाऽनेत्याऽनाजिगमिषुराह–'इदं मे प्रथममागमनम्' इति ।।

(सूत्रप्रत्याख्यानभाष्यम्)

आद्यन्तवद्भावश्च शक्योऽवक्तुम् ।। कथम् ?

(१८६-प्रत्याख्यानसाधकवार्तिकम्-६)

।।*।। अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन् ।।*।।

(भाष्यम्)

अपूर्वलक्षण आदिः, अनुत्तरलक्षणोऽन्तः । एतच्चैकस्मिन्नपि भवति । अपूर्वानुत्तरलक्षणत्वादेतस्मात् कारणाद् एकस्मिन्नप्याद्यन्तापदिष्टानि कार्याणि भविष्यन्तीति नार्थ आद्यन्तवद्भावेन ।।

विमला - आद्यन्तवद्भावेनेति । व्यपदेशिवद्भावस्तु एतन्मते आवश्यक इति बोध्यम् ।

(प्रत्याख्यानासंभवभाष्यम्)

गोनर्दीयस्त्वाह—सत्यमेतत् 'सति त्वन्यस्मिन्' इति ।।

विमला - सत्यमेतदिति । एतत्त्वदुक्तं सत्यम्, परन्तु सत्यन्यस्मिन्नित्यपि बोध्यम् । अयमादिरन्तोवेत्युक्तेऽवशिष्टमपि किञ्चिदस्तीति नियमेन प्रतीतेः । पदान्नियतोपस्थितिश्च शक्तिसाध्या । अनुभवमपलप्यैकदेशमात्रे शक्तिकल्पने तु भार्यापितृवाचकादीनां श्वशुरादिपदानामपि लाघवाद् भार्य्यात्वमात्रं पितृत्वमात्रम्वा शक्यतावच्छेदकं स्यात् । स्याच्च विशिष्टविषयकशक्त्युच्छेदेन सकलविशिष्ट-व्यवहारव्याकोपः ।

(सूत्रोदाहरणाधिकरणम्)

(सूत्रप्रयोजनजिज्ञासाभाष्यम्)

कानि पुनरस्य योगस्य प्रयोजनानि ?

(१८७-प्रयोजनवार्तिकम्-७)

।।*।। आदिवत्त्वे प्रयोजनं प्रत्ययञ्निदाद्युदात्तत्वे ।।*।।

(भाष्यम्)

[1]प्रत्ययस्यादिरुदात्तो भवतीति । इहैव स्यात्-'कर्तव्यं' तैत्तिरीयः, 'औपगवः, कापटवः' इत्यत्र न स्यात् ।।

''ञ्नित्यादिर्नित्यम्'' इति इहैव स्याद्—'अहिचुम्बकायनिः, आग्निवेश्यः । गार्ग्यः कृतिः' इत्यत्र न स्यात् ।।

---

१. इतः पूर्वं 'आदिवत्त्वे प्रयोजनं प्रत्ययञ्निदाद्युदात्तत्वे' इति लुप्तं स्यात् ।

(१८८-प्रयोजनवार्तिकम्-८)

।।*।। वलादेरार्द्धधातुकस्येट् ।।*।।

(भाष्यम्)

वलादेरार्द्धधातुकस्येट् प्रयोजनम् ।। "आर्द्धधातुकस्येड्वलादेः" इतीहैव स्यात् करिष्यति हरिष्यति । 'जोषिषद्[1]' मन्दिषदित्यत्र न स्यात् ।।

(१८९-प्रयोजनान्तरवार्तिकम्-९)

।।*।। यस्मिन्विधिस्तदादित्वे ।।*।।

(भाष्यम्)

यस्मिन्विधिस्तदादित्वे प्रयोजनम् । वक्ष्यति- 'यस्मिन्विधिस्तदादावल्ग्रहणे' इति । तस्मिन् क्रियमाणे "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" इहैव स्यात् — श्रियः भ्रुवः, श्रियौ भ्रुवौ इत्यत्र न स्यात् ।।

(१९०-प्रयोजनान्तरवार्तिकम्-१०)

।।*।। अजाद्याट्त्वे ।।*।।

(भाष्यम्)

अजाद्याट्त्वे प्रयोजनम् । "आडजादीनाम्" इहैव स्याद्—ऐहिष्ट । ऐक्षिष्ट । ऐष्ट[2] अध्यैष्टेत्यत्र न स्यात् ।।

(अन्तवत्त्वप्रयोजननिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

अथान्तवत्त्वे कानि प्रयोजनानि ?

---

१. ऋ० २/३५/१ ।।

२. 'एत्' इति पाठान्तरम् ।

(१९१-प्रयोजनवार्तिकम्-११)

।।*।। अन्तवद् द्विवचनान्तप्रगृह्यत्वे ।।*।।

(भाष्यम्)

अन्तवद् द्विवचनान्तप्रगृह्यत्वे प्रयोजनम् ।। "ईदूदेद्द्विवचनं प्रगृह्यम्' इहैव स्यात्–'पचेते इति' 'पचेथे इति' । खट्वे इति, माले इतीत्यत्र न स्यात् ।।

(१९२-प्रयोजनान्तरवार्तिकम्-१२)

।।*।। मिदचोऽन्त्यात्परः ।।*।।

(भाष्यम्)

"मिदचोऽन्त्यात्परः" प्रयोजनम् । "नपुंसकस्य झलचः[१]" इहैव स्यात्–कुण्डानि वनानि । तानि यानीत्यत्र न स्यात् ।।

(१९३-प्रयोजनान्तरवार्तिकम्-१३)

।।*।। अचोऽन्त्यादि टि ।।*।।

(भाष्यम्)

"अचोन्त्यादि टि" प्रयोजनम् । "टित आत्मनेपदानां टेरे", इहैव स्यात्– कुर्वाते कुर्वाथे । कुरुते कुर्वे इत्यत्र न स्यात् ।

(१९४-प्रयोजनान्तरवार्तिकम्-१४)

।।*।। अलोऽन्त्यस्य ।।*।।

(भाष्यम्)

---

१. क्वचिल्लुप्तोऽयं पाठः ।

"अलोऽन्त्यस्य" प्रयोजनम् ।। "अतो दीर्घो यञि" "सुपि च" इहैव स्यात्—पटाभ्यां घटाभ्यामिति । आभ्यामित्यत्र न स्यात् ।।

(१९५-प्रयोजनान्तरवार्तिकम्-१५)

।।।। येन विधिस्तदन्तत्वे ।।*।।*

(भाष्यम्)

येन विधिस्तदन्तत्वे प्रयोजनम् । "अचो यत्" इहैव स्यात्—चेयम् जेयम् । एयमध्येयमित्यत्र न स्यात् । "आद्यन्तवदेकस्मिन्" कार्यं भवतीत्यत्रापि सिद्धं भवति ।। आद्यन्तवदेकस्मिन् ।।२०।।

(प्रकरणोत्कर्षप्रयोजनाधिकरणम्)

(घसंज्ञासूत्रम्)

तरप्तमपौ घः ।।१।१।२१।।

(अनिष्टनिवारणाधिकरणम्)

(१९६-आक्षेपवार्तिकम्-१)

।।।। घसंज्ञायां नदीतरे प्रतिषेधः ।।*।।*

(भाष्यम्)

घसंज्ञायां नदीतरे प्रतिषेधो वक्तव्यः । नद्यास्तरो नदीतरः ।

(१९७-समाधानवार्तिकप्रथमखण्डम्-२)

।।।। घसंज्ञायां नदीतरेऽप्रतिषेधः ।।*।।*

(भाष्यम्)

घसंज्ञायां नदीतरेऽप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः ॥

घसंज्ञा कस्मान्न भवति ?

(१९७-समाधानहेतुवार्तिकद्वितीयखण्डम्-२)

॥॥ तरब्ग्रहणं ह्यौपदेशिकम् ॥*॥*

(भाष्यम्)

औपदेशिकस्य तरपो ग्रहणम् । न चैष उपदेशे तरप्शब्दः ॥

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत् ?

(समाधानभाष्यम्)

नहि ॥

(आक्षेपभाष्यम्)

कथमनुच्यमानं गंस्यते ?

(सिद्धान्तिसमाधानभाष्यम्)

इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते— यत्रास्यैतद्रूपमिति । रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम् । तस्मिंश्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते ॥

कोऽसौ ?

उपदेशो नाम । न चैष उपदेशे तरप्शब्दः ॥

(घसंज्ञाभ्युपगमेऽपि दोषाऽभावप्रदर्शकभाष्यम्)

अथ वाऽस्त्वस्य घसंज्ञा । को दोषः ?

(दोषदर्शनभाष्यम्)

घादिषु नद्या ह्रस्वो भवतीति ह्रस्वत्वं प्रसज्येत ।।

(समाधानभाष्यम्)

समानाधिकरणेषु घादिष्वित्येवं तत् ।।

(आक्षेपभाष्यम्)

यदा तर्हि सैव नदी, स एव तरस्तदा प्राप्नोति ।।

(समाधानभाष्यम्)

स्त्रीलिङ्गेषु घादिष्वित्येवं तत् ।। अवश्यं चैतदेवं विज्ञेयम् । समानाधिकरणेषु घादिष्वित्युच्यमाने इह प्रसज्येत—महिषी रूपमिव, ब्राह्मणी रूपमिवेति ।।
तरप्तमपौ घः ।।२१।।

(संख्यासंज्ञासूत्रम्)

बहुगणवतुडति संख्या ।।१।१।२२।।

(लोकप्रसिद्धसंख्यावाचिनां संख्यात्वसाधनाधिकरणम्)

(१९८-आक्षेपवार्तिकप्रथमखण्डम्-१)

।।*।। संख्यासंज्ञायां संख्याग्रहणं संख्यासम्प्रत्ययार्थम्[१] ।।*।।

(भाष्यम्)

संख्यासंज्ञायां संख्याग्रहणं कर्तव्यम् । 'बहुगणवतुडतयः संख्यासंज्ञा भवन्ति, संख्या च संख्यासंज्ञा भवती' ति वक्तव्यम् ।।

---

१. 'संख्यासम्प्रत्ययार्थम्' इति क्वचित्पृथक् वार्तिकतया पठ्यते ।

किं प्रयोजनम् ?

"संख्यासंप्रत्ययार्थम्[१]" । एकादिकायाः संख्यायाः संख्याप्रदेशेषु संख्येत्येष संप्रत्ययो यथा स्यात् ॥

(आक्षेपबाधकभाष्यम्)

ननु चैकादिका संख्या लोके संख्येति प्रतीता । तेनास्याः संख्याप्रदेशेषु संख्यासंप्रत्ययो भविष्यति ॥

(आक्षेपसाधकभाष्यम्)

एवमपि कर्तव्यम् ॥

किं प्रयोजनम्[२] ?

(१९८-आक्षेपसाधकवार्तिकद्वितीयखण्डम्-१)

॥*॥ इतरथा ह्यसंप्रत्ययोऽकृत्रिमत्वाद्यथा लोके ॥*॥

(भाष्यम्)

अक्रियमाणे हि संख्याग्रहणे एकादिकायाः संख्यायाः संख्येत्येष संप्रत्ययो न स्यात् ॥

किं कारणम् ?।

'अकृत्रिमत्वात्' ॥ बह्वादीनां कृत्रिमा संज्ञा । "कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति" ॥ यथा लोके ॥ तद्यथा लोके-'गोपालकमानय' 'कटजकमानय' इति यस्यैषा संज्ञा भवति स आनीयते, न यो गाः पालयति, यो वा कटे जातः ॥

---

१. अयमंशः क्वचिन्न ।

(आक्षेपभाष्यम्)

यदि तर्हि कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति, "नदीपौर्णमास्याग्रहायणीभ्यः" इत्यत्रापि प्रसज्येत ।।

(समाधानभाष्यम्)

पौर्णमास्याग्रहायणीग्रहणसामर्थ्यान्न भविष्यति ।।

(आक्षेपभाष्यम्)

तद्विशेषेभ्यस्तर्हि प्राप्नोति ।

(समाधानभाष्यम्)

एवं तर्हि आचार्य प्रवृत्तिर्ज्ञापयति—'न तद्विशेषेभ्यो भवति' इति । यदयं विपाट्शब्दं शरत्प्रभृतिषु पठति ।।

(आक्षेपभाष्यम्)

इह तर्हि प्राप्नोति—"नदीभिश्च" इति ।।

(समाधानभाष्यम्)

बहुवचननिर्देशान्न भविष्यति ।।

(आक्षेपभाष्यम्)

स्वरूपविधिस्तर्हि प्राप्नोति ।।

(समाधानभाष्यम्)

बहुवचननिर्देशादेव न भविष्यति ।।

(उपसंहारभाष्यम्)

एवं च न चेदमकृतं भवति—"कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः" इति । न च कश्चिद्दोषो भवति ।।

(१९९-आक्षेपसाधकवार्तिकम्-२)

॥॥ उत्तरार्थं च ॥*॥*

(भाष्यम्)

उत्तरार्थं च संख्याग्रहणं कर्तव्यम्। "ष्णान्ता षट्"। षकारनकारान्तायाः संख्यायाः षट्संज्ञा यथा स्यात्। इह मा भूत्—पामानो विप्रुष इति॥

(आक्षेपनिराकरणभाष्यम्)

इहार्थेन तावन्नार्थः संख्याग्रहणेन॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्—'इतरथा ह्यसंप्रत्ययोऽकृत्रिमत्वाद्यथा लोके' इति?

(आक्षेपपरिहारभाष्यम्)

नैष दोषः। अर्थात्प्रकरणाद्वा लोके कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति। अर्थो वाऽस्यैवंसंज्ञकेन भवति, प्रकृतं वा तत्र भवति—इदमेवंसंज्ञकेन कर्तव्यमिति। आतश्चाऽर्थात् प्रकरणाद्वा। अङ्ग! हि भवान् ग्राम्यं पांशुलपादमप्रकरणज्ञमागतं ब्रवीतु—'गोपालकमानय', 'कटजकमानये'ति। उभयगतिस्तस्य भवति। साधीयो वा यष्टिहस्तं गमिष्यति।

(आक्षेपसाधकभाष्यम्)

यथैवं तर्ह्यर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः

---

१ 'कार्य' इति क्वचिन्न।

कृत्रिमे [१]कार्यसंप्रत्ययो भवति, एवमिहापि प्राप्नोति । जानाति ह्यसौ बह्वादीनामियं संज्ञा कृतेति ।।

(समाधानसाधकभाष्यम्)

न यथा लोके, तथा व्याकरणे । उभयगतिः पुनरिह भवति ।।

विमला - न यथालोक इति । अयम्भावः, अर्थः प्रकरणञ्च लोके कृत्रिमाकृत्रिमन्यायबीजं भवति तत्रार्थो यथा गोपालकमानय माणवकमध्यापयिष्यतीति यष्टिहस्तस्याध्यापनासम्भवात् कृत्रिमस्य ग्रहणम् । प्रकरणं यथा गमनप्रकरणे सैन्धवमानयेत्युक्तौ अश्वस्यैव प्रतीति र्नतु लवणस्य । शास्त्रे तु अर्थो हेतुः कृत्रिमस्य ग्रहणे नैव सम्भवति, अकृत्रिमस्यापि प्रदेशे ग्रहणसम्भवेन तस्योभयसाधारण्यात् । प्रकरणं परमवशिष्यते तत्राप्यालोच्यताम् । प्रकरणस्य कृत्रिमग्रहणे हेतुत्वं तात्पर्यज्ञानजनकत्वेनानुगमय्यैव वक्तव्यमिति, तदपेक्षया लाघवेन तात्पर्यज्ञानस्यैव जनकत्वमस्तु, भाष्यस्थस्यापि **प्रकरणादित्यस्य** तात्पर्यादित्येवार्थः । एवञ्च लोके कृत्रिमे तात्पर्यसत्त्वे कृत्रिमस्यैव ग्रहणं भवतु शास्त्रे तु व्याख्यातृपरम्परावगततात्पर्यस्याकृत्रिमेऽपि सत्त्वेन तस्यापि ग्रहणं स्यादेवेति । **उभयगतिः पुनरिह भवतीति** । उभयत्रैव तात्पर्यसत्त्वादिति भावः ।

(उभयगत्युदाहरणभाष्यम्)

अन्यत्रापि, नावश्यमिहैव । तद्यथा "कर्तुरीप्सिततमं कर्म" इति कृत्रिमा कर्मसंज्ञा । कर्मप्रदेशेषु चोभयगतिर्भवति—'कर्मणि द्वितीया' इति कृत्रिमस्य ग्रहणम्, 'कर्तरि कर्मव्यतिहारे' इत्यत्राऽकृत्रिमस्य ।।

(उभयगत्युदाहरणान्तरभाष्यम्)

तथा 'साधकतमं करणम्' इति कृत्रिमा करणसंज्ञा । करणप्रदेशेषु चोभयगतिर्भवति— 'कर्तृकरणयोस्तृतीया' इति कृत्रिमस्य ग्रहणम्, 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' इत्यत्राऽकृत्रिमस्य ।।

तथा–'आधारोऽधिकरणम्' इति कृत्रिमा अधिकरणसंज्ञा ।। अधिकरणप्रदेशेषु चोभयगतिर्भवति–'सप्तम्यधिकरणे च' इति कृत्रिमस्य ग्रहणम्, 'विप्रतिषिद्धं चानधिकरणवाचि' इत्यत्राऽकृत्रिमस्य[१] ।।

(समाधानान्तरभाष्यम्)

अथ वा–नेदं संज्ञाकरणम् । तद्वदतिदेशोऽयम्–'बहुगणवतुडतयः संख्यावद् भवन्ती'ति ।।

(आक्षेपभाष्यम्)

स तर्हि वतिनिर्देशः कर्तव्यः ?

(समाधानभाष्यम्)

न कर्तव्यः ।।

(आक्षेपसाधकभाष्यम्)

न ह्यन्तरेण वतिमतिदेशो गम्यते ।।

अन्तरेणापि वतिमतिदेशो गम्यते । तद्यथा–'एष ब्रह्मदत्तः' । अब्रह्मदत्तं ब्रह्मदत्त इत्याह । ते मन्यामहे ब्रह्मदत्तवदयं भवतीति । एवमिहाप्यसंख्यां संख्येत्याह, संख्यावदिति गम्यते ।।

(समाधानान्तरभाष्यम्)

अथवाऽऽचार्य प्रवृत्तिर्ज्ञापयति— भवत्येकादिकायाः संख्यायाः संख्याप्रदेशेषु संख्या संप्रत्यय–इति । यदयं 'संख्याया अतिशदन्तायाः कन्' इति तिशदन्तायाः प्रतिषेधं शास्ति ।।

कथं कृत्वा ज्ञापकम् ?

१. 'त्रा' इति क्वचिन्न ।

न हि कृत्रिमा त्यन्ता शदन्ता वा संख्याऽस्ति ॥

(समाधानबाधकभाष्यम्)

ननु चेयमस्ति डतिः ॥

(समाधानसाधकभाष्यम्)

यत्तर्हि शदन्तायाः प्रतिषेधं शास्ति ॥

(संपूर्णसूत्रज्ञापकताभ्युपगमभाष्यम्)

यच्चापि त्यन्तायाः प्रतिषेधं शास्ति ॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-'डत्यर्थमेतत् स्यात्' इति ॥

(समाधानभाष्यम्)

"अर्थवद्ग्रहणे नानर्थकस्य" इति अर्थवतस्तिशब्दस्य ग्रहणम् । न च डतेस्तिशब्दोऽर्थवान् ॥

(समाधानान्तरभाष्यम्)

अथवा महतीयं संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः ॥

कुत एतत् ?

लघ्वर्थं हि संज्ञाकरणम् ॥ तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनम्—अन्वर्थसंज्ञा यथा विज्ञायेत—सङ्ख्यायते अनया संख्येति । एकादिकया चापि सङ्ख्यायते ॥

विमला - अन्वर्थसंज्ञा यथा विज्ञायेतेति । लोकप्रसिद्धमहासंज्ञाकरणेन प्रदेशेषु लोकप्रसिद्धार्थानामप्यवगतिरिति भावः । ननु महासंज्ञाकरणेन तदर्थानुगुणानामेवोपात्तानां संज्ञायाः सर्वनामसंज्ञादौ दृष्टतया अत्रापि संख्यावाचका एव बह्वादयः संज्ञां लभन्तां,

न पुन: वैपुल्यादिवाचका अपीति नियम उपपाद्यताम् । प्रदेशेषु लोकप्रसिद्धार्थानाप्यवगतिरिति तु महासंज्ञया लब्धुमशक्यमन्यत्रादृष्टत्वादिति चेदत्रोच्यते — सर्वादीनां सर्वनामपदार्थानुगुणत्वात्सर्वनामेति महासंज्ञायास्तथा बोधकत्वेऽपि बह्वादीनां यद्धर्मप्रकारकनिश्चयोत्तरं संख्याप्रकारकसंशयसामान्यं नोदेति तद्धर्मावच्छिन्नवाचकत्वरूपसंख्यावाचकत्वस्याभावेन वत्वन्तस्य डत्यन्तस्य च सर्वथा तदसम्भवेन वैपुल्यादिवाचकानां बह्वादीनां परम्परसाहचर्याश्रयणेनैव व्यावृत्तिसम्भवेन फलाभावेन च प्रकृते महासंज्ञया तथा ज्ञापनासम्भवेन प्रदेशेषु लोकप्रसिद्धार्थानामप्यवगतिरित्येव महासंज्ञया कल्पनं ज्याय: । भूर्यादीनामुक्तसंख्यावाचकत्वाभावेन बह्वाद्यनन्तर्गतत्वेन च न संख्याकार्यमिति सर्वमुपपन्नम् ।

यत्तु कैयट: महासंज्ञाकरणेन **संख्या** इति योगं विभज्यते, अन्वर्थसंज्ञानुरूपा: संज्ञिन आक्षिप्यन्ते । तथा च संख्यानकरणीभूता: संख्यासंज्ञका इत्यर्थ: । ततो **बहुगणेत्यादि** । **एकादिकया चापि संख्यायत इति** भाष्यस्थचकारेण बह्वादीनामपि संग्रहात्तेषामपि संख्यावाचितया पूर्वेणैव संज्ञासिद्धावयं योगो नियमार्थ: — अनियतसंख्यावाचिनां चेद्बह्वादीनामेव । तेन भूर्यादीनां न संज्ञेतिफलं सिद्ध्यतीति । तन्न, पूर्वोक्तसंख्यावाचकत्वस्य बह्वादावभावात्, बह्वादीनां संख्यावाचकत्वे '**असंख्यां संख्येत्याह**' इति भाष्यविरोधापत्तेश्च । एतदेकवाक्यतया **एकादिकया चापि संख्यायत** इति भाष्ये चकारो न बह्वादिसंग्राहक:, किन्तु वाक्यपरिपोषक इति न तस्यापि विरोधो बह्वादीनां संख्यावाचकत्वसाधक: । अथवा **एकादिकये**त्यत्र चकारेण बह्वादिकया स्वव्याप्यत्रित्वादिसंख्यया संख्यायते इत्यर्थ: । इति चकारस्य समुच्चयार्थकत्वेऽपि बह्वादीनां संख्यावाचकत्वाभावेऽपि भाष्यं सुयोजम् ।।

ननु बहुत्वादिकं त्रित्वादिरूपमतिरिक्तम्वा ? आद्ये बह्वादीनां पदानां संख्यावाचकत्वमक्षतम् । द्वितीये गौरवमितिचेन्न, यतो हि बहुत्वस्य त्रित्वादिरूपत्वेऽपि **बहव: त्रय:** इत्यादावन्वयबोधोपपत्तये विभिन्नरूपेणोस्थितिसम्पादनाय बहुत्वमतिरिक्तमेव जातिरूपमङ्गीकरणीयम् । मया तु बहुत्वमेवातिरिक्तं त्रित्वादिव्यापकजातिरूपमङ्गीक्रियते । बहुत्वन्तु बहिृतरावृत्तित्वे सति सकलबहुवृत्तित्वमिति नास्मन्मते गौरवम् । अथ बहुत्वस्य त्रित्वादिरूपत्ववादिना बहुत्वत्वम् एकत्वद्वित्ववद्भेदविशिष्टसंख्यात्वरूपमेव वक्तव्यमिति लाघवमस्त्येवेति चेत्तर्हि मयापि बहुत्वमतिरिक्तं नेष्यते

किन्तु एकत्वद्वित्ववद्भेदरूपमेवेति न संख्यारूपस्य बहुत्वस्य सिद्धिः । न च बहुत्वस्य संख्यारूपत्वाऽनभ्युपगमे **संख्या चैव तथा तिङाम्**इत्यत्र भाष्ये संख्यापदेन बहुत्वस्य विवक्षाऽसंगता स्यात् । एवं **तस्यपूरणे** इति सूत्रे वार्तिकं **संख्यापूरण इति वक्तव्य**मिति अत्रापि संख्यापदेन बहुत्वमपि विवक्षितम् अन्यथा बहुतिथ इत्यादिकं न संगच्छेत तदप्यसंगतं स्यादिति वाच्यम्, बहुशब्दस्य संख्यासंज्ञकत्वेन शब्दार्थयोस्तादात्म्याङ्गीकाराद्बहुत्वस्यापि संख्यासंज्ञकत्वेन बहुत्वस्यापि संख्यापदेन व्यवहारसम्भवात् । किञ्च बहुत्वादेः संख्यात्वे भूर्यादिपदानां संख्यावाचकत्वेन तत्प्रयुक्तकार्य्यापत्तिः । न च नियमेनैव तद्वारणमिति वच्यम्, सूत्रसत्त्वे नियमेन वारणसम्भवेऽपि सूत्रप्रत्याख्यानपक्षे नियमाभावेन वारणासम्भवात् ।

(द्वितीयप्रयोजनप्रत्याख्यानभाष्यम्)

उत्तरार्थेन चापि नाऽर्थः सङ्ख्याग्रहणेन । इदं प्रकृतमुत्तरत्रानुवर्तिष्यते ।।

(आक्षेपभाष्यम्)

इदं वै संज्ञार्थम्, उत्तरत्र च संज्ञिविशेषणेनार्थः । न चाऽन्यार्थं प्रकृतमन्यार्थं भवति ।। न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति । न हि गोधा[1] सर्पन्ती सर्पणादहिर्भवति ।।

(आक्षेपप्रथमयुक्तिसमाधानभाष्यम्)

यत्तावदुच्यते —'न चान्यार्थं प्रकृतमन्यार्थं भवती'ति।। अन्यार्थमपि प्रकृतमन्यार्थं भवति । तद्यथा-शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयते, उपस्पृश्यते च, शालयश्च भाव्यन्ते ।।

(आक्षेपद्वितीययुक्तिसमाधानभाष्यम्)

यदप्युच्यते—'न खल्वप्यन्यत् प्रकृतमनुवर्तनाद-

१. 'गोधा' नाम 'गोह' इति ।

न्यद्भवति । नहि गोधा सर्पन्ती सर्पणादहिर्भवती'ति ।। भवेद्-द्रव्येष्वेतदेवं स्यात् । शब्दस्तु खलु येन येन विशेषेणाभिसंबध्यते, तस्य तस्य विशेषको भवति ।।

(समाधानान्तरभाष्यम्)

अथ वा-सापेक्षोऽयं "ष्णान्ता" इति निर्देशः क्रियते । न चाऽन्यत् किञ्चिदपेक्ष्यमस्ति । ते सङ्ख्यामेवापेक्षिष्यामहे ।।

(२००-आक्षेपवार्तिकम्-३)

|||| अध्यर्द्धग्रहणं च समासकन्विध्यर्थम् ||*||*

(भाष्यम्)

अध्यर्द्धग्रहणं च कर्तव्यम् ।।

किं प्रयोजनम् ?

समासकन्विध्यर्थम् । समासविध्यर्थम्, कन्विध्यर्थं च ।। समासविध्यर्थं तावत्—अध्यर्द्धशूर्पम् ।। कन्विध्यर्थम्-अध्यर्द्धकम् ।

(२०१-संज्ञाप्रयोजनवार्तिकम्-४)

|||| लुकि चाऽग्रहणम् ||*||*

(भाष्यम्)

लुकि चाध्यर्द्धग्रहणं न कर्तव्यं भवति-"[1]अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम्" इति । "द्विगोः" इत्येव सिद्धम् ।।

(२०२-आक्षेपवार्तिकम्-५)

१. 'अध्यर्द्धपूर्वात्' इति क्वचित्पाठः ।

।।*।। अर्द्धपूर्वपदश्च पूरणप्रत्ययान्तः ।।*।।

(भाष्यम्)

अर्द्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासंज्ञो भवतीति वक्तव्यम् ।

किं प्रयोजनम् ?

'समासकन्विध्यर्थमेव' समासविध्यर्थं कन्विध्यर्थं च । समासविध्यर्थं तावत्-अर्धपञ्चमशूर्पम् । कन्विध्यर्थम्— अर्धपञ्चमकम् ।।

विमला - **अर्धपूर्वपदश्च पूरणप्रत्ययान्त** इति । अत्र संख्येत्यनुवर्त्तते **पूरणप्रत्ययान्त** इत्यस्य पूरणप्रत्ययान्तोत्तरपदक इत्यर्थः ।

(२०३-आक्षेपवार्तिकम्-६)

।।*।। अधिकग्रहणं चाऽलुकि, समासोत्तरपदवृद्ध्यर्थम् ।।*।।

(भाष्यम्)

अधिकग्रहणं चाऽलुकि कर्तव्यम् ।

किं प्रयोजनम् ?

'समासोत्तरपदवृद्ध्यर्थम्' । समासविध्यर्थमुत्तरपदवृद्ध्यर्थं च । समासविध्यर्थं तावत्—अधिकषाष्टिकः । अधिकसाप्ततिकः ।। उत्तरपदवृद्ध्यर्थम्– अधिकषाष्टिकः । अधिकसाप्ततिकः ।।

अलुकीति किमर्थम् ?

अधिकषाष्टिकः । अधिकसाप्ततिकः ।।

(२०४-आक्षेपप्रयोजनवार्तिकम्-७)

॥*॥ बहुव्रीहौ चाऽग्रहणम् ॥*॥

(भाष्यम्)

बहुव्रीहौ चाऽधिकशब्दस्य ग्रहणं न कर्त्तव्यं भवति । 'संख्ययाऽव्ययासन्नादूराधिकसङ्ख्याः सङ्ख्येय' इति । 'संख्ये'त्येव सिद्धम् ॥

(२०५-प्रत्याख्यानवार्तिकप्रथमखण्डम्-८)

॥*॥ बह्वादीनामग्रहणम् ॥*॥

(भाष्यम्)

बह्वादीनां ग्रहणं शक्यमकर्तुम् ॥

(आक्षेपभाष्यम्)

के॰नेदानीं संख्याप्रदेशेषु संख्यासंप्रत्ययो भविष्यति ?

(२०६-प्रत्याख्यानसाधकवार्तिकद्वितीयखण्डम्-९)

॥*॥ ज्ञापकात्सिद्धम्[1] ॥*॥

(भाष्यम्)

ज्ञापकात् सिद्धमेतत्[2] ॥

किं ज्ञापकम् ?

यदयं-'वतोरिड्वा'' इति संख्याया विहितस्य कनो वत्वन्तादिटं शास्ति ॥

(आक्षेपभाष्यम्)

वतोरेव तज्ज्ञापकं स्यात् ॥

---

१. भाष्यमिदमित्यन्ये । २. अयमंशः क्वचिन्न ।

(समाधानभाष्यम्)

नेत्याह । योगापेक्षं ज्ञापकम् ।। बहुगण० ।।२१।।

विमला - योगापेक्षं ज्ञापकमिति । **'बहुपूगगणसंघस्येति थुक्' 'वतोरिथुक्' 'षट्कतिकतिपयचतुरां थुक्'** इति सूत्रैः संख्यायां विहिते डटि परे आगमा विधीयमानाः बह्वादीनां संख्यात्वं ज्ञापयन्तीति भावः । ननु सूत्राभावे वैपुल्यादिवाचकानामपि बह्वादीनां संख्याकार्य्यं स्यात्, सूत्रसत्त्वे तु महासंज्ञाबलेन संख्यावाचिनामेवेति फलभेदात्प्रत्याख्यानमसंगतमिति चेन्न, अनियतसंख्यावाचिनां बह्वादीनां संख्याकार्य्यज्ञापनेनैव तेषां चारितार्थ्यसम्भवे सर्वथा तदवाचकानां संख्याकार्यज्ञापनासम्भवात् । नन्वेवमपि सूत्रसत्त्वेऽनियतसंख्यावाचिनाञ्चेत्संख्याकार्य्यं तर्हि बहुगणयोरेवेति ज्ञापनात् भूर्य्यादीनां न भवति, सूत्राभावे तु भूर्यादीनामपि संख्याविषयकबोधजनकतया तेषामपि संख्याकार्यं स्यादिति फलभेदोऽस्त्येवेति चेन्न; नियतसंख्यावाचिनां पञ्चादीनामेव लोके संख्याशब्देन प्रसिद्धतरत्वात् प्रसिद्धाप्रसिद्धयोः प्रसिद्धग्रहणस्यैव न्याय्यत्वात् । नन्वेवमपि बहुगणयोरिव पूगसंघादीनामपि धासूकृत्वसुजादिसंख्याकार्य्यप्रसंगः, अन्यथा डडपि पूगादीनां न स्यात् । न च बहुगणयोः सामान्यापेक्षं ज्ञापकं पूगादीनां डड्विषयकमेव ज्ञापकमिति वाच्यम्, वैषम्ये बीजाभावादिति चेन्न, लक्ष्यानुरोधेन वैषम्यस्य सोढव्यत्वात् । वैषम्यमनभ्युपगम्य सूत्रकृत् सूत्रम्प्रणीतवान् । बहुगणेति सूत्रं वार्तिककृता प्रत्याख्यातम् । वार्तिककृतोक्तं संख्याग्रहणं भाष्यकृता प्रत्याख्यातम् । अध्यर्धादिग्रहणं संख्यासंज्ञासूत्रे कर्तव्यमेवेति सिद्धमित्यवधेयम् ।

(षट्संज्ञासूत्रम्)

ष्णान्ता षट् ।।१।१।२३।।

(अनिष्टापत्तीष्टानुपपत्तिनिराकरणाधिकरणम्)

(२०७-आक्षेपवार्तिकम्-१)

।।।। षट्संज्ञायामुपदेशवचनं शताद्यष्टनोर्नुग्नुडर्थम्[1] ।।*।।*

---

१. 'शताद्यष्टनोर्नुग्नुडर्थम्' इति वार्तिकं क्वचित्पृथकत्वेन विद्यते, 'किं प्रयोजनम्' इत्यनन्तरम् ।

(भाष्यम्)

षट्संज्ञायामुपदेशग्रहणं कर्तव्यम् । उपदेशे षकारनकारान्ता संख्या षट्संज्ञा भवतीति वक्तव्यम् ।

किं प्रयोजनम् ?

शताद्यष्टनोर्नुम्नुडर्थम् । शतानि सहस्राणि । नुमि कृते "ष्णान्ता षट्" इति षट्संज्ञा प्राप्नोति । उपदेशग्रहणान्न भवति ।। अष्टानामित्यत्राऽऽत्वे कृते षट्संज्ञा न प्राप्नोति । उपदेशग्रहणाद्भवति ।।

विमला - उपदेश इति । स्वप्रकृतिकप्रत्ययोपदेशकाले इत्यर्थः । एतेनोणादिष्व-व्युत्पत्तिपक्षस्यैव सिद्धान्तितत्वेन पञ्चन्नादीनामुपदेशाभावेनोक्तार्थमसंगतमिति परास्तम् ।

(प्रत्याख्यानवार्तिकम्)

।।।। उक्तं वा ।।*।।*

(भाष्यम्)

उक्तं वा[१] ।। किमुक्तम् ?

इह तावच्छतानि सहस्राणीति-'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति ।।

अष्टनोऽप्युक्तम् ।

किमुक्तम् ?

अष्टनो दीर्घग्रहणं षट्संज्ञाज्ञापकमाकारान्तस्य नुडर्थम् इति ।।

विमला - दीर्घग्रहणं षट्संज्ञाज्ञापकमिति । अयम्भावः, **नः संख्यायाः**' इत्युदात्तत्वं बाधित्वा घृतादिपाठादन्तोदात्तोऽष्टन् शब्दः । **तस्माद्भिसि** अष्टभिः अष्टाभिरिति । रूपद्वयम्भवति तत्रात्वाभावे मध्योदात्तम्, आत्वपक्षे त्वन्तोदात्तमिति

१. लुप्तं स्यात् ।

सिद्धान्तः । तत्र '**षट् त्रिचतुर्भ्यो हलादिरि**'त्यनेन षण्णां षड्भिरित्यादाविव विभक्तेरुदात्तत्वम्प्राप्तम् । तद्बाधित्वा षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं भवतीत्यर्थकेन '**झल्युपोत्तममि**'त्यनेनोपोत्तमस्योदात्तत्वे प्राप्तेऽष्टनो दीर्घादित्यारभ्यते । दीर्घान्तादष्टनः पराऽसर्वनामस्थानविभक्तिरुदात्ता भवतीत्यस्यार्थः । तत्र यदि आत्वपक्षे षट्संज्ञा न स्यात्तर्हि तत्र सावकाशोऽष्टन् स्वरः परत्वादात्वाभावपक्षे '**झल्युपोत्तममि**' तिषट्स्वरेण बाधिष्यते इति किं दीर्घग्रहणेन । कृतात्वस्यापि षट्संज्ञायान्तु '**षट्त्रिचतुर्भ्य**' इत्यस्य '**अष्टनोदीर्घा**दिति अष्टन्स्वरोऽपवादः संम्पद्यते । ततश्च दीर्घग्रहणाभावे आत्वाभावपक्षे षट्स्वरम्बाधित्वाष्टन्स्वरो माभूदिति दीर्घग्रहणं चरितार्थम् । नच कृतात्वस्य षट्संज्ञायामपि शसि हलादित्वाभावेन षट्स्वरस्याप्रवृत्तेरष्टन्स्वरस्य सावकाशतया षट्स्वरबाधकत्वं न स्यादिति वाच्यम्, अष्टन् शब्दस्य घृतादित्वादन्तोदात्ततया **तत्रैकादेश उदात्तेनोदात्त** इति सूत्रेणैवोदात्तत्वसिद्धेः । नच षट्स्वरविधायके विहितविशेषणाश्रयणेन समासे गौणे तदप्राप्तेः प्रियाष्टाभ्यामित्यादावष्टन्स्वरः सावकाश इति वाच्यम्, एतज्ज्ञा-पकपरभाष्यप्रामाण्याद**ष्टन इति** सूत्रेऽपि विहितविशेषणाश्रयणेन समासे **तिसृभ्योजस इति** सूत्रस्थेन '**उपसमस्तार्थमित्येके**' इति भाष्येण तुल्यन्यायात् षट्स्वरस्यापि तदन्ते प्रवृत्तेरुक्तत्वाच्च, '**एके**' इति मुख्यार्थकम् । एवञ्च दीर्घपक्षइव तदभावपक्षेऽपि विभक्तेरुदात्ततास्या दिति तद्व्यावृत्त्यर्थं दीर्घग्रहणं चरितार्थम् । तस्माद्दीर्घग्रहणेनात्व-पक्षेऽपि षट्संज्ञाज्ञाप्यत इति ।' '**यावता विनानुपपत्तिस्तावत्सर्वं ज्ञापयती**' ति न्यायेन दीर्घग्रहणेनैवात्ववैकल्पिकत्वमपि ज्ञापयतीति बोध्यम् ।

।। इति पण्डितमहेशझाशर्म्म-विरचितायाम् महाभाष्यव्याख्यायां विमलाख्यायाम्प्रथमाध्यायस्य प्रथमे पादे पञ्चममाह्निकम् ।।

(एकदेशिनः समाधानभाष्यम्)

[१]अथवाऽऽकारोऽप्यत्र निर्दिश्यते—षकारान्ता नकारान्ता आकारान्ता च संख्या षट्संज्ञा भवतीति ।।

(समाधानबाधकभाष्यम्)

१. इतः पूर्वं ''आकारनिर्द्देशाद्वा'' इति समाधानवार्तिकं लुप्तं स्यात् ।

इहापि तर्हि प्राप्नोति,—"सधमादो द्युम्न एकास्ताः" । एका इति ।।

(समाधानसाधकभाष्यम्)

नैष दोषः । एकशब्दोऽयं बह्वर्थः । अस्त्येव संख्यापदम्-तद्यथा-एको द्वौ बहव इति ।। अस्त्यसहायवाची । तद्यथा —एकाग्नयः, एकहलानि, एकाकिभिः क्षुद्रकैर्जितमिति । असहायैरित्यर्थः ।। अस्त्यन्यार्थे वर्त्तते । तद्यथा—'प्रजामेका रक्षत्यूर्जमेका' इति । अन्येत्यर्थः ।। 'सधमादो द्युम्न एकास्ताः । अन्या इत्यर्थः । तद्योऽन्यार्थे वर्त्तते तस्यैष प्रयोगः ।।

(समाधानबाधकभाष्यम्)

इह तर्हि प्राप्नोति-'द्वाभ्यामिष्टये विंशत्या च' इति ।

(सिद्धान्तिसमाधानान्तरभाष्यम्)

[1]एवं तर्हि सप्तमे योगविभागः करिष्यते-"अष्टाभ्य औश्' । ततः "षड्भ्यः" । षड्भ्यश्च यदुक्तमष्टाभ्योऽपि तद्भवति । ततो "लुक्" । लुक् च भवति षड्भ्य इति ।

(समाधानान्तरभाष्यम्)

अथ वा—उपरिष्टाद् योगविभागः करिष्यते— "अष्टन आ विभक्तौ" । ततो "रायः" । रायश्च विभक्तावाकारादेशो भवति । "हलि" इत्युभयोः शेषः ।।

(आक्षेपभाष्यम्)

---

१. इतः पूर्वं "योगविभागाद्वा" इति वार्तिकं लुप्तं स्यात् ।

यद्येवम्—प्रियाष्टौ, प्रियाष्टा इति न सिध्यति, प्रियाष्टानौ, प्रियाष्टान इति च प्राप्नोति ।

(समाधानसिद्धान्तिभाष्यम्)

यथालक्षणमप्रयुक्ते ।। ष्णान्ता षट् ।।२३।।

(षट्संज्ञासूत्रम्)

डति च ।।१।१।२४।।

(प्रत्याख्यानभाष्यम्)

इदं डतिग्रहणं द्विः क्रियते-संख्यासंज्ञायां, षट्संज्ञायां च । एकं शक्यमकर्तुम् ।

कथम् ?

यदि तावत् संख्यासंज्ञायां क्रियते, षट्संज्ञायां न करिष्यते ।

कथम् ?

"ष्णान्ता षट्" इत्यत्र डतीत्यनुवर्तिष्यते ।।

अथ षट्संज्ञायां क्रियते संख्यासंज्ञायां न करिष्यते ।।

कथम् ?

"'इति च' इत्यत्र संख्यासंज्ञाऽप्यनुवर्तिष्यते ।। डति च ।।२४।।

(निष्ठासंज्ञासूत्रम्)

क्तक्तवतू निष्ठा ।।१।१।२५।।

(२०७-आक्षेपवार्तिकम्-१)

॥*॥ निष्ठासंज्ञायां समानशब्दप्रतिषेधः[१] ॥*॥

(भाष्यम्)

निष्ठासंज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः । लोतो गर्त इति ॥

(२०८-आक्षेपबाधकवार्तिकम्-२)

॥*॥ निष्ठासंज्ञायां समानशब्दाऽप्रतिषेधः ॥*॥

(भाष्यम्)

निष्ठासंज्ञायां समानशब्दानामप्रतिषेधः । अनर्थकः प्रतिषेधः[२] अप्रतिषेधः ॥

(आक्षेपभाष्यम्)

निष्ठासंज्ञा कस्मान्न भवति ?

(२०९-आक्षेपबाधकहेतुवार्तिकम्-३)

॥*॥ अनुबन्धोऽन्यत्त्वकरः[३] ॥*॥

(भाष्यम्)

अनुबन्धः क्रियते सोऽन्यत्त्वं करिष्यति ॥

(२१०-आक्षेपबाधकहेतुनिराकरणवार्तिकम्-४)

॥*॥ अनुबन्धोऽन्यत्त्वकर इति चेन्न लोपात् ॥*॥

(भाष्यम्)

अनुबन्धोऽन्यत्त्वकर इति चेत् । तन्न ॥

---

१. भाष्यमिदमित्यन्ये । २. 'प्रतिषेधे' इति क्वचित् । ३. भाष्यमिदमित्यन्ये ।

किं कारणम् ?

'लोपात्' । लुप्यतेऽत्रानुबन्धः । लुप्ते चानुबन्धे[1] नान्यत्त्वं भवति[2] । तद्यथा-'कतरद्देवदत्तस्य गृहम्' ?, 'अदो यत्रासौ काकः' इति । [3]उत्पतिते काके नष्टं तद्गृहं भवति । एवमिहापि लुप्तेऽनुबन्धे नष्टो प्रत्ययो भवति ।।

(समाधानसाधकभाष्यम्)

यद्यपि लुप्यते, जानाति त्वसौ—सानुबन्धकस्येयं संज्ञा कृतेति । तद्यथा- इतरत्रापि कतरद्देवदत्तस्य गृहम् ? 'अदो यत्रासौ काकः' इति । उत्पतिते काके यद्यपि नष्टं तद्गृहं भवति, अन्ततस्तमुद्देशं जानातीति ।।

(२११-आक्षेपवार्तिकम्-५)

।।।।सिद्धविपर्यासश्च[4] ।।*।।*

(भाष्यम्)

सिद्धश्च विपर्यासः । यद्यपि जानाति, संदेहस्तु तस्य भवति—अयं स तशब्दो लोतो गर्त इति, अयं स तशब्दो लूनो गीर्ण इति । [5]तद्यथा इतरत्रापि 'कतरद्देवदत्तस्य गृहम् ?', 'अदो यत्रासौ काकः' इति । उत्पतिते काके यद्यपि तमुद्देशं जानाति संदेहस्तु तस्य भवति—इदं तद्गृहमिदं तद्गृहमिति ।

(आक्षेपनिराकरणभाष्यम्)

---

१. 'लुप्तेऽत्रानु०' इत्यपि पाठः । २. भविष्यति (?) ।

३. इतः पूर्वं 'काक उत्पतति' इत्यपि क्वचित् ।

४. 'यथाऽन्यत्र' इति क्वचिदधिकम् ।

५. इतः पूर्वं 'यथाऽन्यत्र' इत्यंशः अधिकः ।

एवं तर्हि—

(२१२-समाधानवार्तिकम्-६)

॥*॥ कारककालविशेषात् सिद्धम्[१] ॥*॥

(भाष्यम्)

कारककालविशेषावुपादेयौ । भूते यस्तशब्दः कर्मणि कर्तरि[२] भावे चेति । तद्यथा इतरत्रापि य एष मनुष्यः प्रेक्षापूर्वकारी भवति सोऽध्रुवेण निमित्तेन ध्रुवं निमित्तमुपादत्ते—वेदिकां पुण्डरीकं वा ॥

(आक्षेपभाष्यम्)

एवमपि 'प्राकीर्ष्टे'त्यत्रापि[३] प्राप्नोति ॥

(२१३-समाधानवार्तिकम्-७)

॥*॥ लुङि सिजादिदर्शनात् ॥*॥

(भाष्यम्)

लुङि सिजादिदर्शनान्न भविष्यति ॥

(आक्षेपभाष्यम्)

यत्र[४] तर्हि सिजादयो न दृश्यन्ते—प्राभित्तेति ।

(समाधानभाष्यम्)

दृश्यन्तेऽत्रापि सिजादयः ॥ किं वक्तव्यमेतत् ? नहि ॥

---

१. 'यथाऽन्यत्र' इति क्वचिदधिकम् ।
२. क्वचिद्विपर्यासः ।
३. 'प्राकार्ष्ट' इति क्वचित्, 'अपि' इति क्वचिन्न ।
४. 'तत्र' इति क्वचित् ।

'कथमनुच्यमानं गंस्यते ?

यथैवायममुपदिष्टान् कारककालविशेषानवगच्छति एवमेतदप्यवगन्तुमर्हति —यत्र सिजादयो नेति ।। क्तक्तवतू० ।।२५।।

इति श्रीमद्भागवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमाध्यायस्य प्रथमपादे पञ्चममाह्निकम् ।।

अथ षष्ठमाह्निकम्

(अथ सर्वनामसंज्ञाप्रकरणम्)

(सर्वनामसंज्ञासूत्रम्)

सर्वादीनि सर्वनामानि ।।१।१।२६।।

(सर्वादिशब्दार्थनिरूपणाधिकरणम्)

(पूर्वपक्षिभाष्यम्)

सर्वादीनीति कोऽयं समासः ?

विमला - बहुव्रीहावतद्गुणसंविज्ञानमेव भवति न तु तद्गुणसंविज्ञानमितिमते सर्वादीनीत्यत्र सर्व आदिर्येषामिति बहुव्रीहौ सर्वशब्दस्य सर्वनामसंज्ञा न प्राप्नोतीति सर्वश्चासावादिश्चेति सर्वादिः, सर्व आदिर्येषामिति सर्वादीनि । सर्वादिश्च सर्वादीनि चेति । ''**नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति**'' नपुंसकस्यैकशेषे सर्वादीनीत्येकशेषकरणे तु सर्वशब्दस्याऽपि सर्वनामसंज्ञोपपद्यते । सर्वश्चासावादिश्चेत्यादिशब्दोपादानमेकशेषप्रयोजकसारूप्यसम्पादनार्थमित्याशयेन पृच्छति—**कोऽयं समास इति** ।

(समाधानभाष्यम्)

बहुव्रीहिरित्याह ।।

विमला - बहुव्रीहौ तद्गुणसंविज्ञानस्याऽपि सत्त्वादेकशेषं विनाऽपि सर्वशब्दस्य संज्ञा भविष्यति इत्याशयेन सिद्धान्ती समाधत्ते–**बहुव्रीहिरित्याहेति** ।

(अनुयोगभाष्यम्)

कोऽस्य विग्रहः ?

विमला - आशयानभिज्ञः शङ्कते—**कोऽस्य विग्रह इति** ।

(समाधानभाष्यम्)

सर्वशब्द आदिर्येषां तानीमानीति ।।

विमला - सर्वशब्द इति । शब्दपदोपादानं सर्वपदस्य शब्दपरत्वबोधनाय ।

(आक्षेपभाष्यम्)

यद्येवं सर्वशब्दस्य सर्वनामसंज्ञा न प्राप्नोति ।।

किं कारणम् ?

अन्यपदार्थत्वाद्बहुव्रीहेः ।।

बहुव्रीहिरयमन्यपदार्थे वर्तते, तेन यदन्यत्सर्वशब्दात्तस्य सर्वनामसंज्ञा प्राप्नोति । तद्यथा 'चित्रगुरानीयताम्' इत्युक्ते यस्य ता गावो भवन्ति स आनीयते, न गावः ।।

विमला - आक्षेप्ता स्वाशयं प्रकाशयति—**यद्येवमिति** ।

(समाधानभाष्यम्)

नैष दोषः, भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि । तद्यथा "चित्रवाससमानय" "लोहितोष्णीषा ऋत्विजःप्रचरन्ति" इति तद्गुण आनीयते, तद्गुणाश्च प्रचरन्ति ।।

विमला - सिद्धान्ती समाधानाशयं प्रकटयति—**नैष दोष इति** ।

(सर्वनामपदसाधुत्वाधिकरणम्)

(आक्षेपभाष्यम्)

इह सर्वनामानीति "पूर्वपदात्संज्ञायामगः" इति णत्वं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः ।।

(२१४-समाधानवार्तिकम्-१)

।।*।। सर्वनामसंज्ञायां निपातनाण्णत्वाऽभावः ।।*।।

(भाष्यम्)

सर्वनामसंज्ञायां निपातनाण्णत्वं न भविष्यति ।।

(आक्षेपभाष्यम्)

किमेतन्निपातनं नाम ?

(प्रतिबन्दीभाष्यम्)

अथ कः प्रतिषेधो नाम ?

(प्रतिबन्द्युत्तरभाष्यम्)

अविशेषेण किंचिदुक्त्वा विशेषेण "न" इत्युच्यते, तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यते– 'इदं न भवति' इति ।।

(समाधानभाष्यम्)

निपातनमप्येवं जातीयकमेव । अविशेषेण णत्वमुक्त्वा विशेषेण निपातनं क्रियते, तत्र व्यक्तमाचार्यस्याऽभिप्रायो गम्यते—'इदं न भवति' इति ।।

(आक्षेपभाष्यम्)

ननु च—निपातनाच्चाऽणत्वं स्यात्, यथाप्राप्तं च णत्वम् ।।

(प्रतिबन्दीभाष्यम्)

किमन्येऽप्येवं विधयो भवन्ति ?

(प्रतिबन्द्युत्तरभाष्यम्)

भवन्ति ।।

(आक्षेपभाष्यम्)

इह–"इको यणचि" इति वचनाद् यण् स्यात् । यथाप्राप्तश्चेक् श्रूयेत[1] ।।

(समाधानभाष्यम्)

नैष दोषः । अस्त्यत्र विशेषः । षष्ठ्याऽत्र निर्देशः क्रियते । षष्ठी च पुनः स्थानिनं निवर्तयति ।।

(आक्षेपभाष्यम्)

इह तर्हि "कर्तरि शप्" "दिवादिभ्यः श्यन्" इति वचनाच्च श्यन् स्यात्, यथाप्राप्तश्च[2] शप् श्रूयेत ।।

(समाधानभाष्यम्)

नैष दोषः । शबादेशाः श्यन्नादयः करिष्यन्ते ।।

(आक्षेपभाष्यम्)

तत् तर्हि शपो ग्रहणं कर्तव्यम् ?

(आक्षेपबाधकभाष्यम्)

न कर्तव्यम् । प्रकृतमनुवर्तते ।।

क्व प्रकृतम् ?

"कर्तरि शप्" इति ।।

(आक्षेपसाधकभाष्यम्)

तद्वै प्रथमानिर्दिष्टम् । षष्ठीनिर्दिष्टेन चेहाऽर्थः ।।

(आक्षेपबाधकभाष्यम्)

'दिवादिभ्य' इत्येषा पञ्चमी शबिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति "तस्मादित्युत्तरस्य" इति ।।

---

१. श्रूयते (?) । २. 'यथा प्राप्तञ्च' इति पाठभेदः ।

(आक्षेपसाधकभाष्यम्)

प्रत्ययविधिरयम् । न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति ।।

(आक्षेपबाधकभाष्यम्)

नाऽयं प्रत्ययविधिः । विहितः प्रत्ययः । प्रकृतश्चानुवर्तते ।।

(आक्षेपभाष्यम्)

इह तर्हि–"अव्ययसर्वनाम्नामकच् प्राक्टेः" इति वचनाच्चाऽकच् स्याद्, यथाप्राप्तश्च कः श्रूयेत ।।

(समाधानभाष्यम्)

नैष दोषः, नाऽप्राप्ते हि केऽकजारभ्यते, स बाधको भविष्यति ।।

(सिद्धान्तिसमाधानभाष्यम्)

निपातनमप्येवंजातीयकमेव । नाऽप्राप्ते णत्वे निपातनमारभ्यते, तद्बाधकं भविष्यति ।।

(आक्षेपभाष्यम्)

यदि तर्हि निपातनान्यप्येवंजातीयकानि भवन्ति, समस्तते दोषो भवति । इहान्ये वैयाकरणाः समस्तते विभाषा[1]लोपमारभन्ते—"समो हिततयोर्वा" इति । सततम्, संततम्, सहितम्, संहितमिति ।। इह पुनर्भवान्निपातनाच्च लोपमिच्छति[2]–"अपरस्पराः क्रियासातत्ये" इति, यथाप्राप्तं चाऽलोपम्— संततमिति ।। एतन्न सिध्यति ।।

---

१. 'विभाषामलोप०' इति क्वचित् । २. 'नाल्लोप०', 'म्लोप०' इति पाठान्तरम् ।

(सिद्धान्तिसमाधानभाष्यम्)

कर्तव्योऽत्र यत्नः । बाधकान्येव हि निपातनानि भवन्ति ।

विमला - बाधकान्येवेति । अयम्भावः — 'सातत्य इति न निपातनं, किन्तु स्थालीपुलाक'न्यायेन —

'लुम्पेदवश्यमः कृत्ये तुङ्काममनसोरपि ।

समो वा हिततयोर्मांसस्य पचियुड्घञोः ।।'

इति श्लोकस्य ज्ञापकम् । एवञ्चास्य बाधकत्वाभावेऽपि निपातानां बाधकत्वनियमे न व्यभिचार इति ।

(संज्ञोपसर्जनवारणाधिकरणम्)

(२१५-आक्षेपवार्तिकम्-२)

।।।। संज्ञोपसर्जनप्रतिषेधः ।।*।।*

(भाष्यम्)

संज्ञोपसर्जनीभूतानां सर्वादीनां प्रतिषेधो वक्तव्यः । सर्वो नाम कश्चित्तस्मै सर्वाय देहि । अतिसर्वाय देहि ।।

(आक्षेपभाष्यम्)

स कथं कर्तव्यः[१] ?

(२१६-समाधानवार्तिकम्-३)

।।।। पाठात्पर्युदासः,*
पठितानां संज्ञाकरणम् ।।।।*

---

१. 'वक्तव्यः' इति क्वचित् ।

पाठादेव पर्युदासः कर्तव्यः । शुद्धानां पठितानां संज्ञा कर्तव्या । सर्वादीनि सर्वनामसंज्ञानि भवन्ति, संज्ञोपसर्जनीभूतानि न सर्वादीनि ।।

विमला - पाठादिति । पठ्यते अस्मिन्निति पाठोगण: अधिकरणे घञ् तस्मात् पर्य्युदास: कर्तव्य इत्यर्थ: । **न सर्वादीनीति** । संज्ञोपसर्जनीभूतानि सर्वादिगणपठितानि नेत्यर्थ: ।

(आक्षेपभाष्यम्)

किमविशेषेण ?

(समाधानभाष्यम्)

नेत्याह । विशेषेण च ।।

(वार्तिकावतरणभाष्यम्)

किं प्रयोजनम् ?

(२१७-प्रयोजनवार्तिकम्-४)

।।*।। सर्वाद्यानन्तर्यकार्यार्थम् ।।*।।

(भाष्यम्)

सर्वादीनामानन्तर्येण यदुच्यते कार्यं तदपि संज्ञोपसर्जनीभूतानां मा भूदिति ।।

विमला - सर्वाद्यानन्तर्य्यकार्य्यार्थमिति । सर्वादीनामानन्तर्य्येण यदुच्यते कार्य्यं तन्निवृत्यर्थमित्यर्थ: । 'मक्षिकार्थो धूम' इति वदर्थशब्दप्रयोग: ।

(प्रश्नभाष्यम्)

किं प्रयोजनम् ?

(२१८-प्रयोजनवार्तिकम्-५)

।।*।। प्रयोजनं डतरादीनामद्ड्भावे ।।*।।

(भाष्यम्)

डतरादीनामद्ड्भावे[1] प्रयोजनम् ।। अतिक्रान्तमिदं ब्राह्मणकुलं कतरद्—अतिकतरं ब्राह्मणकुलमिति ।।

(१-प्रयोजनवार्तिकम्)

।।*।। त्यदादिविधौ च ।।*।।

(भाष्यम्)

त्यदादिविधौ च प्रयोजनम् । अतिक्रान्तोऽयं ब्राह्मणस्तम् अतितद् ब्राह्मण इति ।।

(संज्ञाप्रतिषेधप्रत्याख्यानभाष्यम्)

संज्ञाप्रतिषेधस्तावन्न वक्तव्यः। उपरिष्टाद्योगविभागः करिष्यते—"पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम्" । ततः- "असंज्ञायाम्" इति । सर्वादीनीत्येवं यान्यनुक्रान्तानि, असंज्ञायां तानि द्रष्टव्यानि ।।

(उपसर्जनप्रतिषेधप्रत्याख्यानभाष्यम्)

उपसर्जनप्रतिषेधश्च न कर्त्तव्यः । "अनुपसर्जनात्" इत्येष योगः प्रत्याख्यायते । तमेवमभिसंभन्त्स्यामः-अनुपसर्जन अ अदिति ।।

किमिदम् — अ अदिति ?

अकाराऽत्कारौ शिष्यमाणौ अनुपसर्जनस्य द्रष्टव्यौ ।।

---

१. 'मद्भावे' इति क्वचित् ।

विमला - उपसर्जनप्रतिषेधश्च न कर्तव्य इति । चोऽप्यर्थे उपसर्जनप्रतिषेधोऽपि न कर्तव्य इत्यर्थः । **अनुपसर्जनादित्येषयोगः प्रत्याख्यायत इति** । स्त्रीप्रत्ययप्रकरणस्थमिदं सूत्रं तत्राऽनुपयुज्यमानं परिभाषारूपं ज्ञातव्यमित्यर्थः । न च पञ्चगवधन इत्यत्र पञ्चगवेत्यस्योपसर्जनत्वेन तत्र ङीब्निवृत्त्यर्थमनुपसर्जनाधिकारस्यावश्यकतया प्रत्याख्यानमसङ्गतमिति वाच्यम्, तत्रार्थवत्सूत्रोक्तार्थवत्त्वाभावेन टजन्तस्य प्रातिपदिकत्वाभावेन ङीपोऽप्राप्तेः । न च आपिशालिना प्रोक्तां मीमांसामधीते या सा आपिशला ब्राह्मणीत्यत्र ङीब्वारणार्थमनुपसर्जनाधिकारस्य आवश्यकत्वमितिवाच्यम्, स्त्रियामित्यस्य गृह्यमाणविशेषणतया प्रोक्तार्थकस्याणः स्त्रियामवर्त्तनेन ङीपोऽप्रवृत्तेः । अध्येत्रर्थकाण्णिमित्तकस्तु न ङीप्, तस्य लुप्तत्वात् । न च प्रत्ययलक्षणेन प्राप्तिः, अण् योऽकार इति व्याख्यानेन वर्णाश्रयतया प्रत्ययलक्षणाप्रवृत्तेः । नच तथापि स्त्रीप्रत्यये तदन्तविधेः, स्त्रियामित्यस्य तदन्तविशेषणत्वस्य, अनुपसर्जनादित्यस्य गृह्यमाणविशेषणत्वस्य च ज्ञापनार्थमेवाऽनुपसर्जनाधिकारोऽस्तु, बहुकुरुचरेत्यादौ ङीपो वारणेन स्वांशे चारितार्थ्यस्य, कौम्भकारेय इति फलस्य च संम्भवात्, अन्यथा कुम्भकार्याः अपत्यमिति विग्रहे केवलकारीशब्दादपि **स्त्रीभ्यो ढगिति** ढगापत्त्या कुम्भकारेय इत्यापद्येत । न चैकार्थीभावरूपसामर्थ्यस्य समुदायवृत्तित्वेनैकदेशावृत्तित्वादेकदेशात्तद्धितोत्पत्तिर्न स्यादिति वाच्यम्, **तद्धितार्थोत्तरपदसमाहारे** चेत्यनेनोत्तरपदे समासविधानादपर्याप्त्याप्येकार्थीभावमादाय वृत्तेः सम्भवात् । **येन विधिरिति** सूत्रे प्रत्ययग्रहणे तदादितदन्तविधेः प्रयोजनम्, परमगार्ग्यायण इति भाष्योक्तेश्च । पर्याप्त्यैवेकार्थीभावस्य वृत्तिप्रयोजकत्वे तु उक्तस्थले परमश्चासौ गार्ग्यायणश्चेत्यर्थो वाच्य इति नैव परमगार्ग्यात्प्रसक्तिरिति तत्प्रयोजनत्वोक्तिरसङ्गता स्यात् । अपर्य्याप्त्याप्येकार्या र्थीभावस्य वृत्तिप्रयोजकत्वे तु परमगार्ग्यस्यापत्यमिति विग्रहेऽपि गार्ग्यशब्दादेव प्रत्ययो न विशिष्टादिति तत्प्रयोजनत्वोक्तिः संगच्छते ।

न च समुदायान्ङीप्यपि अनुपसर्जने स्त्रीप्रत्यये तदादिनियमाभावेन केवलादपि कदाचित् ढकि कुम्भरेयो दुर्वार एवेति वाच्यम्, तदादिनियमाभावेनाधिकस्यैव कार्य्यम्बोध्यते न तु न्यूनस्येतिकल्पनेनादोषात् । न च '**कृद्ग्रहण**' परिभाषया समुदायादेव ङीप् स्यादिति वाच्यम्, कृन्मात्रग्रहणे तस्याः प्रवृत्तेः । न च तद्धितस्याप्यणः सम्भवेन प्रकृते कृन्मात्रग्रहणाभाव इति वाच्यम्, अमहत्पूर्वग्रहणेनैव स्त्रीप्रत्यये तदन्तविधिज्ञापनसम्भवात् । न च पञ्चाजीत्यादिसिद्ध्यर्थमजादिभिःस्त्रीत्वस्य विशेषणादित्यस्योक्तत्वेन

महाशूद्रीत्यत्र समुदायस्य स्त्रियाम्वृत्तावपि शूद्रशब्दस्यातथात्वेन तदन्तविधिज्ञापनेऽपि स्वांशे चारि-तार्थ्याभावेनामहत्पूर्वाग्रहणस्य तदन्तविधिज्ञापकत्वं न सम्भवतीति वाच्यम्, अजाद्यन्तपदावच्छिन्नाजत्वाद्यवच्छिन्नधर्म्मितानिरूपित-स्त्रीत्वनिष्ठप्रकारतानिरूपक-बोधतात्पर्येणोच्चारितात्प्रातिपदिकाट्टाबित्यर्थेनादोषात् । तथाहि, पञ्चाजीत्यत्र स्त्रीत्वनिष्ठप्रकारतानिरूपिताया: अजाद्यन्तपदावच्छिन्नाया: धर्म्मिताया: समाहारत्वावच्छिन्नाया अजत्वाद्यनवच्छिन्नत्वान्न टाप् । ब्राह्मणादुग्रकन्यायामुत्पन्न-स्याप्याभीरस्याऽनुलोमसंकराणां मातृजातिवृत्तित्वमितिस्मृत्या शूद्रत्वजातिमत्त्वेन तद्बोधकमहाशूद्रशब्दस्य अजाद्यन्तपदावच्छिन्न - शूद्रत्वावच्छिन्नधर्म्मितानिरूपितस्त्री-त्वनिष्ठप्रकारताकबोधजनकत्वेन प्राप्तस्य टापो वारणार्थतया भवत्यमहत्पूर्वग्रहणस्य स्वांशे चारितार्थ्यमित्यमहत्पूर्वाग्रहणस्य तदन्तविधिज्ञापकत्वमुपपद्यते ।

नागेशभट्टानां पुनरेष आशय: — अमहत्पूर्वाग्रहणं तत्सूत्र एव तदन्तविधिज्ञापकम् । अतिधीवरीत्यादिकन्तु **बहुव्रीहौ** वेतिज्ञापकात्सिद्धमिति स्त्रीप्रत्यये तदन्तविधिज्ञापनार्थमनुपसर्जनाधिकारोऽप्यावश्यक: । 'अनुपसर्जनादित्येष योग: प्रत्याख्यायते' इति तु वार्तिककृत: विस्तरस्तू**द्योते द्रष्टव्य**: ।

केचित्तु — अमहत्पूर्वाग्रहणस्य स्त्रियामित्यधिकारे तदन्तविधिज्ञापकत्वान्न तदर्थमनुपसर्जनाधिकार: । किञ्चाऽनुपसर्जनाधिकारेण तदन्तविधिज्ञापनात् प्रागप्यणन्तात्प्रातिपदिकादित्यर्थस्त्वयाऽङ्गीकृतस्तथा च आपिशलाब्राह्मणीत्यत्र प्रोक्तार्थकमणमादाय ङीब्वारणायाऽनुपसर्जनाधिकार आवश्यक इति न तस्य तदन्तविधिज्ञापकता । अतिमहतीत्याद्यर्थं स्त्रियामित्यस्य प्रकृतिविशेषणत्वनिर्णयेन प्रोक्ताण: स्त्रियामवृत्तावपि तदन्तस्य स्त्रियाम्वृत्ते: । ननु स्त्रियामित्यस्य प्रकृतिविशेषणत्वमपि अनुपसर्जनाधिकारज्ञाप्यमेवेति चेन्न, तदन्तविधिज्ञापकत्वेऽपि एतज्ज्ञापनम्विना वैयर्थ्यानुद्धारेण प्रकृतिविशेषणत्वमपि ज्ञापयतीति वक्तव्यमित्यावश्यकत्वात् । स्त्रियामित्यस्य प्रकृतिविशेषणत्वे ज्ञापिते उक्तस्थले ङीब्वाणाय चरितार्थस्य तदन्तविधिज्ञापकत्वासम्भव: । अनुपसर्जनाधिकारस्थेषु तदन्तविधेरुपयोगाभावश्च । ननु तत्प्रयोजनं कुम्भकारेय इत्यस्य पाक्षिकरूपस्य वारणमिति चेन्न, अनुपसर्जने स्त्रीप्रत्यये तदादिनियमाभावेन पाक्षिकानिष्टस्य दुर्वारत्वात्, तदादिनियमाभावेनाधिकस्य कार्य्यम्बोध्यते न न्यूनस्येतिकल्पनाया: निर्मूलत्वात् । किञ्चैकार्थाभावपर्याप्त्यधिकरणत्वस्यैव

वृत्तिनिमित्तत्वम्, अन्यथा काष्ठंश्रिता काष्ठश्रिता काष्ठश्रिताया अपत्यं काष्ठश्रैतैय इत्यापद्येत, एवञ्च '**तद्धितार्थोत्तरपद समाहारे चे**' तिसूत्रप्रामाण्यात् पञ्चगवधन इत्यादौ, '**येनविधिरि**' तिसूत्रस्थभाष्यप्रामाण्यात् परमगार्ग्यायण इत्यादौ, एकार्थीभावपर्य्याप्त्य-नधिकरणे वृत्तिस्वीकारेऽपि अन्यत्र तथा स्वीकारे मानाभावेन नात्र कारीशब्दात् ढकः प्राप्तिः । किञ्च **स्त्रीभ्योढगि**त्यस्य स्त्रीवाचकात्प्रातिपदिकाड्ढगित्यर्थ इति नैव कारीशब्दात् ढकः प्रसक्तिरिति । आपिशला ब्राह्मणीत्यत्र ङीब्वारणमेवानुपसर्जनाधिकारफलम्, तदुक्तमत्र भाष्ये आपिशलिना प्रोक्तम्, आपिशलमधीते आपिशला ब्राह्मणीत्यत्र ङीब् वारणमेवानुपसर्जनाधिकारप्रयोजनमिति । तथाचैतत्सूत्रस्थम् 'अनुपसर्जनादित्येषयोगः प्रत्याख्यायते' इतिभाष्यम् । अनुपसर्जनादितिसूत्रस्थम् '**इदन्तर्हि प्रयोजनं प्रधानेन तदन्तविधिर्यथास्यादि**'तिभाष्यञ्चैकदेश्युक्तिः । अत एवाग्रे नेदं संज्ञाकरणं पाठविशेषणमिदमित्यादिना समाधानान्तरद्वयं भगवान् वक्ष्यतीति वदन्ति । **तमेवमिति** । तं योगम् एवम् वक्ष्यमाणप्रकारेण । **अभिसंभन्त्स्यामः** व्याख्यास्यामः ।

(आक्षेपभाष्यम्)

यद्येवम् अतियुष्मद् अत्यस्मद् इति न सिध्यति ।।

(समाधानभाष्यम्)

प्रश्लिष्टनिर्देशोऽयम्—'अनुपसर्जन अ अ' अदिति । अकाराद्[1] अकारान्तकारौ शिष्यमाणावनुप-सर्जनस्य द्रष्टव्यौ ।।

(एकदेशिसमाधानान्तरभाष्यम्)

अथवा—अङ्गाधिकारे यदुच्यते, गृह्यमाणविभ-क्तेस्तद्भवति ।।

विमला - गृह्यमाणविभक्तेरिति । गृह्यमाणाद्विहितविभक्तेरित्यर्थः । विभक्तेरित्यत्र सम्बन्धसामान्ये षष्ठी । तथा चाङ्गाधिकारीयं कार्य्यं गृह्यमाणप्रकृतिक-विभक्तौ परे तादृशविभक्त्युद्देश्यकं वा भवतीति समुदायार्थः ।

---

१. 'अकारान्तादका०' इति क्वचित् ।

(समाधानबाधकभाष्यम्)

यद्येवम्, परमपञ्च परमसप्त "षड्भ्यो लुग्" इति लुग् न प्राप्नोति ।।

विमला - लुग् न प्राप्नोतीति । विभक्तेः गृह्यमाणप्रकृतिकत्वाभावादितिभावः ।

(समाधानसाधकभाष्यम्)

नैष दोषः । षट्प्रधान एष समासः ।।

विमला - षट् प्रधान एष समास इति । परमपञ्चन् शब्दस्यापि संख्याप्रकार-कसंख्येयमुख्यविशेष्यकबोधजनकत्वेन षट्त्वात् ततो विहितप्रत्यये गृह्यमाणप्रकृति-कत्वानपायादिति भावः ।

(समाधानबाधकभाष्यम्)

इह तर्हि-'प्रियसक्थ्ना ब्राह्मणेन', अनङ् न प्राप्नोति ।।

विमला - अनङ् न प्राप्नोतीति । अनङोऽङ्गाधिकारीयतया गृह्यमाणप्रकृतिकविभक्तावेव विधानं स्यादिति प्रियसक्थ्नेत्यादौ तदभावेनानङ् न प्राप्नोतीति भावः ।

(समाधानसाधकभाष्यम्)

सप्तमीनिर्दिष्टे यदुच्यते, प्रकृतविभक्तौ तद्भवति ।।

(समाधानबाधकभाष्यम्)

यद्येवम्, अतितद् अतितदौ अतितद इति अत्वं प्राप्नोति[1] । तच्चापि वक्तव्यम् ।।

विमला - अत्वं प्राप्नोतीति । अतितद् इत्यादौ विभक्तेरङ्गार्थसंबन्धित्वादितिभावः ।

---

१. इतः परं 'सप्तमीनिर्दिष्टे यदुच्यते प्रकृतविभक्तौ तद्भवति'– इत्यंशः क्वचिदधिकः ।

तच्चापीति । तत्पदेन अङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवतीत्यस्य परामर्शः । अपिपदेन च प्रकृतिविभक्तौ तद्भवतीत्यस्य, तथा च त्वन्मते गौरवमितिभावः ।

(समाधानसाधकभाष्यम्)

न वक्तव्यम् । इह तावत्–"अड्डडतरादिभ्यः पञ्चभ्यः" इति पञ्चमी, अङ्गस्येति[2] षष्ठी, तत्राऽशक्यं विभिन्न[3] विभक्तित्वाद् डतरादिभ्य इति पञ्चम्याऽङ्गं विशेषयितुम् । तत्र किमन्यच्छक्यं विशेषयितुमन्यदतो विहितात्प्रत्ययाद्– 'डतरादिभ्यो यो विहित' इति ।।

विमला - एवमुक्तेऽपि विनिगमनाविरहेण गृह्यमाणविभक्तेरित्यस्य अस्थिदधीत्यादौ प्रवृत्तौ अतिदध्नेत्यादिकं न सिद्ध्येत्, एवम् प्रकृतिविभक्तावित्यस्य त्यदादीनाम् इत्यादावुपस्थितौ अतितच्छब्दादावपि तेषाम्प्रवृत्त्यापत्तिरित्याशयेन समाधत्ते—न वक्तव्यमिति । ननु तर्हि अतिकतरं ब्राह्मणकुलमित्यादौ कथमद्डो वारणमित्याशङ्कायामाह—**इह तावदिति** । **विहितात्प्रत्ययादिति** । तथा च डतरादिभ्यो विहितयोरङ्गसंज्ञानिमित्तयोः स्वमोरित्यर्थादतिकतरं कुलमित्यादौ न दोष इतिभावः ।

(समाधानसाधकभाष्यपरिशिष्टम्)

इहेदानीम्— "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः" इति, त्यदादीनामो भवतीति । अस्थ्यादीनामित्येषा षष्ठी, अङ्गस्येत्यपि । त्यदादीनामित्यपि षष्ठी, अङ्गस्येत्यपि । तत्र कामचारः गृह्यमाणेन वा विभक्तिं विशेषयितुमङ्गेन वा । यावता कामचारः । इह तावद् — "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः" इत्यङ्गेन विभक्तिं विशेषयिष्यामः, अस्थ्यादिभिरनङम्–'अङ्गस्य विभक्तावनङ् भवति, अस्थ्यादीना'मिति ।। इहेदानीं त्यदादीनामो भवतीति, गृह्यमाणेन विभक्तिं

१. इतः परं 'स्थाने' इति क्वचित् ।

२. क्वचिद् 'भिन्न' शब्दः नास्ति, 'विविभक्तित्वाद्' वर्तते ।

विशेषयिष्यामः, अङ्गेनाकारम् । 'त्यदादीनां विभक्तावो भवति अङ्गस्ये'ति ।।

विमला - अङ्गस्य विभक्तावनङ् भवतीति । अस्थ्यादीनामनङ् भवति अङ्गसम्बन्धिन्यां विभक्तावित्यर्थः । तथाच प्रियसक्थ्नेत्यादौ विभक्तेरङ्गसम्बन्धित्वानपायादनङ् सिद्ध्यतीति भावः । **अङ्गेनाकारमिति** । त्यदादिसम्बन्धिन्यां विभक्तावङ्गस्यात्वं भवतीत्यर्थः । संबन्धश्चोभयत्र स्वार्थनिष्ठसंख्याभिधायकत्वरूपो ग्राह्यः । अस्ति च परमसः इत्यादावपि त्यदाद्यर्थनिष्ठसंख्याभिधायकत्वं विभक्तेरितिसत्वमुपपद्यते । अतितद् इत्यादौ तु न त्यदाद्यर्थनिष्ठसंख्याभिधायकत्वं विभक्तेरिति न तत्र सत्वमिति बोध्यम् ।

(समाधानबाधकभाष्यम्)

यद्येवम्, 'अतिसः' – अत्वं न प्राप्नोति ।।

(समाधानसाधकभाष्यम्)

नैष दोषः, त्यदादिप्रधान एष समासः ।।

विमला - त्यदादिप्रधान एष समास इति । अतिगतः सः, अतिसः । एवञ्च विभक्तौ त्यदाद्यर्थनिष्ठसंख्याभिधायकत्वमक्षतमितिभावः ।

(सिद्धान्तिभाष्यम्)

अथवा–नेदं संज्ञाकरणम् । पाठविशेषणमिदम्– 'सर्वेषां यानि नामानि तानि सर्वादीनि' । संज्ञोपर्जने च विशेषेऽवतिष्ठेते ।।

विमला - संज्ञाभूतानां प्रतिषेधाय असंज्ञायामितियोगः विभागकर्तव्यः, उपसर्जनीभूतानां प्रतिषेधाय चोपायान्तरं कर्तव्यमितिगौरवम् । अतो लाघवादाह **अथवा नेदं संज्ञाकरणमिति** । ननु पूर्वादिशब्दानां सर्वादित्वं न स्यात् सर्वार्थवाचकत्वाभावात्, न च स्वीयप्रवृत्तिनिमित्ताश्रययावद्व्यक्त्यभिधायकत्वमेव सर्वार्थवाचकत्वमिहाभिप्रेतम्, तच्च पूर्वादीनामप्यक्षतमितिवाच्यम्, तथा सति घटादिशब्दानामपि सर्वादित्वापत्तेरिति चेन्न, विधिसूत्रे सर्वनामग्रहणसामर्थ्येन सकृद्गृहीतशक्त्यैव स्वप्रवृत्तिनिमित्ताश्र-

यविरुद्धानेकजातीयार्थबोधकानामेव सर्वनामत्वाभ्युपगमात् । सकृद्गृहीतशक्त्यैवेत्युक्तेः हरिपदस्य न सर्वनामत्वम्, विरुद्धपदोपादानात् द्रव्यत्वघटत्वाद्यनेकजातीयाश्रयबोधकस्य घटपदादेः न सर्वनामत्वम्, जातिपदोपादानेन च तद्व्यक्तित्वाद्यनेकधर्म्ममादाय पुनर्घटशब्दे न दोष इति बोध्यम् ।

(समाधानबाधकभाष्यम्)

यद्येवम्, संज्ञाश्रयं यत्कार्यं तन्न सिध्यति— "सर्वनाम्नः स्मै" "आमि सर्वनाम्नः सुट्" इति ।।

(समाधानसाधकभाष्यम्)

अन्वर्थग्रहणं तत्र विज्ञास्यते । सर्वेषां यन्नाम तत्सर्वनाम । सर्वनाम्न उत्तरस्य ङेः स्मै भवति । सर्वनाम्न उत्तरस्याऽऽमः सुड् भवति ।।

(समाधानबाधकभाष्यम्)

यद्येवम्, सकलं कृत्स्नं जगदित्यत्रापि प्राप्नोति ।। एतेषां चापि शब्दानामेकैकस्य स स विषयः तस्मिंस्तस्मिन्विषये यो यः शब्दो वर्तते, तस्य तस्य तस्मिंस्तस्मिन्वर्तमानस्य सर्वनामकार्यं प्राप्नोति ।।

विमला - जगदित्यत्राऽपि प्राप्नोतीति । एषामपि सर्वार्थवाचकत्वादितिभावः । न पुनरेषामेव किन्तु सर्वेषामेव शब्दानामित्याशयेनाऽऽशङ्कते—**एतेषाञ्चापीति** । सर्वेषामपीत्यर्थः । अयम्भावः । अन्विताभिधानवादिमते इतरान्विते एवार्थे पदानां शक्तिः । तथाच सर्वस्मिन् घटे, सर्वस्मिन् पटे, इत्यादावपि सर्वपदार्थान्विते घटादावेव घटादिपदानां शक्तिरङ्गीकार्य्या, एवम् घटादिपदार्थान्विते सर्वस्मिन् सर्वपदस्येति सर्वपदस्येव घटादिपदानामपि सर्वार्थवाचकत्वात् सर्वनामकार्य्यम्प्राप्नोति, अथवा यदा सर्वस्मिन् घटे इति प्रयोक्तव्ये घटे इति प्रयुक्तं तात्पर्य्यज्ञानादिकारणकलापाच्च सर्वपदार्थान्वितस्यैव घटस्य ततो बोधो जातस्तत्र घटपदस्य सर्वार्थवाचकत्वेन

सर्वनामकार्य्यम्प्राप्नोतीति । यद्यपि सर्वादिगणपाठसामर्थ्यादेव विधायकेषु सर्वार्थवाचकानामपि सर्वादिगणपठितानामेव ग्रहणमितिकल्पनेन सकलादिपदानां घटादिपदानाञ्च व्यावृत्तिः सम्भवति, तथापि तथा कुतो नाभिहितवानिति भाष्यकार एव प्रष्टव्यः ।

(समाधानसाधकभाष्यम्)

एवं तर्ह्युभयमनेन क्रियते—पाठश्चैव विशेष्यते, संज्ञा च ।।

(आक्षेपभाष्यम्)

कथं पुनरेकेन यत्नेनोभयं लभ्यम् ?

(समाधानभाष्यम्)

लभ्यमित्याह ।

कथम् ?

एकशेषनिर्देशात्[1] ।।

एकशेषनिर्देशोऽयम् । सर्वादीनि च सर्वादीनि च सर्वादीनि । सर्वनामानि च सर्वनामानि च सर्वनामानि । सर्वादीनि सर्वनामसंज्ञानि भवन्ति[2] । सर्वेषां यानि च नामानि तानि सर्वादीनि । संज्ञोपसर्जने च विशेषेऽवतिष्ठेते ।।

(समाधानान्तरभाष्यम्)

अथवा— महतीयं संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः ।।

---

१. क्वचिद्वार्तिकमेतत् । २. 'भवन्तीति' क्वचित् ।

कुत एतत् ?

लघ्वर्थं हि संज्ञाकरणम् ।। तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम्— अन्वर्थसंज्ञा यथा विज्ञायेत—'सर्वादीनि सर्वनामसंज्ञानि भवन्ति । सर्वेषां नामानीति चाऽतः सर्वनामानि । संज्ञोपसर्जने च विशेषेऽवतिष्ठेते' ।।

(उभशब्दपाठप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथोभस्य सर्वनामत्वे कोऽर्थः ?

(२२०-समाधनवार्तिकम्-७)

।।*।। उभस्य सर्वनामत्वेऽकजर्थः ।।*।।

उभस्य सर्वनामत्वेऽकजर्थः पाठः क्रियते । उभकौ ।।

(आक्षेपभाष्यम्)

किमुच्यते'ऽकजर्थ' इति । न पुनरन्यान्यपि सर्वनामकार्याणि ?

(२२१-सामाधानहेतुवार्तिकम्-८)

।।*।। अन्याऽभावो द्विवचनटाब्विषयत्वात् ।।*।।

(भाष्यम्)

अन्येषां सर्वनामकार्याणामभावः ।।

किं कारणम् ?

'द्विवचनटाब्विषयत्वात्' । उभशब्दोऽयं[1] द्विवचनटाब्विषयः । अन्यानि च सर्वनामकार्याण्येकवचनबहुवचनेषूच्यन्ते[2] ।।

(आक्षेपभाष्यम्)

यदा पुनरयमुभशब्दो द्विवचनटाब्विषयः । क इदानीमस्यान्यत्र भवति ?

(२२२-समाधानवार्तिकम्-९)

।।*।। उभयोऽन्यत्र[3] ।।*।।

उभयशब्दोऽस्याऽन्यत्र भवति । उभये देवमनुष्याः, उभयो मणिरिति ।

(आक्षेपभाष्यम्)

किंच स्याद् यद्यत्राऽकज् न स्यात् ?

(समाधानभाष्यम्)

कः प्रसज्येत ।।

(आक्षेपभाष्यम्)

कश्चेदानीं काकचोर्विशेषः ?।।

(समाधानभाष्यम्)

"उभशब्दोऽयं[4] द्विवचनटाब्विषयः" इत्युक्तम् । तत्राऽकचि सत्यकचस्तन्मध्यपतितत्वाच्छक्यते

---

१. क्वचिदयं शब्दः नास्ति ।

२. क्वचिद् बहुवचनस्थाने 'द्विवचनविषयेषु उच्यन्ते' इति पाठः ।

३. 'उभशब्दोऽन्यत्र' इति पाठान्तरम् ।

४. क्वचिदुभयशब्दोयम् ।

एतदुक्तं—द्विवचनपरोऽयमिति । के पुनः सति नाऽयं द्विवचनपरः स्यात् । तत्र द्विवचनपरता वक्तव्या ॥

(आक्षेपभाष्यम्)

यथैव तर्हि के सति नाऽयं द्विवचनपरः, एवमाप्यपि सति नायं द्विवचनपरः स्यात् । तत्रापि द्विवचनपरता वक्तव्या ॥

(२२३-समाधानवार्तिकम्-१०)

॥*॥ *अवचनादापि तत्परविज्ञानम्*[1] ॥*॥

(भाष्यम्)

अन्तरेणापि [2]वचनमापि द्विवचनपरोऽयं भविष्यति ॥

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत् ?

(समाधानभाष्यम्)

नहि ॥

(आक्षेपभाष्यम्)

कथमनुच्यमानं गंस्यते ?

(समाधानभाष्यम्)

एकादेशे कृते द्विवचनपरोऽयमन्तादिवद्भावेन ॥

(२२४-प्रत्याख्यानवार्तिकम्-११)

---

१. भाष्यमिदमित्यन्ये ।   २. टापि परे इत्यर्थः ।

॥*॥ अवचनादापि तत्परविज्ञानमिति चेत्केऽपि तुल्यम् ॥*॥

(भाष्यम्)

अवचनादापि तत्परविज्ञानमिति चेत्केऽपि अन्तरेण वचनं द्विवचनपरो भविष्यति ॥

कथम् ?

"स्वार्थिकाः प्रत्ययाः प्रकृतितोऽविशिष्टा भवन्ति" इति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणं भवति ॥

(भवच्छब्दस्य गणे पाठप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ भवतः सर्वनामत्वे कानि प्रयोजनानि ?

(२२५-समाधानवार्तिकम्-१२)

॥*॥ भवतोऽकच्छेषाऽऽत्वानि ॥*॥

(भाष्यम्)

भवतोऽकच्छेषाऽऽत्वानि प्रयोजनानि । अकच्—भवकान् ॥ शेषः—स च भवांश्च भवन्तौ ॥ आत्वम्—भवादृगिति ॥

(आक्षेपभाष्यम्)

किं पुनरिदं परिगणनम्, आहोस्विदुदाहरणमात्रम् ?

(समाधानभाष्यम्)

उदाहरणमात्रमित्याह । तृतीयादयोऽपि दृश्यन्ते

"सर्वनाम्नस्तृतीया च" । भवता हेतुना, भवती हेतोरिति[1] ।। सर्वादीनि० ।।२६।।

(सर्वनामसंज्ञासूत्रम्)

विभाषादिक्समासे बहुव्रीहौ ।।१।१।२७।।

(तत्तत्पदप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

दिग्ग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

"न बहुव्रीहौ" इति प्रतिषेधं वक्ष्यति, तत्र न ज्ञायते– 'क्व विभाषा क्व प्रतिषेध' इति । दिग्ग्रहणे पुनः क्रियमाणे न दोषो भवति—'दिगुपदिष्टे विभाषा, अन्यत्र प्रतिषेधः' ।।

(आक्षेपभाष्यम्)

अथ समासग्रहणं किमर्थम् ?

विमला - समासग्रहणं किमर्थमिति । बहुव्रीहित्वस्य समासत्वव्याप्यतया बहुव्रीहावित्युक्तावेवासमासव्यावृत्तिसिद्धौ समासग्रहणं किमर्थमिति प्रश्नः ।

(समाधानभाष्यम्)

'समास एव यो बहुव्रीहिस्तत्र यथा स्याद् । बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भू'दिति । दक्षिणदक्षिणस्यै देहीति ।।

विमला - बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र माभूदितीति । न च समासग्रहणे

---

१. इतः परं 'उभस्याप्येषा । उभाभ्यां हेतुभ्यां उभयोर्हेतोरिति ।।' इत्यंशः अधिकः क्वचित् ।

कृतेऽपि तत्र प्रवृत्तिर्दुर्वारा बहुव्रीहित्वातिदेशे समासत्वस्यापि सिद्धत्वात्, न च गौणमुख्यन्यायेनेष्टसिद्धिरिति वाच्यम्, अतिदेशशास्त्राणां वैयर्थ्यापत्त्यातिदेशविषये गौणमुख्यन्यायाप्रवृत्तेरितिवाच्यम्, बहुव्रीहिवद्भावविधानसामर्थ्येन बहुव्रीह्यंशे 'गौणमुख्यन्याया'ऽप्रवृत्तावपि समासांशे न्यायप्रवृत्तौ बाधकाभावेन कृते समासग्रहणे दोषाभावात् ।

(आक्षेपभाष्यम्)

अथ बहुव्रीहिग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

द्वन्द्वे मा भूत्—दक्षिणोत्तरपूर्वाणामिति ।

(समाधाननिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम् ।। "द्वन्द्वे च" इति प्रतिषेधो[१] भविष्यति ।।

(समाधानसाधकभाष्यम्)

नाऽप्राप्ते प्रतिषेधे इयं विभाषा आरभ्यते । सा यथैव "न बहुव्रीहौ" इत्येतं प्रतिषेधं बाधते । एवं "द्वन्द्वे च" इत्येतमपि बाधेत ।।

(समाधानबाधकभाष्यम्)

न बाधते ।।

किं कारणम् ?

येन नाऽप्राप्ते तस्य बाधनं भवति । न चाऽप्राप्ते "न बहुव्रीहौ" इत्येतस्मिन्प्रतिषेधे इयं विभाषा

---

१. 'प्रतिषेधे' इति पाठान्तरम् ।

आरभ्यते । "द्वन्द्वे च" इत्येतस्मिन् पुनः प्राप्ते चाऽप्राप्ते च ।।

(समाधानबाधकान्तरभाष्यम्)

अथ वा "पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते, नोत्तरान्" इत्येवमियं विभाषा "न बहुव्रीहौ" इत्येतं प्रतिषेधं बाधिष्यते । "द्वन्द्वे च" इत्येतं प्रतिषेधं न बाधिष्यते ।।

(समाधानबाधकान्तरभाष्यम्)

अथवेदं तावदयं प्रष्टव्यः,—इह कस्मान्न भवति—या पूर्वा सोत्तरा अस्योन्मुग्धस्य सोऽयं पूर्वोत्तर उन्मुग्धः तस्मै पूर्वोत्तराय देहीति ? 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति ।।

(उपसंहारप्रत्याख्यानभाष्यम्)

यद्येवं, नार्थो बहुव्रीहिग्रहणेन ।।

(आक्षेपभाष्यम्)

द्वन्द्वे कस्मान्न भवति ?

(समाधानभाष्यम्)

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति ।।

(प्रयोजनान्तरभाष्यम्)

उत्तरार्थं तर्हि बहुव्रीहिग्रहणं कर्तव्यम् ।।

(बाधकभाष्यम्)

न कर्तव्यम् । क्रियते तत्रैव—"न बहुव्रीहौ" इति ।।

(साधकभाष्यम्)

द्वितीयं कर्तव्यम् । बहुव्रीहिरेव यो बहुव्रीहिस्तत्रैव यथा स्यात् । बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूत्—एकैकस्मै देहि ।।

(बाधकभाष्यम्)

एतदपि नास्ति प्रयोजनम् । समास इति वर्त्तते । तेन बहुव्रीहिं विशेषयिष्यामः—'समासो यो बहुव्रीहि'रिति ।।

(एकदेशिप्रयोजनभाष्यम्)

इदं तर्हि प्रयोजनम्—अवयवभूतस्याऽपि बहुव्रीहेः प्रतिषेधो यथा स्यात्, इह मा भूत्—वस्त्रमन्तरमेषां त इमे वस्त्रान्तराः, वसनमन्तरमेषां त इमे वसनान्तराः, वस्त्रान्तराश्च वसनान्तराश्च वस्त्रान्तरवसनान्तराः ।।
विभाषा दिक्समासे० ।।२७।।

(सर्वनामसंज्ञानिषेधसूत्रम्)

न बहुव्रीहौ ।।१।१।२८।।

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमुदाहरणम् ?

(समाधानभाष्यम्)

प्रियविश्वाय[1] ।।

---

१. 'प्रियसर्वाय' इति क्वचित् ।

(समाधानबाधकभाष्यम्)

नैतदस्ति प्रयोजनम् । सर्वाद्यन्तस्य बहुव्रीहेः प्रतिषेधेन भवितव्यम् । वक्ष्यति चैतत्—बहुव्रीहौ सर्वनाम-संख्ययोरुपसंख्यानम् इति । तत्र [1]विश्वप्रियायेति भवितव्यम् ।।

(समाधानान्तरभाष्यम्)

इदं तर्हि द्व्यन्याय त्र्यन्याय ।।

(समाधानबाधकभाष्यम्)

ननु चात्रापि सर्वनाम्न एव पूर्वनिपातेन भवितव्यम् ।।

(समाधानसाधकभाष्यम्)

नैष दो । वक्ष्यत्येतत्,—'संख्यासर्वनाम्नोर्यो बहुव्रीहिः परत्वात्तत्र संख्यायाः पूर्वनिपातो भवती'ति ।।

(पूर्वोक्तसमाधानाभ्युपगमभाष्यम्)

इदं चाप्युदाहरणम्—प्रियविश्वाय ।।

(बाधकस्मारणम्)

ननु चोक्तम्—'विश्वप्रियायेति भवितव्य'-मिति ।।

(बाधकनिराकरणभाष्यम्)

वक्ष्यत्येतत्—'वा प्रियस्य' इति ।।

(मतान्तरप्रदर्शनभाष्यम्)

---

१. 'प्रियसर्वाय' इति क्वचित् ।

न खल्वप्यवश्यं सर्वाद्यन्तस्यैव बहुव्रीहेः प्रतिषेधेन भवितव्यम् ।।

किं तर्हि ?

असर्वाद्यन्तस्यापि भवितव्यम् ।।

किं प्रयोजनम् ?

अकज् मा भूदिति ।।

(आक्षेपभाष्यम्)

किंच स्याद् यद्यत्राऽकच् स्यात् ?

(समाधानभाष्यम्)

को न स्यात् ।।

(आक्षेपभाष्यम्)

कश्चेदानीं काकचोर्विशेषः ?

(समाधानभाष्यम्)

व्यञ्जनान्तेषु विशेषः—अहकं पिता यस्य मकत्पितृकः, त्वकं पिता अस्य त्वकत्पितृक इति प्राप्नोति ।। मत्कपितृकः त्वत्कपितृक इति चेष्यते ।।

(आक्षेपभाष्यम्)

कथं पुनरिच्छताऽपि भवता बहिरङ्गेण प्रतिषेधेनाऽन्तरङ्गो विधिः शक्यो बाधितुम् ?।।

(समाधानभाष्यम्)

'अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधते' गोमत्प्रिय इति यथा ।।

(दृष्टान्तवैषम्येनभाष्यम्)

क्रियते तत्र यत्नः—"प्रत्ययोत्तरपदयोश्च" इति ।।

(दृष्टान्तसाम्येन समाधानसाधकभाष्यम्)

ननु चेहाऽपि क्रियते—'न बहुव्रीहौ' इति ।।

(वैयर्थ्यपरिहारेण समाधानभाष्यम्)

अस्त्यन्यदेतस्य वचने प्रयोजनम् ।।

किम् ?

प्रियविश्वाय ।।

(वैयर्थ्यस्थित्या समाधानसाधकभाष्यम्)

उपसर्जनप्रतिषेधेनाप्येतत्सिद्धम् ।।

(मतान्तरेण समाधानान्तरभाष्यम्)

अयं खल्वपि बहुव्रीहिरस्त्येव प्राथमकल्पिकः । यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तिकत्वं च । अस्ति तादर्थ्यात्ताच्छब्द्यम् । बहुव्रीह्यर्थानि पदानि बहुव्रीहिरिति । तद्यत्तादर्थ्यात्ताच्छब्द्यं, तस्येदं ग्रहणम् ।।

(प्रत्याख्यानभाष्यम्)

गोनर्दीयस्त्वाह[१]—

अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ ।' त्वकत्पितृको मकत्पितृक इत्येव भवितव्यमिति ।।

---

१. 'गोनर्दीय आह' इति क्वचित् ।

(न्यूनतापरिहाराधिकरणम्)

(२२६-आक्षेपवार्तिकम्-१)

।।।।प्रतिषेधे भूतपूर्वस्योपसंख्यानम् ।।*।।*

(भाष्यम्)

प्रतिषेधे भूतपूर्वस्योपसंख्यानं कर्तव्यम् । आढ्यो भूतपूर्वः आढ्यपूर्वः, आढ्यपूर्वाय देहीति ।।

(२२५-आक्षेपसमाधानवार्तिकम्-२)

।।।। प्रतिषेधे भूतपूर्वस्योपसंख्यानानर्थक्यं पूर्वादीनां व्यवस्थायामिति वचनात् ।।*।।*

(भाष्यम्)

प्रतिषेधे भूतपूर्वस्योपसंख्यानमनर्थकम् ।।

किं कारणम् ?

'पूर्वादीनां व्यवस्थायामिति वचनात्' ।

पूर्वादीनां व्यवस्थायां सर्वनामसंज्ञोच्यते । न चात्र व्यवस्था गम्यते ।। —न बहुव्रीहौ ।।२८।।

विमला - तृतीयासमास इतीति । अत्र लक्षणप्रतिपदोक्तपरिभाषया '**पूर्वसदृशे**'-ति समासो गृह्यते, नतु '**कर्तृकरणे कृते**'त्यादिरपि तेन, त्वयका कृतमित्यादौ न दोषः । एवञ्च पूर्वसूत्रवदत्रापि तृतीयासमासपदस्य तृतीयासमासार्थालौकिकवाक्य-परत्वे अनकारान्तानां तेन समासाविधानादकारान्ते च काकचोर्विशेषाभावेन सूत्रस्यैव वैयर्थ्यं स्यादतोऽतथाभूतस्यापि लौकिकवाक्यस्य ग्रहणम् ।

(सर्वनामसंज्ञानिषेधसूत्रम्)

तृतीयासमासे ।।१।१।२९।।

(आक्षेपभाष्यम्)

समास इति वर्तमाने पुनः समासग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

अयं तृतीयासमासोऽस्त्येव प्राथमकल्पिकः । यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तिकत्वं चेति । अस्ति च तादर्थ्यात्ताच्छब्द्यम् — तृतीयासमासार्थानि पदानि तृतीयासमास इति । [1]तद्यत्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणम् ।।

(समाधानान्तरभाष्यम्)

अथवा समास इति वर्तमाने पुनः समासग्रहणस्यैतत्प्रयोजनम्—योगाङ्गं यथोपजायेत[2] । सति च योगाङ्गे योगविभागः करिष्यते—"तृतीया" । तृतीयासमासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । मासपूर्वाय देहि, संवत्सरपूर्वाय देहि ।। ततः—"असमासे" । असमासे च तृतीयायाः सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । मासेन पूर्वाय देहि, संवत्सरेण पूर्वाय देहीति ।। तृतीया समासे ।।२९।।

विमला - ननु निषेधसामर्थ्यात् लक्षणप्रतिपदोक्तपरिभाषैवाऽत्र मा प्रवर्तताम् । किञ्च लक्षणाप्रयोजकानां तादर्थ्यादीनामभावे लक्षणैव न स्यादत आह — **अथवेति** । **योगाङ्गमिति** । योगरूपमष्टाध्याय्या अङ्गमित्यर्थः । यथाश्रुते योगविभागाकरणेऽपि योगाङ्गत्वानपायात् योगविभागो न लभ्येतेतिबोध्यम् ।

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(द्वन्द्वे सर्वनामसंज्ञाविकल्पसूत्रम्)

१. 'तद्यत्र तादर्थ्या' इत्यपि क्वचित् । २. 'विज्ञायेत' इति क्वचित् ।

विभाषा जसि ।।१।१।३१।।

(भाष्यम्)

जसः कार्यं प्रति विभाषा[1] ।। अकज्झि न भवति, [“द्वन्द्वे च” इति प्रतिषेधात्[2]] ।। विभाषा जसि ।।३१।।

(जसि सर्वनामसंज्ञाविकल्पनसूत्रम्)

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ।।१।१।३३।।

(गणपाठ-सूत्रपाठयोः कालनिर्णयाधिकरणम्)

(२२८-आक्षेपवार्तिकम्-२)

।।*।। अवरादीनां च पुनः सूत्रपाठे ग्रहणानर्थक्यं गणे पठितत्वात् ।।*।।

(भाष्यम्)

अवरादीनां च पुनः सूत्रपाठे ग्रहणमनर्थकम् ।

किं कारणम् ?

गणे पठितत्वात् ।

गणे ह्येतानि पठ्यन्ते ।।

विमला - अवरादीनामिति । पूर्वपरेत्यत्र लघ्वक्षरत्वात्, अजाद्यन्तत्वाच्चावरशब्दस्यैव पूर्वनिपातो युक्त इत्यभिप्रायेणावरादीनामित्युक्तम् । वस्तुतस्तु पूर्वनिपातप्रकरणस्यानित्यत्वात् पूर्वपरावरेत्यपि सुवचमेवेति बोध्यम् । पूर्वपरावरेत्यत्रादिशब्द प्रकारे, तेन पूर्वपरशब्दयोरपि संग्रहः । **पुनः सूत्रपाठ इति** । गणपाठोत्तरकालिके सूत्रपाठ इत्यर्थः । पूर्वादीनि नवेत्येतावतैवेष्टसिद्धेरिति भावः ।

---

१. ‘वार्त्तिकमिदमित्यन्ये’ । २. क्वाचित्कोऽयं पाठः ।

(आक्षेपबाधकभाष्यम्)

कथं पुनर्ज्ञायते–स पूर्वः पाठः, अयं पुनः पाठ इति ?

विमला - ननु गुणे व्यवस्थाद्यर्थपुरस्कारेणपाठे तेषामेव चाऽत्र पूर्वादिपदेन परामर्शे पक्षेऽनुवाददोषप्रसङ्गवारणायाभावमात्रे तात्पर्य्यकल्पनायाम्प्राप्तस्य बाधे च गौरवमिति अर्थान्तरवाचिनामेव पूर्वादीनामनेन विकल्पः स्यात्, न पुनर्व्यवस्थावाचिनामपीति चेन्मैवम्, गणपाठेन व्यवस्थावाचिनामेवोपस्थितेरुपस्थित-परित्यागेनानुपस्थितग्रहणे मानाभावात्, गौरवस्य फलमुखत्वेन दोषानाधायकत्वात् । यदि सर्वश्चासावादिश्चेति प्रकारार्थकादिशब्देन कर्म्मधारयः, प्रकारो नाम सादृश्यमिति सादृश्यप्रदर्शनाय गणपाठ इति मन्यते, तदा पूर्वं सूत्रपाठः पश्चाद्गणपाठः । यदि च सर्व आदिर्य्यस्येति व्यवस्थावाच्यादिशब्देन सर्वशब्दस्य बहुव्रीहिरिति विभाव्यते तदा पूर्वं गणपाठः पश्चात् सूत्रपाठः स्यादित्युभयत्र विनगमनाविरहात्पृच्छति — **कथम्पुनर्ज्ञायते इति** ।

(आक्षेपसाधकभाष्यम्)

तानि हि पूर्वादीनि, इमान्यवरादीनि ।।

विमला - तानि हि पूर्वादीनीति । तानि गणपठितानि पूर्वादीनि पूर्वकालाश्रयाणि । **इमानि** । सूत्रपठितानि । **अवरादीनि** । अवरकालाश्रयाणि । पूर्वं गणपाठः पश्चात्सूत्रपाठ इति समुदितार्थः । प्रकारवाच्यादिपदेन कर्म्मधारये कृत्स्नादिपदे सर्वनामत्वापत्तिर्दुर्वारेतिभावः ।

(आक्षेपबाधकभाष्यम्)

इमान्यपि पूर्वादीनि ।।

विमला - अनभिधानेनापि कृत्स्नादिपदे सर्वनामत्वापत्तिवारणसम्भवेन विनिगमनाविरहतादवस्थ्यादाह—**इमान्यपि पूर्वादीनीति** । पूर्वकालाश्रयाणीत्यर्थः ।

(आक्षेपसाधकभाष्यम्)

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति–स पूर्वः पाठः, अयं पुनः पाठः' इति । यदयं "पूर्वादिभ्यो नवभ्यो वा" इति नवग्रहणं[१] करोति । नवैव हि पूर्वादीनि ।।

विमला - आक्षेप्ता स्वपक्षे विनिगमनामाह-**एवमिति** ।

(समाधानभाष्यम्)

इदं तर्हि प्रयोजनम्–'व्यवस्थायामसंज्ञायामिति वक्ष्यामी'ति ।।

विमला - इदन्तर्हि प्रयोजनमिति । एतत्प्रयोजननिराकरणप्रकारस्य प्रागेव दर्शितत्वादिदम्भाष्यमेकदेश्युक्तिः । एतस्यैकदेश्युक्तित्वमेव सूचयता एवमप्याद्यसूत्रे पूर्वादीनि व्यवस्थायामसंज्ञायामित्येव कुतो नोक्तमित्युक्तमुद्योतकृता । शब्दकौस्तुभेऽपि वस्तुतस्तु पूर्वपरेत्यादित्रिसूत्र्यामर्थनिर्देशः पाठविशेषणम्, तेनेतरेषाम्पाठादेव पर्युदासः । तथाच विभाषाजसीतिप्रकरणे **पूर्वादीनि नवे**त्येव लाघवात्कर्तव्यम्, त्रिसूत्री तु न पठनीयैवेति निष्कर्षः । अथवा गणपाठ एव पूर्वादिनवकपाठानन्तरं **विभाषा जसीति** कर्तव्यम्, पूर्वादीनि चार्थविशिष्टान्यनुवर्तनीयानि । न च सर्वादीनामप्यनुवृत्तिः शङ्क्या, नेमस्य जसि विभाषारम्भात् । यद्वा **जसिङसीनां शिस्मात् स्मिनः, पूर्वादिभ्यो नवभ्यो वा, औङ आपःशी, नपुंसकाच्च,** इति सप्तमे न्यासः कर्तव्यः । परमार्थतस्तु सप्तमे यथान्यासमेवास्तु पूर्वादिभ्यो नवभ्यो वैतत्तु जसः शीत्यत्रानुवर्त्य वाक्यभेदेन सम्भन्त्स्यते **वाच्छन्दसीत्येतदमिपूर्व** इत्यत्र यथा । तथा चेयं त्रिसूत्री अष्टाध्याय्यां न पाठ्येति स्थितमिति प्रत्याख्यानमेव कृतम् ।

(समाधानबाधकभाष्यम्)

एतदपि नास्ति प्रयोजनम् । एवंविशिष्टान्येवैतानि गणे पठ्यन्ते ।।

(समाधानभाष्यम्)

---

१. 'यत्पूर्वादिभ्यो नवग्रहण' मिति क्वचित् ।

इदं तर्हि प्रयोजनम्—'द्वयादिपर्युदासेन पर्युदासो मा भू'दिति ।।

(समाधानबाधकभाष्यम्)

एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति — 'नैषां द्वयादिपर्युदासेन पर्युदासो भवती'ति । यदयं "पूर्वत्रासिद्धम्" इति निपातनं करोति । वार्तिककारश्च पठति – 'जश्भावादिति चेदुत्तरत्राऽभावादपवादप्रसङ्गः' इति ।।

(समाधानभाष्यम्)

इदं तर्हि प्रयोजनम्,— 'जसि विभाषां वक्ष्यामी'ति ।। पूर्वपरावरदक्षिणोत्तरापराधराणि० ।।३३।।

(सर्वनामसंज्ञाविकल्पसूत्रम्)

स्वमज्ञातिधनाख्यायाम् ।।१।१।३४।।

(आख्याग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

आख्याग्रहणं किमर्थम् ? ।।

(समाधानभाष्यम्)

ज्ञातिधनपर्यायवाची यः स्वशब्दस्तस्य यथा स्यात् । इह मा भूत्—स्वे पुत्राः, स्वाः पुत्राः, स्वे गावः स्वा गावः ।। स्वमज्ञातिधनाख्यायाम् ।।३४।।

विमला - इह माभूदिति । आख्याग्रहणाभावे आत्मीयत्वेनापि यत्र स्वे पुत्रा इत्यादौ स्वशब्दस्य ज्ञातिधनवाचकत्वम् तत्रापि प्रतिषेधः स्यात्, आख्याग्रहणे तु ज्ञातित्वादिनैव

ज्ञातिधनवाचकत्वम्, तत्रैव प्रतिषेध इति स्वे पुत्रा इत्यादौ न दोषः । नचाऽत्र '**आत्मात्मीययोरि**' त्येव लाघवादस्त्विति वाच्यम्, ज्ञातित्वादिनाऽऽत्माऽत्मीय-वाचिनोरपि स्वशब्दयोर्जसि विकल्पापतेः । **आत्माऽऽत्मीयाख्यायामि**' ति करणे तु मात्रागौरवमिति बोध्यम् ।

(सर्वनामसंज्ञाविकल्पसूत्रम्)

अन्तरं बहिर्योगोपसंव्यानयोः ।१।१।३५।।

विमला - अन्तरशब्दो नानार्थकः । तथा चाऽमरः— **अन्तरमवकाशवधि परिधानान्त-र्द्धिभेदतादर्थ्ये** । छिद्रात्मीयविनाबहिरवसरमध्येन्तरात्मनि च ।। इति । तत्र बहिर्योगो-पसम्व्यानयोरेव संज्ञेति बोध्यम् ।

(उपसंव्यानग्रहणप्रयोजनाधिकरणम्)

(२२९-प्रत्याख्यानाक्षेपवार्तिकम्-१)

।।।। उपसंव्यानग्रहणमनर्थकं[1] बहिर्योगेण कृतत्वात् ।।*।।*

(भाष्यम्)

उपसंव्यानग्रहणमनर्थकम् ।

किं कारणम् ?।।

'बहिर्योगेण कृतत्वात्' । बहिर्योग इत्येव सिद्धम् ।।

विमला - बहिर्य्योगेण कृतत्वादिति । बहिः पदेन बहिर्द्देशः, बहिर्द्देशस्थश्चोच्यते । तत्र यदा बहिः पदेन बहिर्द्देशो विवक्षितः तदा तेन योगो बहिर्द्देशस्थस्यैवेति बहिर्योग-शब्दार्थो बहिर्द्देशस्थः । यदा तु बहिः पदेन बहिर्द्देशस्थो विवक्ष्यते तेन च योग आभ्यन्तरस्यैवेति बहिर्योगपदार्थ आभ्यन्तरः । एवमुपसम्व्यानशब्दोऽपि उपसंवीयते

१. 'ग्रहणानर्थक्यम्' इति पाठान्तरम् ।

आच्छाद्यते अनेनेति करणव्युत्पत्या उतरीयपर: अर्थात् बहिर्देशस्थपर:, बहिर्देशस्थेन हि आभ्यन्तर आच्छाद्यते इति प्रसिद्धम् । उपसम्वीयते आच्छाद्यते यदिति व्युत्पत्या तु अन्तरीयपर:, अर्थादाभ्यन्तरपर:, स एव आच्छाद्यते बहिर्देशस्थेन । एवञ्च बहिर्देशस्थस्य, आभ्यन्तरवदत्र बहिर्योगशब्देनैव लभ्यत्त्वादुपसम्व्यानग्रहणमनर्थकमिति प्रश्नाशय: ।

(२३०-प्रत्याख्यानबाधकवार्तिकम्-२)

॥*॥ न वा शाटकयुगाद्यर्थम् ॥*॥

(भाष्यम्)

न वाऽनर्थकम् ।

किं कारणम् ?

'शाटकयुगाद्यर्थम्' । शाटकयुगाद्यर्थं तर्हीदं वक्तव्यम् । यत्रैतन्न ज्ञायते—किमन्तरीयं किमुत्तरीयमिति ॥

विमला - शाटक-युगाद्यर्थमिति । शाटकयुगे उत्तरीयत्वाऽन्तरीयत्त्वाज्ञानदशांयां तद्वाचकस्यान्तरपदस्य जसि विभाषार्थमित्यर्थ: ।

(प्रत्याख्यानसाधकभाष्यम्)

अत्रापि य एष मनुष्य: प्रेक्षापूर्वकारी[1] भवति । निर्ज्ञातं तस्य भवति— 'इदमन्तरीयमिदमुत्तरीय'मिति ॥

विमला - अत्रापीति । अपरिहितशाटकयुगे उपसम्व्यानत्वमपि भाविबुद्ध्यैव सम्पादनीयमिति बहिर्योगत्वमेव तथास्तु किमुपसम्व्यानग्रहणेनेति भाव: । ननु बहिर्योगशब्दस्य गृहादावेव प्रसिद्धेरुपसम्व्यानग्रहणमावश्यकम् । किञ्च शाटकानां

---

१. 'प्रेक्ष्यपूर्वकारी' इत्यपि पाठ: ।

त्रये शरीरसंयुक्तस्य तृतीयस्य, चतुष्टये शरीरसंयुक्तस्य चतुर्थस्य तृतीयस्य वा बहिर्य्योगाभावादुपसम्व्यानग्रहणमावश्यकम् । शाटकयुगाद्यर्थमिति वदतो वार्तिककारस्याप्यमेवाभिप्राय इति चेन्न, बहिर्योगपदे स्वरितत्वप्रतिज्ञाबलेनैव तेषामपि ग्रहणसम्भवात् ।

(अनिष्टापत्तिपरिहाराधिकरणम्)

(२३१-आक्षेपवार्तिकम्-३)

।।*।। अपुरि[1] ।।*।।

(भाष्यम्)

अपुरीति वक्तव्यम् । इह मा भूत् — अन्तरायां पुरि वसति इति ।।

विमला - अपुरीति वक्तव्यमिति । पूःशब्दार्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकेतरान्तरशब्दस्य गणसूत्रे ग्रहणमित्यर्थः ।

(२३२-इष्टानुपपत्तिनिराकरणाधिकरणम्-४)

(आक्षेपवार्तिकम्)

।।*।। वाप्रकरणे[2] तीयस्य ङित्सूपसंख्यानम् ।।*।।

(भाष्यम्)

वाप्रकरणे तीयस्य ङित्सूपसंख्यानं कर्तव्यम् । द्वितीयायै, द्वितीयस्यै । तृतीयायै, तृतीयस्यै । "विभाषा द्वितीयातृतीयाभ्याम्" इत्येतन्न वक्तव्यं भवति ।।

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः ?

---

१. लुप्तं स्यात् ।   २. क्वचिन्न ।

(समाधानभाष्यम्)

उपसंख्यानमेवाऽत्र ज्यायः । इदमपि सिद्धं भवति— द्वितीयाय द्वितीयस्मै । तृतीयाय तृतीयस्मै ।। अन्तरं बहिर्यो-गोपसंव्यानयोः ।।३५।।

(इति सर्वनामसंज्ञाप्रकरणम्)

(अथाऽव्ययसंज्ञाप्रकरणम्)

(अव्ययसंज्ञासूत्रम्)

स्वरादिनिपातमव्ययम् ।१।१।३६।।

(स्वरादीनां चादिभ्यः पृथक्करण प्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पृथग् ग्रहणं स्वरादीनां क्रियते, न चादिष्वेव पठ्येरन् ?

विमला - चादिष्वेव पठ्येरन्निति । चादिषु पाठेन निपातत्वादेव स्वरादीनामप्यव्ययत्वसिद्धेरिति प्रश्नाशयः ।

(समाधानभाष्यम्)

चादीनां वा[1] असत्त्ववचनानां निपातसंज्ञा, स्वरादीनां पुनः सत्त्ववचनानामसत्त्ववचनानां च ।।

विमला - चादीनां वा इति । वै शब्द एवार्थकः । असत्त्ववचनानामित्यनन्तरं योज्यः । अतएव '**लोधं नयन्ति पशु मन्यमानाः**' इत्यत्र सम्यगर्थकस्य पशुशब्दस्य **निपातसंज्ञा भवति** । न पुनः '**पशूंस्तांश्चक्रे**' इत्यादौ पशुशब्दस्येतिभावः । **पुनरिति** । पुनः शब्दोऽत्र त्वर्थे ।

---

१. 'वै' इति क्वचित् ।

(निपाताव्ययसंज्ञयोः पृथक्करणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ किमर्थमुभे संज्ञे क्रियेते, न निपातसंज्ञैव स्यात् ?

विमला - निपातसंज्ञैव स्यादिति । अव्ययपदघटिताः अव्ययवर्वनाम्नामित्यादयो निपातपदघटिता एव पाठ्याः । '**प्राग्रीश्वरान्निपाताः** 'स्वरादीनि' '**चादयोऽसत्त्वे**' इत्येवम्पाठेन च सत्त्ववचनानामपि स्वरादीनां निपातसंज्ञा भविष्यतीति भावः ।

(समाधानभाष्यम्)

नैवं शक्यम् । "निपात एकाजनाङ्" इति प्रगृह्यसंज्ञोक्ता, सा[1] स्वरादीनामप्येकाचां प्रसज्येत ।। [–क्व इव क्वेव[2]] ।

विमला - प्रसज्येतेति । उपलक्षणमिदं '**निपाता आद्युदात्ता**' इत्याद्युदात्तत्वस्यापि ।

(आक्षेपभाष्यम्)

एवं तर्ह्यव्ययसंज्ञैवास्तु ।।

(समाधानभाष्यम्)

तच्चाऽशक्यम् । वक्ष्यत्येतत्—'अव्यये नञ्कुनिपातानाम्' इति । तद्गरीयसा न्यासेन परिगणनं कर्तव्यं स्यात् । तस्मात् पृथग् ग्रहणं कर्तव्यम् । उभे च संज्ञे कर्तव्ये ।। स्वरादि निपातम्० ।।३६।।

(अव्ययसंज्ञासूत्रम्)

तद्धितश्चासर्वविभक्तिः ।।१।१।३७।।

---

१. 'सा' इति क्वचिन्न ।

२. 'अ इव एव' इति क्वचित् ।

विमला - असर्वविभक्तिरिति । सर्वशब्दोऽत्र न सर्वान्नीनो भिक्षुरित्यादाविव प्रकारकात्स्न्र्ये, अव्ययेभ्यः सप्तानामपि विभक्तीनामेकवचनान्युत्पद्यन्ते इति पक्षे सूत्रस्यासम्भवदुक्तिकत्वापत्तेः । नापि सर्वे घटा रूपवन्त इत्यादाविव व्यक्तिकात्स्न्र्ये तिङामपि विभक्तित्वात् घटादिप्रातिपदिकेभ्योऽपि तासामनुत्पादात् घटादिप्रातिपदिकानामप्यव्ययत्वापत्तिः । विभक्तिपदेन सुब्विभक्तीनामेव विवक्षणेऽपि '**मासीयसर्वदिनेषु अधीते**' इत्यादाविव सप्तानामेकवचनरूपैकदेशोत्पादेऽपि अवयवद्वारा सर्वविभक्तिसंबन्धात् दोषस्य तादवस्थ्यम् । किन्त्ववयवकात्स्न्र्ये । तथाच सर्वाविभक्तिरित्यस्य सर्वावय विकाविभक्तिरित्यर्थः । वचनत्रयात्मिकेति यावत् ।

(इष्टानुपपत्तिपरिहाराधिकरणम्)

(२ ३ ३-आक्षेपवार्तिकप्रथमखण्डम्)

।।*।। असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानम् ।।*।।

(भाष्यम्)

असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानं कर्तव्यम् । विना नाना[१] ।।

विमला - नन्वसर्वविभक्तिरित्यस्य यदि यस्य तद्धितस्योत्पत्तौ निमित्तत्वेनासर्वाविभक्तिराश्रितेत्यर्थः । तदा विना नानेत्यादौ तद्धितस्योत्पत्तौ विभक्तेः शब्दतो निमित्तत्वेनानाश्रयणात् अव्ययत्वं न स्यादत आह—**अविभक्तिनिमित्तस्योपसंख्यानं कर्तव्यमिति** ।

(आक्षेपभाष्यम्)

किं पुनः कारणं न सिध्यति ?

(२ ३ ३-आक्षेपहेतुवार्तिकद्वितीयखण्डम् - २)

---

१. क्वचिन्नाना विना ।

।।*।। सर्वविभक्तिर्ह्यविशेषात् ।।*।।

(भाष्यम्)

सर्वविभक्तिर्ह्येष भवति[1] ।।

किं कारणम् ?[2]

अविशेषेण विहितत्वात् ।।

विमला - अविशेषेण विहितत्वादिति । द्व्येकयोरित्यादिविशेषमनपेक्ष्य विहितत्वादित्यर्थः । अयम्भावः । यदि यस्मान्न सर्वा विभक्तिरुत्पद्यते इत्यर्थोऽसर्वविभक्तिरित्यस्य तदा '**अव्ययादाप् सुप**' इति ज्ञापकादव्ययेभ्यः सर्वविभक्तिरितिपक्षे सूत्रार्थस्यासम्भवदुक्तिकत्वापत्तिरिति ।

(२३४-आक्षेपवार्तिकम्-३)

।।*।। त्रलादीनां चोपसंख्यानम् ।।*।।

(भाष्यम्)

त्रलादीनां चोपसंख्यानं कर्तव्यम् । तत्र यत्र । ततः यतः ।।

विमला - यस्य तद्धितस्योत्पत्तौ निमित्तत्वेनासर्वा विभक्तिराश्रितेत्यर्थे न केवलमविभक्तिनिमित्तस्योपसंख्यानं कर्तव्यम् । किन्तु त्रलादीनामप्युत्पत्तौ सर्वासामेव विभक्तीनां निमित्तत्वेनाश्रयणात्तेषामप्युपसंख्यानं कर्तव्यमित्याह—**त्रलादीनामिति** ।

(आक्षेपबाधकभाष्यम्)

ननु च विशेषेणैते विधीयन्ते — "पञ्चम्यास्तसिल्" "सप्तम्यास्त्रल्" इति ।।

(आक्षेपभाष्यम्)

---

१. 'सर्वविभक्तिह्येषां भवति' इति क्वचित् ।

२. इतः परं 'अविशेषात्' इति लुप्तं स्यात् ।

वक्ष्यत्येतत्-'इतराभ्योऽपि दृश्यन्ते' इति ।।

(न्यासान्तरनिराकरणाधिकरणम्)

(न्यासान्तरभाष्यम्)

यदि पुनरविभक्तिश्शब्दोऽव्ययसंज्ञो भवतीत्युच्यते ।।

विमला - यदि पुनरविभक्तिः शब्दोऽव्ययेति ।श्रूयमाणविभक्तिप्रकृतित्वसमानाधिकरणानुपूर्वी सामान्याभाववान् यः शब्दः सोऽव्ययसंज्ञक इत्यर्थः ।तेन दधीत्यादौ न दोष इति बोध्यम् ।

(२३५-आक्षेपवार्तिकम्-४)

।।।। अविभक्तावितरेतराऽऽश्रयत्वादप्रसिद्धिः ।।*।।*

(भाष्यम्)

अविभक्तावितरेतराश्रयत्वादप्रसिद्धिः संज्ञायाः ।

का इतरेतराश्रयता ?

सत्यविभक्तित्वे संज्ञया भवितव्यं, संज्ञया चाऽविभक्तित्वं भाव्यते, तदेतदितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते ।।

(२३६-न्यासान्तरदूषवार्तिकम्)

।।।। अलिंगमसंख्यमिति वा ।।*।।*

[1]अथवाऽलिङ्गमसंख्यमव्ययसंज्ञं भवतीति वक्तव्यम् ।। एवमपीतरेतराश्रयमेव भवति ।।

---

१. अथवेति क्वचिन्न ।

का इतरेतराश्रयता ?

सत्यलिङ्गाऽसंख्यत्वे संज्ञया भवितव्यम् । संज्ञया चालिङ्गाऽसंख्यत्वं भाव्यते, तदेतदितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते ।।

विमला - अलिङ्गमसंख्यमिति वेति । वा शब्दोऽप्यर्थे ।

इतरेतराश्रयादप्रसिद्धिरित्यस्य पूर्ववार्तिकात् सम्बन्धः । तथाच अलिङ्गमसंख्यमित्युक्तावपीतरेतराश्रयत्वादप्रसिद्धिरिति वार्तिकार्थः ।

(दूषणपरिहारभाष्यम्)

नेदं वाचनिकम्—अलिङ्गता असंख्यता च[1] ।

किं तर्हि ?

स्वाभाविकमेतत् । तद्यथा समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते अपरे न । तत्र किमस्माभिः कर्तुं शक्यम् । स्वाभाविकमेतत्[2] ।।

विमला - नेदं वाचनिकमिति । वचनं तु स्वभावसिद्धार्थानुवादकमेवेति भावः ।

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम्—अलिङ्गमसंख्यमिति ।।

(समाधानभाष्यम्)

न वक्तव्यम् ।।

(२३७-समाधानहेतुवार्तिकम्)

।।*।। सिद्धं तु पाठात् ।।*।।

---

१. वेति क्वाचित्कः ।

२. क्वचिन्न ।

(भाष्यम्)

पाठाद्वा सिद्धमेतत् । कथं पाठः कर्तव्यः[१] ?

विमला - सिद्धन्तु पाठादिति । तुशब्दो विशेषद्योतनार्थः । अलिङ्गमित्याद्युक्तावन्योन्याश्रयान्मा सिद्ध्यतु तसिलादीनां स्वरादिषु पाठेन सूत्रारम्भेऽपि पचतिकल्पमित्यादावतिव्याप्तिवारणायावश्यकेनेष्टं सिद्धमिति सूत्रं न कर्तव्यमिति वार्तिककृतस्तात्पर्य्यम् । भाष्यकारस्तु अलिङ्गमसंख्यमितिन्यासेऽप्यन्योन्याश्रयाभावस्य वर्णितत्वात् विना नानेत्यादिसंग्रहसम्भवात् । तुपदं समुच्चयार्थक-वाशब्देन व्याचष्टे— **पाठाद्वा सिद्धमेतदिति** । एतत् विना नानेत्यादिसंग्रहरूपमिष्टम् पाठादपि सिद्धमित्यर्थः । सूत्रारम्भेऽपि पाठस्यावश्यकतया भाष्यकारोऽप्यनुपदमेव **एवंगतेऽपीत्यादिना** सूत्रप्रत्याख्यानं वक्ष्यतीत्यनुसन्धेयम् ।

तसिलादयः प्राक् पाशपः । शस्प्रभृतयः प्राक् समासान्तेभ्यः । मान्तः । तसिवती । कृत्वोऽर्थः[२] । नानाञाविति[३] ।।

(प्रथमन्यासाङ्गीकरणभाष्यम्)

अथवा पुनरस्तु— 'अविभक्तिश्शब्दोऽव्ययसंज्ञो भवती'त्येव ।।

विमला - अलिङ्गमसंख्यमितिन्यासस्येव अविभक्तिः शब्दोऽव्ययसंज्ञो भवतीतिन्यासेऽपि दोषोद्धारः सम्भवतीत्याह-**अथवेति** ।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्— 'अविभक्तावितरेतराश्रयत्वादप्रसिद्धिः' इति ।।

---

१. 'सिद्धमेतत् । कथं ?। पाठात् । पाठः कर्त्तव्यः । कथं पाठः ?।।' क्वचिदेवं पाठः ।

२. 'कृत्वोऽर्थः तसिवती' इति विपर्यासः क्वचित् ।

३. 'तसि - - - विति' इति वार्तिक मित्यन्ये ।

(आक्षेपबाधकभाष्यम्)

नैष दोषः । इदं तावदयं प्रष्टव्यः–'यद्यपि तावद्वैयाकरणा विभक्तिलोपमारभमाणा अविभक्तिकाञ्छब्दान्प्रयुञ्जते । ये त्वेते[1] वैयाकरणेभ्योऽन्ये मनुष्याः कथं तेऽविभक्तिकाञ्छब्दानान्प्रयुञ्जते' इति ? अभिज्ञाश्च पुनर्लौकिका एकत्वादीनामर्थानाम् ।। अतश्चाभिज्ञाः[2] । अन्येन हि वस्नेनैकं गां क्रीणन्ति, अन्येन द्वौ, अन्येन त्रीन् । अभिज्ञाश्च, न च प्रयुञ्जते । तदेतदेवं संदृश्यताम् – अर्थरूपमेवैतदेवंजातीयकं येनात्र विभक्तिर्न भवती'ति ।।

विमला - अतश्चाभिज्ञा इति । चोऽप्यर्थे इतोऽपि वक्ष्यमाणाद्धेतोरभिज्ञा इत्यर्थः । तत्र हेतुमाह—**अन्येन हीति** । **वस्नेन** । मूल्येन । **तदेतदेवमिति** । तत् । तस्माद्धेतोः । एतत् । त्रतस्यादेरविभक्तिकप्रयोगकरणम् । एवम् वक्ष्यमाणप्रकारेण । **संदृश्यतामिति** । ज्ञायतामित्यर्थः । तदेवाह-**अर्थरूपेति** । **एतत्** अर्थस्वरूपम् । **एवंजातीयकम्** । एवंस्वभावकम् ।

(उपपत्तिभाष्यम्)

तच्चाप्येतदेवमनुगम्यमानं दृश्यताम् । किंचिदव्ययं विभक्त्यर्थप्रधानं, किंचित् क्रियाप्रधानम् । उच्चैर्नीचैरिति विभक्त्यर्थप्रधानम्, हिरुक् पृथगिति क्रियाप्रधानम् । तद्धितश्चापि कश्चिद् विभक्त्यर्थप्रधानः, कश्चित् क्रियाप्रधानः । तत्र यत्रेति विभक्त्यर्थप्रधानः, विनानानेति[3] क्रियाप्रधानः । न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोऽस्ति ।।

---

१. 'त्वेतेभ्यो' इति क्वचित् । २. 'आतश्चाभिज्ञाः' इति क्वचित् ।

३. 'नाना विनेति' इत्यपि पाठः ।

विमला - अव्ययार्थस्यैवंजातीयकत्वे उपपत्तिमाह—**तच्चेति** । पूर्वोक्तञ्चेत्यर्थः । अपि: एतत्पदोत्तरं योज्यः । **एतत्** । अव्ययार्थस्यैवंजातीयकत्वमपीत्यर्थः । **एवमिति** । वक्ष्यमाणप्रकारेणेत्यर्थः । **अनुगम्यमानमिति** । उपपद्यमानमित्यर्थः । **दृश्यताम्** । ज्ञायताम् । अव्ययार्थस्यैवं स्वभावकत्वे वक्ष्यमाणोपपत्तिर्ज्ञातव्येति समुदितस्य तात्पर्य्यार्थः । त्रतस्यादेरविभक्तित्वेऽव्ययार्थस्य तादृशस्वभावकत्वं प्रयोजकम्, अव्ययार्थस्य तादृशस्वभावकत्वे कुत्रचित् विभक्त्यर्थप्रधानत्वं कुत्रचित् क्रियाप्रधानत्वमित्यवगन्तव्यम् ।

(सूत्रसमर्थनभाष्यम्)

अथाऽप्यसर्वविभक्तिरित्युच्यते । एवमपि न दोषः ।

कथम् ?

इदं चाऽप्यद्यत्वे अतिबहु क्रियते— एकस्मिन्नेकवचनम्, द्वयोर्द्विवचनम्, बहुषु बहुवचनमिति ।

कथं तर्हि ?

एकवचनमुत्सर्गः करिष्यते । तस्य द्विबह्वोरर्थयोर्द्विवचनबहुवचने बाधके भविष्यतः ।।

विमला - **अद्यत्वे** । तद्धितश्चासर्वविभक्तिरितिसूत्रसत्ताकाले ।

(मतान्तरभाष्यम्)

न चाप्येवं विग्रहः करिष्यते—न सर्वा असर्वाः, असर्वा विभक्तयो यस्मादिति ।।

कथं तर्हि ?

न सर्वा असर्वा, असर्वा विभक्तिरस्मादिति ।। त्रिकं पुनर्विभक्तिसंज्ञम् ।।

विमला - नचाप्येवमिति । प्रकारकात्स्न्यार्थकेन सर्वशब्देन विग्रहो न करिष्यते इत्यर्थः । तथासति अव्ययेभ्यः सप्तानामेकवचनमात्रोत्पादेऽपि सूत्रार्थाप्रसिद्धिरितिभावः । निषेद्धयस्य प्रकारकात्स्न्यार्थकत्वसूचनार्थं बहुवचनान्तेन विग्रहो दर्शितः । **न सर्वा इति** । बहुवचनान्तेन विभक्त्यर्थभेदप्रतीत्या भेदाधिष्ठानप्रकारकात्स्न्यार्थकत्वं सम्भवतीति भावः । **न सर्वेति** । अवयवकात्स्न्यार्थकोऽत्र सर्वशब्दः, एकवचनेन विभक्त्यर्थ-भेदाप्रतीत्या भेदाधिष्ठानप्रकारकात्स्न्यार्थकत्वं न सम्भवतीत्येकवचनान्तेन विग्रहो दर्शितः । **त्रिकम्पुनर्विभक्तिसंज्ञमिति** । एवञ्चाव्ययेभ्यः सप्तानामेकवचनोत्पादेऽपि सर्वावयविका विभक्तिर्न्नास्तीति न सूत्रार्थाप्रसि-द्धिरितिभावः ।

(लाघवभाष्यम्)

'एवं गते कृत्यपि तुल्यमेत-
न्मान्तस्य कार्यं ग्रहणं न तत्र ।
ततः परे चाऽभिमता न कार्या-
स्त्रयः कृदर्था ग्रहणेन योगाः'[1] ॥१॥

विमला - एवं गते इति । अव्ययेभ्यः सप्तानामेकंवचनोत्पादेऽपि निरवशेषविभ-क्त्यनुत्पत्याऽस्त्येवासर्वविभक्तित्वमिति निश्चीयमाने सतीत्यर्थः । असर्वविभक्त्य-व्ययमित्येव कर्तव्यमितिशेषः । **तुल्यमेतदिति** । एतत् पूर्वोक्तमसर्वविभक्तित्व-मित्यर्थः । **स्वरादिग्रहणञ्च कार्य्यमिति** । चस्त्वर्थे । स्वरादिग्रहणं कार्य्यम्, तत्रैव कृत्तद्धिताः पठितव्याः, अव्ययीभावस्यापि तत्रैव पाठः कर्तव्यः, तद्धितश्चेत्यारभ्य चत्वारो योगाः न कर्तव्याः । सूत्रारम्भेऽप्यतिव्याप्तिदोषपरिहाराय कृत्तद्धितानां स्वरादिषु पाठस्यावश्यकतया नास्मिन् पक्षे पाठप्रयुक्तगौरवशङ्कापीतिभावः ।

(गौरवप्रदर्शकभाष्यम्)

'कृत्तद्धितानां ग्रहणं तु कार्यं
संख्याविशेषं ह्यभिनिश्रिता ये[1] ।'

---

१. केषांचिन्मते वार्तिकानीमानीति ।

तेषां प्रतिषेधो भवतीति वक्तव्यम् । इह मा भूत्—एको द्वौ बहव इति ।

(उपसंहारभाष्यम्)

'तस्मात् स्वरादिग्रहणं च कार्यं

कृत्तद्धितानां ग्रहणं च पाठे[1] ।।२।।'

(आक्षेपभाष्यम्)

पाठेनेयमव्ययसंज्ञा क्रियते । सेह न प्राप्नोति — परमोच्चैः । परमनीचैरिति ।।

(समाधानभाष्यम्)

तदन्तविधिना भविष्यति ।।

(आक्षेपभाष्यम्)

इहापि तर्हि प्राप्नोति–अत्युच्चैः अत्युच्चैसौ अत्युच्चैस इति ।।

(आक्षेपबाधकभाष्यम्)

उपसर्जनस्य नेति प्रतिषेधो भविष्यति ।।

(आक्षेपभाष्यम्)

स तर्हि प्रतिषेधो वक्तव्यः ?

(समाधानभाष्यम्)

न वक्तव्यः । सर्वनामसंज्ञायां प्रकृतः प्रतिषेध इहानुवर्तिष्यते ।।

---

१. वार्तिकमेतदिति केचित् ।

(आक्षेपसाधकभाष्यम्)

स वै तत्र प्रत्याख्यायते ।।

(समाधानभाष्यम्)

यथा स तत्र प्रत्याख्यायते । इहापि तथा शक्यः प्रत्याख्यातुम् ।।

(अनुयोगभाष्यम्)

कथं च स तत्र प्रत्याख्यायते ?

(समाधानभाष्यम्)

महतीयं संज्ञा क्रियत इति ।। इयमपि च महती संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः ।।

कुत एतत् ?

लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनम्–अन्वर्था संज्ञा यथा विज्ञायेत–न व्येतीत्यव्ययमिति ।।

(अनुयोगभाष्यम्)

क्वपुनर्न व्येति ?

(समाधानभाष्यम्)

स्त्रीपुन्नपुंसकानि सत्त्वगुणाः, एकत्वद्वित्वबहुत्वानि च । एतानर्थान् केचिद्वियन्ति केचिन्न वियन्ति । ये न वियन्ति तदव्ययम् ।।

"सदृशं त्रिषु लिङ्गेषु

सर्वासु च विभक्तिषु ।

वचनेषु च सर्वेषु

यन्न व्येति तदव्ययम् ।।१।।

तद्धितश्चासर्वविभक्तिः ।।३७।।

(अव्ययसंज्ञासूत्रम्)

कृन्मेजन्तः ।।१।१।३८।।

(मेजन्तपदे विशेषणताविचाराधिकरणम्)

(आक्षेपभाष्यम्)

कथमिदं विज्ञायते–कृद्यो मान्त इति, आहोस्वित्-कृदन्तं यन् मान्तमिति ।।

किं चातः ?

यदि विज्ञायते–'कृद्यो मान्त' इति, 'कारयांचकार हारयांचकारे' त्यत्र न प्राप्नोति ।।

अथ विज्ञायते– कृदन्तं यन्मान्तमिति, 'प्रतामौ प्रतामः', अत्रापि प्राप्नोति ।

विमला - न प्राप्नोतीति । मान्तस्य आमित्यस्य कारयामित्यस्य वा कृत्त्वाभावादितिभावः । **अत्रापि प्राप्नोतीति** । कारयामित्यस्य श्रुत्या मान्तत्वात् प्रत्ययलक्षणेन च कृदन्तत्वादव्याप्त्यभावेऽपि तुल्यन्यायात् प्रतामावित्यादौ अतिव्याप्तिरितिभावः । प्रतान् इत्यत्र नोक्तम्, तत्राव्ययत्वाभावेऽपि हल्ङ्यादिलोपेनैव निर्वाहादिति बोध्यम् ।

(समाधानभाष्यम्)

यथेच्छसि तथास्तु ।। अस्तु तावत्–'कृद्यो मान्त' इति ।।

(आक्षेपभाष्यम्)

कथं कारयांचकार हारयांचकारेति ?

(प्रत्याक्षेपभाष्यम्)

किं पुनरत्राव्ययसंज्ञया प्रार्थ्यते ?

(प्रत्याक्षेपसमाधानभाष्यम्)

"अव्ययात्" इति लुग् यथा स्यादिति ।।

(समाधानबाधकभाष्यम्)

मा भूदेवम् । "आमः" इत्येवं भविष्यति ।।

(समाधानसाधकभाष्यम्)

न सिध्यति । लिग्रहणं तत्रानुवर्तते ।।

विमला - लिग्रहणं तत्रानुवर्तत इति । अस्य मन्त्रेघसेतिसूत्रादित्यादिरिति बोध्यम् ।

(समाधानबाधकभाष्यम्)

लिग्रहणं [तत्र[1]] निवर्तिष्यते ।।

विमला - निवर्तिष्यते इति । न च लेर्निवृत्तौ तरबादेरपि लुगापत्तिरिति वाच्यम्, अपरिसमाप्त्यर्थतया तरबादेरुत्पत्तेरेवाभावात् । अपरिसमाप्त्यर्थत्वञ्च संख्याकारकादिविषयकोत्थिताकांक्षत्वम् । आमन्तार्थगतप्रकर्षादिप्रतीतिस्तु, अनुप्रयुक्तादुत्पन्नेन तरबादिना भविष्यतीत्यवगन्तव्यम् ।

(समाधानसाधकभाष्यम्)

यदि निवर्तते, प्रत्ययमात्रस्य लुक् प्राप्नोति ।।

(समाधानबाधकभाष्यम्)

---

१. इति क्वचिन्न ।

इष्यते च प्रत्ययमात्रस्य । आतश्चेष्यते । एवं ह्याह— "कृञ्चानुप्रयुज्यते लिटि" इति । यदि च प्रत्ययमात्रस्य लुग्भवति तत एतदुपपन्नं भवति ॥

(पक्षान्तरभाष्यम्)

अथवा पुनरस्तु—कृदन्तं यन्मान्तमिति ।

(आक्षेपभाष्यम्)

कथं प्रतामौ—प्रताम इति ?

(समाधानभाष्यम्)

आचार्यप्रवृत्तिर्ज्ञापयति— 'न प्रत्ययलक्षणेनाऽव्ययसंज्ञा भवति' इति । यदयं प्रशान्शब्दं स्वरादिषु पठति ॥

विमला - न प्रत्ययलक्षणेनाऽव्ययसंज्ञा भवतीति । प्रत्ययलक्षणेन कृदन्त्वमुपजीव्याव्ययसंज्ञा न भवतीत्यर्थः ।

(२३८-आक्षेपवार्तिकम्- १)

॥*॥ कृन्मेजन्तश्चाऽनिकारोकारप्रकृतिः ॥*॥

(भाष्यम्)

कृन्मेजन्तश्चाऽनिकारोकारप्रकृतिरिति वक्तव्यम् । इह मा भूत्-आधये आधेः, चिकीर्षवे चिकीर्षोरिति ॥

(२३९-आक्षेपवार्तिकम्-२)

॥*॥ अनन्यप्रकृतिरिति वा ॥*॥

(भाष्यम्)

अथवा अनन्यप्रकृतिः कृदव्ययसंज्ञो भवतीति वक्तव्यम् ।।

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः ?

(समाधानभाष्यम्)

अनन्यप्रकृतिरिति वचनमेव ज्यायः । इदमपि सिद्धं भवति—कुम्भकारेभ्यो नगरकारेभ्य इति ।।

(तृतीयाक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम् ?

(२४०-सिद्धान्तिसमाधानवार्तिकम्-३)

।।*।। न वा, संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति ।।*।।

(भाष्यम्)

न वा वक्तव्यम् । किं कारणम् ?

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य[१]' 'इत्येषा परिभाषा कर्तव्या ।।

(आक्षेपभाष्यम्)

कः पुनरत्र विशेषः । एषा वा परिभाषा क्रियेत, अनन्यप्रकृतिरिति वोच्येत ?

(समाधानभाष्यम्)

१. अयमेवांशः इतः पूर्वं 'इति' सहितः लुप्तः स्यात् ।

अवश्यमेषा परिभाषा कर्तव्या । बहून्येतस्याः परिभाषायाः प्रयोजनानि ।

(परिभाषाप्रयोजनप्रश्नभाष्यम्)

कानि पुनस्तानि ?

(२४१-प्रयोजनप्रदर्शनवार्तिकम्-४)

।।।। प्रयोजनं, —*
ह्रस्वत्वं तुग्विधेर्ग्रामणिकुलम् ।।।।*

(भाष्यम्)

[ह्रस्वत्वं तुग्विधेरनिमित्तम् । क्व ? ग्रामणिकुलम्[१] ।]

ग्रामणिकुलं सेनानिकुलमित्यत्र ह्रस्वत्वे कृते "ह्रस्वस्य पिति कृति तुग्भवति" इति तुक् प्राप्नोति ।।

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य', इति न दोषो भवति ।।

विमला - तुग्विधेरनिमित्तमिति । परिभाषाप्रयोजनमित्यध्याहारः । अग्रेऽपि अनिमित्तमित्यनन्तरं परिभाषाप्रयोजनमित्यध्याहर्तव्यम् । **ग्रामणि कुलमिति** । अत्रेगन्तपूर्वपदस्योत्तरपदसन्निपातविघातो द्रष्टव्यः । **एतेन** तुक्यपि यदागमन्यायेन तुग्विशिष्टस्य पूर्वपदत्वात् नात्र संनिपातविघात इतिवदन्तः परास्ताः ।

(प्रयोजननिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम् । बहिरङ्गं ह्रस्वत्वम् अन्तरङ्गस्तुक् । "असिद्धं बहिरङ्गमन्तरङ्गे" ।।

---

१. लुप्तं स्यात् ।

विमला - अन्तरङ्गस्तुगिति । इदमत्रालोचनीयम् । ग्रामणिकुलमित्यत्र '**इकोह्रस्व**' इति विहितस्य बहिरङ्गत्वेऽपि '**ह्रस्वो नपुंसक**' इति विहितस्यापरनिमित्तकत्वेनान्तरङ्गतया तस्य तुकि कर्तव्येऽसिद्धत्वाभावेन तुको दुर्वारतयाऽस्य परिभाषाफलत्वमुपपद्यते । न चात्र '**ह्रस्वो नपुंसक**' इतिसूत्रं परत्वाद्बाधित्वा '**इको ह्रस्व**' इत्यनेनैव ह्रस्वत्वं स्यादिति, तस्य बहिरङ्गत्वेन '**बहिरङ्ग**' परिभाषयैवेष्टसिद्धिरिति वाच्यम् । एवमपि 'कुलंग्रामणि' इतिवाक्यस्थ-ग्रामणिपदे '**इको ह्रस्व**' इत्यस्याप्राप्तेर्नपुंसकह्रस्वस्यैव वक्तव्यतया तस्य चापरनिमित्तकत्वेनान्तरङ्गतया '**बहिरङ्ग**' परिभाषया असिद्धत्वाभावेन '**संनिपात**' परिभाषाया एव शरणीकर्तव्यत्वात्, नपुंसकह्रस्वस्यान्तरङ्गत्वेन '**इको ह्रस्व**' इत्यस्य तद्बाधकत्वासम्भवाच्च । न चानया ग्रामणिच्छत्रमित्यत्रापि तुकोऽभावापत्तिरितिवाच्यम्, तत्र तुगभावस्यैवेष्टत्वात् । अत एव '**संनिपात**' परिभाषादोषेष्वेतस्यानुक्तिरित्येतद्भाष्यस्यैकदेशयुक्तत्वमेवेति प्रतीमः । संनिपातश्चात्र न केवलम् पूर्वपरयोरेव, किन्तु विशेष्यविशेषणभावोऽपीति नपुंसकह्रस्वस्यापि संनिपातलक्षणत्वमित्यवधेयम् ।

(२४२-प्रयोजनवार्तिकम्-५)

।।*।। नलोपो वृत्रहभिः ।।*।।

(भाष्यम्)

नलोपस्तुग्विधेरनिमित्तम् । क्व ? वृत्रहभिः[१] ।

वृत्रहभिर्भ्रूणहभिरित्यत्र नलोपे कृते "ह्रस्वस्य पिति कृति तुग्भवति" इति तुक् प्राप्नोति ।

"संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य" इति न दोषो भवति ।।

विमला - नलोपस्तुग्विधेरिति । नान्तभिस्संनिपातनिमित्तको नलोपः तादृशसंनिपातविघातकस्य तुकोऽनिमित्तमित्यर्थः । तादृशसंनिपातस्य शब्दत आश्रयणे एव परिभाषाप्रवृत्तिरित्याग्रहे तु न मूलम् ।

---

१. लुप्तं स्यात् ।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । असिद्धो नलोपः तस्याऽसिद्धत्वान्न भविष्यति ।।

विमला - एतदपीति । संज्ञाकृतस्य, बहिर्भूतनिमित्तकसंज्ञाकृतस्य च बहिरङ्गत्व-स्यानाश्रयणात्, कृतितुग्ग्रहणस्य प्रत्याख्यानाच्च । नलोपस्यासिद्धत्वासम्भवेनेदम-प्येकदेश्युक्तिरिति बोध्यम् ।

(२९३-प्रयोजनवार्तिकम्-६)

।।*।। उदुपधत्वमकित्त्वस्य निकुचिते ।।*।।

(भाष्यम्)

उदुपधत्वमकित्त्वस्याऽनिमित्तम् ।। क्व ?

'निकुचिते' । निकुचितमित्यत्र नलोपे कृते "उदुपधाद्भावादिकर्मणोरन्यतरस्याम्" इत्यकित्त्वं प्राप्नोति ।

"संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य" इति न दोषो भवति ।।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । अस्त्वत्राऽकित्त्वं, 'न धातुलोप आर्धधातुके' इति प्रतिषेधो भविष्यति ।।

विमला - एतदपि नास्ति प्रयोजनमिति । इदमप्येकदेशिन एव भाष्यम् । सिद्धान्ते तु 'न धातुलोप' सूत्रस्य प्रत्याख्यानादस्य फलत्वं दुर्वारमेव ।

(२९४-प्रयोजनवार्तिकम्-७)

।।*।। नाभावो यञि दीर्घत्वस्याऽमुना ।।*।।

(भाष्यम्)

नाभावो यञि दीर्घत्वस्याऽनिमित्तम् ।। क्व ?

'अमुना' । नाभावे कृते "अतो दीर्घो यञि" "सुपि च" इति दीर्घत्वं प्राप्नोति ।।

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति ।।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । वक्ष्यत्येतत्—"न मु टादेशे" इति ।।

(२४५-प्रयोजनवार्तिकम्-८)

।।※।। आत्वं कित्त्वस्योपादास्त ।।※।।

(भाष्यम्)

आत्त्वं कित्त्वस्याऽनिमित्तम् ।। क्व[१] ?

उपादास्तास्य स्वरः शिक्षकस्येति । आत्त्वे कृते "स्थाघ्वोरिच्च" इतीत्त्वं प्राप्नोति ।

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति ।।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । उक्तमेतत्—'दीङः— प्रतिषेधः स्थाघ्वोरित्त्वे' इति ।

विमला - दीङः प्रतिषेधः स्थाघ्वोरित्त्व इति । स्थाघ्वोरित्त्वे कर्तव्ये दीङो

१. "क्व ? उपादास्त । उपादास्त स्वरः" इत्यादिः क्वचित् ।

घुसंज्ञा नेति वार्तिकार्थः । अवश्याश्रयणीय**संनिपात**परिभाषयोपादास्तेत्यादावित्त्वं निवार्य्य दीङः प्रतिषेध इति वार्तिकस्यैव दाधाध्वदावितिसूत्रे भाष्ये प्रत्याख्यानात् खण्डनमिदमेकदेशिन इति प्रतिभाति ।

(२४६-प्रयोजनवार्तिकम्-९)

॥॥ तिसृचतसृत्वं ङीब्विधेः ॥*॥*

(भाष्यम्)

तिसृचतसृत्वं ङीब्विधेरनिमित्तम् ॥ क्व ?

तिस्रस्तिष्ठन्तीति[1] चतस्रस्तिष्ठन्तीति[1] । तिसृचतसृभावे कृते "ऋन्नेभ्यो ङीप्" इति ङीप् प्राप्नोति । 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति ॥

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति — न तिसृचतसृभावे कृते ङीब् भवतीति यदयं "न तिसृचतसृ" नामि दीर्घत्वस्य प्रतिषेधं शास्ति ॥

(प्रयोजनभाष्यम्)

इमानि तर्हि प्रयोजनानि—'शतानि सहस्राणि[2]' नुमि कृते "ष्णान्ता षट्" इति षट्संज्ञा प्राप्नोति । 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति ॥

(प्रयोजनभाष्यम्)

शकटौ पद्धतौ[3] । अत्त्वे कृते 'अत' इति टाप् प्राप्नोति ॥

---

१. इति क्वचिन्न । २. एतद्वार्तिकं क्वचित् । ३. वार्तिकमिदमित्यन्ये ।

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति ।।

(प्रयोजनभाष्यम्)

इयेष उवोष[1] ।। गुणे कृते 'इजादेश्च गुरुमतोऽनृच्छः' इत्याम् प्राप्नोति ।। 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति ।।

(२४७-दूषणवार्तिकम्-१०)

।।*।। तस्य दोषो-वर्णाश्रयः प्रत्ययो वर्णविचालस्य ।।*।।

(भाष्यम्)

तस्यैतस्य लक्षणस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्याऽनिमित्तं स्यात् ।। क्व ?

'अत इञ्' दाक्षिः प्लाक्षिः ।।

(दूषणबाधकभाष्यम्)

न प्रत्ययः संनिपातलक्षणः ।।

(दूषणसाधकभाष्यम्)

अङ्गसंज्ञा तर्ह्यनिमित्तं स्यात् ।।

(२४९-दूषणवार्तिकम्-११)

।।*।। आत्वं पुग्विधेः क्षापयति ।।*।।

(भाष्यम्)

---

१. इदं भाष्यं वार्तिकं वेति सन्दिग्धम् ।

आत्वं पुग्विधेरनिमित्तं स्यात् ।।

क्व ? क्रापयतीति ।।

(२४९-दूषणवार्तिकम्-१२)

|||| पुग् ह्रस्वत्वस्याऽदीदपत् ||*||*

(भाष्यम्)

पुग् ह्रस्वत्वस्याऽनिमित्तं स्यात् ।।

क्व ? अदीदपदिति ।।

(२५०-दूषणवार्तिकम्-१३)

|||| त्यदाद्यकारष्टाब्विधेः[१] ||*||*

(भाष्यम्)

त्यदाद्यकारष्टाब्विधेरनिमित्तं स्यात् ।।

क्व ? या सेति ।।

(२५१-दूषणवार्तिकम्-१४)

|||| इड्विधिराकारलोपस्य ययिवान्[२] ||*||*

(भाष्यम्)

इड्विधिराकारलोपस्याऽनिमित्तं स्यात् ।।

क्व ? ययिवान् तस्थिवानिति ।

(२५२-दूषणवार्तिकम्-१५)

|||| मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्य (अग्निमान्[३]) ||*||*

---

१. इत: परं ''या सा'' इति लुप्तं स्यात् ।

२. 'ययिवान्' इति क्वचिन्न । ३. लुप्तं स्यादिदम् ।

(भाष्यम्)

मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्याऽनिमित्तं स्यात् ।। क्व ?

अग्निमान् वायुमान् । परमवाचा परमवाचे इति ।।

(२५३-दूषणवार्तिकम्-१६)

।।।। नदीह्रस्वत्वं संबुद्धिलोपस्य ।।*।।*

(भाष्यम्)

नदीह्रस्वत्वं संबुद्धिलोपस्याऽनिमित्तं स्यात् ।।

क्व ?

नदि कुमारि किशोरि ब्राह्मणि ब्रह्मबन्धु इति ।

नदीह्रस्वत्वे कृते "एङ्ह्रस्वात्सम्बुद्धेः" इति संबुद्धिलोपो न प्राप्नोति ।।

(दूषणबाधकभाष्यम्)

मा भूदेवम् । ङ्यन्तादित्येवं भविष्यति ।।

(दूषणसाधकभाष्यम्)

न सिध्यति । दीर्घादित्युच्यते, ह्रस्वान्ताच्च न प्राप्नोति ।। इदमिह संप्रधार्यम्—ह्रस्वत्वं क्रियतां संबुद्धिलोप इति ।।

किमत्र कर्तव्यम् ? परत्वाद् ह्रस्वत्वम् ।।

(दूषणबाधकभाष्यम्)

नित्यः संबुद्धिलोपः । कृते ह्रस्वत्वे प्राप्नोति, अकृतेऽपि ॥

(दूषणसाधकभाष्यम्)

अनित्यः संबुद्धिलोपः । नहि कृते ह्रस्वत्वे प्राप्नोति । किं कारणम् ?

संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति ॥

(आक्षेपोपसंहारभाष्यम्)

एते दोषाः समा भूयांसो वा । तस्मान्नार्थोऽनया परिभाषया ॥

विमला - समा इति । एतेन '**कष्टायेति यादेशो दीर्घत्वस्येति**' ग्रन्थो भाष्ये परिभ्रष्ट इत्यनुमीयते, अन्यथा दोषा अष्टौ, प्रयोजनानि नव इति वैषम्यात् समा इति कथनमसङ्गतं स्यात् । **भूयांसो वेति** । भूयस्त्वोक्तिः स्थितप्रयोजनत्रयापेक्षयेति बोध्यम् । केचित्तु '**गृहाणेति शानजादेशो हि लोपस्ये**' ति ग्रन्थोऽपि भाष्ये परिभ्रष्टः । अतएव 'भूयांस इत्युक्तिः, समा इत्युक्तिस्तु स्वल्पान्तरत्वादित्याहुः ।

(सिद्धान्तिसमाधानभाष्यम्)

नहि—दोषाः सन्तीति परिभाषा न कर्तव्या, लक्षणं वा न प्रणेयम् । नहि—भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते । न च मृगाः सन्तीति यवा नोप्यन्ते । दोषाः खल्वपि साकल्येन परिगणिताः । प्रयोजनानामुदाहरणमात्रम् ॥

कुत एतत् ?

नहि दोषाणां लक्षणमस्ति । तस्माद्यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्तव्या, प्रतिविधेयं दोषेषु ॥ – कृन्मेजन्तः ॥३८॥

विमला - प्रतिविधेयं दोषेष्विति । प्रतिनिधानं परिभाषा विषये अनित्यत्वाश्रयणमेव अस्या अनित्यत्वेनैव '**हल : श्न : शानज्झि**'ति सूत्रेण संनिपातं निमित्तीकृत्य विधीयमानोऽपि शानच् '**अतोहेरि**'ति लोपस्यानिमित्तं न भवति । यत्तु '**अतोहेरि**'-त्यस्यारम्भसामर्थ्यात् **संनिपात**-परिभाषाया अप्रवृत्तिरिति । तन्न । भव, दीव्य, तुदेत्यादौ चारितार्थ्यसम्भवेन आरम्भसामर्थ्यस्य वक्तुमशक्यत्वात् ।

(अव्ययसंज्ञासूत्रम्)

अव्ययीभावश्च ॥१।१।४०॥

(२५४-प्रयोजनवार्तिकम्-१)

॥*॥ अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचाराः ॥*॥

(भाष्यम्)

अव्ययीभावस्याव्ययत्वे प्रयोजनम् ॥

किम् ? 'लुङ्मुखस्वरोपचाराः' ॥

लुक्—उपाग्नि प्रत्यग्नि। "अव्ययात्" इति लुक् सिद्धो भवति ॥

मुखस्वरः—उपाग्निमुखः । प्रत्यग्निमुखः । "नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः" इत्येष प्रतिषेधः[1] सिद्धो भवति ।

उपचारः—उपपयःकारः, उपपयःकाम इति । "अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य" इति प्रतिषेधः सिद्धो भवति ।

विमला - मुखस्वर इति । मुखं स्वाङ्गमित्युत्तरपदस्यान्तोदात्तत्वमित्यर्थः ।

१. क्वचिन्निषेध इति ।

प्रतिषेध: सिद्धो भवतीति । एवञ्च उपाग्निमुख इत्यादौ '**बहुव्रीहौ प्रकृत्येति**' पूर्वपदप्रकृतिस्वर एव भवति पूर्वपदञ्च समासस्वरेणान्तोदात्तमिति बहुव्रीहावपि पूर्वपदमन्तोदात्तमेवेति शेषनिघातस्वरेणोत्तरपदस्यान्तानुदात्तत्वमिति भाव: । **उपचार इति** । उपचार इति विसर्गस्थानिकसस्य प्राचां संज्ञा ।

(आक्षेपभाष्यम्)

किं पुनरिदं परिगणनमाहोस्विदुदाहरणमात्रम् ।

(समाधानभाष्यम्)

परिगणनमित्याह ।। अपि खल्वप्याहुः[१]— "यदन्यदव्ययीभावस्याऽव्ययकृतं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः" इति ।।

(अनुयोगभाष्यम्)

किं पुनस्तत् ?

(परिगणनाभावे दूषणभाष्यम्)

[पराङ्गवद्भावः[२] ।] पराङ्गवद्भावेऽव्ययप्रतिषेधश्चोदित उच्चैरधीयान नीचैरधीयानेत्येवमर्थम्, स इहापि प्राप्नोति – उपाग्न्यधीयान प्रत्यग्न्यधीयान ।।

अकच्यव्ययग्रहणं क्रियते उच्चकैर्नीचकैरित्येवमर्थम् । तदिहापि प्राप्नोति,–उपाग्निकं प्रत्यग्निकम् ।।

मुमि अव्ययप्रतिषेधश्चोद्यते– दोषामन्यमहर्दिवामन्या रात्रिरित्येवमर्थम् । स इहापि प्राप्नोति, –उपकुम्भंमन्य उपमणिकंमन्य इति ।।

"अस्य च्वौ" अव्ययप्रतिषेधश्चोद्यते[३] –

१. क्वचिदपि खल्वाहुः । २. इति क्वचिन्न ।
३. 'प्रतिषेध उच्यते' इति क्वचित् ।

दोषाभूतम- हर्दिवाभूता रात्रिरित्येवमर्थम्, स इहापि प्राप्नोति,- उपकुम्भीभूतम् उपमणिकीभूतम् ।।

(प्रत्याख्यानभाष्यम्)

यदि परिगणनं क्रियते, नार्थोऽव्ययीभावस्याव्ययसंज्ञया ।।

(आक्षेपभाष्यम्)

कथं यान्यव्ययीभावस्याव्ययत्वे प्रयोजनानि ?

(प्रत्याख्यानसाधक प्रथमप्रयोजननिरासभाष्यम्)

नैतानि सन्ति । यत्तावदुच्यते – लुगिति । आचार्यप्रवृत्तिर्ज्ञापयति–भवत्यव्ययीभावाल्लुगिति । यदयम्– "नाव्ययीभावादतः" इति प्रतिषेधं शास्ति ।।

(तृतीयप्रयोजननिरासभाष्यम्)

उपचार इति । अनुत्तरपदस्थस्येति वर्तते ।।

(द्वितीयप्रयोजननिरासभाष्यम्)

तत्र मुखस्वर एकः प्रयोजयति । न चैकं प्रयोजनं योगारम्भं प्रयोजयति । यद्येतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयात्–'नाव्ययादव्ययीभावाच्च इति ।। अव्ययीभावश्च ।।४०।।

(इत्यव्ययसंज्ञाप्रकरणम्)

(अथ सर्वनामस्थानसंज्ञाप्रकरणम्)

(सर्वनामस्थानसंज्ञासूत्रम्)

शि सर्वनामस्थानम् ।।१।१।४१।।

सुडनपुंसकस्य ।।१।१।४२।।

(जसः शेः संज्ञाप्रतिषेधनिराकरणाधिकरणम्)

(२५५-आक्षेपवार्तिकम्-१)

।।।। शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शिप्रतिषेधः[१] ।।*।।*

(भाष्यम्)

शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शेः प्रतिषेधः प्राप्नोति । कुण्डानि तिष्ठन्ति, वनानि तिष्ठन्ति ।।

(वार्तिकम्)

।।।। असमर्थसमासश्च[२] ।।*।।*

(दूषणान्तरभाष्यम्)

असमर्थसमासश्चायं द्रष्टव्योऽनपुंसकस्येति । नहि नञो नपुंसकेन सामर्थ्यम् ।।

केन तर्हि ?

भवतिना । न भवति, नपुंसकस्येति ।।

(सामाधानभाष्यम्)

यत्तावदुच्यते—'शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शि प्रतिषेधः'-इति ।।

(२५६-समाधानवार्तिकम्-३)

---

१. अयमंशः क्वचिन्न ।

२. लुप्तं स्यात्, क्वचिन्न ।

॥*॥ *नाऽप्रतिषेधात्* ॥*॥

(भाष्यम्)

नायं प्रसज्यप्रतिषेधो—नपुंसकस्य नेति ॥

किं तर्हि ?

पर्युदासोऽयम्—यदन्यन्नपुंसकादिति । नपुंसके न व्यापारः । यदि केनचित्प्राप्नोति, तेन भविष्यति[1] । पूर्वेण च प्राप्नोति ॥

(२५७-समाधानवार्तिकम्-८)

॥*॥ *अप्राप्तेर्वा* ॥*॥

(भाष्यम्)

अथवा—अनन्तरा या प्राप्तिः सा निषिध्यते ॥

कुत एतत् ?

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । पूर्वा प्राप्तिरप्रतिषिद्धा, तया भविष्यति ॥

(आक्षेपभाष्यम्)

ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते ॥

(समाधानभाष्यम्)

नोत्सहते प्रतिषिद्धा सती बाधितुम् ॥

(दूषणान्तरसमाधानभाष्यम्)

यदप्युच्यते—'असमर्थसमासश्चाऽयं द्रष्टव्यः'—

---

१. 'तेन अव्यापार:' इति क्वचित् ।

इति ।। यद्यपि वक्तव्यः । अथवैतर्हि बहूनि प्रयोजनानि ।।

कानि ?

असूर्यं पश्यानि मुखानि, अपुनर्गेयाः श्लोकाः, अश्राद्धभोजी ब्राह्मण इति ।। सुड० ।। ४२।।

(इति सर्वनामस्थानसंज्ञाप्रकणम्)

(विभाषासंज्ञासूत्रम्)

नवेति विभाषा ।।१।१।४३।।

(अर्थसंज्ञास्थापनाधिकरणम्)

(२५८-आक्षेपवार्तिकम्-१)

।।*।। नवेतिविभाषायामर्थसंज्ञाकरणम् ।।*।।

नवेतिविभाषायामर्थस्य संज्ञा कर्तव्या । नवा-शब्दस्य योऽर्थस्तस्य संज्ञा भवतीति वक्तव्यम् ।।

(वार्तिकावतरणभाष्यम्)

किं प्रयोजनम् ?

(आक्षेपसाधकवार्तिकद्वितीयखण्डम्)

।।*।। शब्दसंज्ञायां ह्यर्थाऽसम्प्रत्ययो यथाऽन्यत्र ।।*।।

(भाष्यम्)

शब्दसंज्ञायां हि सत्यामर्थस्याऽसंप्रत्ययः स्यात् । 'यथान्यत्र' । अन्यत्रापि हि शब्दसंज्ञायां शब्दस्यैव संप्रत्ययो भवति, नार्थस्य ।। क्वान्यत्र ?

'दाधा घ्वदाप्' "तरप्तमपौ घः" इति । घुग्रहणेषु घग्रहणेषु च शब्दस्य संप्रत्ययो भवति, नार्थस्य ।।

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम् ?

(समाधानभाष्यम्)

न वक्तव्यम् ।।

(२५९-समाधानवार्तिकम्-२)

।।।। इतिकरणोऽर्थनिर्देशार्थः ।।*।।*

(भाष्यम्)

इतिकरणः क्रियते सोऽर्थनिर्देशार्थो भविष्यति ।।

(आक्षेपभाष्यम्)

किं गतमेतदितिना, आहोस्विच्छब्दाधिक्यादर्थाधिक्यम् ?

(समाधानभाष्यम्)

गतमित्याह ।।

कुतः ?

(२६०-समाधानसाधकवार्तिकम्-३)

।।।। लोकतः[1] ।।*।।*

(भाष्यम्)

तद्यथा लोके 'गौरित्ययमाह' इति गोशब्दादि-

---

१. भाष्यमिदमित्यन्ये ।

तिकरणः प्रयुज्यमानो, गोशब्दं स्वस्मात्पदार्थात्प्रच्यावयति । सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो, याऽसावर्थपदार्थकता तस्याः, शब्दपदार्थकः संपद्यते ।। एवमिहाऽपि नवाशब्दादितिकरणः परः प्रयुज्यमानो, नवाशब्दं स्वस्मात्पदार्थात्प्रच्यावयति । सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो — यासौ शब्दपदार्थकता तस्या लौकिकमर्थं संप्रत्याययति[1]–नवेति यद्गम्यते नवेति यत्प्रतीयते–इति ।।

विमला - गोशब्दादिति । अस्य परमिति शेषः । **स्वस्मात् पदार्थात्** । गोत्वावच्छिन्नात् । **प्रच्यावयति** । विपर्य्यासयति । **स इति** । एतस्यैव विवरणं स्वस्मात्पदार्थात्प्रच्युत इति । एतस्यापि विवरणम्—**यासावर्थपदार्थकता तस्या इति** । अस्य प्रच्युत इति शेषः । तस्या इति पञ्चम्यन्तम्, प्रच्युत इत्यस्य विपर्य्यस्त इत्यर्थः । **असाविति** । गोशब्द इत्यर्थः । **शब्दपदार्थकः सम्पद्यते** । सम्पन्न इत्यर्थः । एवञ्चासति बाधके उद्देश्यतावच्छेदकविधेययोः प्रयोज्यप्रयोजकभाव-बोधस्यानुभवसिद्धतया स्वस्मात् पदार्थाद्विपर्यासप्रयोज्यत्वं शब्दपदार्थकत्वसम्पत्तौ लब्धमित्यवगन्तव्यम् । केचित्तु इतेः न पदार्थविपर्य्यासकत्वं नापीतिशब्दो व्यर्थः, निषेधविकल्पौ विभाषासंज्ञाविति तात्पर्येण – '**नवा विभाषा**' इति वाक्यस्य निराकांक्षत्वात् । अत एव '**निषेधः पदार्थः**' '**विकल्पः प्रमेयः**' इति तात्पर्येण **न पदार्थः** '**वा प्रमेयः**' इति न प्रयुज्यते । तस्मादितेः सर्वनामत्वेन इतेरेव निषेधविकल्पार्थकत्वम्, नवेति तात्पर्य्यग्राहकमित्येव रमणीयः पन्थाः । गवित्य-यमाहेत्यनुकरणेप्येवमेव । अत एव '**नारद इत्यबोधी**'त्यादौ नारदपदान्न द्वितीया । अन्यथा नारदस्यैव बुधिम्प्रति कर्मत्वेन सा दुर्वारा स्यात् । मम तु इतिपदमेव नारदपदार्थकम्, नारदपदञ्च तात्पर्यग्राहकम् । इतिशब्दादुत्पन्ना द्वितीया लुप्तेति न कोऽपि दोष इत्याहुः । **सोऽसाविति** । इदमपि पूर्ववदेव व्याख्येयम् । अयम्भावः । इतेः पदार्थविपर्य्यासकतया लोके शब्दविशेषणकार्थोपस्थितेरिति पदासमभिव्याहा-

१. क्वचित्प्रत्याययति ।

रस्थले दृष्टतया गवित्ययमाहेत्यादावितिपदसमभिव्याहारस्थलेऽर्थविशेषणकशब्दोपस्थितिः । शास्त्रे तु 'अग्नेर्ढगि' त्यादावितिपदासमभिव्याहारस्थले शब्दविशेषणकार्थोपस्थितौ अग्निरूपार्थात्परत्वस्य ढक्यसम्भवेन सूत्रार्थाप्रसिद्धिरित्यर्थविशेषणकशब्दोपस्थितिरिति स्वरूपसूत्रस्वरसः । नवेतिविभाषेत्यादावितिपदसमभिव्याहारस्थले इतेः पदार्थविपर्य्यासकत्वेन शब्दविशेषणकार्थोपस्थितिरिति निषेधविकल्पयोरेव विभाषासंज्ञेति ।

(समानशब्दसंज्ञानिरसनाधिकरणम्)

(२६१-आक्षेपवार्तिकम्-४)

।।*।। समानशब्दप्रतिषेधः ।।*।।

(भाष्यम्)

समानशब्दानां प्रतिषेधो वक्तव्यः । नवा कुण्डिका, नवा घटिकेति ।।

(आक्षेपभाष्यम्)

किं च स्यात्, यद्येतेषामपि विभाषा संज्ञा स्यात् ?

(समाधानभाष्यम्)

"विभाषा दिक्समासे बहुव्रीहौ" । दक्षिणपूर्वस्यां शालायाम् । अचिरकृतायां संप्रत्ययः[1] स्यात् ।।

(२६२-समाधानवार्तिकम्-५)

।।*।। न वा विधिपूर्वकत्वात् प्रतिषेधसंप्रत्ययो यथा लोके ।।*।।

(भाष्यम्)

१. क्वचित्संज्ञासंप्रत्ययः ।

न वा एष दोषः ।। किं कारणम् ?

'विधिपूर्वकत्वात्' । विधाय किंचिन्नवेत्युच्यते, तेन प्रतिषेधवाचिनः संप्रत्ययो भवति । तद्यथा—लोके 'ग्रामो भवता गन्तव्यो नवा' ? नेति गम्यते ।।

(समाधानबाधकभाष्यम्)

अस्ति कारणम्–येन नवेति लोके प्रतिषेधवाचिनः संप्रत्ययो भवति ।। किं कारणम् ?

विलिङ्गं हि भवान् लोके निर्देशं करोति । अङ्ग ! हि समानलिङ्गो निर्देशः क्रियतां, प्रत्यग्रवाचिनः संप्रत्ययो भविष्यति । तद्यथा–'ग्रामो भवता गन्तव्यो नवः' । प्रत्यग्र इति गम्यते ।।

(समाधानसाधकभाष्यम्)

एतच्चैव न जानीमः–क्वचिद्व्याकरणे समानलिङ्गो निर्देशः क्रियत इति ।।

(समाधानसाधकान्तरभाष्यम्)

अपि चात्र[1] कामचारः प्रयोक्तुः शब्दानामभिसंबन्धे । तद्यथा–'यवागूर्भवता भोक्तव्या नवा' । यदा यवागूशब्दो भुजिना संबध्यते, भुजिर्नवाशब्देन, तदा प्रतिषेधवाचिनः संप्रत्ययो भवति–'यवागूर्भवता भोक्तव्या नवा' । नेति गम्यते ।। यदा तु[2] नवाशब्दो[3] यवागूशब्देनाऽभिसंबध्यते, न भुजिना । तदा

---

१. अत्रेति क्वचिन्न ।

२. क्वचिन्न ।

३. क्वचिद्विपर्यासः ।

प्रत्यग्रवाचिनः संप्रत्ययो भवति । यथा–'यवागूर्नवा भवता भोक्तव्या' । प्रत्यग्रेति गम्यते ।। न चेह वयं विभाषाग्रहणेन सर्वादीन्यभिसंबध्नीमः— 'दिक्समासे बहुव्रीहौ सर्वादीनि विभाषा भवन्ती'ति ।

किं तर्हि ?

भवतिरभिसंबध्यते—दिक्समासे बहुव्रीहौ सर्वादीनि 'भवन्ति विभाषे'ति ।।

विमला - यवागूशब्देनाभिसंबध्यत इति । क्रियावाचिपदेन नवाशब्दस्याभिसंबन्धे नवाशब्दस्य निषेधाभिधायित्वम्, द्रव्यवाचिपदेनाभिसंबन्धे तु प्रत्यग्राभिधायित्वमिति निर्गलितोऽर्थः । **विभाषाग्रहणेनेति** । विभाषापदस्य नवापदसमशीलतया दृष्टान्त-दार्ष्टान्तिकतेति बोध्यम् । एतेन लोकदृष्टान्तेन नवाशब्दस्य क्रियावाचिपदेनाऽभिसंबन्धे निषेधाभिधायित्वेऽपि विभाषापदस्य क्रियावाचिपदेनाभिसंबन्धे निषेधाभिधायित्वं निर्मूलमिति वदन्तः परास्ताः । **भवतिरभिसंबध्यत इति** । भवति-क्रियायाः प्राधान्यात्तात्पर्याच्चेतिभावः ।

(विध्यनित्यत्वसाधनाधिकरणम्)

(२६३-आक्षेपवार्तिकम्-६)

।।*।। विध्यनित्यत्वमनुपपन्नं, प्रतिषेधसंज्ञाकरणात् ।।*।।

(भाष्यम्)

विधेरनित्यत्वं नोपपद्यते । शुशाव शुशुवतुः शुशुवुः । शिश्वाय शिश्वियतुः शिश्वियुः ।।

किं कारणम् ?

'प्रतिषेधसंज्ञाकरणात्' । प्रतिषेधस्येयं संज्ञा

क्रियते । तेन विभाषाप्रदेशेषु प्रतिषेधस्यैव संप्रत्ययः स्यात् ।।

(२६४-समाधानवार्तिकम्-७)

।।*।। सिद्धं तु प्रसज्य[1] प्रतिषेधात् ।।*।।

(भाष्यम्)

सिद्धमेतत् ।। कथम् ?

'प्रसज्य प्रतिषेधात्' । विधाय[2] किंचिन्नवेत्युच्यते तेनोभयं भविष्यति ।

विमला - सिद्धन्त्विति । निषेधानुपपत्तिकल्पितशास्त्रेण प्रसज्य प्रतिषेधात् विधेरनित्यत्वं सिद्धमिति वार्तिकार्थः । एवञ्च **विभाषा श्वेः**रित्यादौ निषेधानुपपत्ति-कल्पितशास्त्रस्य किन्निमित्तकत्वाभावेन पिद्विषयेऽपि विधेरनित्यत्वं सिद्ध्यति । यदि च पूर्वशास्त्रेण प्रसज्येतिवार्तिकार्थो भवेत्तदा **वचिस्वपी**त्यस्य किन्निमित्तकत्वेन किति विधेरनित्यत्वोपपत्तावपि पित्यनित्यत्वानुपपत्तिः स्यादेवेति बोध्यम् ।

(२६५-आक्षेपवार्तिकम्-८)

।।*।। विप्रतिषिद्धं तु ।।*।।

(भाष्यम्)

विप्रतिषिद्धं तु भवति । अत्र न विज्ञायते— केनाभिप्रायेण प्रसजति, केन निवृत्तिं करोतीति ।।

(२६६-समाधानवार्तिकम्-९)

।।*।। न वा, प्रसंगसामर्थ्यादन्यत्र प्रतिषेधविषयात् ।।*।।

---

१. क्वचिन्नेदम् । २. 'प्रसज्य' इति क्वचित् ।

(भाष्यम्)

न वा एष दोषः ॥

किं कारणम् ? 'प्रसङ्गसामर्थ्यात्' ।

प्रसङ्गसामर्थ्याच्च विधिर्भविष्यति—अन्यत्र प्रतिषेधाविषयात् ॥ प्रतिषेधसामर्थ्याच्च प्रतिषेधो भविष्यति— अन्यत्र विधिविषयात् ॥

(आक्षेपभाष्यम्)

तदेतत् क्व सिद्धं भवति—या अप्राप्ते विभाषा । या हि प्राप्ते विभाषा, कृतसामर्थ्यस्तत्र पूर्वेणैव[1] विधिरिति कृत्वा प्रतिषेधस्यैव संप्रत्ययः स्यात् ॥

(समाधानभाष्यम्)

एतदपि सिद्धम् ॥ कथम् ?

विभाषेति महती संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः ॥ कुत एतत् ?

लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम्–उभयोः संज्ञा यथा विज्ञायेत — नेति च, वेति च । तत्र या तावदप्राप्ते विभाषा, तत्र प्रतिषेध्यं नास्तीति कृत्वा वेत्यनेन विकल्पो भविष्यति । या हि प्राप्ते विभाषा, तत्रोभयमुपस्थितं भवति— नेति च, वेति च । तत्र नेत्यनेन प्रतिषिद्धे वेत्यनेन विकल्पो भविष्यति ॥

(भाष्यम्)

१. 'एव' इति क्वचिन्न ।

एवमपि—

(२७७-आक्षेपवार्तिकम्- १०)

|||| विधिप्रतिषेधयोर्युगपद्वचनाऽनुपपत्तिः ||*||*

(भाष्यम्)

विधिप्रतिषेधयोर्युगपद्वचनं नोपपद्यते । शुशाव शुशुवतुः शुशुवुः । शिश्वाय शिश्वियतुः शिश्वियुः ।

किं कारणम् ?

(२६८-आक्षेपसाधकवार्तिकम्- ११)

|||| भवतीति चेन्न प्रतिषेधः ||*||*

(भाष्यम्)

भवतीति चेत् प्रतिषेधो न प्राप्नोति ।।

(२६९-आक्षेपसाधकवार्तिकम्- १२)

|||| नेति चेन्न विधिः ||*||*

(भाष्यम्)

नेति चेद्विधिर्न सिध्यति ।।

(२७०-समाधानवार्तिकम्- १३)

|||| सिद्धं तु पूर्वस्योत्तरेण बाधितत्वात् ||*||*

(भाष्यम्)

सिद्धमेतत् ।। कथम् ?

[१]पूर्वविधिमुत्तरो विधिर्बाधते । इतिकरणोऽर्थनिर्देशार्थ इत्युक्तम् ।।

---

१. इतः पूर्वं ''पूर्वस्योत्तरेण बाधितत्त्वात्'' इति लुप्तं स्यात् ।

(२७१-आक्षेपवार्तिकम्- १४)

।।*।। साध्वनुशासनेऽस्मिन् शास्त्रे[1] यस्य विभाषा तस्य साधुत्वम् ।।*।।

(भाष्यम्)

साध्वनुशासनेऽस्मिञ् शास्त्रे यस्य विभाषा क्रियते स विभाषा साधुः स्यात् । समासश्चैव हि विभाषा क्रियते, तेन समासस्यैव विभाषा साधुत्वं स्यात् ।।

(आक्षेपबाधकभाष्यम्)

अस्तु । यः साधुः, स प्रयोक्ष्यते । असाधुर्न प्रयोक्ष्यते ।।

(आक्षेपसाधकभाष्यम्)

न चैव हि कदाचिद् राजपुरुष इत्येतस्यामवस्थाया-मसाधुत्वमिष्यते ।। अपि च—

(२७२-आक्षेपवार्तिकम्- १५)

।।*।। द्वैधाऽप्रतिपत्तिः ।।*।।

(भाष्यम्)

द्वैधं शब्दानामप्रतिपत्तिः स्यात्[2] । इच्छामश्च—पुनर्विभाषाप्रदेशेषु द्वैधं शब्दानां प्रतिपत्तिः स्यादिति, तच्च न सिध्यति । यस्य पुनः कार्य्याः शब्दाः, विभाषाऽसौ समासं निर्वर्तयति ।।

(आक्षेपबाधकभाष्यम्)

---

१. 'शास्त्रे' इति क्वचिन्न ।

२. स्यादिति क्वचिन्न ।

यस्यापि नित्याः शब्दास्तस्याप्येष[१] दोषो न भवति ।।

कथम् ?

न विभाषाग्रहणेन साधुत्वमभिसंबध्यते ।।

किं तर्हि, ?

समाससंज्ञाऽभिसंबध्यते–समास इत्येषा संज्ञा विभाषा भवतीति । तद्यथा–"मेध्यः पशुर्विभाषितः मेध्योऽनड्वान् विभाषितः"–इति । नैतद्विचार्यते–अनड्वान्नानड्वानिति ।।

किं तर्हि ? आलब्धव्यो नालब्धव्य इति ।।

(२७३-आक्षेपवार्तिकम्-१६)

।।।। कार्येषु युगपदन्वाचययौगपद्यम् ।।*।।*

(भाष्यम्)

कार्येषु शब्देषु, युगपदन्वाचयेन च यदुच्यते, तस्य युगपद्वचनता प्राप्नोति–"तव्यत्तव्यानीयरः" "ढक् च मण्डूकात्" इति ।। यस्य पुनर्नित्याः शब्दाः, प्रयुक्तानामसौ साधुत्वमन्वाचष्टे ।।

(आक्षेपबाधकभाष्यम्)

ननु च यस्यापि कार्यास्तस्याप्येष न दोषः ।।

कथम् ?

प्रत्ययः परो भवतीत्युच्यते । न चैकस्याः प्रकृतेरनेकस्य प्रत्ययस्य युगपत्परत्वेन संभवोऽस्ति ।।

१. 'न दोषः' इति क्वचित् ।

(आक्षेपाभिप्रायभाष्यम्)

नापि ब्रूमः—प्रत्ययमाला प्राप्नोतीति ।।

किं तर्हि ?

कर्तव्यमिति प्रयोक्तव्ये युगपद् द्वितीयस्य तृतीयस्य च प्रयोगः प्राप्नोतीति ।।

(आक्षेपबाधकभाष्यम्)

नैष दोषः । अर्थगत्यर्थः शब्दप्रयोगः[१] । अर्थं संप्रत्यायायिष्यामीति शब्दः प्रयुज्यते । तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य च तृतीयस्य च[२] प्रयोगेण न भवितव्यम् "उक्तार्थानामप्रयोगः" इति ।।

(२७४-आक्षेपवार्तिकम्-१७)

।।।। आचार्यदेशशीलने च तद्विषयता ।।*।।*

(भाष्यम्)

आचार्यशीलनेन देशशीलनेन च यदुच्यते, तस्य तद्विषयता प्राप्नोति । "इको ह्रस्वोऽङ्यो गालवस्य" "प्राचामवृद्धात् फिन् बहुलम्" इति गालवा एव ह्रस्वान्प्रयुञ्जीरन्, प्राक्षु चैव हि फिन् स्यात् । तद्यथा "जमदग्निर्वा एतत्पञ्चममवदानमवाद्यत् । तस्मान्नाऽजामदग्न्यः पञ्चावत्तं जुहोति" ।। यस्य पुनर्नित्याः शब्दाः, गालवग्रहणं तस्य पूजार्थम्, देशग्रहणं च कीर्त्यर्थम् ।।

विमला - तद्यथेति । आचार्यशीलने तद्विषयता यथेत्यर्थः । **वा एतदिति** ।

---

१. वार्तिकमिदमित्यन्ये ।

२. 'तृतीयस्य च' इति क्वचिन्न ।

यस्मादेतदित्यर्थः । **पञ्चममवदानमिति** । पञ्चमं छेदनमित्यर्थः । **अवाद्यदिति** । अच्छिनदित्यर्थः । **तस्मान्नाजामदग्न्यः पञ्चावत्तं जुहोतीति** । अजामदग्न्यः पञ्चधाछिन्नम् उपस्तरणत्रिरवदानाभिधारणानि न जुहोतीत्यर्थः ।

(आक्षेपबाधकभाष्यम्)

ननु च-यस्यापि कार्याः शब्दाः, तस्यापि गालवग्रहणं पूजार्थं स्यात्, देशग्रहणं च कीर्त्यर्थम् ।।

(२७५-आक्षेपवार्तिकम्-१८)

।।*।। तत्कीर्तने च द्वैधाऽप्रतिपत्तिः ।।*।।

(भाष्यम्)

तत्कीर्तने च द्वैधं शब्दानामप्रतिपत्तिः स्यात् । इच्छामश्च पुनराचार्यग्रहणेषु देशग्रहणेषु च द्वैधं शब्दानां प्रतिपत्तिः स्यादिति, तच्च न सिध्यति ।।

(अथसूत्रप्रत्याख्यानम्)

(२७६-सिद्धान्तवार्तिकम्-१९)

।।*।। अशिष्यो वा विदितत्वात् ।।*।।

(भाष्यम्)

अशिष्यो वा पुनरयं योगः ।। किं कारणम् ?

'विदितत्वात्' । यदनेन योगेन प्रार्थ्यते तस्यार्थस्य विदितत्वात् ।। येऽपि ह्येतां संज्ञां नारभन्ते तेऽपि विभाषेत्युक्तेऽनित्यत्वमवगच्छन्ति ।। याज्ञिकाः खल्वपि संज्ञामनारभमाणा विभाषेत्युक्तेऽनित्यत्वमवगच्छन्ति । तद्यथा- "मेध्यः पशुर्विभाषितो मेध्योऽनड्वान्विभाषितः" इति ।। आलब्धव्यो

नालब्धव्य इति गम्यते ।। आचार्यः खल्वपि संज्ञामारभमाणो भूयिष्ठमन्यैरपि शब्दैरेतमर्थं संप्रत्याययति बहुलम्, अन्यतरस्याम्, उभयथा, वा, एकेषाम् इति ।।

विमला - अशिष्यो वेति । अस्य जातिव्यक्तिपक्षयोरुभयोरपीत्यादिः । यत्तु जातिपक्षे **विभाषाश्वेरि**त्युभयत्र विभाषार्थं सूत्रं प्रणेतव्यम्, अन्यथा यदि तस्य विधिमुखेन प्रवृत्तिस्तर्हि पित्स्वेव विकल्पः स्यात् कित्सु तु यजादित्वान्नित्यमेव सम्प्रसारणं स्यात् । अथ निषेधमुखेन प्रवृत्तिस्तर्हि कित्स्वेव विकल्पः स्यात् न पित्सु । उभयथाप्रवृत्तिस्तु न, वैरूप्यलक्षणवाक्यभेदापत्तेः । संज्ञाकरणे तु पूर्वं कित्सु श्रुतक्रमानुरोधेन नेति निषेधःप्रवर्तते, ततः किदकिद्रूपे सर्वस्मिन् लिटि ऐकरूप्यं प्रापिते पक्षे भवतीति विधिमुखेन वेत्यनेन ऐकरूप्येणैव विकल्पः प्रवर्तते । व्यक्तिपक्षे तु प्रतिलक्ष्यं **विभाषाश्वेरि**ति भिद्यते इति क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेन प्रवृत्तेः संभावान्नेदं सूत्रमारम्भणीयमित्येव सूचयितुम् अशिष्यो वेति विकल्पार्थकं वा पदं प्रयुक्तमिति । तन्न । जातिपक्षेऽपि प्रदेशेष्वेव **न वा श्वेरि**त्यादि पठित्वा सूत्रस्य प्रत्याख्यातुं शक्यत्वात् । एवञ्च वार्तिके वेत्यवधारणे न विकल्पे इति बोध्यम् ।

(अप्राप्तविभाषाप्रकरणम्)

(२७७-अधिकारवार्तिकम्-२०)

।।।। अप्राप्ते, त्रिसंशयाः ।।*।।*

(भाष्यम्)

इत उत्तरं या विभाषा अनुक्रमिष्यामः, अप्राप्ते ता द्रष्टव्याः । त्रिसंशयास्तु भवन्ति–प्राप्ते, अप्राप्ते, उभयत्र वेति ।।

विमला - अप्राप्ते त्रिसंशया इति । 'अप्राप्ते' इत्यधिकारः 'प्राप्ते चे' त्यधिकारात्प्रागेव । त्रिसंशया इत्यस्य कोटित्रयप्रकारकसंशयविषयीभूता इत्यर्थः । **इत**

उत्तरमिति ।अस्य प्राप्ते चेत्यधिकारात्प्रागिति शेषः ।**अनुक्रमिष्याम इति** ।अनुक्रमेण वक्ष्याम इत्यर्थः ।**त्रिसंशयास्तु भवन्तीति** ।कोटित्रयप्रकारकसंशयविषयीभूतास्तु भवन्तीत्यर्थः ।कोटित्रयमेव दर्शयति—**प्राप्ते, अप्राप्ते, उभयत्र वेति** ।यद्यप्यप्राप्ते विभाषाः बहवः सन्ति, किन्तु कोटित्रयप्रकारकसंशयविषयीभूता अप्राप्ते विभाषा एतावन्त्य एवेति प्रकटयितुमयं सन्दर्भः ।

(२७८-अप्राप्तविभाषोदाहरणवार्तिकम्-२१)

॥*॥ द्वन्द्वे च विभाषा जसि ॥*॥

(भाष्यम्)

[१]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ॥

विमला - द्वन्द्वे च, विभाषाजसीति ।विभाषा जसीत्यत्र न सन्देहः द्वन्द्वे चेतिनिषेधेन प्राप्तविभाषात्वनिर्णयात् ।अतो विभाषा जसीतिप्रकरणे जसः कार्य्यम्प्रति विभाषा सर्वनामसंज्ञाविधायके **प्रथमचरमे**तिसूत्रे इति वार्तिकार्थो वर्णनीयः ।अत एवोभयशब्दः सर्वादिष्विति उत्तरग्रन्थः संगच्छते ।

(आक्षेपभाष्यम्)

कथं वा[२] प्राप्ते । कथं वाऽप्राप्ते । कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

उभयशब्दः सर्वादिषु पठ्यते । तयपश्चाऽयजादेशः क्रियते । तेन वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।

विमला - उभयशब्दः सर्वादिषु पठ्यत इति ।अयम्भावः 'प्रथमचरमे' ति सूत्रे सर्वादीनीत्यनुवर्तते तस्य च प्रथमादावसम्भवात्, नेमशब्देऽव्यभिचारादसंबन्धेऽपि

---

१. इतः पूर्वं ''द्वन्द्वे च विभाषा जसि' इति लुप्तं स्यात् ।

१. 'च' इति क्वचित् ।

तयप्प्रत्ययान्ते द्वितयादिषु व्यभिचारात्, उभयशब्दे सम्भवाच्च सम्बन्धे अस्यापि द्वितयादिष्वप्राप्तेः केवलमुभयशब्द एव प्राप्तेश्च प्राप्तविभाषात्वम् । यदि च सर्वादीनीति नानुवर्तते '**प्रथमचरमे**'तिसूत्रं द्वितयादिष्वपि प्रवर्तते, उभयशब्दे तु नित्यैव संज्ञा भवतीति व्यवस्थाप्यते तदा अप्राप्तविभाषात्वम्, द्वितयादिष्वन्येनाप्राप्तेः । अथ सर्वादीनीति नानुवर्तते उभयशब्देऽपि परविप्रतिषेधेन विकल्प एव भवतीति व्यवस्थाप्यते तदोभयत्र विभाषात्वम्, उभयशब्दे नित्यसंज्ञायाः प्राप्तेः द्वितयादिष्वप्राप्तेश्च ।

(सिद्धान्तभाष्यम्)

'अप्राप्ते' । अयच् प्रत्ययान्तरम् ।।

विमला - अयच् प्रत्ययान्तरमिति । न तु तयपोऽयजादेश इति स्थानिवद्भावेनापि न तयप्प्रत्ययान्तत्वप्रत्याशेतिभावः ।

(समाधानबाधकभाष्यम्)

यदि प्रत्ययान्तरम्, — उभयीति ईकारो न प्राप्नोति ।।

(समाधानसाधकभाष्यम्)

माभूदेवम्, 'मात्रच'इत्येवं भविष्यति ।।

कथम् ? मात्रजिति नेदं प्रत्ययग्रहणम् ।।

किं तर्हि ? प्रत्याहारग्रहणम् ।।

क्व सन्निविष्टानां प्रत्याहारः ?

मात्रशब्दात्प्रभृति आ अयचश्चकारात् ।।

(समाधानबाधकभाष्यम्)

यदि प्रत्याहारग्रहणम् । 'कति तिष्ठन्ति' अत्रापि प्राप्नोति ।।

(समाधानसाधकभाष्यम्)

'अत' इति वर्तते ।।

(समाधानबाधकभाष्यम्)

एवमपि-'तैलमात्रा घृतमात्रा'- अत्रापि प्राप्नोति ।।

(समाधानसाधकभाष्यम्)

सदृशस्याऽप्यसन्निविष्टस्य न भविष्यति प्रत्याहारेण ग्रहणम् ।।

विमला - न भविष्यति प्रत्याहारेण ग्रहणमिति । लक्षणसाहचर्य्यपरिभाषाभ्यामितिभावः ।

(२७९-उदाहरणवार्तिकम्-२२)

।।।। ऊर्णोतेर्विभाषा ।।*।।*

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति सन्देहः ।

विमला - ऊर्णोतेर्विभाषेति । ऊर्णुधातोः[2] ङित्त्वविषयविभाषेत्यर्थः । **'विभाषोर्णोरिति'** ति यावत् । अस्य यथाश्रतसूत्रपरत्वे तु तस्योतो **वृद्धिरिति**नित्यवृद्धौ प्राप्तायामेवारम्भात् प्राप्तविभाषात्वनिर्णयेनाप्राप्ताधिकारे पाठोऽसंगतः स्यात् ।

(आक्षेपभाष्यम्)

कथं वा[3] प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

---

१. इतः पूर्वं 'ऊर्णोर्विभाषा' इति लुप्तं स्यात् ।

२. ऊर्णोर्धातोः कित्त्वविषयविभाषेत्यर्थरिति उद्योते ।

३. 'च' इति क्वचित् ।

(संदेहोपपादकभाष्यम्)

"असंयोगाल्लिट् कित्" इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

विमला - असंयोगाल्लिट् किदिति । अयम्भावः । विभाषोर्णोरितिसूत्रम् असंयोगाल्लिट् किदित्यत्रानुवर्तते वाक्यभेदेन असंयोगात्परोऽपि ल्लिडिडादिः ङिद्वेति व्याख्याने ऊर्णोतेरसंयोगान्ततया पूर्वेण प्राप्तस्यैवानेन विकल्पविधानादप्राप्तविभाषात्वम् । नन्वसंयोगादित्यनेन कित्त्वमतिदिश्यते विभाषोर्णोरित्यनेन ङित्त्वमिति पूर्वेण ङित्त्वाप्राप्तेः कथमस्य प्राप्तविभाषात्वमिति चेन्न, कार्य्यातिदेशपक्षस्यैव मुख्यतया कित्त्वङित्त्वयोर्गुणवृद्धिनिषेधफलकत्वेन कित्त्वातिदेशेनापि गुणवृद्धिनिषेधातिदेशसम्भवेन भवति प्राप्तविभाषात्वमित्याशयात् । **असंयोगादित्यत्र विभाषोर्णोरि**त्यस्यासंबन्धे द्वयोरेव स्वातन्त्र्येण विधायकतया धात्वन्तरे चरितार्थस्यासंयोगादित्यस्य लुडादौ चरितार्थस्य विभाषोर्णोरित्यस्य ऊर्णुनुविवेत्यादौ प्रवृत्तौ परविप्रतिषेधेन नित्यकित्त्वेन विकल्पस्य बाधात् विकल्पस्य लुडादावेव सम्भवेनाप्राप्तविभाषात्वम् । अथ पूर्वविप्रतिषेधेनोर्णुनुविवेत्यादावपि विकल्पस्यैवेष्टत्वे ऊर्णुनुविवेत्यादौ प्राप्तविभाषात्वम्, ऊर्णुविवेत्यादावप्राप्तविभाषात्वमित्युभयत्रविभाषात्वमपि सम्भवतीति कोटित्रयप्रकारकः सन्देह उपपद्यते ।

(सिद्धान्तभाष्यम्)

अप्राप्ते[1] ।।

(सन्देहबाधकभाष्यम्)

अन्यद्धि कित्त्वम्, अन्यद्धि ङित्त्वम् ।

विमला - अन्यद्धीति । कित्त्वादिव्यपदेशविधायकावेवेमे शास्त्रे गुणादिनिषेधस्तु क्ङिति चेत्यनेनैव । तथाच कित्त्वव्यपदेशात् ङित्त्वव्यपदेशस्य भिन्नतया ङित्त्वव्यपदेशस्याप्राप्तावेवानेन विधानादप्राप्तविभाषात्वनिर्णयेन सन्देहो न सम्भवतीतिभावः.

---

१. क्वचिन्न ।

(संदेहसाधकभाष्यम्)

एकं चेन्ङित्किती[१] । यद्येकं ङित्किती ततः[२] संदेहः ॥

विमला - एकं चेदिति । कार्य्यातिदेशपक्षस्य मुख्यत्वादितिभावः ।

(आक्षेपभाष्यम्)

अथ हि नाना, नास्ति संदेहः ॥

(समाधानभाष्यम्)

यद्यपि नाना, एवमपि संदेहः—[३]प्रौर्णुवीति ।

(संदेहोपपादकभाष्यम्)

"सार्वधातुकमपित्" इतिवा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।

विमला - सार्वधातुकमपिदिति । अयम्भावः । **विभाषोर्णोरि**तिसूत्रम् '**सार्वधातुकमपि**दित्यत्रानुवर्तते, वाक्यभेदेनान्वयः अपित्सार्वधातुकं ङिद्वदिति पूर्ववाक्यस्यार्थः । उत्तरस्य तु ऊर्णोतेः परमपित्सार्वधातुकमिडादिङिद्वद्वेत्यर्थः । एवञ्च पूर्ववाक्येन प्राप्तस्यैवानेन विकल्पितत्वात् प्राप्तविभाषात्वम् । यदिच '**विभाषोर्णोरि**'-तिसूत्रं नानुवर्तते, ऊर्णोतेः परस्येडादिप्रत्ययमात्रस्यैवानेन ङित्त्वमित्यभ्युपगम्यते तर्हि ऊर्णुवितेत्यादौ चरितार्थस्य विकल्पस्य ऊर्णुत इत्यादौ चरितार्थस्य **सार्वधातुकमपिदित्यस्य** 'प्रौर्णुवि'इत्यादौ प्राप्तौ परविप्रतिषेधेन नित्यङित्त्वे विकल्पस्योर्णुवितेत्यादावेव प्रवृत्तिरित्यप्राप्तविभाषात्वम् । पूर्वविप्रतिषेधेन तत्रापि विकल्पस्यैवेष्टत्वे '**प्रौर्णुवि**' इत्यादौ प्राप्तविभाषात्वेन, प्रोर्णुवितेत्यादावप्राप्तविभाषात्वेन चोभयत्रविभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते ।

---

१. सन्देहोपपादकवार्तिकमेतदिति अन्ये ।

२. 'ततोऽस्ति' इति क्वचित् ।

३. इतः पूर्वं 'कथं ?।' इति क्वचिदधिकः ।

(सिद्धान्तभाष्यम्)

अप्राप्ते ॥

विमला - अप्राप्त इति । विज इडित्यत्रागमस्यैवेटो ग्रहणेन अत्रापि तस्यैव ग्रहणमिति प्रोर्णुवीत्यत्रास्याप्राप्तेरितिभाव: ।

(२८०-उदाहरणवार्तिकम्-२३)

॥॥ विभाषोपयमने ॥*॥*

(भाष्यम्)

[१]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वा अप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

गन्धन इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ॥

विमला - गन्धने इतीति । अयम्भाव: । स्वीकारे विवाहे च यम: परस्य सिच: कित्त्वविधायके '**विभाषोपयमने**' इति सूत्रे '**यमो गन्धने**' इत्यनुवर्तते । तथा च सूचनपूर्वके विवाहे स्वीकारे वा यम: पर: सिच् किद्वेत्यर्थे '**यमो गन्धने**' इत्यनेन प्राप्त एव विभाषाविधानात् प्राप्तविभाषात्वम् । '**यमोगन्धने**' इत्यस्यानुवृत्तौ गन्धनमात्रे चरितार्थस्य '**यमो गन्धने**' इत्यस्य विवाहमात्रे चरितार्थस्य विकल्पस्य गन्धनपूर्वके विवाहे युगपत्प्राप्तौ पूर्वविप्रतिषेधेन '**यमो गन्धने**' इत्यस्यैवेष्टत्वे गन्धनपूर्वके विवाहे प्राप्तविभाषात्वम्, शुद्धविवाहेऽप्राप्तविभाषात्वम् । परविप्रतिषेधेन विकल्पस्यैवेष्टत्वे गन्धनपूर्वके विवाहे प्राप्तविभाषात्वम्, शुद्धविवाहेऽप्राप्तविभाषात्वमित्युभयत्र विभाषात्वमिति कोटित्रयप्रकारक: सन्देह उपपद्यत इति ।

---

१. इत: पूर्वं 'विभाषोपयमने' इति लुप्तं स्यात् ।

(सिद्धान्तभाष्यम्)

अप्राप्ते । गन्धन इति निवृत्तम् ।।

विमला - गन्धने इति निवृत्तमिति । उपलक्षणमिदं पूर्वविप्रतिषेधस्यापीति बोध्यम् ।

(२८१-उदाहरणवार्तिकम्- २४)

।।।। अनुपसर्गाद्वा ।।*।।*

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते, कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

"वृत्तिसर्गतायनेषु क्रमः" इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

विमला - वृत्तिसर्गतायनेषु क्रम इति । अयम्भावः । अनुपसर्गात् क्रमः आत्मनेपदविधायके '**अनुपसर्गाद्वेति**' । सूत्रे '**वृत्तिसर्गतायनेषु क्रम**' इति 'संबध्यते, एवञ्च वृत्त्यादौ नित्यात्मनेपदस्य प्राप्तावेव '**अनुपसर्गाद्वा**' इत्यनेन विकल्पविधानात् प्राप्तविभाषात्वम्, अथ '**वृत्तिसर्गतायनेषु क्रम**' इति न संबध्यते तदा सोपसर्गे चरितार्थस्य '**वृत्तिसर्गे**' ति नित्यात्मनेपदस्य वृत्त्यादिरहिते चरितार्थस्य '**अनुपसर्गाद्वा**' इतिविकल्पस्यानुपसर्गे वृत्त्यादौ प्राप्तौ पूर्वविप्रतिषेधेन नित्यात्मनेपदस्यैवेष्टत्वे वृत्त्यादिरहिते एव विकल्पः प्रवर्ततेत्यप्राप्तविभाषात्वम् परविप्रतिषेधेन विकल्पस्यैवेष्टत्वे वृत्त्यादिषु प्राप्तविभाषात्वम्, वृत्त्यादिरहिते अप्राप्त विभाषात्वमित्युभयत्र विभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपद्यते ।

(सिद्धान्तभाष्यम्)

---

१. अत्र 'अनुपसर्गाद् वा' इति लुप्तं स्यात् ।

अप्राप्ते । वृत्त्यादिष्विति निवृत्तम् ॥

विमला - वृत्त्यादिष्विति निवृत्तमिति । उपलक्षणमेतत्पूर्वविप्रतिषेधस्यापि ।

(२८२-उदाहरणवार्तिकम्-२५)

॥*॥ विभाषा वृक्षमृगादीनाम् ॥*॥

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

"जातिरप्राणिनाम्" इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ॥

विमला - जातिरप्राणिनामिति । अयम्भावः । **विभाषावृक्षमृगे**तिसूत्रे '**जातिरप्राणिनामि**' त्यनुवर्तते, तस्य चाव्यभिचाराद्धान्यव्यञ्जनादावसंबन्धेऽपि वृक्षमृगादौ सम्भवव्यभिचारयोः सत्त्वेन संबन्धे **जातिरप्राणिनामिति** नित्यैकवद्भावप्राप्तावेव प्राणिवर्ज्यजातिवाचिवृक्षादावनेन विकल्पविधानात्प्राप्तविभाषात्वम् । यदि च '**जातिरप्राणिनामि**'ति नानुवर्तते तर्हि धानाशष्कुलीत्यादौ चरितार्थस्य '**जातिरप्राणिनामि**' ति नित्यैकवद्भावस्य प्राणिजातिषु चरितार्थस्य '**विभाषावृक्षमृगे**'-ति विकल्पस्य चर्मादिमृतमृगजातिषु प्राप्तौ पूर्वविप्रतिषेधेन नित्यैकवद्भावस्येष्टत्वे प्राणिजातिष्वेव विकल्पस्य प्रवृत्तेरप्राप्तविभाषात्वम्, परविप्रतिषेधेन विकल्पस्यैवेष्टत्वे अप्राणिषु प्राप्तविभाषात्वम् प्राणिष्वप्राप्तविभाषात्वमित्युभयत्र विभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते ।

(सिद्धान्तभाष्यम्)

१. अत्र 'विभाषा वृक्षमृगादीनाम्' इति लुप्तं स्यात् ।

अप्राप्ते । "जातिरप्राणिनाम्" इति निवृत्तम् ।।

विमला - 'जातिरप्राणिनामि'ति निवृत्तमिति उपलक्षणमिदं पूर्वविप्रतिषेधस्यापीति बोध्यम् ।

(२८३-उदाहरणवार्तिकम्-२६)

।।।। उषविदजागृभ्योऽन्यतरस्याम् ।।*।।*

(भाष्यम्)

[१]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

प्रत्ययान्तादिति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

विमला - प्रत्ययान्तादिति वेति । अयम्भावः । '**उषविदे**' तिसूत्रे '**कास्प्रत्ययादि**'-त्यतः प्रत्ययान्तादित्यनुवर्तते, तस्य च विशेषणतया **तदन्तविधौ** प्रत्ययान्तेभ्य उषादिभ्यः आम्वेति सामानाधिकरण्येन संबन्धः । ननु ये प्रत्ययान्ताः न ते उषादिरूपाः इति सूत्रार्थाप्रसिद्धिः । न चोषादिभ्यः कर्तृक्विबन्तेभ्य आचारक्विपि प्रत्ययान्ता उषादिरूपाः सम्भवन्तीति वाच्यम्, नामीति सूत्रस्थभाष्यप्रामाण्येन हलन्तेभ्यः कर्तृक्विबन्तेभ्यः आचारक्विपोऽनभिधानादिति चेन्न, '**सनाद्यन्ता धातव**' इत्यस्य सनादीनां धात्वन्तत्वप्रतिपादकत्वेन टजादिसमासान्तप्रत्ययविशिष्टस्य समासपदेनेव सनादिप्रत्ययविशिष्टस्योषादिधातोः उषादिपदेन ग्रहणसम्भवात् । तथाच प्रत्ययान्तत्वे नित्याम्प्राप्तावेवानेन विकल्पविधानात्प्राप्तविभाषात्वम् । यदि च प्रत्ययान्तादिति नानुवर्तते तदा धात्वन्तरे कारयाञ्चकारेत्यादौ सावकाशस्य नित्यामः ओषाञ्चकारेत्यादावप्रत्ययान्ते

---

१. अत्र वार्तिकांशः लुप्तः स्यात् ।

चरितार्थस्य विकल्पस्य प्रत्ययान्तेभ्य उषादिभ्यः पूर्वविप्रतिषेधेन नित्यस्यैवेष्टत्वे अप्रत्ययान्तेभ्य एवोषादिभ्योऽनेन विकल्पविधानादप्राप्तविभाषात्वम् । अननुवृत्तौ परविप्रतिषेधाश्रयणेन प्रत्ययान्तेभ्योऽपि विकल्पस्यैवेष्टत्वे तूभयत्र विभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते ।

(सिद्धान्तभाष्यम्)

अप्राप्ते । प्रत्ययान्ताः धात्वन्तराणि ।।

विमला - प्रत्ययान्ताः धात्वन्तराणीति । **'सनाद्यन्ताधातव'** इतिसूत्रं न सनादीनां धात्वन्तरत्वप्रतिपादकं, नापि सनादिविशिष्टस्य धातुत्वप्रतिपादकं, सुबन्तेभ्यः क्यचो विधानेन तद्विशिष्टस्य धातुत्वासम्भवात्, किन्तु सनाद्यन्तानां धातुसंज्ञाविधायकम् । एवञ्च प्रत्ययान्तानामुषादिरूपत्वाभावेन सूत्रार्थाप्रसिद्धेः प्रत्ययान्तादिति नानुवर्तते, इतिभावः । उपलक्षणमिदं पूर्वविप्रतिषेधस्यापीति बोध्यम् ।

(२८४-उदाहरणवार्तिकम्-२७)

।।*।। दीपादीनां विभाषा ।।*।।

(भाष्यम्)

[१]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

"भावकर्मणोः" इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

विमला - 'भावकर्मणोः' इति वेति । अयम्भावः । 'दीपजने'तिसूत्रम् **'भावकर्मणोः'** इत्यत्रानुवर्तते, पृथक् पाठसामर्थ्यात् वाक्यभेदेन संबन्धः । भावकर्मणो-

---

१. अत्र पूर्ववार्तिकं लुप्तं स्यात् ।

श्च्लेश्चिण् इति प्रथमवाक्यस्यार्थः । भावकर्मणोर्दीपादिभ्यश्च्लेश्चिण् इति द्वितीयवाक्यस्यार्थः । एवञ्च प्रथमवाक्येन नित्ये चिणि प्राप्ते एव द्वितीयवाक्येन विकल्पविधानात्प्राप्तविभाषात्वम् । यदि 'दीपजने' ति नानुवर्तते तदा पचादिधातुभ्यः कर्मणि प्रत्यये भ्वादिधातुभ्यो वा भावे प्रत्यये चरितार्थस्य नित्यचिणः, दीपादिभ्यः कर्तरि प्रत्यये चरितार्थस्य विकल्पस्य भावकर्मणोर्दीपादिभ्यः प्रत्यये उभयोः प्राप्तौ परविप्रतिषेधेन नित्यस्यैवेष्टत्वे दीपादिभ्यः कर्तरि प्रत्यये विकल्पस्यैवेष्टत्वे कर्तरि प्रत्यये अप्राप्तविभाषात्वम्, दीपादिभ्यो भावकर्मणोः प्रत्यये प्राप्तविभाषात्वमित्युभयत्र विभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते ।

(सिद्धान्तभाष्यम्)

अप्राप्ते । कर्तरीति हि वर्तते ।।

विमला - कर्तरीति हि वर्तत इति । 'दीपजने'तिसूत्रे '**णिश्री**'त्यतः कर्तरीत्यनुवर्तते, एवञ्च विकल्पस्य भावकर्मवि-षयत्वाभावेनाप्राप्तविभाषात्वमेवेतिभावः ।

(आक्षेपभाष्यम्)

एवमपि संदेहः—न्याय्ये वा कर्तरि, कर्मकर्तरि वेति ।।

(समाधानभाष्यम्)

नास्ति संदेहः । सकर्मकस्य कर्ता कर्मवद्भवति ।। अकर्मकाश्च दीपादयः ।।

(समाधानबाधकभाष्यम्)

अकर्मका अपि वै सोपसर्गाः सकर्मका भवन्ति ।।

(समाधानसाधकभाष्यम्)

कर्मापदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाणां वा भवन्ति । कर्तृस्थभावकाश्च दीपादयः ।।

(२८५-उदाहरणवार्तिकम्-२९)

।।*।। विभाषाऽग्रे प्रथमपूर्वेषु ।।*।।

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

"आभीक्ष्ण्ये" इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

विमला - 'आभीक्ष्ण्ये' इति वेति । अयम्भावः । '**विभाषाग्रे प्रथमपूर्वेष्वि**' ति सूत्रे विभाषाणमुल्विधायके '**आभीक्ष्ण्ये णमुलि**'ति सूत्रमनुवर्तते पृथक् पाठसामर्थ्याच्च वाक्यभेदेन संबन्धः । प्रथमवाक्यस्य आभीक्ष्ण्ये णमुलित्यर्थः । द्वितीयस्य तु अग्रे प्रथमपूर्वेषूपपदेषु आभीक्ष्ण्ये विभाषा णमुलित्यर्थः । एवञ्च प्रथमवाक्येन नित्यणमुल्प्राप्तावेव द्वितीयवाक्येन विकल्पविधानात् प्राप्तविभाषात्वम्, यदि नानुवर्तते तदैतदुपपदाभावे आभीक्ष्ण्ये सावकाशस्य नित्यणमुलः अनाभीक्ष्ण्ये सावकाशस्य विकल्पस्य आभीक्ष्ण्ये उक्तोपपदसत्त्वे उभयोः प्राप्तौ पूर्वविप्रतिषेधेन नित्यस्यैवेष्टत्वे आभीक्ष्ण्यविरहे एव विकल्पप्रवृत्तेरप्राप्तविभाषात्वम्, अननुवृत्तौ परविप्रतिषेधाश्रयणेन विकल्पस्यैवेष्टत्वे आभीक्ष्ण्ये प्राप्तविभाषात्वम्, अनाभीक्ष्ण्ये अप्राप्तविभाषात्वमित्युभयत्र विभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते ।

(सिद्धान्तभाष्यम्)

अप्राप्ते । "आभीक्ष्ण्ये" इति निवृत्तम् ।

विमला - आभीक्ष्ण्ये इति निवृत्तमिति । उपलक्षणमिदं पूर्वविप्रतिषेधस्यापीति बोध्यम् ।

---

१. इतः पूर्वं वार्तिकं लुप्तं स्यात् ।

(२८६-उदाहरणवार्तिकम्-३०)

॥*॥ तृन्नादीनां विभाषा ॥*॥

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

"आक्रोशे" इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ॥

विमला - 'आक्रोशे' इति वेति । अयम्भावः । '**विभाषा तृन्नन्ततीक्ष्णशुचिषु**' इति सूत्रे 'आक्रोशे च इति सूत्रमनुवर्तते । तस्य च पृथक् पाठसामर्थ्याद्वाक्यभेदेन संबन्धः । तत्र प्रथमवाक्यस्य नञः परमुत्तरपदमन्तोदात्तमित्यर्थः । अत्र च वाक्ये अच्कावासक्तावित्यतोऽच्काविति नानुवर्तते तदनुवृत्तौ तु अकर्तेत्यादौ प्रथमवाक्यस्याप्रवृत्तेः प्राप्तविभाषात्वनिर्णयेन सन्देहवारक भाष्यस्यासङ्गतिः स्यात् । द्वितीयवाक्यस्य तु नञः परेषामेषामुत्तरपदानां तृन्नन्तादीनां विभाषयाऽन्तोदात्तत्वमाक्रोश इत्यर्थः । एवञ्च पूर्ववाक्येन नित्यं प्राप्ते एवान्तोदात्तत्वे द्वितीयवाक्येन विकल्पविधानात्प्राप्तविभाषात्वम् । यदि नानुवर्तते तदा आक्रोशे तृन्नन्ताद्युत्तरपदाभावे चरितार्थस्य नित्यान्तोदात्तत्वस्य अनाक्रोशे 'अकर्ता' इत्यादौ चरितार्थस्य विकल्पस्य आक्रोशे तृन्नन्तादिषु द्वयोः प्राप्तौ पूर्वविप्रतिषेधेन नित्यान्तोदात्तत्वे अनाक्रोशे एव विकल्पविधानादप्राप्तविभाषात्वम् । अननुवृत्तौ परविप्रतिषेधेन विकल्पस्यैवेष्टत्वे आक्रोशे प्राप्तविभाषात्वमनाक्रोशेऽप्राप्तविभाषात्वमित्युभयत्रविभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते इति ।

(सिद्धान्तभाष्यम्)

---

१. अत्र इतः पूर्वं 'तृन्नादीनां विभाषा' इति लुप्तं स्यात् ।

अप्राप्ते । "आक्रोशे" इति निवृत्तम् ।

विमला - आक्रोशे इति निवृत्तमिति । उपलक्षणमिदं पूर्वविप्रतिषेधस्यापीति बोध्यम् ।

(२८७-उदाहरणवार्तिकम्-३१)

।।।। एकहलादौ पूरयितव्येऽन्यतरस्याम् ।।*।।*

(भाष्यम्)

[१]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

"उदकस्योदः संज्ञायाम्" इति वा नित्ये प्राप्ते, अन्यत्र वा अप्राप्ते, उभयत्र वेति ।।

विमला - उदकस्योदः संज्ञायामिति वेति । अयम्भावः । **'एकहलादौ पूरयितव्येऽन्यतरस्यामि'** ति सूत्रे उदकस्योदः संज्ञायामित्यनुवर्तते, तस्य च पृथक् पाठसामर्थ्याद्वाक्यभेदेन संबन्धः तत्र प्रथमवाक्यस्य पूर्वपदस्योदकशब्दस्योद इत्यादेशः स्यात्संज्ञायामित्यर्थः । द्वितीयवाक्यस्य तु पूर्वपदस्योदकशब्दस्योद इत्यादेशो वा स्यादेक हलादौ पूरयितव्ये उत्तरपदे परे संज्ञायामित्यर्थः । एवञ्च पूर्ववाक्येन नित्यमुदादेशे प्राप्त एव द्वितीयवाक्येन विकल्पविधानात्प्राप्तविभाषात्वम् । यदि संज्ञापदघटितं नानुवर्तते तदासंज्ञायामपूरयितव्ये उत्तरपदे उदमेघ इत्यादौ सावकाशस्य नित्योदादेशस्य असंज्ञायामेकहलादौ पूरयितव्ये उत्तरपदे चरितार्थस्य विकल्पस्य संज्ञायां पूरयितव्ये उत्तरपदे द्वयोः प्राप्तौ पूर्वविप्रतिषेधेन नित्यस्यैवोदादेशस्य विधाने असंज्ञायामेव विकल्पविधानादप्राप्तविभाषात्वम् । पूर्वविप्रतिषेधेन विकल्पस्यैव तत्र विधाने तु संज्ञायां प्राप्तविभाषात्वमसंज्ञायामप्राप्तविभाषात्वमित्युभयत्र विभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते इति ।

१. अत्र इतः पूर्वमुपर्युक्तवार्तिकं लुप्तं स्यात् ।

(सिद्धान्तभाष्यम्)

अप्राप्ते । संज्ञायामिति निवृत्तम् ।।

विमला - संज्ञायामिति निवृत्तमिति । उपलक्षणमिदं पूर्वविप्रतिषेधस्यापीति बोध्यम् ।

(२८८-उदाहरणवार्तिकम्-३२)

।।।। श्वादेरिञि, पदान्तस्याऽन्यतरस्याम् ।।*।।*

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

इञीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

विमला - इञीति वेति । अयम्भावः । '**पदान्तस्यान्यतरस्यामिति**' सूत्रे '**श्वादेरिञि**'ति सूत्रमनुवर्तते तस्य च पृथक्पाठसामर्थ्याद्वाक्यभेदेन संबन्धः पूर्ववाक्यस्य इञि तद्धिते परे श्वादेरङ्गस्यैज् नेत्यर्थः । द्वितीयवाक्यस्य तु इञि तद्धिते परे पदशब्दान्तस्य श्वादेरङ्गस्यैज् निषेधो वेत्यर्थः । एवञ्च पूर्ववाक्येन प्राप्ते एव ऐज्निषेधे द्वितीयवाक्येन विकल्पविधानात्प्राप्तविभाषात्वम्, इञीतिसप्तम्यन्तपदविशिष्टस्य श्वादेरिञीत्यस्यानुवृत्तौ पदशब्दान्तभिन्ने श्वाभस्त्रिरित्यादौ सावकाशस्य नित्यनिषेधस्य, इञ्प्रत्ययातिरिक्ते श्वापदमित्यत्र सावकाशस्य विकल्पनिषेधस्य, श्वापदिरित्यत्रोभयोः प्राप्तौ पूर्वविप्रतिषेधेन नित्यनिषेधस्यैव विधाने इञ्रहितस्यैव विकल्पविधिविषय-त्वेनाप्राप्तविभाषात्वम्, अननुवृत्तौ परविप्रतिषेधेन विकल्पस्यैव तत्र विधाने इञि प्राप्तविभाषात्वम्, इञ्रहिते अप्राप्तविभाषात्वमित्युभयत्रविभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते इति ।

---

१. अत्र इतः पूर्वमुपर्युक्तवार्तिकं लुप्तं स्यात् ।

(सिद्धान्तभाष्यम्)

अप्राप्ते । इञीति निवृत्तम् ।।

विमला - इञीतिनिवृत्तमिति । इञीतिसप्तम्यन्तपदरहितं श्वादेरित्येतन्मात्रमनुवर्तत इतिभाव: । उपलक्षणमिदम्पूर्वीविप्रतिषेधस्यापीति बोध्यम् ।

(२८९-उदाहरणवार्तिकम्-३३)

।।*।। सपूर्वायाः प्रथमाया विभाषा ।।*।।

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

'चादिभिर्योग'इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

विमला - चादिभिर्योग इति वेति। उपलक्षणमिदम्, '**पश्यार्थैश्चानालोचने**' इत्यस्यापि । अयम्भाव: । 'सपूर्वाया: प्रथमाया **विभाषे**'तिसूत्रे '**नचवाहाहैवयुक्ते**' '**पश्यार्थैश्चानालोचने**' इति सूत्रे अनुवर्तेते पृथक्पाठसामर्थ्याच्च वाक्यभेदेनान्वय: । तत्र प्रथमवाक्यस्य चादिपञ्चकयोगे पश्यार्थयोगे च नैते वांनावादय आदेशा इत्यर्थ: । द्वितीयस्य तु चादिपञ्चकयोगे पश्यार्थकंधातुयोगे च विद्यमानपूर्वप्रथमान्तात्परे एते आदेशा वा न स्युरित्यर्थ: । एवञ्च पूर्ववाक्येन प्राप्तएव नित्यनिषेधे द्वितीयवाक्येन विकल्पनिषेधविधानात्प्राप्तविभाषात्वम् । यदि च नानुवर्तते तदाविद्यमानपूर्वप्रथमान्तात्परे एते आदेशा वा न स्युरित्यर्थे प्रथमान्तप्रयोगविरहे सदा त्वां मां च रक्षतु, चेतसा त्वां समीक्षते, इत्यादौ सावकाशस्य नित्यनिषेधस्य, भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते

---

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

समामित्यादौ सावकाशस्य विकल्पस्य हरिस्त्वां मां च रक्षतु इत्यादौ द्वयोः प्राप्तौ पूर्वविप्रतिषेधेन नित्यनिषेधस्यैव स्वीकारे चादिभिर्योगाभावे एव विकल्पो भविष्यतीति तत्र कस्यापि विधेः प्राप्त्यभावेनाप्राप्तविभाषात्वम् । अननुवृत्तौ परविप्रतिषेधाश्रयणेनोक्तस्थले विकल्पस्यैवेष्टत्वे तु चादिभिर्योगे प्राप्तविभाषात्वम्, तदभावेऽप्राप्तविभाषात्वमित्युभयत्र विभाषात्वम् इति कोटित्रयप्रकारकः सन्देह उपपद्यते इति ।।

(सिद्धान्तभाष्यम्)

अप्राप्ते । 'चादिभिर्योग' इति निवृत्तम् ।

विमला - चादिभिर्योग इति निवृत्तमिति । उपलक्षणमिदं पश्यार्थैर्योग इत्यस्य, पूर्वविप्रतिषेधस्यापि चेति बोध्यम् ।

(२९०-उदाहरणवार्तिकम्-३४)

।।*।। ग्रो यङ्यचि विभाषा ।।*।।

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

यङीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

विमला - यङीति वेति । अयम्भावः । अचि विभाषेति सूत्रे '**ग्रो यङीति**' सम्पूर्णं सूत्रमनुवर्तते तस्य च पृथक्पाठसामर्थ्याद्वाक्यभेदेन संबन्धः । तत्र प्रथमवाक्यस्य 'गिरते'रेफस्य लत्वं स्यात् यङ्विषये इत्यर्थः । द्वितीयस्य तु 'गिरते रेफस्य लत्वं स्यादजादौ प्रत्यये परे यङ्विषये' इत्यर्थः । एवञ्च पूर्ववाक्येन प्राप्त एव नित्यलत्वे

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

द्वितीयेन विकल्पविधानात् प्राप्तविभाषात्वम् । नन्वेवमपि प्राप्तविभाषात्वं दुर्लभम्, लुकः पूर्वमेव नित्यलत्वप्राप्तेः तदानीं विभाषाया अप्राप्तेरिति चेन्न, विभाषाविधानसामर्थ्याद् यङ्लुकः पूर्वं ग्रोयङीत्यस्याप्राप्तेः । यङीतिसप्तम्यन्तघटितस्य '**ग्र**' इत्येतन्मात्रस्यानुवृत्तौ गिरते रेफस्य लत्वं स्यादजादौ इत्यर्थे जेगिल्यते इत्यादौ सावकाशस्य नित्यलत्वस्य गिलतीत्यादौ सावकाशस्य विकल्पलत्वस्य निजेगिल इत्यादौ द्वयोः प्रवृत्तौ पूर्वविप्रतिषेधेन नित्यलत्वस्यैवाङ्गीकारे यङ्विषयातिरिक्त एव विकल्पस्य सफलप्रवृत्तिकतया अप्राप्तविभाषात्वम् । परविप्रतिषेधेन विकल्पस्यैव तत्राङ्गीकारे, यङ्विषये प्राप्तविभाषात्वम्, यङ्विषयातिरिक्ते अप्राप्तविभाषात्वमित्युभयत्रविभाषात्वम् । ननु यङीत्यस्याननुवृत्तिकल्पे कथं प्राप्तविभाषात्वम्, इदानीं विभाषाया गिलतीत्यादौ यङ्विषयातिरिक्तस्थले चारितार्थ्येन यङ्विषये लुकः पूर्वनित्यलत्वाप्राप्तेर्ज्ञापकत्वासम्भवेन निजेगिल इत्यादौ लुकः पूर्वमेव नित्यलत्वप्राप्तेः तदानीं विभाषाया अप्राप्तेरिति चेन्न, अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते, इति परिभाषया लुकः पूर्वं नित्यलत्वाप्राप्तेः । नन्वेवमप्युभयत्रविभाषात्वासम्भवः पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति भाष्येण त्रिपाद्यां विप्रतिषेधसूत्राप्रवृत्तेरितिचेन्न, इदानीं प्रकरणे प्रकरणमसिद्धमिति पक्षस्यैवाश्रयणेनैकस्मिन् लत्वप्रकरण एव '**पूर्वत्रासिद्धमि**'त्यनेन पूर्वम्प्रति परस्यासिद्धत्वप्रतिपादनासम्भवेन त्रिपाद्यां विप्रतिषेधाभावोपपादकहेतोरुत्त-रस्याभावादित्यस्याभावेन पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येत्यस्याप्राप्तौ पूर्वविप्रतिषेधपरविप्रतिषेधाभ्यामुभयत्र विभाषात्वसम्भवेन कोटित्रयप्रकारकः सन्देह उपद्यते इति ।

(सिद्धान्तभाष्यम्)

अप्राप्ते । यङीति निवृत्तम् ॥

विमला - यङीतिनिवृत्तमिति । ग्रोयङीत्यतो 'ग्र' इत्येतन्मात्रमनुवर्तते इतिभावः । उपलक्षणमिदं पूर्वविप्रतिषेधस्यापीति बोध्यम् ।

(प्राप्तविभाषाप्रकरणम्)

(२९१-अधिकारवार्तिकम्-३५)

॥*॥ प्राप्ते च ॥*॥

(भाष्यम्)

इत उत्तरं या विभाषा अनुक्रमिष्यामः, प्राप्ते ता द्रष्टव्याः। त्रिसंशयास्तु भवन्ति–प्राप्ते, अप्राप्ते, उभयत्र वेति ॥

विमला - प्राप्ते चेति । 'त्रिसंशयाः' इति पूर्वतोऽनुषज्यते । '**प्राप्ते**' अधिकारोऽयम् । '**उभयत्र चे**'तियावत् । कोटित्रयप्रकारकसंशयविषयीभूताः प्राप्तविभाषाः एतावन्त्य एवेति परिगणनाय सन्दर्भः ।

(२९२-उदाहरणवार्तिकम्-३६)

॥*॥ विभाषा विप्रलापे ॥*॥

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

"व्यक्तवाचाम्" इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ॥

विमला - व्यक्तवाचामिति वेति । अयम्भावः । 'विभाषाविप्रलापे' इति सूत्रे '**व्यकवाचां समुच्चारणे**' इति सूत्रमनुवर्तते । तस्य च पृथक् पाठसामर्थाद्वाक्यभेदेन संबन्धः । तत्र पूर्ववाक्यस्य मनुष्यादीनां सम्भूयोच्चारणे वदेरात्मनेपदं स्यादित्यर्थः । द्वितीयवाक्यस्य तु मनुष्यादीनां विरुद्धोक्तिरूपे सम्भूयोच्चारणे वदेरात्मनेपदं स्यादित्यर्थः । एवञ्च पूर्ववाक्येन नित्यात्मनेपदे प्राप्त एव द्वितीयवाक्येन

---

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

विकल्पविधानात्प्राप्तविभाषात्वम् । यदि नानुवर्तते तदा संप्रवदन्ते ब्राह्मणा इत्यादौ सावकाशस्य नित्यात्मनेपदस्य विप्रवदन्ते इत्यादौ सावकाशस्य विकल्पस्य च विरुद्धोक्तिरूपे मनुष्यादीनां सम्भूयोच्चारणे द्वयोः प्राप्तौ पूर्वविप्रतिषेधेन नित्यस्यैव स्वीकारे विकल्पस्याव्यक्तवाग्विषय एव प्राप्तौ तत्र च कस्यापि प्राप्त्यभावेनाप्राप्त-विभाषात्वम् । परविप्रतिषेधाश्रयणेन विकल्पस्यैव तत्र विधाने तु व्यक्तवाग्विषये प्राप्तविभाषात्वं तदतिरिक्तविषयेऽप्राप्तविभाषात्वमित्युभयत्र विभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते इति ।

(२९३-सिद्धान्तभाष्यम्-३७)

प्राप्ते ।। व्यक्तवाचामिति हि वर्तते ।।

(उदाहरणवार्तिकम्)

।।*।। विभाषोपपदेन प्रतीयमाने ।।*।।

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

"स्वरितञितः" इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

विमला - 'स्वरितञितः' इति वेति । अयम्भावः । **'विभाषोपपदेन प्रतीयमाने'** इति सूत्रे **'स्वरितञितःकर्त्रभिप्राये क्रियाफले' 'अपाद्वदः' 'णिचश्च' 'समुदाङ्भ्यो यमोऽग्रन्थे' 'अनुपसर्गाज्ज्ञः'** इति पञ्चसूत्री अनुवर्तते, पृथक्पाठसामर्थ्याच्च वाक्यभेदेनान्वयः तत्र प्रथमवाक्यस्य 'स्वरितेदादिभ्यो धातुभ्य

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

आत्मनेपदं स्यात् कर्तृगामिनि क्रियाफले' इत्यर्थः । द्वितीयवाक्यस्य तु 'समीपोच्चारितेन क्रियाफलस्य कर्तृगामित्वे प्रतीयमाने स्वरितेदादिभ्यो धातुभ्य आत्मनेपदं वा स्यादित्यर्थः' । एवञ्च पूर्ववाक्येन नित्यात्मनेपदे प्राप्ते एव द्वितीयवाक्येन विकल्पविधानात् प्राप्तविभाषात्वम् । यदि च पञ्चसूत्री नानुवर्तते तदा यजते, कुरुते इत्यादौ सावकाशस्य नित्यात्मनेपदस्य स्वं पाठं पठतीत्यादौ सावकाशस्य विकल्पस्य च 'स्वं यज्ञं यजते' 'स्वं पुत्रमपवदते' 'स्वं यज्ञं कारयते' इत्यादौ प्राप्तौ पूर्वविप्रतिषेधेन नित्यात्मनेपदस्यैव स्वीकारे स्वरितेदादिभ्यो भिन्ने एव विकल्पो भविष्यतीति तत्र कस्यापि प्राप्त्यभावेना- प्राप्तविभाषात्वम् । परविप्रतिषेधाश्रयणेन विकल्पस्यैव तत्राङ्गीकारे तु स्वरितेदादिषु प्राप्तविभाषात्वम्, तदतिरिक्तेष्वप्राप्तविभाषात्वमित्युभयत्रविभाषात्वम्, इति कोटित्रयप्रकारकः सन्देह उपपद्यते ।

(सिद्धान्तभाष्यम्)

प्राप्ते ।। "स्वरितञितः" इति हि वर्तते ।।

(२९४-उदाहरणवार्तिकम्-३८)

।।*।। तिरोऽन्तर्धौ, विभाषा कृञि ।।*।।

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

"अन्तर्धौ" इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

विमला - 'अन्तर्धौ' इति वेति । अयम्भावः । 'विभाषा कृञि' इति सूत्रे 'तिरोन्तर्धौ'

---

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

इति सम्पूर्णं सूत्रमनुवर्तते, तस्य च पृथक्पाठसामर्थ्याद्वाक्यभेदेनान्वयः । तत्र प्रथम वाक्यस्य 'तिर इति गतिसंज्ञं भवति क्रियायोगे अन्तर्धौ गम्यमाने' इत्यर्थः । द्वितीयवाक्यस्य तु 'तिरइति गतिसंज्ञं वा स्यात् कृधात्वर्थक्रियायोगे अन्तर्धौ गम्यमाने' इत्यर्थः । एवञ्च प्रथमवाक्येन नित्यं प्राप्तायामेव गतिसंज्ञायां द्वितीयवाक्येन विकल्पविधानात् प्राप्तविभाषात्वम् । यदि च अन्तर्धाविति पदरहितं 'तिर' इत्येतन्मात्रमनुवर्तते तदा तिरोभूय इत्यादौ कृञोयोगे सावकाशाया नित्यसंज्ञायाः, अनन्तर्धौ तिरस्कृत्येत्यत्र सावकाशायाः विकल्पसंज्ञायाश्च अन्तर्धौ कृञ्योगे द्वयोः प्राप्तौ पूर्वविप्रतिषेधेन नित्यसंज्ञाया एव स्वीकारे विकल्पसंज्ञाया अनन्तर्धाविव सफलप्रवृत्तिकतया तत्र केनापि संज्ञायाः प्राप्त्यभावेनाप्राप्तविभाषात्वम् । परविप्रतिषेधाश्रयणेन विकल्पसंज्ञाया एव तत्राङ्गीकारे तु अन्तर्धौ प्राप्तविभाषात्वम्, अनन्तर्धावप्राप्तविभाषात्वमित्युभयत्र विभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते इति ।

(सिद्धान्तभाष्यम्)

प्राप्ते ।। "अन्तर्धौ" इति हि वर्तते ।।

(२९६-उदाहरणवार्तिकम्-४०)

।।*।। अधिरीश्वरे, विभाषा कृञि ।।*।।

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

ईश्वरे इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

---

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

विमला - ईश्वर इति वेति । अयम्भावः । '**विभाषाकृञि**' इति सूत्रे '**अधिरीश्वरे**' इति सूत्रमनुवर्तते तस्य च पृथक् पाठसामर्थ्याद्वाक्यभेदेन संबन्धः । तत्र प्रथमवाक्यस्य स्वस्वामिभावसंबन्धे अधिः कर्मप्रवचनीयसंज्ञ इत्यर्थः । द्वितीयवाक्यस्य तु स्वस्वामिभावसंबन्धे अधिः कर्मप्रवचनीयसंज्ञो वा स्यात् कृञो योगे इत्यर्थः । एवञ्च प्रथमवाक्येन प्राप्तायामेव संज्ञायां द्वितीयवाक्येन विकल्पविधानात् प्राप्तविभाषात्वम् । अधिरीश्वरे इत्यतः 'ईश्वरे' इति सप्तम्यन्तपदाघटितस्य 'अधि' रित्येतन्मात्रस्य संबन्धे अधिभुवि राम इत्यत्र सावकाशायाः नित्यसंज्ञायाः, अधिभुवि घट इत्यत्र सावकाशायाविकल्पसंज्ञायाश्च रामो भुवि अधिकरोतीत्यत्र द्वयोः प्राप्तौ पूर्वविप्रतिषेधेन नित्यसंज्ञाया एव स्वीकारे अनीश्वरे एव विकल्पसंज्ञा स्यात् तत्र च केनापि संज्ञायाः प्राप्तेरभावेनाप्राप्तविभाषात्वम् । परविप्रतिषेधाश्रयणेन विकल्पसंज्ञाया एवाङ्गीकारे तु ईश्वरे प्राप्तविभाषात्वमनीश्वरे अप्राप्तविभाषात्वमित्युभयत्रविभाषात्वमिति कोटित्रयप्रकारकः संदेह उपपद्यते ।

(सिद्धान्तभाष्यम्)

प्राप्ते ।। "ईश्वरे" इति हि वर्तते ।।

(२९५-उदाहरणवार्तिकम्-३९)

।।*।। दिवस्तदर्थस्य, विभाषोपसर्गे ।।*।।

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

तदर्थस्येति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

विमला - तदर्थस्येति वेति । अयम्भाव: । '**विभाषोपसर्गे**' इतिसूत्रे '**दिवस्तदर्थस्ये**' त्यनुवर्तते तस्य च पृथक् पाठसामर्थ्याद्वाक्यभेदेन संबन्ध: । तत्र प्रथमवाक्यस्य द्यूतार्थस्य क्रयविक्रयव्यवहारार्थस्य च दिव: कर्मणि षष्ठीत्यर्थ: । द्वितीयवाक्यस्य तु द्यूतार्थस्य क्रयविक्रयव्यवहारार्थस्य च सोपसर्गस्य दिव: कर्मणि षष्ठी वा स्यादित्यर्थ: । एवञ्च प्रथमवाक्येन प्राप्तायामेव षष्ठ्यां द्वितीयवाक्येन विकल्पषष्ठीविधानात् प्राप्तविभाषात्वम् । यदि च नानुवर्तते तदा शतस्य दीव्यतीत्यादौ चरितार्थाया: नित्यषष्ठ्या: ब्राह्मणं स्तौतीत्यर्थके ब्राह्मणं प्रदीव्यतीत्यादौ चरितार्थाया: विकल्पष-ष्ठ्याश्च शतस्य प्रदीव्यतीत्यादौ प्राप्तौ पूर्वविप्रतिषेधेन नित्यषष्ठ्या एवाङ्गीकारे द्यूताद्यतिरिक्त एव विकल्पषष्ठी स्यात्, तत्र च केनापि षष्ठीप्राप्तेरभावेनाप्रा-प्तविभाषात्वम् । परविप्रतिषेधाश्रयणेन विकल्पषष्ठ्या एवाङ्गीकारे तु द्यूताद्यर्थे प्राप्तविभाषात्वमन्यत्राप्राप्तविभाषात्वमित्युभयत्रविभाषात्वमिति कोटित्रयप्रकारक: सन्देह उपपद्यते ।

(सिद्धान्तभाष्यम्)

प्राप्ते ।। "तदर्थस्य" इति हि वर्तते ।।

विमला - तदर्थस्येतीति । तदर्थस्येति षष्ठ्यन्तपदघटित्तं सम्पूर्णमेव सूत्रमनुवर्तते इति भाव: ।

(उभयत्रविभाषाप्रकरणम्)

(२९७-अधिकारवार्तिकम्-४१)

॥*॥ उभयत्र च ॥*॥

(भाष्यम्)

इत उत्तरं या विभाषा अनुक्रमिष्यामः, उभयत्र ता द्रष्टव्याः । त्रिसंशयास्तु भवन्ति—प्राप्ते, अप्राप्ते, उभयत्र वेति ।

विमला - उभयत्र चेति । अत्रापि '**त्रिसंशया:**' इति संबध्यते । उभयत्रेत्यधिक्रियते

आह्निकसमाप्तिपर्य्यन्तम् । उभयत्र विभाषा: अन्येऽपि सन्ति किन्तु कोटि त्रयप्रकारकसन्देहविषयीभूता: उभयत्रविभाषा एव तावन्त्य एवेति सूचयितुमयं सन्दर्भ: । इति न ग्रन्थन्यूनतेत्यवधेयम् ।

(२९८-उदाहरणवार्तिकम्-४२)

।।*।। हृक्रोरन्यतरस्याम् ।।*।।

(भाष्यम्)

[1]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

"गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ" इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति संदेहः ।।

विमला - गतिबुद्धीति । अयम्भाव: । 'हृक्रोरन्यतरस्यामि' ति सूत्रे 'गतिबुद्धी'ति सम्पूर्णसूत्रमनुवर्तते पृथक् पाठसामर्थ्यात्तस्य वाक्यभेदेनान्वय: । तत्र प्रथमवाक्यस्य गत्याद्यर्थकानां शब्दकर्मकाणामकर्मकाणाञ्चाणौ य: कर्ता स णौ कर्म स्यादित्यर्थ: । हृधातौ बुद्ध्यर्थकत्वशब्दकर्मकत्वाकर्मत्वानामसम्भवेनासम्बन्धेऽपि विपूर्वकस्य हरतेर्गत्यर्थकत्वेन अन्यत्र तदभावेन च एवमभ्यवपूर्वकस्य हरते: प्रत्यसानार्थकत्वेन अन्यत्र तदभावेन च हृधातौ गत्यर्थकत्वप्रत्यवसानार्थकत्वयो: सम्बन्ध: । विपूर्वकस्य कृधातोरकर्मकत्वेन अन्यत्र तदभावेन च कृधातौ गत्यर्थकत्वादीनामसम्बन्धेऽपि अकर्मकत्वस्य सम्बन्ध: । एवञ्च द्वितीयवाक्यस्य गत्यर्थकप्रत्यवसानार्थकहृधातोरकर्मक-कृधातोश्चाणौ य: कर्त्ता स णौ कर्म वा स्यादित्यर्थ: । एवञ्च पूर्ववाक्येन

---

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

प्राप्तायामेव नित्यकर्मसंज्ञायां द्वितीयवाक्येन विकल्पसंज्ञाविधानात् प्राप्तविभाषात्वम् । अणि कर्ता स णावित्येतन्मात्रस्यानुवृत्तौ तु शत्रूनगमयत्स्वर्गमित्यादौ सावकाशाया: नित्यकर्मसंज्ञाया: हारयति कारयति वा भृत्यम् भृत्येन वा कटमित्यादौ सावकाशाया: विकल्पकर्मसंज्ञायाश्च अभ्यवहारयति सैन्धवान् विकारयति सैन्धवानित्यादौ द्वयो: प्राप्तौ पूर्वविप्रतिषेधेन विकल्पसंज्ञाया एव स्वीकारे तदतिरिक्ते एव विकल्पसंज्ञा स्यात् तत्र च केनापि संज्ञाया: प्राप्त्यभावेनाप्राप्तविभाषात्वम् । परविप्रतिषेधाश्रयणेन विकल्पसंज्ञाया एवाङ्गीकारे तु गत्याद्यर्थे प्राप्तविभाषात्वम् अन्यत्राप्राप्तविभाषात्वमिति कोटित्रयप्रकारक: सन्देह उपपद्यते ।

(सिद्धान्तभाष्यम्)

उभयत्र । प्राप्ते तावत्-अभ्यवहारयति सैन्धवान्, अभ्यवहारयति सैन्धवैः । विकारयति सैन्धवान्, विकारयति सैन्धवैः । अप्राप्ते-हरति भारं देवदत्तः, हारयति भारं देवदत्तम्, हारयति भारं देवदत्तेन । करोति कटं देवदत्तः कारयति कटं देवदत्तम्, कारयति कटं देवदत्तेन ।।

विमला - उभयत्रेति । लक्ष्यानुरोधादणि कर्ता स णावेतन्मात्रमनुवर्तते परविप्रतिषेधश्चेति भाव: ।

(२९९-उदाहरणवार्तिकम्-४३)

।।*।। न यदि, विभाषा साकांक्षे ।।*।।

(भाष्यम्)

[१]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

(संदेहोपपादकभाष्यम्)

यदीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ॥

विमला - यदीति वेति । अयम्भावः । '**विभाषासाकांक्षे**' '**न यदी**'ति सम्पूर्णसूत्रमनुवर्तते पृथक् पाठसामर्थ्याच्च तस्य वाक्यभेदेनान्वयः तत्र प्रथमवाक्यस्य यच्छब्दयोगे स्मृतिवाचिन्युपपदे धातोर्लृट् न इत्यर्थः । द्वितीयवाक्यस्य तु यच्छब्दयोगे स्मृतिवाचिन्युपपदे साकांक्षे धातोर्लृण्निषेधो वा इत्यर्थः । एवञ्च पूर्ववाक्येन प्राप्ते लृण्निषेधे द्वितीयवाक्येन विकल्पेन लृण्निषेधः क्रियते इति प्राप्तविभाषात्वम् । यदि च 'यदी' ति नानुवर्तते तदा स्मरसि कृष्ण यद्वने गा अचारयाम इत्यत्र सावकाशस्य नित्यनिषेधस्य, अभिजानासि कृष्ण काश्मीरान् गमिष्यामः, काश्मीरानगच्छाम तत्रौदनं भोक्ष्यामहे, तत्रौदनमभुञ्जमहि इत्यत्र सावकाशस्य नित्यनिषेधस्य च अभिजानासि कृष्ण यद्वनेऽवसाम तत्र गा अचारयामः इत्यत्र द्वयोरेव प्राप्तौ पूर्वविप्रतिषेधेन नित्यनिषेधस्यैवाङ्गीकारे विभाषायाः यच्छब्दयोगाभावे एव स्वीकरणीयतया तत्र केनापि लृट्निषेधस्य प्राप्तिविरहेणाप्राप्तविभाषात्वम् । परविप्रतिषेधाश्रयणेन विकल्प-निषेधस्यैवाङ्गीकारे तु यच्छब्दयोगे प्राप्तविभाषात्वम् यच्छब्दयोगाभावेऽप्राप्तविभा-षात्वमित्युभयत्रविभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते ।

(सिद्धान्तभाष्यम्)

उभयत्र । प्राप्ते तावत्-अभिजानासि देवदत्त यत्कश्मीरेषु वत्स्यामः । यत्कश्मीरेष्ववसाम । यत्तत्रौदनं भोक्ष्यामहे । यत्तत्रौदनमभुञ्ज्महि । अप्राप्ते—अभिजानासि देवदत्त कश्मीरान् गमिष्यामः । कश्मीरानगच्छाम । तत्रौदनं[1] भोक्ष्यामहे । तत्रौदनम-भुञ्ज्महि ।

विमला - उभयत्रेति । लक्ष्यानुरोधात् यदीति नानुवर्तते परविप्रतिषेधश्चेति भावः ।

१. क्वचिदौदनानिति ।

(३००-उदाहरणवार्तिकम्-४४)

।।*।। विभाषा श्वेः ।।*।।

(भाष्यम्)

[१]प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

कितीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।

विमला - कितीति वेति । अयम्भावः । '**विभाषाश्वेः**' इतिसूत्रे '**वचिस्वपियजादीनां किती**' त्यनुवर्तते तस्य च पृथक् पाठसामर्थ्याद्वाक्यभेदेनान्वयः । तत्र प्रथमवाक्यस्य वचेः स्वपेः यजादेश्च सम्प्रसारणं स्यात् कितीत्यर्थः । द्वितीयवाक्यस्य तु यजादिश्वयतेः सम्प्रसारणं वा स्यात् किति लिटीत्यर्थः । एवञ्च श्वयतेरपि यजाद्यन्तर्गतत्वात् प्रथमवाक्येन नित्यसम्प्रसारणे प्राप्ते एव द्वितीयेन विकल्पसम्प्रसारणविधानात् प्राप्तविभाषात्वम् यदि नानुवर्तते तदा शूयादित्यादौ सावकाशस्य नित्यसम्प्रसारणस्य शुशावेत्यादौ सावकाशस्य विकल्पसम्प्रसारणस्य किति लिटि शुशुवतुरित्यादौ द्वयोः प्राप्तौ पूर्वविप्रतिषेधेन नित्यसम्प्रसारणस्यैवाङ्गीकारे विकल्पसम्प्रसारणस्याकित्येव चारितार्थ्येन तत्र च केनापि सम्प्रसारणप्राप्तिविरहेणाप्राप्तविभाषात्वम् । परविप्रतिषेधाश्रयणेन विकल्पसम्प्रसारणस्यैवाङ्गीकारे किति लिटि शुशुवतुरित्यादौ प्राप्तविभाषात्वम् किति भिन्ने लिटि अप्राप्तविभाषात्वमित्युभयत्र विभाषात्वमिति भवति कोटित्रयप्रकारकः सन्देहः ।

(सिद्धान्तभाष्यम्)

---

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

उभयत्र ।। प्राप्ते तावत्-शुशुवतुः शुशुवुः, शिश्वियतुः शिश्वियुः । अप्राप्ते-शुशाव शुशविथ, शिश्वाय शिश्वयिथ ।।

विमला - उभयत्रेति । अननुवृत्तिः परविप्रतिषेधश्च लक्ष्यानुरोधादिति भावः ।

(३०१-उदाहरणवार्तिकम्-४५)

।।*।। विभाषा संघुषास्वनाम् ।।*।।

(भाष्यम्)

संपूर्वाद्घुषेः—प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

"'घुषिरविशब्दने' इति वा नित्ये प्राप्ते अन्यत्र वाऽप्राप्ते, उभयत्र वेति ।।

विमला - घुषिरविशब्दने इति वेति । अयम्भावः । **'रुष्यमत्त्वरसंघुषास्वनाम्'** इतिसूत्रे **'घुषिरविशब्दने'** इति सूत्रमनुवर्तते तस्य च पृथक् पाठसामर्थ्याद्वाक्य-भेदेनान्वयः । तत्र प्रथमवाक्यस्य घुष्धातोर्निष्ठाया नेट् अविशब्दने इत्यर्थः । द्वितीयवाक्ये अनुवृत्तस्याविशब्दने इत्येतस्यासम्भवाद्रुष्यादिभ्योऽसंबन्धेऽपि सम्पूर्वस्य घुषेः संघुष्टा रज्जुरित्यत्राविशब्दनार्थकत्वेन, संघुष्टं वाक्यमित्यत्र विशब्दनार्थकत्वेन च सम्भवव्यभिचारयोः सत्त्वेन तत्राविशब्दने इत्यस्य संबन्धे रुषेरमेस्त्वरेरविशब्दने संपूर्वकादघुषेराङ्पूर्वकात्स्वनेश्च निष्ठाया इड्निषेधो वा स्यादित्यर्थो द्वितीयवाक्यस्य । एवञ्च प्रथमवाक्येन प्राप्ते एव नित्येट्निषेधे द्वितीयवाक्येन सम्पूर्वकादघुषेर्निष्ठायाः विकल्पेनेटो निषेधो विधीयते इति प्राप्तविभाषात्वम् । यदि नानुवर्तते तदा अनुपसृष्टे

घुष्टा रज्जुरित्यत्र सावकाशस्य नित्येण्निषेधस्य विशब्दने संघुष्टं वाक्यमित्यत्र सावकाशस्य विकल्पेण्निषेधस्य च अविशब्दने सोपसर्गे संघुष्टा रज्जुरित्यत्र द्वयोः प्राप्तौ पूर्वविप्रतिषेधेन नित्येण्निषेधस्यैव स्वीकारे विशब्दने एव विकल्पः स्यात् तत्र च केनापीण्निषेधस्य प्राप्तिविरहेणाप्राप्तविभाषात्वम् । परविप्रतिषेधाश्रयणेन विकल्पेण्निषेधस्यैव स्वीकारे तु अविशब्दने संघुष्टा रज्जुरित्यत्र प्राप्तविभाषात्वम् विशब्दने संघुष्टं वाक्यमित्यत्राप्राप्तविभाषात्वमित्युभयत्रविभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते इति ।

(सिद्धान्तभाष्यम्)

उभयत्र ।। प्राप्ते तावत्—संघुष्टा रज्जुः, संघुषिता रज्जुः । अप्राप्ते–संघुष्टं वाक्यमाह[1], संघुषितं वाक्यमाह ।।

विमला - उभयत्रेति । लक्ष्यानुरोधादननुवृत्तिः परविप्रतिषेधाश्रयणञ्चेति भावः ।

(आस्वनोदाहरणभाष्यम्)

आङ्पूर्वात्स्वनेः—

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः ।।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते ? कथं वाऽप्राप्ते ? कथं वोभयत्र ?

(संदेहोपपादकभाष्यम्)

मनसीति वा नित्ये प्राप्ते, अन्यत्र वा अप्राप्ते, उभयत्र वेति ।।

विमला - मनसीति वेति । अयम्भावः । '**रुष्यमत्वरे**' तिसूत्रे '**स्वान्तं मनसी**'-त्यनुवर्तते तस्य च पृथक्पाठसामर्थ्याद्वाक्यभेदेनान्वयः तत्र प्रथमवाक्यस्य मनसिवाच्ये स्वनतेर्निष्ठाया नेडित्यर्थः । द्वितीयवाक्यस्य तु मनसिवाच्ये आङ्पूर्वकात्स्वनतेर्न्निष्ठाया

---

१. आहेति क्वचिन्न ।

इड्निषेधो वा स्यादित्यर्थः । एवञ्च प्रथमवाक्येन प्राप्ते एव नित्येड्निषेधे द्वितीयवाक्येन विकल्पेड्निषेधविधानात्प्राप्तविभाषात्वम् । यदि च नानुवर्तते तदाऽनुपसृष्टस्य स्वनतेः स्वान्तं मन इत्यादौ सावकाशस्य नित्येड्निषेधस्य मनसि भिन्ने 'आस्वान्तो देवदत्तः' इत्यादौ सावकाशस्य विकल्पेड्निषेधस्य च 'आस्वान्तं मन' इत्यादौ द्वयोः प्राप्तौ पूर्वविप्रतिषेधेन नित्येड् निषेधस्यैव स्वीकारे मनोभिन्न एव विकल्पः स्यादिति तत्र केनापि प्राप्त्यभावादप्राप्तविभाषात्वम् । परविप्रतिषेधाश्रयणेन विकल्पेड्निषेधस्यैव स्वीकारे आस्वान्तं मन इत्यादौ प्राप्तविभाषात्वम्, आस्वान्तो देवदत्तः' इत्यत्राप्राप्तविभाषात्वमित्युभयत्रविभाषात्वमिति कोटित्रयप्रकारकः सन्देह उपपद्यते इति ।

(सिद्धान्तभाष्यम्)

उभयत्र ।। प्राप्ते तावत्—आस्वान्तं मनः, आस्वनितं मनः । अप्राप्ते-आस्वनितो देवदत्तः[1] आस्वान्तो देवदत्त इति ।।

इति श्रीमद्भगवत्पतञ्जलिकृतौ व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमपादे षष्ठमाह्निकम् ।।६।।

विमला - उभयत्रेति । लक्ष्यानुरोधादननुवृत्तिः परविप्रतिषेधश्चेति भावः ।

इति पण्डितमहेशझाशर्म्म-विरचितायाम् महाभाष्यव्याख्यायां विमलाख्यायां प्रथमाध्यायस्य प्रथमे पादे षष्ठमाह्निकम् ।।

१. क्वचिद्विपर्यास इति ।

अथ सप्तममाह्निकम्

(संप्रसारणसंज्ञासूत्रम्)

इग्यणः संप्रसारणम् ।।१।१।४४।।

(उभयसंज्ञात्वस्थापनाधिकरणम्)

(आक्षेपभाष्यम्)

किमियं वाक्यस्य संप्रसारणसंज्ञा क्रियते–इग्यण इत्येतद्वाक्यं संप्रसारणसंज्ञं भवतीति । आहोस्विद्वर्णस्य–इग्यो यणः स्थाने वर्णः स संप्रसारणसंज्ञो भवतीति ।।

विमला - इग्यण इत्येतद्वाक्यमिति । इह **'नवेति विभाषे'**त्युत्तरसूत्रादिति-पदमनुवर्तते । तेन स्वंरूपमित्युक्तेः शब्दपरस्यापि 'इग्यण' इति वाक्यस्येतेः पदार्थविपर्यासकत्वेनेहार्थपरत्वेन यणः स्थानिकेक्कर्तृकभवनमिति वाक्यार्थः सम्प्रसारणसंज्ञः स्यादित्यर्थः । नवेति विभाषेति पूर्वसूत्रप्रत्याख्यानपक्षे तु वाक्यमेव संज्ञि । नचैवं तदेव विधेयं स्यादिति वाच्यम्, वाह ऊठ् सम्प्रसारणमिति सामानाधि-करण्यबलेन तदुपस्थितार्थस्यैव विधेयत्वात् । नचैवमपि ष्यङः सम्प्रसारणमित्यादौ वैयधिकरण्यान्वयस्थले दोषतादवस्थ्यमिति वाच्यम्, सामान्यापेक्षज्ञापकत्वस्वीकारात् । नन्वेवमपि वाक्यार्थः संज्ञीतिपक्षे वाक्यर्थस्योद्देशविधेयभावसंसर्गरूपतया 'इग्यण' इति सूत्रात् 'यणः स्थाने इग्भवतीत्यवान्तरवाक्यार्थबोधः । ततो यणः स्थानिकेक्कर्तृभवनम् सम्प्रसारणसंज्ञमिति महावाक्यार्थबोधः । अतोऽत्रपक्षे नान्योन्याश्रयशङ्का । अवान्तरवाक्यार्थेन 'याति' 'वाति' 'द्राती'त्यादावतिप्रसङ्गस्तु नापाद्यः, ष्यङः सम्प्रसारणमित्यादिशास्त्राणां वैयर्थ्यापत्त्या तस्य संज्ञासंबन्धमात्रफ-लकत्वात् ।

(विशेषजिज्ञासाभाष्यम्)

कश्चात्र विशेषः ?

(३०२-वाक्यसंज्ञापक्षदूषणवार्तिकम्-१)

।।*।। संप्रसारणसंज्ञायां वाक्यस्य[1] संज्ञा चेद्वर्णविधिः ।।*।।

(भाष्यम्)

संप्रसारणसंज्ञायां वाक्यस्य संज्ञा चेद्वर्णविधिर्न सिध्यति—संप्रसारणात्परः पूर्वो भवतीति संप्रसारणस्य दीर्घो भवतीति । नहि वाक्यस्य संप्रसारणसंज्ञायामेष[2] निर्देश उपपद्यते । नाप्येतयोः कार्ययोः संभवोऽस्ति ।।

(द्वितीयपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि वर्णस्य ।।

(३०३-वर्णसंज्ञापक्षदूषणवार्तिकम्-२)

।।*।। वर्णसंज्ञा चेन्निर्वृत्तिः ।।*।।

(भाष्यम्)

वर्णस्य संज्ञा चेन्निर्वृत्तिर्न सिध्यति-"ष्यङः संप्रसारणम्" इति । स एव हि तावदिग् दुर्लभः, यस्य संज्ञा क्रियते ।। अथापि कथंचिल्लभ्येत, केनाऽसौ यणः स्थाने स्यात् ? अनेन ह्यसौ व्यवस्थाप्यते । तदेतदितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते ।।

(३०४-समाधानवार्तिकम्-३)

।।*।। विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्य ।।*।।

---

१. क्वचिद् 'वाक्यसंज्ञा' इति ।

२. 'संज्ञायां सत्यामेष' इति क्वचित् ।

(भाष्यम्)

[1]यदयं विभक्तिविशेषैर्निर्देशं करोति 'संप्रसारणात्परः पूर्वो भवती'ति, संप्रसारणस्य दीर्घो भवतीति, ष्यङः संप्रसारणं भवतीति। तेन ज्ञायते—उभयोः संज्ञा भवतीति॥ यत्तावदाह—संप्रसारणात्परः पूर्वो भवतीति, संप्रसारणस्य दीर्घो भवतीति, तेन ज्ञायते—वर्णस्य भवतीति॥ यदप्याह—ष्यङः संप्रसारणमिति, तेन ज्ञायते—वाक्यस्य[2] संज्ञा भवतीति॥

(प्रथमपक्षाभ्युपगमभाष्यम्)

अथ वा पुनरस्तु वाक्यस्यैव॥

(उक्ताक्षेपस्मारणम्)

ननु चोक्तम्—संप्रसारणसंज्ञायां वाक्यस्य[3] संज्ञा चेद्वर्णविधिः इति॥

(समाधानभाष्यम्)

नैष दोषः। यथा काकाज्जातः काकः, श्येनाज्जातः श्येनः। एवं संप्रसारणाज्जातं संप्रसारणम्। [4]तस्मात्परः पूर्वो भवति, तस्य दीर्घो भवतीति॥

(समाधानान्तरभाष्यम्)

---

१. उपर्युक्तवार्तिकमत्र लुप्तंस्यात्।
२. वाक्यस्यापीति क्वचित्।
३. 'स्य' इति क्वचिन्न।
४. इतः पूर्वं "यत्तत्सम्प्रसारणाज्जातं सम्प्रसारणम्" इति क्वचित्।

[१]अथवा दृश्यन्ते हि — वाक्येषु वाक्यैकदेशान् प्रयुञ्जानाः, पदेषु च पदैकदेशान्। वाक्येषु तावद्वाक्यैकदेशान्—प्रविश, पिण्डीम्, प्रविश, तर्पणम् इति। पदेषु पदैकदेशान्—देवदत्तो, दत्तः, सत्यभामा, भामेति। एवमिहापि— संप्रसारणनिर्वृत्तात्संप्रसारणनिर्वृत्तस्येत्येतस्य वाक्यस्यार्थे सम्प्रसारणात् सम्प्रसारणस्येत्येष वाक्यैकदेशः प्रयुज्यते। ते (न[२]) निर्वृत्तस्य विधिं विज्ञास्यामः— संप्रसारणनिर्वृत्तात्संप्रसारणनिर्वृत्तस्येति॥

विमला - सम्प्रसारणनिर्वृत्तादिति। परः पूर्वोभवतीत्यनुषज्यते। सम्प्रसारणनिर्वृत्तस्येति। दीर्घोभवतीत्यनुषज्यते।

(समाधानान्तरभाष्यम्)

[३]अथवा आहायं संप्रसारणात्परः पूर्वो भवतीति, संप्रसारणस्य दीर्घो भवतीति। न च वाक्यस्य संप्रसारणसंज्ञायां सत्यामेष निर्देश उपपन्नः, नाप्येतयोः कार्ययोः संभवोऽस्तीति, तत्र वचनाद् भविष्यति॥

(द्वितीयपक्षाभ्युपगमभाष्यम्)

अथवा पुनरस्तु वर्णस्य॥

(उक्ताक्षेपस्मारणभाष्यम्)

ननु चोक्तम्—वर्णसंज्ञा चेन्निर्वृत्तिः इति॥

(समाधानभाष्यम्)

---

१. इतः पूर्वं "वाक्यैकदेशप्रयोगाद्वा" इति समाधानान्तरवार्तिकं लुप्तं स्यात्।

२ इति क्वाचित्कः।

३ इतः पूर्वं "वचनप्रामाण्याद्वा" इति समाधानान्तरवार्तिकं लुप्तं स्यात्।

नैष दोषः । इतरेतराश्रयमात्रमेतच्चोदितम् । सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि–'सिद्धं तु नित्यशब्दत्वाद्' इति ।

(समाधानबाधकभाष्यम्)

नेदं तुल्यमन्यैरितरेतराश्रयैः । नहि तत्र किंचिदुच्यते—अस्य स्थाने ये आकारैकारौकारा भाव्यन्ते ते वृद्धिसंज्ञा भवन्तीति । इह हि पुनरुच्यते–इग्यो यणः स्थाने वर्णः स संप्रसारणसंज्ञो भवतीति ।।

(समाधानसाधकभाष्यम्)

[1]एवं तर्हि भाविनीयं संज्ञा विज्ञास्यते । तद्यथा—कश्चित्कंचित् तन्तुवायमाह—'अस्य सूत्रस्य शाटकं वय' इति । स पश्यति—'यदि शाटको न वातव्यः, अथ वातव्यो न शाटकः, शाटको वातव्यश्चेति विप्रतिषिद्धम्, भाविनी खल्वस्य संज्ञाऽभिप्रेता, स मन्ये वातव्यो–'यस्मिन्नुते शाटक इत्येद्भवति' इति । एवमिहापि – स यणः स्थाने भवति यस्याऽभिनिर्वृत्तस्य संप्रसारणमित्येषा संज्ञा भविष्यति ।।

(समाधानान्तरभाष्यम्)

[2]अथवा–इजादियजादिप्रवृत्तिश्चैव हि लोके लक्ष्यते । यजाद्युपदेशात्तु इजादिनिवृत्तिः प्रसक्ता । प्रयुञ्जते च पुनर्लोका – इष्टम् उप्तमिति । ते मन्यामहे—'अस्य यणः स्थाने इममिकं प्रयुञ्जते' इति ।

---

१. इतः पूर्वं "**भाविसंज्ञाविज्ञानाद्वा**" इति समाधानस्थापनवार्तिकं लुप्तं स्यात् ।

२. इतः पूर्वं "**इजादियजादिप्रवृत्तेश्च**" इति समाधानान्तरवार्तिकं लुप्तं स्यात् ।

तत्र तस्याऽसाध्वभिमतस्य शास्त्रेण साधुत्वमन्वाख्यायते[1]—किति साधुर्भवति, ङिति साधुर्भवतीति ।। – इग्यणः संप्रसारणम् ।।

विमला - प्रवृत्तिरिति । प्रकृतित्वेन प्रवृत्तिरित्यर्थः ।

(अथागमस्थितिदेशनिर्णयप्रकरणम्)

(परिभाषासूत्रम्)

आद्यन्तौ टकितौ ।।१।१।४५।।

(अन्वयानुपपत्तिनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

समासनिर्देशोऽयम् । तत्र न ज्ञायते—क आदिः कोऽन्त इति । तद्यथा—'अजाविधनौ देवदत्तयज्ञदत्तौ' इत्युक्ते तत्र न ज्ञायते—कस्याजा धनम्, कस्याऽवयः—इति ।।

(समाधानभाष्यम्)

यद्यपि तावल्लोक एष दृष्टान्तः । दृष्टान्तस्यापि तु पुरुषारम्भो निवर्तको भवति ।।

(आक्षेपभाष्यम्)

अस्ति वेह[2] कश्चित्पुरुषारम्भः ।।

(समाधानभाष्यम्)

अस्तीत्याह ।।

---

१. 'साधुत्वमवस्थाप्यते' इति क्वचित् ।

२. चेह (?) ।

कः ? संख्यातानुदेशो नाम ।।

विमला - संख्यातानुदेशो नामेति । संख्यातानुदेशशब्देन यथासंख्यसूत्रं लक्ष्यते ।

(टकितोरागमविषयत्वनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

कौ पुनष्टकितावाद्यन्तौ भवतः ?

(समाधानभाष्यम्)

आगमावित्याह ।।

(आदेशवादिन आगमवादिनं प्रति आक्षेपभाष्यम्)

युक्तं पुनर्यन्नित्येषु नाम शब्देषु आगमशासनं स्यात् । न, नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । आगमश्च नामाऽपूर्वः शब्दोपजनः ।

विमला - नेति । युक्तमित्यनुषज्यते । तत्र हेतुमाह—नित्येष्विति ।

(आगमवादिन आदेशवादिनं प्रति आक्षेपभाष्यम्)

अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः ?

(आदेशवादिनः समाधानभाष्यम्)

बाढं युक्तम् । शब्दान्तरैरिह भवितव्यम् । तत्र शब्दान्तराच्छब्दान्तरस्य प्रतिपत्तिर्युक्ता ।।

(इष्टापत्तिभाष्यम्)

आदेशास्तर्हीमे भविष्यन्ति । अनागमकानां सागमकाः ।।

(आक्षेपभाष्यम्)

तत्कथम् ?

(एकदेशिसमाधानभाष्यम्)

संज्ञाधिकारोऽयम् । आद्यन्तौ चेह संकीर्त्येते, टकारककारावितावुदाह्रियेते । तत्राद्यन्तयोष्टकारककारावितौ संज्ञे भविष्यतः । तत्र "आर्धधातुकस्येड्वलादेः" इत्युपस्थितमिदं भवति—आदिरिति । तेनेकारादिरादेशो भविष्यति ।।

विमला - तत्रेति त्रिपदे इत्यर्थः । अजादीनामटेति ।

अजादीनामटा सिद्धम्वृद्ध्यर्थमितिचेदटः ।
अस्वपो हसतीत्यत्र धातौ वृद्धिमटः स्मरेत् ।।
पररूपं गुणेनाटः ओमाङोरुसि तत्समम् ।
छन्दोऽर्थं बहुलं दीर्घः इणस्त्योरन्तरङ्गतः ।।

अस्यार्थः । अजादीनामटा सिद्धमित्याण् न वक्तव्यः । वृद्ध्यर्थमिति चेद्, अट एव वृद्धिरुच्यताम् । न च अस्वपो हसतीत्यत्र रुत्वे उत्त्वे चाटो वृद्धिः स्यादिति वाच्यम्, धातौ परेऽटो वृद्धेर्वक्तव्यत्वात् । न च आटीदित्यादौ गुणे पररूपं स्यादिति वाच्यम्, अटो नेत्यस्य करणीयत्वात् । अस्य वक्तव्यत्वेऽपि उस्योमाङ्क्ष्वाटः प्रतिषेधः चोदितः स न वक्तव्यो भवति । इति वचनकरणे साम्यमेव । न च 'त्रित एनमायुनक्' इत्यादि च्छन्दोऽर्थमाड्वक्तव्य इति वाच्यम्, यतः छन्दसि बहुलं दीर्घो दृश्यते । नापि आयन्नादौ आट आवश्यकता, तत्रापि यणाद्यपेक्षयाऽन्तरङ्गत्वाद् वृद्धिर्भविष्यतीति । इडादिपदे त्रिपदबहुव्रीहिकल्पनायां गौरवात्, पूर्वसाहचर्य्यात् परसाहचर्य्यस्य बलीयस्त्वेन इग्यणः सम्प्रसारणमिति पूर्वसूत्रसाहचर्य्येणास्य संज्ञासूत्रत्वकल्पनापेक्षया मिदचोऽन्त्यादिति परसूत्रसाहचर्य्येण परिभाषात्वकल्पनस्यैव न्याय्यत्वाच्चास्यैकदेशयुक्तत्वमिति बोध्यम् ।

(आक्षेपभाष्यम्)

एतावदिह सूत्रम् 'इट्' इति । कथं पुनरियता सूत्रेण इकारादिरादेशो लभ्यः ?

(समाधानभाष्यम्)

लभ्य इत्याह ॥

कथम् ? बहुव्रीहिनिर्देशात्[1] ।

बहुव्रीहिनिर्देशोऽयम् । इकारः ट्[2] आदिरस्येति ॥

(आक्षेपभाष्यम्)

यद्यपि तावदत्रैतच्छक्यते वक्तुम् । इह तु कथम्— "लुङ्लङ्लृङ्क्ष्वडुदात्तः" इति, यत्राशक्यमुदात्तग्रहणेनाऽकारो विशेषयितुम् ॥

(प्रत्याक्षेपभाष्यम्)

तत्र को दोषः ?

(प्रत्याक्षेपसमाधानभाष्यम्)

अङ्गस्योदात्तत्वं प्रसज्येत ॥

(समाधानभाष्यम्)

नैष दोषः । त्रिपदोऽयं बहुव्रीहिः । तत्र वाक्य एवोदात्तग्रहणेनाऽकारो विशेष्यते—अकार उदात्त आदिरस्येति ॥

विमला - त्रिपदोऽयं बहुव्रीहिरिति । अ ट् आदिरुदात्तश्च यस्य स इति विग्रहो बोध्यः ।

(आक्षेपभाष्यम्)

यत्र तर्ह्यनुवृत्त्यैतद्भवति—"आडजादीनाम्" इति ॥

---

१. वार्तिकमिदमित्यन्ये । २. 'ट्' इति क्वचिन्न ।

(समाधानभाष्यम्)

वक्ष्यत्येतत्–'अजादीनामटा सिद्धम्' इति ।

(सिद्धान्तिभाष्यम्)

अथवा—यत्तावदयं सामान्येनोपदेष्टुं[1] शक्नोति, तत्तावदुपदिशति— प्रकृतिम्, ततो वलाद्यार्धधातुकम्, ततः पश्चादिकारम् । तेनाऽयं विशेषेण शब्दान्तरं समुदायं प्रतिपद्यते । तद्यथा–खदिरबुर्बुरयोः[2]–खदिरबुर्बुरौ गौरकाण्डौ सूक्ष्मपर्णौ । ततः पश्चादाह–कङ्कटवान् खदिर—इति । तेनाऽसौ विशेषेण द्रव्यान्तरं समुदायं प्रतिपद्यते ।।

विमला - खदिरबर्बुरयोरिति । अस्य सूक्ष्मपर्णावित्यनन्तरमध्याहृतेन सामान्यमुपदिशतीत्यनेनान्वयः । एवञ्चात्र संबन्धसामान्ये षष्ठीतिबोध्यम् । निर्द्धारणे षष्ठीव्युत्पादनं कैयटस्य प्रमादः । **गौरकाण्डौ** । स्फुटशाखौ । **आहेति** । अस्य विशेषमित्यादिः । **तेनेति** । विशेषेणेत्यनेनान्वेति । **विशेषेणेति** । कङ्कटवत्त्वरूपभेदकेनेत्यर्थः । कङ्कटः । कवचम् । **द्रव्यान्तरमिति** । बर्बुराद्भिन्नमित्यर्थः । **समुदायमिति** । गुणसमुदायात्मकमित्यर्थः । पतञ्जलिमते गुणसमुदायस्यैव द्रव्यत्वादितिभावः । **प्रतिपद्यते** । बर्बुरबुद्धिनिवृत्तिपूर्वकं ज्ञायते । नतु तदैव खदिरस्योत्पत्तिः । एवमत्रापि तव्यबुद्धिनिवृत्तिपूर्वकमितव्यबुद्धिरुत्पाद्यते न तु तदैव इट उत्पत्तिरितिभावः ।

(समाधानान्तरभाष्यम्)

अथवा एतयाऽनुपूर्व्याऽयं शब्दान्तरमुपदिशति—प्रकृतिम् । ततो वलाद्यार्धधातुकम् । ततः पश्चादिकारं, यस्मिंस्तस्यागमबुद्धिर्भवति ।।

---

१. उपदेष्टुमिति क्वचिन्न । क्वचिच्छक्नोत्युपदेष्टुम् इति ।

२. क्वचित् बर्बुरोऽपि पाठः ।

विमला - एतया । वक्ष्यमाणया प्रकृतिम् ततो वलाद्यार्धधातुकम् ततः पश्चादिकारमित्याकारिकया आनुपूर्व्या । **अयम्** पाणिनिः । **शब्दान्तरम्** सत्यगोस्थानीयाखण्डबोधकशब्दापेक्षया भिन्नम्, रेखागवयस्थानीयमनित्यमिति यावत् । **उपदिशति** प्रतिपादयति । **यस्मिन्** । रेखागवयस्थानीये अनित्ये पदे । **तस्येति** तत्रेत्यर्थः । **आगमबुद्धिर्भवतीति** । तत्रागमबुद्धावपि सत्याखण्डबोधकपदे न नित्यताहानिरितिभावः । **अत्रेदमवधेयम्** । आकाशवन्नित्ये शब्दे आगमानुशासनमयुक्तमिति शङ्कायाः समाधानत्रयं प्रदर्शितम् । तत्र प्रथमसमाधानमेकदेशिनः, समाधानद्वयं सिद्धान्तिनः । तत्रानागमकानां सागमका आदेशा इति प्रथमसमाधानकृत एकदेशिनोऽयमभिप्रायः । शास्त्रेण बुद्धिविपरिणाममात्रं क्रियते नतु कश्चिच्छब्दं निवर्त्यापरः शब्दः निष्पाद्यते इति न नित्यत्वहानिरिति । द्वितीयसमाधानस्याशयस्तु — आकाशवन्नित्यमखण्डबोधकं पदमनया प्रणाल्या पाणिनिना व्युत्पाद्यते न तूत्पाद्यते इति न नित्यत्वहानिः । तृतीयसमाधानस्याशयस्तु — मध्यमानादाभिव्यङ्ग्यं स्फोटात्मकं पदमेव नित्यं न तु वैखरीनादाभिव्यङ्ग्यम्, भेर्यादिशब्दवन्निरर्थकं कण्ठताल्वाद्यभिघातजन्यं पदमपि । पाणिनेर्लक्षणन्त्वनित्यशब्दाभिप्रायेणैव प्रवृत्तमिति युक्तमेवागमानुशासनम् एतस्यापि शब्दस्य रेखागवयन्यायेनाखण्डनित्यशब्दबोधकतया भवति पाणिनेर्लक्षणस्याखण्डे नित्यपदेप्युपयोगितेति ।

(३०५-आक्षेपवार्तिकम्-१)

॥*॥ टकितोराद्यन्तविधाने प्रत्ययप्रतिषेधः ॥*॥

(भाष्यम्)

टकितोराद्यन्तविधाने प्रत्ययस्य प्रतिषेधो वक्तव्यः ॥ प्रत्यय आदिरन्तो वा मा भूदिति ॥ "चरेष्टः" "आतोऽनुपसर्गे कः" इति ॥

(३०६-समाधानवार्तिकम्-३)

॥*॥ परवचनात्सिद्धम् ॥*॥

(भाष्यम्)

[1]परवचनात्प्रत्यय आदिरन्तो वा न भविष्यति ।।

(३०७-समाधानबाधकैकदेशिवार्तिकम्-३)

।।।।परवचनात्सिद्धमिति*
चेन्नाऽपवादत्वात् ।।।।*

(भाष्यम्)

परवचनात्सिद्धमिति चेत् । तन्न ।

किं कारम् ?

"अपवादत्वात्' । अपवादोऽयं योगः ।। तद्यथा— "मिदचोन्त्यात्परः" इत्येष योगः स्थानेयोगत्वस्य, प्रत्ययपरत्वस्य चाऽपवादः ।।

विमला - प्रत्ययपरत्वस्य चापवाद इति । मिदचोऽन्त्यादिति परसूत्रसाहचर्यादत्रापि बाध्यसामान्यचिन्तैवेति भावः ।

(समाधानसाधकदृष्टान्तवैषम्यभाष्यम्)

विषम उपन्यासः । युक्तं तत्र यदनवकाशं मित्करणं स्थानेयोगत्वं प्रत्ययपरत्वं च बाधते । इह तु पुनरुभयं सावकाशम्[2] ।।

टित्करणस्याऽवकाशः—'टितः' इति ईकारो यथा स्यात् । कित्करणस्यावकाशः — 'किति' इत्याकारलोपो यथा स्यात् ।।

विमला - मित्करणमिति । प्रत्ययसंबन्धि मित्करणमित्यर्थः ।

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

२. इतः परं "कोऽवकाशः?" इति क्वचित् ।

टित्करण इति । प्रत्ययसंबन्धी टित्करण इत्यर्थः । **सावकाश इति** । सप्रयोजन इत्यर्थः । प्रयोजनं दर्शययि—**टित इतीति** । **कित्करणः सावकाश इति** । इदमपि पूर्ववदेव व्याख्येयम् ।

(समाधानबाधकपवादत्वसाधकभाष्यम्)

प्रयोजनं नाम तद्वक्तव्यम्, यन्नियोगतः स्यात् । यदि चायं नियोगतः परः स्यात्तत एतत्प्रयोजनं स्यात् ।। कुतो नु खल्वेतत्—टित्करणादयं परो भविष्यति न पुनरादिरिति, कित्करणाच्च परो भविष्यति न पुनरन्त इति ?

विमला - प्रयोजनं नाम तद्वक्तव्यमिति । टित्करणस्यैतत्प्रयोजनं तदा स्यादित्यर्थः । **यदिति** । यदीत्यर्थः । **नियोगत इति** । नियुज्यते इति नियोगः शास्त्रम् तृतीयान्तात्तसिः । **स्यादिति** । अस्य पर इत्यादिः । यद्ययं टित्प्रत्ययः शास्त्रेण परः स्यादित्यर्थः । तथा च यद्ययं टित्प्रत्ययः शास्त्रेण परः स्यात्तदा पूर्वोक्तं 'टित' इति ईकाररूपं' टित्करणस्य प्रयोजनं स्यात् । टिदन्तादेव ङीब्विधानादिति भावः । पूर्वोक्तमेव विवृणोति—**यदि चायमिति** । **न पुनरादिरिति** । टित्वस्य ङीब्रूपं प्रयोजनं परभवनसापेक्षतया बहिरङ्गम् । आदिरिति प्रयोजनन्तु परभवनानपेक्षत्वेनान्तरङ्गमिति अन्तरङ्गत्वात् मिदचोऽन्त्यादिति साहचर्याच्चादिरित्येव फलं युक्तिमिति ध्वन्यते ।

(किदंशेऽपवादत्वबाधकभाष्यम्)

टितः खल्वप्येष परिहारः । यत्र नास्ति संभवः—यत्परश्च स्यादादिश्च । कितस्त्वपरिहारः, अस्ति हि संभवो यत्परश्च स्यादन्तश्च ।।

(आक्षेपभाष्यम्)

तत्र को दोषः ?

(समाधानभाष्यम्)

"उपसर्गे घोः किः"। आध्योः प्रध्योः। "नोङ्धात्वोः" इति प्रतिषेधः प्रसज्येत ॥

(टिदंशेऽप्यपवादत्वबाधकभाष्यम्)

टित्त्वेऽप्यपरिहारः। स्यादेव ह्ययं टित्करणादादिः, न पुनः परः ॥

(आक्षेपभाष्यम्)

क्व तर्हि इदानीमिदं स्यात्—टित ईकारो भवतीति ?॥

(समाधानभाष्यम्)

य उभयवान्—"गापोष्टक्"इति ॥

(३०८-सिद्धान्त्येकदेशिसमाधानवार्तिकम्-४)

॥*॥ सिद्धं तु षष्ठ्यधिकारे वचनात् ॥*॥

(भाष्यम्)

सिद्धमेतत्। कथम् ?[1]

षष्ठ्यधिकारेऽयं योगः कर्तव्यः— "आद्यन्तौ टकितौ षष्ठीनिर्दिष्टस्य" इति।

(३०९-सिद्धान्त्येकदेशिसमाधानान्तरवार्तिकम्-५)

॥*॥ आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावेऽसंप्रत्ययः ॥*॥

(भाष्यम्)

---

१. एतदनन्तरं उक्त वार्तिकं लुप्तं स्यात्।

आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावे षष्ठ्या अभावे — असंप्रत्ययः स्यात् । आदिरन्तो वा न भविष्यति ।।

विमला - षष्ठ्यर्थत्वादिति । अत्र षष्ठीपदं तदन्तपरम् । षष्ठ्यन्तार्थनिरूप्यत्वादित्यर्थः । अयम्भावः । अयमादिरन्तो वेत्युक्तौ कस्येति षष्ठ्यन्तार्थेऽवश्यमाकांक्षोदेति तयोस्तदंशे नित्यसाकांक्षत्वादेवञ्चाद्यन्तार्थनिरूपकस्य षष्ठ्यन्तार्थस्य प्रत्ययविधावभावेन निरूप्यावप्याद्यन्तौ न भविष्यतः ।

(आक्षेपभाष्यम्)

युक्तं पुनर्यच्छब्दनिमित्तको नामार्थः स्यात् । नार्थनिमित्तकेन नाम शब्देन भवितव्यम् ।।

विमला - ननु प्रत्ययविधौ षष्ठ्यन्तपदाभावेऽपि षष्ठ्यन्तार्थस्य सत्त्वे बाधकाभावेन आद्यन्तौ कुतो न भविष्यत इत्याशङ्क्ते–**युक्तं पुनरि**ति । यदि शब्दनिमित्तकोऽर्थः स्यात्तदा षष्ठ्यन्तपदाभावे षष्ठ्यन्तार्थः नास्तीति वक्तुं शक्नुयात् । तदेव नास्ति किन्तु अर्थनिमित्तक एव शब्दप्रयोग इति घटाभावेऽपि दण्डस्य सत्त्वात् षष्ठ्यन्तशब्दाभावेऽपि षष्ठ्यन्तार्थस्य सत्त्वे न किञ्चिद्बाधकमिति प्रश्नतात्पर्य्यम् ।

(समाधानभाष्यम्)

अर्थनिमित्तक एव शब्दः ।।

तत्कथम् ?

आद्यन्तौ षष्ठ्यर्थौ । न चात्र षष्ठीं पश्यामः । ते[1] मन्यामहे—आद्यन्तावेवाऽत्र न स्तः । तयोरभावे षष्ठ्यपि न भवतीति ।। — आद्यन्तौ टकितौ ।।४५।।

विमला - अर्थनिमित्तक एव शब्द इति । अर्थकारणकः शब्दप्रयोग इत्यर्थः ।

---

१. 'तेन' इति क्वचित् ।

तत्कथमिति । प्रत्ययविधावाद्यन्तयोरुपस्थितिः कथं नेत्यर्थः । **आद्यन्तौ षष्ठ्यर्थाविति** । आद्यन्तौ षष्ठ्यर्थद्वारा षष्ठ्यन्तपदप्रयोगजनकावित्यर्थः । **अत्रेति** । प्रत्ययविधायकेष्वित्यर्थः । **षष्ठीम्पश्याम इति** । षष्ठ्यन्तपदं पश्याम इत्यर्थः । **मन्यामहे इति** । अयम्भावः । अर्थनिमित्तकः शब्दप्रयोग इति ममाप्यनुमतम् । किन्तु षष्ठ्यर्थातिरिक्तसकलकारणाधिकरणे षष्ठ्यन्तपदप्रयोगाभावः । किम्प्रयोज्य इति प्रश्ने षष्ठ्यर्थाभावप्रयोज्यः, षष्ठ्यर्थाभावद्वारा आद्यन्ताभावप्रयोज्य इति समाधानं भवतापि वक्तव्यम् । एवञ्च तदतिरिक्तसकलकारणवद्विधिसूत्रेऽपि षष्ठ्यन्तपदाभावेन आद्यन्तयोरभावं षष्ठ्यर्थाभावम्वाऽनुमिनुमः । **भाष्ये आद्यन्तावेवात्र नस्त इति** । षष्ठ्यर्थाभावो वा नास्तीत्यस्याप्युपलक्षकम् । इदमत्र तत्त्वम् । कार्य्याभावस्य दण्डाद्यभावाभाववति पर्वतादौ घटाद्यभावसत्त्वेन व्यभिचारित्वात्कारणाभावानुमापकत्वाभावेऽपि तदितरसकलकारणवद्देशवृत्तित्वविशिष्टकार्य्याभावस्य तत्कारणाभावाव्यभिचारितया तत्कारणाभावानुमापकत्वेन भवति विधिसूत्रगतषष्ठ्यन्तपदप्रयोगाभावरूपकार्य्याभावस्य आद्यन्तयोः षष्ठ्यर्थस्य वा अभावानुमापकतेति । **तयोरभाव इति** । दृष्टान्तप्रदर्शनमेतत् । यथा आद्यन्तरूपकारणाभावेन षष्ठ्यन्तपदप्रयोगरूपकार्य्याभावानुमितिः । तथैव प्रकृते तदितरसकलकारणवद्विधिसूत्रवृत्तिषष्ठ्यन्तपदप्रयोगाभावेन आद्यन्तरूपकारणाभावानुमितिरिति भावः । षष्ठ्यन्तपदप्रयोगाभावे चाद्यन्तयोरभावानुमितिरित्यन्योन्याश्रयः स्यादित्यवधेयम् ।

(परिभाषासूत्रम्)

मिदचोऽन्त्यात्परः ॥१।१।४६॥

(सूत्रबाध्यनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थमिदमुच्यते ?

(३१०-सिद्धान्तवार्तिकम्-१)

।।*।। मिदचोऽन्त्यात्पर इति स्थानपरप्रत्ययाऽपवादः ।।*।।

(भाष्यम्)

मिदचोऽन्त्यात्पर इत्युच्यते । स्थाने योगत्वस्य प्रत्ययपरत्वस्य चाऽपवादः । स्थाने योगत्वस्य तावत्—कुण्डानि वनानि पयांसि यशांसि ।। प्रत्ययपरत्वस्य—भिनत्ति छिनत्ति ।।

विमला - स्थानपरप्रत्ययापवाद इति । स्थानपदं स्थानेयोगत्वपरम्, परश्चासौ प्रत्ययः, परप्रत्ययः, प्रत्ययपरत्वस्येत्यर्थः । स्थानेयोगत्वप्रत्ययपरत्वयोरपवादः, स्थाने योत्वप्रत्ययपरत्वापवादः ।

(आक्षेपभाष्यम्)

भवेदिदं युक्तमुदाहरणम्—कुण्डानि वनानि, यत्र नास्ति संभवो यदयमचोऽन्त्यात्परश्च स्यात् स्थाने चेति । इदं त्वयुक्तम्—पयांसि यशांसीति । अस्ति हि संभवो यदयमचोऽन्त्यात्परश्च स्यात् स्थाने चेति ।।

(समाधानभाष्यम्)

एतदपि युक्तम् ।। कथम् ?

नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति— अपवादैरुत्सर्गा बाध्यन्तामिति ।।

किं तर्हि ?

लौकिकोऽयं दृष्टान्तः । लोके हि सत्यपि संभवे बाधनं भवति । तद्यथा– 'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय' इति । सत्यपि संभवे दधिदानस्य तक्रदानं

निवर्तकः भवति । एवमिहापि सत्यपि संभवे अचामन्त्यात्परत्वं षष्ठीस्थानेयोगत्वं बाधिष्यते ।।

(सूत्राप्रवृत्तिनिरूपणाधिकरणम्)

(३११-सिद्धान्ताक्षेपवार्तिकम्-२)

।।।। अन्त्यात्पूर्वो [१]मस्जेर्मिदनुषंगसंयोगादिलोपार्थम् ।।*।।*

(भाष्यम्)

[२]अन्त्यात्पूर्वो मस्जेर्मिद्वक्तव्यः ।।

किं प्रयोजनम् ?

'अनुषङ्गसंयोगादिलोपार्थम्' । अनुषङ्गलोपार्थं संयोगादिलोपार्थं च । अनुषङ्गलोपार्थं तावत्—मग्नः मग्नवान् । संयोगादिलोपार्थम्—मङ्क्ता, मङ्क्तुम्[३], मङ्क्तव्यम् ।।

विमला - अनुषङ्गलोपार्थमिति । अनुषङ्गेति नुमः प्राचां संज्ञा ।

(३१२-आक्षेपवार्तिकम्-३)

।।।। भर्जिमर्च्योश्च ।।*।।*

(भाष्यम्)

भर्जिमर्च्योश्चाऽन्त्यात्पूर्वो मिद्वक्तव्यः । भरूजा मरीचय इति ।

(आक्षेपस्मारणभाष्यम्)

---

१. 'मस्जेरनुषङ्ग' इति पाठान्तरं क्वचित् ।

२. इतः पूर्वं "अन्त्यात्पूर्वो मस्जेरनुषङ्गसंयोगादिलोपार्थमिति वक्तव्यम् ।" इति क्वचित् ।

३. मङ्क्तम् ।

स तर्हि वक्तव्यः ?

(आक्षेपनिरासभाष्यम्)

न वक्तव्यः, 'निपातनात् सिद्धम्'[१] ।

किं निपातनम् ?

भरूजाशब्दोऽङ्गुल्यादिषु पठ्यते । मरीचिशब्दो-बाह्वादिषु ॥

(पूर्वान्तत्वस्थापनाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरयं पूर्वान्तः, आहोस्वित् परादिः, आहोस्विदभक्तः ?

(प्रत्याक्षेपभाष्यम्)

कथं वायं[२] पूर्वान्तः स्यात् ? कथं वा परादिः ? कथं वाऽभक्तः ?

(समाधानभाष्यम्)

यद्यन्त इति वर्तते, ततः पूर्वान्तः । अथाऽऽदिरिति वर्तते ततः परादिः । अथोभयं निवृत्तं, ततोऽभक्तः ॥

विमला - अन्त इति वर्तते इति । पूर्वसूत्रे समस्तमप्यन्तपदमेकदेशे स्वरितत्वप्रतिज्ञाबलादनुवर्तते इति भावः । यत्तु पूर्वं नाभेः कायस्येत्यत्र परपदसमशीलपूर्वशब्देनावयवत्वावच्छिन्नस्य प्रतीत्या परशब्दस्यावयवत्वविशिष्टपरत्वावच्छिन्ने शक्तिः कल्प्यते । एवञ्च तदेकदेशेऽवयवत्वे निरूपितत्वसंबन्धेन समुदायस्य परत्वे चावधितयाऽन्त्याचोऽन्वयेनैव समुदायनिरूपितावयवत्ववान्, अन्त्याजवधिका-

---

१. वार्तिकमिदमित्यन्ये । २. चायमिति क्वचित् ।

परत्ववान्मिदितिविशिष्टलाभसम्भवे पूर्वसूत्रे एकदेशे स्वरितत्वप्रतिज्ञायां तदनुवृत्तौ च न किञ्चित्फलम् । **'यद्यन्त इति वर्तते'** इति प्रकृतिसूज्ञ स्थं भाष्यम् 'उरण्रपर' इति सूत्रस्थमेतादृशमेव भाष्यञ्चैकदेशिन इति । तन्न । परशब्दस्यावयववाचकत्वे प्रमाणाभावात्, पूर्व नाभेः कायस्येत्यत्र षष्ठ्येव तद्वाचिका । किञ्च परशब्दस्यावय-ववाचकत्वे 'अनुनासिकात्परोऽनुस्वार' इति सूत्रेण विहितस्यावयवत्वे मानाभाव इति ग्रन्थासङ्ग-तिश्च । किञ्च प्रत्ययविधायकेषु परश्चेत्यस्याधिकारात्सर्वेषामेव प्रत्ययानाम-वयवत्वापत्तिः । यदि चावयववाच्येकः परशब्दः पञ्चमीप्रयोजको दिग्वाचकश्चापरः परशब्द इति प्रत्ययविधायकेषु पञ्चमीदर्शनात् दिग्वाचक एव परशब्द इति प्रत्ययानां नावयवत्वापत्तिरिति विभाव्यते तदा प्रकृतेऽपि 'अन्त्यादितिपञ्चमीदर्शनेन दिग्वाचकत्वनिर्णयात् परशब्देनावयवत्वप्रतीत्यसम्भवेन तदर्थमेकदेशे स्वरितत्व-प्रतिज्ञयाऽन्तपदानुवृत्तिरावशियकेति प्रकृतिसूत्रस्थमुरण्रपर इति सूत्रस्थञ्च भाष्यं नैकदेशिन इति प्रतीमः ।

(भाष्यम्)

कश्चात्र विशेषः ? ।

(३१३-दूषणवार्तिकम्-४)

।।*।। अभक्ते दीर्घनलोपस्वरणत्वाऽनुस्वारशीभावाः ।।*।।

(भाष्यम्)

यद्यभक्तो दीर्घत्वं न प्राप्नोति । कुण्डानि वनानि । "नोपधायाः सर्वनामस्थाने चाऽसंबुद्धौ" इति दीर्घत्वं न प्राप्नोति ।। – दीर्घ ।।

विमला - अभक्त इति । भावप्रधानो निर्देशः । नुमोऽनवयवत्वे इत्यर्थः । **शीभाव इति** । न सिद्ध्यन्तीतिशेषः । **दीर्घत्वं न प्राप्नोतीति** । नुमोऽनवयवत्वेन तद्विशि-ष्टस्याङ्गग्रहणेनाग्रहणादङ्गस्यानान्तत्वेन दीर्घाप्राप्तिरिति भावः । न च नुमोऽङ्गभक्तत्वेऽपि

यदागमपरिभाषयैवाङ्गत्वमुपपादनीयमिति साम्यमेवेति वाच्यम्, यदागमपरिभाषायाः लौकिकत्वेन तत्संस्मरणे बहुतरमनःप्रणिधानस्य नावश्यकता । तदादिवचनं स्यादिनुमर्थमिति वचनस्य शास्त्रीयत्वेन तत्स्मरणे बहुतरमनःप्रणिधानस्यावश्यकतेतिगौरवस्य दुरुद्धरत्वात् । एवञ्च वार्तिके दीर्घग्रहणमभक्तत्वे गौरवप्रदर्शनार्थम्, न तु लक्ष्यासिद्धिप्रदर्शनार्थमित्यवधेयम् ।

(नलोपोदाहरणभाष्यम्)

नलोप—नलोपश्च न सिध्यति । 'अग्ने त्री ते वाजिना त्री षधस्था ता ता पिण्डानाम्' 'नलोपः प्रातिपदिकान्तस्य' इति नलोपो न प्राप्नोति ।। – नलोप ।।

विमला - नलोपो न सिद्ध्यतीति । नकारस्य प्रातिपदिकान्तत्वाभावादिति भावः । न च नकारविशिष्टस्य पुनः प्रातिपदिकसंज्ञायाम् नकारस्य प्रातिपदिकान्तत्वं सम्भवति, न च पुनः प्रातिपदिकसंज्ञायां तद्विशिष्टात्स्वाद्युत्पत्तिरिति वाच्यम्, पूर्वोत्पन्नविभक्त्यैव तदर्थनिष्ठसंख्याया उक्तत्वेन 'उक्तार्थाना' मिति निषेधेन विभक्त्युत्पत्त्यसम्भवादितिवाच्यम्, तथासति प्रतिपत्तिगौरवापत्तेः । एवञ्च वार्तिके नलोपग्रहणमपि गौरवप्रदर्शनार्थमेवेति बोध्यम् ।

(स्वरोदाहरणभाष्यम्)

स्वर—स्वरश्च न सिध्यति । 'सर्वाणि ज्योतींषि' । "सर्वस्य सुपि" इत्याद्युदात्तत्वं न प्राप्नोति । – स्वर ।।

विमला - स्वरश्च न सिद्ध्यतीति । इदमपि न लक्ष्यासिद्धिप्रदर्शनार्थम् । सौवरीणां[१] सप्तमीनां तदन्तसप्तमीत्वस्यैव सिद्धान्तितत्वात् किन्तु तदन्तसप्तमीत्वाभावेऽपि 'सर्वाणि, ज्योतींषी' त्यादौ 'सर्वस्य सुपी' त्युदात्तत्वं सम्भवति । अभक्तत्वे तु न सम्भवतीति विशेषप्रदर्शनार्थमेवेति बोध्यम् ।

---

१. स्वरसम्बन्धिनीनाम् ।

(णत्वोदाहरणभाष्यम्)

णत्व—णत्वं च न सिध्यति । माषवापाणि व्रीहिवापाणि । पूर्वान्ते प्रातिपदिकान्तनकारस्येति सिद्धम्, परादौ विभक्तिनकारस्येति । अभक्ते नुमो ग्रहणं कर्तव्यम् ।

(उदाहरणनिरासभाष्यम्)

न कर्तव्यम् । क्रियते एतन्न्यास एव–"प्रातिपदिकान्तनुम्विभक्तिषु च" इति । – णत्व ।।

विमला - क्रियते एतन्न्यास एवेति । ननु नुमोऽभक्तत्वेऽपूर्वम्प्रातिपदिकान्तेतिसूत्रे नुम्ग्रहणम्, भक्तत्वे त्वनुवादकमिति लाघवमस्तीति चेदुच्यते — नुमः पूर्वान्तत्वेऽपि प्रातिपदिकान्तेतिसूत्रे गर्गाणां भगिनी गर्गभगिनीत्यत्र णत्ववारणायोत्तरपदं यत्प्रातिपदिकन्तदन्तो यो नकार इत्यर्थस्यैव स्वीकरणीयतया व्रीहिवापाणीत्यत्रोत्तरपदं वापेति, न तदन्तो नकार इति नुमोग्रहणस्यावश्यकत्वम् । परादित्वपक्षेऽपि प्रहिण्वन्नित्यत्र णत्वार्थं नुम्ग्रहणं कर्तव्यमेवेति न किञ्चिल्लाघवम् । एवञ्च वार्तिके णत्वग्रहणमपि न लक्ष्यासिद्धिप्रदर्शनार्थमिति बोध्यम् ।

(अनुस्वारोदाहरणभाष्यम्)

अनुस्वारश्च न सिध्यति । द्विषंतपः परंतपः । "मोऽनुस्वारो हलि" इत्यनुस्वारो न प्राप्नोति ।। –अनुस्वार ।।

(उदाहरणबाधकभाष्यम्)

मा भूदेवम् । "नश्चाऽपदान्तस्य झलि" इत्यनुस्वारो[१] भविष्यति ।।

(उदाहरणान्तरभाष्यम्)

---

१. इत्येवं भविष्यतीति क्वचित् ।

यस्तर्हि न झल्परः—वहंलिहो गौः, अभ्रंलिहो वायुः ।। –अनुस्वार ।।

(शीभावोदाहरणभाष्यम्)

शीभाव–शीभावश्च न सिध्यति । त्रपुणी जतुनी तुम्बुरुणी । 'नपुंसकादुत्तरस्यौङः शीभावो भवती'ति शीभावो न प्राप्नोति ।। – शीभाव ।।

विमला - शीभावो न प्राप्नोतीति । वार्तिके स्वरानुस्वारशीभावानामेव ग्रहणम् । नुमोऽभक्तत्वे 'सर्वाणि ज्योतींषि' 'वहंलिहो गौः' 'त्रपुणी'त्यादिलक्ष्यासिद्धिप्रदर्शनार्थमित्यवगन्तव्यम् ।

(परादिपक्षाभ्युपगमभाष्यम्)

एवं तर्हि परादिः करिष्यते ।

(३१४-परादिपक्षे दूषणवार्तिकम्-५)

।।।। परादौ गुणवृद्ध्यौत्वदीर्घनलोपानुस्वारशीभावे नकारप्रतिषेधाः ।।*।।*

(भाष्यम्)

[1]यदि परादिर्गुणः प्रतिषेध्यः–त्रपुणे जतुने तुम्बुरुणे । "घेर्ङिति" इति गुणः प्राप्नोति ।। –गुण ।।

(वृद्ध्युदाहरणभाष्यम्)

वृद्धि—वृद्धिः प्रतिषेध्या—अतिसखीनि ब्राह्मणकुलानि । "सख्युरसम्बुद्धौ" इति णित्त्वे "अचो ञ्णिति" इति वृद्धिः प्राप्नोति ।। –वृद्धि ।।

---

१. उपर्युक्तवार्तिकमत्र लुप्तं स्यात् ।

(औत्वोदाहरणभाष्यम्)

औत्व—औत्त्वं च प्रतिषेध्यम् । त्रपुणि जतुनि तुम्बुरुणि । 'इदुद्भ्यामौदच्च घेः'' इत्यौत्त्वं प्राप्नोति ।। -औत्व ।।

(दीर्घोदाहरणभाष्यम्)

दीर्घ—दीर्घत्वं च न सिध्यति । कुण्डानि वनानि ''नोपधायाः सर्वनामस्थाने चासंबुद्धौ'' इति दीर्घत्वं न प्राप्नोति ।।

(उदाहरणनिरासभाष्यम्)

मा भूदेवम् । ''अतो दीर्घो यञि सुपि च'' इत्येवं भविष्यति ।।

(उदाहरणान्तरभाष्यम्)

इह तर्हि—अस्थीनि दधीनि प्रियसखीनि ब्राह्मणकुलानि ।। -दीर्घ ।।

(नलोपोदाहरणभाष्यम्)

नलोप—नलोपश्च न सिध्यति । 'अग्ने त्री ते वाजिना त्री षधस्था ता ता पिण्डानाम्' । ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपो न प्राप्नोति ।। -नलोप ।।

(अनुस्वारोदाहरणभाष्यम्)

अनुस्वार-अनुस्वारश्च न सिध्यति, द्विषन्तपः परन्तपः । ''मोऽनुस्वारो हलि'' इत्यनुस्वारो न

(उदाहरणनिरासभाष्यम्)

मा भूदेवम् ।। "नश्चाऽपदान्तस्य झलि" इत्यनुस्वारो भविष्यति ।।

(उदाहरणान्तरभाष्यम्)

यस्तर्हि न झल्परः—वहंलिहो गौः, अभ्रंलिहो वायुः ।। -अनुस्वार ।।

(उदाहरणभाष्यम्)

शीभावे नकारप्रतिषेधः—शीभावे नकारस्य प्रतिषेधो वक्तव्यः । त्रपुणी जतुनी तुम्बुरुणी । सनुमकस्य शीभावः प्राप्नोति ।।

विमला - नकारस्येति । नुम्विशिष्टस्य स्थानित्वप्रतिषेधो वक्तव्य इत्यर्थः ।

(उदाहरणनिरासभाष्यम्)

नैष दोषः, 'निर्दिश्यमानस्यादेशा भवन्ति' इत्येवं न भविष्यति ।।

(उदाहरणसाधकभाष्यम्)

यस्तर्हि निर्दिश्यते तस्य न प्राप्नोति ।।

कस्मात् ? नुमा व्यवहितत्वात् ।।

विमला - नुमा व्यवहितत्वादिति । निर्दिश्यमानस्यौकारस्य नुमा व्यवधानाच्छीभावो न प्राप्नोतीति भावः ।

(पूर्वान्तपक्षाभ्युपगमभाष्यम्)

एवं तर्हि पूर्वान्तः करिष्यते ।

(३१५-पूर्वान्तपक्षे दूषणवार्तिकम्-६)

।।*।। पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च ।।*।।

(भाष्यम्)

यदि पूर्वान्तः क्रियते, नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च न सिध्यति ।।

(उदाहरणभाष्यम्)

नपुंसकोपसर्जनह्रस्वत्वम्—आराशस्त्रिणी धानाशष्कुलिनी निष्कौशाम्बिनी निर्वाराणसिनी ।।

द्विगुस्वर—पञ्चारत्निनी दशारत्निनी । नुमि कृते अनजन्तत्वादेते विधयो न प्राप्नुवन्ति ।।

विमला - पूर्वान्तत्वे इति । पूर्वस्य समुदायस्य चरमावयवत्वे इत्यर्थः । परग्रहणं कुर्वतः सूत्रकृतोऽप्ययमेव पक्षः संमतः । अन्यथा मिदचोऽन्त्यस्येत्येव वदेदिति बोध्यम् ।

द्विगुस्वर इति । 'इगन्तकालकपालभगालशरावेषु द्विगौ' इति सूत्रेणेगन्ताद्यन्यतरपदेषु परेषु पूर्वपदस्य प्रकृतिस्वरविधायकेन विहितः स्वर इत्यर्थः । उत्तरपदस्येगन्तत्वाभावादित्यभिमानः ।

(३१६-दूषणबाधकवार्तिकम्)

।।*।। न वा बहिरंगलक्षणत्वात् ।।*।।

(भाष्यम्)

न वा एष दोषः ।। किं कारणम् ?

'बहिरङ्गलक्षणत्वात्' ।

बहिरङ्गो नुम्, अन्तरङ्गा एते विधयः ।।

'असिद्धं बहिरङ्गमन्तरङ्गे' ।।

द्विगुस्वरे भूयान् परिहारः- संघातभक्तोऽसौ नोत्सहतेऽवयवस्येगन्ततां विहन्तुमिति कृत्वा द्विगुस्वरो भविष्यति ।। –मिदचोऽन्त्यात्परः ।।४६।।

(इत्यागमस्थितिदेशनिर्णयप्रकरणम्)

(अथादेशनियामकप्रकरणम्)

(परिभाषासूत्रम्)

एच इग्घ्रस्वादेशे ।।१।१।४७।।

(सूत्रारम्भप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थमिदमुच्यते ?

विमला - किमर्थमिति । एचः समाहारवर्णत्वादुत्तरभूयस्त्वाच्चेगेव ह्रस्वः स्यादिति सूत्रं किमर्थमिति प्रश्नः ।

(३१७-प्रयोजनवार्तिकम्- १)

।।।। एच इग्वचनं सवर्णाऽकारनिवृत्त्यर्थम् ।।*।।*

(भाष्यम्)

एच इग्भवतीत्युच्यते । सवर्णनिवृत्त्यर्थमकारनिवृत्त्यर्थं च ।। सवर्णनिवृत्त्यर्थं तावत्–एङो ह्रस्वादेशशासनेषु अर्द्ध एकारोऽर्द्ध ओकारो वा मा भूदिति ।। अकारनिवृत्त्यर्थं च — इमावैचौ समाहारवर्णौ मात्राऽवर्णस्य, मात्रेवर्णोवर्णयोः । तयोर्ह्रस्वशासनेषु कदाचिदवर्णः[१] स्यात् कदाचिदिवर्णोवर्णौ । मा कदाचिदवर्णं भूदित्येवमर्थमिदमुच्यते ।

---

१. क्वचिदवर्णमिति ।

अस्ति प्रयोजनमेतत् ।।

किं तर्हीति ?

विमला - मा कदाचिदवर्णं भूदिति । विनगमनाविरहादित्यादि: । वार्तिकृदुक्तमैचोश्चोत्तरभूयस्त्वन्तु न 'विनिगमकम्, **प्लुतावैच इदुतावि**'तिसूत्रे समविभागस्य भाष्यकृता व्यवस्थापितत्वात् । तथाहि—'इमावैचौ समाहारवर्णौ मात्रा अवर्णस्य मात्रा इवर्णोवर्णयोरिति तयो: प्लुत उच्यमान: उभयवृद्धि: प्राप्नोति तद्यथा गर्भो वर्द्धमान: सर्वाङ्गपरिपूर्णो वर्द्धते । अस्तिप्रयोजनमेतत् । किन्तर्हीति । तत्रायथेष्टप्रसङ्ग: । तत्रायथेष्टम्प्रसज्येत । चतुर्मात्र: प्लुत: प्राप्नोति । सिद्धन्त्विदितो दीर्घवचनात् । सिद्धमेतत् । कथम् ? । इदुतोर्दीर्घो भवतीति वक्तव्यम् । तदेतत्कथं कृत्वा सिद्धम्भवति । यदि सम: प्रविभाग: मात्रा अवर्णस्य मात्रा इवर्णोवर्णयो:, अर्द्धचतुर्थमात्र: प्राप्नोति सूत्रञ्चभिद्यते । यथान्यासमेवास्तु । ननु चोक्तम् तत्रायथेष्टप्रसङ्ग इति । तत्र सौर्यभगवतोक्तमनिष्टिज्ञो वाडव: इति—इष्यते एव चतुर्मात्र: प्लुत:' इति । अतएव शेखरेऽनिग्व्यावृत्त्यर्थकत्वं सूत्रस्येत्युक्तम् । इत ऊर्ध्वं सर्वंभाष्यम् वार्तिकानुरोधेनैव प्रवृत्तमित्यवगन्तव्यम् ।

(अनिष्टापत्तिनिराकरणाधिकरम्)

(३१८-आक्षेपवार्तिकम्-२)

।।*।। दीर्घप्रसंगस्तु ।।*।।

(भाष्यम्)

दीर्घास्त्विक: प्राप्नुवन्ति ।।

किं कारणम् ? स्थानेऽन्तरतमो भवतीति ।।

विमला - दीर्घास्त्विक: प्राप्तुवन्तीति । स्वतन्त्रमिदं विधायकं न तु नियामकमितिभाव: ।

(आक्षेपबाधकभाष्यम्)

ननु च ह्रस्वादेश इत्युच्यते, तेन दीर्घा न भविष्यन्ति ॥

(आक्षेपसाधकभाष्यम्)

विषयार्थमेतत् स्यात्—एचो ह्रस्वप्रसङ्गे इग्भवतीति ॥

विमला - विषयार्थमेतत्स्यादिति । एतत्सूत्रस्य प्रवृत्तिविषयव्यवस्थार्थमित्यर्थः ।

(३१९-समाधानवार्तिकम्-३)

॥॥ दीर्घाऽप्रसंगस्तु निवर्तकत्वात् ॥*॥*

(भाष्यम्)

दीर्घाणां त्विकामप्रसङ्गः । किं कारणम् ?

'निवर्तकत्वात्' । नाऽनेनेको निर्वर्त्यन्ते ।

किं तर्हि ?

अनिको निवर्त्यन्ते[१] ॥ सिद्धा ह्यत्र ह्रस्वा इकश्चाऽनिकश्च । तत्रानेनाऽनिको निवर्त्यन्ते ॥

विमला - निर्वर्त्यन्त इति । निष्पाद्यन्त इत्यर्थः । अनिको निवर्त्यन्त इति । व्यावर्त्यन्त इत्यर्थः । नियामकमिदं शास्त्रमितिभावः ।

(सूत्रप्रत्याख्यानाधिकरणम्)

(प्रथमप्रयोजनप्रत्याख्यानभाष्यम्)

सवर्णनिवृत्त्यर्थेन तावन्नार्थः ।

(२३१-प्रत्याख्यानसाधकवार्तिकम्-४)

---

१. 'निवर्त्तन्ते' इति क्वचित् ।

।।*।। सिद्धमेङः सस्थानत्वात् ।।*।।

(भाष्यम्)

सिद्धमेतत् ।। कथम् ?

'एङः सस्थानत्वाद्' इकारोकारौ भविष्यतः; अर्द्ध एकारोऽर्द्ध[1] ओकारो वा न भविष्यति ।।

(आक्षेपभाष्यम्)

ननु च एङः सस्थानतरावर्द्धैकारार्द्धौकारौ ।।

(समाधानभाष्यम्)

न तौ स्तः । यदि हि तौ स्यातां तावेवाऽय-मुपदिशेत् ।।

विमला - अयमिति । पाणिनिरित्यर्थः ।

(समाधानबाधकभाष्यम्)

ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्द्धमेकारमर्द्धमोकारं चाधीयते-'सुजाते एश्वसूनृते' 'अध्वर्यो ओद्रिभिः सुतम्' 'शुक्रन्ते एन्यत्' 'यजतं ते एन्यत्' इति[2] ।।

विमला - छन्दोगानामिति । निर्द्धारणे षष्ठी । सात्यमुग्रिराणायनीयेति । सामवेदस्य शाखा-सात्यमुग्रिरिति, राणायनीयेति च । बहुवचनन्तु अध्येतृव्यक्त्यभिप्रायम् ।

(समाधानसाधकभाष्यम्)

---

१. 'वर्द्धेकारोकारौ' इति क्वचित् ।

२. अत्र भाष्ये 'एअश्व' (एश्व), 'ओ अद्रिभिः' (ओद्रिभिः), 'एअन्यत्' (एन्यत्) चेति पाठान्तराणि ।

पार्षदकृतिरेषा तत्र भवताम् । नैव लोके नाऽन्यस्मिन्वेदे — अर्ध एकारः, अर्ध ओकारो वास्ति ।।

(द्वितीयप्रयोजनप्रत्याख्यानभाष्यम्)

अकारनिवृत्त्यर्थेनाऽपि नार्थः ।

(३२१-प्रत्याख्यानसाधकवार्तिकम्-५)

।।।। ऐचोश्चोत्तरभूयस्त्वात् ।।*।।*

(भाष्यम्)

ऐचोश्चोत्तरभूयस्त्वादवर्णो न भविष्यति । भूयसी मात्रेवर्णोवर्णयोः, अल्पीयस्यवर्णस्य । भूयस एव ग्रहणानि भविष्यन्ति । तद्यथा 'ब्राह्मणग्राम आनीयताम्' इत्युच्यते । तत्र चाऽवरतः पञ्चकारुकी भवति ।। —एच इग्घ्रस्वादेशे ।

(परिभाषासूत्रम्)

षष्ठी स्थानेयोगा ।।१।१।४८।।

(स्थानेयोगशब्दार्थनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

किमिदम्—स्थानेयोगेति ?

विमला - किमदं स्थानेयोगेति । स्थाने योगेति कथं सिद्ध्यतीत्यर्थः । समासे विभक्तेः श्रवणाप्रसङ्गः । असमासे योगेत्यस्य षष्ठीतिस्त्रीलिङ्गविशेषणत्वेन स्त्रियाम-कर्तरि च कारके संज्ञायामिति प्राप्तं घञं बाधित्वा क्तिनि युक्तिरिति भवितव्यं, न तु योगेति प्रश्नाशयः । यद्यप्ययं दोषः समासपक्षेऽपि सम्भवति तथापि समासे विभक्तेः श्रवणाप्रसङ्गोऽपीति बोध्यम् ।

(समाधानभाष्यम्)

स्थाने योगोऽस्याः सेयं स्थानेयोगा । सप्तम्यलोपो निपातनात् ।। तृतीयाया वा एत्वम् । स्थानेन योगोऽस्याः सेयं स्थानेयोगेति ।

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते ?

(३२२-समाधानवार्तिकम्-१)

।।।। [1]षष्ठी स्थानेयोगवचनं नियमार्थम् ।।*।।*

(भाष्यम्)

[2]नियमार्थोऽयमारम्भः । एकशतं षष्ठ्यर्थाः, यावन्तो वा सन्ति ते सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवन्ति । इष्यते च—व्याकरणे या षष्ठी सा स्थानेयोगैव स्यादिति । तच्चान्तरेण यत्नं न सिध्यतीति षष्ठ्याः स्थानेयोगवचनं नियमार्थम् । एवमर्थमिदमुच्यते ।।

विमला - नियमार्थ इति । स्थानपदाध्याहारेण तदर्थप्रतियोगिक-निवर्त्यनिवर्तक-भावरूपसंबन्धार्थिकैवेति नियमलाभार्थमित्यर्थः । अतो न मतुप्सूत्रस्थभाष्यविरोध इति बोध्यम् ।

(काकुभाष्यम्)

---

१. 'षष्ठ्याः' इति क्वचित्, 'स्थाने' इति क्वचिच्च नास्ति ।

२. इतः पूर्वं ''षष्ठीस्थानेयोगवचनं क्रियते, नियमार्थम्'' इत्यधिकम् । अतोगुणेन बाधादपपाठमिदमिति प्राञ्चः ।

अस्ति प्रयोजनमेतत् ।।

किं तर्हीति ?

विमला - अस्ति प्रयोजनमेतदिति । एतत्प्रयोजनार्थमिदमारब्धव्यमित्यर्थः । **किन्तर्हीति** । एतत्प्रयोजनार्थमारब्धेऽस्मिन् सूत्रे को दोष इति जिज्ञासते ।

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(३२३-आक्षेपवार्तिकम्-२)

।।*।। अवयवषष्ठ्यादिष्वतिप्रसंगः शासो गोह इति[१] ।।*।।

विमला - अवयवषष्ठ्यादिष्विति । आदिपदेन 'गापोष्टक्' 'अजाद्यतष्टाप्' इत्यादीनां संग्रहः ।

(भाष्यम्)

अवयवषष्ठ्यादयस्तु न सिध्यन्ति ।।

तत्र को दोषः ? ('शासो गोह इति'[१]) ।।

"शास इदङ्हलोः" इति शासेश्चान्त्यस्य स्यादुपधामात्रस्य च ।। 'उदुपधाया गोहः' इति । गोहेश्चान्त्यस्य स्यादुपधामात्रस्य च ।।

(२२५-आक्षेपबाधकसमाधानवार्तिकम्-३)

।।*।। अवयवषष्ठ्यादीनां चाऽप्राप्तिर्योगस्याऽसंदिग्धत्वात् ।।*।।

(भाष्यम्)

अवयवषष्ठ्यादीनां च नियमस्याऽप्राप्तिः ।।

---

१. 'शासो गोह इति' पाठः क्वचिल्लुप्तः ।

किं कारणम् ? 'योगस्याऽसंदिग्धत्वात्' ।

संदेहे नियमः । न चावयवषष्ठ्यादिषु संदेहः ।।

विमला - योगस्येति । षष्ठ्यर्थसंबन्धस्येत्यर्थ: । **सन्देहे नियम इति** । आकांक्षा-पूर्वकत्वान्नियमस्येतिभाव: । पाक्षिकप्राप्तिकबाधेनैवोपपत्तौ नियतप्राप्तिकबाधे गौर-वमितिभाव: । **न चावयवषष्ठ्यादिषु सन्देह इति** । उपधादिपदसन्निधानेनावयवषष्ठी-त्वनिर्णयादिभाव: ।

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत् ?

(समाधानभाष्यम्)

नहि ।।

कथमनुच्यमानं गंस्यते ?

लौकिकोऽयं दृष्टान्तः । तद्यथा लोके-कश्चित् कंचित् पृच्छति-ग्रामान्तरं गमिष्यामि, पन्थानं मे भवानुप-दिशत्विति । स तस्मायाचष्टे-अमुष्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्यः, अमुष्मिन्नवकाशे हस्तवाम इति । यस्तत्र तिर्यक्पथो भवति, न तस्मिन् संदेह इति कृत्वा नासावुपदिश्यते । एवमिहापि संदेहे नियमः । न चावयवषष्ठ्यादिषु संदेहः ।।

[1]अथवा स्थाने अयोगा स्थानेयोगा ।।

किमिदमयोगेति ? अव्यक्तयोगा अयोगा ।

(समाधानान्तरभाष्यम्)

---

१. इत: पूर्वं "स्थानेऽयोगा स्थानेयोगा वा" इति वार्तिकं लुप्तं स्यात् ।

[1]अथवा—योगवती योगा ।।

का पुनर्योगवती ? यस्या बहवो योगाः ।।

कुत एतत् ?

भूम्नि हि मतुब् भवति ।।

(३२५-आक्षेपबाधकवार्तिकम्-४)

।।*।। विशिष्टा वा षष्ठी स्थानेयोगा ।।*।।

(भाष्यम्)

अथ वा किंचिल्लिङ्गमासज्य वक्ष्यामि—इत्थंलिङ्गा षष्ठी स्थानेयोगा भवतीति ।। न च तल्लिङ्गमवयवषष्ठ्यादिषु करिष्यते ।।

(आक्षेपभाष्यम्)

यद्येवं, "शास इदङ्हलोः" "शाहौ" शासिग्रहणं कर्तव्यम्—स्थानेयोगार्थं लिङ्गमासङ्क्ष्यामीति ।।

विमला - एवमिति । लिङ्गासङ्गस्य स्थाने योगत्वनियामकोक्तावित्यर्थः । **'शास इदङ् हलोः' 'शाहावि' ति** । शास इदङ्हलोरितिसूत्रे उपधापदानुवृत्तौ तत्सन्निधानेन शासोऽवयवषष्ठीत्वनिर्णयात् स्थानेयोगत्वाभावेऽपि शाहावितिसूत्रे तस्यैवानुवृत्तावपि उपधापदानुवृत्त्यभावेनावयवषष्ठीत्वानिर्णयात् स्थानेयोगत्वम्भवतीति शाहावितिसूत्रे शासिग्रहणं न कर्तव्यम् । इदानीम् शास इदङ् हलोरितिसूत्रे शासोऽवयवषष्ठीत्वाल्लिङ्गासञ्जनाभावेन तदनुवृत्तौ शाहावितिसूत्रेऽपि स्थानेयोगत्वं न स्यात्, अतः शाहावितिसूत्रे स्थानेयोगत्वनियामकलिङ्गासञ्जनार्थं शासिग्रहणं कर्तव्यमितिभावः ।

(आक्षेपबाधकभाष्यम्)

---

१. इतः पूर्वं "योगवती वा योगा" इति वार्तिकं लुप्तं स्यात् ।

न कर्तव्यम् । यदेवाऽदः पुरस्तादवयवषष्ठ्यर्थं प्रवृत्तम् एतदुत्तरत्राऽनुवृत्तं सत् स्थानेयोगार्थं भविष्यति ।।

कथम् ?

अधिकारो[1] नाम त्रिप्रकारः ।

कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति, यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति ।।

अपरोऽधिकारो यथा रज्ज्वा अयसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण ।।

अपरोऽधिकारः प्रतियोगं तस्याऽनिर्देशार्थ इति योगे योगे उपतिष्ठते[2] ।।

तद्यदेष पक्षः—अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति । तदा हि यदेवाऽदः पुरस्तादवयवषष्ठ्यर्थम्, एतदुत्तरत्रानुवृत्तं सत् स्थानेयोगार्थं भविष्यति ।।

विमला - तद्वदनुकृष्यत इति । अस्य स्वरितत्वप्रतिज्ञां विनापीत्यादिः ।

(आक्षेपभाष्यम्)

संप्रत्ययमात्रमेतद् भवति । नह्यनुच्चार्य शब्दं लिङ्गं शक्यमासङ्क्तुम् ।।

विमला - आसङ्क्तुमिति । संबद्धुमित्यर्थः ।

(आक्षेपबाधकभाष्यम्)

एवं तर्ह्यादिशे तल्लिङ्गं करिष्यते, तत्प्रकृतिमा[3]-स्कन्त्स्यति ।।

---

१. वार्तिकमिदमित्यन्ये । २. क्वचिदुपतिष्ठतीति । ३. क्वचित्प्रकृतमास्कं इति ।

(प्रत्याख्यानभाष्यम्)

यदि नियमः क्रियते यत्रैका षष्ठी अनेकं च विशेष्यं तत्र न सिध्यति । अङ्गस्य हलः अणः संप्रसारणस्येति । हलपि विशेष्योऽणपि विशेष्यः, संप्रसारणमपि विशेष्यम् ।। असति पुनर्नियमे कामचारः—एकया षष्ठ्या अनेकं विशेषयितुम् । तद्यथा—देवदत्तस्य पुत्रः पाणिः कम्बल इति । तस्मान्नार्थो नियमेन ।।

विमला - अण इति । 'हल' इतिसूत्रे 'त्रेः सम्प्रसारणञ्चे'ति निष्पन्ने तृतीयशब्दे सम्प्रसारणस्य ऋकारस्य दीर्घवारणाय 'अण' इत्यनुवर्तते इतिभावः । **हलपि विशेष्य इति** । अस्य अङ्गावयवाद्धलः परं यदङ्गान्त्यावयवाण्रूपं सम्प्रसारणमित्यर्थ इत्यादिः ।

(उक्ताक्षेपस्मारणभाष्यम्)

ननु चोक्तम्—एकशतं षष्ठ्यर्थाः, यावन्तो वा सन्ति, ते सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवन्तीति ।।

(आक्षेपबाधकभाष्यम्)

नैष दोषः, यद्यपि लोके बहवोऽभिसंबन्धा आर्था यौना मौखाः स्रौवाश्चेति[1] । शब्दस्य तु शब्देन कोऽन्योऽभिसंबन्धो भवितुमर्हति—अन्यदतः स्थानात् ।।

(आक्षेपसाधकभाष्यम्)

शब्दस्यापि शब्देनानन्तरादयोऽभिसंबन्धाः अस्तेर्भूर्भवतीति संदेहः स्थाने अनन्तरे समीपे इति ।।

(आक्षेपबाधकभाष्यम्)

१. क्वचित्स्रौना श्रौचा वा । इतिः क्वचिन्न ।

संदेहमात्रमेतद्भवति । सर्वसंदेहेषु चेदमुपतिष्ठते- 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम्' इति । स्थान इति व्याख्यास्यामः ।।

(निर्दिश्यमानपरिभाषाधिकरणम्)

(आक्षेपभाष्यम्)

न तर्हीदानीमयं योगो वक्तव्यः ?

(समाधानभाष्यम्)

वक्तव्यश्च ।। किं प्रयोजनम् ?

षष्ठ्यन्तं स्थानेन यथा युज्येत यतः षष्ठ्युच्चारिता ।।

किं कृतं भवति ?

'निर्दिश्यमानस्यादेशा भवन्ति' इत्येषा परिभाषा न कर्तव्या भवति ।। — षष्ठी स्थानेयोगा-४८ ।।

विमला - षष्ठ्यन्तमिति । अस्य तदित्यादिः । अन्तशब्दः परसमीपबोधकः षष्ठी- अन्तो यस्येति अतद्गुणसंविज्ञानो बहुव्रीहिः । सा षष्ठीप्रकृतिरित्यर्थः । सा केत्याकांक्षायामाह—**यतः षष्ठ्युच्चारितेति** । यस्मात् षष्ठी विहितेत्यर्थः ।

(अन्तरतमपरिभाषासूत्रम्)

स्थानेऽन्तरतमः ।।१।१।४९।।

(सूत्रोदाहरणाधिकरणम्)

(आक्षेपभाष्यम्)

किमुदाहरणम् ?

विमला - किमुदाहरणमिति । अनन्यथासिद्धमुदाहरणं किमित्यर्थः । इकोयणची-

त्यादिकमपि स्थानेन्तरतम इति सूत्रस्यैवोदाहरणं, यथासंख्यसूत्रेण तु न निर्वाहः, ऋवर्णनां लादेशस्य लृवर्णानां रेफादेशस्य च प्रसङ्गादिति कस्यचिन्मतं खण्डयितुमयं प्रश्न इति बोध्यम् ।

(समाधानभाष्यम्)

"इको यणचि" – दध्यत्र मध्वत्र । तालुस्थानस्य तालुस्थानः, ओष्ठस्थानस्य ओष्ठस्थानो यथा स्यादिति ।।

(समाधानबाधकभाष्यम्)

नैतदस्ति । संख्यातानुदेशेनाप्येतत्सिद्धम् ।।

(उदाहरणप्रदर्शकभाष्यम्)

इदं तर्हि—"तस्थस्थमिपां तांतंतामः" इति । एकार्थस्यैकार्थः, द्व्यर्थस्य द्व्यर्थौ, बह्वर्थस्य बह्वर्थौ, यथा स्यादिति[1] ।।

(उदाहरणबाधकभाष्यम्)

ननु च एतदपि संख्यातानुदेशेनैव सिद्धम् ।।

विमला - संख्यातानुदेशेनैव सिद्धमिति । एवञ्च नैतदप्यनन्यथासिद्धमुदाहरणमिति भावः ।

(उदाहरणान्तरभाष्यम्)

इदं तर्हि–"अकः सवर्णे दीर्घः" इति । दण्डाग्रम्, क्षुपाग्रम्, दधीन्द्रः, मधूष्ट्रः[2] । कण्ठस्थानयोः कण्ठस्थानस्तालुस्थानयोस्तालुस्थान ओष्ठस्थानयोरोष्ठस्थानो यथा स्यात्[3] ।।

---

१. इतिः क्वचिन्न । २. मधूष्णः । ३. 'स्यादिति' क्वचित् ।

(यत्रानेकविधपरिभाषासाधनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ स्थान इति वर्तमाने पुनः स्थानग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

यत्राऽनेकविधमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात् ।।

किं पुनस्तत् ?

चेता स्तोता । प्रमाणतोऽकारो गुणः प्राप्नोति, स्थानत एकारौकारौ । पुनः स्थानग्रहणादेकारौकारौ भवतः ।।

विमला - 'यत्रानेकविधमान्तर्य्यं तत्र स्थानत एवान्तर्यं बलीयः' इति । यस्मिन् लक्ष्ये अनेकप्रकारकं सादृश्यम् स्थानिभिः सह आदेशानामादेशनियामकतया प्रसक्तं तस्मिन् लक्ष्ये स्थानघटितधर्मेण सादृश्यमेव फलोत्पादनियामकमित्यर्थः । नन्वनेकविधान्तर्यस्यादेशनियामकत्वे किम्मानम्, न तावत्स्थाने इत्यनुवर्तमाने पुनः स्थानेग्रहणमेव । अनुवृत्तप्रसङ्गवाचिस्थानशब्देन अत्रत्य ताल्वादिवाचितृतीयार्थकसप्तम्यन्तस्थानशब्देन च प्रसङ्गे सति स्थानेन सदृशतमो भवतीति विशिष्टार्थस्य लाभेनानेक-विधान्तर्य्यस्यादेशनियामकत्वाप्राप्तेरिति चेदुच्यते—योगविभागज्ञापनद्वारा तमब्ग्रहणमेवानेकविधान्तर्यस्यादेशनियामकत्वे मानम् । तथाहि 'अन्तरतमः' इत्येकम्वाक्यम्पूर्वपठनीयम् । ततः 'स्थाने' इति द्वितीयम् पठनीयम् । तत्र पूर्वस्मिन् वाक्ये स्थाने इत्यनुवर्तते प्रसङ्गे सतीति तस्यार्थः । तथाच । प्रसङ्गे सति सदृशतमो भवतीति पूर्ववाक्यस्यार्थः । द्वितीये स्थाने इति वाक्ये पूर्वसूत्रादनुवृत्तं स्थाने इति अन्तरतमः इति चानुवर्तते । अत्रत्यं स्थाने इति स्थानेनेत्यर्थकम् । तथाच प्रसंगे सति स्थानघटितधर्मेण सदृशतमो भवतीति द्वितीयवाक्यस्यार्थः । पूर्ववाक्येनैव स्थानघटितधर्मेण

सदृशस्यापि विधानसम्भवात् द्वितीयम्वाक्यं नियमार्थम्–**स्थानेनैव सदृशतमो भवतीति** । योगविभागसामर्थ्येन पूर्ववाक्येन स्थानघटितधर्मातिरिक्तधर्मेण सादृश्यस्याप्यादेशनियामकत्वमिति लभ्यते । एवञ्च परिभाषायां यत्रानेकविधमान्तर्य्यमित्यंशस्य तमब्ग्रहणं ज्ञापकं, स्थानत आन्तर्य्यं बलीय इत्यंशस्य स्थानेग्रहणमित्यवधेयम् । न च सादृश्ये अतिशयलाभार्थं तमब्ग्रहणमावश्यकम्, अन्यथा लाकृतिरित्यादौ दन्तस्थानजन्यत्वेन स्थानघटितधर्मेण लृकारसादृश्यम् लकारस्येव वकारस्याप्यस्तीति लृकारस्य कदाचिद्वकारोऽपि यण् प्रसज्येत । तमब्ग्रहणसत्त्वे तु अतिशयसादृश्यस्यैवादेशनियामकत्वेन स्ववृत्तित्व-स्वघटितदलघटकस्वेतरावृत्तित्वोभयसम्बन्धेन सादृश्यानुयोगित्वेन विवक्षितविशिष्टधर्मसाधारणधर्मकत्वस्यैव सादृश्यवृत्त्यतिशयपदार्थतया दन्तस्थानमात्रजन्यत्वस्यैव तादृशधर्मतया वकारे ओष्ठस्थानजन्यत्वस्यापि सत्त्वेन दन्तस्थानमात्रजन्यत्वाभावेन लृकारस्यातिशयसादृश्याभावेन नापत्तिरितिवाच्यम्, एवमपि समानं स्थानं यस्येत्यर्थकं सस्थानमित्येव सिद्धे अन्तरग्रहणसामर्थ्यादन्तरतम इत्यर्थस्य लाभसम्भवेन तमब्ग्रहणवैयर्थ्यस्य तादवस्थ्यात् । वाक्यभेदे ज्ञापिते तु पूर्ववाक्यस्य प्रसंगे सति सदृशतमो भवतीत्यर्थेन अर्थकृतगुणकृतप्रमाणकृतसदृशानां विधानलाभायान्तरग्रहणस्य चारितार्थ्येन अन्तरग्रहणसामर्थ्येनातिशयार्थस्य लाभासम्भवेन अतिशयलाभार्थं तमपो ग्रहणमावश्यकमिति बोध्यम् ।

(तमग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ तमग्रहणं[1] किमर्थम् ?

विमला - तमब्ग्रहणं किमर्थमिति । अनेकविधान्तर्यस्यादेशनियामकत्वे किम्फलमिति प्रश्नतात्पर्यम् ।

(समाधानभाष्यम्)

"झयो होऽन्यतरस्याम्" इत्यत्र 'सोष्मणः

१. विमलायां 'तमब्ग्रहणम्' इति ।

सोष्माणः' इति द्वितीयाः प्रसक्ताः, 'नादवतो नादवन्तः' इति तृतीयाः प्रसक्ताः ।। तमग्रहणाद्यो सोष्माणो नादवन्तश्च ते भवन्ति चतुर्थाः–वाग्घसति त्रिष्टुब्भसति[1] ।।

विमला - सोष्मण इति । ऊष्मत्वविशिष्टस्येत्यर्थः । हस्येतिशेषः । **सोष्माण इति** । ऊष्मत्वविशिष्टाः । **द्वितीयाः** । वर्गद्वितीयाः खछठथफाः । अस्य प्राप्नुवन्तीतिशेषः ।

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनमिदमुच्यते ?

विमला - किमर्थम्पुनरिदमुच्यते । किमनेन व्यावर्त्यमिति प्रश्नतात्पर्यम् ।

(३२६-समाधानवार्तिकम्-१)

।।।।स्थानिन एकत्वनिर्देशादनेकादेश-निर्देशाच्च सर्वप्रसङ्गस्तस्मात् स्थानेऽन्तरतमवचनं नियमार्थम्[2] ।।*।।*

(भाष्यम्)

स्थान्येकत्वेन निर्दिश्यते—अक इति । अनेकश्च पुनरादेशः प्रतिनिर्दिश्यते—दीर्घ इति । 'स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च' 'सर्वप्रसङ्गः' । सर्वे सर्वत्र प्राप्नुवन्ति । इष्यते चान्तरतमा एव स्युरिति । तच्चान्तरेण यत्नं न सिध्यति । तस्मात् स्थानेऽन्तरतमवचनं[3] नियमार्थम् ।। एवमर्थमिदमुच्यते ।।

---

१. 'भसतीति' क्वचित् ।

२. नियमार्थमिति क्वचिन्न ।

३. 'अन्तरतम इति वचनं' इति क्वचित् ।

(काक्वाऽभ्युपगमभाष्यम्)

अस्ति प्रयोजनमेतत् ?

किं तर्हीति ?

(अथ प्रथमान्तपाठनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

यथापुनरियमन्तरतमनिर्वृत्तिः, सा किं प्रकृतितो भवति—स्थानिन्यन्तरतमे षष्ठीति । आहोस्विदादेशतः— स्थाने प्राप्यमाणानामन्तरतम आदेशो भवतीति ?

कुतः पुनरियं विचारणा ?

उभयथा हि[1] तुल्या संहिता "स्थानेऽन्तरतम उरण् रपरः" इति ॥

विमला - यथापुनरिति । अव्ययसमुदायोऽयं येत्यर्थे । **अन्तरतमनिर्वृत्तिरिति** । अन्तरतमशब्दार्थस्य विशेषणत्वेन प्रतिपत्तिरित्यर्थः । **सा किं प्रकृतितो भवतीति** । एतदेव विवृणोति—**स्थानिन्यन्तरतमे षष्ठीतीति** । अस्योपसंहर्तव्येतिशेषः । अयम्भावः । स्थानेऽन्तरतम उरण् रपर इति संहितापाठे अन्तरतम इति प्रथमान्तमपि छेत्तुं शक्यम् सप्तम्यन्तमपि । तत्र यदि सप्तम्यन्तस्यच्छेदः सूत्रे स्थाने इतिपदं तिष्ठन्त्यस्मिन् आदेशा इति व्युत्पत्त्या स्थानिपरम् । षष्ठीति पूर्वसूत्रादनुवर्तते अन्तरतमशब्दार्थस्य नित्यसाकांक्षतया कस्यान्तरतम इत्याकांक्षायामुपस्थितत्वादादेशस्येति गम्यते । तथाच आदेशस्य सदृशतमे स्थानिनि सति षष्ठी उपसंहर्तव्या । अर्थात् षष्ठ्यर्थनिवर्त्यनिवर्तकभावस्य विश्रान्तिः कर्तव्येत्यर्थः । यत्र च षष्ठ्यर्थस्य विश्रान्तिः तस्यैवादेशः अस्मिन् पक्षेऽसदृशतमस्य स्थानिनो व्यावृत्तिरिति ।

---

१. 'उभयथाऽपि' इति क्वचित् ।

अहोश्विदादेशत इति । अथवा संहितापाठे प्रथमान्तं छित्त्वा तदर्थस्यादेशविशेषणत्वमिति प्रश्नतात्पर्यम् । **स्थाने प्राप्यमाणानामिति** । प्रसंगे सति प्रसज्यमानानां मध्ये स्थानिनामन्तरतम आदेशो भवतीत्यर्थः । अस्मिन् पक्षे चाऽसदृशतमस्यादेशस्य व्यावृत्तिः ।

(भाष्यम्)

किं चातः ?

(सप्तम्यन्तपाठदूषणभाष्यम्)

यदि प्रकृतितः— "इको यणचि" इति[1] यणां[2] येऽन्तरतमा इकस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्यात्—दध्यत्र, मध्वत्र । कुमार्यर्थं[3], ब्रह्मबन्ध्वर्थमित्यत्र न स्यात् ।। आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी । यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवति[4] ।।

विमला - दध्यत्र मध्वत्रेति । अयम्भावः । इकोयणचीत्यादौ इग्निवर्तको यणिति सूत्रार्थेऽपि स्थानेऽन्तरतमपरिभाषया षष्ठ्यर्थनिवर्तकतायाः मात्राद्वयन्यूनकालिकत्वेन यणः सदृशतमे ह्रस्वेकारादावेव विश्रान्तिरिति ह्रस्वेकारादि-निवर्तकत्वमेव यणः स्यादिति । **न स्यादिति** । मात्राद्वयन्यूनकालिकत्वेन विसदृशत्वादितिभावः । **सर्वत्रेति** । दीर्घादावपीत्यर्थः । **षष्ठीतीति** । षष्ठ्यर्थस्य विश्रान्तिरित्यर्थः ।

(सप्तम्यन्तपाठदूषणान्तरभाष्यम्)

तथा "इको गुणवृद्धी", गुणवृद्ध्योर्ये अन्तरतमा इकस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्यात्— नेता लविता नायको लावकः । चेता स्तोता चायकः

---

१. इति क्वचिन्न । २. क्वचिद् 'यणो ये' इति ।
३. 'कुमार्यत्र' इति क्वचित् । ४. 'भवतीति' क्वचित् ।

स्तावक इत्यत्र न स्यात् ।। आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी । यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवतीति ।।

विमला - स्तावक इत्यत्र न स्यादिति । द्विमात्रिकत्वेन सादृश्याभावादिति भावः ।

(सप्तम्यन्तपाठदूषणान्तरभाष्यम्)

तथा—ऋवर्णस्य गुणवृद्धिप्रसङ्गे गुणवृद्ध्यो-र्यदन्तरतममृवर्ण तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्यात्—कर्ता हर्ता आस्तारकः निपारक इति । आस्तरिता निपरिता कारको हारक इत्यत्र न स्यात् ।। आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी । यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवतीति ।।

(प्रथमान्तपाठदूषणभाष्यम्)

अथादेशतोऽन्तरतमनिर्वृत्तौ सत्यामयं दोषः—"वान्तो यि प्रत्यये" । स्थानिनिर्देशः कर्तव्यः—ओकारौकारयोरिति वक्तव्यम् । एकारैकारयोर्माभूदिति ।। प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यां वान्तादेशस्य एक्षु याऽन्तरतमा प्रकृतिस्तत्र षष्ठी । यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेण स्थानिनिर्देशं सिद्धं भवति ।।

(दूषणोद्धारभाष्यम्)

आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः ।।

कथम् ?

वान्तग्रहणं न करिष्यते—"यि प्रत्यये" । एचोऽयादयो भवन्तीत्येव ।।

(आक्षेपभाष्यम्)

यदि न क्रियते, चेयं जेयमित्यत्रापि प्राप्नोति ।।

(आक्षेपबाधकभाष्यम्)

"क्षय्यजय्यौ शक्यार्थे" इत्येतन्नियमार्थं भविष्यति —'क्षिज्योरेवैच' इति ।।

(आक्षेपसाधकभाष्यम्)

तयोस्तर्हि शक्यार्थादन्यत्रापि प्राप्नोति—क्षेयं पापं जेयो वृषलः इति[1] ।।

(आक्षेपबाधकभाष्यम्)

उभयतो नियमो विज्ञायते[2]—क्षिज्योरेवैचः, तयोश्च[3] शक्यार्थ एवेति ।।

विमला - उभयतो नियम इति । अयम्भावः । क्षय्यजय्यौ शक्यार्थे अत्र योगो विभज्यते 'क्षय्यजय्यौ' इत्येको योगः । 'वान्तोयिप्रत्यये' इत्यनेनैवायादेशे सिद्धेऽयं योगो नियमार्थः । यादौ प्रत्यये धातोरेचश्चेदयादेशस्तर्हि क्षिज्योरेवैचः । ततः शक्यार्थे इति द्वितीयो योगः । अयमपि नियमार्थः क्षिज्योरेचश्चेदयादेशस्तर्हि शक्यार्थ एवेति ।

(इष्टानुपपत्तिभाष्यम्)

इहापि तर्हि नियमान्न प्राप्नोति–लव्यं पव्यम् । अवश्यलाव्यम् अवश्यपाव्यमिति ।।

---

१. इतिः क्वचिन्न ।

२. 'विज्ञास्यते' इति क्वचित् ।

३. 'अनयोश्च' इति क्वचित् ।

(इष्टोपपत्तिभाष्यम्)

तुल्यजातीयस्य नियमः ।।

कश्च तुल्यजातीयः ? यथाजातीयकः क्षिज्योरेच् ।।

कथंजातीयकः क्षिज्योरेच् ? एकारः ।।

विमला - तुल्यजातीयस्य नियम इति । नियमस्य सजातीयापेक्षत्वादितिभावः । **एकार इति** । इदमुपलक्षणं कण्ठतालव्यस्य चेद्भवति क्षिज्योरेवैच इति । नियम इति भावः । एवञ्च लव्यमवश्यलाव्यमित्यादौ नियमेन व्यावृत्त्यभावेन 'यि प्रत्यये' इति सामान्यसूत्रेणावावादेशौ सिद्ध्यतः इति आदेशतोऽन्तरतम निर्वृत्तावपि ओकारौकारयोरिति न वक्तव्यमितिभावः ।

(अनिष्टापत्तिभाष्यम्)

एवमपि[1] रायमिच्छति रैयतीत्यत्र[2] प्राप्नोति ।।

(अनिष्टापत्तिवारणभाष्यम्)

रायिश्छान्दसः । दृष्टानुविधिश्छन्दसि भवति ।।

विमला - रायिश्छान्दस इति । अत्र पदद्वयम् 'रा' इति प्रथमान्तम्, 'यी' ति सप्तम्यन्तम् । रैशब्दः यकारादौ प्रत्यये छान्दस इत्यर्थः । एवञ्चाऽन्यत्र भाषायामपि रैशब्दस्य प्रयोगो भवत्येव । अतएव रायमिच्छतीति विग्रहस्थरैशब्दस्य प्रयोग उपपद्यते । अन्यथा विग्रहस्य छन्दस्त्वाभावेन सोऽसङ्गतः स्यात् । भाष्ये निर्विसर्ग एव पाठ इति कस्यचिन्मतम् । कश्चित्तु 'रायिरि' त्युच्चारणार्थेकारेणैकमेव प्रथमान्तम् पदं निर्दिष्टमिति वदति । परन्त्वेतस्मिन्मते रायमिच्छतीति भाष्यप्रयोगविरोधो दुष्परिहर इति बोध्यम् ।

(प्रथमान्तपाठे दूषणान्तरभाष्यम्)

---

१. केचिदिदं नेच्छन्ति । २. क्वचित् 'रैयत्यत्रापि' ।

"ऊदुपधाया गोहः" । [1]आदेशतोऽन्तरतमनिर्वृत्तौ सत्यामुपधाग्रहणं कर्तव्यम् ।। प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यामूकारस्य गोहो याऽन्तरतमा प्रकृतिस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेणोपधा ग्रहणं सिद्धं भवति ।।

(दूषणोद्धारभाष्यम्)

आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः । क्रियते एतन्न्यास[2] एव ।।

विमला - क्रियते एतन्न्यास एवेति । स्थानितोऽन्तरतमनिर्वृत्तावपि उपधाग्रहणमावश्यकमेवेति भावः ।

(प्रथमान्तपाठे दूषणान्तरभाष्यम्)

"रदाभ्यां निष्ठा तो नः पूर्वस्य च दः" । आदेशतोऽन्त-रतमनिर्वृत्तौ सत्यां तकारग्रहणं कर्तव्यम् ।। प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यां नकारस्य निष्ठायां याऽन्तरतमा प्रकृतिस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेणाऽपि[3] तकारग्रहणं सिद्धं भवति ।।

(दूषणपरिहारभाष्यम्)

आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः । क्रियत एतन्न्यास एव ।।

विमला - क्रियते एतन्न्यास एवेति । स्थानितोऽन्तरतमनिवृत्तावपि रदाभ्यामितिसूत्रे त इति वक्तव्यमेवेति भावः । ननु नारीत्यत्र 'नृनरयोर्वृद्धिश्चे' ति वृद्धेः ङीन्सन्नियो-

---

१. 'इत्यादेशतः' क्वचित् । २. एतदिति क्वचिन्न । ३. 'अपि' इति क्वचिन्न ।

गशिष्टतया 'यस्येति चे'ति लोपापेक्षया पूर्वकालप्राप्तिकत्वेनान्तरङ्गत्वेऽपि अन्तरङ्गपरिभाषां बाधित्वा यस्येति चेत्यल्लोपे प्रकृतितोऽन्तरतमनिर्वृत्तौ वृद्ध्यन्तरतमे स्थानिनि षष्ठ्या उपसंहारात् नकारोत्तराकारस्य वृद्धौ नारीति सिद्ध्यति । आदेशतोऽन्तरतमनिर्वृत्तौ तु अलोऽन्त्यपरिभाषया रेफस्य वृद्धिः स्यादिति नारीति न सिद्ध्येदिति चेन्न सप्तम्यन्तपक्षनिराकरणभाष्येण गणसूत्रे नरशब्दप्रत्याख्यानस्यैवानुमानात् । न चैवं नरशब्दाज्जातिलक्षणे ङीषि नरीतिरूपं स्यादिति वाच्यम् इष्टापत्तेः । अतएव किंनरीणां नरीणामिति प्रयोगोऽपि संगच्छते । अथवा । 'अजाद्यतष्टावि' ति सूत्रादत इति संबध्यते । तच्चानुवृत्तिसामर्थ्यात् षष्ठ्या विपरिणतं सत् नरशब्देन सह वैयधिकरण्येन संबध्यते । नरस्य योऽकारस्तस्य वृद्धिरिति सूत्रार्थः । नृशब्देन तु न संबध्यते असम्भवादिति नारीतिसिद्धम् । अत्रेदमनुसन्धेयम् । 'नृनरयोरि' ति गणसूत्रे पठ्यते न त्वष्टाध्याय्याम् । गणे च अत इति न प्रकृतम् । एवञ्च 'शार्ङ्गरवाद्यञ' इत्यत्रादिशब्देन गणसूत्रमपि हृदयमागमय्य तत्रात इत्यस्यान्वयो वाच्यः । स च क्लिष्टतरः । तस्मादित्थं समाधेयम् । नर इति रान्तं लुप्ताकारान्तानुकरणम् । तस्य अः नरः । नुश्च नरस्य चेतिद्वन्द्वः । अथ वा 'स्थानेऽन्तरतम' इत्यत्र तन्त्रेण द्वेधाच्छेदः सूत्रकृतः संमतः । भाष्योक्तरीत्या लौकिकन्यायाश्रयणेन सूत्रप्रत्याख्यानपक्षेऽपि प्रकृतितः आदेशतश्चेत्युभयथाप्यन्तरतमनिर्वृत्तिरस्त्येव । एतावान् विशेषः—सूत्रकृतो मते तन्त्रेण, भाष्यकृतो मते तु न्यायसिद्धेत्यन्यदेतत् एवञ्च । 'वान्तोयि' 'नृनरयोरि' ति सर्वमाञ्जस्येनोपपद्यते । अत एव स्थानितोऽन्तरतमनिर्वृत्तिमाश्रित्य नारीतिसाधयन् हरदत्तोऽपि न विरुद्ध्यते । इको यणचीत्यादावतिप्रसङ्गस्तु 'ल्वादिभ्यः' 'प्वादीना'मिति निर्देशेन स्थानितोऽन्तरतमनिर्वृत्तेरनित्यतामाश्रित्य परिहरणीयः ।

(इति प्रथमान्तपाठनिर्णयः)

(अथ स्वतन्त्रविधित्वनिराकरणम्)

(आक्षेपभाष्यम्)

किं पुनरिदं निर्वर्तकम्—अन्तरतमा अनेन निर्वर्त्यन्ते । आहोस्वित् प्रतिपादकम्—अन्येन निर्वृत्तानामनेन प्रतिपत्तिः ?

(भाष्यम्)

कश्चात्र विशेषः ?

(३२७-प्रथमपक्षदूषणवार्तिकम्-२)

॥*॥ स्थानेऽन्तरतमे निर्वर्तके[1] सर्व स्थानिनिवृत्तिः ॥*॥

(भाष्यम्)

स्थानेऽन्तरतमे निर्वर्तके सर्वस्थानिनां निवृत्तिः प्राप्नोति। अस्यापि प्राप्नोति—दधि मधु ॥

(आक्षेपबाधकभाष्यम्)

अस्तु, न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्रान्तर्यतो दधिशब्दस्य दधिशब्द एव, मधुशब्दस्य मधुशब्द एवादशो भविष्यति ॥

(आक्षेपसाधकभाष्यम्)

यदि चैवम्, क्वचिद्द्वैरूप्यं, तत्र दोषः स्यात्—विसं मुसलमिति[2] "इण्कोरादेशप्रत्यययोः" इति षत्वं प्राप्नोति ॥

विमला - यदि चैवमिति । यद्यपि तत्रैवं निर्वाह इत्यर्थः । अस्य तथापीतिशेषः । क्वचिद्द्वैरूप्यमिति । स्थान्यपेक्षया आदेशे यत्र वैरूप्यं प्रसक्तं तत्र दोष इत्यर्थः । वैरूप्यमुपपादयति—इण्कोरिति ।

(आक्षेपान्तरभाष्यम्)

---

१. 'अन्तरतमनिर्वर्तके' इति क्वचित् ।

२. 'विसं बिसम् । मुसलं मुसलमिति' इति क्वचित् ।

अपि च—इष्टा व्यवस्था न प्रकल्प्येत । तद्यथा—तप्ते भ्राष्ट्रे तिलाः प्रक्षिप्ता[1] मुहूर्तमपि नावतिष्ठन्ते । एवमिमे वर्णा मुहूर्तमपि नावतिष्ठेरन् ।।

विमला - इष्टा व्यवस्था न प्रकल्प्येतेति । अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वरूपम्परिनिष्ठितत्वं कुत्रापि न स्यात् सर्वस्य सर्वदैतत्सूत्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात् ।

(द्वितीयपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि प्रतिपादकम्—अन्येन निर्वृत्तानामनेन प्रतिपत्तिः ।।

विमला - अनेन प्रतिपत्तिरिति । अन्तरतमस्यानेन साधुत्वप्रतिपादनमित्यर्थः । पूर्वोक्तपक्षयोरेवमुपपत्त्यभावे आद्यन्तौटकिताविति सूत्रोक्तं स्मारयन् तृतीयम्पक्षं परिगृह्णाति—**उक्तं वेति । षष्ठ्यधिकारेऽयं योगः कर्तव्य इति** । एवञ्च यत्र षष्ठी तत्रेदमुपतिष्ठेत । एतदेकवाक्यतापन्नेन च विधिशास्त्रेणेष्टस्यैवान्तरतमस्य विधानं स्यादिति नेष्टव्यवस्थाहानिः । नापि भुक्तवन्तमितिन्यायविरोध इति भावः ।

(३२८-आक्षेपवार्तिकम्-३)

।।*।। निर्वृत्तप्रतिपत्तौ निर्वृत्तिः ।।*।।

(भाष्यम्)

निर्वृत्तप्रतिपत्तौ निर्वृत्तिर्न सिध्यति । सर्वे सर्वत्र प्राप्नुवन्ति ।।

(आक्षेपतात्पर्यजिज्ञासाभाष्यम्)

किं तर्ह्युच्यते—निर्वृत्तिर्न सिध्यतीति ? न साधीयो निर्वृत्तिः सिद्धा[2] भवति ।।

---

१. 'क्षिप्ताः' इति क्वचित् । २. 'सिद्धा न' इति क्वचित् ।

(आक्षेपतात्पर्यवर्णनभाष्यम्)

न ब्रूमो–निर्वृत्तिर्न सिध्यतीति ।।

किं तर्हि ?

इष्टा व्यवस्था न प्रकल्प्येत । न सर्वे सर्वत्रेष्यन्ते ।

(प्रत्याक्षेपभाष्यम्)

इदमिदानीं किमर्थं स्यात् ?

(३२९-प्रत्याक्षेपसमाधानवार्तिकम्-४)

।।।।अनर्थकं च ।।*।।*

(भाष्यम्)

अनर्थकमेतत्स्यात् । यो हि भुक्तवन्तं ब्रूयाद् 'मा भुंक्थाः' इति, किं तेन कृतं स्यात् ।।

(आनर्थक्यपरिहारेण सामाधानवार्तिकम्)

।।।। उक्तं वा ।।*।।*

(भाष्यम्)

उक्तं वा[1] ।। किमुक्तम् ?

'सिद्धं तु षष्ठ्यधिकारे वचनात्' इति । षष्ठ्यधिकारेऽयं योगः कर्तव्यः "स्थानेऽन्तरतमः षष्ठीनिर्दिष्टस्य" इति ।।

(अनिष्टनिराकरणाधिकरणम्)

(३३०-आक्षेपवार्तिकम्-५)

।।।। प्रत्यात्मवचनं च ।।*।।*

---

१. लुप्तंस्यात् ।

(भाष्यम्)

प्रत्यात्ममिति च वक्तव्यम् ।।

किं प्रयोजनम् ?

यो यस्यान्तरतमः स तस्य स्थाने यथा स्यात् । अन्यस्याऽन्तरतमोऽन्यस्य स्थाने मा भूदिति ।।

(३३१-समाधानवार्तिकम्-६)

।।।। प्रत्यात्मवचनमशिष्यं,*
स्वभावसिद्धत्वात् ।।।।*

(भाष्यम्)

प्रत्यात्मवचनमशिष्यम् ।। किं कारणम् ?

'स्वभावसिद्धत्वात्' । स्वभावत एतत्सिद्धम् । तद्यथा- समाजेषु समाशेषु समवायेषु चाऽऽस्यतामित्युक्ते न चोच्यते- प्रत्यात्ममिति, प्रत्यात्मं चाऽऽसते ।।

विमला - संबन्धिशब्दत्वादिति पूर्वोक्तहेतुनैव प्रत्यात्मवचनप्रत्याख्यानसंभवे स्वभावसिद्धत्वादिति हेत्वन्तराभिधानं सूत्रप्रत्याख्यानायेति बोध्यम् ।।

(सूत्रप्रत्याख्यानाधिकरणम्)

(३३२-प्रत्याख्यानवार्तिकम्-७)

।।।। अन्तरतमवचनं च ।।*।।*

(भाष्यम्)

अन्तरतमवचनं चाऽशिष्यम्-योगश्चाप्ययमशिष्यः ।। कुतः ?

स्वभावसिद्धत्वादेव । तद्यथा— समाजेषु समाशेषु समवायेषु चास्यतामित्युक्ते नैव कृशाः कृशैः सहासते, न पाण्डवः पाण्डुभिः । येषामेव किंचिदर्थकृतमान्तर्यं तैरेव सहासते ।।

तथा[१] गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति, तेन सह शेरते ।।

तथा— यान्येतानि गोयुक्तकानि संघुष्टकानि भवन्ति तान्यन्योन्यमपश्यन्ति[२] शब्दं कुर्वन्ति ।।

विमला - अन्तरतमवचनमिति । अन्तरतमपदं सूक्षोपलक्षणम् तदाह— **योगश्चाप्ययमिति** ।

(दृष्टान्तबाधकभाष्यम्)

एवं तावच्चेतनावत्सु ।।

(दृष्टान्ताऽन्तरभाष्यम्)

अचेतनेष्वपि । तद्यथा–लोष्टः क्षिप्तो बाहुवेगं[३] गत्वा नैव तिर्यग्गच्छति नोर्ध्वमारोहति, पृथिवी विकारः पृथिवीमेव गच्छत्यान्तर्यतः ।।

तथा—या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः । स धूम आकाशे[४] निवाते नैव तिर्यग्गच्छति नार्वागवरोहति[५] । अब्विकारोऽप एव गच्छत्यान्तर्यतः ।।

तथा ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते सुप्रज्वलितं[६] नैव तिर्यग्गच्छति नार्वागवरोहति[५] । ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः ।।

---

१. 'तद्यथा' इत्यपि क्वचित् ।

२. 'अन्योन्यं पश्यन्ति' इति क्वचित् । ३. 'बहुवेगं' ।

४. 'स आकाशदेशे' । ५. 'नाऽवागव' । ६. 'प्रज्वलितो' ।

(सूत्रसत्ताप्राप्तदूषणनिराकरणाधिकरणम्)

(३३३-दूषणवार्तिकम्-८)

।।।। व्यञ्जनस्वरव्यतिक्रमे च तत्कालप्रसंगः ।।*।।*

(भाष्यम्)

व्यञ्जनव्यतिक्रमे स्वरव्यतिक्रमे च तत्कालता प्राप्नोति ।। व्यञ्जनव्यतिक्रमे-इष्टम् उप्तम् । आन्तर्यतोऽर्धमात्रिकस्य व्यञ्जनस्याऽर्धमात्रिक इक् प्राप्नोति ।।

(दूषणबाधकभाष्यम्)

नैव लोके नैव[1] वेदेऽर्धमात्रिक इगस्ति ।।

कस्तर्हि ?

मात्रिकः । योऽस्ति स भविष्यति ।।

(दूषणान्तरभाष्यम्)

स्वरव्यतिक्रमे-दध्यत्र मध्वत्र कुमार्यर्थं[2] ब्रह्मबन्ध्वर्थम् इति । आन्तर्यतो मात्रिकस्य द्विमात्रिकस्यैको मात्रिको द्विमात्रिको वा[3] यण् प्राप्नोति ।।

(दूषणबाधकभाष्यम्)

नैव लोके नैव[4] वेदे मात्रिको द्विमात्रिको वा यणस्ति ।।

---

१. 'न च' इति क्वचित् ।
२. 'कुमार्यत्र' इति क्वचित् ।
३. वेति क्वचिन्न ।
४. 'न च' इति क्वचित् ।

कस्तर्हि ? अर्धमात्रिकः ।

योऽस्ति स भविष्यति ।।

(३३४-दूषणवार्तिकम्-९)

।।।। अक्षु चानेकवर्णादेशेषु ।।*।।*

(भाष्यम्)

अक्षु चाऽनेकवर्णादेशेषु तत्कालता प्राप्नोति ।। "इदम इश्" । आन्तर्यतोऽर्धतृतीयमात्रिकस्येदमः स्थानेऽर्धतृतीयमात्रमिवर्णं प्राप्नोति ।।

विमला - अर्द्धतृतीयमातृकस्येति । अर्द्धा तृतीया मात्रा यस्य तस्य अर्द्धतृतीयमातृकस्येत्यर्थः । इदमोऽत्वे पररूपे च कृते सार्द्धद्वयमातृकत्वमिति बोध्यम् ।

(दूषणबाधकभाष्यम्)

नैष दोषः । 'भाव्यमानेन सवर्णानां ग्रहणं न' इत्येवं न भविष्यति ।।

(३३५-दूषणवार्तिकम्-१०)

।।।। गुणवृद्ध्यैज्भावेषु च ।।*।।*

(भाष्यम्)

गुणवृद्ध्योरेज्भावेषु[१] च तत्कालता प्राप्नोति ।। खट्वा + इन्द्रः खट्वेन्द्रः । खट्वा + उदकम् खट्वोदकम् । खट्वा + ईषा खट्वेषा । खट्वा + ऊढा खट्वोढा । खट्वा + एलका खट्वैलका । खट्वा + ओदनः खट्वौदनः । खट्वा + ऐतिकायनः

---

१ 'गुणवृद्ध्योज्भा....' ।

खट्वैतिकायनः । खट्वा + औपगवः खट्वौपगव इति । आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशाः प्राप्नुवन्ति ।।

(दूषणबाधकभाष्यम्)

नैष दोषः । तपरे गुणवृद्धी ।

(दूषणसाधकभाष्यम्)

ननु च तः परो यस्मात्सोऽयं तपरः ।।

(दूषणबाधकभाष्यम्)

नेत्याह । तादपि परस्तपर इति ।।

(आक्षेपभाष्यम्)

यदि तादपि परस्तपरः, "ऋदोरप्" इतीहैव स्यात्— यवः स्तवः । लवः पव इत्यत्र न स्यात् ।।

(आक्षेपबाधकभाष्यम्)

नैष तकारः ।। कस्तर्हि ? दकारः ।।

(आक्षेपसाधकभाष्यम्)

किं दकारे प्रयोजनम् ?

(प्रतिबन्दीभूतं समाधानभाष्यम्)

अथ किं तकारे ? यद्यसंदेहार्थस्तकारः, दकारोऽपि ।। अथ मुखसुखार्थस्तकारः, दकारोऽपि ।।

(दूषणवार्तिकशेषभाष्यम्)

एजूभावे—कुर्वाते कुर्वाथे । आन्तर्यतोऽर्धतृतीयमात्रस्य टिसंज्ञकस्याऽर्धतृतीयमात्र एच्[1] प्राप्नोति ।।

(दूषणोद्धारभाष्यम्)

नैव लोके न च वेदेऽर्धतृतीयमात्र एजस्ति[2] ।।

(३३६-आक्षेपवार्तिकम्-११)

।।।। ऋवर्णस्य गुणवृद्धिप्रसंगे सर्वप्रसंगोऽविशेषात् ।।*।।*

(भाष्यम्)

ऋवर्णस्य गुणवृद्धिप्रसङ्गे सर्वप्रसङ्गः । सर्वगुणवृद्धिप्रसङ्गः[3], सर्वे गुणवृद्धिसंज्ञका ऋवर्णस्य स्थाने प्राप्नुवन्ति ।।

किं कारणम् ?

'अविशेषात्' । नहि कश्चिद्विशेष उपादीयते—एवंजातीयको गुणवृद्धिसंज्ञक ऋवर्णस्य स्थाने भवतीति । अनुपादीयमाने विशेषे सर्वप्रसङ्गः ।।

(३३७-समाधानवार्तिकम्-१२)

।।।। न वा ऋवर्णस्य स्थाने रपरप्रसंगादवर्णस्यान्तर्यम् ।।*।।*

(भाष्यम्)

न वा एष दोषः ।। किं कारणम् ?

'ऋवर्णस्य स्थाने रपरप्रसङ्गात्' । उः स्थाने अण्

१. क्वचिद् 'एः' । २. क्वचिद् 'एरस्ति' । ३. क्वचिन्न ।

प्रसज्यमान एव रपरो भवतीत्युच्यते । तत्र ॠवर्णस्यान्तर्यतो रेफवतो रेफवानकार एवान्तरतमो भवति ।।

विमला - ॠवर्णस्य स्थाने रपरप्रसङ्गादिति । अयम्भावः । ॠकारस्य रेफघटितत्वात् रेफघटितेनैवादेशेन भवितव्यम्, स चाकारे कृते 'उरण् रपर' इति शास्त्रबलेन भवितुमर्हतीति ॠकारस्थानेऽकार एव भविष्यतीति न सर्वप्रसङ्गसम्भव इति ।

(३३८-आक्षेपवार्तिकम्-१३)

।।*।। सर्वादेशप्रसंगस्त्वनेकाल्त्वात् ।।*।।

(भाष्यम्)

सर्वादेशस्तु गुणवृद्धिसंज्ञक ॠवर्णस्य प्राप्नोति ।।

किं कारणम् ?

अनेकालत्वात् ।। "अनेकाल् शित्सर्वस्य" इति ।।

विमला - सर्वादेशेति । न च सर्वादेशे अणः ॠकारमात्रस्थानिकत्वाभावेन रपरत्वं न स्यादिति वाच्यम्, सर्वादेशेप्यणः ॠकारस्थानिकत्वानपायाद्रपरत्वसम्भवात् । अन्यथा खट्वर्श्य इत्यादावेकादेशस्थलेऽपि पूर्वपरस्थानिकत्वेन तन्मात्रस्थानिक-त्वानिकत्वाभावेन रपरत्वं न स्यादिति भावः ।

(३३९-समाधानवार्तिकम्-१४)

।।*।। न वाऽनेकाल्त्वस्य तदाश्रयत्वादृवर्णादेशस्याऽविघातः ।।*।।

(भाष्यम्)

न वा एष दोषः ।।

किं कारणम् ?

'अनेकाल्त्वस्य तदाश्रयत्वात्' । यदायमुः स्थानेऽण्, तदायमनेकाल्, अनेकाल्त्वस्य तदाश्रयत्वादृ-वर्णादेशस्य विघातो न भविष्यति ।।

विमला - अनेकाल्त्वस्य तदाश्रयत्वादिति । यदायमलोऽन्त्यस्येत्यनेनान्त्यस्य ऋकारस्य स्थाने स्यात् । तदोरण् रपर इत्यनेन शास्त्रेणानेकाल् स्यात् । यदा च अनेकाल् स्यात् तदाऽनेकाल्शित्सर्वस्येत्यनेन सम्पूर्णस्य स्यादिति प्रकृते अलोन्त्यपरिभाषा अनेकाल्शित्सर्वस्येति परिभाषोपजीव्येत्युपजीव्यविरोधस्यान्याय्यतया प्रकृते अलोऽन्त्यपरिभाषामनेकाल्शित्सर्वस्येति परिभाषां न बाधते । न च सम्पूर्णस्याङ्गस्थाने जातत्वेऽपि खट्वर्श्येत्यादाविव ऋकारस्थानिकत्वानपायाद्रपरत्वेनानेकाल्त्वं स्यादेवेति वाच्यम्, प्रत्यक्षे ऋवर्णस्थानित्वे चरितार्थस्योरण् रपर इति शास्त्रस्यानुमानिके प्रवृत्त्ययोगात् । खट्वर्श्य इत्यादौ तु पूर्वपरयोरित्यधिकारसत्त्वेन प्रत्यक्षमेव स्थानित्वमिति बोध्यम् ।

(समाधानान्तरभाष्यम्)

[1]अथवाऽनान्तर्यमेवैतयोरान्तर्यम् । एकस्याप्य[2]-न्तरतमा प्रकृतिर्नास्ति, अपरस्याप्यन्तरतम आदेशो नास्ति, एतदेवैतयोरान्तर्यम् ।।

विमला - ननूपजीव्यविरोधात्सम्पूर्णस्य माभूत् । किन्तु उःस्थाने लक्षणान्तरेण निष्पन्नो योऽण् स रपर इति उरण् रपरसूत्रस्य व्याख्यानपक्षे ऋकारस्थाने एकारादयः कुतो नेत्यत आह—**अथवेति** । **अनान्तर्यमेवैतयोरान्तर्य्यमिति** । एवञ्च स्थानेऽन्तरतम-सूत्रेणैव नियम इति भावः ।

(३४०-समाधानान्तरवार्तिकम्- १५)

---

१. इतः पूर्वं "अनान्तर्यमवेवैतयोरान्तर्यम्" वार्तिकमिदं लुप्तं स्यादिति मन्ये ।

२. अपिः क्वचिन्न ।

॥*॥ संप्रयोगो वा नष्टाश्वदग्धरथवत् ॥*॥

(भाष्यम्)

अथवा नष्टाश्वदग्धरथवत्सह संप्रयोगो भवति । तद्यथा—'तवाऽश्वो नष्टो ममापि रथो दग्धः, उभौ संप्रयुज्यावहै' इति । एवमिहापि—'तवाप्यन्तरतमा प्रकृतिर्नास्ति, ममाप्यन्तरतम आदेशो नास्ति, अस्तु नौ संप्रयोगः' इति ॥

विमला - स्थानेन्तरतमसूत्रप्रत्याख्यानपक्षेऽप्याह—सम्प्रयोगो वेति ।

(समाधानबाधकभाष्यम्)

विषम उपन्यासः । चेतनावत्स्वर्थात्प्रकरणाद्वा लोके संप्रयोगो भवति । वर्णाश्च पुनरचेतनाः, तत्र किंकृतः संप्रयोगः ?

(समाधानसाधकभाष्यम्)

यद्यपि वर्णा अचेतनाः । यस्त्वसौ प्रयुङ्क्ते स चेतनावान् ॥

(एकादेशे दूषणंनिराकरणाधिकरणम्)

(३४१-आक्षेपवार्तिकम्-१६)

॥*॥ एजवर्णयोरादेशेऽवर्ण, स्थानिनोऽवर्णप्रधानत्वात् ॥*॥

(भाष्यम्)

एजवर्णयोरादेशेऽवर्णं प्राप्नोति । खट्वैलका मालौपगवः ॥

किं कारणम् ?

'स्थानिनोऽवर्णप्रधानत्वात्', स्थानी ह्यत्राऽवर्णप्रधानः ॥

(३४२-समाधानवार्तिकम्-१७)

॥*॥ *सिद्धं तूभयान्तर्यात्* ॥*॥

(भाष्यम्)

सिद्धमेतत् ॥ कथम् ?

उभयोर्योऽन्तरतमस्तेन भवितव्यम् । न चावर्णमुभयोरन्तरतमम् ॥ —स्थानेऽन्तरतमः ॥

(परिभाषासूत्रम्)

उरण् रपरः ॥१।१।५०॥

(आक्षेपभाष्यम्)

किमिदमुरण् रपरवचनमन्यनिवृत्त्यर्थम्—'उः स्थाने अणेव भवति रपरश्च' इति । आहोस्विद्रपरत्वमात्रमनेन विधीयते—'उः स्थाने अण् च अनण् च । अण् तु रपरः' इति ? ॥

विमला - अण् तु रपर इति । यद्यप्यत्र उः स्थाने रपरोऽण् स्यादिति रपरत्वविशिष्टोऽण् विधीयते । अथवा उः स्थाने अणामनणाञ्च प्रसङ्गेऽणेवेति नियमः स च रपर इति वाक्यभेदेन रपरत्वं विधीयते । आहोश्वित् उः स्थाने योऽणित्यनूद्य तस्य रपरत्वं विधीयते । किम्वा । प्रसङ्गावस्थायामेव रपरत्वमिति चत्वारः पक्षाः सम्भाव्यन्ते । तथापि, प्रथमद्वितीयपक्षयोरन्यनिवृत्यर्थमिति पक्षेणैवसंग्रहात् । चतुर्थपक्षस्याग्रे सिद्धन्तु नित्यशब्दत्वादित्यादिनाऽभिधास्य मानत्वाच्चात्र पक्षद्वयमात्रस्याभिधानेऽपि न ग्रन्थन्यूनतेत्यवधेयम् । अत्र पक्षत्रयं निराकृत्य तुरीयम्पक्षं सिद्धन्तु प्रसङ्गेरपरत्वादिति ग्रन्थेन सिद्धान्तयिष्यते इति बोध्यम् ।

(भाष्यम्)

कश्चाऽत्र विशेषः ? ।।

(३४३-आक्षेपवार्तिकम्-१८)

।।।। उरण्रपरवचनमन्यनिवृत्त्यर्थं[1] चेदुदात्तादिषु दोषः ।।*।।*

(भाष्यम्)

उरण् रपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषो भवति ।।

के पुनरुदात्तादयः ? ।

उदात्तानुदात्तस्वरितानुनासिकाः । कृतिः हृतिः, कृतं हृतम्, प्रकृतं प्रहृतम्, नॄँ पाहि ।।

विमला - उदात्तादिषु दोष इति । उदात्तादिषु अन्तरतमपरिभाषां बाधित्वोरण् रपर इत्यनेनोदात्तत्वादि विशिष्टो रपरश्चाणेव स्यादिति भावः । रपरत्वविशिष्टोऽण् विधीयत इतिपक्षे तु येन नाप्राप्तिन्यायेनोदात्तत्वादिकमपि बाधित्वा रपरोऽण् स्यादिति बोध्यम् ।

(द्वितीयपक्षाभ्युपगमभाष्यम्)

अस्तु तर्ह्युः स्थाने अण् चाऽनण् च । अण् तु रपर इति ।

(३४४-द्वितीयपक्षदूषणवार्तिकम्-१९)

।।।। य उः स्थानेऽण् स रपर इति चेद् गुणवृद्ध्योरवर्णाऽप्रतिपत्तिः ।।*।।*

(भाष्यम्)

---

१. 'मन्य' स्थाने 'मिति चेत्' इत्यपि क्वचित् ।

य उः स्थाने अण् स रपर इति चेद् गुणवृद्ध्योरवर्ण-स्याऽप्रतिपत्तिः । कर्ता हर्ता वार्षगण्यः ।।

विमला - वार्षगण्य इति । वृषगणस्यापत्यम्, गर्गादित्वाद्यञ् ।

(द्वितीयपक्षदूषणशेषाक्षेपभाष्यम्)

किं हि साधीयः—ऋवर्णस्याऽसवर्णे यदवर्णं स्यात्, न पुनरेङैचौ ?

(द्वितीयपक्षवादिभाष्यम्)

पूर्वस्मिन्नपि पक्षे एष दोषः । किं हि साधीयस्तत्रापि ऋवर्णस्याऽसवर्णे यदवर्णं स्यात्, न पुनरिकारोकारौ[1] ?

(प्रथमपक्षवादिभाष्यम्)

अथ मतमेतत्—उः स्थाने अणश्चानणश्च प्रसङ्गे अणेव भवति रपरश्चेति । सिद्धा पूर्वस्मिन् पक्षेऽवर्णस्य प्रतिपत्तिः ।।

विमला - पूर्वसूत्रात्स्थाने इत्यनुवर्त्त्य उ: स्थानेऽणोऽनणश्च प्रसङ्गे सति अणेवेति नियमवादिमतम्, ऋकारस्थाने इकारोकारप्रसङ्गवारणायान्यनिवृत्त्यर्थमिति वाद्यपि स्वीकरो-ति—**अथ मतमेतदिति** । एतत् वक्ष्यमाणं नियमरूपत्वमन्यनिवृत्त्यर्थमितिवादिनो ममापि मतम् अर्थात्संमतम् । रपरत्वविशिष्टोऽण् विधीयते इतिपक्षे येन नाप्राप्तिन्यायेनाण्-भिन्नस्य निवृत्तिः । नियमपक्षेऽप्यन्यनिवृत्तिस्तुल्येति विशिष्टविधाने एवान्यनिवृत्त्य-र्थमितिवदतां तात्पर्यमित्यत्र विनगमकाभावेन नियमपक्षेऽन्यनिवृत्त्यर्थमितिवदतां तात्पर्य्यावधारणेऽपि नान्यमतप्रवेशोऽन्यनिवृत्त्यर्थवादिनामित्यवधेयम् । **पूर्वस्मिन् पक्षे** । अन्यनिवृत्त्यर्थमिति पक्षे ।

(आक्षेपभाष्यम्)

---

१. 'पुनरिवर्णोवर्णौ' इत्यपि क्वचित् ।

यत्तु तदुक्तम्—'उदात्तादिषु दोषः' इति, स इह दोषो जायते ।। न जायते ?

विमला - तदुक्तमिति । अन्यनिवृत्त्यर्थमित्यस्य तस्मिन् व्याख्याने उक्तमित्यर्थः । **इहेति** । अस्मिन् व्याख्याने इत्यर्थः ।

(समाधानभाष्यम्)

जायते स दोषः ।। कथम् ?

उदात्त इत्यनेनाणोऽपि प्रतिनिर्दिश्यन्ते, अनणोऽपि ।।

(समाधानबाधकभाष्यम्)

यद्यपि-अणोऽपि प्रतिनिर्दिश्यन्ते । न तु प्राप्नुवन्ति ।।

किं कारणम् ? स्थानेऽन्तरतमो भवतीति ।।

(समाधानसाधकभाष्यम्)

कुतो नु खल्वेतत्—द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः "स्थानेऽन्तरतमः" इति "उरण् रपरः" इति च, "स्थानेऽन्तरतम" इत्यनया परिभाषया व्यवस्था भविष्यति, न पुनर् "उरण् रपरः" इति ?।।

अतः किम् ?

अत एष दोषो जायते—'उदात्तादिषु दोषः' इति ।।

(आक्षेपभाष्यम्)

ये चाप्येते ऋवर्णस्य स्थाने प्रतिपदमादेशा उच्यन्ते,

तेषु रपरत्वं न प्राप्नोति-"ॠत इद्धातोः" "उदोष्ठ्यपूर्वस्य" इति ।

(३४५-समाधानवार्तिकम्-३)

॥॥ सिद्धं तु प्रसंगे रपरत्वात् ॥*॥*

(भाष्यम्)

सिद्धमेतत् ॥ कथम् ?

'प्रसङ्गे रपरत्वात्' । उः स्थाने अण् प्रसज्यमान एव रपरो भवति[1] ॥

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत् ?

(समाधानभाष्यम्)

नहि ॥

कथमनुच्यमानं गंस्यते ?

स्थान इति वर्तते । स्थानशब्दश्च प्रसङ्गवाची ॥

(आक्षेपभाष्यम्)

यद्येवमादेशोऽविशेषितो भवति ॥

विमला - यद्येवमादेशोऽविशेषितो भवतीति । उदीचामातःस्थाने इत्यत्र स्थानेग्रहणेनानुवादे षष्ठीस्थाने योगेत्यस्याप्रवृत्तेरिति भावः । वस्तुतस्तु उदीचामातःस्थाने इति सूत्रे स्थानेग्रहणं स्पष्टार्थमेव, विधौ परिभाषोपतिष्ठते नानुवादे इत्युद्घोषोऽपि 'इकोगुणवृद्धी' 'अचश्चे' ति परिभाषाद्वयमात्रविषयः । तत्र विधीयते इत्यस्याध्याहारादिति यद्येवमादेशोऽविशेषितो भवतीतिशङ्का, प्रकृतं स्थानेग्रहणमनुवर्तते इत्युत्तरञ्चैकदेशिन इति बोध्यम् ।

---

१. क्वचिद् 'भवतीति' ।

(समाधानभाष्यम्)

आदेशश्च विशेषितः ।।

कथम् ?

द्वितीयं स्थानग्रहणं प्रकृतमनुवर्तते । तत्रैवमभिसंबन्धः करिष्यते—उः स्थाने अण् स्थान इति । उः प्रसङ्गे अण् प्रसज्यमान एव रपरो भवति ।।

(अण्ग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथाऽण्ग्रहणं किमर्थम्, न ऊ रपरो भवतीत्येवोच्येत[1] ?

(प्रत्याक्षेपभाष्यम्)

'ऊ रपर' इतीयत्युच्यमाने क इदानीं रपरः स्यात् ?

(प्रत्याक्षेपसमाधानभाष्यम्)

यः (उः) स्थाने भवति ?

कश्च (उः) स्थाने भवति ? आदेशः ।।

(३४६-आक्षेपबाधकवार्तिकम्-४)

।।*।। आदेशो रपर इति चेद्रीरिविधिषु रपरप्रतिषेधः ।।*।।

(भाष्यम्)

---

१. 'रपर इत्येवोच्येत' इति क्वचित् ।

आदेशो रपर इति चेद्रीरिविधिषु रपरत्वस्य प्रतिषेधो वक्तव्यः ।। के पुना रीरिविधयः ?

अकङ्लोपाऽऽनङनङ्रीङ्रिङादेशाः ।।

अकङ्—सौधातकिः । अकङ् ।। लोप—पैतृष्वसेयः । लोप ।। आनङ्—होतापोतारौ । आनङ् ।। अनङ्—कर्ता हर्ता । अनङ् ।। रीङ्—मात्रीयति पित्रीयति । रीङ् ।। रिङ्—क्रियते ह्रियते । रिङ् ।।

विमला - पैतृष्वसेय इति । लोपस्यापि ऋकारस्थाने जायमानत्वेनाण्ग्रहणाभावे रपरत्वं स्यादिति भावः । ननु लोपस्य रपरत्वे पैतृष्वसेय इतिरूपम् तच्च लोपवचनमन्तरापि ढकि यणि च सुसाधमिति लोपवचनं व्यर्थमिति चेदत्र **कैयटः**—लोपवचनं सर्वादेशार्थम् । उद्योतकृत्तु रपरत्वाभिधानमुखेन सर्वादेशत्वमेव लोपस्याभिधित्सितमिति कैयटस्य भावमुपवर्ण्य यदि सर्वादेशत्वमेव लोपस्तदा उःस्थानेनेति प्रदीपं खण्डयन् लोपविधिवैयर्थ्यापादनमेव भाष्यतात्पर्यमित्यभिहितवान् । दाधिमथास्तु लोपस्याभावरूपत्वेनाल्व्यवहाराभावे रपरत्वेप्यनेकाल्त्वाभावात्सर्वादेशापत्त्यभावेन लोपविधिवैयर्थ्याभावेन च केवलरेफश्रवणापत्तिरेव भाष्यतात्पर्यमिति वदन्ति । रघुनाथास्तु नहि प्रज्ञामात्रेणार्थसिद्धिरिति लोपविधिवैयर्थ्यापादनं सम्यगेवेति वदन्ति । लोपस्याभावरूपत्वेन रेफपरत्वासम्भवादू रपर इति न प्रवर्ततेति भाष्यमिदमेकदेशिन एवेति वयम् ।

(३४७-आक्षेपबाधकवार्तिकम्-५)

।।*।। उदात्तादिषु च ।।*।।

(भाष्यम्)

उदात्तादिषु च ।। किम् ?

रपरत्वस्य प्रतिषेधो वक्तव्यः ।। कृतिः हृतिः ।

कृतं हृतम् । प्रकृतम् प्रहृतम् । नॄँः पाहि ।। तस्मादण् ग्रहणं कर्तव्यम् ।।

(एकादेशे रपरत्वसाधकाधिकरणम्)

(३४८-आक्षेपवार्तिकम्-६)

।।।। एकादेशस्योपसंख्यानम् ।।*।।*

(भाष्यम्)

एकादेशस्योपसंख्यानं कर्तव्यम् । खट्वर्श्यः मालर्श्यः ।। किं पुनः कारणं न सिध्यति ?

उः स्थाने अण् प्रसज्यमान एव रपरो भवतीत्युच्यते । न चायमुरेव स्थानेऽण् शिष्यते ।।

किं तर्हि ? उश्चाऽन्यस्य च ।।

(३४९-समाधानवार्तिकम्-७)

।।।। अवयवग्रहणात्सिद्धम्[1] ।।*।।*

(भाष्यम्)

यदत्र ऋवर्ण तदाश्रयं रपरत्वं भविष्यति । तद्यथा— "माषा न भोक्तव्याः" इत्युक्ते मिश्रा अपि न भुज्यन्ते ।।

विमला - मिश्रा अपीति । तण्डुलादिसंमिश्रिता अपीत्यर्थः ।

(३५०-समाधाननिरासवार्तिकम्-८)

।।।।अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तप्रतिषेधः ।।*।।*

---

१. भाष्यमिदमित्यन्ये ।

(भाष्यम्)

अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तस्य प्रतिषेधो वक्तव्यः । होतापोतारौ । यथैवोश्चाऽन्यस्य च स्थानेऽण् रपरो भवतीति, एवं य उः स्थानेऽण् चानऽण् च सोऽपि रपरः स्यात् ।।

विमला - सोऽपि रपर: स्यादिति । वस्तुतस्तु पूर्वपरयोरिति द्विवचननिर्देशेनैकादेशस्य ऋकारस्थानिकत्वेऽपि तत्प्रतिबन्धाऽऽनङोऽण्त्वं साधयितुमशक्यमिति वार्तिकानुसारेणेदं भाष्यमिति बोध्यम् । **न चैतदृवर्णान्तमिति** । अलोन्त्यस्येत्यनेन ऋवर्णमात्रस्य स्थानित्वात् ऋवर्णस्य ऋवर्णान्तत्वाभावादिति भाव: ।

(व्याख्यान्तरे दूषणभाष्यम्)

यदि पुनर्ऋवर्णान्तस्य स्थानिनो रपरत्वमुच्येत खट्वर्श्यः मालर्श्यः ।।

नैवं शक्यम् । इह न प्रसज्येत[1]—कर्ता हर्ता किरति गिरति । ऋवर्णान्तस्येत्युच्यते, न चैतदृवर्णान्तम् ।।

(दूषणबाधकभाष्यम्)

ननु चैतदपि व्यपदेशिवद्भावेन ऋवर्णान्तम् ।।

(दूषणसाधकभाष्यम्)

अर्थवता व्यपदेशिवद्भावः । न चैषोऽर्थवान् । तस्मान्नैवं शक्यम् ।। न चेदेवम्, उपसंख्यानं कर्तव्यम् ।। इह च रपरत्वस्य प्रतिषेधो वक्तव्यः—मातुः पितुरिति ।।

विमला - न चेदेवमिति । एवम् ऋवर्णान्तस्य स्थानिनो रपरत्वमिति व्याख्यानम् कर्तेत्यादावव्याप्त्या न स्वीक्रियते चेदित्यर्थ: । अस्य तर्हीतिशेष: । **उपसंख्यानं**

---

१. 'इह हि दोष: स्यात्' इति क्वचित् ।

कर्तव्यमिति । एकादेशस्य रपरत्वोपसंख्यानमित्यर्थः । **रपरत्वस्य प्रतिषेधो वक्तव्य इति** । ऋत उदित्यस्याप्येकादेशतया औपसंख्यानिक-रपरत्वप्रसक्तेस्तद्वारणाय रपरत्वप्रतिषेधो वक्तव्य इतिभावः ।

(समाधानभाष्यम्)

उभयं न वक्तव्यम् ॥

कथम् ?

यो द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति लभतेऽसावन्यतरतो व्यपदेशम् । तद्यथा—देवदत्तस्य पुत्रः देवदत्तायाः पुत्र इति ॥

विमला - अन्यतरतो व्यपदेशमिति । एवञ्चैकादेशस्य रपरत्वोपसंख्यानं न कर्त्तव्यमिति भावः ।

(आक्षेपभाष्यम्)

कथं मातुः पितुरिति ?

(आक्षेपबाधकभाष्यम्)

अस्त्वत्र रपरत्वम् ॥

विमला - द्वितीयाक्षेपमिष्टापत्त्या परिहरति—**अस्त्वत्र रपरत्वमिति** । न च रपरत्वे विभक्तिसकारस्य रुत्वे पूर्वरेफस्य रोरीतिलोपे 'ढ्रलोप' इति दीर्घापत्तिरितिवाच्यम् रुत्वस्यासिद्धत्वेन 'रात्सस्ये'ति सकारलोपे रेफस्य विसर्गे च रूपसिद्धेः । उदिति तपरत्वाद्वा ।

(आक्षेपसाधकभाष्यम्)

का रूपसिद्धिः ?

(आक्षेपबाधकभाष्यम्)

"रात्सस्य" इति सकारस्य लोपः। रेफस्य विसर्जनीयः ।।

(आक्षेपसाधकभाष्यम्)

नैवं शक्यम्। इहहि—मातुः करोति पितुः करोतीति, 'अप्रत्ययविसर्जनीयस्य' इति षत्वं प्राप्नोति[1] ।।

(आक्षेपबाधकभाष्यम्)

अप्रत्ययविसर्जनीयस्येत्युच्यते। प्रत्ययविसर्जनीयश्चाऽयम् ।।

(आक्षेपसाधकभाष्यम्)

लुप्यतेऽत्र प्रत्ययो "रात्सस्य" इति।

(समाधानवार्तिकशेषभाष्यम्)

एवं तर्हि—

(३५१-समाधानवार्तिकम्-९)

।।।। भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात् षत्वप्रतिषेधस्य ।।*।।*

(भाष्यम्)

यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति, तज्ज्ञापयत्याचार्यः—नैकादेशनिमित्तात् षत्वं भवतीति ।।

(पूर्वान्तत्वसाधनाधिकरणम्)

१. 'प्रसज्येत' इति क्वचित्।

(आक्षेपभाष्यम्)

किं पुनरयं पूर्वान्तः, आहोस्वित्परादिः, आहोस्विदभक्तः ?

(प्रत्याक्षेपभाष्यम्)

कथं वाऽयं[1] पूर्वान्तः स्यात् ? कथं वा परादिः ? कथं वा अभक्तः ?

(प्रत्याक्षेपसमाधानभाष्यम्)

यद्यन्त इति वर्तते, ततः पूर्वान्तः । अथादिरिति वर्तते, ततः परादिः । अथोभयं निवृत्तम्, ततोऽभक्तः ।

विमला - यद्यन्त इति वर्तते इति । आद्यन्ताविति सूत्रादेकदेशे स्वरितत्वप्रतिज्ञयाऽनुवर्त्तितस्यान्त इत्यस्य रपर इति बहुव्रीहावन्यपदार्थस्य प्राधान्येऽपि विधेयत्वेन रेफस्यार्थप्राधान्यात्तत्रान्वये रेफस्य पूर्वान्तत्वमिति भावः । एवमेव परादिपक्षोऽप्युपपादनीयः । **ततोऽभक्त इति** । रपर इत्यत्र परशब्दो नावयववाचीति भावः । विस्तरेण प्रपञ्चितमेतन्मिदचोऽन्त्यादितिसूत्रे।

(भाष्यम्)

कश्चाऽत्र विशेषः ?

(३५२-अभक्तपक्षेदूषणवार्तिकम्-१०)

।।।। अभक्ते दीर्घलत्वयगभ्यस्तस्वरहलादिशेषविसर्जनीयप्रतिषेधः प्रत्ययाऽव्यवस्था च[2] ।।*।।*

(भाष्यम्)

यद्यभक्तः दीर्घत्वं न प्राप्नोति — गीः पूः । रेफवकारान्तस्य धातोरिति दीर्घत्वं न प्राप्नोति ।।

---

१. 'चाऽय' मिति क्वचित् । २. व्याख्या लुप्ता स्यात् ।

(दूषणानुपपत्तिभाष्यम्)

किं पुनः कारणं रेफवकाराभ्यां धातुर्विशेष्यते, न पुनः पदं विशेष्यते- रेफवकारान्तस्य पदस्येति ?

(दूषणोपपत्तिभाष्यम्)

नैवं शक्यम् । इहापि प्रसज्येत- अग्निर्वायुरिति ।।

(दूषणानुपपत्तिभाष्यम्)

एवं तर्हि रेफवकाराभ्यां पदं विशेषयिष्यामो धातुनेकम् । रेफवकारान्तस्य पदस्येको धातोरिति ।।

(दूषणोपपत्तिभाष्यम्)

एवमपि-प्रियं ग्रामणि कुलमस्य प्रियग्रामणिः, प्रियसेनानिः-अत्रापि प्राप्नोति । तस्माद्धातुरेव विशेष्यते । धातौ च विशेष्यमाणे इह दीर्घत्वं न प्राप्नोति-गीः पूः ।। दीर्घ ।।

(लत्वोदाहरणभाष्यम्)

लत्व—लत्वं च न सिध्यति । निजेगिल्यते । "ग्रो यङि" इति लत्वं न प्राप्नोति ।।

(दोषबाधकभाष्यम्)

नैष दोषः । 'ग्र' इत्यनन्तरयोगैषा षष्ठी ।।

(दोषसाधकभाष्यम्)

एवमपि स्वर्जेगिल्यते इत्यत्राऽपि प्राप्नोति ।।

(दोषबाधकभाष्यम्)

एवं तर्हि यङा आनन्तर्यं विशेषयिष्यामः ।।

अथवा ग्र इति पञ्चमी ।। लत्व ।।

(यक्स्वरोदाहरणभाष्यम्)

यक्स्वर-यक्स्वरश्च न सिध्यति । गीर्यते स्वयमेव । पूर्यते स्वयमेव । "अचः कर्तृयकि" इत्येष स्वरो न प्राप्नोति, रेफेण व्यवहितत्वात् ।।

(दोषोद्धारभाष्यम्)

नैष दोषः । 'स्वरविधौ व्यञ्जनमविद्यमानवद्भवति[1]" इति नास्ति व्यवधानम् ।। यक्स्वर ।।

विमला - स्वरविधाविति । स्वरोद्देश्यकविधावेवैतस्याः प्रवृत्तेर्भाष्यमिदमेकदेशिनः ।

(अभ्यस्तस्वरोदाहरणभाष्यम्)

अभ्यस्तस्वर-अभ्यस्तस्वरश्च न सिध्यति । मा हि स्म ते पिपरुः । मा हि स्म ते बिभरुः । 'अभ्यस्तानामादिरुदात्तो भवति अजादौ लसार्वधातुके' इत्येष स्वरो न प्राप्नोति, रेफेण व्यवहितत्वात् ।।

नैष दोषः । 'स्वरविधौ व्यञ्जनमविद्यमानवद्भवति[1]" इति नास्ति व्यवधानम् ।। अभ्यस्तस्वर ।।

(हलादिशेषोदाहरणभाष्यम्)

हलादिशेष-हलादिशेषश्च न सिध्यति । ववृते ववृधे । अभ्यासस्येति हलादिःशेषो न प्राप्नोति । हलादिशेष ।।

---

१. 'मानवदिति' क्वचित् ।

विमला - हलादिशेषश्च न सिद्ध्यतीति । उरदित्यस्य यदि अभ्यासावयवऋ-वर्णस्यादित्यर्थः । तदा वृत् वृत् इत्यवस्थायाम्पूर्वम्पूर्वमृकारास्यादादेशे रपरत्वे वर्तवृदित्यत्र रेफस्य गर्भवदभ्यासकुक्षिप्रविष्टत्वेऽपि नावयवत्वमित्यभ्यासावयव-त्वाभावान्निवृत्तिर्न स्यात् । ऋवर्णान्ताभ्यासस्यादिरित्यर्थे तु पूर्वमभ्यासतकारस्य हलादि-शेषेण निवृत्तावुरदित्यनेनादादे शे रेफस्याभ्यासानवयवत्वाभावान्निवृत्तिर्न स्यादिति भावः ।

(विसर्जनीयप्रतिषेधोदाहरणभाष्यम्)

विसर्जनीय [प्रतिषेध[१]] । विसर्जनीयस्य च प्रतिषेधो वक्तव्यः। नार्कुटो नार्पत्यः । "खरवसानयो-र्विसर्जनीयः" इति विसर्जनीयः प्राप्नोति ।। विसर्जनीय- [प्रतिषेधः] ।।

विमला - विसर्जनीयस्य च प्रतिषेधो वक्तव्य इति । यद्यपि वक्ष्यमाणपक्षद्वयेऽप्ययं दोषः, तथाप्यभक्तत्वपक्षे दोषगणनायामुपयुज्यत एवेत्येतदभिधानमिति बोध्यम् ।

(प्रत्ययाऽव्यवस्थोदाहरणभाष्यम्)

प्रत्ययाऽव्यवस्था च । प्रत्यये च व्यवस्था न प्रकल्पते-किरतः गिरतः । रेफोऽप्यभक्तः, प्रत्ययोऽपि । तत्र व्यवस्था न प्रकल्पते ।।

विमला - व्यवस्था न प्रकल्पत इति । रेफविकरणयोरस्यैव धात्वव्यवहि-तपरत्वमस्य नेति व्यवस्थेत्यर्थः । नियामकाभावादितिभावः।

(पूर्वान्तपक्षाभ्युपगमभाष्यम्)

एवं तर्हि पूर्वान्तः करिष्यते ।

विमला - पूर्वान्त इति । पूर्वस्य समुदायस्यायमन्त इत्यर्थः ।

(३५३-पूर्वान्तपक्षे दूषणाक्षेपवार्तिकम्-११)

---

१. लुप्तं स्यात् ।

।।*।। पूर्वान्ते र्वधारणं विसर्जनीयप्रतिषेधो यकृस्वरश्च ।।*।।

(भाष्यम्)

यदि पूर्वान्तः रोरवधारणं कर्तव्यम्—"रोः सुपि" । रोरेव सुपि नान्यस्य रेफस्य[1] । सर्पिष्षु धनुष्षु । इह माभूत्—गीर्षु पूर्षु ।।

(इतरपक्षेऽपि लाघवाभावभाष्यम्)

परादावपि सत्यवधारणं कर्तव्यम्–चतुर्ष्वित्येवमर्थम् ।। [र्वधारणम्[2]] ।।

(विसर्जनीयप्रतिषेधोदाहरणभाष्यम्)

विसर्जनीयप्रतिषेधः—विसर्जनीयस्य च प्रतिषेधो वक्तव्यः । नार्कुटः । नार्पत्यः । 'खरवसानयोर्विसर्जनीय" इति विसर्जनीयः प्राप्नोति ।।

(इतरपक्षेऽपि लाघवाभावभाष्यम्)

परादावपि विसर्जनीयस्य प्रतिषेधो वक्तव्यः नार्कल्पिरित्येवमर्थम् । कल्पिपदसंघातभक्तोऽसौ नोत्सहतेऽवयवस्य पदान्ततां विहन्तुमिति (कृत्वा) विसर्जनीयः प्राप्नोति ।। [विसर्जनीयप्रतिषेधः[2]] ।।

विमला - कल्पिपदेति । ननु कल्प इञ् इति प्रत्ययसंघातरूपस्य कल्पीत्यस्य पदत्वाभावेन कल्पिपदेत्यसंगतमिति चेन्न, पदशब्देनार्थवतो विवक्षणात् । **नोत्सहते इति** । नृशब्दात्कल्पप्रत्यये निष्पन्नात् नृकल्पशब्दादिञि आद्यचो वृद्ध्या जायमानस्याणः उरण् रपर इत्यनेन रपरत्वं भवति । स च रेफो यदि परादिरितिपक्षे परस्य

---

१. 'रोरेव सुपि' 'रेफस्य' चेति क्वचिन्न । २. लुप्तं स्यात् ।

कल्पेत्यस्यादिः स्यात् तदा रेफविशिष्टस्य कल्पप्रत्ययावधिपदेन गृहीत्वा स्वादिष्वित्यनेन नामात्रस्य पदसंज्ञा स्यादिति रेफस्य पदान्तत्वाभावेन विसर्जनीयस्याप्राप्तेर्भाष्यासङ्गतिः स्यादिति परादिरित्यत्र परशब्देन परत्वाश्रयो यावान् शब्दसमुदायः स विवक्षितः । एवञ्च प्रकृते कल्पिरिति समुदायस्यैव रेफ आदिरिति पर्य्यवसितम् । तथाच रेफस्य कल्पप्रत्ययानवयवत्वेन कल्पप्रत्ययावधिपदेन कल्पप्रत्ययमात्रस्य ग्रहणे बाधकाभावेन कल्पप्रत्यये परे रेफान्तस्य स्वादिष्वित्यनेन पदसंज्ञायां रेफस्य पदान्तत्वेन प्राप्तस्य विसर्गस्य वारणाय प्रतिषेधो वक्तव्य इतिभावः । **अवयवस्येति** । रेफस्येत्यर्थः ।

(यक्स्वरोदाहरणभाष्यम्)

यक्स्वरः—यक्स्वरश्च न सिध्यति । गीर्यते स्वयमेव, पूर्यते स्वयमेव । "अचः कर्तृयकि" इत्येष स्वरो न प्राप्नोति ।।

विमला - न सिद्ध्यतीति । अजन्तत्वाभावादिति भावः ।

(दूषणबाधकभाष्यम्)

नैष दोषः । उपदेश इति वर्तते ।। [यक्स्वरः[1]] ।।

विमला - उपदेश इति वर्तते इति । तास्यनुदात्तेदित्यतः उपदेश इत्यनुवर्त्त्य उपदेशेऽजन्तानां कर्तृयकि परे आदिरुदात्तो वेति सूत्रार्थे कृते सम्प्रति रेफान्तत्वेऽपि उपदेशेऽजन्तत्वानपायात्स्वरः सिद्ध्यतीति भावः ।

(परादिपक्षाभ्युपगमभाष्यम्)

अथवा पुनरस्तु परादिः ।।

(३५४-परादिपक्षे दूषणाक्षेपवार्तिकम्- १२)

---

१. क्वचिन्न ।

।।*।। परादावकारलोपौत्वपुक्प्रतिषेध-श्चङ्युपधाह्रस्वत्व-मिटो व्यवस्थाऽभ्यासलोपोऽभ्यस्ततादिस्वरो दीर्घत्वं च[1] ।।*।।

(भाष्यम्)

यदि परादिः ।। अकारलोपः प्रतिषेध्यः । कर्ता हर्ता । "अतो लोप आर्द्धधातुके" इत्यकारलोपः प्राप्नोति ।।

(दूषणबाधकभाष्यम्)

नैष दोषः, उपदेश इति वर्तते ।।

(दूषणसाधकभाष्यम्)

यद्युपदेश इति वर्तते, 'धिनुतः, कुणुतः । अत्र लोपो न प्राप्नोति ।।

(दूषणबाधकभाष्यम्)

नोपदेशग्रहणेन प्रकृतिरभिसंबध्यते ।।

किं तर्हि ?

आर्धधातुकमभिसंबध्यते—आर्धधातुकोपदेशे यदकारान्तमिति ।। अकारलोप ।।

(औत्वोदाहरणभाष्यम्)

औत्व—औत्वं च प्रतिषेध्यम् । चकार जहार । "आत औ णलः" इत्यौत्वं प्राप्नोति ।।

---

१. ईदृश्येव व्याख्या लुप्ता स्यादिति मन्ये ।

(दोषोद्धारभाष्यम्)

नैष दोषः । 'निर्दिश्यमानस्यादेशा भवन्ति' इत्येवं न भविष्यति ॥

(आक्षेपभाष्यम्)

यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति ?

(समाधानभाष्यम्)

रेफेण व्यवहितत्वात् ॥ औत्व ॥

(पुक्प्रतिषेधोदाहरणभाष्यम्)

पुक्प्रतिषेधः—पुक् च प्रतिषेध्यः । कारयति हारयति । 'आतां पुक्' इति पुक् प्राप्नोति ॥ पुक्प्रतिषेधः ॥

(चङ्युपधाह्रस्वत्वोदाहरणभाष्यम्)

चङ्युपधाह्रस्वत्वम्—चङ्युपधाह्रस्वत्वं च न सिध्यति । अचीकरत् अजीहरत् । "णौ चङ्युपधाया ह्रस्वः" इति ह्रस्वत्वं न प्राप्नोति ॥ चङ्युपधा-ह्रस्वत्वम् ॥

(उदाहरणभाष्यम्)

इटोऽव्यवस्था-इटश्च व्यवस्था न प्रकल्पते । आस्तरिता निपरिता । इडपि परादी रेफोऽपि । तत्र व्यवस्था न प्रकल्पते ॥ इटोऽव्यवस्था ॥

(अभ्यासलोपोदाहरणभाष्यम्)

अभ्यासलोपः-अभ्यासलोपश्च वक्तव्यः । ववृते

ववृधे । 'अभ्यासस्य' इति हलादिः शेषो न प्राप्नोति ।। अभ्यासलोपः ।।

विमला - ववृते ववृधे इति । यद्युरदित्यस्याभ्यासावयव-ऋवर्णस्यादित्यर्थः । एवञ्च हलादिशेषात्पूर्वमदादेशे रपरत्वे परादित्वपक्षे रेफस्य तकारावयवत्वेनाभ्यासा-वयवत्वात् स्यादेव हलादिशेषेण निवृत्तिरिति ववृते ववृधे इत्यत्र परादित्वपक्षे न दोष इत्युच्यते तदा वव्रे इत्यत्र दोषो बोध्यः ।

(उदाहरणभाष्यम्)

अभ्यस्तस्वरः—अभ्यस्तस्वरश्च न सिध्यति । मा हि स्म ते पिपरुः, मा हि स्म ते बिभरुः । 'अभ्यस्तानामादिरुदात्तो भवत्यजादौ लसार्वधातुके' इत्येष स्वरो न प्राप्नोति ।। अभ्यस्तस्वर ।।

विमला - अभ्यस्त स्वरश्च न सिद्ध्यतीति । परादित्वपक्षे रेफस्योसोऽवयवत्वे-नाजादित्वाभावादिति भावः ।

(उदाहरणभाष्यम्)

तादिस्वरः—तादिस्वरश्च न सिद्ध्यति । प्रकर्ता प्रकर्तुम् । "तादौ च निति कृत्यतौ" इत्येष स्वरो न प्राप्नोति ।।

विमला - तादिस्वरश्च न सिद्ध्यतीति । कृत्यप्रत्ययस्य रेफादित्वेन तादित्वाभावा-दिति भावः ।

(दूषणबाधकभाष्यम्)

नैष दोषः । उक्तमेतत्—कृदुपदेशे वा ताद्यर्थ-मिडर्थम् इति ।। तादिस्वरः ।।

विमला - कृदुपदेशे वा ताद्यर्थमिति । उपदेशकालिकतादिप्रत्ययेत्यर्थप्रतीत्यर्थं कृद्ग्रहणमित्यर्थः । ननु तादृशार्थे फलाभाव इति कृद्ग्रहणं व्यर्थमेवेत्यत

आह—**इडर्थमिति** । यत्र प्रलपितेत्यादौ प्रत्ययस्येड्भवति तत्र स्वरसिद्ध्यर्थं तदावश्यकमिति भावः ।

(उदाहरणभाष्यम्)

दीर्घः—दीर्घत्वं च न सिध्यति । गीः पूः । 'रेफवकारान्तस्य धातोः' इति दीर्घत्वं न प्राप्नोति ।। दीर्घः ।। —उरण्रपरः ।।

विमला - दीर्घत्वञ्च न सिद्ध्यतीति । गीः पूरित्यादौ रेफस्येदानीं सुपोऽवयवत्वेन धातोरेफान्तत्वाभावादिति भावः । वस्तुतस्तु पूर्वसूत्रादन्तादिपदेऽनुवर्त्त्य तयोः विधेयत्वेन प्राधान्याद्रेफेऽन्वयेन पूर्वान्तपक्षपरादिपक्षयोः समर्थने सापेक्षत्वाद्रपरपदे समासो न स्यात् । सौत्रत्वात्समासकल्पनायां तु गौरवमिति यद्यन्त इति वर्तत इत्यादिभाष्यमेकदेश्युक्तिः । किन्त्ववयववाचिपरशब्देन बहुव्रीहिः । रदाभ्यामितिसूत्रस्थं रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्तत इति भाष्यमप्यत्रानुकूलम् । रेफः शिरः परावयवो यस्येत्यर्थादित्यवधेयम् ।

(परिभाषासूत्रम्)

अलोऽन्त्यस्य ।।१।१।५१।।

(अल्ग्रहणविशेषणताविचाराधिकरणम्)

(आक्षेपभाष्यम्)

किमिदमल्ग्रहणमन्त्यविशेषणम् आहोस्वित् आदेशविशेषणम् ?

(प्रश्नभाष्यम्)

किं चातः ?

(अन्त्यविशेषणत्वे दूषणभाष्यम्)

यद्यन्त्यविशेषणम्, आदेशोऽविशेषितो भवति ।। तत्र को दोषः ?

अनेकालप्यादेशोऽन्त्यस्य प्रसज्येत ।।

(आदेशविशेषणपक्षे लाघवदर्शनभाष्यम्)

यदि पुनः "अलन्त्यस्य" इत्युच्यते तत्रायमप्यर्थः— "अनेकाल्शित्सर्वस्य" इत्येतन्न वक्तव्यं भवति । इदं नियमार्थं भविष्यति–'अलेवान्त्यस्य भवति, नान्य' इति ।।

विमला - अनेकाल्शित्सर्वस्येत्यस्याकर्तव्यत्वे हेतुमाह — **इदं नियमार्थं भविष्यतीति** ।

(आदेशविशेषणत्वपक्षे आक्षेपभाष्यम्)

एवमप्यन्त्योऽविशेषितो भवति ।।

तत्र को दोषः ?

वाक्यस्यापि पदस्याप्यन्त्यस्य प्रसज्येत ।।

(अन्त्यविशेषणत्वेऽपि गौरवनिरासभाष्यम्)

यदि खल्वप्येषोऽभिप्रायस्तन्न क्रियेतेति, अन्त्यविशेषणेऽपि सति तन्न करिष्यते ।। कथम् ?

"ङिच्च, अलोऽन्त्यस्य" इत्येतन्नियमार्थं भविष्यति–'ङिदेवानेकालन्त्यस्य भवति नान्य' इति ।।

(स्थानषष्ठीविषयत्वस्थापनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते ?

(३५५-समाधानवार्तिकप्रथमखण्डम्-१)

॥*॥ अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः ॥*॥

(भाष्यम्)

अलोऽन्त्यस्येत्युच्यते, स्थाने विज्ञातस्यानुसंहारः क्रियते-स्थाने प्रसक्तस्येति[1] ।

(समाधानसाधकवार्तिकद्वितीयखण्डम्)

॥*॥ इतरथा ह्यनिष्टप्रसंगः ॥*॥

(भाष्यम्)

इतरथा ह्यनिष्टं प्रसज्येत । टित्किन्मितोऽप्यन्त्यस्य स्युः ॥

(दूषणाऽप्राप्तिसंभावनाभाष्यम्)

यदि पुनरयं योगशेषो विज्ञायेत ?

(३५६-समाधानसाधकवार्तिकम्-२)

॥*॥ योगशेषे च ॥*॥

(भाष्यम्)

योगशेषे च ॥ किम् ?

अनिष्टं प्रसज्येत । टित्किन्मितोऽप्यन्त्यस्य स्युः । तस्मात्सुष्ठूच्यते— 'अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहार इतरथा ह्यनिष्टप्रसङ्ग' इति ॥
—अलोऽन्त्यस्य ॥

---

१. इतिः क्वचिन्न ।

(परिभाषासूत्रम्)

ङिच्च ।।१।१।५३।।

(तातङि सर्वादेशत्वसाधनाधिकरणम्)

(आक्षेपभाष्यम्)

तातङ्ङन्त्यस्य स्थाने कस्मान्न भवति । "ङिच्चालोऽन्त्यस्य" इति प्राप्नोति ?

(३५७-समाधानवार्तिकम्-१)

।।*।। तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशः ।।*।।

(भाष्यम्)

तातङि ङित्करणं सावकाशम् ।।

कोऽवकाशः ?

गुणवृद्धिप्रतिषेधार्थो ङकारः । तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशो भविष्यति ।।

विमला - ङित्करणस्य सावकाशत्वादिति । गुणवृद्धिप्रतिषेधानर्थकत्वेन सावकाशत्वादित्यर्थः । एवञ्चात्र ङित्करणसामर्थ्येनान्त्यस्य तातङिति वक्तुमशक्यत्वेन ङिच्चेत्यनेनान्त्यस्य तातङ्विधाने ङिच्चेतिशास्त्रस्यापूर्वविधायकतया अनुवादत्वाभावेन परिभाषात्वं न स्यादिति परिभाषात्वविरोधान् ङिच्चेत्यस्याप्राप्तौ अनेकालित्यनेन सर्वादेशस्तातङ् भवति । यत्र तु अनङादौ ङित्करणं प्रयोजनान्तरशून्यं तत्र ङित्करणसामर्थ्यादिवान्त्यस्यादेशे सिद्धे ङिच्चेति तदनुवादकमेवेति परिभाषात्वानुकूल्यात्तत्रैव ङिच्चेति प्रवर्तते इति भावः । अधिकमत्रैवोद्योते द्रष्टव्यम् ।

(समाधानबाधकभाष्यम्)

प्रयोजनं नाम तद् वक्तव्यम्, यन्नियोगतः स्यात् । यदि चायं नियोगतः सर्वादेशः स्यात्, तत एतत्प्रयोजनं स्यात् । कुतो[१] नु खल्वेतत्—ङित्करणादयं सर्वादेशो भविष्यति, न पुनरन्त्यस्य स्यादिति ।।

विमला - न पुनरन्त्यस्येति । ङित्करणादन्त्यस्य विधाने हि अवयवे ङित्त्वस्य चारितार्थ्येन अवयवेष्वचरितार्था अनुबन्धाः समुदायस्योपकारकाः भवन्तीत्यस्य विषयाभावेन समुदायस्य प्रत्ययस्य ङित्त्वाभावाद् गुणवृद्धिनिषेधो न स्यादिति भावः ।

इति पण्डितमहेशझाशर्म्म-विरचितायाम् महाभाष्यव्याख्यायां विमलाख्यायाम्प्रथमाध्यायस्य प्रथमे पादे सप्तममाह्निकम् ।।

(समाधानसाधकभाष्यम्)

एवं तर्ह्येतदेव ज्ञापयति—न तातङ्ङन्त्यस्य स्थाने भवतीति । यदेतं ङितं करोति । इतरथा हि लोट एरुप्रकरण एव ब्रूयात्—"तिह्योस्तादाशिष्यन्यतरस्याम्" इति ।। —ङिच्च ।।

(परिभाषासूत्रम्)

आदेःपरस्य ।।१।१।५३।।

(आदिनियमतः सर्वादेशबलीयस्त्वाधिकरणम्)

(३५८-सिद्धान्तवार्तिकम्- १)

।।*।। अलोऽन्त्यस्यादेः परस्यानेकाल्-शित्सर्वस्येत्यपवादविप्रतिषेधात्सर्वादेशः ।।*।।

(भाष्यम्)

"अलोऽन्त्यस्य" इत्युत्सर्गः । तस्य "आदेः

१. 'कुत एतत् खलु' इति क्वचित् ।

परस्य", "अनेकाल् शित्सर्वस्य" इत्यपवादौ । अपवादविप्रतिषेधात् सर्वादेशी भविष्यति । "आदेः परस्य" इत्यस्यावकाशः– "द्व्यन्तरुपसर्गेभ्योऽप ईत्" । द्वीपम् अन्तरीपम् । "अनेकाल् शित् सर्वस्य" इत्यस्याऽवकाशः— "अस्तेर्भूः" भविता भवितुम् । इहोभयं प्राप्नोति– "अतो भिस ऐस्" । "अनेकाल् सर्वस्य" इत्येतद्भवति विप्रतिषेधेन ।।

"शित्सर्वस्य" इत्यस्यावकाशः— "इदम इश्" इतः इह । "आदेः परस्य" इत्यस्यावकाशः—स एव । इहोभयं प्राप्नोति—"अष्टाभ्य औश्" । "शित्सर्वस्य" इत्येतद् भवति विप्रतिषेधेन ।। —आदेः परस्य ।।

(परिभाषासूत्रम्)

अनेकाल् शित्सर्वस्य ।।१।१।५४।।

(शिद्ग्रहणप्रयोजनप्रत्याख्यानाधिकरणम्)

(आक्षेपभाष्यम्)

शित्सर्वस्येति किमुदाहरणम् ?

(उदाहरणभाष्यम्)

"इदम इश्" । इतः इह ।।

(प्रयोजनबाधकभाष्यम्)

नैतदस्ति प्रयोजनम् ।। शित्करणादेवाऽत्र सर्वादेशी भविष्यति ।।

(प्रयोजनान्तरभाष्यम्)

इदं तर्हि– "अष्टाभ्य औश्" ।।

(प्रयोजनबाधकस्मारणभाष्यम्)

ननु चाऽत्रापि शित्करणादेव सर्वादेशो भविष्यति ।।

(प्रयोजनान्तरभाष्यम्)

इदं तर्हि–"जसः शी" "जश्शसोः शिः" ।।

(प्रयोजनबाधकस्मारणभाष्यम्)

ननु चाऽत्रापि शित्करणादेव सर्वादेशो भविष्यति ।।

(प्रयोजनसाधकभाष्यम्)

अस्त्यन्यच्छित्करणे प्रयोजनम् ।।

किम् ? विशेषणार्थः शकारः[१] ।।

क्व विशेषार्थेनार्थः ?

"शि सर्वनामस्थानम्" "विभाषा ङिश्योः" इति ।।

('नानुबन्धकृतमनेकाल्त्वम्' इति परिभाषासाधनाधिकरणम्)

(वचनवैयर्थ्योपपादनभाष्यम्)

शित्सर्वस्येति शक्यमकर्तुम् ।।

कथम् ?

अन्त्यस्यायं स्थाने भवन्नप्रत्ययः स्यात् । असत्यां प्रत्ययसंज्ञायामित्संज्ञा न स्यात् । असत्यामित्संज्ञायां

---

१. क्वचिन्न ।

लोपो न स्यात् । असति लोपे अनेकाल् । यदा अनेकाल्, तदा सर्वादेशः । यदा सर्वादेशः, तदा प्रत्ययः । यदा प्रत्ययः, तदेत्संज्ञा । यदेत्संज्ञा, तदा लोपः ।।

(नानुबन्धकृतमनेकाल्त्वपरिभाषाज्ञापनभाष्यम्)

एवं तर्हि सिद्धे सति यच्छित्सर्वस्येत्याह तज्ज्ञापयत्याचार्यः—अस्त्येषा परिभाषा— "नानुबन्धकृतमनेकाल्त्वं भवति"-इति ।।

किमेतस्य ज्ञापने प्रयोजनम् ?

तत्राऽसरूपसर्वादेशदाप्प्रतिषेधेषु पृथग् निर्देशोऽनाकारान्तत्वाद् इत्युक्तम्, तन्न वक्तव्यं भवति ।। अनेकाल् ।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये
प्रथमाध्यायस्य प्रथमे पादे सप्तममाह्निकम् ।।

अथ अष्टममाह्निकम्

(अतिदेशसूत्रम्)

स्थानिवदादेशोऽनल्विधौ ।।४।४।५५।।

(पदकृत्यनिर्वचनाधिकरणम्)

(आक्षेपभाष्यम्)

वत्करणं किमर्थम् ?

विमला - वत्करणं किमर्थमिति । अयम्भावः । वत्करणाभावेऽपि स्थान्यादेश-पदयोर्य्यथाश्रुतार्थकत्वे समानविभक्तिकनामत्वेन तादात्म्यातिरिक्तसंबन्धस्याऽभावेन तादात्म्यसंबन्धस्य च बाधेनान्वयबोध एव न स्यादिति सामर्थ्यादिव स्थानिपदं स्थानिसदृशार्थकं भविष्यतीति व्यर्थं वत्करणम् । न च वत्करणाभावेऽपि स्थानी आदेशरूपं प्रतिपद्यते आदेशो वा स्थानिरूपं प्रतिपद्यते इत्यर्थः । संभवतीति वाच्यम् अस्तेर्भूरित्यादिशास्त्राणां वैयर्थ्यप्रसङ्गात् ।

(समाधानभाष्यम्)

'स्थान्यादेशोऽनल्विधौ' इतीयत्युच्यमाने[1] संज्ञा-धिकारोऽयम्, तत्र स्थानी आदेशस्य संज्ञा स्यात् ।।

तत्र को दोषः ?

"आङो यमहनः" आत्मनेपदं भवतीति वधेरेव स्याद् हन्तेर्न स्यात् । वत्करणे पुनः क्रियमाणे न दोषो भवति । स्थानिकार्यमादेशे अतिदिश्यते 'गुरुवद् गुरुपुत्रे' इति यथा ।।

विमला - संज्ञाधिकारोऽयमिति । अयम्भावः । वत्करणाभावेऽस्य संज्ञाधिकारीयत्वेन स्थानी आदेशस्य संज्ञा, आदेशो वा स्थानिनः संज्ञेत्यर्थापत्तौ, आद्ये 'आङोयमहन' इत्यात्मनेपदं भवतीति कृत्रिमाकृत्रिमन्यायेन वधरेव स्याद्धन्तेर्न्न स्यात् । न च तर्हि

१. 'इतीत्युच्यमाने' क्वचित् ।

'आङोवधयम' इत्येव वदेदिति वाच्यम्, तस्य आजघ्ने इत्यादि सकलहन्त्यादेशार्थत्वात् । द्वितीये 'अस्यतिवक्ती' ति ख्यातिपदेन चक्षिङेव गृह्येत कृत्रिमत्वात् । तथाच समचक्षिष्टेत्यत्राङ् स्यात् आख्यतेत्यत्र न स्यात् । नचैवं चक्षिङ् इत्येव ब्रूयादिति वाच्यम्, एवमपि गाङ्कुटादिसूत्रे गाङा इङ्गाङोर्ग्रहणापत्तेः । गमेरिट्परस्मैपदेष्वित्यत्रेणिङामेव ग्रहणं स्यात् । न च वत्करणाभावाधीनलाघवानुरोधेन संज्ञाप्रकरणादन्यत्रैव स्थानिवद्भावप्रकरणं क्रियतामिति वाच्यम्, तथासति आदेशग्रहणं विना वाक्यार्थानिर्वाहे बहुगौरवापत्तेः । सिद्धान्ते तु आदेशग्रहणमतिरिच्यमानमानुमानिकादेशसंग्रहार्थमिति एकदेशविकृतस्योपसंख्यानमिति वार्तिकम् प्रत्याख्यास्यते । काममतिदिश्यतामिति वक्ष्यमाणमपि वत्करणायत्तमिति दिक् ।

ननु संज्ञाप्रकरणे यदि वत्करणं विनाप्यतिदेश-लाभस्तर्हि कित् ङिदित्यादौ का गतिरिति चेदुच्यते । किदिति न संज्ञा 'न क्त्वा सेडि'ति ज्ञापकात् । नहि क्त्वः कित्संज्ञा विहिता या निषिध्येत । ननु 'मृडमृदे'ति प्राप्ता सा निषिध्यताम् वचनद्वयसार्थक्याय च विकल्पोऽस्त्विति चेन्न, मृडमृदेत्यत्रैव वाग्रहणस्य सम्भवात् । किञ्चैवं 'निष्ठाशीङि'त्यादिकं व्यर्थं स्यात् । नहि शीङादिभ्यो निष्ठायाः केन चित्संज्ञा प्राप्ता । ङिदित्यतिदेशः, कित्साहचर्य्यात् । किञ्च ङिदित्यस्य संज्ञात्वे ग्रहिज्येतिसूत्रेऽस्यैव ग्रहणं स्यात् कृत्रिमत्वात् । तथा च 'न वश' इति सूत्रं व्यर्थं स्यात् । वावश्यत इत्यत्र सम्प्रसारणाप्राप्तेः । किञ्च 'क्ङिति चे' त्यत्रास्याग्रहणं स्यात् संज्ञा स्वरूपानुच्चारणात् । तथाच 'गाङ्कुटादी' त्यत्र कुटादिग्रहणं व्यर्थं स्यादिति दिक् । **हन्तेर्न्न स्यादिति** । इदानीं हनः संज्ञात्वेन अशब्दसंज्ञेति निषेधात् । स्वरूपाग्रह- णादिति भावः ।

(आक्षेपभाष्यम्)

[1]अथादेशग्रहणं किमर्थम् ?

(प्रत्याक्षेभाष्यम्)

'स्थानिवदनल्विधौ' इतीयत्युच्यमाने क इदानीं स्थानिवत्स्यात् ?

---

१. अथेति क्वचिन्न ।

(प्रत्याक्षेपसमाधानभाष्यम्)

यः स्थाने भवति ।।

कश्च स्थाने भवति ? आदेशः ।।

(समाधानभाष्यम्)

इदं तर्हि प्रयोजनम्—आदेशमात्रं स्थानिवद्यथा स्यात् । एकदेशविकृतस्योपसंख्यानं चोदयिष्यति, तन्न वक्तव्यं भवति ।।

विमला - आदेशमात्रमिति । नन्वेरुरित्यादिकं यथाश्रुतार्थकमस्तु एकदेशविकृतस्यानन्यत्वात् पदत्वं भविष्यतीति चेन्न, अर्थवत्येव स्थान्यादेशभावविश्रान्तेर्वाच्यत्वात्तस्यैव प्रसङ्गसम्भवात् । तथाहि षष्ठीस्थाने योगेत्युक्तम् । स्थानञ्च प्रसङ्गः । स चार्थवतः, अर्थप्रत्यायनार्थं शब्दप्रयोगात् । यद्यपि च्लेः सिजादावसम्भवीदम् । तथापि सति सम्भवे अर्थप्रयुक्तप्रसङ्ग एव ग्राह्य इत्यादेशग्रहणेनैव ज्ञाप्यते । उक्तञ्च—

सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं नोपपद्यते ।। इति ।

किञ्च छिन्नपुच्छदृष्टान्तमूलकस्यास्य न्यायस्यार्द्धाधिकविकारेऽप्रवृत्तेरेरुरित्यनेनेकारस्योकारविधानेऽपि न्यायेन पदत्वं दुरुपपादमेव । यत्तु तिङ्संज्ञायास्तिबादिसूत्रोपात्तपरिच्छिन्नपरिमाणनिष्ठतया परिच्छिन्नपरिमाणार्थं वाचकशब्दानां न्यूनेऽधिके वा शास्त्रव्यापारम्विनाऽप्रवृत्तिरिति **नागेशे**नोक्तम्, तत्तु न साधीयः, परिच्छिन्नपरिमाणसमनियतधर्माणामेवानतिदेशे अङ्गसंज्ञासूत्रस्थभाष्यतात्पर्यात्, अन्यथैकदेशविकृतन्यायस्य निर्विषयत्वापत्तिः ।

(आक्षेपभाष्यम्)

अथ विधिग्रहणं किमर्थम् ?

(विधिग्रहणप्रयोजनभाष्यम्)

सर्वविभक्त्यन्तः समासो यथा विज्ञायेत[१]–अलः परस्य विधिः–अल्विधिः । अलो विधिः–अल्विधिः । अलि विधिः–अल्विधिः । अला विधिः–अल्विधिरिति ।।

विमला - अलो विधिरिति । द्युकाम इत्यत्रोकारस्य स्थानिवद्भावेन वत्वात् ककारे परे लोपो व्योर्वलीति तस्य लोपः प्राप्नोति, अनल्विधाविति निषेधान्न भवतीति भावः । न च वत्वस्य हल्त्वापेक्षया विशेषधर्मत्वेन सामान्यातिदेशे विशेषानतिदेश इति न्यायेनैव सत्वातिदेशनिषेधादलो विधौ स्थानिवद्भावनिषेधस्य नेदं फलमिति वाच्यम् । यतो हि सामान्यातिदेशे विशेषानतिदेश इति परिभाषाघटकसामान्यशब्देन यस्यकस्यचिद्ग्रहणे प्रमेयत्वादिकमादाय सर्वेषामेव विशेषधर्मत्वापत्तौ तत्र वानेन निषेधात्कस्याप्यतिदेशो न स्यादित्यतिदेशशास्त्राणां वैयर्थ्यापत्तिः । परिभाषायाः निर्मूलत्वापत्तिश्च स्यादत 'उपस्थितधर्मैस्तद्व्यापकधर्मैश्च विध्याकांक्षापूरणे तदतिरिक्तविशेषग्रहणे मानाभाव' इत्येतन्न्यायमूलायामस्यां परिभाषायां सामान्यशब्देन संग्राहकवाक्यादुपप्लुतलक्ष्यसंस्कारक-वाक्यघटकशब्दोपात्तधर्म एव सामान्यशब्देन ग्राह्यः । तदपेक्षया विशेषधर्म एव विशेषशब्देन ग्राह्यः । यथा 'आशंसायां भूतवच्चे'त्यत्र भूतत्वापेक्षया अनद्यतनत्वविशिष्टभूतत्वम् । एवञ्च प्रकृते स्थानिवदादेशसूचकं वाक्यं तत्र यत्स्थानिपदं तदुपात्तधर्मस्यैवातिदेशो नतु तद्व्याप्यस्येत्यर्थो वाच्यः । स त्वनुपयुक्तः, स्थानित्वातिदेशस्य निष्फलत्वात् । किन्तु तस्मादुपप्लुतं यत् वकारवदुकार इति वाक्यम् तद्घटकशब्दोपात्तापेक्षया विशेषधर्मत्वमेव वक्तव्यम् । तच्च वत्वे नास्तीति ।

(विधिग्रहणप्रयोजननिरासभाष्यम्)

नैतदस्ति प्रयोजनम् । प्रातिपदिकनिर्देशोऽयम् । प्रातिपदिकनिर्देशाश्चाऽर्थतन्त्रा भवन्ति, न कांचित्प्राधान्येन विभक्तिमाश्रयन्ति । तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्या ।।

१. 'विज्ञायते' इति क्वचित् ।

(विधिग्रहणप्रोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्–उत्तरपदलोपो यथा विज्ञायेत—अलमाश्रयते अलाश्रयः, अलाश्रयो विधिः अल्विधिरिति । यत्र प्राधान्येनालाश्रीयते, तत्रैव प्रतिषेधः स्यात् । यत्र विशेषणत्वेनाऽलाश्रीयते, तत्र प्रतिषेधो न स्यात् ।।

किं प्रयोजनम् ? प्रदीव्य प्रसीव्येति । वलादिलक्षण इण् मा भूदिति ।।

(सूत्रारम्भप्रयोजननिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते ?

(समाधानवार्तिकम्- १)

।।।। स्थान्यादेशपृथक्त्वादादेशे*
स्थानिवदनुदेशो
गुरुवद् गुरुपुत्र इति यथा ।।।।*

(भाष्यम्)

अन्यः स्थानी, अन्य आदेशः । स्थान्यादेशपृथक्त्वात्[१]तस्मात्कारणात् स्थानिकार्यमादेशे न प्राप्नोति ।।

तत्र को दोषः ?

"आङो यमहनः" आत्मनेपदं भवतीति हन्तेरेव स्याद्, वधेर्न स्यात् । इष्यते च—वधेरपि स्यादिति ।

१. एतस्मात्कारणादित्यपि क्वचित् ।

तच्चान्तरेण यत्नं न सिद्ध्यतीति । तस्मात्स्थानिवदनुदेशः । एवमर्थमिदमुच्यते ।। 'गुरुवद् गुरुपुत्र इति यथा' । तद्यथा—'गुरुवद्[1] गुरुपुत्रे वर्तितव्यम्' इति गुरौ यत्कार्यं तद् गुरुपुत्रेऽतिदिश्यते[2] । एवमिहापि स्थानिकार्य-मादेशेऽतिदिश्यते ।।

(सूत्रारम्भप्रयोजनबाधकभाष्यम्)

[3]नैतदस्ति प्रयोजनम् । लोकत एतत् सिद्धम् । तद्यथा – लोके यो यस्य प्रसङ्गे भवति, लभतेऽसौ तत्कार्याणि । तद्यथा—उपाध्यायस्य शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते ।।

(सूत्रारम्भप्रयोजनसाधकभाष्यम्)

यद्यपि तावल्लोक एष दृष्टान्तः । दृष्टान्तस्यापि तु पुरुषारम्भो निवर्तको भवति ।।

(आक्षेपभाष्यम्)

अस्ति वेह[4] कश्चित्पुरुषारम्भः ?

(समाधानभाष्यम्)

अस्तीत्याह ।। कः ?

स्वरूपविधिर्नाम । हन्तेरात्मनेपदमुच्यमानं हन्तेरेव स्यात्, वधेर्न स्यात् ।।

विमला - वधेर्न्न स्यादिति । अयम्भावः । यथा व्रीहिस्थानापन्नेषु नीवारेषु 'तत्स्थानापन्नस्तद्धर्मं लभते' इति न्यायेनावघातादयः क्रियन्ते तथा वधादेशेऽपि तेन न्यायेन

१. 'गुरुवदस्मिन्' इति क्वचित् ।
२. 'पुत्रे निर्दिश्यते' इति क्वचित् ।
३. इतः पूर्वं ''लोकतः'' इति वार्तिकं प्रायः लुप्तं स्यात् ।
४. 'चेह' इति क्वचित् ।

हिंसाद्यर्थबोधकत्वं भवतु । 'आङो यमहन' इत्यात्मनेपदं तु न हिंसाद्यर्थबोधकत्वप्रयुक्तम् । येन वधौ स्यात् । किन्तु 'स्वंरूपमि'ति शास्त्रात् स्वरूपप्रयुक्तमिति वचनमन्तरा वधादेशे तद्दुर्लभमिति ।

(सूत्रारम्भप्रयोजननिराकरणभाष्यम्)

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति–स्थानिवदादेशो भवतीति । यदयं "युष्मदस्मदोरनादेशे" इत्यादेशे प्रतिषेधं[1] शास्ति ।।

कथं कृत्वा ज्ञापकम् ?

युष्मदस्मदोर्विभक्तौ कार्यमुच्यमानं कः प्रसङ्गो यदादेशेऽपि[2] स्यात् ? पश्यति त्वाचार्यः— स्थानिवदादेशोभवतीति । अत आदेशे प्रतिषेधं शास्ति ।।

विमला - ननु माभून्न्यायेन वधादेशे आत्मने पदम् । 'युष्मदस्मदोरनादेशे' इति ज्ञापकात्तु भविष्यतीत्याशङ्कते— **एवन्तर्हीति** ।

(सूत्रारम्भप्रयोजनदर्शिभाष्यम्)

इदं तर्हि प्रयोजनम् । अनल्विधाविति प्रतिषेधं वक्ष्यामीति । इह मा भूत्—द्यौः पन्थाः स इति ।।

(सूत्रारम्भप्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति—अल्विधौ स्थानिवद्भावो न भवतीति, यदयम्— "अदो जग्धिर्ल्यप् ति किति" इति 'ति किति' इत्येव सिद्धे ल्यब्ग्रहणं करोति । तस्मान्नार्थोऽनेन योगेन ।

१. 'इत्यादेशप्रतिषेधं' इति क्वचित् । २. अपीति क्वचिन्न ।

विमला - अल्विधौ स्थानिवद्भावो न भवतीति । उपलक्षणमिदमप्राधान्येनाप्यलाश्रयणे निषेध इत्यंशस्यापि । **तस्मान्नार्थोऽनेन योगेनेति** । भाष्यमिदमेकदेशिनः । सिद्धान्ते तु उत्तरार्थं स्थानिवदादेश इति कर्तव्यमेव । तस्यैव योगविभागमात्रेणोपपत्तौ अर्थापत्तिवचनं न कल्प्यम् । एवमनल्विधावित्यप्यंशः स्पष्टप्रतिपत्तये क्रियते । उत्तरसूत्रे द्वितीय विधिग्रहणस्यानुवृत्त्यर्थञ्च । तत्प्रयोजनं तु तत्रैव वक्ष्यते । इत्येव ध्वनयन्नाह— **आरभ्यमाणेऽप्येतस्मिन् योग इति** ।

(सूत्रसत्त्वेऽनल्विधिग्रहणवैयर्थ्यनिराकरणाधिकरणम्)

(आक्षेपवार्तिकशेषभाष्यम्)

आरभ्यमाणेऽप्येतस्मिन् योगे—

(३६०-वैयर्थ्याक्षेपवार्तिकप्रथमखण्डम्-१)

।।*।। अल्विधौ प्रतिषेधेऽविशेषणेऽप्राप्तिस्तस्याऽदर्शनात् ।।*।।

(भाष्यम्)

अल्विधौ प्रतिषेधेऽसत्यपि, विशेषणे समाश्रीयमाणे, असति तस्मिन् विशेषणे अप्राप्तिर्विधेः । प्रदीव्य प्रसीव्य ।।

किं कारणम् ?

तस्याऽदर्शनात् । वलादेरित्युच्यते । न चाऽत्र वलादिं पश्यामः ।।

विमला - अल्विधौ प्रतिषेधेऽसत्यपीति । समुदायद्वारावयवे प्रश्नः । अप्राधान्येनालाश्रयणेऽपि निषेधार्थं क्रियमाणे विधिग्रहणेऽसत्यपीत्यर्थः । **विशेषणे समाश्रीयमाणे इति** । विधिशास्त्रेऽल्विशेषणे समाश्रीयमाणे सतीत्यर्थः । यथा 'आर्द्धधातुकस्येड्वलादेरि'त्यत्र वलादेरिति । **असति तस्मिन् विशेषणे इति** । प्रयोगे तस्मिन् विशेषणेऽसतीत्यर्थः । यथा प्रदीव्येत्यत्रार्द्धधातुके ल्यपि वलादिविशेषणं नास्ति ।

अप्राप्तिर्विधेरिति । तत्र प्रयोगे विधिशास्त्रं सुतरां न प्रवर्तेतेति तदर्थं विधिग्रहणं न कर्तव्यमिति भावः ।

(वैयर्थ्यबाधकभाष्यम्)

ननु चैवमर्थ एवायं यत्नः क्रियते– अन्यस्य कार्य-मुच्यमानमन्यस्य यथा स्यादिति ।।

(वैयर्थ्यसाधकभाष्यम्)

सत्यम् । एवमर्थः, न तु प्राप्नोति ।। किं कारणम् ?

(३६०-वैयर्थ्याक्षेपसाधकवार्तिकद्वितीयखंडम्- २)

।।*।। सामान्यातिदेशे हि[1] विशेषानतिदेशः ।।*।।

(भाष्यम्)

सामान्ये ह्यतिदिश्यमाने विशेषो नातिदिष्टो भवति । तद्यथा—'ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यम्' इति सामान्यं यद् ब्राह्मणकार्यं, तत् क्षत्रियेऽतिदिश्यते । यद्विशिष्टं माठरे कौण्डिन्ये वा, न तदतिदिश्यते । एवमिहापि यत्सामान्यं[2] प्रत्ययकार्यं तदतिदिश्यते, यद्विशिष्टं वलादेरिति न तदतिदिश्यते ।।

(वैयर्थ्यबाधकसिद्धान्तिभाष्यम्)

यद्येवम्, अग्रहीत् । "इट ईटि" इति सिचो लोपो न प्राप्नोति ।। अनल्विधाविति पुनरुच्यमाने इहापि प्रतिषेधो भविष्यति—प्रदीव्य प्रसीव्येति । विशिष्टं ह्येषोऽलमाश्रयते वलं नाम । इह च प्रतिषेधो न भविष्यति अग्रहीदिति, विशिष्टं ह्येषोऽनलमाश्रयते इटं नाम ।।

---

१. क्वचिद्धिनास्ति । २. 'सामान्यं यत्' इति क्वचित् ।

(आक्षेपवार्तिकादिशेषभाष्यम्)

यदि तर्हि सामान्यमप्यतिदिश्यते, विशेषश्च ।।

(३६१-आक्षेपसाधकवार्तिकप्रथमखण्डम्-१)

।।।। सत्याश्रये विधिरिष्टः ।।*।।*

(भाष्यम्)

सति च वलादित्वे इटा भवितव्यम् । अरुदिताम् । अरुदितम् । अरुदित ।

(उक्ताशयानभिज्ञभाष्यम्)

किमतो, यत्सति भवितव्यम् ?

(३६१-आक्षेपवार्तिकद्वितीयखण्डम्-२)

।।।। प्रतिषेधस्तु प्राप्नोत्यल्विधित्वात् ।।*।।*

(भाष्यम्)

प्रतिषेधस्तु प्राप्नोति ।। किं कारणम् ?

अल्विधित्वात् । अल्विधिरयं भवति । तत्राऽनल्विविधाति प्रतिषेधः प्राप्नोति ।

(३६२-सिद्धान्तिसमाधानवार्तिकम्-४)

।।।। न वाऽऽनुदेशिकस्य प्रतिषेधादितरेण भावः ।।*।।*

(भाष्यम्)

न वा एष दोषः ।। किं कारणम् ?

आनुदेशिकस्य प्रतिषेधात् । अस्त्वत्राऽऽनुदेशिकस्य वलादित्वस्य प्रतिषेधः । स्वाश्रयमत्र वलादित्वं भविष्यति ।

(शङ्कितृभाष्यम्)

नैतद्विंवदामहे वलादिर्न वलादिरिति ।।

किं तर्हि ?

स्थानिवद्भावात् सार्वधातुकत्वमेषितव्यम् ।।

विमला - न वानुदेशिकस्येति । अतिदेशशास्त्रप्रयोज्यस्येत्यर्थः । वलादित्वस्येतिशेषः । **प्रतिषेधादिति** । प्रतिषेधेपीत्यर्थः । **इतरेण** । आनुदेशिकातिरिक्तेन स्ववृत्तिधर्मेण । **भावः** = कार्यम् । भविष्यतीत्यध्याहारः । **सार्वधातुकत्वमेषितव्यमिति** । अयम्भावः । यद्रूपवैकल्यादुपदेशाप्रवृत्तावतिदेशो मृग्यते तद्रूपस्य स्थान्यल्साधारणधर्मत्वेऽनेन स्थानिवद्भावनिषेधः । अरुदितामित्यादौ तु आदेशस्य स्वतो वलादित्वात् न वलादित्वप्रयुक्तोपदेशशास्त्राप्रवृत्तिः, किन्तु सार्वधातुकत्ववैकल्यप्रयुक्तैव सार्वधातुकत्वन्तु न स्थान्यलसाधारणम्, अलितरेऽपि सत्त्वात् । अतोऽत्र न स्थानिवद्भावनिषेध इति ।

(आक्षेपोपसंहारभाष्यम्)

तत्राऽनल्विधाविति प्रतिषेधः प्राप्नोति ।।

(स्थान्यलाश्रयविधौ प्रतिषेधसाधनाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरादेशिन्यल्याश्रीयमाणे प्रतिषेधो भवत्याहोस्विदविशेषेण आदेशे, आदेशिनि च ?

विमला - अलि स्थानिसंबन्धमजानानः शङ्कते— **तत्राऽनल्विधावितीति** । सार्वधातुकत्वातिदेशफलभूतस्येडागमस्य वलाश्रयत्वादल्विधित्वमेवेति पूर्वपक्षिणो भावः ।

(भाष्यम्)

कश्चाऽत्र विशेषः ?

(३६३-प्रथमपक्षाक्षेपवार्तिकम्-५)

॥॥ आदेश्यल्विधिप्रतिषेधे कुरु वधपिबां गुणवृद्धिप्रतिषेधः ॥*॥*

(भाष्यम्)

आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां[1] गुणवृद्ध्योः प्रतिषेधो वक्तव्यः ॥

कुर्वित्यत्र स्थानिवद्भावादङ्गसंज्ञा, स्वाश्रयं च लघूपधत्वम्, तत्र लघूपधगुणः प्राप्नोति ॥

वधकमित्यत्र स्थानिवद्भावादङ्गसंज्ञा, स्वाश्रयं चाऽऽदुपधत्वम्, तत्र वृद्धिः प्राप्नोति ॥

पिबेत्यत्र स्थानिवद्भावादङ्गसंज्ञा, स्वाश्रयं च लघूपधत्वम्[2], तत्र [लघूपध[3]]गुणः प्राप्नोति ॥

विमला - स्वाश्रयमिति । स्वपदेनादेशो विवक्षितः । आदशवृत्तीत्यर्थः । **गुणवृद्ध्योः प्रतिषेधो वक्तव्य इति ।** अनल्विधाविति निषेधस्य स्थानिसम्बन्ध्यल्विधावेव प्रवृत्तिस्वीकारे अङ्गसंज्ञायाः अल्मात्रवृत्तित्वाभावेन अनल्विधाविति निषेधाप्रवृत्तौ स्थानिवद्भावेनाङ्गत्वमादाय कुर्वित्यादौ प्राप्तस्य लघूपधगुणादेः प्रतिषेधार्थमपूर्वं प्रतिषेधवचनमारब्धव्यम् । यस्य तु अविशेषेणाल्विधौ निषेध इति मतम् तस्य उपधात्वस्यालघटितत्वेन तस्यादेशवृत्तित्वेऽपि तद्धर्मावच्छिन्नोद्देश्यताके लघूपधगुणादौ कर्तव्ये अनल्विधाविति निषेधस्वीकारेण प्रतिषेधवचनं नारब्धव्यमिति लाघवमिति भावः ।

(द्वितीयपक्षाङ्गीकारभाष्यम्)

अस्तु तर्ह्यविशेषेण—आदेश आदेशिनि च ॥

विमला - अविशेषेणेत्यस्य व्याख्यानमादेशे आदेशिनि चेति ।

---

१. 'वधकपिबां' इत्यपि क्वचित् ।

२. 'लघूपधात्वं' इत्यपि क्व० । ३. क्वचिन्न ।

(द्वितीयपक्षाक्षेपवार्तिकम्)

।।*।। आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानम् ।।*।।

(भाष्यम्)

आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानं कर्तव्यम् ।।

सुप्—वृक्षाय प्लक्षाय । स्थानिवद्भावात्सुप्संज्ञा[1], स्वाश्रयं च यञादित्वं, तत्र प्रतिषेधः प्राप्नोति । सुप् ।।

तिङ्—अरुदिताम् । अरुदितम् । अरुदित । स्थानिवद्भावात्सार्वधातुकसंज्ञा, स्वाश्रयं च वलादित्वं, तत्र प्रतिषेधः प्राप्नोति । तिङ् ।।

[2]कृदतिदिष्टं – भुवनं सुवनं धुवनम् । स्थानिवद्भावात्प्रत्ययसंज्ञा, स्वाश्रयं चाऽजादित्वं, तत्र प्रतिषेधः प्राप्नोति ।।

(तटस्थाक्षेपभाष्यम्)

किं पुनरत्र ज्यायः ?

(समाधानभाष्यम्)

आदेशिन्यल्याश्रीयमाणे प्रतिषेध इत्येतदेव[3] ज्यायः ।। कुत एतत् ?

तथा ह्ययं विशिष्टं स्थानिकार्यमादेशेऽतिदिशति—'गुरुवद् गुरुपुत्रे' इति यथा । तद्यथा—'गुरुवदस्मिन्गुरुपुत्रे

---

१. 'भावादङ्गसंज्ञा, सुप्तत्वञ्च स्वाश्रयं' इति क्वचित् ।

२. इतः पूर्वं 'कृत्' इति क्व० ।

३. 'इत्येतदत्र ज्यायः' इति क्व० ।

वर्तितव्यमन्यत्रोच्छिष्टभोजनात्पादोपसंग्रहणाच्च' इति । यदि च गुरुपुत्रोऽपि गुरुर्भवति । तदपि कर्तव्यं भवति ।।

(प्रथमपक्षाभ्युगमभाष्यम्)

अस्तु तर्ह्यादेशिन्यल्याश्रीयमाणे प्रतिषेधः ।।

(उक्ताक्षेपस्मारणभाष्यम्)

ननु चोक्तम्—"[1]आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः' इति ।।

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः । "करोतौ [2]तपरनिर्देशात् सिद्धम्" । पिबिरदन्तः । वधकमिति नायं ण्वुल् । अन्योऽयमकशब्दः किदौणादिकः, रुचक इति यथा ।।

विमला - करोतौ तपरनिर्देशात्सिद्धमिति । अयम्भावः 'अत उत्सार्वधातुके' 'इत्यत्रादेशे आदेशिनि चोभयत्र तपरकरणं कृतम् । तत्रादेशिनि तपरकरणादेवान्तरतम्यादादेशो मातृक एव भविष्यतीति आदेशे तपरकरणं शास्त्रान्तरेणापि प्राप्तस्य भिन्नकालस्य निवृत्त्यर्थमिति कुर्वित्यादौ न लघूपधगुणापत्तिः । नचैवं कुर्यादित्यादावपि दीर्घाप्रसङ्गेन 'नभकुर्छुरामि' त्यत्र कुरो ग्रहणं व्यर्थमिति वाच्यम् । गुणस्य सपादसप्ताध्यायीस्थत्वेन सिद्धतया तपरकरणेन निवृत्तावपि 'र्वोरि' ति दीर्घस्य त्रिपादीस्थत्वेनासिद्धतया तपरकरणेन निषेधासम्भवात् । तत्रेति । तस्मिन् सतीत्यर्थः ।

(एकदेशविकृतन्यायाधिकरणम्)

(३६५-आक्षेपवार्तिकम्-७)

।।।। एकदेशविकृतस्योपसंख्यानम् ।।*।।*

(भाष्यम्)

---

१. 'आदेशिन्यल्विधि' इति क्व० । २. 'तपरकरणनि०' इति क्वचित् ।

एकदेशविकृतस्योपसंख्यानं कर्तव्यम् ।। किं प्रयोजनम् ?।।

पचतु पचन्तु[1] । तिङ्ग्रहणेन ग्रहणं यथा स्यात् ।।

(३६६ समाधानवार्तिकम्-८)

।।।। एकदेशविकृतस्यानन्यत्वात्सिद्धम् ।।*।।*

(भाष्यम्)

'एकदेशविकृतमनन्यवद्भवति' इति तिङ्ग्रहणेन ग्रहणं भविष्यति । तद्यथा— श्वा कर्णे[2] पुच्छे वा छिन्ने श्वैव भवति, नाश्वो न गर्दभ इति ।।

(३६७-एकदेश्याक्षेपसाधकवार्तिकम्-९)

।।।। अनित्यविज्ञानं तु तस्मादुपसंख्यानम् ।।*।।*

(भाष्यम्)

अनित्यविज्ञानं तु भवति । नित्याः शब्दाः । नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । तत्र स एवायं विकृतश्चेत्येतन्नित्येषु शब्देषु[3] नोपपद्यते । तस्मादुपसंख्यानं कर्तव्यम् ।।

(ऋष्यन्तरसंवादभाष्यम्)

भारद्वाजीयाः पठन्ति—

(भारद्वाजीयवार्तिकम्)

।।।। एकदेशविकृतेषूपसंख्यानम् ।।*।।*

(भाष्यम्)

---

१. केषाञ्चिन्मते वार्तिकमेतत् । २. 'कर्णे वा' इति क्व० ।

३. इदं क्वचिदेव दृश्यते ।

एकदेशविकृतेषूपसंख्यानं कर्तव्यम् ।।

किं प्रयोजनम् ?

पचतु पचन्तु[1] । तिङ्ग्रहणेन ग्रहणं यथा स्यात् ।।

किंच कारणं न स्यात् ?

(भारद्वाजीयवार्तिकम्)

।।।। अनादेशत्वात्[2] ।।*।।*

(भाष्यम्)

आदेशः स्थानिवदित्युच्यते । न चेमे आदेशाः ।।

(भारद्वाजीयवार्तिकम्)

।।।। रूपान्यत्वाच्च[2] ।।*।।*

(भाष्यम्)

अन्यत्खल्वपि रूपं — पचतीति, अन्यत्पचत्विति ।।

(आक्षेपनिराकरणभाष्यम्)

इमेऽप्यादेशाः ।। कथम् ?

आदिश्यते यः स आदेशः । इमे चाप्यादिश्यन्ते ।।

(३६८-आक्षेपसाधकवार्तिकम्-१०)

।।।। आदेशः स्थानिवदिति चेन्नानाश्रितत्वात्[2] ।।*।।*

(भाष्यम्)

आदेशः स्थानिवदिति चेत् । तन्न ।।

---

१. वार्तिकमिदमित्यन्ये ।   २. भाष्यमिदमित्यन्ये ।

किं कारणम् ? अनाश्रितत्वात् ।

योऽत्रादेशो नासावाश्रीयते । यश्चाश्रीयते नासावादेशः ।।

(आक्षेपबाधकभाष्यम्)

नैतन्मन्तव्यम्—'समुदाये आश्रीयमाणेऽवयवो नाश्रीयते' इति । अभ्यन्तरो हि समुदायस्यावयवः ।

तद्यथा—वृक्षः प्रचलन्सहावयवैः प्रचलति ।।

विमला - नैतन्मन्तव्यमिति । अयम्भावः । तिङ्निबन्धना हि पदसंज्ञा तिङ्त्वन्तु तिबाद्यन्यतमत्वम् । तत्र तित्वम्, तकारोत्तरत्वविशिष्टेत्वम् । एवञ्च 'एरु' रित्यस्य यथाश्रुतार्थकत्वेऽपि उकारे स्थानिवद्भावेनेत्वमागमिष्यति तकारस्तु विद्यत एवेति तित्वमार्थसमाजग्रस्तमिति सिद्धा पदसंज्ञेति ।

(३६९-आक्षेपवार्तिकम्-११)

।।।। आश्रय[1] इति चेदल्विधिप्रसंगः ।।*।।*

(भाष्यम्)

आश्रय इति चेदल्विधिरयं भवति । तत्रानल्विधाविति प्रतिषेधः प्राप्नोति ।।

(आक्षेपबाधकभाष्यम्)

नैष दोषः । नैवं सति कश्चिदनल्विधिः स्यात् । उच्यते चेदमनल्विधाविति । तत्र प्रकर्षगतिर्विज्ञास्यते—साधीयो योऽल्विधिरिति ।।

कश्च साधीयः ?

---

१. 'आश्रीयते' ।

यत्र प्राधान्येनालाश्रीयते । यत्र नाऽन्तरीयकोऽलाश्रीयते नासावल्विधिरिति ॥

(सिद्धान्तिसमाधानभाष्यम्)

अथवोक्तमादेशग्रहणस्य प्रयोजनम्—आदेशमात्रं स्थानिवद्यथा स्यादिति ॥

(शब्दनित्यत्वेऽप्यनुपपत्तिपरिहाराधिकरणम्)

(३७०-आक्षेपवार्तिकम्-१२)

॥॥ अनुपपन्नं स्थान्यादेशत्वं नित्यत्वात्[1] ॥*॥*

(भाष्यम्)

स्थानी आदेश इत्येतन्नित्येषु शब्देषु नोपपद्यते ॥

किं कारणम् ?

नित्यत्वात्[1] । स्थानी हि नाम— यो भूत्वा न भवति । आदेशो हि नाम—योऽभूत्वा भवति । एतच्च नित्येषु शब्देषु नोपपद्यते—यत्सतो नाम विनाशः स्यात् असतो वा प्रादुर्भाव इति ॥

(३७१-समाधानवार्तिकम्-१३)

॥॥ सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वेऽपि स्थानशब्दप्रयोगात् ॥*॥*

(भाष्यम्)

सिद्धमेतत् । कथम् ?

[2]यथा लौकिकवैदिकेषु कृतान्तेषु अभूतपूर्वेऽपि

१. क्वचिन्नित्यशब्दत्वादिति ।

२. इतः पूर्वं ''यथा लौकिकवैदिकेष्वभूतपूर्वेऽपि स्थानशब्दप्रयोगात्'' इति लुप्तं स्यात् ।

स्थानशब्दप्रयोगो[१] वर्तते । लोके तावत्— 'उपाध्यायस्य स्थाने शिष्यः' इत्युच्यते, न च तत्र उपाध्यायो भूतपूर्वो भवति ।। वेदेऽपि—सोमस्य स्थाने पूतीकतृणान्यभिषुणुयाद्' इत्युच्यते । न च तत्र सोमो भूतपूर्वो भवति ।।

विमला - पूतीकतृणानि । पर्णकण्टकशून्यानि स्नुहीसदृशानि ।

(३७२समाधानान्तरवार्तिकम्-१४)

॥*॥ *कार्यविपरिणामाद्वा सिद्धम्* ॥*॥

(भाष्यम्)

अथ वा कार्यविपरिणामात्सिद्धमेतत् ।।

किमिदं कार्यविपरिणामादिति ?

कार्या बुद्धिः सा विपरिणम्यते ।।

(प्रयोगासिद्धिभाष्यम्)

ननु च[२] कार्याविपरिणामादिति भवितव्यम् ।।

(प्रयोगसाधकभाष्यम्)

सन्ति चैव ह्यौत्तरपदिकानि ह्रस्वत्वानि ।

(प्रयोगसाधकयुक्त्यन्तरभाष्यम्)

अपि च "बुद्धिः संप्रत्यय" इत्यनर्थान्तरम् । [३]कार्यः संप्रत्ययः । कार्यस्य संप्रत्ययस्य[४] विपरिणामः—कार्यविपरिणामः, कार्यविपरिणामादिति ।।

(समाधानान्तरबाधकभाष्यम्)

---

१. 'प्रयोग' शब्दः क्वचिन्न । २. 'च' इति क्वचिन्न ।

३. इतः पूर्वं 'कार्या हि बुद्धिः' इति क्वचिदधिकः । ४. 'संप्रत्ययो' ।

परिहारान्तरमेवेदं मत्वा पठितम् ।।

(उपपत्तिप्रश्नभाष्यम्)

कथं वेदं[1] परिहारान्तरं स्यात् ?।।

(समाधानान्तरबाधकभाष्यम्)

यदि भूतपूर्वे स्थानशब्दो वर्तते ।।

(समाधानान्तरसाधकभाष्यम्)

भूतपूर्वे चापि स्थानशब्दो वर्तते ।।

कथम् ?

बुद्ध्या । तद्यथा कश्चित्कस्मैचिदुपदिशति—'प्राचीनं ग्रामादाम्राः' इति । तस्य सर्वत्राम्रबुद्धिः प्रसक्ता । ततः पश्चादाह—'ये क्षीरिणोऽवरोहवन्तः पृथुपर्णास्ते न्यग्रोधाः' इति । स तत्राऽऽम्रबुद्ध्या न्यग्रोधबुद्धिं प्रतिपद्यते । स ततः पश्यति बुद्ध्या आम्रांश्चापकृष्यमाणान् न्यग्रोधांश्चोपधीयमानान् । नित्या एव च स्वस्मिन्विषये आम्राः, नित्याश्च न्यग्रोधाः । बुद्धिस्त्वस्य विपरिणम्यते । एवमिहाप्यस्तिरस्मा अविशेषेणोपदिष्टः । तस्य सर्वत्रास्तिबुद्धिः प्रसक्ता । सः 'अस्तेर्भूः'' इत्यनेनास्ति[2]बुद्ध्या भवतिबुद्धिं प्रतिपद्यते । स ततः पश्यति—बुद्ध्या अस्तिं चापकृष्यमाणं, भवतिं चोपधीयमानम्[3], नित्य एव च स्वस्मिन्विषयेऽस्तिर्नित्यो भवतिश्च । बुद्धिस्त्वस्य विपरिणम्यते ।।

---

१. क्वचिच्चेदमिति ।

२. 'भवतीत्यस्ति' इति क्वचित् ।

३. 'चाऽधीयमानम्' इति क्वचित् ।

विमला - तत्रेति । न्यग्रोधेष्वित्यर्थः । **आम्रबुद्ध्या इति** । आम्रबुद्धेरनन्तरम् । आम्रबुद्धिम्विहायेत्यर्थो वा ।

(३७३-समाधानान्तरवार्तिकम्-१५)

॥॥ अपवादप्रसंगस्तु स्थानिवत्त्वात् ॥*॥*

(भाष्यम्)

अपवादे उत्सर्गकृतं प्राप्नोति । "कर्मण्यण्" । "आतोऽनुपसर्गे कः" इति । केऽपि अणिकृतं प्राप्नोति ।

किं कारणम् ? स्थानिवत्त्वात् ॥

(आक्षेपबाधकभाष्यम्)

॥॥ उक्तं वा[1] ॥*॥*

किमुक्तम् ?

विषयेण तु नानालिङ्गकरणात् सिद्धम् इति ॥

अथ वा—

(३७४-समाधानवार्तिकम्-१७)

॥॥ सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात् ॥*॥*

(भाष्यम्)

सिद्धमेतत् ॥ कथम् ?

षष्ठीनिर्दिष्टस्यादेशः स्थानिवदिति वक्तव्यम् ॥

(आक्षेपभाष्यम्)

१. भाष्यमिदमित्यन्ये ।

तत्तर्हि षष्ठीनिर्दिष्टग्रहणं कर्तव्यम् ?

(समाधानभाष्यम्)

न कर्तव्यम् । प्रकृतमनुवर्तते ।।

क्व प्रकृतम् ? 'षष्ठी स्थानेयोगा' इति ।।

अथ वा आचार्यप्रवृत्तिर्ज्ञापयति-नापवादे उत्सर्गकृतं भवतीति यदयं श्यन्नादीन्[1] कांश्चिच्छितः करोति । श्यन् श्नम् श्ना शः श्नुरिति ।।

विमला - कापवादस्य टकः विशेषापेक्षज्ञापकत्वे आह—अथवेति ।

(स्थानिवत्त्वप्राप्तदूषणनिराकरणाधिकरणम्)

(३७५-आक्षेपवार्तिकम्-१८)

।।।। तस्य दोषस्तयादेश उभयप्रतिषेधः ।।*।।*

(भाष्यम्)

तस्यैतस्य लक्षणस्य दोषः । तयादेश उभयप्रतिषेधो वक्तव्यः । उभये देवमनुष्याः । तयपो ग्रहणेन ग्रहणात् जसि विभाषा प्राप्नोति ।।

विमला - दोष इति । अतिव्याप्तिरित्यर्थः ।

(आक्षेपनिराकरणसिद्धान्तिभाष्यम्)

नैष दोषः । अयच् प्रत्ययान्तरम् ।।

(आक्षेपसाधकभाष्यम्)

यदि प्रत्ययान्तरम्, उभयीति ईकारो न प्राप्नोति ।।

---

१. 'श्यन्नादीनां' इति क्वचित् ।

(आक्षेपबाधकभाष्यम्)

मा भूदेवम् । मात्रच इत्येवं भविष्यति ।। कथम् ? मात्रजिति नेदं प्रत्ययग्रहणम् ।। किं तर्हि ? प्रत्याहारग्रहणम् ।। क्व सन्निविष्टानां प्रत्याहारः ? मात्रशब्दात्प्रभृति आ अयचश्चकारात् ।।

विमला - मात्रशब्दादिति । एवञ्च ङीब्विधौ तयपो ग्रहणं गोबलीवर्दन्यायेन स्पष्टार्थमेवेति बोध्यम् ।

(आक्षेपसाधकभाष्यम्)

यदि प्रत्याहारग्रहणम्, 'कति तिष्ठन्ति' अत्रापि प्राप्नोति ।।

(आक्षेपबाधकभाष्यम्)

'अत' इति वर्तते ।।

(आक्षेपसाधकभाष्यम्)

एवमपि 'तैलमात्रा घृतमात्रा' अत्रापि प्राप्नोति ।।

(आक्षेपबाधकभाष्यम्)

सदृशस्याऽप्यसंनिविष्टस्य न भवति प्रत्याहारग्रहणेन ग्रहणम् ।।

(३७६-आक्षेपवार्तिकम्-९)

।।*।। जात्याख्यायां वचनातिदेशे[1] स्थानिवद्भावप्रतिषेधः ।।*।।

(भाष्यम्)

---

१. क्वचिद् 'वचनादेशे' .

जात्याख्यायां वचनादेशे स्थानिवद्भावस्य प्रतिषेधो वक्तव्यः । व्रीहिभ्य आगत इत्यत्र "घेर्ङिति" इति गुणः प्राप्नोति ।।

(आक्षेपनिरासभाष्यम्)

नैष दोषः । उक्तमेतत् अर्थातिदेशात्सिद्धम् इति ।।

विमला - अर्थातिदेशात्सिद्धमिति । बहुवचनशब्दो हि बहूनां वचनम्प्रतिपादनमिति व्युत्पत्त्यार्थपरः । तथाच एकोऽप्यर्थो वा बहुवद्भवतीतिन्यायेनैकस्मिन्नर्थे बह्वर्थतादात्म्यमतिदिश्यत इति भावः ।

(३७७-आक्षेपवार्तिकम्-२०)

।।।। ङ्याब्ग्रहणेऽदीर्घः ।।*।।*

(भाष्यम्)

ङ्याब्ग्रहणेऽदीर्घ आदेशो न स्थानिवदिति वक्तव्यम् ।। किंप्रयोजनम् ?

निष्कौशाम्बिः[१] । अतिखट्वः[१] । ङ्याब्ग्रहणेन ग्रहणात्सुलोपो मा भूदिति ।।

विमला - ङ्याब्ग्रहणेऽदीर्घ इति । ङ्याप्स्थानिको दीर्घभिन्न आदेशो न स्थानिवदित्यर्थः ।

(आक्षेपबाधकभाष्यम्)

ननु च दीर्घादित्युच्यते ।।

(आक्षेपसाधकलाघवभाष्यम्)

---

१. वार्तिकमिदमित्यन्ये ।

तन्न वक्तव्यं भवति ।।

(तटस्थाक्षेपभाष्यम्)

किं पुनरत्र ज्यायः ?

(तटस्थाक्षेपसमाधानभाष्यम्)

स्थानिवद्भावप्रतिषेध[1] एव ज्यायान् । इदमपि सिद्धं भवति—अतिखट्वाय अतिमालाय । "याडापः" इति याड् न भवति ।।

(आक्षेपभाष्यम्)

अथेदानीमसत्यपि स्थानिवद्भावे दीर्घत्वे कृते पिच्चासौ भूतपूर्व इति कृत्वा[2] याट् कस्मान्न भवति ?

(समाधानभाष्यम्)

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति ।।

(आक्षेपभाष्यम्)

ननु चेदानीं सत्यपि स्थानिवद्भावे एतया परिभाषया शक्यमिहोपस्थातुम् ।।

(समाधानभाष्यम्)

नेत्याह । न तर्हीदानीं क्वचिदपि स्थानिवद्भावः स्यात् ।।

(तृतीयाक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम् ।।

(समाधानभाष्यम्)

---

१. 'भाव' शब्दः क्वचिन्न । २. इतः परं 'याडाप् इति' क्वचिदधिकः ।

न वक्तव्यम् ।। प्रश्लिष्टनिर्देशात्सिद्धम्[१] ।। प्रश्लिष्टनिर्देशोऽयम्, ङी-ई ईकारान्तात् । आ आप् आकारान्तादिति ।।

(३७८-आक्षेपवार्तिकम्- २१)

।।।। आहिभुवोरीट्प्रतिषेधः ।।*।।*

(भाष्यम्)

आहिभुवोरीट्प्रतिषेधो वक्तव्यः । आत्थ अभूत् । अस्तिब्रूग्रहणेन ग्रहणादीट् प्राप्नोति ।।

(आह्यंशे आक्षेपनिराकरणभाष्यम्)

आहेस्तावन्न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति— नाहेरीड् भवतीति । यदयम्— "आहस्थः" इति झलादिप्रकरणे थत्वं शास्ति ।।

(ज्ञापकबाधकभाष्यम्)

नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ।। किम् ?

भूतपूर्वगतिर्यथा विज्ञायेत झलादिर्यो भूतपूर्व इति ।।

(ज्ञापकसमाधानभाष्यम्)

यद्येवं थवचनमनर्थकं स्यात् । आथिमेवायमुच्चारयेत्— "ब्रुवः पञ्चानामादित आथो ब्रुवः" इति ।।

(भ्वंशेऽप्याक्षेपनिराकरणभाष्यम्)

---

१. वार्तिकमिदमित्यन्ये ।

भवतेश्चापि न वक्तव्यः । "अस्ति स्सिचोऽपृक्ते" इति द्विसकारको निर्देशः । अस्तेः सकारान्तादिति ॥

विमला - द्विसकारको निर्देश इति । तथा च सकारान्तादेवास्तेः परस्येड्विधानान्न दोष इति भावः । नन्वत्र कीदृशो निर्देशः । न तावत् '**अस्स्तिसिचोऽपृक्ते**' अस्स् इत्यस्य धातुत्वाभावेन श्तिबनापत्तेः । पदमध्यप्रविष्टेन सकारेण सिचो विशेषणासम्भवे सिजाश्रयस्येटः प्रसक्तेश्च । नचास्तेः सान्तत्वेन विशेषणसामर्थ्यात् सिच्प्रयुक्तोपीड्नेतिवाच्यम्, तथापि स्वतन्त्रस्य भवतेरतिप्रसङ्गस्य दुर्वारत्वात् । तथा चार्थभेदाभावेऽपि स्वतन्त्रास्वतन्त्राभ्याम् भूभ्याम् अभूवीत्, अभूदितिरूपद्वयापत्तिः । यत्तु पूर्वोक्तदोषवारणाय **माधवाचार्य्यै**रुक्तम् – सिचोऽल्पाच्कत्वाद्बहुविषयत्वेनाभ्यर्हितत्वाच्च पूर्वनिपाते कर्तव्ये अस्तिसिच इति विपरीतकरणात् विद्यमानात्सिच इत्यर्थो लभ्यते । अतएव श्तिप्प्रयोगोऽपि सार्थकः । अन्यथासिजस्भ्यामित्येव ब्रूयात् । नचैवमसतावस्यतौ च व्यभिचारः, विकरणव्यवधानेन ताभ्याम्परस्यापृक्तसार्वधातुकस्यासम्भवादिति । तच्चिन्त्यम् । द्विसकारको निर्देश इति भाष्याक्षरस्वारस्यविरोधात् । नापि '**सिच्च अस्** चेति समाहारद्वन्द्वे सिचस् । अयस्मयादित्वेन भत्वान्न कुत्वजश्त्वे ततो विद्यमानार्थकास्तिपदेन अस्ति च तत् सिचश्चेतिकर्मधारयः । तथाच । विद्यमानात्सिचः, विद्यमानास्तेश्च परस्येडागमो नेति युक्तम् । द्विसकारको निर्देशइति भाष्याक्षरस्वारस्यविरोधात् । यदपि अस्तिसिच इति सूत्रपाठः । सकारस्य देहलीदीपन्यायेनोभयत्र संबन्धः । तथाच सकारान्तादस्तेः श्रूयमाणसकारान्तात्सिचश्च परस्येत्यर्थ इति न श्तिप्प्रत्ययानुपपत्तिः । नवा द्विसकारको निदेश इति भाष्याक्षरस्वारस्यविरोध इति **नागेशे**नोक्तम् तदपि नातिरमणीयम् । यतोहि, द्विसकारको निर्देशः किं सूत्रकृता कृतः उत भवद्भिः करणीयः ? नाद्यः । तथा सति समाधानस्य पूर्वमेवज्ञातत्वेनाक्षेपवार्तिकोत्थानानुपपत्तिः । नान्त्यः । तथासति पाणिनेर्न्यूनतापत्तिः । किञ्च अस्तिस्सिच इति सूत्रपाठे तकारोत्तरेकारस्य संयोगपरत्वेन गुरुतया सम्प्रदायावगतलघुतोच्छिद्येत । किन्तु अस्तिसिचस्स् इतिच्छेदः । एकस्य सकारस्य संयोगान्त लोपः । न च लुप्तविभक्तिकं स् इति पदम् न चैतत्संयोगान्तम् । तथा च संयोगान्तं यत्पदम् तस्य विधीयमानो लोपः कथमिह स्यादितिवाच्यम्, संयोगान्तस्य सतः

पदान्तस्येत्यर्थाश्रयणात् । नचोक्तार्थाश्रयणेन संयोगान्तलोपोपपादनेऽपि तस्यासिद्धत्वाद्रोरुत्वं दुर्लभमेवेति वाच्यम् । 'संयोगान्तलोपो रोरुत्वे' इति वार्तिकेन हरिवो मेदिनं त्वेत्यादिवदसिद्धत्वनिषेधात् । संयोगान्तं यत्पदमित्यर्थे तु प्रकृते संयोगान्तलोपाभावेऽपि द्वयोः सकारयोरुत्वे 'अतो रो' रित्यनेनैक एवोकारो भविष्यति, विधेयविशेषणस्यैकत्वस्य पश्वैकत्ववद्विवक्षितत्वात् रोरिति जातिपरनिर्देशेनातः परत्वस्य पूर्वत्वस्य च सम्भवात् । जातिपरत्वे प्रकृतनिर्देश एव प्रमाणम् । न च परत्वाद्धशि चेति प्रथमस्यैव रोरुः स्यादिति वाच्यम्, रुत्वस्यासिद्धतया हश्परत्वाभावात् । न चाश्रयात् सिद्धत्वमिति वाच्यम्, स्थान्यंशे तथात्वेऽपि निमित्तभूतहशंशे तदसम्भवात् । एवञ्च 'अस्ति सिचोऽपृक्ते' इत्येव सूत्रपाठः । द्विसकारको निर्देश इति भाष्यन्तु व्याख्यानगम्यद्विसकारक इत्यर्थकम् । एवञ्च व्याख्यानात् पूर्वशङ्का, व्याख्यानेन च तस्याः निवृत्तिरिति न महर्षीणां न्यूनतेत्यवधेयम् । केचित्तु 'असस्ऽस्ति सिचः' इत्येवं पदविभागे स्तीत्यस्य सप्तम्यन्तत्वेनापृक्तविशेषणत्वे सकारान्तादस्तेः सिचश्च परस्य सकारतकारादेरपृक्तस्येडागम इत्यर्थः एकस्य सकारस्य लोपः । तत्र लोपमजानतः सकारान्तस्येत्यर्थाज्ञानेन शङ्का । असस् इत्येवं सकारद्वयज्ञानेन सकारान्तस्येत्यर्थ बोधनेन च समाधानमिति वदन्ति ।

(३७९-आक्षेपवार्तिकम्-२२)

।।*।। *वध्यादेशे वृद्धितत्त्वप्रतिषेधः* ।।*।।

(भाष्यम्)

वध्यादेशे वृद्धितत्त्वयोः प्रतिषेधो वक्तव्यः । वधकं पुष्करमिति । स्थानिवद्भावाद् वृद्धितत्त्वे प्राप्नुतः ।।

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः । उक्तमेतत्—"नायं ण्वुल्, किंतु अन्योऽयमकशब्दः किदौणादिको रुचक इति यथा" ।।

(३८०-आक्षेपवार्तिकम्-२३)

॥*॥इड्विधिश्च ॥*॥

(भाष्यम्)

इड्विधेयः । आवधिषीष्ट । "एकाच उपदेशेऽनुदात्तात्" इतीट्प्रतिषेधः[१] प्राप्नोति ॥

विमला - इड्विधिश्चेति । इड्विधिसिद्ध्यर्थमेकाच उपदेशेऽनुदात्तादिति तन्निषेधे कर्तव्ये स्थानिवद्भावप्रतिषेधो वक्तव्य इत्यर्थः । आवधिषीष्टेत्यत्र वधादेशस्य स्थानिवद्भावेनाङ्गतया 'एकाच' इतीड्निषेधः प्राप्नोतीति भावः । ननु वधादेशस्य स्थानिवद्भावेनाङ्गत्वेऽप्यनुदात्तत्वाभावादिड् निषेधाप्राप्तिः । न च स्थानिवद्भावेनानुदात्तत्वं स्यादिति वाच्यम्, अल्विधाविति निषेधादिति चेन्न, स्थानेऽन्तरतमपरिभाषयाऽनुदात्तस्य हनः स्थानेऽनुदात्तस्यैव वधादेशस्य विधानात् ।

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः । आद्युदात्तनिपातनं करिष्यते । स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति ॥

(प्रत्याक्षेपभाष्यम्)

एवमप्युपदेशिवद्भावो वक्तव्यः । यथैव हि निपातनस्वरः प्रकृतिस्वरं बाधते एवं प्रत्ययस्वरमपि बाधेत— आवधिषीष्टेति ॥

विमला - उपदेशिवद्भावो वक्तव्य इति । आर्धधातुके लिङि वधादेशो विधीयते वधादेशोत्तरं तस्य निपातनस्वरेण भाव्यम् । प्रत्ययस्वरस्तु ततः पूर्वमेव लिङ आर्धधातुकसंज्ञाकाले वधादेशकाले वा प्राप्नोति । एवञ्च निपातस्वरस्य पश्चात्कालिकत्वेन सतिशिष्टत्वात् प्रकृतिस्वरबाधकत्वमिव प्रत्ययस्वरबाधकत्वमपि स्यादिति भावः । **यथैवेति** । अस्यान्यथेत्यादिः । **प्रकृतिस्वरम्** । प्रकृतितः स्थान्यनुरूपतया प्राप्तमनुदात्तत्त्वमित्यर्थः । **बाधेतेति** । एवञ्चाद्युदात्तत्वनिपातनमुपदेशिवद्भाववचनञ्च

---

१. 'ईट्' इति क्वचिन्न ।

कर्तव्यमिति तदपेक्षया लाघवेन इड्विधिप्रतिषेधे स्थानिवद्भावनिषेधवचनमेव क्रियतामित्याक्षेपतात्पर्यम् ।

(आक्षेपपरिहारभाष्यम्)

नैष दोषः । आर्धधातुकीयाः सामान्येन भवन्ति अनवस्थितेषु प्रत्ययेषु । तत्रार्धधातुकसामान्ये वधिभावे कृते सतिशिष्टत्वात् प्रत्ययस्वरो भविष्यति ॥

विमला - सामान्येन भवन्तीति । अस्यैव व्याख्या—अनवस्थितेषु प्रत्ययेष्विति । प्रत्ययस्वरो भविष्यतीति । एवञ्चाद्युदात्तत्वनिपातने उपदेशिवद्भाववचनाकरणेन लाघवात् स्थानिवद्भाववचनप्रत्याख्यानमेव वरमिति भावः । ननु वधादेशस्याद्युदात्तत्वनिपातनेऽपि स्थान्युपदेशेऽनुदात्तत्वादिट्प्रतिषेधो दुर्वार एवेति चेन्न । 'एकाच उपदेश' इतिसूत्रे एकग्रहणेनोपदेशत्वावच्छेदेनैवानुदात्तत्वस्य विवक्षितत्वात् । एवञ्च स्थान्युपदेशेऽनुदात्तत्वेप्यधुनाऽऽदेशोपदेशे उदात्तत्वान्न दोष इति भावः । नचैवमेकग्रहणस्य सार्थकत्वे शितपा शपेतिपरिभाषाज्ञापकत्वं न स्यादितिवाच्यम् । 'शीङः सार्वधातुके गुणः' 'दीङोयुडचीत्यादिसानुबन्धकनिर्देशानामेव तत्परिभाषाज्ञापकत्वात् । वस्तुतस्तु वधादेशस्यादन्तत्वादादेशोपदेशेऽनेकाच्त्वादिड्निषेधो न भविष्यतीत्याद्युदात्तत्वनिपातनम् । 'आर्धधातुके इति ल्लिङीति' च विषयसप्तमीत्वकल्पनं किमर्थमिति न जानीमः ।

(३८१-आक्षेपवार्तिकम्-२४)

॥*॥ आकारान्तान्नुकुषुक्प्रतिषेधः ॥*॥

(भाष्यम्)

आकारान्तान्नुकुषुकोः प्रतिषेधो वक्तव्यः । विलापयति । भापयते । लीभीग्रहणेन ग्रहणान्नुकुषुकौ प्राप्नुतः ॥

(आक्षेपपरिहारकभाष्यम्)

[नैष दोषः[१]] लीभियोः प्रश्लिष्टनिर्देशात्सिद्धम्[२] ।। लीभियोः प्रश्लिष्टनिर्देशोऽयम्—ली ई ईकारान्तस्येति, भीई ईकारान्तस्येति च ।।

(३८२-आक्षेपवार्तिकम्-२५)

।।*।। लोडादेशे शाभावजभावधित्वहिलोपैत्वप्रतिषेधः ।।*।।

(भाष्यम्)

एषां लोडादेशे प्रतिषेधो वक्तव्यः ।। शिष्टात् । हतात् । भिन्तात् । कुरुतात् । स्तात् । लोडादेशे कृते शाभावो जभावो धित्वं हिलोप एत्त्वमित्येते विधयः प्राप्नुवन्ति ।।

(आक्षेपपरिहारभाष्यम्)

नैष दोषः । इदमिह संप्रधार्यम्— लोडादेशः क्रियताम्, एते विधय इति । किमत्र कर्तव्यम् ?

परत्वाल्लोडादेशः ।।

(आक्षेपभाष्यम्)

अथेदानीं लोडादेशे कृते पुनः प्रसङ्गविज्ञानात् कस्मादेते विधयो न भवन्ति ?

(आक्षेपबाधकभाष्यम्)

"सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव" इति कृत्वा ।।

(३८३-आक्षेपवार्तिकम्-२६)

---

१. इदं क्वचिन्न । २. वार्तिकमिदमित्यन्ये ।

।।*।। त्रयादेशे स्रन्तप्रतिषेधः ।।*।।

(भाष्यम्)

त्रयादेशे स्रन्तस्य प्रतिषेधो वक्तव्यः । 'तिसृणाम्' । तिसृभावे कृते "त्रेस्त्रयः" इति त्रयादेशः प्राप्नोति ।

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः । इदमिह संप्रधार्यम्—तिसृभावः क्रियताम्, त्रयादेश इति । किमत्र कर्तव्यम् ? परत्वात्तिसृभावः ।।

(आक्षेपभाष्यम्)

अथेदानीं तिसृभावे कृते पुनःप्रसङ्गविज्ञानात् त्रयादेशः कस्मान्न भवति ?

(समाधानभाष्यम्)

सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ।।

(३८४-आक्षेपवार्तिकम्-२७)

।।*।। आम्विधौ च ।।*।।

(भाष्यम्)

आम्विधौ च स्रन्तस्य प्रतिषेधो वक्तव्यः । 'चतस्रस्तिष्ठन्ति' । चतसृभावे कृते "चतुरनडुहो-रामुदात्तः" इत्याम् प्राप्नोति ।।

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः । इदमिह संप्रधार्यम्—चतसृभावः

क्रियताम्, "चतुरनडुहोरामुदात्तः" इत्यामिति । किमत्र कर्तव्यम् ? परत्वाच्चतसृभावः ।।

(आक्षेपभाष्यम्)

अथेदानीं चतसृभावे कृते पुनःप्रसङ्गविज्ञानाद् आम् कस्मान्न भवति ?

(समाधानभाष्यम्)

सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ।।

(३८५-आक्षेपवार्तिकम्-२८)

।।।। स्वरे वस्वादेशे ।।*।।*

(भाष्यम्)

स्वरे वस्वादेशे प्रतिषेधो वक्तव्यः ।। विदुषः पश्य । "शतुरनुमो नद्यजादी" अन्तोदात्तादित्येष स्वरः प्राप्नोति ।।

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः । 'अनुमः' इति प्रतिषेधो भविष्यति ।।

(अनुपपत्तिभाष्यम्)

'अनुम' इत्युच्यते, न चात्र नुमं पश्यामः ।।

(अनुपपत्तिपरिहारभाष्यम्)

अनुम इति नेदमागमग्रहणम् ।। किं तर्हि ? प्रत्याहारग्रहणम् ।। क्व सन्निविष्टानां प्रत्याहारः ? उकारात्प्रभृत्या नुमो मकारात् ।।

(अनिष्टापत्तिभाष्यम्)

यदि प्रत्याहारग्रहणं 'लुनता' 'पुनता' अत्रापि प्राप्नोति ।।

(अनिष्टापत्तिवारणभाष्यम्)

अनुमृग्रहणेन न शत्रन्तं विशेष्यते ।।

किं तर्हि ? शतैव विशेष्यते—शता योऽनुम्क इति ।।

अवश्यं चैतदेवं विज्ञेयम् । आगमग्रहणे हि सतीह प्रसज्येत—मुञ्चता मुञ्चत इति ।।

(३८६-आक्षेपवार्तिकम्-२९)

।।।। गोः पूर्वणित्वात्वस्वरेषु ।।*।।*

(भाष्यम्)

गो पूर्वणित्त्वात्वस्वरेषु प्रतिषेधो वक्तव्यः । चित्रग्वग्रं शबलग्वग्रम् । "सर्वत्र विभाषा गोः" इति विभाषा पूर्वत्वं प्राप्नोति ।।

(दूषणप्रथमाक्षेपनिराकरणभाष्यम्)

नैष दोषः । एङ इति वर्तते । तत्रानल्विधाविति प्रतिषेधो भविष्यति ।

(समाधाननिरासभाष्यम्)

एवमपि 'हे चित्रगो अग्रम्' अत्र प्राप्नोति ।।

(द्वितीयतृतीयाक्षेपभाष्यम्)

णित्त्वम्—चित्रगुः चित्रगू चित्रगवः । "गोतो णित्" इति णित्त्वं प्राप्नोति ।।

आत्वम्—चित्रगुं पश्य शबलगुं पश्य । "आ गोतः[१]–" इत्यात्वं प्राप्नोति ॥

(द्वितीयतृतीयाक्षेपवारणभाष्यम्)

नैष दोषः—तपरकरणात्सिद्धम्[२] । तपरकरण-सामर्थ्यात् णित्त्वात्वे न भविष्यतः ॥

(आक्षेपभाष्यम्)

स्वर—बहुगुमान् । "न गोश्वन्सावर्ण—" इति प्रतिषेधः प्राप्नोति ॥

(३८७-आक्षेपवार्तिकम्-३०)

॥*॥ करोतिपिब्योः प्रतिषेधः ॥*॥

(भाष्यम्)

करोतिपिबत्योः[३] प्रतिषेधो वक्तव्यः । कुरु पिबेति । स्थानिवद्भावाल्लघूपधगुणः प्राप्नोति ॥

(आक्षेपनिराकरणवार्तिकम्)

॥*॥ उक्तं वा ॥*॥

(भाष्यम्)

किमुक्तम् ?

"करोतौ तपरकरणनिर्देशात्सिद्धम्" । "पिबिरदन्तः" इति ॥ [स्थानिवदादेशोऽनिल्वधौ ॥५५॥]

---

१. 'आ ओतः' इति क्वचित् । २. वार्तिकमिदमित्यन्ये ।

३. 'पिब्योः' इति क्वचित् ।

(अतिदेशसूत्रम्)

अचः परस्मिन् पूर्वविधौ ।।१।१।५६।।

(पदकृत्यनिर्वचनाधिकरणम्)

(अथ अच्पदप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अच इति किमर्थम् ?

(प्रयोजनप्रदर्शनभाष्यम्)

प्रश्नी विश्नः । द्यूत्वा स्यूत्वा । आक्राष्टाम् । आगत्य ।। प्रश्नी विश्न इत्यत्र छकारस्य शकारः परनिमित्तकस्तस्य स्थानिवद्भावात् "छे च" इति तुक् प्राप्नोति । 'अच' इति वचनान्न भवति ।।

(दोषवारणभाष्यम्)

नैतदस्ति प्रयोजनम् । क्रियमाणेऽपि वाऽज्ग्रहणेऽवश्यमत्र तुगभावे यत्नः कर्तव्यः । अन्तरङ्गत्वाद्धि तुक् प्राप्नोति ।।

विमला - यत्नः । स तुग्निर्देशरूपः । **कर्तव्य इति** । एवञ्च शकारादेशस्य परनिमित्तकत्वेन स्थानिवद्भावेऽपि ह्रस्वस्य तुका व्यवधानाच्छेचेत्यस्याप्रवृत्त्याऽच इत्यस्याभावेऽपि विश्न इत्यादौ न दोष इति भावः ।

(द्वितीयप्रयोजनोपपादनभाष्यम्)

इदं तर्हि प्रयोजनम्—द्यूत्वा स्यूत्वा । वकारस्य ऊठ् परनिमित्तकः । तस्य स्थानिवद्भावादचीति यणादेशो न प्राप्नोति । अच इति वचनाद्भवति ।।

(दोषवारणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । स्वाश्रयमत्राऽचूत्वं भविष्यति ॥

अथवा योऽत्रादेशो नाऽसावाश्रीयते, यश्चाश्रीयते नाऽसावादेशः ॥

विमला - अतिदिश्यमानधर्मविरुद्ध स्वाश्रयधर्मप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात्पक्षान्तरमाह- **अथवेति** ।

(तृतीयप्रयोजनोपपादनभाष्यम्)

इदं तर्हि प्रयोजनम्—आक्राष्टाम् । सिचो लोपः परनिमित्तकः । तस्य स्थानिवद्भावात्— "षढोः कः सि" इति कत्वं प्राप्नोति । 'अच' इति वचनान्न भवति ॥

(दूषणनिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । वक्ष्यत्येतत्-पूर्वत्रासिद्धे न स्थानिवदिति ॥

(अखण्डितप्रयोजनभाष्यम्)

इदं[1] तर्हि प्रयोजनम्—आगत्य । अभिगत्य । अनुनासिकलोपः परनिमित्तकः, तस्य स्थानिवद्भावद्ध्रस्वस्येति तुङ् न प्राप्नोति ॥ 'अच' इति वचनाद्भवति ॥

(परस्मिन्नित्येतत्प्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ परस्मिन्निति किमर्थम् ?

(प्रयोजनभाष्यम्)

१. 'एवं' इति क्वचित् ।

युवजानिः, वधूजानिः[1] । द्विपदिका । वैयाघ्रपद्यः । आदीध्ये ॥

(प्रथमप्रयोजनोपपादनभाष्यम्)

युवजानिः वधूजानिरिति,– "जायाया निङ्" न परनिमित्तकः । यस्य स्थानिवद्भावाद् 'वलि' इति यलोपो न प्राप्नोति । परस्मिन्निति वचनाद्भवति ॥

(प्रथमप्रयोजननिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम् । स्वाश्रयमत्र वल्त्वं भविष्यति ॥ अथवा योऽत्रादेशो नासावाश्रीयते । यश्चाश्रीयते नासावादेशः ॥

विमला - अत्रापि अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्त-कार्यभावस्यातिदेश-स्वभावसिद्धत्वादाह—**अथवेति** । **योऽत्रादेश इति** । आदेशोऽत्र निङ्ङिति समुदायः नासौ वलिलोपे आश्रीयते । यश्च वलिलोपे आश्रीयते नकारः नासावादेशः । न चादेशावयवोप्यादेशपदेन ग्रहीतुं शक्यते । तस्यापि गौणवृत्त्याऽऽदेश पदबोध्यत्वादिति युक्तम्। मुख्ये सम्भवति गौणग्रहणस्यान्याय्यत्वात् । एवञ्च परस्मिन्नित्यस्याभावेऽपि बलिलोपस्यादेशप्रयुक्तत्वाभावेन आदेशप्रयुक्तं नेत्यभावातिदेशस्याप्राप्तेः । युवजानिरित्यत्र न दोष इति भावः ।

(प्रयोजनदर्शिभाष्यम्)

इदं तर्हि प्रयोजनम्–द्विपदिका त्रिपदिका । पादस्य लोपो न परनिमित्तकः[2], तस्य स्थानिवद्भावात् पद्भावो न प्राप्नोति । परस्मिन्निति वचनाद्भवति ॥

विमला - **पद्भावो न प्राप्नोतीति** । द्वौ द्वौ पादौ ददातीत्यर्थे '**तद्धितार्थेति**' समासे '**पादशतस्य संख्यादेर्वीप्सायां वुँल्लोपश्चे**' ति वुँल्लोपौ युगपदेव

---

१. क्वचिन्न । २. 'अपरनिमित्तकः' ।

विहितावित्यपरनिमित्तको लोप: परस्मिन्नित्यस्याभावे स्थानिवत्स्यात् । तथाचाकारेण व्यवधानात्पा-च्छब्दान्ताङ्गाभावेन '**पाद:पदि**' ति पद्भावो न स्यादिति भाव: ।

(द्वितीयप्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । पुनर्लोपवचनसामर्थ्यात् स्थानिवद्भावो न भविष्यति ।।

(तृतीयप्रयोजनोपपादनभाष्यम्)

इदं तर्हि प्रयोजनम्—वैयाघ्रपद्यः ।।

(प्रयोजनबाधकाक्षेपभाष्यम्)

ननु चाऽत्रापि पुनर्वचनसामर्थ्यादेव न भविष्यति ।।

(प्रयोजनसाधकभाष्यम्)

अस्ति ह्यन्यत्पुनर्लोपवचने प्रयोजनम् ।।

किम् ? यत्र भसंज्ञा न—व्याघ्रपात् श्येनपादिति ।।

(चतुर्थप्रयोजनोपपादनभाष्यम्)

इदं चाप्युदाहरणम्—आदीध्ये आवेव्ये । इकारस्यैकारो न परनिमित्तकः । तस्य स्थानिवद्भावाद् "यीवर्णयोर्दीधीवेव्योः" इति लोपः प्राप्नोति । परस्मिन्निति वचनान्न भवति ।।

विमला - परस्मिन्नितिवचनान्न भवतीति । परस्मिन्नित्युक्तौ एत्वस्य परिनिमित्तकत्वाभावेन स्थानिवद्भावाप्राप्त्येकारपरत्वाभावेन 'दीधीवेव्योरन्त्यस्य लोप: स्याद्यकारे इवर्णे च परे' इत्यर्थकस्य '**यीवर्णयोरि**' ति सूत्रस्याप्रवृत्तेर्लोपो न भवतीति भाव: ।

इति परस्मिन्नित्येतत्प्रयोजननिरूपणम् ।

(पूर्वविधिग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ पूर्वविधाविति किमर्थम् ?

(समाधानभाष्यम्)

हे गौः । बाभ्रवीयाः । नैधेयः ।।

(प्रथमप्रयोजनोपपादनभाष्यम्)

हे गौरित्यौकारः परनिमित्तकः । तस्य स्थानिवद्भावाद् "एङ्ह्रस्वात्संबुद्धेः" इति लोपः प्राप्नोति । पूर्वविधाविति वचनान्न भवति ।।

(प्रयोजननिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति— 'न संबुद्धिलोपे स्थानिवद्भावो भवति' इति । यदयम् "एङ्ह्रस्वात्संबुद्धेः" इत्येङ्ग्रहणं करोति ।।

(प्रयोजनसाधकभाष्यम्)

नैतदस्ति ज्ञापकम् । गोऽर्थमेतत् स्यात् ।।

(प्रयोजनबाधकज्ञापकाशयान्तरभाष्यम्)

यत्तर्हि प्रत्याहारग्रहणं करोति । इतरथा हि 'ओह्रस्वाद्' इत्येव ब्रूयात् ।।

(द्वितीयप्रयोजनोपपादनभाष्यम्)

इदं तर्हि प्रयोजनम्—बाभ्रवीयाः माधवीयाः । वान्तादेशः परनिमित्तकः, तस्य स्थानिवद्भावाद्

"हलस्तद्धितस्य" इति यलोपो न प्राप्नोति । पूर्वविधाविति वचनाद्भवति ।।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । स्वाश्रयमत्र हल्त्वं भविष्यति ।। अथ वा—योऽत्रादेशो नासावाश्रीयते, यश्चाश्रीयते नाऽसावादेशः ।।

(तृतीयप्रयोजनोपपादनभाष्यम्)

इदं तर्हि प्रयोजनम्—नैधेयः । आकारलोपः परनिमित्तकः । तस्य स्थानिवद्भावाद् द्व्यज्लक्षणो ढग् न प्राप्नोति । पूर्वविधाविति वचनाद्भवति ।।

(इति पूर्वविधिग्रहणप्रयोजननिरूपणम्)

(अथ विधिग्रहणप्रयोजननिरूपणम्)

(आक्षेपभाष्यम्)

अथ विधिग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

सर्वविभक्त्यन्तः समासो यथा विज्ञायेत—पूर्वस्य विधिः पूर्वविधिः, पूर्वस्माद्विधिः पूर्वविधिरिति ।।

(अथ पञ्चमीसमासप्रयोजननिरूपणम्)

(आक्षेपभाष्यम्)

कानि पुनः पूर्वस्माद्विधौ स्थानिवद्भावस्य[1] प्रयोजनानि ?

(प्रयोजनोद्देशभाष्यम्)

---

१. 'भावे' इति क्वचित् ।

बेभिदिता चेच्छिदिता । माथितिकः । अपीपचन् ।। बेभिदिता चेच्छिदितेति । अकारलोपे कृते एकाज्लक्षण इट्प्रतिषेधः प्राप्नोति । स्थानिवद्भावान्न भवति ।।

(द्वितीयप्रयोजनोपपादनभाष्यम्)

माथितिक इत्यकारलोपे कृते "तान्तात्कः" इति कादेशः प्राप्नोति । स्थानिवद्भावान्न भवति ।।

(तृतीयप्रयोजनोपपादनभाष्यम्)

अपीपचन्नित्येकादेशे कृते 'अभ्यस्ताज्झेर्जुस् भवति' इति जुस्भावः प्राप्नोति । स्थानिवद्भावान्न भवति ।।

विमला - एकादेशे कृते इति । अन्तेरकारस्य चङकारस्य च **'अतो गुणे'** इति पररूपादेशे कृते इत्यर्थः ।

(उक्तप्रयोजननिराकरणभाष्यम्)

नैतानि सन्ति प्रयोजनानि । कुतः ? प्रातिपदिकनिर्देशोऽयम् । प्रातिपदिकनिर्देशाश्चाऽर्थतन्त्रा भवन्ति, न काञ्चित्प्राधान्येन विभक्तिमाश्रयन्ति[१] । तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते, सा साऽऽश्रयितव्या ।।

विमला - अर्थतन्त्रा इति । स्वार्थमात्रबोधकविभक्त्यधीना इत्यर्थः । **प्राधान्येन विभक्तिमिति** । विशिष्य प्रकृतार्थान्वययोग्यविभक्त्यर्थमित्यर्थः । **तत्रेति** । तस्मिन् सतीत्यर्थः । **निर्दिष्टे** । बोधिते । **यां यां विभक्तिमिति** । पश्चादन्वययोग्यविभक्त्यर्थाकांक्षायाम् यद्यद्विभक्त्यर्थमन्वयित्वेनाश्रयितुं लक्ष्यानुसाराद्बुद्धिरुपजायते सा सा

१. 'माश्रयन्ते' इति क्वचित् ।

विभक्तिरध्याहार्या साधुत्वार्थमुत्पन्नविभक्तेस्तु लुगितिभावः । न च प्रत्ययाध्याहारस्यान्यत्रादृष्टत्वादिदमसङ्गतमिति वाच्यम्, '**मा भे र्मा संविक्था**' इति पुरोडासावदानमन्त्रस्य धानासूहे '**मा भैष्ट मा संविग्ध्वमि**'ति दर्शनात् । **साश्रयितव्येति** । यद्यपि अनेकविभक्त्याऽऽश्रयणाभावेऽपि सम्बन्धसामान्ये षष्ठीं कृत्वा कार्यित्वनिमित्तत्वयोः संबन्धत्वेन भाने विधिग्रहणं विनापि समासद्वयस्य फलं लभ्यते तथापि स्पष्टप्रतिपत्त्यर्थं तत्तद्विभक्त्याश्रयणमेव कृतं भगवतेति बोध्यम् ।

(विधिग्रहणप्रयोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम् । विधिमात्रे स्थानिवद्भावो[1] यथा स्यात् । अनाश्रीयमाणायामपि प्रकृतौ-वाय्वोरध्वर्य्वोः, "लोपो व्योर्वलि" इति यलोपे मा भूदिति ॥

विमला - विधिमात्रे इति । मात्रं कात्स्न्र्ये । शास्त्रीये अशास्त्रीये चेति तदर्थः । मात्रपदग्राह्यमशास्त्रीकार्य्यं विशिनष्टि—**अनाश्रीयमाणायामपि प्रकृताविति** । अपिशब्देनाश्रीयमाणप्रकृतिकस्य शास्त्रीयकार्यस्य ग्रहणम् । प्रकृतावित्यस्य स्थानिनीत्यर्थः अशास्त्रीयकार्य्ये स्थानिवद्भावस्य प्रयोजनं दर्शयति—**वाय्वोरध्वर्य्वोरिति** । **यलोपो माभूदिति** । इदमत्रावधेयम् । शास्त्रतात्पर्याविषयं यत्कार्यं तदेवाशास्त्रीयकार्यम्, लोपो व्योर्वलीतिशास्त्रतात्पर्यं यलोपेऽस्ति नतु यलोपाभावे इति यलोपाभावस्याशास्त्रीयकार्यत्वेऽपि विधिग्रहणसामर्थ्यात् तस्मिन्कर्तव्येऽपि वाय्वोरित्यादौ स्थानिवद्भावे यलोपाभावः सिद्ध्यति ।अत्र च कार्ये प्रकृतेः स्थानिनः उकारादेराश्रयणं नास्तीत्यनाश्रीयमाणायां प्रकृताविति विशेषणं संगच्छते । ननु अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावस्यातिदेशस्वभावसिद्धतया वाय्वोरित्यादावतिदिश्यमानाच्त्वविरुद्धवल्त्वनिमित्तकस्वाश्रयधर्मप्रयुक्तकार्यस्य तत एव निवृत्तिसम्भवे विधावितियोगविभागेन स्थानिवदेवेतिनियमाश्रयणेन स्वाश्रयकार्यवारणं कैयटनागेशयोरनुचितमिति चेन्न, अयोगवाहानामकारोपरि पाठेनाच्त्वस्य शर्षु पाठेन हल्त्वस्य च सत्त्वेनाच्त्वह-

---

१. 'भावो' इति क्वचिन्न ।

ल्त्वयोरविरुद्धत्वेनातिदेशस्वभावेन स्वाश्रयकार्यनिवृत्तेरसम्भवेन ज्ञापकाश्रयणस्यावश्यकत्वात् । युक्तञ्चैतत् । नपदान्तेति सूत्रे द्विर्वचनादिग्रहणमेवाभावातिदेशे ज्ञापकम् । विधिग्रहणं तु पूर्वस्यैव विधौ स्थनिवन्नतु पूर्वपरयोर्विधाविति ज्ञापनार्थम् । द्विर्वचनादिग्रहणस्य प्रत्याख्यानेऽपि पूर्वसूत्रादेव विधावित्यस्यानुवृत्तावनुवृत्तिसामर्थ्यादेव स्थानिवदेव न तु स्वाश्रयमित्यस्य लाभसम्भवेऽतिरिच्यमानं विधिग्रहणमेव पूर्वोक्तार्थे ज्ञापकम् । तेन आरतुरित्यत्र **ऋच्छत्यृताम्**इति गुणस्य सवर्णदीर्घे न स्थानिवत्त्वम् । अतएव '**अजादेरि**' त्यादिनिर्देशः संगच्छते । अन्यथा **घेर्ङिती**तिगुणस्य स्थानिवद्भावापत्त्या **ङसिङसोश्चे**ति पूर्वरूपानापत्तिः । सूत्रन्तु से, यो, शब्दान्ङसिङसोश्चरितार्थम् ।

(भाष्यम्)

अस्ति प्रयोजनमेतत् ? किं तर्हीति ।।

(स्वविधौ स्थानिवद्भावनिरूपणाधिकरणम्)

(३३८-आक्षेपवार्तिकम्-१)

।।।। अपरविधाविति तु[1] ।।*।।*

(भाष्यम्)

अपरविधाविति तु वक्तव्यम् ।। किं प्रयोजनम् ? स्वविधावपि स्थानिवद्भावो यथा स्यात् ।।

विमला - **स्वविधावपीति** । अपिशब्दात्पूर्वविधौ स्थानिवद्भावलाभः ।

(आक्षेपभाष्यम्)

कानि पुनः स्वविधौ स्थानिवद्भावस्य प्रयोजनानि ?

(प्रयोजनोद्देशभाष्यम्)

---

१. लुप्तं स्यादिति मन्ये ।

आयन्, आसन् । धिन्वन्ति, कृण्वन्ति । दध्यत्र, मध्वत्र[1] । चक्रतुः, चक्रुः ॥

(प्रथमप्रयोजनोपपादनभाष्यम्)

इह तावदायन्नासन्निति । इणस्त्योर्यण्लोपयोः कृतयोरनजादित्वाद् "आडजादीनाम्" इत्याण् न प्राप्नोति । स्थानिवद्भावाद् भवति ॥

(द्वितीयप्रयोजनोपपादनभाष्यम्)

धिन्वन्ति कृण्वन्तीति । यणादेशे कृते वलादिलक्षण इट् प्राप्नोति । स्थानिवद्भावान्न भवति ॥

(तृतीयप्रयोजनोपपादनभाष्यम्)

दध्यत्र मध्वत्रेति । यणादेशे कृते "संयोगान्तस्य लोपः" प्राप्नोति । स्थानिवद्भावान्न भवति ॥

विमला - संयोगान्तस्य लोपः प्राप्नोतीति । 'यणः प्रतिषेधो वाच्यः' 'पूर्वत्रासिद्धे न स्थानिवदि' त्यनयोरनाश्रयणेनेदं भाष्यं प्रवृत्तमित्यवधेयम् । यत्तु कैयटेन 'तस्य दोष' इत्यत्र संयोगादिलोपपदस्य संयोगोपलक्षितलोपोपलक्षकत्वेन योगान्तलोपस्यापि संग्रहात् संयोगान्तलोपेऽपि पूर्वत्रासिद्धे न स्थानिवदित्यस्य न प्रवृत्तिरित्युक्तं तन्न, नपदान्तसूत्रशेषे स्कन्दयतेः स्कन्, तक्षयतेस्तगिति स्वोक्तिविरोधात् ।

(चतुर्थप्रयोजननिराकरणभाष्यम्)

चक्रतुः । चक्रुः (इत्यत्र[2]) यणादेशे कृते अनच्कत्वाद्[3] द्विर्वचनं न प्राप्नोति । स्थानिवद्भावाद् भवति ॥

---

१. क्वचित् 'मध्वत्र' इति ।

२. क्वचिन्न ।

३. 'अनण्त्वाद्' इति क्वाचित्कः ।

(अनिष्टापत्तिभाष्यम्)

यदि तर्हि स्वविधावपि स्थानिवद्भावो भवति-'द्वाभ्याम्, देयम्, लवनम्' अत्रापि प्राप्नोति ।।

द्वाभ्यामित्यत्रात्त्वस्य स्थानिवद्भावाद् दीर्घत्वं न प्राप्नोति ।। देयमितीत्त्वस्य स्थानिवद्भावाद् गुणो न प्राप्नोति ।

लवनमित्यत्र गुणस्य स्थानिवद्भावादवादेशो न प्राप्नोति ।।

(अनिष्टापत्तिवारणभाष्यम्)

नैष दोषः । स्वाश्रया अत्रैते विधयो भविष्यन्ति ।।

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम्—अपरविधाविति ?

(समाधानभाष्यम्)

न वक्तव्यम् । पूर्वविधावित्येव सिद्धम् ।।

कथम् ?

न पूर्वग्रहणेनादेशोऽभिसंबध्यते—'अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद् भवति' ।

कुतः पूर्वस्य ? 'आदेशात्' इति ।। किं तर्हि ?

निमित्तमभिसंबध्यते-'अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद् भवति । कुतः पूर्वस्य ? निमित्ताद्' इति ।।

(आक्षेपभाष्यम्)

अथ निमित्तेऽभिसंबध्यमाने यत्तदस्यं योगस्य मूर्द्धाभिषिक्तमुदाहरणं तदपि संगृहीतं भवति ।।

किं पुनस्तत् ? पट्व्या मृद्व्येति ।।

(समाधानभाष्यम्)

बाढं संगृहीतम् ।।

(समाधानबाधकभाष्यम्)

ननु च ईकारयणा व्यवहितत्वान्नाऽसौ निमित्तात् पूर्वो भवति ।।

(समाधानसाधकभाष्यम्)

व्यवहितेऽपि पूर्वशब्दो वर्तते । तद्यथा—पूर्वं मथुरायाः पाटलिपुत्रमिति ।।

(पक्षान्तराभ्युपगमभाष्यम्)

अथ वा पुनरस्त्वादेश एवाभिसंबध्यते ।।

(आक्षेपभाष्यम्)

कथं यानि स्वविधौ स्थानिवद्भावस्य प्रयोजनानि ?

(इत्येकदेशिभाष्यम्)

(अथ सिद्धान्तिभाष्यम्)

नैतानि सन्ति । इह तावदायन् आसन् धिन्वन्ति कृण्वन्तीति । अयं विधिशब्दोऽस्त्येव कर्मसाधनो—विधीयते विधिरिति । अस्ति च भावसाधनः—विधानं विधिरिति । तत्र कर्मसाधनस्य विधिशब्दस्योपादाने न सर्वमिष्टं संगृहीतमिति कृत्वा भावसाधनस्य विधिशब्द-

स्योपादानं विज्ञास्यते—'पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति पूर्वः स्यादिति स्थानिवद्भवती'ति ।। एवमाड् भविष्यति, इट् च न भविष्यति ।।

(सिद्धान्तिशेषभाष्यम्)

दध्यत्र मध्वत्र चक्रतुश्चक्रुरिति परिहारं वक्ष्यति ।।

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

कानि पुनरस्य योगस्य प्रयोजनानि ?।

(प्रयोजनश्लोकवार्तिकम्)

।।।। स्तोष्याम्यहं पादिकमौदवाहिं*
ततः श्वोभूते ! शातनीं पातनीं च ।
नेतारावाऽऽगच्छतं धारणिं रावणिं च
ततः पश्चात्स्रंस्यते ध्वंस्यते च ।।।।*

(उपपादनभाष्यम्)

इह तावत् पादिकमौदवाहिं शातनीं पातनीं धारणिं रावणिमिति । अकारलोपे कृते पद्भाव ऊठ् अल्लोपः टिलोप इत्येते विधयः प्राप्नुवन्ति । स्थानिवद्भावान्न भवन्ति ।।

स्रंस्यते ध्वंस्यते । णिलोपे कृते "अनिदितां हल उपधायाः क्ङिति" इति नलोपः प्राप्नोति । स्थानिवद्भावान्न भवति ।।

विमला - स्तोष्यामीति । सूत्रस्य प्रयोजनं कथयिष्यामीत्यर्थः । सूत्रप्रयोजनवादी परिभाषाफलमन्यथा साधयति—**अनेनापीति** ।अचः परस्मिन्निति सूत्रेणापीत्यर्थः ।

सिद्धः स्वर इति । एवञ्च सूत्रारम्भे अन्तरङ्गपरिभाषा न कर्तव्येति भावः ।

(प्रयोजननिराकरणभाष्यम्)

नैतानि सन्ति प्रयोजनानि । "असिद्धवदत्राभात्" इत्यनेनाप्येतानि[1] सिद्धानि ॥

(प्रयोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्—याज्यते वाप्यते । णिलोपे कृते "यजादीनां किति" इति संप्रसारणं प्राप्नोति । स्थानिवद्भावान्न भवति ॥

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । यजादिभिरत्र कितं विशेषयिष्यामः—यजादीनां यः किदिति ॥ कश्च यजादीनां कित् ? यजादिभ्यो यो विहित इति । न चाऽयं यजादिभ्यो विहितः ॥

(मूर्धाभिषिक्तप्रयोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्—पट्व्या मृद्व्येति । परस्य यणादेशे कृते पूर्वस्य न प्राप्नोति, ईकारस्यणा व्यवहितत्वात् । स्थानिवद्भावाद्भवति ॥

(कारणाक्षेपभाष्यम्)

किं पुनः कारणं परस्य तावद्भवति, न पुनः पूर्वस्य ?

(आक्षेपनिराकरणभाष्यम्)

नित्यत्वात्[2] । नित्यः परयणादेशः । कृतेऽपि

---

1. 'एतानि' क्वचिन्न । 2. वार्तिकं स्यादिति मन्ये ।

पूर्वयणादेशे प्राप्नोति, अकृतेऽपि प्राप्नोति । नित्यत्वात्परयणादेशे कृते पूर्वस्य न प्राप्नोति ।। स्थानिवद्भावाद्भवति ।।

(असिद्धपरिभाषया सूत्रप्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । "असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे"" इत्यसिद्धत्वाद्बहिरङ्गलक्षणस्य परयणादेशस्यान्तरङ्गलक्षणः पूर्वयणादेशो भविष्यति ।। अवश्यं चैषा परिभाषा आश्रयितव्या स्वरार्थम्[1] । कर्त्र्या हर्त्र्येति । "उदात्तयणो हल्पूर्वात्" इत्येष स्वरो यथा स्यात् ।।

(सूत्रप्रयोजनवादिभाष्यम्)

अनेनापि सिद्धः स्वरः ।। कथम् ?

(सिद्ध्युपायभाष्यवार्तिकम्)

।।।। आरभ्यमाणे नित्योऽसौ ।।*।।*

(व्याख्याभाष्यम्)

आरभ्यमाणे त्वस्मिन् योगे नित्यः पूर्वयणादेशः । कृतेऽपि परयणादेशे प्राप्नोति, अकृतेऽपि ।।

विमला - नित्योऽसाविति । एवञ्चोभयोरपि नित्ययोरुच्चारणक्रमेण प्राथम्यात् पूर्वं पूर्वयणादेशे ततश्चोदात्तयणोहल्पूर्वादित्यनेन ङीप ईकारस्योदात्तत्वे तस्यापि यणि कृते पुनरुदात्तयण इत्यनेनाकारस्य स्वरः सिद्ध्यतीति भावः ।

(प्रयोजननिराकर्तृभाष्यम्)

परयणादेशोऽपि नित्यः । कृतेऽपि पूर्वयणादेशे प्राप्नोति, अकृतेऽपि ।।

---

१. वार्तिकं स्यादिति मन्ये ।

(सिद्ध्युपायबाधकभाष्यवार्तिकम्)

॥॥ परश्चासौ व्यवस्थया ॥*॥*

विमला - परश्चासाविति । उभयोरपि नित्ययो: परत्वात्परयणादेश इति भाव: ।

(व्याख्याभाष्यम्)

व्यवस्थया चासौ परः ॥

(सिद्ध्युपायबाधकभाष्यवार्तिकम्)

॥॥ युगपत्संभवो नास्ति ॥*॥*

(व्याख्याभाष्यम्)

न चाऽस्ति यौगपद्येन संभवः ॥

(भाष्यम्)

कथं च सिध्यति ?

विमला - कथञ्च सिद्ध्यतीति । सूत्राभावे पट्व्या मृद्वयति कथं सिद्ध्यतीति प्रश्नतात्पर्यम् ।

(सिद्ध्युपायसाधकभाष्यवार्तिकम्)

॥॥ बहिरंगेण सिध्यति ॥*॥*

विमला - बहिरङ्गेण सिद्ध्यतीति । नचाकृतव्यूहपरिभाषाया: बहिरङ्गपरिभाषाबाधकत्वेन तया निषेधात्पूर्वयणादेशो न स्यादिति वाच्यम् । तस्या: अनित्यत्वादसत्वाच्च ।

(भाष्यम्)

'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इत्यनेन सिध्यति ॥

(सूत्रप्रयोजनवादिभाष्यम्)

एवं तर्हि [१]योऽत्रोदात्तयण् तदाश्रयः स्वरो भविष्यति ।।

विमला - सूत्रप्रयोजनवादी सूत्रारम्भे बहिरङ्गपरिभाषाफलमन्यथा साधयति—**एवं तर्हीति** । अयम्भावः । पट्व्येत्यादौ परत्वात् परयणादेशे कृतेऽपि अनेन सूत्रेण तस्य स्थानिवद्भावेन पटूकारस्योदात्तस्य यणि तस्य यण उदात्तस्थानिकत्वेन ततः परस्य विभक्त्याकारस्योदात्तयणो हल्पूर्वादितिस्वरः स्यादेवेति सूत्रारम्भे परिभाषा न कर्तव्येति ।

(इष्टानुपपत्तिभाष्यम्)

ईकारयणा व्यवहितत्वान्न प्राप्नोति ।।

विमला - ईकार यणेति । ईकारस्थानिकेन यणेत्यर्थः ।

(इष्टोपपत्तिभाष्यम्)

'स्वरविधौ व्यञ्जनमविद्यमानवद्भवति' इति नास्ति व्यवधानम् ।।

(असिद्धपरिभाषावादिभाष्यम्)

सा तर्हि एषा परिभाषा कर्तव्या ।।

विमला - एषा परिभाषा कर्तव्येति । अस्य सूत्रारम्भेऽपीत्यादिः । त्वया सूत्रारम्भेऽपि 'स्वरविधावि'ति परिभाषा कर्तव्या मया तु बहिरङ्गपरिभाषामात्रं क्रियते इति महल्लाघवमिति भावः ।

(स्थानिवद्भाववादिभाष्यम्)

ननु चेयमपि कर्तव्या[२]—'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इति ।

विमला - ननु चेयमपि कर्तव्येति । बहिरङ्गपरिभाषा मया न कर्तव्येति काक्वा व्यज्यते । 'स्वरविधावि'ति परिभाषा भवतापि कर्तव्या मयापि कर्तव्या बहिरङ्गपरिभाषा तु मया न कर्तव्येति सूत्रप्रयोजनवादिनो भावः ।

---

१. 'यत्रोदात्त' इति क्वचित्कः । २. वाक्यांशोऽयं क्वचिन्न ।

(असिद्धपरिभाषावादिभाष्यम्)

बहुप्रयोजनैषा परिभाषा । अवश्यमेवैषा कर्तव्या ।।

विमला - अवश्यमेवैषा कर्तव्येति । बहिरङ्गपरिभाषाया: बहूनि प्रयोजनानि सन्ति, तत्रैकस्य प्रयोजनस्यान्यथा साधनेऽपि प्रयोजनान्तरसिद्ध्यर्थं बहिरङ्गपरिभाषा भवताप्यवश्यं कर्तव्या, सूत्रमप्यारब्धव्यम्, स्वरविधाविति परिभाषापि कर्तव्येति महद्गौरवम् । मया तु बहिरङ्गपरिभाषामात्रं क्रियते, स्वरविधाविति परिभाषा न क्रियते, अच: परस्मिन्निति सूत्रमपि नारभ्यते इति महल्लाघवमिति बहिरङ्गपरिभाषावादिनो भाव: ।

(असिद्धपरिभाषावादिनो लाघवभाष्यम्)

सा चाप्येषा लोकतः सिद्धा ।। कथम् ?

प्रत्यङ्गवर्ती लोको लक्ष्यते । तद्यथा— पुरुषोऽयं प्रातरुत्थाय यान्यस्य प्रतिशरीरं कार्याणि तानि तावत्करोति, ततः सुहृदाम्, ततः संबन्धिनाम् ।। प्रातिपदिकं चाप्युपदिष्टं सामान्यभूतेऽर्थे वर्तते । सामान्ये वर्तमानस्य व्यक्तिरुपजायते । व्यक्तस्य सतो लिङ्गसंख्याभ्यामन्वितस्य बाह्येनार्थेन योगो भवति ।। ययैव चाऽऽनुपूर्व्याऽर्थानां प्रादुर्भावस्तयैव शब्दानामपि । तद्वत्कार्यैरपि भवितव्यम् ।।

विमला - प्रत्यङ्गवर्तीति । प्रत्यासन्न-प्रत्यासन्नकार्य्याभिव्यापृत इत्यर्थ: । **सामान्य-भूतेऽर्थे वर्तते** । नागृहीतविशेषणन्यायेन पूर्वसामान्यमभिधीयते इत्यर्थ: । **व्यक्तस्येति** । बुद्ध्यारूढस्येत्यर्थ: ।

(सूत्रारम्भवादिभाष्यम्)

इमानि तर्हि प्रयोजनानि—पटयति लघयति अवधीत् बहुखट्वकः ।।

(प्रयोजनोपपादनभाष्यम्)

पटयति लघयतीति, णिचि टिलोपे कृते "अत उपधायाः" इति वृद्धिः प्राप्नोति । स्थानिवद्भावान्न भवति ।।

(द्वितीयप्रयोजनोपपादनभाष्यम्)

अवधीदिति अकारलोपे कृते "अतो हलादेर्लघोः" इति विभाषा वृद्धिः प्राप्नोति । स्थानिवद्भावान्न भवति ।।

(तृतीयप्रयोजनोपपादनभाष्यम्)

बहुखट्वक इति, "आपोऽन्यतरस्याम्" इति ह्रस्वे कृते "ह्रस्वान्तेऽन्त्यात्पूर्वम्" इत्येष स्वरः प्राप्नोति । स्थानिवद्भावान्न भवति ।।

विमला - स्थानिवद्भावान्न भवतीति । बहुखट्वक इत्यत्र आपोऽन्यतरस्यामिति ह्रस्वे कृते 'ह्रस्वान्तेऽन्त्यात्पूर्वमि' ति प्रकृत्य 'बहोर्नञ्वदुत्तरभूम्नी' ति विधीयमानमन्त्यात्पूर्वस्योदात्तत्वम् खकाराकारस्य प्राप्नोति । अचः परस्मिन्निति स्थानिवद्भावेनोत्तरपदस्य ह्रस्वान्तत्वाभावान्न भवति । किन्तु कपि पूर्वमित्युत्तरपदान्तोदात्तत्वमेव भवति । नच स्वरविधौ स्थानिवद्भावनिषेधान्नेदं युक्तमिति वाच्यम्, 'स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवदित्यस्य वक्ष्यमाणत्वात् ।

(स्थानिवद्भावप्राप्तानिष्टनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

इह वैयाकरणः सौवश्व इति, य्वोः स्थानिवद्भावादायावौ प्राप्नुतस्तयोः प्रतिषेधो वक्तव्यः ।।

(३८९-समाधानवार्तिकम्-२)

।।*।। अचः पूर्वविज्ञानादैचोः सिद्धम् ।।*।।

(भाष्यम्)

योऽनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः । आदिष्टाच्चैषोऽचः पूर्वः ।। किं वक्तव्यमेतत् ? नहि । कथमनुच्यमानं गंस्यते ? अच इति पञ्चमी । अचः पूर्वस्य ।।

(आक्षेपभाष्यम्)

यद्येवमादेशोऽविशेषितो भवति ।।

(आक्षेपबाधकभाष्यम्)

आदेशश्च विशेषितः[1] ।। कथम् ?

न ब्रूमो—यत् षष्ठीनिर्दिष्टमज्ग्रहणं तत्पञ्चमीनिर्दिष्टं कर्तव्यम् इति । किं तर्ह्यन्यत्कर्त्तव्यम् ?

अन्यच्च न कर्तव्यम् । यदेवाऽदः षष्ठीनिर्दिष्टमज्ग्रहणम्, तस्य दिक्शब्दैर्योगे पञ्चमी भविष्यति[2] । अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति । [कुतः पूर्वस्य[3] ?] अच इति ।। तद्यथा—आदेशः प्रथमानिर्दिष्टः, तस्य दिक्छब्दैर्योगे पञ्चमी भवति—अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति । [कुतः पूर्वस्य[3] ?] आदेशादिति ।।

(भावाभावातदेशसाधनाधिकरणम्)

(३९०-आक्षेपवार्तिकम्-३)

---

१. एतत् वार्तिकं स्यात् । २. 'भवति' इति क्वचित् । ३. क्वचिन्न ।

॥*॥ तत्रादेशलक्षणप्रतिषेधः ॥*॥

(भाष्यम्)

तत्रादेशलक्षणं कार्यं प्राप्नोति अस्य[1] प्रतिषेधो वक्तव्यः । वाय्वोः । अध्वर्य्वोः । "लोपो व्योर्वलि" इति लोपः प्राप्नोति ॥

(३९१-समाधानवार्तिकम्-४)

॥*॥ असिद्धवचनात्सिद्धम् ॥*॥

(भाष्यम्)

अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रत्यसिद्धो भवतीति वक्तव्यम् ॥

(३९२-समाधानबाधकाक्षेपवार्तिकम्-५)

॥*॥ असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः ॥*॥

(भाष्यम्)

असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः कर्तव्यः । पट्व्या मृद्व्येति ॥

(समाधानसाधकभाष्यम्)

ननु चैतदप्यसिद्धवचनात्सिद्धम् ॥

(३९३-समाधानबाधकाक्षेपवार्तिकम्-६)

॥*॥ असिद्धवचनात्सिद्धमिति चेन्नाऽन्यस्याऽसिद्धवचनादन्यस्य भावः ॥*॥

---

१. 'तस्य' इति क्वचित् ।

(भाष्यम्)

असिद्धवचनात्सिद्धमिति चेत् । तन्न ।।

किं कारणम् ? 'नान्यस्याऽसिद्धवचनादन्यस्य भावः' । नह्यन्यस्याऽसिद्धत्वादन्यस्य प्रादुर्भावो भवति । तद्यथा—नहि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति ।।

(३९४-आक्षेपोपसंहारवार्तिकम्-७)

।।।। तस्मात्स्थानिवद्वचनमसिद्धत्वं च[1] ।।*।।*

(भाष्यम्)

तस्मात्स्थानिवद्भावो वक्तव्यः । असिद्धत्वं च (वक्तव्यम्[2]) ।। पट्व्या मृद्व्येति स्थानिवद्भावः । वाख्वोरध्वर्य्वोरित्यत्राऽसिद्धत्वम् ।

(परिहारवार्तिकम्)

।।।। उक्तं वा ।।*।।*

(भाष्यम्)

किमुक्तम् ?

स्थानिवद्वचनानर्थक्यं शास्त्राऽसिद्धत्वाद् इति ।

(समाधानबाधकभाष्यम्)

विषम उपन्यासः । युक्तं तत्र यदेकादेशशास्त्रं तुक्छास्त्रे असिद्धं स्याद् अन्यदन्यस्मिन् । इह पुनरयुक्तम् । कथं हि तदेव नाम तस्मिन्नसिद्धं स्यात् ?

---

१. 'असिद्धत्वं च' क्वचित् पृथक् । २. क्वचिन्न ।

(समाधानसाधकभाष्यम्)

तदेव चापि तस्मिन्नसिद्धं भवति ।। वक्ष्यति ह्याचार्यः 'चिणो लुकि तग्रहणानर्थक्यं, संघातस्याप्रत्ययत्वात्तलोपस्य चासिद्धत्वाद्' इति । चिणो लुक् चिणो लुक्येवाऽसिद्धो भवति ।।

(३९५-समाधानश्लोकवार्तिकम्-८)

।।।। काममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्ति । कल्प्यो हि वाक्यशेषो वाक्यं वक्तर्यधीनं हि ।।*।।*

(भाष्यम्)

अथवा वतिनिर्देशोऽयम् । कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा–'उशीनरवन्मद्रेषु यवाः' । सन्ति, न सन्तीति । "मातृवदस्याः कलाः" । सन्ति, न सन्तीति ।। एवमिहापि स्थानिवद्भवति, स्थानिवन्न भवतीति वाक्यशेषं समर्थयिष्यामहे । इह तावत्पट्व्या मृद्व्येति, यथा स्थानिनि यणादेशो भवति, एवमादेशेऽपि भवति । इहेदानीं वाय्वोरध्वर्य्वोरिति, यथा स्थानिनि यलोपो न भवति, एवमादेशेऽपि न भवतीति ।।

विमला - नेह भारोऽस्तीति । पूर्वसूत्राद्विधिशब्दानुवृत्तौ अनुवृत्तविधिशब्दसामर्थ्यादेवाभावातिदेशस्य शास्त्रेऽप्याश्रयणं भविष्यतीति तदर्थं विधिशब्दकरणरूपः भारो नास्तीत्यर्थः । एतेन पूर्वमभावातिदेशस्य विधिशब्दबलेन साधितत्वादिह च तस्यान्यथोपपादनात्पूर्वापरविरोधः । किञ्चोशीनरवन्मैत्रेषु यवा इति दृष्टान्तबलेन वाक्यशेषं कल्पयित्वा अभावातिदेशोपपादनेऽपि तस्य शास्त्रे आश्रयणे ज्ञापनार्थं विधिग्रहणावश्यकमेवेति नेह भारोस्तीति कथनमसङ्गतमिति वदन्तः प्रत्युक्ताः । नन्विह विधिग्रहणं

व्यर्थमेवेति चेन्न, पूर्वस्यैव विधौ स्थानिवन्न तु पूर्वपरयोर्विधाविति ज्ञापनार्थत्वात् । एतज्ज्ञापनफलन्तूपपादितं प्रागेव ।

(पूर्वशब्दार्थनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरनन्तरस्य विधिं प्रति स्थानिवद्भावः, आहोस्वित्पूर्वमात्रस्य ?

(भाष्यम्)

कश्चात्र विशेषः ?

(३९५-अनन्तरग्रहणदूषणवार्तिकम्-९)

॥*॥ अनन्तरस्य चेदेकाननुदात्तद्विगुस्वरगतिनिघातेषूपसंख्यानम् ॥*॥

(भाष्यम्)

अनन्तरस्येति चेदेकाननुदात्त[1]द्विगुस्वरगतिनिघातेषूपसंख्यानं कर्तव्यम् ॥

एकाननुदात्त—लुनीह्यत्र पुनीह्यत्र । "अनुदात्तं पदमेकवर्जम्" इत्येष स्वरो न प्राप्नोति ॥

(उदाहरणभाष्यम्)

द्विगुस्वर—पञ्चारत्न्यः दशारत्न्यः । "इगन्तकाल" इत्येष स्वरो न प्राप्नोति ॥

(उदाहरणभाष्यम्)

गतिनिघात—तत्प्रलुनीह्यत्र । यत्प्रपुनीह्यत्र । "तिङि चोदात्तवति" इत्येष स्वरो न प्राप्नोति ॥

---

१. क्वचिदेकानुदात्त ।

(द्वितीयपक्षाङ्गीकारभाष्यम्)

अस्तु तर्हि पूर्वमात्रस्य ।।

(३९६-पूर्वमात्रग्रहणदूषणवार्तिकम्-१०)

।।*।। *पूर्वमात्रस्य चेदुपधाह्रस्वत्वम्* ।।*।।

(भाष्यम्)

पूर्वमात्रस्येति चेदुपधाह्रस्वत्वं वक्तव्यम् । वादितवन्तं प्रयोजितवान्—अवीवदद्वीणां परिवादकेन ।।

किं पुनः कारणं न सिध्यति ?

योऽसौ णौ णिर्लुप्यते तस्य स्थानिवद्भावाद् ह्रस्वत्वं न प्राप्नोति ।।

(३९७-दूषणान्तरवार्तिकम्-११)

।।*।। *गुरुसंज्ञा च* ।।*।।

(भाष्यम्)

गुरुसंज्ञा च न सिद्ध्यति । श्लेष्मऽघ्न । पित्तऽघ्न । दऽध्यश्व । मऽध्वश्व[१] । "हलोऽनन्तराः संयोगः" इति संयोगसंज्ञा, 'संयोगे गुरु' इति गुरुसंज्ञा, "गुरोरनृतः[२]" इति प्लुतो न प्राप्नोति ।।

(पूर्वमात्रवादिभाष्यम्)

ननु च यस्याप्यनन्तरस्य विधिं प्रति स्थानिवद्भावः, तस्याप्यनन्तरलक्षणो विधिः संयोगसंज्ञा विधेया ।।

---

१. क्वचिदत्र सर्वत्र प्लुतपाठः दृश्यते–श्लेष्माघ्न, पित्ताघ्न, दाध्यश्व, माध्वश्व इति ।

२. 'गुरोरिति' क्व०

(३९८-समाधानवार्तिकम्-१२)

।।।। न वा संयोगस्याऽपूर्वविधित्वात् ।।*।।*

(भाष्यम्)

न वा एष दोषः ।। किं कारणम् ?

संयोगस्याऽपूर्वविधित्वात् । न पूर्वविधिः संयोगः ।। किं तर्हि ? पूर्वपरविधिः संयोगः ।।

(एकादेशे स्थानिवद्भावसाधनाधिकरणम्)

(३९९-आक्षेपवार्तिकप्रथमखण्डम्)

।।।। एकादेशस्योपसंख्यानम् ।।*।।*

(भाष्यम्)

एकादेशस्योपसंख्यानं कर्तव्यम् । 'श्रायसौ गौमतौ चातुरौ आनडुहौ पादे उदवाहे[1]' । एकादेशे कृते नुमामौ पद्भाव ऊडित्येते विधयः प्राप्नुवन्ति ।।

(प्रत्याक्षेपभाष्यम्)

किं पुनः कारणं न सिध्यन्ति[2] ?

(प्रत्याक्षेपबाधकवार्तिकद्वितीयखण्डम्)

।।।। उभयनिमित्तत्वात् ।।*।।*

(भाष्यम्)

अजादेशः परनिमित्तक इत्युच्यते । उभयनिमित्तश्चायम् ।।

(प्रत्याक्षेपबाधकवार्तिकतृतीयखण्डम्)

---

१. वार्तिकांशोऽयं स्यादिति मन्ये । २. 'सिद्ध्यति' क्वचित् ।

।।*।। उभयादेशत्वाच्च ।।*।।

(भाष्यम्)

अच आदेश इत्युच्यते । अचोश्चायमादेशः ।।

(आक्षेपसाधकप्रथमहेतुनिरासभाष्यम्)

नैष दोषः ।। यत्तावदुच्यते–उभयनिमित्तत्वाद् इति । इह यस्य ग्रामे नगरे वा अनेकं कार्यं भवति, शक्नोत्यसौ ततोऽन्यतरतो[1] व्यपदेष्टुम् । तद्यथा '(ग्रामे[2]) गुरुनिमित्तं (च[2]) वसामः' इति, 'अध्ययननिमित्तं वसामः' इति ।।

(आक्षेपसाधकद्वितीयहेतुनिरासभाष्यम्)

यदप्युच्यते–उभयादेशत्वाच्च इति । इह यो द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति, लभतेऽसावन्यतरतो व्यपदेशम् । तद्यथा—देवदत्तस्य पुत्रः, देवदत्तायाः पुत्र इति ।।

(अथ हलच्समुदायादेशस्थानिवत्त्वाभावनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

अथ हलचोरादेशः स्थानिवद् भवति, उताहो न ?

(भाष्यम्)

कश्चात्र विशेषः ?

(४००-समुदायादेशस्थानिवत्त्वे दूषणवार्तिकम्-१४)

।।*।। हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोप एकादेशः ।।*।।

---

१. 'अन्यतरद्' इति क्वचित् । २. क्वचिन्न ।

(भाष्यम्)

हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोपे एकादेशो वक्तव्यः । विंशकम्[१] । विंशं शतम् । विंशः ।

विमला - एकादेशो वक्तव्य इति । पररूपं वक्तव्यमित्यर्थः । इदानीं हलचोरादेशस्य स्थानिवद्भावाभ्युपगमेन तिलोपस्य स्थानिवद्भावेन व्यवधानादतोगुणे इत्यस्याप्रवृत्तेरिति भावः ।

(४०१-दूषणान्तरवार्तिकम्-१५)

।।*।। स्थूलादीनां यणादिलोपेऽवादेशः ।।*।।

(भाष्यम्)

स्थूलादीनां यणादिलोपे कृते अवादेशो वक्तव्यः । स्थवीयान् दवीयान् ।।

(४०२-दूषणान्तरवार्तिकम्-१६)

।।*।। केकयमित्रय्वोरियादेश एत्वम् ।।*।।

(भाष्यम्)

केकयमित्रय्वोरियादेशे एत्वं न सिध्यति । कैकेयः । मैत्रेयः । अचीत्येत्वं न सिध्यति ।।

विमला - अचीत्येत्वं न सिद्ध्यतीति । एकारो न सिद्ध्यतीत्यर्थः । अयम्भावः । केकयशब्दात् 'जनपदशब्दात् क्षत्रियादञ्' इति सूत्रेणाञि केकयमित्रयु इत्यनेन यादिभागस्येयादेशे इदानीं हलचोरादेशस्यापि स्थानिवद्भावेनाऽच्परत्वाभावादादगुण इति गुणादेशो न स्यात् । मित्रयोरपत्यमित्यर्थे गृष्ट्यादिभ्यश्चेत्यनेन ढञि एयादेशे 'केकयमित्रयु' इत्यनेन प्राप्तमियादेशम्बाधित्वा 'दाण्डिनायने' तिसूत्रेण मैत्रेयेति निपातनेन युशब्दस्य लोपे तस्य स्थानिवद्भावेन व्यवधानादगुणपरत्वाभावेन पररूपं न स्यादिति ।

---

१. क्वचिद् 'विंशकः' ।

(४०३-दूषणान्तरवार्तिकम्-१७)

।।।। उत्तरपदलोपे च ।।*।।*

(भाष्यम्)

उत्तरपदलोपे च दोषो भवति ।। दध्युपसिक्ताः सक्तवो दधिसक्तवः । अचीति यणादेशः प्राप्नोति ।

(४०४-आक्षेपवार्तिकम्-१८)

।।।। यङ्लोपे यणियङुवङः ।।*।।*

(भाष्यम्)

यङ्लोपे यणियङुवङो न सिध्यन्ति । चेच्यः । नेन्यः । चेक्षियः । चेक्रियः । लोलुवः । पोपुवः । अचीति यणियङुवङो न सिध्यन्ति ।।

विमला - न सिद्ध्यन्तीति । चेच्य इत्यादौ यणादौ कर्तव्ये यङोलुकः स्थानिवद्भावेन व्यवधानादिति भावः ।

(पक्षान्तराश्रयणभाष्यम्)

अस्तु तर्हि न स्थानिवत् ।।

विमला - न स्थानिवदिति । हलचोरादेशो न स्थानिवदित्यर्थः । अज्मात्रस्थानिकादेशः स्थानिवदिति व्याख्यानेनेति भावः ।

(४०५-आक्षेपवार्तिकम्-१९)

।।।। अस्थानिवत्त्वे यङ्लोपे गुणवृद्धिप्रतिषेधः ।।*।।*

(भाष्यम्)

अस्थानिवत्त्वे यङ्लोपे गुणवृद्ध्योः प्रतिषेधो वक्तव्यः । लोलुवः पोपुवः सरीसृपो मरीमृज इति ।।

(आक्षेपबाधकभाष्यम्)

नैष दोषः ।। "न धातुलोप आर्द्धधातुके" इति प्रतिषेधो भविष्यति ।।

(इति हलच्समुदायस्य स्थानिवत्त्वाभावनिरूपणम्)

(अथ स्थान्याश्रयणानाश्रयणाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनराश्रीयमाणायां प्रकृतौ स्थानिवद्भवति, आहोस्विदविशेषेण ?

(भाष्यम्)

कश्चात्र विशेषः ?

(४०६-द्वितीयपक्षे दूषणवार्तिकम्- २०)

|||| अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः ||*||*

(भाष्यम्)

अविशेषेण स्थानिवदिति चेल्लोपयणादेशयोर्गुरुविधिर्न सिध्यति । श्लेष्म३घ्न । पित्त३घ्न । द३ध्यश्व । म३ध्वश्व[१] । "हलोऽनन्तराः संयोगः" इति संयोगसंज्ञा, "संयोगे गुरु" इति गुरुसंज्ञा "गुरोः[२]" इति प्लुतो न प्राप्नोति ।।

विमला - अविशेषेणेति । आश्रीयमाणायामनाश्रीयमाणायाञ्चेत्यर्थः ।

(४०७-दूषणान्तरवार्तिकम्- २१)

१. क्वचिदत्र सर्वत्र प्लुतपाठः दृश्यते – श्लेष्माघ्न, पित्ताघ्न, दाध्यश्व, माध्वश्व इति ।
२. क्वचिद् 'गुरोरनृतः' इति ।

।।*।। द्विर्वचनादयश्च प्रतिषेधे[1] ।।*।।

(भाष्यम्)

द्विर्वचनादयश्च प्रतिषेधे वक्तव्याः । 'द्विर्वचनवरेयलोप' इति ।

विमला - द्विर्वचनादयश्चेति । यद्यपि वाक्क्, वाक् इत्यादौ अवसाने द्वित्वोपपत्तये अनचीत्यस्य प्रसज्यप्रतिषेधत्वमेवेति आश्रीयमाणायां प्रकृतौ स्थानिवदितिपक्ष एव द्विर्वचनग्रहणप्रतिषेधो वक्तव्य इति पक्षान्तरे एतद्दूषणाभिधानमनुचितम् । तथाप्यनचीत्यस्य पर्युदासत्वाभिमानेनैतद्ग्रन्थस्य सत्त्वान्न दोषः । अथवा द्विर्वचनादिपदे अतद्गुणसंविज्ञानो बहुव्रीहिः । वस्तुतस्तु अविशेषेणेति द्वितीयपक्षे आश्रीयमाणायामनाश्रीयमाणायाञ्चोभयत्र दूषणाभिधानं युक्तमेव । अनाश्रीयमाणायां प्रकृतौ स्थानिवद्भाव इति चेदित्युक्त्वा 'यदि द्विर्वचनादयश्च प्रतिषेधे' इति वदेत्तदा त्वसंगतिर्भवेत् । न च तथास्ति प्रकृते इति नासंगतिः । किञ्च अविशेषेणेति द्वितीयपक्षस्य अनाश्रीयमाणायां प्रकृतौ स्थानिवद्भाव एतावन्मात्रार्थकत्वे द्विर्वचनादयश्च प्रतिषेधे इति वार्तिकस्थादिपदग्राह्यवरेग्रहणस्य आश्रीयमाणायां प्रकृतौ स्थानिवद्भाव इति प्रथमपक्षे एव सार्थक्यसम्भवेन अनाश्रीयमाणायां प्रकृतौ स्थानिवद्भाव इति द्वितीयपक्षदूषकवार्तिके तदभिधानमसङ्गतं स्यात् । किञ्च पूर्वमलोपस्ततो वलिलोप इति क्रमसत्त्वादकारेणार्धधातुकत्वाद्यलाभादतिदेशेनार्धधातुकत्वलाभासम्भवेन वरेग्रहणम् सम्भावनामात्रेणार्धधातुकत्वलाभ इति ज्ञापनायोभयपक्षेऽप्यावश्यकमिति द्वितीयपक्षदूषकवार्तिके तदभिधानासंगतिः । किञ्च वरेग्रहणस्य पूर्वोक्तज्ञापनोत्तरम् यातिरित्यादिफलसिद्धावपि स्वांशे चरितार्थ्यमाश्रीयमाणायां प्रकृतौ स्थानिवद्भाव इतिपक्षे एव सम्भवतीति द्वितीयपक्षदूषकवार्तिके तदभिधानासंगतिः । न च वरे यलोपेत्येकमेवेत्यभिमानेन तथाभिधानमिति नागेशोक्तं युक्तमिति वाच्यम् मदुक्तरीत्या व्याख्यानेन निर्वाहसम्भवे भाष्यकृतोऽभिमानकल्पनाया अन्याय्यत्वात् । तस्मादविशेषेणेत्यस्याश्रीयमाणायामनाश्रीयमाणाञ्चेत्यर्थ एव युक्त इति दिक् ।

---

१. 'प्रतिषेधे' क्वचिन्न ।

(४०८-दूषणान्तरवार्तिकम्- २२)

॥॥ क्सलोपे लुग्वचनम् ॥*॥*

(भाष्यम्)

क्सलोपे लुग्वक्तव्यः । अदुग्ध अदुग्धाः । "लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये" इति ।

विमला - क्सलोपे लुग्वक्तव्य इति । क्सलोपस्य पूर्वोपात्तत्वेऽपि लुग्ग्रहणं कर्तव्यमित्यर्थः । आश्रीयमाणायां प्रकृतावेव स्थानिवद्भाव इतिपक्षे 'वा दुहदिहे' त्याद्येव सूत्रं कर्तव्यम् । लुग्ग्रहणञ्च न कर्तव्यम् 'क्सस्याची' त्यतो लोपानुवृत्तौ 'अलोऽन्त्यस्ये'-ति परिभाषासहकारेण क्सस्याऽकारस्यैव लोपेऽपि 'झलोझली' त्यनेन सस्य लोपे रूपसिद्धेः । इदानीम् झलो झलीति सलोपेऽकारस्याश्रयणाभावेन स्थानिवद्भावाप्रवृत्तौ 'झलोझली' त्यस्य प्रवृत्तिरव्याहता । अनाश्रीयमाणायां प्रकृतौ स्थानिवद्भावस्वीकारे तु अत्राप्यल्लोपस्य स्थानिवद्भावापत्तौ 'झलोझली' ति सलोपानापत्त्या लुग्ग्रहणं कर्तव्यमिति भावः ।

(४०९-दूषणान्तरवार्तिकम्- २३)

॥॥ हन्तेर्घत्वम् ॥*॥*

(भाष्यम्)

हन्तेर्घत्वं वक्तव्यम् । घ्नन्ति घ्नन्तु अघ्नन् ॥

(प्रथमपक्षाश्रयणभाष्यम्)

अस्तु तर्ह्याश्रीयमाणायां प्रकृताविति ।

(४१०-प्रथमपक्षे दूषणवार्तिकम्- २४)

॥॥ ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिष्वादेशप्रतिषेधः ॥*॥*

(भाष्यम्)

ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिषु आदेशस्य प्रतिषेधो वक्तव्यः । निराद्य समाद्य । "अदो जग्धिर्ल्यप् ति किति" इति अदो जग्धिभावः प्राप्नोति ।।

विमला - जग्धिभावः प्राप्नोतीति । जग्धिविधौ स्थानिनोणेराश्रयणाभावेनेदानीम् स्थानिवद्भावाप्रवृत्तेः । अनाश्रीयमाणायामपि प्रकृतौ स्थानिवद्भाव इति पक्षे तु णिलोपस्य स्थानिवद्भावेन व्यवधानाज्जग्ध्यादेशो न भवतीति भावः ।

(४११-दूषणान्तरवार्तिकम्-२५)

।।*।। यणादेशे युलोपेत्वानुनासिकात्वप्रतिषेधः[१] ।।*।।

(भाष्यम्)

यणादेशे युलोपेत्वानुनासिकात्वानां प्रतिषेधो वक्तव्यः ।। यलोप–वाय्वोः । अध्वर्य्वोः । "लोपो व्योर्वलि" इति यलोपः प्राप्नोति । उलोप—अकुर्वि आशाम् अकुर्व्याशाम् । "नित्यं करोतेः" "ये च" इत्युकारलोपः प्राप्नोति ।। ईत्व—अलुनि आशाम् अलुन्याशाम् । "ई हल्यघोः" इतीत्वं प्राप्नोति ।। अनुनासिकात्व—अजज्ञि आशाम् अजज्ञ्याशाम् । "ये विभाषा" इत्यनुनासिकात्वं प्राप्नोति ।।

(४१२-आक्षेपवार्तिकम्-२६)

।।*।। रायात्वप्रतिषेधश्च ।।*।।

(भाष्यम्)

रायात्वस्य[२] च प्रतिषेधो वक्तव्यः । रायि आशाम् राय्याशाम् । "रायो हलि" इत्यात्वं प्राप्नोति ।।

१. क्वचित् 'निषेधः' ।   २. 'राया आत्व' ।

(४१३-आक्षेपवार्तिकम्-२७)

॥॥ दीर्घे यलोप प्रतिषेधः ॥*॥*

(भाष्यम्)

दीर्घे यलोपस्य प्रतिषेधो वक्तव्यः । सौर्ये नाम हिमवतः शृङ्गे, तद्वान् सौर्यी हिमवानिति । सौ इन्नाश्रये दीर्घत्वे कृते सूर्यतिष्येति यलोपः प्राप्नोति ।

(४१४-आक्षेपवार्तिकम्-२८)

॥॥ अतो दीर्घे यलोपवचनम् ॥*॥*

(भाष्यम्)

अतो दीर्घे कृते[1] यलोपो वक्तव्यः । गार्गाभ्यां वात्साभ्याम् । दीर्घे कृते "आपत्यस्य च तद्धितेऽनाति" इति प्रतिषेधः प्राप्नोति ॥

(आक्षेपबाधकभाष्यम्)

नैष दोषः । आश्रीयते तत्र प्रकृतिस्तद्धित इति ॥

(सर्वाक्षेपपरिहारभाष्यम्)

सर्वेषामेष परिहारः । उक्तं विधिग्रहणस्य प्रयोजनम्-विधिमात्रे स्थानिवद्यथा स्यादनाश्रीयमाणायामपि प्रकृताविति ॥

(द्वितीयपक्षाभ्युपगमभाष्यम्)

अथवा पुनरस्त्वविशेषेण स्थानिवदिति ॥

(आक्षेपस्मारणभाष्यम्)

---

१. क्वचिन्न ।

ननु चोक्तम् 'अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः' 'द्विर्वचनादयश्च प्रतिषेधे', 'क्सलोपे लुग्वचनम्', 'हन्तेर्घत्वम्' इति ।।

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः । यत्तावदुच्यते—'अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः' इति । उक्तमेतत् 'न वा संयोगस्याऽपूर्वविधित्वात्' इति ।।

यदप्युच्यते — 'द्विर्वचनादयश्च प्रतिषेधे वक्तव्याः' इति । उच्यन्ते न्यास एव ।। 'क्सलोपे लुग्वचनम्' इति । क्रियते न्यास एव ।।

'हन्तेर्घत्वम्' इति । सप्तमे परिहारं वक्ष्यति ।।

अचः परस्मिन् ।।५६।।

(स्थानिषेद्भावनिषेधसूत्रम्)

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ।।१।१।५७।।

(अथ पदान्तपदार्थनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

[1]पदान्तविधिं प्रति न स्थानिवदित्युच्यते । तत्र वेतस्वानिति रुः प्राप्नोति ।।

विमला - तत्रेति । तस्मिन् सतीत्यर्थः । **रुः प्राप्नोतीति** । वेतस्वानित्यत्र वेतसशब्दात् ड्मतुपि टिलोपे पदसंज्ञायाः रुत्वद्वारा रुत्वस्य च साक्षात्पदचरमावयवत्वेन तयोः कर्तव्यत्वेऽनेन टिलोपस्य स्थानिवद्भावनिषेधात् सान्तस्य पदसंज्ञायां रुत्वं प्राप्नोतीति

१. 'न पदान्त' इति क्वचित् ।

भावः । **कैयटस्य** तु अयमभिप्रायः—अत्र विधिशब्दस्य भावसाधनत्वाभिप्रायेणाक्षेपः । कर्मसाधनत्वे तु पदान्तस्य विधिरिति शेषषष्ठ्यन्तेन समासे पदान्तस्थानिके विधेये कर्तव्ये निषेध इत्यर्थः । पदस्य अन्तः पदान्तः । पदान्तश्चासौ विधिश्चेति कर्मधारये तु पदस्य चरमावयवे विधेये कर्तव्ये निषेध इत्यर्थः । उभयथापि पदसंज्ञायां कर्तव्यायां निषेधाप्राप्तौ टिलोपस्य स्थानिवद्भावे सान्ते पदत्वस्य दुर्लभतया रुत्वाप्राप्त्याऽऽक्षेपासंगतिः । भावसाधनत्वे तु पदान्तेत्यस्य भावप्रधानत्वमङ्गीकृत्य कर्मषष्ठ्यन्तेन समासे पदान्तत्वकर्मके विधाने निषेध इत्यर्थे पदसंज्ञायामपि कर्तव्यायां टिलोपस्य स्थानिवत्त्वनिषेधात् सान्तस्य रुत्वप्राप्तौ आक्षेपः संगच्छते इति । परन्तु नैतद्युक्तम्, द्विर्वचनादिसाहचर्य्येण पदान्तेत्यस्यापि यथाश्रुतार्थकत्वेन भावप्रधानत्वासम्भवात् । आक्षेपस्तु मदुक्तरीत्यैवोपपाद्यः । ननु तर्हि विधिशब्दस्य कर्मसाधनत्वमेवास्तु पदान्तस्य विधिरिति शेषषष्ठ्या समासे पदान्तस्थानिके विधावित्यर्थसम्भवादिति चेन्न, सुलोपस्य पदान्तस्थानिकत्वेन तस्मिन् कर्तव्ये स्थानिवद्भावनिषेधापत्त्या एषो यन्हसतीत्त्याद्यसिद्ध्यापत्तेः । द्विर्वचनादीनामनन्वयापत्तेश्च । पदान्तश्चासौ विधिश्चेति कर्मधारये द्विर्वचनादीनामन्वयसम्भवेऽपि विधिशब्दस्य क्रियाशब्दतया विशेषणत्वापत्तौ तस्य पूर्वनिपातापत्तिरिति दिक् ।

(समाधानभाष्यम्)

नैष दोषः । भसंज्ञाऽत्र बाधिका भविष्यति—"तसौ मत्वर्थे" इति ।।

विमला - भसंज्ञाऽत्र बाधिका भविष्यतीति । न च भसंज्ञायां स्थानिवद्भावस्य पदचरमावयवसम्पादकत्वाभावेन निषेधाप्राप्तौ सान्ते भसंज्ञायाः प्राप्तिरेव नास्तीति वाच्यम्, साक्षात्परम्परया वा यः पदचरमावयवस्य साधकः प्रतिबन्धको वा स्थानिवद्भावः स निषिध्यत इत्यर्थस्वीकारात् । पदचरमावयवरेफप्रयोजक-पदसंज्ञाप्रयोजक-भसंज्ञाभाव-प्रयोजक, स्थानिवद्भावस्यापि परम्परया पदचरमावयवसम्पादकत्वात् ।

(पूर्वपक्ष्याक्षेपसाधकभाष्यम्)

अकारान्तमेतद्भसंज्ञां प्रति । पदसंज्ञां प्रति तु सकारान्तम् ।

विमला - अकारान्तमेतदिति । अयम्भाव: । पदान्तपदे परम्परा उपस्थितत्वात्पदत्वद्वारिकैव गृह्यते नान्यद्वारिकेति साक्षात्परम्परया वा य: पदचरमावयवस्य प्रतिबन्धक: यो वा साक्षात्साधक: स्थानिवद्भाव: सोऽनेन निषिद्ध्यते । नतु परम्परया साधक:, तत्र परम्परायाः पदत्वान्यद्वारकत्वात्, षडिक इत्याद्यसिद्धेश्च । षडङ्गुलिदत्तशब्दात् ठचि 'ठाजादावूर्ध्वंद्वितीयादच' इतिङ्गुलिदत्तशब्दस्य लोपे 'यस्येति चे' त्यल्लोपे भसंज्ञाप्रतिबन्धार्थमल्लोपस्थानिवद्भावस्य पदसंज्ञासम्पादनद्वारा जश्त्वसाधकत्वेन तस्याप्यनेन निषेधे पदसंज्ञाम्बाधित्वा भसंज्ञापत्तौ जश्त्वं न स्यात् ।

(सिद्धान्त्येकदेशिसमाधानभाष्यम्)

ननु चैवं विज्ञायते—यः संप्रति पदान्त इति ।।

(पूर्वपक्ष्याक्षेपसाधकभाष्यम्)

कर्मसाधनस्य विधिशब्दस्योपादाने एतदेवं स्यात् ।।

विमला - एतदेवं स्यादिति । य: सम्प्रति पदान्त इति स्वीकारेणोक्तदोष: परिहृत: स्यात् नतु भावसाधने । अयम्भाव: । सम्प्रतीत्यस्य पदविशेषणत्वमिति पूर्वपक्षी न जानाति किन्तु पदान्तविशेषणत्वं मन्यते । एवञ्च । विधिशब्दस्य भावसाधनत्वे पदचरमावयवस्य सिद्धत्वे तत्कर्मकविधानवैयर्थ्यम् । कर्मसाधनत्वे तु पदचरमावयवस्य सिद्धत्वेऽपि तत्स्थाने विधेय: सम्भवति ।

(सिद्धान्त्येकदेशिभाष्यम्)

अयं च विधिशब्दोऽस्त्येव कर्मसाधनः—विधीयते इति[१] विधिरिति ।।

(पूर्वपक्ष्याक्षेपसाधकभाष्यम्)

अस्ति च भावसाधनो—विधानं विधिरिति । तत्र भावसाधनस्य विधिशब्दस्योपादाने एष दोषो भवति ।।

---

१. इति: क्वचिन्न ।

इह च—ब्रह्मबन्ध्वा ब्रह्मबन्ध्वै । धकारस्य जश्त्वं प्राप्नोति ।।

विमला - एष दोष इति । भावसाधनत्वपक्षे य: सम्प्रति पदान्त इत्यस्य वक्तुमशक्यत्वेन वेतस्वानित्यस्यासिद्धिरूपो दोष इत्यर्थ: । **इह चेति** । अस्य धकारस्य जश्त्वं प्राप्नोतीति परेणान्वय: । **जश्त्वं प्राप्नोतीति** । उङनूङोरेकादेश स्थानिवद्भावस्य पदसंज्ञायां कर्तव्यायामनेन निषेधात् धान्तस्य पदसंज्ञायां जश्त्वं प्राप्नोति । न च भसंज्ञया बाध:, तत्र कर्तव्ये स्थानिद्भावनिषेधाभावेनोकारान्ततया भपदसंज्ञयो: समानावधिकत्वाभावादिति भाव: ।

(सिद्धान्त्येकदेशिप्रश्नभाष्यम्)

अस्ति पुन: किंचिद्भावसाधनस्य विधिशब्द-स्योपादाने सतीष्टं संगृहीतम्, आहोस्विद्दोषान्तमेवेति ?

(पूर्वपक्षिसमाधानभाष्यम्)

अस्तीत्याह ।। इह—कानि सन्ति । यानि सन्ति । कौ स्त:, यौ स्त इति । योऽसौ पदान्तो यकारो वकारो वा श्रूयेत[1], स न श्रूयते ।। षडिकश्चाऽपि सिद्धो भवति ।।

विमला - षडिकश्चापि सिद्धो भवतीति । अयम्भाव: । विधिशब्दस्य कर्मसाधनत्वपक्षे य: सम्प्रति पदान्त इत्यस्योक्ततया पदान्तत्वेन सिद्धोद्देश्यकविधेये कर्तव्य इत्याद्यर्थे पदत्वस्य सिद्धतया स्थानिवद्भावस्य कुत्रापि पदत्वद्वारा पदचरमावयव-साधकत्वम्प्रतिबन्धकत्वं वा न सम्भवतीत्ययोग्यत्वात् पदान्तपदे उपस्थित्वात् पदत्वद्वारिकैव परम्परा गृह्यते इति कल्पयितुं न शक्यते । एवञ्च षषि षकारस्य पदान्तत्वेन सिद्धतया भसंज्ञायां कर्तव्यायां भसंज्ञाभावसम्पादनद्वारा पदचरमावय-वसम्पादकस्यापि अल्लोपस्थानिवद्भावस्यानेन निषेधे षषि षान्तस्य समानावधिकत्वेन

---

१. 'श्रूयते' इति क्वचित् ।

पदसंज्ञाम्बाधित्वा भसंज्ञा स्यादिति पदत्वाभावाज्जश्त्वं न स्यात् । भावसाधनत्वे तु सम्प्रति पदान्त इत्यर्थो न सम्भवतीत्यस्यानुपदमुक्तत्वेन पदत्वद्वारापि स्थानिवद्भावस्य पदचरमावयवप्रतिबन्धकत्वं सम्भवतीति पदान्तपदे उपस्थितत्वात्पदत्वद्वारिकैव परम्परा गृह्यते इत्यस्य कल्पयितुं शक्यत्वेन भसंज्ञायां स्थानिवद्भावस्य पदत्वान्यद्वारकत्वेन तस्यां कर्तव्यायां स्थानिवद्भावस्य नानेन निषेध इति अल्लोपस्य स्थानिवद्भावे अकारान्तस्य भसंज्ञायामपि असमानावधिकत्वेन षान्तस्य पदसंज्ञा स्यादेवेति जश्त्वमुपपद्यते ।

(सिद्धान्त्येकदेशिन आक्षेपभाष्यम्)

वाचिकस्तु न सिध्यति ।।

विमला - वाचिकस्तु न सिद्ध्यतीति । वागाशीर्दत्तशब्दात् ठचि 'ठाजादावि' ति शीर्दत्तशब्दस्य लोपे भसंज्ञायां 'यस्येति चेत्याकरस्य लोपे अन्तर्वर्तिविभक्त्या चान्तस्य पदसंज्ञायां षडिक इत्यत्र जश्त्वस्येव पदान्तत्वाच्चकारस्य कुत्वं स्यात् । न च भसंज्ञया पदसंज्ञायाः बाधः, भसंज्ञायां कर्तव्यायामाकारलोपस्य स्थानिवद्भावेनाकारान्तस्य भसंज्ञायामपि असमानावधिकत्वाच्चान्तस्य पदसंज्ञायाः दुर्वारत्वात् । भावसाधनत्वपक्षे भसंज्ञायां स्थानिवद्भावस्यानेन निषेधासम्भवादिति भावः ।

(तटस्थभाष्यम्)

अस्तु तर्हि कर्मसाधनः ।।

विमला - कर्मसाधन इति । एवञ्च । पूर्वोक्तरीत्या भसंज्ञायामपि स्थानिवद्भावस्यानेन निषेधे समानावधिकत्वात् भसंज्ञया पदसंज्ञायाः बाधात् कुत्वं न स्यादिति भावः ।

(सिद्धान्त्येकदेशिसमाधानभाष्यम्)

यदि कर्मसाधनः, षडिको न सिध्यति ।।

विमला - षडिको न सिद्ध्यतीति । उपपादितमेतत्प्राक् ।

(तटस्थभाष्यम्)

अस्तु तर्हि भावसाधनः ।।

(सिद्धान्त्येकदेशिभाष्यम्)

वाचिको न सिध्यति ।।

(तटस्थभाष्यम्)

वाचिकषडिकौ न संवदेते ।।

विमला - न संवदेते इति । नैकपक्षेण सिद्धयतः ।

(सिद्धान्तिभाष्यम्)

कर्तव्योऽत्र यत्नः ।।

विमला - कर्तव्योऽत्र यत्नः । यत्नश्चायमेव 'एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्य' इति । एवञ्च वाचिक इत्यत्र आशीर्दत्तशब्दस्यैवानेन लोपः नतु शीर्दत्तशब्दस्य 'ठाजादावि' त्यनेन आकारस्य 'यस्येति चे' त्यनेनेति लोपस्याजादेशत्वाभावेन स्थानिवद्भावस्याप्राप्तौ भावसाधनत्वपक्षेऽपि चान्तस्यैव भसंज्ञा स्यादिति भसंज्ञया पदत्वबाधात् कुत्वं न भवति । षडिक इत्यर्थश्च 'षषष्ठाजादावि' ति पठनीयमिति षडिक इत्यत्र ङ्गुलिदत्तशब्दस्यैव लोपः । अकारस्य तु 'यस्येति चे' त्यनेन लोपः । तस्य लोपस्याजादेशत्वेन भसंज्ञायां स्थानिवद्भावे अकारान्तस्यैव भसंज्ञेति असमानाबाधकतया षान्तस्य पदसंज्ञायां जश्त्वं सिद्धयतीति भावसाधनत्वपक्षे सर्वमुपपन्नम् ।

(आक्षेपभाष्यम्)

कथं ब्रह्मबन्ध्वा ब्रह्मबन्ध्वै ?

(समाधानभाष्यम्)

उभयत आश्रयणे नान्तादिवदिति ।

विमला - उभयत इति । ब्रह्मबन्ध्वेत्यादावूङनूङोरेकादेशस्य पूर्वान्तवद्भावेन प्रकृतित्वम् परादिवद्भावेन च स्वादित्वमिति धान्तस्य स्वादिष्विति पदसंज्ञायामुभयत आश्रयणमिति भावः ।

(आक्षेपभाष्यम्)

कथं वेतस्वान् ?

विमला - कथं वेतस्वानिति । भावसाधनत्वपक्षे सम्प्रति पदान्त इत्यस्य वक्तुमशक्यत्वात्प्रश्नः ।

(समाधानभाष्यम्)

नैवं विज्ञायते–पदस्यान्तः पदान्तः, पदान्तस्य विधिः पदान्तविधिः[1], पदान्तविधिं प्रतीति ।।

कथं तर्हि ?

पदे अन्तः पदान्तः, पदान्तस्य विधिः पदान्तविधिः[1], पदान्तविधिं प्रतीति ।।

विमला - पदे अन्त इति । पदपरकत्वविशिष्टो योऽन्त इत्यर्थः । प्रत्यासत्त्यापरपदस्थाजादेशस्यैवानेन स्थानिवद्भावनिषेध इति ब्रह्मबन्धू षडिकादौ न कुत्रापि दोष इति बोध्यम् ।

(समाधानान्तरभाष्यम्)

अथवा यथैवाऽन्यान्यपि पदकार्याण्युपप्लवन्ते रुत्वं जश्त्वं च । एवमिदमपि पदकार्यमुपप्लोष्यते ।।

किम् ? भसंज्ञा नाम ।।

विमला - भसंज्ञानामेति । परम्परया पदचरमावयवप्रतिबन्धकस्यैव परम्परया पदचरमावयवसाधकस्यापि स्थानिवद्भावस्यानेन निषेध इति भावः ।

(वरे यलोपपदार्थनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

---

१. 'पदान्तस्य.....विधिः' इति क्वचिन्न ।

वरे यलोपविधिं प्रति न स्थानिवद्भवतीत्युच्यते । तत्र ते "अप्सु यायावरः प्रवपेत पिण्डान्" । अवर्णलोपविधिं प्रति स्थानिवत्स्यात् ॥

विमला - तेप्सु यायावर इति । यायावर इत्येतावन्मात्रं प्रकृतोपयोगीति बोध्यम् । अत्र यङोऽकारलोपस्य 'आतो लोप इटि चे' ति धात्वाकारलोपे स्थानिवत्त्वं स्यादिति भावः । नन्वार्धधातुक इत्यस्य विषयसप्तमीत्वात् यङोऽकारलोपस्य परनिमित्तत्वमेव नास्तीति स्थानिवद्भावाप्राप्तौ तन्निषेधो व्यर्थ इति चेन्न, वरेग्रहणेन परसप्तमीपक्षस्य ज्ञापनात् । अतएव 'अनुदात्तेतश्च हलादेरि' तिसूत्रे आदिग्रहणं चरितार्थम्। तद्धि हलन्तादित्यर्थनिरासाय । हलन्तविशेषणस्य व्यावर्त्यम् जुगुप्सनो मीमांसन इति । विषयसप्तमीत्वे तु तत्रापि अतोलोपे हलन्तत्वात् युचा भाव्यमेवेति हलन्तविशेषणवैयर्थ्यात् सामर्थ्यदिवादिपरिग्रहसिद्धौ हल इत्येव वदेत् । न च परसप्तमीत्वे 'अचो यदि' त्यत्राजग्रहणं व्यर्थम् । हलन्ताण्ण्यतो विशेषविहितत्वेन परिशेषादजन्तादेव भविष्यति । विषयसप्तम्यां तु अजन्तभूतपूर्वादपि दित्स्यं, धित्स्यमित्यादौ यत्सिद्धये अज्ग्रहणमिति 'यतोऽनाव' इत्याद्युदात्तत्वं सिद्ध्यति । ण्यतिकृते तु 'तित्स्वरितमि' ति स्वरितत्वं स्यादिति वाच्यम्, दित्स्यमित्यादौ स्वरितस्यैवेष्टत्वात्। अतएव 'अचो यदि' त्यत्र अज्ग्रहणं शक्यमकर्तुमिति कौमुद्यां **दीक्षितः** । किञ्च विषयसप्तमीत्वे गणयतीत्यादावल्लोपस्य परिनिमित्तत्वाभावेन स्थानिवत्त्वाभावे उपधावृद्धिप्रसङ्ग इति दिक् ।

ननु पूर्वमलोपस्ततो वलिलोप इति क्रमसत्त्वादकारेणार्धधातुकत्वाद्यलाभादतिदेशेन तल्लाभासम्भवेन पुनरपि निषेधो व्यर्थ एवेति चेन्न, सम्भावनामात्रेणापि तल्लाभस्य वरेग्रहणेन ज्ञापनात् । अस्ति चात्र यदि पूर्वं यलोपः स्याद् तदा अकारेणार्धधातुकत्वादिलब्धं स्यादिति सम्भावना । ज्ञापनफलन्तु यातिरित्यादेः सिद्धिः । तथाहि, यदि सम्भावितमार्धधातुकत्वमाकारलोपनिमित्तं न स्यात्तदा यातिरित्यत्र यङन्तात्तृचि कृते अकारयकारयोः क्रमेण लोपे अकारस्यार्धधातुकत्वाभावेन धात्वाकारलोपो न स्यादिति यातिरित्यस्यासिद्धिः ।

(समाधानभाष्यम्)

नैष दोषः । नैवं विज्ञायते—वरे यलोपविधिं प्रति न स्थानिवदिति[१] ।।

कथं तर्हि ? वरे अयलोपविधिं प्रतीति ।। किमिदमयलोपविधिं प्रतीति ? अवर्णलोपविधिं प्रति[२] यलोपविधिं च प्रतीति ।।

(समाधानान्तरभाष्यम्)

अथवा योगविभागः करिष्यते— "वरे लुप्तं न स्थानिवत्" । ततो 'यलोपविधिं प्रति न स्थानिवद्' इति ।।

विमला - 'योगविभाग: करिष्यते इति । अयम्भाव: । पदान्त-द्विर्वचन-यलोप-स्वरसवर्णानुस्वार-जश्-चर्पदार्थानां द्वन्द्वनिर्दिष्टानां सर्वेषां विधिपदार्थेऽन्वयो भवति 'द्वन्द्वान्त' इति न्यायात् । 'वरे' इति तु भिन्नं वाक्यम् । तस्य च वरच् प्रत्ययनिमित्तको लोपो न स्थानिवदिति पृथगेवार्थ: । तस्य विधावन्वयाभावेनैकधर्म्मावच्छिन्नान्वयित्वरूपसाहित्याभावेऽपि पदान्तादीनां चर्पर्यन्तानां निपातनात् द्वन्द्व:, सप्तम्या अलुक् च । यलोपेत्यत्र लोपपदस्यावृत्त्या एकस्य लोपस्यात्र संबन्ध: ।

(आक्षेपभाष्यम्)

यलोपे किमुदाहरणम् ?

(समाधानभाष्यम्)

कण्डूयतेरप्रत्ययः कण्डूरिति ।।

(समाधानबाधकभाष्यम्)

नैतदस्ति ।। क्वौ लुप्तं न स्थानिवत् ।।

---

१. 'विधिं प्रति स्थानिवद्भवतीति' इति क्वचित् । २. 'प्रतीति' क्व० ।

विमला - लुप्तमिति । भावे क्तः । लोप इत्यर्थः ।

(समाधानान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्—सौरी बलाका ।।

विमला - सौरीति । सूर्यशब्दादणि अणन्तत्वान् ङीपि अणि परे सूर्याकारस्य लोपे ङीपि परे अणोऽकारस्य लोपे 'सूर्यतिष्ये' ति ङ्यां यलोपे कर्तव्ये समानाश्रयत्वेन अणोऽकारलोपस्य 'असिद्धवदत्रे' त्यनेनासिद्धत्वात् तदकारमादाय यकारस्योपधात्वाद्यलोपः सिद्ध्यति । सूर्याकारलोपस्य तु नासिद्धत्वम्व्याश्रयत्वात् । नापि तस्य स्थानिवद्भावः, यलोपे कर्तव्ये अनेन निषेधात् । असति यलोपग्रहणे तु तस्य स्थानिवद्भावापत्त्या, यकारस्योपधात्वाभावेन लोपो न स्यादिति भावः ।

(तन्निरासभाष्यम्)

नैतदस्ति । उपधात्वविधिं प्रति न स्थानिवत् ।।

(समाधानान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्—आदित्यः ।।

(बाधकभाष्यम्)

नैतदस्ति । पूर्वत्रासिद्धे न स्थानिवत् ।।

(प्रयोजनान्तरभाष्यम्)

इदं तर्हि—कण्डूतिर्वल्गूतिः ।।

(बाधकभाष्यम्)

नैतदस्ति प्रयोजनम् । कण्डूया वल्गूया इति भवितव्यम् ।

विमला - कण्डूया, वल्गूया इति भवितव्यमिति । स्त्रियां क्तिन् इति क्तिन अप्रत्ययादित्यनेन क्तिनो बाधात् । एतद्भाष्यप्रामाण्यादेव तस्य न सम्पदादित्वकल्पना नापि बहुलग्रहणं शरणमिति भावः ।

(समाधानान्तरभाष्यम्)

इदं तर्हि—कण्डूयतेः क्तिच् । ब्राह्मणकण्डूतिः क्षत्रियकण्डूतिः ॥

विमला - कण्डूयतेः क्तिजिति । तत अल्लोपयलोपाविति प्रक्रिया । यलोपे कर्तव्ये अल्लोपस्य स्थानिवद्भावस्तु न भवति अनेन निषेधात् । न चात्राल्लोपस्यासिद्धत्वादुवङ् यण् वा स्यादिति वाच्यम्, कृतेऽपि तस्मिन् ऊठारूपसिद्धिसम्भवात् । न चोठिकर्तव्येऽपि स्थानिवत्त्वं शङ्क्यम्, वकारस्यानादिष्टादचः पूर्वत्वाभावात् । स्थानिद्वारकमनादिष्टादचः पूर्वत्वं तु नाश्रयणीयम् अस्मादेव भाष्यप्रामाण्यात्तदाश्रयणस्य क्वाचित्कत्वज्ञापनादिति दिक् ।

(४१५-नियमाक्षेपवार्तिकम्-१)

॥॥ प्रतिषेधे स्वरदीर्घलोपेषु[1] लोपाजादेशो न स्थानिवत् ॥*॥*

(आक्षेपभाष्यम्)

प्रतिषेधे स्वरदीर्घयलोपविधिषु लोपाजादेशो न स्थानिवदिति[2] वक्तव्यम् ॥

(स्वरोदाहरणोपपादनभाष्यम्)

स्वर—आकर्षिकः । चिकीर्षकः । जिहीर्षकः ॥ यो ह्यन्य आदेशः, स्थानिवदेवासौ भवति—पञ्चारत्न्यो दशारत्न्यः ॥ स्वर ॥

विमला - आकर्षिक इति । इदमापाततः ष्ठलो लित्वसामर्थ्यात् स्थानिवद्भावकृतव्यवधाने सत्यपि लित्स्वरस्य सुवचत्वात् । यत्तु **कैयटः**—ष्ठलोलित्करणात् व्यवधानेऽपि भविष्यतीति चेदाकारस्यापि स्यादिति तन्न, वर्णव्यवधाने चारितार्थ्यसम्भवे अधिकव्यवधाने अप्रवृत्तेः ।

---

१. क्वचिद् 'यलोपेषु' । २. 'स्थानिवद्भवतीति' क्व० ।

(दीर्घोदाहरणोपपादनभाष्यम्)

दीर्घ—प्रतिदीव्ना प्रतिदीव्ने ।। यो ह्यन्य आदेशः, स्थानिवदेवासौ भवति—किर्योः । गिर्योः । दीर्घ ।।

(यलोपोदाहरणोपपादनभाष्यम्)

यलोप—ब्राह्मणकण्डूतिः । क्षत्रियकण्डूतिः ।। यो ह्यन्य आदेशः, स्थानिवदेवासौ भवति— वाय्वोरध्वर्य्वोरिति ।। यलोप ।।

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम् ?

विमला - तत्तर्हीति । उक्तप्रयोजनसत्त्वेन 'प्रतिषेधे स्वरदीर्घे'ति वार्तिकं वक्तव्यमित्यर्थः ।

(समाधानभाष्यम्)

न वक्तव्यम् । इह हि लोपोऽपि प्रकृतः, आदेशोऽपि, विधिग्रहणमपि प्रकृतमनुवर्तते, दीर्घादयोऽपि निर्दिश्यन्ते[१] । केवलं तत्राभिसंबन्धमात्रं कर्तव्यम्—स्वरदीर्घयलोपविधिषु लोपाजादेशो न स्थानिवदिति ।।

(आक्षेपभाष्यम्)

आनुपूर्व्येण सन्निविष्टानां यथेष्टमभिसंबन्धः शक्यते कर्तुम् । न चैतान्यानुपूर्व्येण सन्निविष्टानि ।।

(समाधानभाष्यम्)

अनानुपूर्व्येणापि सन्निविष्टानां यथेष्टमभिसंबन्धो

१. 'प्रतिनिर्दिश्यन्ते' इति क्व० ।

भवति । तद्यथा— अनड्वाहमुदहारि ! या त्वं हरसि शिरसा कुम्भं भगिनि ! साचीनमभिधावन्तमद्राक्षीरिति[1] । तस्य यथेष्टमभिसंबन्धो भवति–उदहारि भगिनि ! या त्वं कुम्भं हरसि शिरसा, अनड्वाहं साचीनमभिधावन्तमद्राक्षीरिति[1] ।।

(४१६-न्यूनताक्षेपवार्तिकम्-२)

।।।। क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम्[2] ।।*।।*

(भाष्यम्)

क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानं कर्तव्यम् ।।

(क्विग्रहणोदाहरणप्रकरणम्)

(आक्षेपभाष्यम्)

क्वौ किमुदाहरणम् ?

(समाधानभाष्यम्)

कण्डूयतेरप्रत्ययः कण्डूरिति[3] ।।

(समाधानबाधकभाष्यम्)

नैतदस्ति । यलोपविधिं प्रति न स्थानिवत् ।।

विमला - यलोपविधिमिति । यद्यपि कण्डूरित्यत्र अल्लोपस्य स्थानिवद्भावनिषेधेन यणभावो यलोपश्चेति फलद्वयं सिद्ध्यति, तत्र यलोपे कर्तव्ये स्थानिवद्भावनिषेधे-नान्त्यफलस्यान्यथासिद्ध्युद्भावनेऽपि यणभावः प्रयोजनमस्त्येव, तथापि यलोपप्रतिबन्धकः

---

१. 'मप्राक्षीः' इति क्व० ।   २. वार्तिकमिदं क्वचिन्न ।

३. 'कण्डूतिरिति' क्व० ।

स्थानिवद्भावो नेत्यर्थाभ्युपगमेन अत्राल्लोपस्थानिवद्भावस्य यण्सम्पादकत्वस्येव यलोपप्रतिबन्धकत्वमप्यस्तीति सूत्रेण स्थानिवद्भावप्रतिषेधे यलोप इव यणभावोऽपि सूत्रेणैव सिद्धमित्यभिमानेन फलान्तरानुसन्धानमिति बोध्यम् ।

(समाधानान्तरभाष्यम्)

इदं तर्हि—पिपठिषतेरप्रत्ययः — पिपठीः ।।

(तद्बाधकभाष्यम्)

नैतदस्ति । दीर्घविधिं प्रति न स्थानिवत् ।।

विमला - दीर्घविधिमिति । यद्यपि पिपठीरित्यत्र 'र्वोरि' ति दीर्घे कर्तव्ये स्थानिवद्भावस्य दीर्घविधिम्प्रति न स्थानिवदिति निषेधसिद्धावपि रुत्वे स्थानिवद्भावप्रतिषेधार्थं क्वौ लुप्तमित्याश्रयणीयमेवेति फलकथनं सम्यगेव । तथापि दीर्घविधिप्रतिबन्धकः स्थानिवद्भावो नेत्यर्थाभिमानेन नैतदस्तीति खण्डनमित्यवधेयम् ।

(समाधानान्तरभाष्यम्)

इदं तर्हि—लावयतेर्लौः । पावयतेः पौः ।

(तद्बाधकभाष्यम्)

नैतदस्ति । अकृत्वा वृद्ध्यावादेशौ णिलोपः । प्रत्ययलक्षणेन वृद्धिर्भविष्यति ।।

(समाधानान्तरभाष्यम्)

इदं तर्हि—लवमाचष्टे लवयति । लवयतेरप्रत्यये— लौः पौः । स्थानिवद्भावाणू णेरूण् न प्राप्नोति ।। क्वौ लुप्तं न स्थानिवद्दिति भवति ।।

(समाधानबाधकभाष्यम्)

एवमपि न सिध्यति ।। कथम् ? क्वौ णिलोपो, णावकारलोपस्तस्य स्थानिवद्भावादूण् न प्राप्नोति ।।

(समाधानसाधकभाष्यम्)

नैष दोषः । नैवं विज्ञायते—क्वौ लुप्तं न स्थानिवदिति ।। कथं तर्हि ?

क्वौ विधिं प्रति न स्थानिवदिति ।।

विमला - नैवं विज्ञायते इति । नैवमेव विज्ञायते किन्त्विदमपि लक्ष्यसिद्धये क्वचिदाश्रीयते इत्यर्थः । अस्य क्वाचित्कत्वादेव दीधीवेवीटामिति सूत्रे **कैयट:** क्वौ विधिम्प्रतीत्यर्थो व्यवस्थितो न तु क्वौलुप्तमित्याह । अत्र व्यवस्थितमिति वदता क्वौ लुप्तं न स्थानिवदिति पक्षोऽपि क्वचिदाश्रीयते, नियमः परं नास्तीति सूचितम् । क्वौ लुप्तमित्यस्यासार्वत्रिकत्वे पिपठिषतीति भाष्योदाहरणमपि मानम् । अन्यथा पिपठिषतेरप्रत्यये अतोलोपे नपुंसकबहुवचने शौ झल्लक्षणे नुमि कर्तव्ये अतोलोपस्य स्थानिवत्वनिषेधेन नुम् प्रसज्येत । न च क्वौलुप्तमित्यत्र प्रमाणाभाव इति भ्रमितव्यम्, 'पादस्य पादहस्त्यादिभ्य' इति लघुन्यासेनैव सिद्धे पादस्य लोपोऽहस्त्यादिभ्य इति गुरुनिर्देशस्यैव प्रमाणत्वात् । तथानिर्देशो हि प्रतिपदोक्तस्यास्यैव पदादेशो माभूत् किन्तु पादयतेः क्विनिष्पन्नस्यापि यथा स्यादित्यर्थम् । क्वौलुप्तमित्यस्याभावे तु पदादेशस्य क्वौविधित्वाभावेन क्वौविधिम्प्रति न स्थानिवदिति स्थानिवत्त्वनिषेधस्याप्राप्तौ अल्लोपस्य स्थानिवत्त्वेन क्विबन्तस्य पदादेशासम्भवेन गुरुनिर्देशो व्यर्थ एव स्यादिति बोध्यम् । न च क्वौलुप्तमित्यस्य फलाभावः, सख्युरित्यादिफलसम्भवात् । तथाचोक्तम्–"सख्युर्गोमाम्पदत्वञ्च क्वौलुप्तस्य निदर्शनम् ।

अनित्यत्वे पिपठिषि क्वौविधौ लौद्वयोर्दयूः" ।।

उपलक्षणमिदं कण्डूरित्यत्र यणभावस्य पिपठीरित्यत्र रुत्वस्य च यलोपप्रतिबन्धकः स्थानिवद्भावो नेत्याद्यर्थस्य सूत्राक्षरस्वारस्यप्रतिकूलतया सूत्रेण स्थानिवद्भावनिषेधासिद्धिः । न च रुत्वस्य यणश्च पदान्तविधित्वेन सूत्रेणैव निषेधः स्यादिति वाच्यम् । सिद्धान्तिसम्मते पदे अन्तः पदान्त इति सप्तमीसमासे सूत्रस्याप्राप्तेः ।

(इति क्विग्रहणोदाहरणनिरूपणम्)

(अथ लुग्ग्रहणोदाहरणनिरूपणम्)

(आक्षेपभाष्यम्)

लुकि किमुदाहरणम् ?

(समाधानभाष्यम्)

बिम्बं बदरम् ।।

(समाधानबाधकभाष्यम्)

नैतदस्ति । पुंवद्भावेनाप्येतत्सिद्धम् ।।

(समाधानान्तरभाष्यम्)

इदं तर्हि—आमलकम् ।।

विमला - आमलकम् । अत्र यच्परत्वाभावाद्धत्वस्याप्राप्तेः । भस्याढे इत्यस्य विषय एव नास्तीति भावः ।

(समाधानबाधकभाष्यम्)

नैतदस्ति[1] । वक्ष्यत्येतत्—'फले लुग्वचनानर्थक्यं प्रकृत्यन्तरत्वाद्' इति ।

(समाधानान्तरभाष्यम्)

इदं तर्हि—पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुर्दशपटुरिति ।।

(समाधानबाधकभाष्यम्)

ननु चैतदपि पुंवद्भावेनैव सिद्धम् ।। कथं पुंवद्भावः ?

भस्याढे तद्धिते पुंवद्भवतीति ।।

---

१. 'एतदपि नास्ति' इति क्व० ।

(समाधानसाधकभाष्यम्)

भस्येत्युच्यते । यजादौ च भसंज्ञा[1] भवति । न चात्र यजादिं पश्यामः ।।

(समाधानबाधकभाष्यम्)

प्रत्ययलक्षणेन यजादिः ।

(समाधानसाधकभाष्यम्)

वर्णाश्रये नास्ति प्रत्ययलक्षणम् ।।

(समाधानबाधकभाष्यम्)

एवं तर्हि—"ठक्छसोश्च" इत्येवं भविष्यति ।।

(समाधानसाधकभाष्यम्)

ठक्छसोश्चेत्युच्यते । न चात्र ठक्छसौ पश्यामः ।।

(बाधकभाष्यम्)

प्रत्ययलक्षणेन ।।

(समाधानसाधकभाष्यम्)

"न लुमता तस्मिन्" इति प्रत्ययलक्षणस्य प्रतिषेधः ।। न खल्वप्यवश्यं ठगेव क्रीतप्रत्ययः । क्रीताद्यर्था एव वा तद्धिताः ।।

किं तर्हि ? अन्येऽपि तद्धिता ये लुकं प्रयोजयन्ति । पञ्चेन्द्राण्यो देवता अस्येति पञ्चेन्द्रः । दशेन्द्रः[2] । पञ्चाग्निः । दशाग्निः[3] ।

---

१. क्वचित् 'भं' । क्वचिन्न चेति । २. क्वचिदितः परं 'शतेन्द्रः' ।

३. क्वचिदितः परं 'शताग्निः' ।

(अथोपधात्वोदाहरणनिरूपणम्)

(आक्षेपभाष्यम्)

उपधात्वे किमुदाहरणम् ?

(समाधानभाष्यम्)

पिपठिषतेरप्रत्ययः पिपठीरिति ।।

(समाधानबाधकभाष्यम्)

नैतदस्ति । दीर्घविधिं प्रति न स्थानिवत् ।।

(समाधानान्तरभाष्यम्)

इदं तर्हि—सौरी बलाका ।।

(समाधानबाधकभाष्यम्)

नैतदस्ति । यलोपविधिं प्रति न स्थानिवत् ।।

(समाधानान्तरभाष्यम्)

इदं तर्हि—पारिखीयः ।।

विमला - पारिखीय इति । अत्राकारलोपस्य स्थानिवद्भावेन खोपधत्वाभावाच्छो न स्यादिति भावः । ननूपधात्वनिमित्तके विधौ स्थानिवद्भावनिषेधे पटयतीत्यत्रोपधात्वनिमित्तकवृद्धौ कर्तव्यायां टिलोपस्य स्थानिवद्भावनिषेधापत्त्या वृद्ध्यापत्तिरिति चेन्न, चङ्परनिर्ह्रासग्रहणेनोपधात्वनिमित्तकप्रत्ययविधावेवायं निषेध इति ज्ञापनात् । अन्यथा चङ्परनिर्ह्रासस्याप्युपधात्वनिमित्तकत्वेनानेनैव निषेधसिद्धौ चङ्परनिर्ह्रासग्रहणस्य वैयर्थ्यं स्यात् । भाष्ये यलोपे सौरी बलाकेत्युदाहरणं दत्त्वा 'उपधाविधौ न स्थानिवदित्येव सिद्धमि' त्युक्तिस्तु प्रत्ययविधावित्यंशमपर्य्यालोच्येति तत्रैवोद्योते स्पष्टम् ।

(इत्युपधात्वोदाहरणनिरूपणम्)

(अथ चङ्परनिर्ह्रासोदाहरणनिरूपणम्)

चङ्परनिर्ह्रासे चोपसंख्यानं कर्तव्यम् । वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन ।।

किं पुनः कारणं न सिध्यति ?

योऽसौ णौ णिर्लुप्यते तस्य स्थानिवद्भावाद्ध्रस्वत्वं न प्राप्नोति ।।

विमला - चङ्परेति । चङ्परे णौ यो ह्रस्वः स चङ्परनिर्ह्रासस्तत्र कर्तव्ये इत्यर्थः । **चङ्परनिर्ह्रासे चोपसंख्यानं कर्तव्यमिति** । उपक्रमानुरोधादत्रापि चङ्परनिर्ह्रासे किमुदाहरणम् इत्येव पाठो युक्तः । अन्यथा पूर्वमपि क्वौ किमुदाहरणमित्यनुक्त्वा 'क्वावुपसंख्यानम्' 'लुक्युपसंख्यानम्' उपधात्वे चोपसंख्यानमित्याद्येव वदेत् ।

(तद्बाधकभाष्यम्)

ननु चैतदप्युपधात्वविधिं प्रति न स्थानिवदित्येव सिद्धम् ।।

(तत्साधकभाष्यम्)

विशेषत[1] एतद्वक्तव्यम् ।

क्व ? प्रत्ययविधाविति । इह मा भूत्— पटयति लघयतीति ।।

(अथ कुत्वोदाहरणनिरूपणम्)

कुत्वे चोपसंख्यानं कर्तव्यम् । अर्चयतेरर्कः । मर्चयतेर्मर्कः ।।

(उपसंख्यानबाधकभाष्यम्)

---

१. 'विशेषे एत..' ।

नैतद् घञन्तम् । औणादिक एव कशब्दस्तस्मिन्नाष्टमिकं कुत्वम् ।।

विमला - आष्टमिकं कुत्वमिति । चोः कुरित्यनेनेति भावः । इदमत्रावधेयम् । अत्रसूत्रे 'जश्चर्षु' इत्येव सिद्धे विधिग्रहणं विध्यन्तरोपसंग्रहार्थम्, तत्फलितमेव क्विलुगुपधात्वेति वार्तिकम् । अत्र वार्तिके लुक ईकारप्रश्लेषेण गतार्थत्वात् कुत्वस्य च पूर्वत्रासिद्धीयत्वेन तत्र पूर्वत्रासिद्धे चेति वक्ष्यमाणवार्तिकेनैव निषेधसिद्धेः लुक्कुत्वयोरत्र ग्रहणं नावश्यकम् । किन्तु 'क्विचङ्परनिर्ह्रासोपधानामेवात्र ग्रहणमावश्यकमित्यवधेयम् ।

(उपसंख्यानसाधकभाष्यम्)

एतदपि णिचा व्यवहितत्वान्न प्राप्नोति ।।

(४१७-आक्षेपवार्तिकम्-३)

।।❋।। पूर्वत्राऽसिद्धे च ।।❋।।

(भाष्यम्)

पूर्वत्राऽसिद्धे च न स्थानिवदिति वक्तव्यम् ।।

(भाष्यम्)

किं प्रयोजनम् ?

(४१८-प्रयोजनवार्तिकम्-४)

।।❋।। प्रयोजनं क्सलोपः सलोपे ।।❋।।

(भाष्यम्)

क्सलोपः सलोपे प्रयोजनम् । अदुग्ध अदुग्धाः । "लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये" इति लुग्ग्रहणं न कर्तव्यं भवति ।।

विमला - क्सलोप:सलोपे प्रयोजनमिति । सलोपोत्तरम् झलोझलीति सलोपे कर्तव्ये स्थानिवद्भावनिषेध: प्रयोजनमित्यर्थ: । अयम्भाव: । 'लुग्वादुहे'त्यत्र लोपपदानुवृत्तौ एषां क्सस्य लोप इत्यर्थे अलोऽन्त्यपरिभाषया अकारस्यैव लोपे झलोझलीति सलोपे कर्तव्ये कृतस्याल्लोपस्यासिद्धतया झल्परत्वाभावात् सलोपो न सिद्ध्येदिति लुग्ग्रहणं क्रियते । कृते च लुग्ग्रहणे प्रत्ययादर्शनस्यैव लुक्संज्ञकत्वेन सामर्थ्याद-लोऽन्त्यपरिभाषाया अप्रवृत्तौ समुदायस्य सस्यैव लोपे अदुग्धेत्यादि सिद्ध्यति । पूर्वत्रासिद्धीये स्थानिवद्भावनिषेधस्वीकारे तु लोपपदानुवृत्त्या अलोन्त्यपरिभाषया अकारस्यैव लोपेऽपि पूर्वत्रासिद्धीये झलो झलीति सलोपे कर्तव्ये अल्लोपस्य स्थानिवद्भावनिषेधात् झल्परत्वेन सलोपे अदुग्धेत्यादिसिद्धौ लुग्ग्रहणं न कर्तव्यमिति तदेतदाह—**लुग्ग्रहणं न कर्तव्यमिति**।

(४१९-प्रयोजनवार्तिकम्-५)

।।*।। *दध[1] आकारलोप आदिचतुर्थत्वे* ।।*।।

(भाष्यम्)

दध आकारलोप आदिचतुर्थत्वे प्रयोजनम्—धत्से धद्ध्वे धद्ध्वमिति । "दधस्तथोश्च" इति चकारो न कर्तव्यो भवति ।।

विमला - आदिचतुर्थत्वे इति । आदिवर्णस्य भष्भावे कर्तव्ये इत्यर्थ: ।

(४२०-प्रयोजनवार्तिकम्-६)

।।*।। *हलो यमां यमि लोपे* ।।*।।

(भाष्यम्)

हलो यमां यमि लोपे प्रयोजनम् । आदित्य: । "हलो यमां यमि लोप:" सिद्धो भवति ।।

---

१. क्वचिन्न ।

विमला - सिद्धो भवतीति । अन्यथा पूर्वयकारोत्तराकारलोपस्य स्थानिवद्भावेन व्यवधानात् पूर्ववकारलोपो न स्यादिति भावः ।

(४२१-प्रयोजनवार्तिकम्-७)

॥*॥ अल्लोपणिलोपौ संयोगान्तलोपप्रभृतिषु ॥*॥

(भाष्यम्)

अल्लोपणिलोपौ संयोगान्तलोपप्रभृतिषु प्रयोजनम् । पापच्यतेः पापक्तिः । यायज्यतेर्यायष्टिः । पाचयतेः पाक्तिः । याजयतेर्याष्टिः ॥

(४२२-प्रयोजनवार्तिकम्-८)

॥*॥ द्विर्वचनादीनि च ॥*॥

(भाष्यम्)

द्विर्वचनादीनि च[१] न पठितव्यानि भवन्ति । पूर्वत्रासिद्धेनैव सिद्धानि भवन्ति ॥

किमविशेषेण ? नेत्याह ।

(शेषवार्तिकखण्डम्-८)

॥*॥ वरेयलोपस्वरवर्जम् ॥*॥

(भाष्यम्)

वरेयलोपं स्वरं च वर्जयित्वा ॥

(४२३-प्रतिप्रसन्नवार्तिकम्-९)

॥*॥ तस्य दोषः संयोगादिलोपलत्वणत्वेषु ॥*॥

---

१. इतः परं 'प्रयोजनानि' इति क्वचिदधिकम् । क्वचिच्च 'नारब्धव्यानि' इति ।

(भाष्यम्)

तस्यैतस्य लक्षणस्य दोषः संयोगादिलोपलत्वणत्वेषु ॥

विमला - दोष इति । अतिप्रसक्तिरित्यर्थः ।

(उदाहरणभाष्यम्)

संयोगादिलोपे—काक्यर्थम् वास्यर्थम् । 'स्कोः संयोगाद्योरन्ते च' इति लोपः प्राप्नोति ॥

विमला - वास्यर्थमिति । अत्र संयोगादिलोपे कर्तव्ये पूर्वत्रासिद्धे न स्थानिवदित्यस्य निषेधे यणः स्थानिवद्भावस्य प्रतिप्रसवेन संयोगादिलोपो न । यत्तु 'संयोगादिलोपे यणः प्रतिषेधो वाच्य' इत्युत्तरं 'नवा झलो लोपादिति, कथनेन संयोगान्तलोप इव संयोगादिलोपेऽपि तदङ्गीकारः, यणः प्रतिषेधस्य संयोगान्तलोपसंयोगादिलोपोभयविषयकत्वेन नवा झलो लोपादिति वार्तिकस्याप्युभयविषयकत्वमेव न्याय्यम् । संयोगान्तलोपो झलोलोप इति भाष्यन्तूपलक्षणम् । तथाच झलन्तो यः संयोगस्तदाद्योः स्कोर्लोप इति सूत्रार्थे वास्यर्थमित्यादौ संयोगस्य झलन्तत्वाभावेन लोपाप्राप्त्या प्रतिप्रसववार्तिके संयोगादिग्रहणं न कर्तव्यमिति तन्न । तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि तक्; रगित्याद्यसिद्ध्यापत्तेः । अत्र हि संयोगादिलोपे णिलोपस्य स्थानिवद्भावेन संयोगान्तलोपो भवति प्रतिप्रसववार्तिके संयोगादिग्रहणाभावे तु संयोगादिलोपेऽपि स्थानिवद्भावनिषेधात् परत्वात्संयोगादिलोप एव स्यादिति षकारस्य जश्त्वचर्त्वे तट्, रडित्याद्यापत्तिः । न च 'काष्ठशगेव नास्ति कुतः काष्ठशक्स्थातेतिभाष्यप्रामाण्येनैषां प्रयोगाणामनभिधानमेवेति वाच्यम्, काष्ठशक्स्थातेत्यत्र कलोपप्राप्तिमाशङ्क्य तद्भाष्यप्रवृत्त्या यत्र कलोपप्रसक्तिस्तत्रैवानभिधानस्य भाष्याभिमतत्वात् । णिजन्तेभ्यः क्विप्यपि स्थानिवद्भावेन णिचाव्यवधानात् नैव कलोपप्रसक्तिरिति णिजन्तेभ्यः क्विपोऽनभिधाने मानाभावात् । किञ्च कूस्मयतेः कूरित्यसिद्ध्यापत्त्या संयोगादिग्रहणमावश्यकमेवेति दिक् ।

(लत्वोदाहरणभाष्यम्)

लत्वम्—निगार्यते निगाल्यते । "अचि विभाषा" इति लत्वं न प्राप्नोति ।।

(णत्वोदाहरणभाष्यम्)

णत्वम्—माषवपनी व्रीहिवपनी । "प्रातिपदिकान्तस्य" इति णत्वं प्राप्नोति ।। न पदान्तद्विर्वचन० ।।५७।।

(अतिदेशसूत्रम्)

द्विर्वचनेऽचि ।।१।१।५८।।

(इष्टानुपपत्तिपरिहाराधिकरणम्)

(४२४-आक्षेपसाधकवार्तिकप्रथमखण्डम्- १)

।।।। आदेशे स्थानिवदनुदेशात्तद्वतो द्विर्वचनम् ।।*।।*

(भाष्यम्)

आदेशे स्थानिवदनुदेशात् । तद्वतः ।

किंवतः ?

आदेशवतः । द्विर्वचनं प्राप्नोति ।।

विमला - स्थानिवदनुदेशादिति । पूर्वसूत्रे स्थानिवत्पदस्य स्थानिनि सति यत्कार्यं तदादेशेपीति प्राधान्यात्कार्य्यातिदेशस्वीकारादत्रापि अर्थाधिकारानुरोधेन प्राधान्येन च कार्य्यातिदेशस्यैव स्वीकरणीयतया चक्रतुरित्यादौ क्र–अतुसित्यवस्थायां परत्वाद्यणादेशे क्र–अतुसित्यवस्थायामज् निमित्तवैकल्यप्रयुक्तद्विर्वचनाप्राप्तौ स्थानिवदनुदेशात्तादृशनिमित्तवैकल्येऽपि निरच्कस्य द्विर्वचने अभ्यासेऽचः श्रवणानापत्त्या चकतुरित्याद्यसिद्ध्यापत्तिरिति भावः ।

(प्रत्याक्षेपभाष्यम्)

तत्र को दोषः ?

(४२४-आक्षेपवार्तिकद्वितीयखण्डम्-१)

॥॥ तत्राभ्यासरूपम् ॥*॥*

(भाष्यम्)

तत्राभ्यासरूपं न सिद्ध्यति । चक्रतुश्चक्रुरिति ॥

(४२५-समाधानवार्तिकम्-२)

॥॥ अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य ॥*॥*

(भाष्यम्)

यदयमज्ग्रहणं करोति तज् ज्ञापयत्याचार्यः—रूपं स्थानिवद्भवतीति ॥

कथं कृत्वा ज्ञापकम् ?

अज्ग्रहणस्यैतत्प्रयोजनम्—इह मा भूत्—जेघ्रीयते देध्मीयते[1] । यदि च रूपं स्थानिवद्भवति । ततोऽज्ग्रहणमर्थवद्भवति । अथ हि कार्यम्, नाऽर्थोऽज्ग्रहणेन । भवत्येवाऽत्र द्विर्वचनम् ॥

विमला - अज्ग्रहणमर्थवद्भवतीति । अज्ग्रहणाभावे यङोऽपि द्वित्वनिमित्ततया तस्मिन् परे घ्रीशब्दादेः घ्रात्वादिरूपातिदेशापत्त्या जघ्रीयते इत्याद्यनिष्टापत्तिः । कृतेऽचिग्रहणे यङोऽच्त्वाभावेन नापत्तिरित्यज्ग्रहणमर्थवद्भवतीति भावः । प्रत्युदाहरणमिदं स्वरान्तरे व्यञ्जनान्युत्तरस्येति प्रातिशाख्यरीत्या । नटभार्यावद्व्यञ्जनानि भवन्तीति षाष्ठभाष्यरीत्या तु यङः कार्यित्वेन निमित्तत्वाभावान्नैतत्प्रत्युदाहरणम् । किन्तु अधिजगे इति प्रत्युदाहरणं बोध्यम् । तथाहि गाङ् ल्लिटीति द्विलकारकनिर्देशाल्लकारादौ लिटि

---

१. क्वचिदत्र इतीति अधिकः ।

गाङादेशो भवति अत्राज्ग्रहणाभावे तु द्वित्वनिमित्ते लिटि इङो गाङादेशनिषेधे अधिजगे इति न सिद्धयेत् । यदा तु आर्धधातुकीयाः सामान्येन भवन्तीति भाष्योक्त्या लिटीत्यादयो विषयसप्तम्यन्ता एवेत्यभ्युपगम्यते तदा लिटो द्वित्वनिमित्तत्वाभावान्नैतदपि प्रत्युदाहरणम् । किन्तु जग्ले इति प्रत्युदाहरणं स्यात् । 'आदेच उपदेशेऽशिती'त्यत्राशितीति प्रसज्यप्रतिषेधः विषयसप्तमीति वाश्रीयते तदा जग्ले इत्यपि प्रत्युदाहरणं न भविष्यतीत्यज्ग्रहणं व्यर्थीभूय ज्ञापयति-अत्र शास्त्रे बुद्धिकृतमेव निमित्तत्वमिति । एवञ्च लिटीत्यादीनां विषयसप्तमीत्वेऽपि लिड्बुद्धेः पूर्वमवश्यं सत्त्वेन भवति गाङादेशादीनां लिड्निमित्तत्वमिति अचिग्रहणफलमधिजगे इत्यादिकं निर्विवादमेवेति बोध्यम् । एतज्ज्ञापनादेव तृज्वत्वसूत्रस्थभाष्योक्तरीत्या अङ्गाधिकारीयशास्त्राणां परनिमित्तकत्वाभावेऽपि उरदत्त्वस्य नियमतः परबुद्धेः पूर्ववृत्तितया परनिमित्तकत्वेन वव्रश्चेत्यत्र सम्प्रसारणाभावः सिद्धयति । सर्वमिदं नलुमताङ्गस्येति सूत्रे शेखरे स्पष्टम् ।

(४२६-समाधानबाधकाक्षेपवार्तिकम्- ३)

॥॥ तत्र गाङ्प्रतिषेधः[1] ॥*॥*

(भाष्यम्)

तत्र गाङः प्रतिषेधो वक्तव्यः । अधिजगे । इवर्णाभ्यासता प्राप्नोति ॥

(समाधानसाधकभाष्यम्)

न वक्तव्यः । 'गाङ्ल्लिटि' इति द्विलकारको निर्देशः । लिटि लकारादाविति ॥

(४२७-आक्षेपान्तरवार्तिकम्- ४)

॥॥ कृत्येजन्तदिवादिनाम-धातुष्वभ्यासरूपम् ॥*॥*

१. क्वचिद् 'गाङः प्रति०' इति ।

(भाष्यम्)

कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपं न सिद्ध्यति ॥

कृति—अचिकीर्तत् । कृति ॥

एजन्त–जग्ले मम्ले । एजन्त ॥

दिवादि—दुद्यूषति सुस्यूषति । दिवादि ॥

नामधातु—भवनमिच्छति भवनीयति, भवनीयतेः सन् विभवनीयिषति ॥

(पक्षान्तरेण समाधानभाष्यम्)

एवं तर्हि प्रत्यय इति वक्ष्यामि ॥

(४२८-द्वितीयपक्षदूषणवार्तिकम्-५)

॥॥ प्रत्यय इति चेत् कृत्येजन्तनामधातुष्वभ्यासरूपम् ॥*॥*

(भाष्यम्)

प्रत्यय इति चेत् कृत्येजन्तनामधातुष्वभ्यासरूपं न सिद्ध्यति । दिवादय एके परिहृताः ॥

(तृतीयपक्षाङ्गीकारेण समाधानभाष्यम्)

एवं तर्हि—द्विर्वचननिमित्ते अच्यजादेशः स्थानिवद्—इति वक्ष्यामि ॥

(तृतीयपक्षे दूषणभाष्यम्)

स तर्हि निमित्तशब्द उपादेयः । नह्यन्तरेण निमित्तशब्दं निमित्तार्थो गम्यते ॥

(समाधानभाष्यम्)

अन्तरेणापि निमित्तशब्दं निमित्तार्थो गम्यते। तद्यथा—"दधित्रपुसं प्रत्यक्षो ज्वरः"। ज्वरनिमित्तमिति गम्यते॥ "नड्वलोदकं पादरोगः"। पादरोगनिमित्तमिति गम्यते॥ "आयुर्घृतम्"। आयुषो निमित्तमिति गम्यते॥

(समाधानान्तरभाष्यम्)

अथवा अकारो मत्वर्थीयः। द्विर्वचनमस्मिन्नस्ति सोऽयं द्विर्वचनः, द्विर्वचने इति॥

(आक्षेपभाष्यम्)

एवमपि न ज्ञायते—कियन्तमसौ कालं स्थानिवद्भवतीति॥

(समाधानभाष्यम्)

यः पुनराह 'द्विर्वचने कर्तव्ये' इति, कृते तस्य द्विर्वचने स्थानिवन्न भविष्यति॥

(आदेशनिषेधरूपचतुर्थपक्षाभ्युपगमभाष्यम्)

एवं तर्हि—प्रतिषेधः प्रकृतः सोऽनुवर्तिष्यते॥ क्व प्रकृतः?

"न पदान्तद्विर्वचन" इति॥ द्विर्वचननिमित्ते अचि अजादेशो न भवतीति॥

विमला - अजादेशो न भवतीति। यद्यप्यत्रपक्षे स्थानिवदिति शब्दाधिकारक्लेशो न भवतीति लाघवम् तथापि पूर्वसूत्रे नञः स्वरित्वं प्रतिज्ञातव्यम्, स्थानिवच्छब्दस्य तु क्लृप्तमेव तदितिसाम्यमेव। तस्मादत्र व्याख्यानद्वयमेव युक्तम्। फले विशेषाभावादित्यवधेयम्।

(आक्षेपभाष्यम्)

एवमपि न ज्ञायते—कियन्तमसौ कालमादेशो न भवतीति ।।

(समाधानभाष्यम्)

यः पुनराह—द्विर्वचने कर्तव्य इति । कृते तस्य द्विर्वचने अजादेशो भविष्यति ।।

(पञ्चमपक्षाभ्युपगमभाष्यम्)

एवं तर्हि—उभयमनेन क्रियते— प्रत्ययश्च विशेष्यते, द्विर्वचनं च ।।

(आक्षेपभाष्यम्)

कथं पुनरेकेन तन्त्रेणोभयं लभ्यम् ?

(समाधानभाष्यम्)

लभ्यमित्याह ।। कथम् ?

एकशेषनिर्देशात्[१] ।। एकशेषनिर्देशोऽयम्—द्विर्वचनं च द्विर्वचनश्च[२] द्विर्वचनम् । द्विर्वचने कर्तव्ये द्विर्वचनेऽचि प्रत्यय इति ।। [द्विर्वचननिमित्तेऽचि स्थानिवद्भवति[३]] ।

विमला - एकशेष निर्देशोऽयमिति । एकशेषपदं तन्त्रोपलक्षकं सहविवक्षाविरहादेकशेषस्याप्राप्तेः सत्यप्येकशेषे द्विवचनापत्तेः विभक्तानामेकशेषस्यान्यत्र निराकृतत्वाच्च ।

(४२९-पञ्चमपक्षे दूषणवार्तिकम्-६)

---

१. वार्तिकमिदमित्यन्ये । २. क्वचिद् 'द्विर्वचनञ्च' इति ।

३. इत्यपि क्वचित् ।

।।*।। द्विर्वचननिमित्तेऽचि स्थानिवदिति चेण्णौ स्थानिवद्वचनम् ।।*।।

(भाष्यम्)

द्विर्वचननिमित्तेऽचि स्थानिवदिति चेण्णौ स्थानिवद्भावो वक्तव्यः ।। अवनुनावयिषति अवचुक्षावयिषति ।।

(समाधानभाष्यम्)

न वक्तव्यः ।

(४३०-समाधानसाधकवार्तिकम्-७)

।।*।। ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्य ।।*।।

(भाष्यम्)

[1]यदयम्—"ओः पुयण्ज्यपरे" इत्याह, तज् ज्ञापयत्याचार्यो—भवति णौ स्थानिवद्भाव[2] इति ।।

(आक्षेपभाष्यम्)

यद्येतज्ज्ञाप्यते — अचिकीर्तत् — अत्रापि प्राप्नोति ।

(समाधानभाष्यम्)

तुल्यजातीयस्य ज्ञापकम् ।।

(आक्षेपभाष्यम्)

---

१. इतः पूर्वं उक्त वार्तिकं लुप्तं स्यात् ।
२. 'स्थानिवदिति' इति क्वचित् । क्वचिच्च 'स्थानिवद्भवतीति' ।

कश्च तुल्यजातीयः ?

(समाधानभाष्यम्)

यथाजातीयकाः पुयण्जयः ।।

(आक्षेपभाष्यम्)

कथंजातीयकाश्चैते ?

(समाधानभाष्यम्)

अवर्णपराः ।।

(आक्षेपभाष्यम्)

कथं जग्ले मम्ले ?

(समाधानभाष्यम्)

अनैमित्तिकमात्वम्, शिति तु प्रतिषेधः ।।

(सूत्रप्रयोजननिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

कानि पुनरस्य योगस्य प्रयोजनानि ?

(समाधानभाष्यम्)

पपतुः पपुः । तस्थतुस्तस्थुः । जग्मतुर्जग्मुः । आटिटत् आशिशत् । चक्रतुश्चक्रुरिति । आल्लोपोपधालोपणिलोपयणादेशेषु कृतेष्वनच्कत्वाद् द्विर्वचनं न प्राप्नोति । स्थानिवद्भावाद्भवति ।।

(समाधानबाधकभाष्यम्)

नैतानि सन्ति प्रयोजनानि । पूर्वविप्रतिषेधेनाप्येतानि सिद्धानि ।। कथम् ?

वक्ष्यति ह्याचार्यः—'द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकि-किनोरुत्वेभ्यः' इति ।।

विमला - पूर्वविप्रतिषेधेनाप्येतानि सिद्धानीति । दध्यत्र, चयनं, चायको, लवनं लावको, गोदःश्लेष्मघ्न इत्यादौ यथाक्रमं चरितार्थानि यणादीनि नव बिभिदतुरित्यादौ सावकाशेन द्वित्वेन चक्रतुरित्यादौ समावेशे पूर्वविप्रतिषेधाद्बाध्यन्ते इति चक्रतुरित्यादीनि यानि द्विर्वचनेऽचीति सूत्रफलानि यानि च चुक्षावयिषीत्यादीनि 'णौ स्थानिवदिति, ज्ञापनफलानि तानि पूर्वं द्वित्वे ततो यणादिके सिद्धानीति द्विर्वचनेऽचीति सूत्रम् 'ओः पुयण्जी'ति सूत्रे वर्गप्रत्याहारजग्रहणञ्च न कर्तव्यमिति भावः ।

(समाधानसाधकभाष्यम्)

स पूर्वविप्रतिषेधो न पठितव्यो भवति ।।

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः ?

(समाधानभाष्यम्)

स्थानिवद्भाव एव ज्यायान् । पूर्वविप्रतिषेधे हि सतीदं वक्तव्यं स्यात्—'ओदौदादेशस्य उद्भवति चटुतुशरादेरभ्यासस्य' इति ।।

विमला - स्थानिवद्भाव एव ज्यायानिति । न च विप्रतिषेधसूत्रे परशब्दस्येष्टवाचितया विप्रतिषेधसूत्रसिद्धस्यैवानुवादकं 'द्विर्वचनमि' त्यादिवार्तिकमिति नापूर्वम्, द्विर्वचनमित्यादि-सूत्रन्त्वपूर्वमेव कर्तव्यमिति स्थानिवद्भावस्य ज्यायस्त्वमसङ्गतमिति वाच्यम्, इष्टानिष्टविवेकस्य लक्षणैकचक्षुष्कैर्दुर्ज्ञेयतया पूर्वविप्रतिषेधवचनस्यावश्यकत्वात् ।

ननु तथाप्युभयोः समतया ज्यायस्त्वाभिधानमसङ्गतमेवात आह—**पूर्वविप्रतिषेधे हीति** । अयम्भावः । द्विर्वचनेऽचीति सूत्रप्रत्याख्याने 'द्विर्वचनं यणि'-त्यादिवार्तिकं कर्तव्यम् । तत्र वार्तिके जग्लावित्याद्यर्थं वृद्धिग्रहणं कार्यम् । किञ्च तस्य वार्तिकस्य अन्तरङ्गावधिकबलवत्त्वबोधकत्वे निनवनीयिषति, दिदवनीयिषतीत्या-

दावभ्यासे उकारश्रवणापत्तिः । अन्तरङ्गावधिकबलवत्त्वाबोधकत्वे चुक्षावयिषतीत्यादावन्तरङ्गत्वात् वृद्ध्यावादेशयोः प्रवर्तनादभ्यासे सन्यत इतीत्वमापद्येत तद्बाधनार्थमोदौदादेशस्य चुटुतुशरादेरभ्यासस्येत्युत्वं वक्तव्यम् । अत्रौदौदादेशस्येति समानाधिकरणबहुव्रीह्यङ्गीकारे ओदौतौ आदेशो यस्येत्यर्थापत्त्या चुक्षावयिषतीत्यादावभ्यासाकारस्य तादृशत्वाभावेनोत्वानापत्तिरिति ओदौतोरादेशो यस्मिन्नङ्गे इति व्यधिकरणपदबहुव्रीहिरङ्गीकार्य्या । एवम् तनुशब्दादाचारक्विबन्ताद्धेतुमण्णौ सनि तितनावयिषातीत्यत्रोत्वं स्यादिति तद्वारणाय ओदौदादेशस्येति वार्तिके अभ्यासस्येत्यवयवषष्ठीम् उभयोरतो विशेषणत्वञ्चाङ्गीकृत्य अभ्यासस्यावयवभूतः तथा ओदौदादेशस्य यथायथमवयवः । आदेशो वा यो अत्तस्योत्वं भवतीति क्लिष्टं व्याख्यानं कर्तव्यम् । एवम् सौत्राज्जूधातोर्णिचि चङि सनि वा अजीजवत् जिजावयिषतीत्यादावुत्ववारणाय 'जोर्ने' ति वक्तव्यमिति सूत्रारम्भपक्षापेक्षया वार्तिकारम्भपक्षे महदेव गौरवमिति सूत्रमेव कर्तव्यमिति ।

(उत्ववादिन आक्षेपभाष्यम्)

ननु च त्वयाऽपीत्त्वं वक्तव्यम् ।

विमला - त्वयाऽपीत्त्वं वक्तव्यमिति । विप्रतिषेधवार्तिकस्थाने सूत्रं कर्तव्यम् । उत्वविधायकवार्तिकस्थाने ज्ञापनार्थमित्वं वक्तव्यमिति न सूत्रकरणे लाघवमिति भावः ।

(इत्ववादिनो लाघवभाष्यम्)

परार्थं मम भविष्यति 'सन्यतः इद्भवती'ति ।।

विमला - परार्थमिति । अस्यानुवर्तमानमितिशेषः । परशब्देनात्र पुयण् जीतिसूत्रस्थः णौस्थानिवदिति ज्ञापकवर्गप्रत्याहारजग्रहणातिरिक्तः पकारो यकारश्च विवक्षितः । **ममेति** । वर्गप्रत्याहारजग्रहणं कुर्वत इत्यादिः । अस्य ज्ञापकमितिशेषः । तथाच 'सन्यतः' इद्भवतीति विहितमित्त्वं पिपविषते यियविषतीति पकारयकारार्थमनुवर्तमानम् वर्गप्रत्याहारयग्रहणं कुर्वतो मम ज्ञापकं भविष्यतीति समुदितं समाधानवाक्यम् ।

(उत्ववादिनो गौरवपरिहारभाष्यम्)

ममापि तर्ह्येत्वं[१] परार्थं[२] भविष्यति "उत्परस्यातस्ति च" इति ।

(इत्ववादिभाष्यम्)

इत्वमपि त्वया वक्तव्यम् । यत्समानाश्रयं तदर्थम्—उत्पिपविषते संयियविषतीत्येवमर्थम् । तस्मात्स्थानिवदित्येष एव पक्षो ज्यायान् ॥ द्विर्वचनेऽचि ॥ ५८ ॥

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादेऽष्टमाह्निकम् ॥

विमला - त्वयेति । विप्रतिषेधवादिनेत्यर्थः । **वक्तव्यमिति** । उपलक्षणमिदं 'जोर्ने'-ति वचनस्य । **यत्समानाश्रयमिति** । समानाश्रये हि विभावयिषतीत्यादावन्तरङ्गत्वात्पूर्वमच्कार्यमिति वक्तुमशक्यम् । किन्तु नित्यत्वादच्कार्यम्प्राप्तमिति वक्तव्यम् । एवञ्च पूर्वविप्रतिषेधवार्तिकेन नित्यविधिबाधकत्वं भवतामभ्युपेतमिति पिपविषते यियविषतीत्यादौ विप्रतिषेधवार्तिकस्थयणादिपदस्याच्कार्य्यमात्रोपलक्षकत्वे विप्रतिषेधवार्तिकबलेन नित्यत्वात्प्राप्तमपि गुणं बाधित्वा पूशब्दादेः, तत्र यणादिपदस्य यथाश्रुतार्थत्वे तु गुणे कृते अवादेशम्बाधित्वा पोशब्दादेः द्वित्वे अभ्यासे इकारश्रवणानापत्त्या 'पयोरि'तीत्वविधायकं भवतापि वक्तव्यम् । मया तु ज्ञापनार्थं तत्रैव वर्गप्रत्याहारजग्रहणं कर्तव्यम् । भवता तु ओदौदादेशस्य चुटुतुशरादेः' व्यधिकरणपदबहुव्रीहिः पूर्वोक्तयुक्त्या क्लिष्टार्थकल्पनम्, 'जोर्ने' ति विप्रतिषेधेधवार्तिकमिति महद्गौरवम् । तस्मात् स्थानिवद्भावपक्ष एव ज्यायानिति मन्तव्यम् ।

इति पण्डितमहेशझाशर्म्म - विरचितायाम् महाभाष्यव्याख्यायां विमलाख्यायाम्प्रथमाध्यायस्य प्रथमे पादेऽष्टममाह्निकम् ॥८॥

---

१. 'तत्त्वं' इति क्वचित् ।   २. 'पर्ह्युरार्थं' इति क्वचित् ।

नवममाह्निकम्

(लोपसंज्ञासूत्रम्)

अदर्शनं लोपः ॥१।१।५९॥

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(४३१-आक्षेपवार्तिकम्-१)

॥*॥ लोपसंज्ञायामर्थसंज्ञाकरणम् ॥*॥

(भाष्यम्)

[लोपसंज्ञायाम्[१]] अर्थस्य संज्ञा कर्तव्या । शब्दस्य मा भूदिति ॥

(४३२-आक्षेपवार्तिकम्-२)

॥*॥ इतरेतराश्रयं च ॥*॥

(भाष्यम्)

इतरेतराश्रयं च भवति ॥ का इतरेतराश्रयता ?

सतोऽदर्शनस्य संज्ञया भवितव्यम्, संज्ञया चाऽदर्शनं भाव्यते, तदेतदितरेतराश्रयं[२] भवति । इतरेतराश्रयाणि च कार्याणि[१] न प्रकल्प्यन्ते[३] ॥

(समाधानभाष्यम्)

लोपसंज्ञायामर्थसतोरुक्तम्[४] ॥

---

१. क्वचिन्न ।
२. क्वचित् 'तदितरेतराश्रयं' इति ।
३. 'प्रकल्पन्ते' ।
४. वार्तिकमिदं लुप्तं स्यात् ।

किमुक्तम् ?

अर्थस्य तावदुक्तम् । इतिकरणोऽर्थनिर्देशार्थः इति ।। सतोऽप्युक्तम्—सिद्धं तु नित्यशब्दत्वात् इति । नित्याः शब्दाः । नित्येषु च शब्देषु सतोऽदर्शनस्य संज्ञा क्रियते, न संज्ञयाऽदर्शनं भाव्यते[1] ।।

(४३३-आक्षेपवार्तिकप्रथमखण्डम्-३)

।।।। सर्वप्रसङ्गस्तु सर्वस्यान्यत्राऽदृष्टत्वात् ।।*।।*

(भाष्यम्)

सर्वप्रसङ्गस्तु भवति । सर्वस्यादर्शनस्य लोपसंज्ञा प्राप्नोति ।। किं कारणम् ?

सर्वस्यान्यत्रादृष्टत्वात् । सर्वो हि शब्दो यो यस्य प्रयोगविषयः, स ततोऽन्यत्र न दृश्यते । त्रपु जतु इत्यत्राणोऽदर्शनम् । तत्र "अदर्शनं लोपः" इति लोपसंज्ञा प्राप्नोति ।।

(भाष्यम्)

तत्र को दोषः ?

(४३३-आक्षेपवार्तिकम्-४)

।।।। तत्र प्रत्ययलक्षणप्रतिषेधः ।।*।।*

(भाष्यम्)

तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति । तस्य प्रतिषेधो वक्तव्यः । "अचो ञ्णिति" इति वृद्धिः प्राप्नोति ।।

---

१. 'विभाव्यते' ।

(आक्षेपबाधकभाष्यम्)

नैष दोषः । ञ्णित्यङ्गस्याचो वृद्धिरुच्यते । यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं भवति । यस्माच्चात्र प्रत्ययविधिः, न तत् प्रत्यये परतः । यच्च प्रत्यये परतः, न तस्मात्प्रत्ययविधिः ।।

(आक्षेपसाधकभाष्यम्)

क्विपस्तर्ह्यदर्शनम् । तत्र "अदर्शनं लोपः" इति लोपसंज्ञा प्राप्नोति ।। तत्र को दोषः ?

तत्र प्रत्ययलक्षणप्रतिषेधः ।। तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः । "ह्रस्वस्य पिति कृति तुक्[१]" इति तुक् प्राप्नोति ।।

(४३४-समाधानवार्तिकम्-५)

।।।। सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञत्वात्[२] ।।*।।*

(भाष्यम्)

सिद्धमेतत् ।। कथम्[३] ?

प्रसक्तादर्शनं लोपसंज्ञं भवतीति वक्तव्यम् ।।

विमला - वक्तव्यमिति । लोपसंज्ञाविधानसामर्थ्येन कल्पनीयमित्यर्थः । अन्यथा पशुरपत्यम् देवतेत्यादिशब्दवत्प्रदेशेषु लोपशब्देन लौकिकार्थग्रहणेनैव सिद्धे संज्ञाविधानं व्यर्थं स्यात् ।

(आक्षेपभाष्यम्)

---

१. क्वचित् 'तुग्भवति' । २. क्वचित् 'लोपसंज्ञित्वात्' ।

३. इतः परमय पूर्ववार्तिकं लुप्तं स्यात् ।

यदि 'प्रसक्तादर्शनं लोपसंज्ञं भवती'त्युच्यते, ग्रामणीः सेनानीः—अत्र वृद्धिः प्राप्नोति ।।

(समाधानभाष्यम्)

प्रसक्ताऽदर्शनं लोपसंज्ञं भवति[1] षष्ठीनिर्दिष्टस्य ।।

विमला - षष्ठीनिर्दिष्टस्येति । षष्ठ्यन्तस्य प्रसक्तस्यादर्शनं लोपसंज्ञं भवतीत्यर्थः ।

(प्रसक्तादर्शनवादिन आक्षेपभाष्यम्)

यदि षष्ठीनिर्दिष्टस्येत्युच्यते "चाहलोप एवेत्यवधारणम्" "चादिलोपे विभाषा" अत्र[2] लोपसंज्ञा न प्राप्नोति ।।

विमला - चाहलोप इति । च अह एतयोर्लोपे प्रथमवाक्योच्चारितं तिङन्तं नानुदात्तम्, अवधारणार्थकैवशब्दप्रयोगे सतीति सूत्रार्थः । देव एवारण्यं गच्छतु । ग्राममरण्यं गच्छत्वित्यर्थः ।

चादिलोप इति । चवाहाहैवानां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्तेति सूत्रार्थः ।

(षष्ठीनिर्दिष्टवादिन आक्षेपभाष्यम्)

अथ प्रसक्ताऽदर्शनं लोपसंज्ञं भवतीत्युच्यमाने कथमेवैतत् सिद्ध्यति ?

(प्रसक्तादर्शनवादिनः समाधानभाष्यम्)

को हि शब्दस्य प्रसङ्गः ? यत्र गम्यते चार्थो, न च प्रयुज्यते ।।

(उपसंहारभाष्यम्)

---

१. 'भवतीति' । २. 'इत्यत्र' ।

अस्तु तर्हि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्येव ।।

(आक्षेपस्मारणभाष्यम्)

कथं ग्रामणीः सेनानीः ?

(समाधानभाष्यम्)

योऽत्राऽणः प्रसङ्गः क्विपाऽसौ बाध्यते ।।
-अदर्शनं लोपः ।। ५९ ।।

(लुक्श्लुलुप्संज्ञासूत्रम्)

प्रत्ययस्य लुक्श्लुलुपः ।।१।१।६०।।

(प्रत्ययपदप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

प्रत्ययग्रहणं किमर्थम् ?

(४३५-समाधानवार्तिकम्-१)

।।।। लुमति प्रत्ययग्रहणमप्रत्ययसंज्ञाप्रतिषेधार्थम्[१] ।।*।।*

(भाष्यम्)

लुमति प्रत्ययग्रहणं क्रियते । अप्रत्ययस्यैताः संज्ञा मा भूवन्निति ।।

(भाष्यम्)

किं प्रयोजनम् ?

(४३६-प्रयोजनवार्तिकम्-२)

---

१. '.... प्रत्यये संज्ञानिषेधार्थम्' इति क्व० ।

।।*।। प्रयोजनं तद्धितलुकि कंसीयपरशव्ययोर्लुकि च गोप्रकृतिनिवृत्त्यर्थम् ।।*।।

(भाष्यम्)

[१]तद्धितलुकि गोनिवृत्त्यर्थम् । कंसीयपरशव्ययोश्च लुकि प्रकृतिनिवृत्त्यर्थम् । "लुक्तद्धितलुकि" इति गोरपि लुक् प्राप्नोति । प्रत्ययग्रहणान्न भवति ।। "कंसीयपरशव्ययोर्यञञौ लुक् च" इति प्रकृतेरपि लुक् प्राप्नोति । प्रत्ययग्रहणान्न भवति ।।

विमला - लुक् प्राप्नोति । अयम्भावः । प्रत्ययग्रहणाभावे एकयोगनिर्दिष्टानां सहैव प्रवृत्तिनिवृत्तिस्वीकारात्, 'लुक् तद्धितलुकी' त्यत्र गोस्त्रियोरित्यतो गोशब्दस्याप्यनुवृत्तौ पञ्चभिर्गोभिः क्रीतमित्यर्थे जातस्य ठकोऽध्यर्धपूर्वपदेति लुकि 'लुक् तद्धितलुकीति' गोरपि लुक् प्रसज्येत, प्रत्ययग्रहणे तु प्रत्ययादर्शनस्यैव लुक्संज्ञकत्वादयोग्यत्वाद्गोशब्दस्य 'लुक् तद्धितलुकीति सूत्रजशाब्दबोधे अभानात् न गोशब्दस्य लुकः प्राप्तिरिति । **प्रकृतेरपि लुक् प्राप्नोतीति** । कंसाय हितमित्यर्थे तस्मै हितमित्यधिकारे 'प्राक् क्रीताच्छः' इति छप्रत्यये कंसीयम् । कंसीयस्य विकार इत्यर्थे 'कंसीयपरसव्ययोरि'ति यञि छप्रत्ययस्य लुकि कांस्यमिति भवति । प्रत्ययग्रहणाभावे तु विधानसामर्थ्यात्, यञञ्लुकामेककालप्रतीतानामुद्देश्यविधेयभावासम्भवाद्वा यञञोर्लुगभावेऽपि कंसीयेति समुदायस्य लुक् स्यात् न तु छप्रत्ययमात्रस्य । प्रत्ययग्रहणसत्त्वे तु प्रत्ययादर्शनस्यैव लुक्संज्ञकत्वात् छप्रत्ययस्यैव लुक् न तु कंसीयेति समुदायस्येति भावः ।

(प्रत्याख्यानभाष्यम्)

गोनिवृत्त्यर्थेन तावन्नार्थः ।

(४३७-प्रत्याख्यानवार्तिकम्-३)

---

१. अत्र उक्तवार्तिकं लुप्तं स्यात् ।

।।*।। योगविभागात् सिद्धम् ।।*।।

(भाष्यम्)

योगविभागः करिष्यते—"गोरुपसर्जनस्य" । गोऽन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति ।। ततः "स्त्रियाः" । स्त्रीप्रत्ययान्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति ।। ततो "लुक्तद्धितलुकि" इति । स्त्रिया इति वर्तते । गोरिति निवृत्तम् ।।

(४३८-प्रत्याख्यानसाधकवार्तिकम्-४)

।।*।। कंसीयपरशव्ययोर्विशिष्टनिर्देशात् सिद्धम् ।।*।।

(भाष्यम्)

कंसीयपरशव्ययोर्विशिष्टनिर्देशः[१] कर्तव्यः । कंसीयपरशव्ययोर्यञञौ भवतश्छयतोश्च लुग्भवतीति ।।

विमला - मात्रालाघवानादरेणाऽऽह—**विशिष्टनिर्देशः कर्तव्य इति** ।

(विशिष्टनिर्देशावश्यकताभाष्यम्)

स चावश्यं विशिष्टनिर्देशः कर्तव्यः । क्रियमाणेऽपि वै प्रत्ययग्रहणे [२]उकारसकारयोर्मा भूदिति । 'कमेःसः' कंसः, परान् श्रृणातीति परशुरिति ।।

(विशिष्टनिर्देशावश्यकताबाधकभाष्यम्)

नैष दोषः । उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ।।

---

१. क्वचित् '......व्ययोरपिविशिष्ट.....' इति ।

२. 'उकारसकारशब्दयोः' इति क्व० ।

(उपसंहारभाष्यम्)

स एषोऽनन्यार्थो विशिष्टनिर्देशः कर्तव्यः, प्रत्ययग्रहणं वा कर्तव्यम् ।।

(४३९-प्रत्याख्यानवार्तिकम्-५)

।।।। उक्तं वा ।।*।।*

(भाष्यम्)

(उक्तं वा[1]) । किमुक्तम् ?

ङ्याप्प्रातिपदिकग्रहणमङ्गभपदसंज्ञार्थं यच्छयोश्च लुगर्थम् ।। इति ।।

(४४०-प्रयोजनवार्तिकप्रथमखण्डम्-६)

।।।। षष्ठीनिर्देशार्थं तु ।।*।।*

(भाष्यम्)

षष्ठीनिर्देशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम् । षष्ठीनिर्देशो यथा प्रकल्पेत ।।

(४४०-प्रयोजनवार्तिकद्वितीयखण्डम्-६)

।।।। अनिर्देशे हि षष्ठ्यर्थाऽप्रसिद्धिः ।।*।।*

(भाष्यम्)

अक्रियमाणे हि प्रत्ययग्रहणे षष्ठ्यर्थस्याऽप्रसिद्धिः स्यात् ।। कस्य ? स्थानेयोगत्वस्य ।।

(प्रत्याख्यानसाधकमाक्षेपभाष्यम्)

---

१. क्वचिन्न ।

क्व पुनरिह षष्ठीनिर्देशार्थेनार्थः प्रत्ययग्रहणेन । यावता सर्वत्रैव षष्ठ्युच्चार्यते—अणिञोः, तद्राजस्य, यञञोः, शप इति ?

(समाधानभाष्यम्)

इह न काचित् षष्ठी—"जनपदे लुब्" इति ।।

(समाधानबाधकभाष्यम्)

अत्रापि प्रकृतं प्रत्ययग्रहणमनुवर्तते ।।

क्व प्रकृतम् ? "प्रत्ययः परश्च" इति ।।

(समाधानसाधकभाष्यम्)

तद्वै प्रथमानिर्दिष्टम् । षष्ठीनिर्दिष्टेन चेहार्थः ।।

(समाधानबाधकभाष्यम्)

"ङ्याप्प्रातिपदिकाद्" इत्येषा पञ्चमी प्रत्यय इति प्रथमायाः षष्ठीं प्रकल्पयिष्यति "तस्मादित्यु-त्तरस्य" इति ।।

(समाधानसाधकभाष्यम्)

प्रत्ययविधिरयम् । न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति ।।

(समाधानबाधकभाष्यम्)

नायं प्रत्ययविधिः । विहितः प्रत्ययः प्रकृतश्चा-नुवर्तते ।।

(४४१-प्रयोजनवार्तिकम्-७)

।।*।। सर्वादेशार्थं वा, वचनप्रामाण्यात् ।।*।।

(भाष्यम्)

सर्वादेशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम् । लुक्श्लुलुपः सर्वादेशा यथा स्युः ।।

अथ क्रियमाणेऽपि प्रत्ययग्रहणे कथमिव लुक्श्लुलुपः सर्वादेशा लभ्याः ?

'वचनप्रामाण्यात्' ।। प्रत्ययग्रहणसामर्थ्यात् ।।

विमला - वापदं व्याचष्टे–**तर्हीति** । विकल्पकार्थकत्वे हि वचनप्रामाण्यादित्यसंगतं स्यादित्यवधेयम् ।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् ।। आचार्यप्रवृत्तिर्ज्ञापयति—लुक् श्लुलुपः सर्वादेशा भवन्तीति । यदयं—"लुग्वा दुहदिहलिहगुहामात्मने पदे दन्त्ये" इति लोपे प्रकृते लुकं शास्ति ।।

(४४२-प्रयोजनवार्तिकम्-८)

।।*।। उत्तरार्थं तु ।।*।।

(भाष्यम्)

उत्तरार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम् ।।

(प्रयोजनबाधकभाष्यम्)

(न कर्त्तव्यम्[1]) क्रियते तत्रैव—"प्रत्ययलोपे प्रत्ययलक्षणम्" इति ।।

(प्रयोजनसाधकभाष्यम्)

---

१. क्वचिन्न ।

द्वितीयं कर्तव्यम् । कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यात् एकदेशलोपे मा भूदिति । 'आघ्नीत' 'संशयस्पोषेण ग्मीय[1]' इति ।। –प्रत्ययस्य० ।।६०।।

विमला - आघ्नीतेति । आङ्पूर्वकाद्धन् धातोर्विधिलिङि तप्रत्यये सीयुटि लिङः सलोप इति सकारलोपे 'गमहने' त्युपधालोपे कुत्वे आघ्नीतेति सिद्ध्यति । अत्र प्रत्ययावयवसकाररूपप्रत्ययलोपे तन्निमित्तकस्य 'अनुदात्तोपदेशे' त्यनुनासिकलोपस्य प्रत्ययलोपसूत्रबलेनापत्तिः । ज्ञापने तु प्रकृते कृत्स्नप्रत्ययस्य लोपाभावेन प्रत्ययलक्षणसूत्राप्राप्तौ झलादित्वाभावेन नलोपो नेतिभावः । **ग्मीयेति** । अत्रापि पूर्ववदेवानुनासिकलोपव्यावृत्तिः फलमिति बोध्यम् । **संशयस्पोषेणे**ति न प्रकृतोपयोगि त्रिधा बद्धो वृषभो रोरवीत्यत्र त्रिधा बद्धो बृषभ इवेत्यवगन्तव्यम् ।

(प्रत्ययलक्षणातिदेशसूत्रम्)

प्रत्ययलोपे प्रत्ययलक्षणम् ।।१।१।६१।

(प्रथमप्रत्ययग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

प्रत्ययग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

"लोपे प्रत्ययलक्षणम्" इतीयत्युच्यमाने सौरथी वैहतीति । गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत ।।

(समाधाननिराकरणभाष्यम्)

नैष दोषः । नैवं विज्ञायते–लोपे प्रत्ययलक्षणं भवति-प्रत्ययस्य प्रादुर्भाव इति ।। कथं[2] तर्हि ?

प्रत्ययो लक्षणं यस्य कार्यस्य तल्लुप्तेऽपि भवति ।।

१. 'संग्मीय' इति क्व० । २. किमिति क्व० ।

(प्रयोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम् । सति प्रत्यये यत्प्राप्नोति तत्प्रत्ययलक्षणं[१] यथा स्यात् । लोपोत्तरकालं यत्प्राप्नोति तत्प्रत्ययलक्षणं[१] मा भूदिति ।। किं प्रयोजनम् ?

ग्रामणिकुलं सेनानिकुलमित्यत्रौत्तरपदिके[२] ह्रस्वत्वे कृते "ह्रस्वस्य पिति कृति तुक्" इति तुक् प्राप्नोति । स मा भूदिति ।।

(प्रयोजननिराकरणभाष्यम्)

यदि तर्हि यत्सति प्रत्यये प्राप्नोति तत्प्रत्ययलक्षणेन भवति, लोपोत्तरकालं यत् प्राप्नोति तन्न भवति । जगत् जनगदित्यत्र तुग् न प्राप्नोति, लोपोत्तरकालं[३] ह्यत्र तुगागमः । तस्मान्नार्थ एवमर्थेन प्रत्ययग्रहणेन ।।

(आक्षेपभाष्यम्)

कस्मान्न भवति—ग्रामणिकुलं सेनानिकुलम् ?

(समाधानभाष्यम्)

बहिरङ्गं ह्रस्वत्वम्, अन्तरङ्गस्तुक् । "असिद्धं बहिरङ्गमन्तरङ्गे" ।।

(प्रयोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्—कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यादेकदेशलोपे मा भूदिति । 'आघ्नीत' 'सं रायस्पोषेण ग्मीय' ।।

---

१. 'लक्षणेन' क्व० । २. 'सेनानिकुलम् । औत्तर०' क्व० ।
३. 'कालो ह्यत्र' क्व० ।

(आक्षेपभाष्यम्)

पूर्वस्मिन्नपि योगे प्रत्ययग्रहणस्यैतत्प्रयोजनमुक्तम् ॥

(समाधानभाष्यम्)

अन्यतरच्छक्यमकर्तुम् ॥

(द्वितीयप्रत्ययग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ द्वितीयं प्रत्ययग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

प्रत्ययलक्षणं यथा स्यात् । वर्णलक्षणं मा भूदिति । गवे हितं गोहितम् । रायः कुलं रैकुलमिति ॥

विमला - प्रत्ययलक्षणं यथा स्यादिति । प्रत्ययस्यासाधरणं रूपं यत्र प्रयोजकम् तदेव कार्य्यं प्रत्ययलोपे सति यथा स्यादित्यर्थः **वर्णलक्षणं मा भूदिति** । ज्ञापनलब्धार्थकथनमिदं न तु ज्ञाप्यान्तर्गतमिति बोध्यम् । **गोहितमिति** । अत्र प्रत्ययलक्षणेनावादेशो न तद्विधावच्त्वाश्रयणेनाच्त्वस्य प्रत्ययाप्रत्ययसाधारण्यादिति भावः । नन्वत्र न लुमतेति निषेधेन न प्रत्ययलक्षणप्रवृत्तिरिति चेत्तर्हि सुदृषत्प्रासाद इत्यत्र प्रत्ययलक्षणेनासन्तत्वात् तद्वारणार्थमेव द्वितीयम्प्रत्ययग्रहणमिति बोध्यम् ।

(युक्तिकथनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते ?

(४४३-समाधानवार्तिकम्-१)

।।*।। प्रत्ययलोपे प्रत्ययलक्षणवचनं सदन्वाख्यानाच्छास्त्रस्य ।।*।।

(भाष्यम्)

"प्रत्ययलोपे प्रत्ययलक्षणम्" इत्युच्यते । सदन्वाख्यानाच्छास्त्रस्य । सच्छास्त्रेणान्वाख्यायते, सतो वा शास्त्रमन्वाख्यायकं भवति । सदन्वाख्यानाच्छास्त्रस्य "उगिदचां सर्वनामस्थानेऽधातोः" इतीहैव स्यात्—गोमन्तौ यवमन्तौ, गोमान् यवमानित्यत्र न स्यात् । इष्यते च स्यादिति । तच्चान्तरेण यत्नं न सिध्यतीत्यतः[1] प्रत्ययलोपे[2] प्रत्ययलक्षणवचनम् । [3]इत्येवमर्थमिदमुच्यते ।।

(काक्वाक्षेपभाष्यम्)

अस्ति प्रयोजनमेतत् ?

(समाधानभाष्यम्)

किं तर्हीति ।।

(लुकि प्रत्ययलक्षणसाधनाधिकरणम्)

(४४४-आक्षेपवार्तिकप्रथमखण्डम्- १)

।।*।। लुक्युपसंख्यानम् ।।*।।

(भाष्यम्)

लुक्युपसंख्यानं कर्तव्यम् । पञ्च, सप्त ।।

(प्रत्याक्षेपभाष्यम्)

---

१. 'सिद्ध्यति । अतः' इति क्व० ।
२. इति क्वचिन्न ।
३. 'इतिः' क्वचिन्न ।

किं पुनः कारणं न सिध्यति ?

(४४४-आक्षेपसाधकवार्तिकद्वितीयखण्डम्-२)

|||| लोपे हि विधानम् ||*||*

(भाष्यम्)

लोपे हि प्रत्ययलक्षणं विधीयते । तेन लुकि न प्राप्नोति ।।

(४४५-समाधानवार्तिकम्-३)

|||| न[1] वाऽदर्शनस्य लोपसंज्ञित्वात् ||*||*

(भाष्यम्)

न वा कर्तव्यम् ।। किं कारणम् ?

'अदर्शनस्य लोपसंज्ञित्वात्' । अदर्शनं लोपसंज्ञं भवतीत्युच्यते । लुमत्संज्ञाश्चाप्यदर्शनस्य क्रियन्ते[2] । तेन लुक्यपि भविष्यति ।।

(सांकर्यपरिहाराधिकरणम्)

(संगतिभाष्यम्)

यद्येवम्—

(४४६-सांकर्याक्षेपवार्तिकप्रथमखण्डम्-४)

|||| प्रत्ययादर्शनं तु लुमत्संज्ञम् ||*||*

(भाष्यम्)

प्रत्ययाऽदर्शनं तु लुमत्संज्ञमपि प्राप्नोति ।।

---

१. 'न चाऽ' इति क्व० ।

२. 'क्रियते' ।

(आक्षेपभाष्यम्)

तत्र को दोषः ?

(४४६-दोषदर्शनवार्तिकद्वितीयखण्डम्-४)

|||| तत्र लुकि श्लुविधिः प्रतिषेध्यः[१] ||*||*

(भाष्यम्)

तत्र लुकि श्लुविधिः प्राप्नोति स प्रतिषेधः[२] । अस्ति[३] हन्ति । "श्लौ" इति द्विर्वचनं प्राप्नोति ।।

(४४७-सांकर्यनिवारणवार्तिकम्-५)

|||| न वा पृथक्संज्ञाकरणात् ||*||*

(भाष्यम्)

न वा एष दोषः ।। किं कारणम् ?।

पृथक्संज्ञाकरणात् । पृथक्संज्ञाकरणसामर्थ्याल्लुकि श्लुविधिर्न भविष्यति ।।

(लोपसंज्ञाया व्यापकत्वोपसंहारभाष्यम्)

[४]तस्माददर्शनसामान्याल्लोपसंज्ञा लुमत्संज्ञा अवगाहते ।

(सांकर्यसाधकभाष्यम्)

यथैव तर्हि अदर्शनसामान्याल्लोपसंज्ञा लुमत्संज्ञा अवगाहते । एवं लुमत्संज्ञा अपि लोपसंज्ञामवगाहेरन् ।।

तत्र को दोषः ? अगोमती गोमती सम्पन्ना

---

१. 'विधिप्रतिषेध:' । २. 'प्रतिषेध्य:' । ३. 'अत्ति' ।
४. 'तस्माददर्शनस्य०' ।

गोमतीभूता । "लुक् तद्धितलुकि" इति ङीपो लुक् प्रसज्येत ।।

विमला - लोपसंज्ञामवगाहेरन्निति । लुमत्संज्ञासु पृथक् संज्ञाकरणसामर्थ्येन तद्भावितपक्षाश्रयणेन परस्परं सांकर्य्यं नेत्याक्षेप्ता न जानाति । अपितु तद्भावितपक्षमनाश्रित्यैव पृथक् संज्ञाकरणसामर्थ्येन सांकर्य्यन्नेति लोपसंज्ञया सांकर्य्यं दुर्वारमेवेति भावः ।

(सांकर्यबाधकभाष्यम्)

ननु चात्रापि न वा पृथक्संज्ञाकरणाद् इत्येव सिद्धम् ।।

(आक्षेपभाष्यम्)

यथैव तर्हि पृथक्संज्ञाकरणसामर्थ्यादत्र लुमत्संज्ञा लोपसंज्ञां नावगाहन्ते, एवं लोपसंज्ञाऽपि[1] लुमत्संज्ञां नावगाहेत । तत्र स एव[2] दोषो—लुक्युपसंख्यानमिति ।।

(समाधानभाष्यम्)

अस्त्यन्यल्लोपसंज्ञायाः पृथक् संज्ञाकरणे प्रयोजनम् ।। किम् ? लुमत्संज्ञासु यदुच्यते तल्लोपमात्रे मा भूदिति ।।

(४४८-समाधानान्तरवार्तिकम्-६)

।।*।। लुमति प्रतिषेधाद्वा ।।*।।

(भाष्यम्)

अथवा यदयं— "न लुमताङ्गस्य" इति प्रत्ययलक्षणप्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यो—भवति लुकि प्रत्ययलक्षणमिति ।।

---

१. अपीति क्वचिन्न । २. 'एष' ।

विमला - तुष्यतु दुर्जनन्यायेनाह—अथवेति ।

(इष्टानुपपत्तिपरिहाराधिकरणम्)

(४४९-आक्षेपवार्तिकम्-७)

।।*।। सतो निमित्ताऽभावात्पदसंज्ञाऽभावः ।।*।।

(भाष्यम्)

[1]सन् प्रत्ययो येषां कार्याणामनिमित्तं राज्ञः पुरुष इति, स लुप्तोऽप्यनिमित्तं स्यात्—राजपुरुष इति ।।

(समाधानभाष्यम्)

अस्तु तस्या अनिमित्तम्—या स्वादौ पदमिति पदसंज्ञा । या तु "सुबन्तं पदम्" इति पदसंज्ञा सा भविष्यति ।

(आक्षेपसाधकभाष्यम्)

सत्येतत् प्रत्यय आसीत् । अनया भविष्यत्यनया न भविष्यतीति ।।

लुप्त इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसंज्ञा तावत एव[2] सुबन्तं पदमिति । अस्ति च प्रत्ययलक्षणेन यजादिपरतेति कृत्वा भसंज्ञा प्राप्नोति ।।

(४५०-आक्षेपान्तरवार्तिकम्-८)

।।*।। तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात् परिवीरिति ।।*।।

---

१. इतः पूर्वमत्र 'सतो निमित्ताऽभावात्' इति क्व० ।

२. इतः परमत्र 'वाऽवधेः' इति अधिकं क्व० ।

(भाष्यम्)

तुग्दीर्घत्वयोश्च विप्रतिषेधो नोपपद्यते ।। क्व ?

परिवीरिति ।। किं कारणम् ? 'एकयोगलक्षणत्वात्' । एकयोगलक्षणे हि तुग्दीर्घत्वे ।। इह लुप्ते प्रत्यये सर्वाणि प्रत्ययाश्रयाणि कार्याणि पर्यवपन्नानि[1] भवन्ति तान्येतेन प्रत्युत्थाप्यन्ते । अनेनैव तुग्, अनेनैव च दीर्घत्वमिति तदेकयोगलक्षणं भवति । एकयोगलक्षणानि च न प्रकल्पन्ते ।।

(४५१-न्यासान्तरेण समाधानवार्तिकम्-९)

।।*।। सिद्धं तु स्थानिसंज्ञानुदेशादान्यभाव्यस्य ।।*।।

(भाष्यम्)

सिद्धमेतत् ।। कथम् ?

स्थानिसंज्ञाऽन्यभूतस्य भवतीति वक्तव्यम् ।।

किं कृतं भवति ?

सत्तामात्रमनेन क्रियते । यथाप्राप्ते तुग्दीर्घत्वे भविष्यतः ।।

विमला - सिद्धमिति ।अस्येष्टमितिशेषः ।अन्यो भावः ।अन्यद्वस्तु ।स्थान्यपेक्षया आदेशः अन्यभावः ।अन्यभाव एव आन्यभाव्यम्, स्वार्थे ष्यञ् ।संज्ञापदेनात्र व्यवहारो विवक्षितः अनुदेशोऽतिदेशः ।तथाच आदेशस्य स्थानिव्यवहारातिदेशात्सिद्ध-मिष्टमिति वार्तिकार्थः ।नानेन कार्यातिदेशः क्रियते, किन्तु आदेशे स्थानिव्यवहार अतिदिश्यते कार्यं तु स्वशास्त्रेणैवेति परिवीरित्यत्र न विप्रतिषेधानुपपत्तिरिति भावः ।

---

१. 'सन्नानि' ।

(आक्षेपभाष्यम्)

तद्वक्तव्यं भवति ।।

(न्यासान्तरसाधकसमाधानभाष्यम्)

यद्यप्येतदुच्यते, अथवैतर्हि स्थानिवद्भावो नारभ्यते, "स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ" इति वक्ष्यामि ।।

विमला - इति वक्ष्यामीति । उभयो: स्थाने इतिशेष: । अप्राधान्येनालाश्रयणेऽपि अल्विधाविति प्रतिषेधो भविष्यतीति राजपुरुष इत्यादौ न भसंज्ञेति भाव: ।

(आक्षेपभाष्यम्)

यद्येवम् "आङो यमहनः" आत्मनेपदं भवतीति हन्तेरेव स्यात्, वधेर्न स्यात् । नहि काचिद्धन्तेः संज्ञास्ति, या वधेरतिदिश्येत ।।

(समाधानभाष्यम्)

हन्तेरपि संज्ञाऽस्ति ।। का ? हन्तिरेव ।। कथम् ?

"स्वं रूपं शब्दस्याशब्दसंज्ञा" इति वचनात्स्वं रूपं शब्दस्य संज्ञा भवतीति हन्तेरपि हन्तिः संज्ञा भविष्यति ।।

(४५२-न्यासान्तरप्रयोजनान्तरवार्तिकम्-१०)

।।*।। भसंज्ञाङीप्ष्फगोरात्वेषु च सिद्धम् ।।*।।

(भाष्यम्)

भसंज्ञाङीप्ष्फगोरात्वेषु च सिद्धं भवति ।।

(उदाहरणोपपादनभाष्यम्)

भसंज्ञा—राज्ञः पुरुषः । राजपुरुषः । प्रत्ययलक्षणेन "यचि भम्" इति भसंज्ञा प्राप्नोति । "स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ" इति वचनान्न भवति ।। भसंज्ञा ।।

विमला - भसंज्ञा–राज्ञः पुरुष इति । इदं प्रयोजनं कार्यकालपक्षाभिप्रायेण । तत्पक्षे हि लुप्तप्रत्यये यावत एवावधेः स्वादौ पदमिति पदसंज्ञा तावत एव सुबन्तं पदमिति । एवञ्च अपवादत्वेन स्वादिष्विति पदत्वस्येव परत्वेन सुबन्तमिति पदत्वस्यापि भसंज्ञा बाधिका भविष्यति । भपदसंज्ञाविषये यथोद्देशपक्ष एवेति सिद्धान्तादरे तु प्रत्ययसत्ताकाले असमानावधिकत्वेन जाता सुबन्तमिति पदसंज्ञैव लुप्तविभक्तिके एकदेशविकृतन्यायेनास्तीति नेदं फलमिति बोध्यम् ।

(उदाहरणोपपादनभाष्यम्)

ङीप्—चित्रायां जाता चित्रा । प्रत्ययलक्षणेनाऽणन्तादितीकारः प्राप्नोति । "स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ" इति वचनान्न भवति[1] । ङीप् ।।

विमला - ङीप् – चित्रायां जाता चित्रेति । इदम्फलमणणन्तादिति व्याख्याने । अण् योऽकार इति व्याख्याने तु वर्णप्राधान्यात् 'वर्णाश्रये नास्ति प्रत्ययलक्षणमिति निषेधात् सूत्रमतेऽपि न दोष इति बोध्यम् ।

(उदाहरणोपपादनभाष्यम्)

ष्फ—वतण्डी । प्रत्ययलक्षणेन 'यञन्ताद्' इति ष्फः प्राप्नोति । "स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ" इति वचनान्न भवति ।। ष्फ ।।

विमला - ष्फ-वतण्डीति । इदम्फलम् 'प्राचां ष्फ' इतिसूत्रे सर्वत्र ग्रहणापकर्षणे तदाहि तदपकर्षणसामर्थ्यात् शार्ङ्गरवादिङीनम्बाधित्वा ष्फः स्यात् । प्रमाणाभावेन तदनपकर्षणे तु सूत्रमतेऽपि न कोऽपि दोष इति बोध्यम् ।

१. 'भविष्यतीति' क्व० ।

(उदाहरणोपपादनभाष्यम्)

गोरात्वम्—गामिच्छति-गव्यति । प्रत्ययलक्षणेनाऽमि "औतोऽम्शसोः" इत्यात्वं प्राप्नोति । "स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ" इति वचनान्न भवति ।। गोरात्वम् ।।

विमला - गोरात्वम्—गामिच्छतीति । इदम्फलमजाद्योरम्शसोरिति व्याख्याने । अम्शसोरचीति व्याख्याने तु वर्णप्राधान्यात् वर्णाश्रये नास्ति प्रत्ययलक्षणमिति निषेधात् सूत्रमतेऽपि न कोऽपि दोष इति बोध्यम् ।

(४५३-सूत्रारम्भवादिनो न्यासान्तदूषणवार्तिकम्- ११)

।।।। तस्य दोषो ङौनकारलोपेत्त्वेम्विधयः ।।*।।*

(भाष्यम्)

तस्यैतस्य लक्षणस्य दोषः ।।

(उदाहरणोपपादनभाष्यम्)

ङौ नकारलोपः—आर्द्रे चर्मन्; लोहिते चर्मन् । प्रत्ययलक्षणेन "यचि भम्" इति भसंज्ञा सिद्धा भवति । 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ" इति वचनान्न प्राप्नोति[१] ।।

(उदाहरणोपपादनभाष्यम्)

इत्त्वम्—आशीः । प्रत्ययलक्षणेन "हलि" इतीत्त्वं सिद्धं भवति । 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न प्राप्नोति[१] ।।

(उदाहरणोपपादनभाष्यम्)

१. क्वचिद् 'भवती' ति ।

इमू—अतृणेट् । प्रत्ययलक्षणेन हलीति इमू सिद्धो भवति । 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न प्राप्नोति[1] ।।

(तटस्थभाष्यम्)

सूत्रं च भिद्यते ।।

(सिद्धान्तिभाष्यम्)

यथान्यासमेवास्तु ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्—'सती निमित्ताऽभावात्पदसंज्ञाभावः तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात्परिवीः' इति ।।

(प्रथमदूषणपरिहारभाष्यम्)

नैष दोषः । वक्ष्यत्यत्र परिहारम् ।।

(द्वितीयदूषणपरिहारभाष्यम्)

इहापि परिवीरिति । शास्त्रपरविप्रतिषेधेन परत्वाद्दीर्घत्वं भविष्यति ।।

(प्रयोजनकथनाधिकरणम्)

(प्रयोजनाक्षेपभाष्यम्)

कानि पुनरस्य योगस्य प्रयोजनानि ?।

(४५४-यथान्याससूत्रे प्रयोजनवार्तिकम्-१२)

---

१. क्वचिद् 'भवती' ति ।

॥*॥ प्रयोजनमपृक्तशिलोपे नुममामौ[1] गुणवृद्धी[2] दीर्घत्वे मडाट्श्नम्विधयः ॥*॥

(भाष्यम्)

अपृक्तलोपे शिलोपे च कृते नुम्, अमामौ, गुणवृद्धी, दीर्घत्वमिम्, अडाटौ, श्नम्विधिरिति प्रयोजनानि ॥

(उदाहरणोपपादनभाष्यम्)

नुम्—अग्ने त्री ते वाजिना त्री षधस्था ता ता पिण्डानाम् ॥ (नुम्[3]) । अमामौ-हे अनड्वन् अनड्वान् ॥ गुणः-अधोक् अलेट् ॥ वृद्धिः-न्यमार्ट् ॥

दीर्घत्वम्-अग्ने त्री ते वाजिना त्री षधस्था ता ता पिण्डानाम् ॥ इम्-अतृणेट् ॥ अडाटौ—अधोक् अलेट् ऐयः औनः ॥ श्नम्विधिः-अभिनोऽत्र । अच्छिनोऽत्र ॥ अपृक्तशिलोपयोः कृतयोरेते विधयो न प्राप्नुवन्ति । प्रत्ययलक्षणेन भवन्ति ॥

(प्रत्याख्यानभाष्यम्)

नैतानि सन्ति प्रयोजनानि । स्थानिवद्भावेनाप्येतानि सिद्धानि ।

(सूत्रावश्यकताभाष्यम्)

न सिध्यन्ति । आदेशः स्थानिवदित्युच्यते । न च लोप आदेशः ॥

---

१. 'नुमामौ' । २. 'वृद्धि' । ३. क्वचिन्न ।

(प्रत्याख्यानभाष्यम्)

लोपोऽप्यादेशः । कथम ?

आदिश्यते यः स आदेशः, लोपोऽप्यादिश्यते ।।

(लोपेऽप्यादेशत्वसाधकभाष्यम्)

दोषः खल्वपि स्याद् यदि लोपो नादेशः स्यात् । इह "अचः परस्मिन् पूर्वविधौ" इत्येतस्य भूयिष्ठानि लोप उदाहरणानि तानि न स्युः ।।

(सूत्रारम्भावश्यकताभाष्यम्)

यत्र तर्हि स्थानिवद्भावो नास्ति, तदर्थमयं योगो वक्तव्यः ।।

क्व च स्थानिवद्भावो नास्ति ? योऽल्विधिः ।।

(आक्षेपभाष्यम्)

किं प्रयोजनम् ? ।

(४५५-प्रयोजनवार्तिकम्-१३)

|||| प्रयोजनं[1] ङौनकारलोपेत्वेम्विधयः[2] ||*||*

(भाष्यम्)

ङौनकारलोपेत्त्वेम्विधयः प्रयोजयन्ति ।।

ङौनकारलोपस्तावत्[3]–"'आर्द्रे चर्मन्', 'लोहिते चर्मन्' । स्थानिवद्भावः "अनल्विधौ" इतिवचनान्न[4] प्राप्नोति । प्रत्ययलक्षणेन तु यचीति भसंज्ञा सिद्धा भवति ।।

---

१. क्वचिन्न । २. भाष्यमिदमित्यन्ये । ३. तावदिति क्वचिन्न ।

४. 'अनल्विधौ' इति वचनात्स्थानिवद्भावो न प्राप्नोति' इति क्व० ।

इत्त्वम्—आशीः । स्थानिवद्भावः- "अनल्विधौ" इति वचनान्न प्राप्नोति[१] । प्रत्ययलक्षणेन तु हलीतीत्त्वं सिद्धं भवति ।।

इम्—अतृणेट् । स्थानिवद्भावः "अनल्विधौ" इति वचनान्न प्राप्नोति[१] । प्रत्ययलक्षणेन तु हलीतीम् सिद्धो भवति ।

(४५६-सूत्रारम्भदूषणवार्तिकम्-१४)

|||| भसंज्ञाङीप्ष्फगोरात्वेषु च दोषः ||*||*

(भाष्यम्)

भसंज्ञाङीप्ष्फगोरात्वेषु च दोषो भवति ।।

[भसंज्ञा[२]—राज्ञः पुरुषो राजपुरुषः । प्रत्ययलक्षणेन तु यचीति भसंज्ञायां 'नलोपः प्रातिपदिकान्तस्य' इति नलोपो न प्राप्नोति । स्थानिवद्भावस्त्वनल्विधाविति वचनान्न प्राप्नोति[३] ।।

ङीप्—चित्रायां जाता चित्रा । प्रत्ययलक्षणेन त्वणन्तादितीकारः प्राप्नोति । स्थानिवद्भावस्त्वनल्विधाविति वचनान्न प्राप्नोति[३] ।।

ष्फ—वतण्डी । प्रत्ययलक्षणेन तु यञन्तादकारान्तादिति ष्फः प्राप्नोति । स्थानिवद्भावस्त्वनल्विधाविति वचनान्न प्राप्नोति[३] ।।

गोरात्वम्—गामिच्छति गव्यति । प्रत्ययलक्षणेन "औतोम्शसोः" इत्यात्वं प्राप्नोति । स्थानिवद्भावस्त्वनल्विधाविति वचनान्न प्राप्नोति[३] ।।]

१. 'अनल्विधौ' इति वचनात्स्थानिवद्भावो न : प्नोति' इति क्व० ।
२. इयमिदृशी वा व्याख्या लुप्ता स्यात् ।
३. क्वचिन्न ।

विमला - गोरात्वम्–गामिच्छतीति । इदम्फलमजाद्योरम्शसोरिति व्याख्याने । अम्शसोरचीति व्याख्याने तु वर्णप्राधान्यात् वर्णाश्रये नास्ति प्रत्ययलक्षणमिति निषेधात् सूत्रमतेऽपि न कोऽपि दोष इति बोध्यम् ।

(सूत्रारम्भवादिभाष्यम्)

भसंज्ञायां तावन्न दोषः । आचार्यप्रवृत्तिर्ज्ञापयति—न प्रत्ययलक्षणेन भसंज्ञा भवतीति । यदयम्—"न ङिसंबुद्ध्योः" इति ङौ प्रतिषेधं शास्ति । ङीप्यपि, नैवं विज्ञायते— अणन्तादकारान्तादिति ।

कथं तर्हि ? अण्योऽकार इति ।।

ष्फेऽपि,–नैवं विज्ञायते— यञन्तादकारान्तादिति ।।

कथं तर्हि ? यञ् योऽकार इति ।।

गोरात्वेऽपि, नैवं विज्ञायते–अमि अचीति ।

कथं तर्हि ? अच्यमीति ।।

(प्रत्याख्यानभाष्यम्)

प्रयोजनान्यपि तर्हि नैतानि सन्ति ।।

(दूषणोद्धारभाष्यम्)

यत्तावदुच्यते—ङौ नकारलोप इति ।। क्रियते एतन्न्यास एव—"न ङिसम्बुद्ध्योः" इति ।।

(दूषणोद्धारभाष्यम्)

इत्त्वमपि । वक्ष्यत्येतत्, शास इत्त्वे आशासः क्वौ इति ।।

विमला - आशासः क्वाविति । सूत्रारम्भेऽपीदं वक्तव्यम् आशासः क्वावेव यथा स्यादिति नियमार्थम्, अन्यथा आशास्ते इत्यत्रेत्वापत्तिरिति बोध्यम् ।

(दूषणोद्धारभाष्यम्)

इम्विधिरपि—हलीति निवृत्तम् ।।

(आक्षेपभाष्यम्)

यदि हलीति निवृत्तं – तृणहानि, अत्रापि प्राप्नोति ।।

(समाधानभाष्यम्)

एवं तर्हि—'अचि न' इत्यप्यनुवर्तिष्यते ।।

(तटस्थाक्षेपभाष्यम्)

न तर्हीदानीमयं योगो वक्तव्यः ?

(सिद्धान्तिसमाधानभाष्यम्)

वक्तव्यश्च ।। किं प्रयोजनम् ?

प्रत्ययं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन यथा स्यात् ! शब्दं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन मा भूदिति ।।

किं प्रयोजनम् ?

शोभना दृषदोऽस्य ब्राह्मणस्य सुदृषद् ब्राह्मणः । "सौर्मनसी अलौमोषसी" इत्येष स्वरो माभूदिति ।। —प्रत्ययलोपे प्रत्ययलक्षणम् ।।६१।।

(प्रत्ययलक्षणनिषेधसूत्रम्)

न लुमताङ्गस्य ।।१।१।६२।।

(न्यूनतापरिहाराधिकरणम्)

(४५७-आक्षेपवार्तिकम्-१)

।।।। लुमति प्रतिषेध एकपदस्वरस्योपसंख्यानम् ।।*।।*

(भाष्यम्)

लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानं कर्तव्यम् ।। एकपदस्वरे च लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम् ।।

विमला - लुमति प्रतिषेध इति । लुमच्छब्देन प्रतिपादिते अदर्शने यः प्रतिषेधः तस्मिन् एकपदाश्रयो यः स्वरस्तस्योपसंख्यानं कर्तव्यमिति वार्तिकार्थः । गर्गा इत्यत्र 'गर्गादिभ्यो यञिति' विहितस्य यञः, विदा इत्यत्र 'विदादिभ्यो' ञितिविहतस्याञः 'यञञोश्चे' ति लुकि प्रत्ययलक्षणेन 'ञ्नित्यादिर्नित्यमि' त्यनेनादेरुदात्तता प्राप्नोति तद्वारणार्थमुपसंख्यानमावश्यकम् । न लुमताङ्गस्येत्यनेन तु न निर्वाहः, स्वरविधायकशास्त्राणामङ्गाधिकारीयत्वाभावेन, 'भीह्रीभृहुमदे' तिसूत्रस्थपूर्वग्रहणस्य सौवरीणां सप्तमीनां तदन्तसप्तमीत्वमिति सामान्यापेक्षज्ञापकत्वेन ञिदन्तस्य निदन्तस्य चादिरुदात्त इत्याद्यर्थात् वस्तुतोऽङ्गस्य कार्यत्वाभावेन च न लुमतेत्यस्याप्रवृत्तेः । न च सौवरीणां सप्तमीनां तदन्तसप्तमीत्वे 'चतुरः शसी' त्युदात्तत्वं शसन्तस्य स्यात् । तथा च 'षट् त्रिंशाश्चचतुरः कल्पयन्तः' इत्यादौ चतुर इतिपदम् मध्योदात्तं न सिद्ध्येदिति वाच्यम्, तत्र शस्ग्रहणसामर्थ्यात्तदन्तसप्तमीत्वबाधात् । अन्यथा 'उडिदम्पदाद्यप्पुम्रैद्युचतुर्भ्यः' इत्येव ब्रूयात् । नचैवं स्वरविधायकेषु षष्ठ्येव निर्दिश्यतामिति वाच्यम्, रितश्चङ इत्यपेक्षयारिति चङीतिन्यासे लाघवसम्भवेन सप्तमीप्रयोगात् । यत्तु यदाभीह्रीत्यत्र पूर्वग्रहणेन यत्र सप्तम्यर्थपक्षे तदन्तपक्षे च फलभेदस्तत्रैव सौवरीणां सप्तमीनां तदन्तसप्तमीत्वम् ज्ञाप्यते । यथा भीह्रीत्यत्रेव पूर्वग्रहणाभावे तदन्तस्य कार्यित्वे प्रत्ययान्तानां भ्यादीनामुदात्त इत्यर्थे अलोऽन्त्यपरिभाषया प्रत्ययान्त एवोदात्तः, सप्तम्यर्थाश्रयणे तु भ्यादीनामेवोदात्तः स्यादिति फलभेदसत्त्वेन भवति तदन्तसप्तमीत्वम् । 'ञ्नित्यादिर्नित्यम्' 'पथिमथोः सर्वनामस्थाने'

इत्यादौ तदन्तस्य कार्यित्वे प्रकृत्यादेरेवोदात्तत्वम्, पूर्वस्यापि कार्यित्वे तथैवेति फलभेदाभावेन तदन्तसप्तमीत्वाकल्पनेन वस्तुतो लब्धाङ्गसंज्ञकस्य कार्यित्वे निषेध इति सिद्धान्तमते नलुमतेत्यनेनैव सिद्धिरित्युपसंख्यानस्य नावश्यकतेति तन्न, विशेषापेक्षज्ञापने गौरवात्, मानाभावात्, संज्ञायामुपमानमिति सूत्रस्थभाष्यविरोधाच्च । तथाहि—संज्ञायामुपमानमित्यत्र भाष्यम्–किमर्थमिदमुच्यते । न ञ्नित्यादिर्नित्यमित्येव सिद्धम् । ञ्नितीत्युच्यते, न चात्र ञ्नितम्पश्यामः । प्रत्ययलक्षणेन । नलुमता तस्मिन्निति प्रत्ययलक्षणप्रतिषेधः । अङ्गाधिकारोक्तस्य स प्रतिषेधः नलुमताङ्गस्येति । अत उत्तरम्पठति—उपमानस्याद्युदात्तवचनं ज्ञापकमनुबन्धलक्षणे स्वरे प्रत्ययलक्षण-प्रतिषेधस्य । उपमानस्याद्युदात्तवचनं ज्ञापकार्थं क्रियते । किं ज्ञाप्यम् । एतज्ज्ञापयत्याचार्यः अनुबन्धलक्षणे स्वरे प्रत्ययलक्षणं न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । गर्गाः, वत्साः, विदाः, उर्वाः, उष्ट्रग्रीवाः, वामरज्जुः । ञ्नितीत्याद्युदात्तत्वं न भवति । यद्यनुबन्धलक्षण इत्युच्यते पथिप्रियो मथिप्रियः पथिमथोः सर्वनामस्थाने इत्याद्युदात्तत्वं प्राप्नोति । एवन्तर्हि आचार्यो ज्ञापयति–स्वरे प्रत्ययलक्षणं न भवतीति । एवमपि सर्पिरागच्छ, सप्तागच्छतेति आमन्त्रितस्याद्युदात्तत्वं न प्राप्नोतीति । इहहि माहि दाताम्, माहि धाताम् 'आदिः सिचोऽन्यतरस्यामि'त्येष स्वरो न प्राप्नोति । एवन्तर्हि ज्ञापयत्याचार्यः, सप्तमीनिर्दिष्टे स्वरे प्रत्ययलक्षणं न भवतीति । एवमपि सर्वस्तोमः, सर्वपृष्ठः सर्वस्य सुपीत्याद्युदात्तत्वं न प्राप्नोति । एवन्तर्हि अनुबन्धलक्षण इत्येव । कथं पथिप्रियो मथिप्रियः । वक्तव्यमेतत् पथिमथोः सर्वनामस्थाने लुकि लुमता लुप्ते प्रत्ययलक्षणं न भवतीति । विशेषापेक्षज्ञापनेन ञ्नितीत्यादौ तदन्तसप्तमीत्वाभावे तु वस्तुतोऽङ्गस्य कार्यित्वे प्रतिषेध इति सिद्धान्तमते गर्गा इत्यादौ अनेनैव प्रतिषेधसिद्धौ तदर्थं ज्ञापकत्वाश्रयणमसङ्गतं स्यात् । अङ्गस्येत्यधिकारनिर्देशात् ञ्निति कित्स्वरस्य चानाङ्गत्वात् । कित्स्वरस्याप्राप्तिरिति **कैयटस्तु** संज्ञायामुपमानमिति सूत्रे सौवर्यः सप्तम्यः तदन्तसप्तम्यः इति नलुमता तस्मिन्नितिन्यासेऽपि नास्ति प्रत्ययलक्षणप्रतिषेध इति स्वग्रन्थविरोधादुपेक्ष्यः । पथिस्वरस्यानुबन्धलक्षणत्वाभावेन ज्ञापनेनासिद्धौ पथिमथोः सर्वनामस्थाने लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वचनमेव कर्तव्यम् । ञ्नितीत्यादेस्तु अनुबन्धलक्षणत्वेन ज्ञापनेनैव सिद्धौ वचनं नारब्धव्यमिति

प्रत्याख्यानाशय: । यद्यपि स्वरे प्रत्ययलक्षणं न भवतीति स्वरमात्रविषयकं ज्ञापनं स्वीकृत्य पथिस्वरार्थमपि वचनं नारब्धव्यम् । न च तथा ज्ञापने आमन्त्रितस्वरसिज्लुक् स्वरयोरसिद्धिरिति वाच्यम्, सप्तमीनिर्दिष्टे स्वरे प्रत्ययलक्षणं न भवतीति ज्ञापनेनैव सर्वसामञ्जस्यात् सर्वस्य सुपीत्यत्र सप्तमीमपनीय षष्ठ्या एव पाठस्वीकारात् । तथापि तथा कुतो नाभिहितमिति भाष्यकारा एव प्रष्टव्या: । सर्वस्य सुपीति सप्तम्यन्तयथाश्रुत-सूत्रानुरोधेनैव भाष्यमिति सन्तोष्टव्यम्वा ।

(प्रत्याक्षेपभाष्यम्)

किमविशेषेण ?

(प्रत्याक्षेपसाधानभाष्यम्)

नेत्याह ॥

(४५७-आक्षेपशेषवार्तिकद्वितीयखण्डम्- १)

॥*॥ सर्वामन्त्रितसिज्लुक्स्वरवर्जम् ॥*॥

(भाष्यम्)

सर्वस्वरमामन्त्रितस्वरं सिज्लुक्स्वरं च वर्जयित्वा ॥

(उदाहरणोपपादनभाष्यम्)

सर्वस्वर–सर्वस्तोमः सर्वपृष्टः । "सर्वस्य सुपि" इत्याद्युदात्तत्वं यथा स्यात् ॥

विमला - सर्वस्तोम इति । नन्वत्र 'बहुव्रीहौ प्रकृत्ये' ति स्वरस्यैव प्रवृत्तौ तस्य द्विपदाश्रयत्वेन निषेधविषयत्वाभावादपवादवचनमनर्थकमिति चेन्न, समासान्तोदात्त-त्वनिवृत्त्यर्थं सर्वस्य सुपीत्याद्युदात्तत्वस्यैव बहुव्रीहौ प्रकृतिभावमात्रविधानेन सर्वस्य सुपीत्यस्यैक-पदाश्रयत्वेन प्रतिषेधस्य प्राप्ते: ।

(उदाहरणोपपादनभाष्यम्)

आमन्त्रितस्वर–सर्पिरागच्छ सप्ताऽऽगच्छत । "आमन्त्रितस्य च" इत्याद्युदात्तत्वं यथा स्यात् ।।

(उदाहरणोपपादनभाष्यम्)

सिज्लुक्स्वर—मा हि दाताम्, मा हि धाताम् । "आदिः सिचोऽन्यतरस्याम्" इत्येष स्वरो यथा स्यात् ।।

(भाष्यम्)

किं प्रयोजनम् ?

(४५८-प्रयोजनवार्तिकम्-२)

।।।। प्रयोजनं ञिनिकिल्लुकि स्वराः ।।*।।*

(भाष्यम्)

ञिनिकित्स्वरा लुकि प्रयोजयन्ति । गर्गा वत्सा विदा उर्वाः, उष्ट्रग्रीवा वामरज्जुः । "ञ्निति" इत्याद्युदात्तत्वं मा भूदिति ।। इह चात्रयः "कितः' इत्यन्तोदात्तत्वं मा भूदिति ।।

(४५९-प्रयोजनान्तरवार्तिकम्-३)

।।।। पथिमथोः सर्वनामस्थाने लुकि ।।*।।*

(भाष्यम्)

पथिमथोः सर्वनामस्थाने लुकि प्रयोजनम्[1] ।। पथिप्रियो मथिप्रियः । पथिमथोः सर्वनामस्थाने" इत्येष स्वरो मा भूदिति ।।

(४६०-आक्षेपवार्तिकम्-४)

---

१. इतः परमत्र 'लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्' इत्यंशः अधिकः क्वचित् ।

।।*।। अह्नो रविधौ ।।*।।

(भाष्यम्)

अह्नो रविधाने लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम् । अहर्ददाति अहर्भुङ्क्ते । "रोऽसुपि' इति प्रत्ययलक्षणेन प्रतिषेधो मा भूदिति ।।

विमला - अह्नोरविधाविति । अङ्गाधिकारीये कार्ये निषेध इति पक्षाभिप्रायेण वार्तिकारम्भः । वस्तुतोऽङ्गस्य कार्ये कर्तव्ये निषेध इति सिद्धान्तपक्षेऽसुपीति निषेधस्य वस्तुतोऽङ्गकार्यत्वेन सूत्रेणैव निषेधे सिद्धे वार्तिकं न कर्तव्यमिति बोध्यम् ।

(४६१-आक्षेपवार्तिकम्-५)

।।*।। उत्तरपदत्वे चाऽपदादिविधौ ।।*।।

(भाष्यम्)

उत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम् । परमवाचा परमवाचे परमगोदुहा परमगोदुहे, परमश्वलिहा परमश्वलिहे । पदस्येति प्रत्ययलक्षणेन कुत्वादीनि मा भूवन्निति ।।

अपदादिविधाविति किमर्थम् ?

दधिसेचौ दधिसेचः-"सात्पदाद्योः' इति प्रतिषेधो यथा स्यात् ।।

(आक्षेपभाष्यम्)

यद्यपदादिविधावित्युच्यते उत्तरपदाधिकारो न प्रकल्पते ।। तत्र को दोषः ?

"कर्णो वर्णलक्षणात्' इत्येवमादिविधिर्न सिध्यति ।।

विमला - न सिद्ध्यतीति । कर्णवाचिनो लक्षणवाचिनश्च परस्योत्तरपदस्य कर्णशब्द-स्यादिरुदात्त इत्याद्यर्थकेन कर्णोवर्णलक्षणादित्यादिना सूत्रेण विहित उदात्तत्वादिर्न सिद्ध्यतीत्यर्थः । शुक्लकर्ण इत्यादौ कर्णोवर्णलक्षणादित्यादिना उदात्तत्वादौ कर्तव्ये प्रत्ययलक्षणेन अन्तर्वर्तिनीं विभक्तिमाश्रित्योत्तरपदस्य पदत्वं न स्यादनेन निषेधादिति प्रश्नकर्तुराशयः ।

(आक्षेपबाधकन्यासान्तरभाष्यम्)

यदि पुनः नलोपादिविधौ प्लुत्यन्ते 'लुमता लुप्ते प्रत्ययलक्षणं न भवती'त्युच्यते ।।

विमला - नलोपादिविधौ प्लुत्यन्ते इति । नलोप आदिर्यस्येत्येतत्तद्गुणसंविज्ञानो बहुव्रीहिः । एवं प्लुतिरन्ते यस्यैतदपि तद्गुणसंविज्ञानो बहुव्रीहिः । तथाच । नलोपमारभ्य प्लुतिपर्य्यन्तसमुदायघटकविधौ कर्तव्य एव लुमता लुप्ते प्रत्ययलक्षणं न भवतीति स्वीकारादुत्तरपदविधीनां तदनन्तर्गतत्वेन तत्र कर्तव्ये प्रत्ययलक्षणस्याप्रतिषेधान्न दोष इति भावः ।

(न्यासान्तरनिराकरणभाष्यम्)

नैवं शक्यम् । इह हि राजकुमार्यौ राजकुमार्य इति । शाकलं प्रसज्येत ।।

(न्यासान्तरसाधकभाष्यम्)

नैष दोषः । यदेतत्-'सिति शाकलं न' इति; एतत्-'प्रत्यये शाकलं न' इति वक्ष्यामि ।

(आक्षेपभाष्यम्)

यदि "प्रत्यये शाकलं न" इत्युच्यते, 'दधि अधुना, मधु अधुना' अत्राऽपि न प्रसज्येत ।।

(निराकरणभाष्यम्)

प्रत्यये शाकलं न भवति । कतरस्मिन् ?

यस्माद्यः प्रत्ययो विहित इति ।।

(आक्षेपभाष्यम्)

इह तर्हि परमदिवा, परमदिवे । "दिव उत्" इत्युत्वं प्राप्नोति ।।

(विशेषानभ्युपगमभाष्यम्)

अस्तु तर्ह्यविशेषेण ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्—उत्तरपदाधिकारो न प्रकल्पेतेति ।।

(परिहारभाष्यम्)

वचनादुत्तरपदाधिकारो भविष्यति ।।

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम् ।।

(समाधानभाष्यम्)

न वक्तव्यम् । अनुवृत्तिः करिष्यते । इदमस्ति "यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्" ।। "सुप्तिङन्तं पदम्" । यस्मात्सुप्तिङ्विधिस्तदादि सुबन्तं तिङन्तं च ।। "नः क्ये" । नान्तं क्ये पदसंज्ञं भवति, यस्मात् क्यविधिस्तदादि सुबन्तं च ।। "सिति च" । सिति च पूर्वं पदसंज्ञं भवति, यस्मात्सिद्विधिस्तदादि सुबन्तं च ।। "स्वादिष्वसर्वनामस्थाने" । स्वादिष्वसर्वनामस्थाने पूर्वं पदसंज्ञं भवति, यस्मात्स्वादिविधिस्तदादि

सुबन्तं च ।। "यचि भम्" । यजादिप्रत्यये पूर्वं भं भवति, यस्माद्यजादिविधिस्तदादि सुबन्तं च ।।

(आक्षेपभाष्यम्)

इह तर्हि—वाक्[1] परमवाक् । 'असर्वनामस्थाने' इति प्रतिषेधः प्राप्नोति ।।

(समाधानभाष्यम्)

अस्तु तस्याः प्रतिषेधः–या स्वादौ पदमिति पदसंज्ञा । या तु सुबन्तं पदमिति पदसंज्ञा सा भविष्यति । सत्येतत्प्रत्यये आसीत् । अनया भविष्यत्यनया न भविष्यतीति ।।

(आक्षेपभाष्यम्)

लुप्त इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसंज्ञा, तावत एवावधेः सुबन्तं पदमिति । अस्ति च प्रत्ययलक्षणेन सर्वनामस्थानपरतेति कृत्वा 'प्रतिषेधाश्च बलीयांसो भवन्ति' इति प्रतिषेधः प्राप्नोति ।।

(समाधानवार्तिकम्)

।।।। नाऽप्रतिषेधात् ।।*।।*

(भाष्यम्)

नायं प्रसज्यप्रतिषेधः—सर्वनामस्थाने नेति ।।

किं तर्हि ?

पर्युदासोऽयम्–यदन्यत्सर्वनामस्थानादिति । सर्वनामस्थाने अव्यापारः । यदि केनचित्प्राप्नोति तेन भविष्यति । पूर्वेण च प्राप्नोति ।।

१. [illegible]वचिन्न ।

(समाधानान्तरवार्तिकम्)

//// अप्राप्तेर्वा //*//*

(भाष्यम्)

अथ वा—अनन्तरा या प्राप्तिः सा (प्राप्तिः[१]) प्रतिषिध्यते ।

कुत एतत् ?

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति ।।

(आक्षेपभाष्यम्)

ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते[२] ।।

(समाधानभाष्यम्)

नोत्सहते प्रतिषिद्धा सती बाधितुम् ।।

(आक्षेपभाष्यम्)

यद्येवं परमवाचौ परमवाच इति । "सुप्तिङन्तं पदम्" इति पदसंज्ञा प्राप्नोति ।।

(समाधानभाष्यम्)

एवं तर्हि योगविभागः करिष्यते- "स्वादिषु" पूर्वं पदसंज्ञं भवति ।। ततः—"सर्वनामस्थाने अयचि" । पूर्वं पदसंज्ञं भवति ।। ततो—"भम्" । भसंज्ञं भवति यजादावसर्वनामस्थान इति ।।

विमला - अयचीति । तथा च । समासे चरमभागस्य पदसंज्ञा यजादौ क्वापि नास्ति । क्वचिन्निषेधात् क्वचिद् भत्वेन बाधादिति निष्कर्षः ।

---

१. क्वचिन्न ।   २. 'बाधेत' ।

(आक्षेपभाष्यम्)

यदि तर्हि—सावपि पदं भवति, एचः प्लुतविकारे पदान्तग्रहणं चोदयिष्यति, इह मा भूत्—भद्रं करोषि गौरिति । तस्मिन् क्रियमाणेऽपि प्राप्नोति ।।

विमला - पदान्तग्रहणं चोदयिष्यतीति । पदान्तग्रहणं कर्तव्यमिति वार्तिककृदुक्तेः ।

(समाधानभाष्यम्)

वाक्यपदयोरन्त्यस्येत्येवं तत् ।।

विमला - वाक्यपदयोरन्त्यस्येति । अत्र पदपदमधिकमिति प्रतीमः । तत्रान्तग्रहणमात्रं कृत्वा वाक्यस्य टेरित्यतो वाक्यग्रहणमनुवर्त्य वाक्यान्तस्येति व्याख्याने गौरित्यौकारान्तस्य वाक्यान्तत्वाभावेनेदुतौ न भवत इति भावः ।

(आक्षेपभाष्यम्)

इह तर्हि—दधिसेचौ दधिसेचः, "सात्पदाद्योः" इति पदादिलक्षणः षत्वप्रतिषेधो न प्राप्नोति ।।

(समाधानभाष्यम्)

मा भूदेवम्—पदस्यादिः पदादिः, पदादेर्नेति ।।

कथं तर्हि ?

पदादादिः पदादिः पदादेर्नेत्येवं भविष्यति ।।

(आक्षेपभाष्यम्)

नैवं शक्यम् । इहापि प्रसज्येत—ऋक्षु वाक्षु त्वक्षु कुमारीषु किशोरीष्विति ।।

(समाधानभाष्यम्)

सात्प्रतिषेधो ज्ञापकः—स्वादिषु पदत्वेन[1] येषां पदसंज्ञा, न तेभ्यः प्रतिषेधो भवतीति ।।

(आक्षेपभाष्यम्)

इह तर्हि—'बहुसेचौ बहुसेचः' । बहुजयं प्रत्ययः । अत्र पदादादिः पदादिः पदादेर्नेत्युच्यमानेऽपि न सिध्यति ।।

विमला - न सिद्ध्यतीति । प्रत्याख्याने बहुच्पूर्वस्य षत्वं नेतिवचनं कर्तव्यम् । षत्वं नेत्यपि न कर्तव्यम् । सात्पदाद्योरित्यनन्तरं पाठादेव तल्लाभात् । वार्तिकारम्भे तु अत्रैव कुत्वाभावाय 'बहुच्पूर्वस्य चापदादिविधौ ने' तिवचनं कर्तव्यमित्यारम्भ-प्रत्याख्यानयोः साम्यम् ।

(वार्तिकन्यासान्तरेण समाधानभाष्यम्)

एवं तर्हि—

'उत्तरपदत्वे च पदादिविधौ

''लुमता लुप्ते प्रत्ययलक्षणं भवति'' इति वक्ष्यामि । तन्नियमार्थं भविष्यति-पदादिविधावेव, न पदान्तवि- धाविति ।।

विमला - लाघवात्पक्षान्तरमुपन्यस्यति—**उत्तरपदत्वे च पदादिविधाविति** । अयम्भावः । प्रत्ययलक्षणसूत्रे एव 'उत्तरपदत्वे च पदादिविधौ बहुच् पूर्वस्य चेति पाठ्यम् । सूत्रेणैव प्रत्ययलक्षणसिद्धौ सामर्थ्यात् लुमता लुप्तेऽपि प्रत्ययलक्षणार्थं वार्तिकारम्भः । एवञ्च उत्तरपदत्वे लुमता लुप्ते प्रत्ययलक्षणं भवति, बहुच्पूर्वस्य च लुमता लुप्ते प्रत्ययलक्षणं भवति । पदादिविधाविति नियमार्थम् । पदादिविधावेव प्रत्ययलक्षणं नतु पदान्तविधाविति बहुसेचावित्यादौ षत्वनिषेधे प्रत्ययलक्षणं भवति कुत्वे तु नेति सर्व सुस्थम् । अस्मिन्पक्षे नञोऽकरणात्, योगविभागाकरणाच्च महल्लाघवम् ।

१. 'परत्वेन' ।

(आक्षेपभाष्यम्)

कथं बहुसेचौ बहुसेचः ?

(४६२-समाधानवार्तिकम्-६)

।।*।। बहुच्पूर्वस्य च ।।*।।

(भाष्यम्)

बहुचूपूर्वस्य च पदादिविधावेव, न पदान्तविधाविति ।।

(४६३-आक्षेपवार्तिकम्-७)

।।*।। द्वन्द्वेऽन्त्यस्य ।।*।।

(भाष्यम्)

द्वन्द्वेऽन्त्यस्य लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम् ।। [वाक् च स्रक् च त्वक् च[1]] वाक्स्रक्त्वचम् ।

(आक्षेपभाष्यम्)

इहाऽभूवन्निति[2] प्रत्ययलक्षणेन जुस्भावः प्राप्नोति ।।

विमला - जुस्भावः प्राप्नोतीति । अङ्गाधिकारस्थत्वाभावेन, अङ्गकार्यत्वाभावेन, च प्रत्ययलक्षणनिषेधाप्राप्तेरिति भावः।

(४६४-समाधानवार्तिकम्-८)

।।*।। सिचि जुसोऽप्रसङ्ग आकारप्रकरणात् ।।*।।

(भाष्यम्)

---

१. कोष्ठगतः पाठो क्वचिन्न । २. 'इह मा भूवन्निति' ।

सिचि सिज्निमित्तस्य जुसोऽप्रसङ्गः ।।

किं कारणम् ? "आकारप्रकरणात्" । "आतः" इत्येतन्नियमार्थं[1] भविष्यति—आत एव च सिज् लुगन्तात्, नान्यस्मात्सिज्-लुगन्तादिति ।।

(आक्षेपभाष्यम्)

इह—इति युष्मत्पुत्रो ददाति, इत्यस्मत्पुत्रो ददातीत्यत्र प्रत्ययलक्षणेन "युष्मदस्मदोः षष्ठीचतुर्थी-द्वितीयास्थयोर्वान्नावौ" इति वान्नावादयः[2] प्राप्नुवन्ति ।।

(४६५-समाधानवार्तिकम्-१)

।।।।युष्मदस्मदोः स्थग्रहणात् ।।*।।*

(भाष्यम्)

स्थग्रहणं तत्र क्रियते तच्छ्रूयमाणविभक्तिविशेषणं विज्ञास्यते ।।

(समाधानबाधकभाष्यम्)

अस्त्यन्यत्स्थग्रहणस्य प्रयोजनम् ।।

किम् ? सविभक्तिकस्य वान्नावादयो यथा स्युरिति ।।

(समाधानसाधकभाष्यम्)

नैतदस्ति प्रयोजनम् । पदस्येति वर्तते । विभक्त्यन्तं च पदम् ।। तत्राऽन्तरेणापि स्थग्रहणं सविभक्तिकस्यैव भविष्यन्ति[3] ।।

---

१. 'आत:' इति वर्त्तते, तन्निय० इति क्व० ।

२. 'आदेशा:' इति क्वचिदधिक. । ३. 'भविष्यति' ।

(समाधानबाधकभाष्यम्)

भवेत्सिद्धम्—यत्र विभक्त्यन्तं पदम् । यत्र तु खलु विभक्तौ पदं तत्र न सिध्यति—ग्रामो वां दीयते; जनपदो वां दीयते, ग्रामो नौ दीयते, जनपदो नौ दीयते ।।

विमला - यत्र खलु विभक्तौ पदमिति । अयम्भावः । षष्ठीद्वितीययोर्युष्मदस्मदोर्न पदत्वं भसंज्ञया बाधात् । किन्तु विभक्त्यन्तयोरेव । एवञ्च तत्र युष्मदस्मदोः स्वघटितविभक्त्यन्तसमुदाये लक्षणा । तत्र समुदाये पदस्येत्यनुवर्तमानस्य विशेषणत्वमिति विभक्तिविशिष्टयोरेवादेशः स्यादित्यतिरिच्यमानं स्थग्रहणम्, श्रूयमाणविभक्तिविशेषत्वं ज्ञापयतीति युष्मत्पुत्रों ददातीत्यादौ प्रत्ययलक्षणेन नादेशप्रसक्तिः । चतुर्थ्यां तु भ्यसि 'ग्रामो वां दीयते' इत्यादौ युष्मदस्मदादेरपि पदत्वादनुवर्तमानस्य पदस्येत्यस्य मुख्यार्थेन सामानाधिकरण्ये सम्भवति लक्ष्यार्थेन विभक्त्यन्त-युष्मदादिघटितसमुदायेन सामानाधिकरण्यं न स्यादिति युष्मदस्मदोरेवादेशो मा भूदिति स्थग्रहणस्यावश्यकतया नोक्तार्थज्ञापकत्वमिति ।

(समाधानसाधकभाष्यम्)

सर्वग्रहणमपि प्रकृतमनुवर्तते । तेन सविभक्तिकस्यैव भविष्यति ।।

(आक्षेपभाष्यम्)

इह—चक्षुष्कामं याजयांचकारेति "तिङ्ङतिङ" इति, तस्य च निघातस्तस्माच्चाऽनिघातः प्राप्नोति ।।

(४६६-समाधानवार्तिकम्-१०)

।।।। आमि लिलोपात्तस्य चानिघातस्तस्माच्च निघातः ।।*।।*

(भाष्यम्)

आमि लिलोपात्तस्य चाऽनिघातः तस्माच्च निघातः सिद्धो भविष्यति ।।

(अङ्गपदवाच्यार्थनिरूपणाधिकरणम्)

(४६७-आक्षेपवार्तिकम्-११)

।।।। अङ्गाधिकार इटो विधिप्रतिषेधौ ।।*।।*

(भाष्यम्)

अङ्गाधिकारे इटो विधिप्रतिषेधौ न सिध्यतः ।। जिगमिष संविवृत्स । अङ्गस्येतीटो विधिप्रतिषेधौ न प्राप्नुतः ।।

विमला - विधिप्रतिषेधौ न प्राप्नुत इति । तयोरङ्गाधिकारीयत्वाभावादिति भावः ।

(४६८-आक्षेपवार्तिकम्-१२)

।।।। क्रमेर्दीर्घत्वं च ।।*।।*

(प्रश्नभाष्यम्)

किं च ?

(एकदेशिसमाधानभाष्यम्)

इटश्च विधिप्रतिषेधौ ।।

(सिद्धान्तिभाष्यम्)

नेत्याह । आदेशोऽयं चः पठितः । क्रमेश्च दीर्घत्वम् ।। उत्क्राम संक्रामेति ।।

(अङ्गाधिकारपरत्वदूषणोपसंहारभाष्यम्)

इह किंचिदङ्गाधिकारे लुमता लुप्ते प्रत्ययलक्षणेन भवति, किंचिच्चाऽन्यत्र न भवति ।।

(न्यासान्तरेण दूषणोद्धाराधिकरणम्)

(न्यासान्तरसाधकभाष्यम्)

यदि पुनः—

(४६९-न्यासान्तरवार्तिकम्-१३)

॥*॥ न लुमता तस्मिन्[1] ॥*॥

(भाष्यम्)

इत्युच्येत[2] ॥

(आक्षेपभाष्यम्)

अथ "न लुमता तस्मिन्" इत्युच्यमाने किं सिद्धमेतद्भवति—'इटो विधिप्रतिषेधौ क्रमेर्दीर्घत्वं च' ॥

(समाधानभाष्यम्)

बाढं सिद्धम्। न इटो विधिप्रतिषेधौ परस्मैपदेष्वित्युच्यते ॥

कथं तर्हि ? सकारादाविति। तद्विशेषणं परस्मैपदग्रहणम् ॥ न खल्वपि क्रमेर्दीर्घत्वं परस्मैपदेष्वित्युच्यते ॥

कथं तर्हि ? शितीति। तद्विशेषणं परस्मैपदग्रहणम् ॥

(४७०-आक्षेपवार्तिकम्-१४)

---

१. भाष्यमिदमित्यन्ये।

२. 'इत्युच्यते' क्वचित्तु।

।।*।। न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तलोपे ।।*।।

(भाष्यम्)

न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तलोपे न सिध्यन्ति ।। अवधि भवता दस्युः । अगायि भवता ग्रामः । अध्यगायि भवताऽनुवाकः । तलोपे कृते लुङीति हनिणिङादेशा न प्राप्नुवन्ति ।।

(समाधानभाष्यम्)

नैष दोषः । न लुङीति हनिणिङादेशा उच्यन्ते ।।

किं तर्हि ? आर्धधातुक इति तद्विशेषणं लुङ्ग्रहणम् ।।

(आक्षेपभाष्यम्)

इह च—सर्वस्तोमः सर्वपृष्ठः—"सर्वस्य सुपि" इत्याद्युदात्तत्वं न प्राप्नोति ।।

(एकदेशिसमाधानभाष्यम्)

तच्चाऽपि वक्तव्यम् ।।

(सिद्धान्तिसमाधानभाष्यम्)

न वक्तव्यम् । "न लुमताङ्गस्य" इत्येव सिद्धम् ।। कथम् ? न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते ।।

किं तर्हि ?

योऽसौ लुमता लुप्यते तस्मिन् यदङ्गं तस्य यत्कार्यं तन्न भवति ।।

(आक्षेपभाष्यम्)

एवमपि—सर्वस्वरो न सिध्यति ।।

(समाधानभाष्यम्)

कर्तव्योऽत्र यत्नः ।। —न लुमताङ्गस्य ।६२।।

(उपधासंज्ञासूत्रम्)

अलोऽन्त्यात्पूर्व उपधा ।।१।१।६४।।

(अल इत्यस्य पञ्चम्यन्तत्वनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

किमिदमल्ग्रहणमन्त्यविशेषणम् ?

(इष्टापत्तिभाष्यम्)

एवं भवितुमर्हति ।।

विमला - एवं भवितुमर्हतीति । अन्त्यविशेषणत्वे एव 'अलोऽन्त्यात्पूर्व' इत्येवं निर्देशो भवितुमर्हतीत्यर्थः । पूर्वविशेषणत्वे त्वसंदेहाय 'अन्त्यात्पूर्वोऽलित्येव निर्दिशेदिति भावः ।

(४७१-आक्षेपवार्तिकम्-१)

।।।। उपधासंज्ञायामल्ग्रहणमन्त्य-निर्देशश्चेत्संघातप्रतिषेधः ।।*।।*

(भाष्यम्)

उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्संघातस्य प्रतिषेधो वक्तव्यः ।। संघातस्योपधासंज्ञा प्राप्नोति ।।

तत्र को दोषः ? "शास इदङ्हलोः" । शिष्टः शिष्टवान्[1] । संघातस्येत्त्वं प्राप्नोति ।।

विमला - उपधासंज्ञायामिति । उपधासंज्ञासूत्रे इत्यर्थः । **अन्त्यनिर्देशश्चेदिति** । अन्त्यस्य प्रत्यायकं चेदित्यर्थः । अन्त्यविशेषणत्वे अन्त्यप्रत्यायकत्वमल्ग्रहणस्येत्यवधेयम् । **संघातस्योपधासंज्ञा प्राप्नोतीति** । अला पूर्वस्य संज्ञिनोऽविशेषणात् विशेषाभावाद्वर्णस्येव संघातस्यापि संज्ञा प्राप्नोतीत्यर्थः । **तत्रेति** । तस्मिन् सतीत्यर्थः । **शिष्टः, शिष्टवानिति** । वर्णस्य संज्ञात्वे शिष्टः, शिष्टवानित्यादेः सिद्धावपि संघातस्य संज्ञात्वे शेति समुदायस्येत्वं प्रसज्येतेति भावः ।

(प्रथमान्तपक्षाभ्युपगमभाष्यम्)

यदि पुनरलन्त्यादित्युच्यते ?

(प्रथमान्तपक्षे दूषणभाष्यम्)

एवमप्यन्त्योऽविशेषितो भवति ।। तत्र को दोषः ? संघातादपि पूर्वस्योपधासंज्ञा प्रसज्येत ।।

तत्र को दोषः ? "शास इदङ्हलोः" । शिष्टः शिष्टवान् । शकारस्येत्त्वं प्रसज्येत ।। सूत्रं च भिद्यते ।।

विमला - एवमप्यन्त्येति । नच तन्त्रेणोभयविशेषणता, विशेष्यस्य प्रथमान्तत्वात्पञ्चम्यन्तत्वाच्चैकरूपेणान्वयाभावादिति बोध्यम् ।

(सिद्धान्तभाष्यम्)

यथान्यासमेवास्तु ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् - 'उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत् संघातप्रतिषेधः' इति ।।

---

१. 'शिष्ट्वा शिष्टः' 'शिष्टात् शिष्टः' 'शिष्टः शिष्टात्' वा क्वचित् ।

(परिहारभाष्यम्)

नैष दोषः ।

(४७२-समाधानवार्तिकम्-२)

।।*।। अन्त्यविज्ञानात्सिद्धम् ।।*।।

(भाष्यम्)

सिद्धमेतत् ।।

कथम्? अन्त्यविज्ञानात्[1] । अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति ।।

विमला - अन्त्यविज्ञानात्सिद्धमिति । समुदायस्य संज्ञायामपि 'शास इदङ् हलोरि'-ति सूत्रेऽनुवृत्तस्योपधाया इत्यस्य स्थानषष्ठीत्वेन अलोऽन्त्यपरिभाषयाऽन्त्यस्यैव कार्यप्रवृत्तेरिष्टं सिद्धमिति भावः ।

(४७३-समाधानबाधकवार्तिकम्-३)

।।*।। अन्त्यविज्ञानात् सिद्धमिति चेन्नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे ।।*।।

(भाष्यम्)

अन्त्यविज्ञानात् सिद्धमिति चेत्, तन्न ।।

किं कारणम्? "नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे" । अनर्थकेऽलोन्त्यविधिर्नेत्येषा परिभाषा कर्तव्या ।।

किमविशेषण?

नेत्याह—'अनभ्यासविकारे' । अभ्यासविकारान्

१. लुप्तं स्यात् ।

वर्जयित्वा । "भृञामित्" "अर्तिपिपर्त्योश्च" इति ।।

(प्रयोजनजिज्ञासाभाष्यम्)

कान्येतस्याः परिभाषायाः प्रयोजनानि ?

(४७४-परिभाषाप्रयोजनदर्शिवार्तिकम्-४)

|||| प्रयोजनमव्यक्तानुकरणस्याऽत इतौ ||*||*

(भाष्यम्)

"अव्यक्तानुकरणस्याऽत इतौ[1]" इत्यन्त्यस्य प्राप्नोति । अनर्थकेऽलोऽन्त्यविधिर्न भवतीति न दोषो भवति ।।

(प्रयोजननिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम् । आचार्य प्रवृत्तिर्ज्ञापयति—नान्त्यस्य पररूपं भवतीति । यदयम्—"नाम्रेडितस्यान्त्यस्य तु वा" इत्याह ।।

(४७५-प्रयोजनवार्तिकम्-५)

|||| ध्वसोरेद्धावभ्यासलोपश्च ||*||*

(भाष्यम्)

ध्वसोरेद्धावभ्यासलोपश्चेत्यन्तस्य प्राप्नोति । अनर्थकेऽलोऽन्त्यविधिर्नेति न दोषो भवति ।।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । पुनर्लोपवचनसामर्थ्यात्सर्वस्य भविष्यति ।।

१.　लुप्तं स्यात् ।

(निराकरणयुक्त्यन्तरैकदेशिभाष्यम्)

अथ वा—शिल्लोपः[1] करिष्यते । स "शित्सर्वस्य" इति सर्वादेशो भविष्यति ।।

(आक्षेपभाष्यम्)

स तर्हि शकारः कर्तव्यः ?

(समाधानभाष्यम्)

न कर्तव्यः । क्रियते न्यास एव द्विशकारको निर्देशः—"ध्वसोरेद्धावभ्यासलोपश्च" इति ।।

(४७६-प्रयोजनवार्तिकम्-६)

।।।। आपि लोपोऽकोऽनचि ।।*।।*

विमला - नानर्थकेऽलोऽन्त्यविधिरिति परिभाषाप्रयोजनं दर्शयति—**आपि लोपोऽकोऽनचीति** । अनजादावपि विभक्तौ अककास्येदम इदो लोपः यत्र भवति आभ्यामित्यादौ तत्र प्रयोजनमित्यर्थः । अस्याः परिभाषायाः अभावे अलोऽन्त्यपरिभाषया दकारस्य लोपापत्तौ आभ्यामित्यादिकं न सिद्ध्येदिति भावः ।

(काक्वा सूत्रपरिवर्तनाक्षेपभाष्यम्)

[2]तिष्ठति सूत्रम् ?

विमला - आपि लोपोऽकोऽनचीति सूत्राभावान्न्यासान्तरमिदमिति कस्यचिदाशङ्कामपनेतुमाह—**तिष्ठति सूत्रमिति** । तदेव सूत्रमन्यथा व्याख्यायते नतु वचनान्तरमिदमिति भावः ।

(समाधानभाष्यम्)

अन्यथा व्याख्यायते ।।

---

१. 'शिलोपः' ।

२. इतः पूर्वमत्र 'आपि लोपोऽकोऽनचीत्यन्त्यस्य प्राप्नोति' इति लुप्तं स्यात् ।

(वार्तिकव्याख्याभाष्यम्)

'आपि हलि लोप' इत्यन्त्यस्य प्राप्नोति । अनर्थकेऽलोन्त्यविधिर्नेति न दोषो भवति ।।

विमला - अन्यथा व्याख्यानमेव दर्शयति—**आपि हलीति** ।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । अन एव लोपं वक्ष्यामि ।।

(गौरवाक्षेपभाष्यम्)

तदनो ग्रहणं कर्त्तव्यम् ?

(गौरवनिराकरणभाष्यम्)

न कर्तव्यम् । प्रकृतमनुवर्तते ।।

क्व प्रकृतम् ? "अ नाप्यकः" इति ।।

(अनुवृत्तिबाधकभाष्यम्)

तद्वै प्रथमानिर्दिष्टम्, षष्ठीनिर्दिष्टेन चेहार्थः ।

(अनुवृत्तिसाधकभाष्यम्)

हलीत्येषा सप्तमी अश्निति प्रथमायाः षष्ठीं प्रकल्पयिष्यति—"तस्मिन्निति निर्दिष्टे पूर्वस्य" इति ।।

विमला - षष्ठीं प्रकल्पयिष्यतीति । एवञ्च 'अनाप्यकः' 'हलिलोपः' अनयोर्बाध्यबाधकभावाभावेन पूर्वमनादेशे ततो हलिलोप इत्यनेन अलोऽन्त्यपरिभाषया अनो नस्य लोपे द्वयोरकारयोः पररूपे दीर्घे आभ्यामित्यादि सिद्धौ 'नानर्थकेऽलोन्त्यविधिरिति परिभाषा निष्फलैवेति भावः ।

(४७७-प्रयोजनवार्तिकम्-७)

।।*।। अत्र लोपोऽभ्यासस्य ।।*।।

(भाष्यम्)

'अत्र लोपोऽभ्यासस्य' इति अन्त्यस्य प्राप्नोति । 'नानर्थकेऽलोऽन्त्यविधिः' इति न दोषो भवति ।।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम् । अत्र ग्रहणसामर्थ्यात्सर्वस्य भविष्यति ।।

(प्रयोजनसाधकभाष्यम्)

अस्त्यन्यदत्रग्रहणस्य प्रयोजनम् । किम् ? सन्नधिकारोऽपेक्ष्यते । इह मा भूत्—दधौ ददौ ।।

(प्रयोजनबाधकभाष्यम्)

अन्तरेणाऽप्यत्रग्रहणं सन्नधिकारमपेक्षिष्यामहे ।।

विमला - सन्नधिकारमपेक्षिष्यामह इति । लक्ष्यानुरोधादितिभावः ।

(प्रयोजनसाधकभाष्यम्)

संस्तर्हि सकारादिरपेक्ष्यते—सनि सकारादाविति । इह मा भूत्—जिज्ञापयिषतीति ।।

(प्रयोजनबाधकभाष्यम्)

अन्तरेणाऽप्यत्रग्रहणं सनं सकारादिमपेक्षिष्यामहे ।।

(प्रयोजनसाधकभाष्यम्)

प्रकृतयस्तर्ह्यपेक्ष्यन्ते—एतासां प्रकृतीनां लोपो यथा स्यात् । इह मा भूत्—पिपक्षति यियक्षति ।।

(प्रयोजनबाधकभाष्यम्)

अन्तरेणाप्यत्रग्रहणमेताः प्रकृतीरपेक्षिष्यामहे ।।

(प्रयोजनसाधकभाष्यम्)

विषयस्तर्ह्यपेक्ष्यते—"मुचोऽकर्मकस्य गुणो वा" इति । इह मा भूत्— मुमुक्षति गामिति ।।

(प्रयोजनबाधकभाष्यम्)

अन्तरेणाप्यत्रग्रहणमेतं विषयमपेक्षिष्यामहे ।।

कथम् ? अकर्मकस्येत्युच्यते तेन यत्रैवायं मुचिरकर्मकस्तत्रैव भविष्यति ।। तस्मान्नार्थोऽनया परिभाषया—नानर्थकेऽलोऽन्त्यविधिरिति ।।

(४७८-न्यासान्तरवार्तिकम्-८)

।।*।। अलोऽन्त्यात् पूर्वोऽलुपधेति वा ।।*।।

(भाष्यम्)

अथ वा व्यक्तमेव पठितव्यम्— अलोऽन्त्यात्पूर्वोऽलुपधासंज्ञो भवतीति ।

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम् ?

(परिहारभाष्यम्)

न वक्तव्यम् ।।

(४७९-समानवार्तिकम्-९)

।।*।। अवचनाल्लोकविज्ञानात्सिद्धम् ।।*।।

(भाष्यम्)

अन्तरेणापि वचनं लोकविज्ञानात् सिद्धमेतत् । तद्यथा—लोके—अमीषां ब्राह्मणानामन्त्यात्पूर्व आनीयतामित्युक्ते यथाजातीयकोऽन्त्यस्तथाजातीयकोऽन्त्यात्पूर्व आनीयते ।। —अलोऽन्त्यात्पूर्व उपधा ।।६४।।

(परिभाषासूत्रे)

तस्मिन्निति निर्दिष्टे पूर्वस्य ।१।१।६५।।

तस्मादित्युत्तरस्य ।।१।१।६६।।

(उदाहरणनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

किमुदाहरणम् ?

(समाधानभाष्यम्)

इह तावत् "तस्मिन्निति निर्दिष्टे पूर्वस्य" इति "इको यणचि" । दध्यत्र मध्वत्र ।। इह "तस्मादित्युत्तरस्य" इति "द्व्यन्तरुपसर्गेभ्योऽप ईत्" । द्वीपम् अन्तरीपं समीपम् ।।

(समाधानबाधकभाष्यम्)

अन्यथाजातीयकेन शब्देन निर्देशः क्रियते, अन्यथाजातीयक उदाह्रियते ।।

(प्रत्याक्षेपभाष्यम्)

किं तर्ह्युदाहरणम् ?

(प्रत्याक्षेपसमाधानभाष्यम्)

इह तावत् "तस्मिन्निति निर्दिष्टे पूर्वस्य" इति "तस्मिन्नणि च युष्माकास्माकौ" इति ।। 'तस्मादित्युत्तरस्य' इति–'तस्माच्छसो नः पुंसि' इति ।।

विमला - तस्मिन्नणि चेति । न चात्र फलाभावात्तस्मिन्निति परिभाषा नोपतिष्ठेतेति वाच्यम् । हे यौष्माकीण: अस्मभ्यं देहीत्यत्राणुत्तरंस्यास्मभ्यमित्यस्यादेशवारणार्थत्वात् ।

(सिद्धान्तिभाष्यम्)

इदं चाप्युदाहरणम्–"इको यणचि", "घ्र्वन्तरुपसर्गेभ्योऽप ईद्" इति ।। कथम् ? सर्वनाम्नायं निर्देशः क्रियते । सर्वनामा च सामान्यवाची । तत्र सामान्ये निर्दिष्टे विशेषा अप्युदाहरणानि भवन्ति ।।

विमला - निर्देश: क्रियत इति । न तु सप्तम्यन्तानुकरणमिदमिति भाव: । **सामान्यवाचीति** । बुद्धिस्थत्वोपलक्षितसप्तम्यन्तत्वावच्छिन्नवाचीत्यर्थ: । **सामान्ये** । सामान्यवाचके निर्दिष्टे । अव्यवहितोच्चारिते । **विशेषा अप्युदाहरणानि भवन्तीति** । बुद्धिस्थत्वोपलक्षितधर्मावच्छिन्नवाचकतत्पदोच्चारणे अचीत्यादिसप्तम्यन्तानामपि बुद्धिस्थत्वेन सप्तम्यन्तत्वस्यापि तादृशधर्मतया सप्तम्यन्तत्वरूपविशेषधर्मावच्छिन्नानामचीत्यादीनां विशेषणत्वं सूपपादमिति भाव: ।

(आक्षेपभाष्यम्)

किं पुनः सामान्यम्, को (वा[१]) विशेषः ?

(समाधानभाष्यम्)

गौः सामान्यम् । कृष्णो विशेषः ।।

(आक्षेपभाष्यम्)

---

१. क्वचिन्न ।

न तर्हीदानीं कृष्णः सामान्यम्, गौर्विशेषो भवति ?

(समाधानभाष्यम्)

भवति च ।।

(आक्षेपभाष्यम्)

यदि तर्हि सामान्यमपि विशेषो, विशेषोऽपि सामान्यम्, सामान्यविशेषौ न प्रकल्पेते ।।

(समाधानभाष्यम्)

प्रकल्पेते च ।। कथम् ? विवक्षातः ।

यदाऽस्य गौः सामान्येन विवक्षितो भवति कृष्णो विशेषत्वेन, तदा गौः सामान्यम्; कृष्णो विशेषः । यदाऽस्य कृष्णः सामान्येन विवक्षितो भवति गौर्विशेषत्वेन[१], तदा कृष्णः सामान्यम्, गौर्विशेषः ।

(दृष्टान्तान्तरभाष्यम्)

अपर आह—"प्रकल्पेते च" ।। कथम् ?

पितापुत्रवत् । तद्यथा—स एव कंचित्प्रति पिता भवति, कंचित्प्रति पुत्रो भवति । एवमिहापि स एव कंचित्प्रति सामान्यं कंचित्प्रति विशेषः । एते खल्वपि नैर्देशिकानां वार्त्ततरका भवन्ति, ये सर्वनाम्ना निर्देशाः क्रियन्ते । एतैर्हि बहुतरकं व्याप्यते ।।

(आक्षेपभाष्यम्)

अथ किमर्थमुपसर्गेण निर्देशः क्रियते ?

---

१. 'विवक्षितः' अयमंशः क्वचिदधिकः ।

विमला - अथ किमर्थमिति । उपसर्गविशिष्टस्य निर्दिष्टपदस्य ग्रहणं किमर्थमिति प्रश्नः । तस्मिन्निति पूर्वस्येत्युक्तावपि साकांक्षत्वात् पदाध्याहारेण निर्दिष्टे इति लभ्येतेतिभावः ।

(समाधानभाष्यम्)

शब्दे सप्तम्या निर्दिष्टे पूर्वस्य कार्यं यथा स्यात् । अर्थे मा भूत्—जनपदे, अतिशायन इति ।।

विमला - शब्दे सप्तम्या निर्दिष्टे इति । निर्दिष्टे इति न उच्चारिते इत्यर्थकम्, येन पदाध्याहारेण निर्दिष्टे इत्यस्य वैयर्थ्यमाशङ्क्येत । किन्तु बहिर्भूते इत्यर्थकम् । तत्र तस्मिन्नितीत्यस्याकांक्षाभावेन तदर्थकपदाध्याहाराभावेन वैयर्थ्यशङ्कानवकाश इति हृदयम् ।

(आक्षेपभाष्यम्)

किं गतमेतदुपसर्गेण, आहोस्विच्छब्दाधिक्यात्तदर्थाधिक्यम् ?

(समाधानभाष्यम्)

गतमित्याह ।। कथम् ?

निरयं बहिर्भावे वर्तते । तद्यथा— निष्क्रान्तो देशाद्दे निर्देशः । बहिर्देश इति गम्यते । शब्दश्च शब्दाद्बहिर्भूतः । अर्थोऽबहिर्भूतः ।।

(आक्षेपभाष्यम्)

अथ निर्दिष्टग्रहणं किमर्थम् ?

(४८०-समाधानवार्तिकम्-१)

।।*।। निर्दिष्टग्रहणमानन्तर्यार्थम् ।।*।।

(भाष्यम्)

निर्दिष्टग्रहणं क्रियते । 'आनन्तर्यार्थम्' । आनन्तर्यमात्रे कार्यं यथा स्यात्–''इको यणचि'' । दध्यत्र, मध्वत्र । इह मा भूत्–समिधौ समिधः । दृषदौ दृषदः ।।

(सूत्रस्य नियमार्थताधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते ?

(४८१-समाधानवार्तिकम्-२)

||||तस्मिँस्तस्मादिति पूर्वोत्तरयोर्योगा[1]ऽविशेषान्नियमार्थं वचनं दध्युदकं पचत्योदनम् ||*||*

(भाष्यम्)

तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगयोरविशेषान्नियमार्थोऽयमारम्भः । ग्रामे देवदत्तः, पूर्वः पर इति संदेहः । ग्रामाद्देवदत्तः, पूर्वः पर इति संदेहः । एवमिहापि— ''इको यणचि'' इति ।। दध्युदकम् । पचत्योदनम् ।। उभाविकौ उभावचौ । अचि पूर्वस्य, अचि परस्येति संदेहः । ''तिङ्ङतिङः'' इति । अतिङः पूर्वस्य, अतिङः परस्येति संदेहः ।। इष्यते चात्राऽचि पूर्वस्य स्यात्, अतिङश्च परस्येति । तच्चान्तरेण वचनं[2] न सिध्यतीति नियमार्थं वचनम्[3] ।। एवमर्थमिदमुच्यते ।।

(काकुभाष्यम्)

अस्ति प्रयोजनमेतत् ?

---

१. 'योगयोरवि'० । २. 'यत्नम्' । ३. 'वचनं नियमार्थम्' ।

(समाधानभाष्यम्)

किं तर्हीति ?

(आक्षेपभाष्यम्)

अथ यत्रोभयं निर्दिश्यते, किं तत्र पूर्वस्य कार्यं भवति । आहोस्वित् परस्येति ?

(४८२-समाधानवार्तिकम्-३)

||॥॥ उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देशः ॥*॥*

(भाष्यम्)

उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देशो भविष्यति ॥

(प्रश्नभाष्यम्)

किं प्रयोजनम् ?

(४८३-प्रयोजनवार्तिकम्-४)

॥॥ प्रयोजनमतो लसार्वधातुकानुदात्तत्वे ॥*॥*

(भाष्यम्)

[१]वक्ष्यति— 'तास्यादिभ्योऽनुदात्तत्वे सप्तमीनिर्देशोऽभ्यस्तासिजर्थः' इति । तस्मिन् क्रियमाणे तास्यादिभ्यः परस्य लसार्वधातुकस्य, लसार्वधातुके परतस्तास्यादीनामिति संदेहः । तास्यादिभ्यः परस्य लसार्वधातुकस्य ॥

---

१. इतः पूर्वमत्र 'अतो लसार्वधातुकानुदात्तत्वे प्रयोजनम्' इत्यंशोधिकः क्वचित् ।

(४८४-प्रयोजनवार्तिकम्-५)

॥*॥ बहोरिष्ठादीनामादिलोपे ॥*॥

(भाष्यम्)

[बहोरिष्ठादीनामादिलोपे प्रयोजनम्[१] ।] बहोरुत्तरेषामिष्ठेमेयसाम्' इष्ठेमेयःसु परतो बहोरिति संदेहः ॥ बहोरुत्तरेषामिष्ठेमेयसाम् ॥

(४८५-प्रयोजनवार्तिकम्-६)

॥*॥ गोतो णित् ॥*॥

(भाष्यम्)

[गोतो णित् प्रयोजनम्[१] ।] गोतः परस्य सर्वनामस्थानस्य, सर्वनामस्थाने परतो गोत इति संदेहः ॥ गोतः परस्य सर्वनामस्थानस्य ॥

(४८६-प्रयोजनवार्तिकम्-७)

॥*॥ रुदादिभ्यः सार्वधातुके ॥*॥

(भाष्यम्)

[रुदादिभ्यः सार्वधातुके प्रयोजनम्[१] ।] रुदादिभ्यः परस्य सार्वधातुकस्य, सार्वधातुके परतो रुदादीनामिति संदेहः ॥ रुदादिभ्यः परस्य सार्वधातुकस्य ॥

(४८७-प्रयोजनवार्तिकम्-८)

॥*॥ आने मुगीदासः ॥*॥

(भाष्यम्)

---

१. लुप्तं स्यात् ।

[आने मुगीदासः प्रयोजनम्[1] ।] आस उत्तरस्यानस्य, आने परत आस इति संदेहः । आस उत्तरस्यानस्य ।।

(४८८-प्रयोजनवार्तिकम्-९)

।।*।। आमि सर्वनाम्नः सुट् ।।*।।

(भाष्यम्)

[आमि सर्वनाम्नः सुट् प्रयोजनम्[1] ।] सर्वनाम्न उत्तरस्यामः, आमि परतः सर्वनाम्न इति संदेहः ।। सर्वनाम्न उत्तरस्यामः ।।

(४८९-प्रयोजनवार्तिकम्-१०)

।।*।। घेर्ङित्याण् नद्याः ।।*।।

(भाष्यम्)

[घेर्ङित्याणनद्याः प्रयोजनम्[1] ।] नद्या उत्तरेषां ङिताम्, ङित्सु परतो नद्या इति संदेहः ।। नद्या उत्तरेषां ङिताम् ।।

(४९०-प्रयोजनवार्तिकम्-११)

।।*।। याडापः ।।*।।

(भाष्यम्)

[याडापः प्रयोजनम्[1] ।] आप उत्तरस्य ङितः, ङिति परत आप इति संदेहः ।। आप उत्तरस्य ङितः ।।

(४९१-प्रयोजनवार्तिकम्-१२)

---

१. लुप्तं स्यात् ।

।।*।। ङमो ह्रस्वादचि ङमुण् नित्यम् ।।*।।

(भाष्यम्)

[ङमो ह्रस्वादचि ङमुण्नित्यं प्रयोजनम्[१] ।] ङम उत्तरस्याऽचः, अचि परतो ङम इति संदेहः ।। ङम उत्तरस्याचः ।।

(४९२-समाधानहेत्वनुपपत्तिवार्तिकम्-१३)

।।*।। विभक्तिविशेषनिर्देशानव-काशत्वादविप्रतिषेधः ।।*।।

(भाष्यम्)

विभक्तिविशेषनिर्देशस्यानवकाशत्वादयुक्तोऽयं विप्रतिषेधः । सर्वत्रैवाऽत्र कृतसामर्थ्या सप्तमी अकृतसामर्थ्या पञ्चमीति कृत्वा पञ्चमीनिर्देशो भविष्यति ।।

(४९३-एकदेशिनः समाधानवार्तिकम्-१४)

।।*।। यथार्थं वा षष्ठीनिर्देशः ।।*।।

(भाष्यम्)

यथार्थं वा षष्ठीनिर्देशः कर्तव्यः । यत्र पूर्वस्य कार्यमिष्यते तत्र पूर्वस्य षष्ठी कर्तव्या । यत्र परस्य कार्यमिष्यते तत्र परस्य षष्ठी कर्तव्या ।।

(आक्षेपभाष्यम्)

स तर्हि तथा निर्देशः कर्तव्यः ?

(आक्षेपनिरासैकदेशिभाष्यम्)

१. लुप्तं स्यात् ।

न कर्तव्यः। अनेनैव प्रक्लृप्तिर्भविष्यति—तस्मिन्निति निर्दिष्टे पूर्वस्य षष्ठी, तस्मादित्युत्तरस्य षष्ठीति ॥

(आक्षेपभाष्यम्)

तत्तर्हि षष्ठीग्रहणं कर्तव्यम् ?

(समाधानभाष्यम्)

न कर्तव्यम्। प्रकृतमनुवर्तते ॥

क्व प्रकृतम् ? "षष्ठी स्थानेयोगा" इति ॥

(४९४-प्रकल्पकपक्षे दूषणवार्तिकम्-१५)

॥॥ प्रकल्पकमिति चेन्नियमाऽभावः ॥*॥*

(भाष्यम्)

प्रकल्पकमिति चेन्नियमस्याऽभावः। उक्तं चैतत्-नियमार्थोऽयमारम्भ इति ॥

(दूषणान्तरभाष्यम्)

प्रत्ययविधौ खल्वपि पञ्चम्यः प्रकल्पिकाः स्युः ॥

तत्र को दोषः ?

"गुप्तिज्किद्भ्यः सन्"। गुप्तिज्किद्भ्य इत्येषा पञ्चमी सन्निति प्रथमायाः षष्ठीं प्रकल्पयेत्—'तस्मादित्युत्तरस्य' इति ॥

(दूषणान्तरबाधकभाष्यम्)

अस्तु। न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्राऽऽन्तर्यतः सनः सन्नेव भविष्यति ॥

(दूषणान्तरसाधकभाष्यम्)

नैवं शक्यम् । (तत्र[1]) इत्संज्ञा न प्रकल्पेत । उपदेश इतीत्संज्ञोच्यते ।।

(४९५-प्रकल्पकपक्षे आक्षेपान्तरवार्तिकम्-१६)

।।*।। प्रकृतिविकाराव्यवस्था च ।।*।।

(भाष्यम्)

प्रकृतिविकारयोश्च व्यवस्था न प्रकल्पते—"इको यणचि" । अचीत्येषा सप्तमी यणिति प्रथमायाः षष्ठीं प्रकल्पयेत्—"तस्मिन्निति निर्दिष्टे पूर्वस्य" इति ।।

(४९६-प्रकल्पकपक्षे आक्षेपान्तरवार्तिकम्-१७)

।।*।। सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्गः ।।*।।

(भाष्यम्)

सप्तमीपञ्चम्योश्च[2] भावादुभयत्रैव षष्ठी प्राप्नोति । 'तास्यादिभ्य' इत्येषा पञ्चमी लसार्वधातुक इत्यस्याः सप्तम्याः षष्ठीं प्रकल्पयेत्—"तस्मादित्युत्तरस्य" इति । तथा लसार्वधातुक इत्येषा सप्तमी तस्यादिभ्य इति पंचम्याः षष्ठीं प्रकल्पयेत्—"तस्मिन्निति निर्दिष्टे पूर्वस्य" इति ।।

तत्र को दोषः ? तत्रोभयकार्यप्रसङ्गः ।। तत्र उभयोः कार्यं प्राप्नोति ।।

(प्रकल्पकपक्षे दूषणोद्धारभाष्यम्)

नैष दोषः । यत्तावदुच्यते—'प्रकल्पकमिति

१. क्वचिन्न ।
२. 'पञ्चमीसप्तम्योश्च' ।

चेन्नियमाऽभावः' इति । माभून्नियमः । सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्यते, पञ्चमीनिर्दिष्टे परस्य । यावता सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्यते एवं पञ्चमीनिर्दिष्टे परस्य । नोत्सहते सप्तमीनिर्दिष्टे परस्य कार्यं भवितुं, नापि पञ्चमीनिर्दिष्टे पूर्वस्य ।।

(आक्षेपबाधकभाष्यम्)

यदप्युच्यते—"प्रत्ययविधौ खल्वपि पञ्चम्यः प्रकल्पिकाः स्युः" इति ।। सन्तु प्रकल्पिकाः ।।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्—"गुप्तिज्किद्भ्यः सन्" इत्येषा पञ्चमी सन्निति प्रथमायाः षष्ठीं प्रकल्पयेत् "तस्मादित्युत्तरस्य" इति ।।

(परिहारस्मारणभाष्यम्)

परिहृतमेतत्-न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते । तत्रान्तर्यतः सनः सन्नेव भविष्यति ।।

(परिहारबाधानुपपत्तिभाष्यम्)

ननु चोक्तम्-'नैवं शक्यमित्संज्ञा न प्रकल्पेत, उपदेश इतीत्संज्ञोच्यते' इति ।

(परिहारस्थापनभाष्यम्)

स्यादेष दोषो यदीत्संज्ञा आदेशं प्रतीक्षेत । तत्र खलु कृतायामित्संज्ञायां लोपे च कृते आदेशो भविष्यति । उपदेश इति हीत्संज्ञोच्यते ।।

(परिहारान्तरभाष्यम्)

अथ वा नानुत्पन्ने सनि प्रक्लृप्त्या भवितव्यम् । यदा चोत्पन्नः सन्, तदा कृतसामर्थ्या पञ्चमीति कृत्वा प्रक्लृप्तिर्न भविष्यति ।।

(आक्षेपान्तरबाधकभाष्यम्)

यदप्युच्यते—प्रकृतिविकाराव्यवस्था च—इति ।।

अत्रापि (कृता) प्रकृतौ षष्ठी इक इति, विकृतौ प्रथमा यणिति । यत्र च नाम सौत्री षष्ठी नास्ति, तत्र प्रक्लृप्त्या भवितव्यम् ।।

अथ वाऽस्तु तावदिको यणचीति यत्र नाम सौत्री षष्ठी ।। यदि चेदानीमचीत्येषा सप्तमी यणिति प्रथमायाः षष्ठीं प्रकल्पयेत्–'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति ।।

अस्तु । न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते । तत्राऽऽन्तर्यतो यणो यणेव भविष्यति ।।

(आक्षेपान्तरबाधकभाष्यम्)

यदप्युच्यते–सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्गः–इति ।। नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति—'नोभे युगपत्प्रकल्पिके भवतः' इति । यदयम् "एकः पूर्वपरयोः" इति पूर्वपरग्रहणं करोति ।। — तस्मिन्निति निर्दिष्टे पूर्वस्य ।।
—तस्मादित्युत्तरस्य ।।६५।।६६।।

(संज्ञासूत्रम्)

स्वं रूपं शब्दस्याशब्दसंज्ञा ।।१।१।६७।।

विमला - स्वमिति । व्यक्तिरित्यर्थः । **रूपमिति** । तत्तच्छब्दगतसामान्यमित्यर्थः । **शब्दस्येति** । शब्दपदं तत्तज्जातिविशिष्टपरम् । एवञ्च शब्दस्य स्वंरूपमित्यन्वये तत्तज्जातिविशिष्टस्य व्यक्तिः तत्तच्छब्दगतसामान्यसंज्ञकमित्यर्थः । शब्दस्य रूपं स्वमित्यन्वये तत्तज्जातिविशिष्टस्य तत्तच्छब्दगतं सामान्यं व्यक्तिसंज्ञकमित्यर्थः । उभयथापि संज्ञासंज्ञिनोः सामानाधिकरण्यात् संज्ञासूत्रत्वे न किञ्चिद्बाधकमित्यवगन्तव्यम् । अशब्दसंज्ञेत्यत्र न षष्ठीतत्पुरुषः । कर्मसंज्ञादेरर्थसंज्ञात्वेन निषेधाप्रवृत्तौ स्वरूपग्रहणापत्तेः । किन्तु शब्दपदं शब्दशास्त्रपरम् । शब्दे संज्ञेति 'सप्तमी'ति योगविभागात्समासः । शब्दशास्त्रे या संज्ञा तां विनेति तस्यार्थः ।

(अर्थवत्परिभाषा-साधनाधिकरणम्)

(आक्षेपभाष्यम्)

'रूप'ग्रहणं किमर्थम् ? न 'स्वं शब्दस्याशब्दसंज्ञा' भवतीत्येव रूपं शब्दस्य संज्ञा भविष्यति । नह्यन्यत्स्वं शब्दस्याऽस्त्यन्यदतो रूपात् ?

विमला - ननु **'उञः प्रगृह्यमि'** त्यत्रासमानाधिकरणयोरपि संज्ञासंज्ञिभावदर्शनाच्च शब्दस्य स्वमित्यन्वयेऽपि संज्ञासंज्ञिभावावगमसम्भवे स्वशब्देनात्मीयत्वपुरस्कारेण रूपप्रतीतिसम्भवे च सति रूपग्रहणं व्यर्थमित्याशङ्कते— **रूपग्रहणं किमर्थमिति** ।

(समाधानभाष्यम्)

एवं तर्हि सिद्धे सति यद्रूपग्रहणं करोति तज्ज्ञापयत्याचार्यः—अस्त्यन्यद्रूपात्स्वं शब्दस्येति ।।

किं पुनस्तत् ? अर्थः ।। किमेतस्य ज्ञापने प्रयोजनम् ? "अर्थवद्ग्रहणे नानर्थकस्य" इत्येषा परिभाषा न कर्तव्या भवति ।।

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते ?

(४९७-समाधानवार्तिकम्- १)

।।।। शब्देनार्थगतेरर्थे कार्यस्याऽसंभवात् तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वरूपवचनम् ।।*।।*

(भाष्यम्)

शब्देनोच्चारितेनार्थो गम्यते — गामानय दध्यशानेति, अर्थ आनीयते अर्थश्च भुज्यते । 'अर्थे कार्यस्याऽसंभवात्'[1] इह च व्याकरणे अर्थे कार्यस्याऽसंभवः । "अग्नेर्ढक्" इति न शक्यतेऽङ्गारेभ्यः परो ढक् कर्तुम् । शब्देनार्थगतेरर्थे कार्यस्याऽसंभवाद् यावन्तस्तद्वाचिनः शब्दास्तावद्भ्यः सर्वेभ्य उत्पत्तिः प्राप्नोति । इष्यते च तस्मादेव स्यादिति । तच्चान्तरेण यत्नं न सिध्यतीति तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वंरूपवचनम् ।। एवमर्थमिदमुच्यते ।।

(४९८-समाधाननिराकरणवार्तिकम्- २)

।।।। न वा शब्दपूर्वको ह्यर्थे संप्रत्ययस्तस्मादर्थनिवृत्तिः ।।*।।*

(भाष्यम्)

न वा एतत्प्रयोजनमस्ति ।। किं कारणम् ?

'शब्दपूर्वको ह्यर्थे संप्रत्ययः[2]' । आतश्च शब्दपूर्वकः । योऽपि ह्यसावाहूयते नाम्ना । नाम च यदानेन[3] नोपलब्धं भवति, तदा पृच्छति—'किं भवानाह' इति । शब्दपूर्वकश्चास्य संप्रत्ययः[4] ।। इह च व्याकरणे

१. 'अर्थस्याऽसम्भवात्' । २. 'ह्यर्थस्य सम्प्र०' ।
३. 'यदा तेन' । ४. 'श्चार्थस्य' ।

शब्दे कार्यस्य संभवः, अर्थेऽसंभवः । 'तस्मादर्थ-निवृत्तिः' । तस्मादर्थस्य निवृत्ति-र्भविष्यति ।।

(प्रयोजनभाष्यम्)

इदं तर्हि प्रयोजनम्—अशब्दसंज्ञेति वक्ष्यामीति । इह मा भूत्— 'दाधाघ्वदाप्' 'तरप्तमपौ घः' इति ।।

(४९९-प्रयोजननिराकरणवार्तिकम्-३)

।।*।। शब्दसंज्ञाप्रतिषेधानर्थक्यं वचनप्रामाण्यात् ।।*।।

(भाष्यम्)

शब्दसंज्ञायाः प्रतिषेधोऽनर्थकः[१] ।। शब्दसंज्ञायां स्वरूपविधिः कस्मान्न भवति ?

'वचनप्रामाण्यात्' । शब्दसंज्ञावचनसा-मर्थ्यात् ।।

(प्रयोजनसाधकयुक्तिभाष्यम्)

ननु च वचनप्रामाण्यात् संज्ञिनां संप्रत्ययः स्यात्, स्वरूपग्रहणाच्च संज्ञायाः ।।

(प्रयोजनबाधकभाष्यम्)

एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्ति-र्ज्ञापयति—शब्दसंज्ञायां न स्वरूपविधिर्भवतीति । यदयम्—"ष्णान्ता षट्" इति षकारान्तायाः संख्यायाः षट्संज्ञां शास्ति । इतरथा हि वचनप्रामाण्याच्च नकारान्तायाः संख्यायाः संप्रत्ययः स्यात्, स्वरूपग्र-हणाच्च षकारान्तायाः ।।

१. 'शब्दसंज्ञा प्रतिषेधश्चाऽनर्थकः' ।

(प्रयोजनसाधकभाष्यम्)

नैतदस्ति ज्ञापकम् । न हि षकारान्ता संज्ञाऽस्ति ।। का तर्हि ? डकारान्ता ।।

(प्रयोजनबाधकभाष्यम्)

असिद्धं जश्त्वम् । तस्याऽसिद्धत्वात् षकारान्ता ।।

(प्रयोजनदर्शिभाष्यम्)

[१]मन्त्राद्यर्थं तर्हीदं वक्तव्यम् । मन्त्रे, ऋचि, यजुषीति यदुच्यते, तन्मन्त्रशब्दे ऋक्शब्दे यजुःशब्दे च मा भूत् ।।

विमला - मन्त्राद्यर्थमिति । शब्दस्य संज्ञा शब्दसंज्ञेत्यभिमानेनेदम् ।

(५००-प्रयोजननिराकरणवार्तिकम्-४)

।।।। मन्त्राद्यर्थमिति चेच्छास्त्रसामर्थ्यादर्थगतेः सिद्धम् ।।*।।*

(भाष्यम्)

मन्त्राद्यर्थमिति चेत् । तन्न ।। किं कारणम् ?

शास्त्रस्य सामर्थ्यादर्थस्य गतिर्भविष्यति । मन्त्रे ऋचि यजुषीति यदुच्यते, मन्त्रशब्दे ऋक्शब्दे च यजुश्शब्दे च तस्य कार्यस्य सम्भवो नास्तीति कृत्वा मन्त्रादिसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात् ।।

(न्यूनतानिराकरणाधिकरणम्)

(५०१-आक्षेपवार्तिकम्-५)

---

१. इतः पूर्वं 'मन्त्राद्यर्थम्' इति वार्तिकं लुप्तं स्यात् ।

।।*।। सित्तद्विशेषाणां वृक्षाद्यर्थम् ।।*।।

(भाष्यम्)

सिन्निर्देशः कर्त्तव्यः। ततो वक्तव्यं— 'तद्विशेषाणां ग्रहणं भवति' इति ।। किं प्रयोजनम् ?

'वृक्षाद्यर्थम्' । 'विभाषा वृक्षमृगे' ति । प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः ।।

विमला - तद्विशेषाणां ग्रहणं भवतीति । लक्ष्यानुसारि व्याख्यानेन तद्विशेषग्रहणे तु सूत्रविषयेऽपि लक्ष्यानुसारि व्याख्यानेनेष्टसिद्धौ सूत्रस्यापि प्रत्याख्यानमेव वरम् ।

(५०२-आक्षेपवार्तिकम्-६)

।।*।। पित्पर्यायवचनस्य च स्वाद्यर्थम् ।।*।।

(भाष्यम्)

पिन्निर्देशः कर्त्तव्यः । ततो वक्तव्यं– 'पर्यायवचनस्य च तद्विशेषाणां च ग्रहणं भवति स्वस्य च रूपस्य' इति ।। किं प्रयोजनम् ?

'स्वाद्यर्थम्' ।। 'स्वे पुषः' ।। स्वपोषं पुष्यति । रैपोषम् । धनपोषम् । विद्यापोषम् । गोपोषम् । अश्वपोषम्[१] ।

(५०३-आक्षेपवार्तिकम्-७)

।।*।। जित्पर्यायवचनस्यैव राजाद्यर्थम् ।।*।।

(भाष्यम्)

जिन्निर्देशः कर्त्तव्यः । ततो वक्तव्यम्— 'पर्यायवचनस्यैव ग्रहणं भवति' इति ।।

---

१. 'धनपोषम् । अश्वपोषम् । गोपोषम् ।' इति क्व० ।

किं प्रयोजनम् ?

'राजाद्यर्थम्' । "सभा राजामनुष्यपूर्वा" । इनसभम् ईश्वरसभम् ।। तस्यैव न भवति—राजसभा ।। तद्विशेषाणां च न भवति—पुष्यमित्रसभा, चन्द्रगुप्तसभा ।।

(५०४-आक्षेपवार्तिकम्-८)

।।*।। झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम् ।।*।।

(भाष्यम्)

झिन्निर्देशः कर्तव्यः । ततो वक्तव्यम्—तस्य च ग्रहणं भवति तद्विशेषाणां चेति ।।

किं प्रयोजनम् ?

'मत्स्याद्यर्थम्' । "पक्षिमत्स्यमृगान् हन्ति" । मात्सिकः । तद्विशेषाणाम्—शाफरिकः । शाकुलिकः । पर्यायवचनानां न भवति—अजिह्मान् हन्ति, अनिमिषान् हन्तीति ।। अस्यैकस्य पर्यायवचनस्येष्यते —मीनान् हन्ति मैनिकः ।।

—स्वं रूपं शब्दस्याशब्दसंज्ञा ।।६७।।

विमला - नित्यपदस्य प्रायिकार्यकत्वस्य 'नित्यवीप्सयोरि' त्यादौ दृष्टत्वेन ङमुट्शास्त्रे नित्यपदस्यापि प्रायिकार्थकत्वेन नात्र ङमुट् । यत्तु सौत्रत्वान्नात्र ङमुडिति तन्न । सौत्रत्वाल्लक्षणबाधस्थले सौत्रोऽयं निर्देश इति लेखस्य भाष्यकृच्छैलीसिद्धतया अत्र तथानभिधानेन सौत्रत्वकल्पनाया अनुचितत्वात् ।। 'अल्पाच्तरमि' त्यत्र तथानभिधानेऽपि वृद्धिरादैजित्यत्रेव अस्मयादित्वकल्पनयैव तत्र कुत्वाभावस्योपपत्तेः । पतधातोर्निष्ठायां प्राप्तस्यापि यस्य विभाषेति निषेधस्य पतितेति निर्देशेनाप्रवृत्तिरिव 'अणिनुणः' 'अणिञोरनार्षयोः' 'इणजादिभ्यः' इत्यादिनिर्देशैः ङकारनिमित्तकङमुडागमस्य

सर्वत्रैवाप्रवृत्तिरिति **दाधिमथाः** । एभिर्निर्देशैर्ङमुडागमस्यानित्यत्वकल्पनमेव समुचित-मित्यपि केचित् ।

(ग्रहणकसूत्रम्)

अणुदित्सवर्णस्य चाऽप्रत्ययः ।।१।१।६८।।

(भाव्यमानेनेतिपरिभाषाज्ञापनाधिकरणम्)

(आक्षेपभाष्यम्)

अप्रत्यय इति किमर्थम् ?

(समाधानभाष्यम्)

"सनाशंसभिक्ष उः" "अ सांप्रतिके" ।।

(आक्षेपभाष्यम्)

अत्यल्पमिदमुच्यते–अप्रत्यय इति । "अप्रत्यया-देशटित्किन्मितः" इति वक्तव्यम् ।। प्रत्यये-उदाहृतम् ।। आदेशे–"इदम् इश्" इतः, इह ।। टिति–लविता, लवितुम् । किति—बभूव । मिति-हे अनड्वन् ।।

विमला - प्रत्ययपदस्य रूढार्थाभिप्रायेणाऽऽह—**अत्यल्पमिदमिति** । **अप्रत्यया-देशटित्किन्मित इति** । वार्तिकमिदं **भाष्यकारस्यैवेति** प्रतीयते । अणुदित्सूत्रे **शेखरे** 'प्रत्ययपदस्य तदर्थत्वन्तु न युक्तम्, वार्तिककृता टित्किन्मित्सूपसंख्यानोक्तेः, भाष्यकृता च अप्रत्ययग्रहणमेतत्परिभाषाज्ञापकमित्युक्तेरिति भाष्यवार्तिककृतोर्द्वयोरुपन्यासः कथं कृत इति स एव जानाति । **किति बभूवेति** । अत्र वुक् अनुनासिकोऽपि स्यादिति भावः ।

(टिद्ग्रहणवैयर्थ्यसाधकभाष्यम्)

टितः परिहारः—आचार्यप्रवृत्तिर्ज्ञापयति–"न टिता

सवर्णानां ग्रहणं भवति' इति । यदयम्—ग्रहोऽलिटि दीर्घत्वं[1] शास्ति ।।

विमला - दीर्घत्वं शास्तीति । आर्धधातुकस्येड्वलादेरित्यनेनैव सवर्णग्राहक[illegible]बलेन पर्यायेण दीर्घोऽपि भविष्यत्येवेति दीर्घविधानं ज्ञापकं न टिता सवर्णानां ग्रहणं भवतीत्यर्थस्य ।

(ज्ञापकत्वनिराकरणभाष्यम्)

नैतदस्ति ज्ञापकम् । नियमार्थमेतत् स्यात्—ग्रहोऽलिटि दीर्घ एवेति ।।

(ज्ञापकान्तरभाष्यम्)

यत्तर्हि "वृतो वा" इति विभाषां शास्ति ।।

(पर्युदासवैयर्थ्यपरिहारभाष्यम्)

सर्वेषामेव परिहारः—'भाव्यमानेन सवर्णानां ग्रहणं न' इत्येवं न भविष्यति ।।

विमला - सर्वेषामिति । प्रत्ययादेशटित्किन्मितामित्यर्थः । **परिहार इति** । एवञ्च अप्रत्यय इति, अप्रत्ययादेशटित्किन्मित इति वा पर्युदासो न कर्तव्य इति भावः ।

(पर्युदासवैयर्थ्यभाष्यम्)

प्रत्यये भूयान् परिहारः--अनभिधानात्प्रत्ययः सवर्णान् न ग्रहीष्यति । यान् हि प्रत्ययः सवर्णान्[2] गृह्णीयाद् न तैरर्थस्याभिधानं स्यात् । अनभिधानान्न भविष्यति ।।

विमला - भूयानिति । भाव्यमानेनेति परिभाषया अनभिधानेन चेत्यर्थः । परिभाषया परिहारः पूर्वमुक्तः अनभिधानेनाह—**अनभिधानादिति** ।

---

१. 'दीर्घ इति दीर्घत्वं' ।

२. 'सवर्णग्रहणेन गृह्णीयात्' इति क्व० ।

(प्रयोजनभाष्यम्)

इदं तर्हि प्रयोजनम्—इह केचित्प्रतीयन्ते, केचित्प्रत्याय्यन्ते । ह्रस्वाः प्रतीयन्ते दीर्घाः प्रत्याय्यन्ते । यावच्च ब्रूते[1]—प्रत्याय्यमानेन सवर्णानां ग्रहणं नेति, तावदप्रत्यय इति ।।

विमला - प्रत्ययपदस्य प्रत्याय्यमानार्थकत्वाभिप्रायेणाह—**इदं तर्हि प्रयोजनमिति** । **यावदिति** । यावदर्थमित्यर्थः ।

(आक्षेपभाष्यम्)

कं पुनर्दीर्घः सवर्णग्रहणेन गृह्णीयात् ?

(प्रयोजनसाधकभाष्यम्)

ह्रस्वम् ।।

(प्रयोजननिराकरणभाष्यम्)

यत्नाधिक्यान्न ग्रहीष्यति ।।

(प्रयोजनसाधकभाष्यम्)

प्लुतं तर्हि गृह्णीयात् ।।

(प्रयोजननिराकरणभाष्यम्)

अनणुत्वान्न ग्रहीष्यति ।।

(सिद्धान्तप्रयोजनभाष्यम्)

एवं तर्हि सिद्धे सति यद् 'अप्रत्ययः' इति प्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यो-भवत्येषा परिभाषा-"भाव्यमानेन सवर्णानां ग्रहणं न" इति ।।

---

१. 'यावद्ब्रूयत्' ।

विमला - तज्ज्ञापयतीति । 'ज्यादादीयस' इतिसूत्रे दीर्घग्रहणेन ज्ञापयिष्यमाणामेव परिभाषाम् इदमपि स्थालीपुलाकन्यायेन बोधयतीत्यर्थः । न तु व्यर्थीभूयाऽपूर्वां तां बोधयतीत्यर्थः । एवञ्च ज्ञापनोत्तरं स्वांशे चारितार्थ्यविरहेऽपि न क्षतिरिति बोध्यम् ।

(अण्ग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते ?

(५०५-समाधानवार्तिकम्-१)

॥*॥ अण् सवर्णस्येति स्वरानुनासिक्यकालभेदात् ॥*॥

(भाष्यम्)

अण् सवर्णस्येत्युच्यते । स्वरभेदादानुनासिक्यभेदात् कालभेदाच्चाण् सवर्णान्न गृह्णीयात् । इष्यते च ग्रहणं स्यादिति । तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमिदमुच्यते ॥

(प्रश्नोत्तरभाष्यम्)

अस्ति प्रयोजनमेतत् ?

किं तर्हीति ॥

(५०६-आक्षेपवार्तिकम्-२)

॥*॥ तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशात् ॥*॥

(भाष्यम्)

तत्र प्रत्याहारग्रहणे सवर्णानां ग्रहणं न प्राप्नोति— 'अकः सवर्णे दीर्घः' इति ॥

किं कारणम् ? 'अनुपदेशात्' । यथाजातीयकानां संज्ञा कृता तथाजातीयकानां संप्रत्यायिका स्यात् । ह्रस्वानां च क्रियते ह्रस्वानामेव संप्रत्यायिका स्याद् दीर्घाणां न स्यात् ।

(आक्षेपभाष्यम्)

ननु च ह्रस्वाः प्रतीयमाना दीर्घान् संप्रत्याययिष्यन्ति ।।

(५०७-आक्षेपसाधकवार्तिकम्-३)

।।।। ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणशब्दसंप्रत्यायकत्वाच्छब्दस्याऽवचनम् ।।*।।*

(भाष्यम्)

ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणः शब्दः संप्रत्यायको भवति, न संप्रतीयमानः । तद्यथा—ऋगित्युक्ते संपाठमात्रं गम्यते, नास्या अर्थो गम्यते ।।

विमला - संपाठमात्रमिति । संपठ्यते इति संपाठः । बहुलकात्कर्मणि घञ् । शब्दमात्रमित्यर्थः । अत एव ऋचं वेत्तीत्यादौ शब्दविशेषं वेत्तीत्येवार्थो न तु तदर्थं वेत्तीति ।

(समाधानभाष्यम्)

एवं तर्हि वर्णपाठ एवोपदेशः करिष्यते ।।

(५०८-समाधानबाधकवार्तिकप्रथमखण्डम्-४)

।।।। वर्णपाठ[1] उपदेश इति चेदवरकालत्वात् परिभाषाया अनुपदेशः ।।*।।*

---

१. 'वर्णपाठक्रम' इति क्वचित् ।

(भाष्यम्)

वर्णपाठ[1] उपदेश इति चेदवरकालत्वात् परिभाषाया अनुपदेशः ।।

विमला - परिभाषाया इति । संज्ञाया इत्यर्थः । अनुपदेश इति । अप्रत्यायनमित्यर्थः ।

(आक्षेपभाष्यम्)

किं परा सूत्रात् क्रियत इत्यतोऽवरकाला ?

(समाधानभाष्यम्)

नेत्याह । सर्वथाऽवरकालैव । वर्णानामुपदेशस्तावत् । उपदेशोत्तरकालेत्संज्ञा । इत्संज्ञोत्तरकाल "आदिरन्त्येन सहेता" इति प्रत्याहारः । प्रत्याहारोत्तरकाला सवर्णसंज्ञा ।। सवर्णसंज्ञोत्तरकालम् "अणुदित्सवर्णस्य चाप्रत्ययः" इति । सैषाऽवरकाला । उपदेशोत्तरकाला वर्णानामुत्पत्तौ[2] निमित्तत्वाय कल्पयिष्यत इत्येतन्न ।

विमला - उपदेशोत्तरकालेति । वर्णोपदेशोत्तरकालेत्यर्थः ।

(५०८-समाधानबाधकवार्तिकद्वितीयखण्डम्-४)

|||| तस्मादुपदेशः ||*||*

(भाष्यम्)

तस्मादुपदेशः कर्तव्यः ।।

(अणग्रहणप्रत्याख्यानाधिकरणम्)

---

१. 'वर्णपाठक्रम' इति क्वचित् ।

२. 'सैषोपदेशोत्तरकालाऽवरकाला सतीवर्णानानुत्पत्तौ' इति क्व० ।

(५०९-आक्षेपवार्तिकम्-५)

॥*॥ तत्रानुवृत्तिनिर्देशे सवर्णाऽग्रहणमनण्त्वात् ॥*॥

(भाष्यम्)

तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति— "अस्य च्वौ" "यस्येति च" ॥

किं कारणम् ? 'अनण्त्वात्' । नह्येतेऽणो येऽनुवृत्तिनिर्देशे ॥ के तर्हि ? येऽक्षरसमाम्नाय उपदिश्यन्ते ॥

(आक्षेपबाधकभाष्यम्)

एवं तर्ह्यनण्त्वादनुवृत्तौ न, अनुपदेशाच्च प्रत्याहारे न । उच्यते चेदम्— अण् सवर्णान् गृह्णातीति । तत्र वचनाद्भविष्यति ॥

(५१०-आक्षेपसाधकवार्तिकम्-६)

॥*॥ वचनाद्यत्र तन्नास्ति ॥*॥

(भाष्यम्)

नेदं वचनाल्लभ्यम् । अस्ति ह्यन्यदेतदस्य वचने प्रयोजनम् ॥ किम् ?

य एते प्रत्याहाराणामादितो वर्णास्तैः सवर्णानां ग्रहणं यथा स्यात् ॥

(समाधानान्तरभाष्यम्)

एवं तर्हि—

(५११-सिद्धान्तसमाधान-अणप्रत्याख्यानवार्तिकम्-७)

।।*।। *सवर्णेऽण्ग्रहणमपरिभाष्य-माकृतिग्रहणात्* ।।*।।

(भाष्यम्)

सवर्णेऽण् ग्रहणमपरिभाष्यम् ।। कुतः ? 'आकृतिग्रहणात्' । अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिस्तथोवर्णाकृतिः ।।

(आक्षेपभाष्यम्)

ननु चान्याऽऽकृतिरकारस्यान्याऽऽकारस्य[1] च ।।

(५११-समाधानवार्तिकद्वितीयखण्डम्)

।।*।। *अनन्यत्वाच्च* ।।*।।

(भाष्यम्)

अनन्याकृतिरकारस्याकारस्य च ।।

(५११-समाधानसाधकवार्तिकतृतीयखण्डम्)

।।*।। *अनेकान्तो ह्यनन्यत्वकरः* ।।*।।

(भाष्यम्)

यो ह्यनेकान्तेन भेदो नासावन्यत्वं करोति । तद्यथा—न यो गोश्च गोश्च भेदः सोऽन्यत्वं करोति । यस्तु खलु गोश्चाश्वस्य च भेदः सोऽन्यत्वं करोति ।।

(भाष्यम्)

---

१. क्वचिदन्या नास्ति ।

अपर आह—

(वार्तिकपाठान्तरम्)

||||[1]सवर्णोऽण्ग्रहणमपरिभाष्य-
माकृतिग्रहणादनन्यत्वम् ||*||*

(भाष्यम्)

सवर्णेऽण् ग्रहणमपरिभाष्यम् । आकृतिग्रहणा-दनन्यत्वं भविष्यति ।। अनन्याऽऽकृतिरकारस्याकारस्य च ।।

(वार्तिकपाठान्तरखण्डम्)

|||| अनेकान्तो ह्यनन्यत्वकरः ||*||*

(भाष्यम्)

यो ह्यनेकान्तेन भेदो नासावनन्यत्वं करोति । तद्यथा—न यो गोश्च गोश्च भेदः सोऽन्यत्वं करोति । यस्तु खलु गोश्चाश्वस्य च भेदः सोऽन्यत्वं करोति ।।

(५१२-सिद्धान्तिवार्तिकम्-८)

|||| तद्वच्च हल्ग्रहणेषु[2] ||*||*

(भाष्यम्)

एवं च कृत्वा हल्ग्रहणेषु सिद्धं भवति—"झलो झलि" । अवात्ताम् अवात्तम् अवात्त । यत्रैतन्नास्ति—अण् सवर्णान् गृह्णातीति ।।

(५१३-सिद्धान्तसाधकवार्तिकखण्डम्-९)

|||| अनेकान्तो ह्यनन्यत्वकरः ||*||*

१. क्वचित् 'सवर्णेऽण्' । २. 'तद्वद्धलग्र०' क्व० ।

(भाष्यम्)

इत्युक्तार्थम् ।।

(५१४-सिद्धान्तसाधकवार्तिकम्-१०)

।।।। द्रुतविलम्बितयोश्चानुपदेशात् ।।*।।*

(भाष्यम्)

द्रुतविलम्बितयोश्चानुपदेशान्मन्यामहे— 'आकृतिग्रहणात् सिद्धम्' इति । यदयं कस्यांचिद् वृत्तौ वर्णानुपदिश्य सर्वत्र कृती भवति ।।

(काकुप्रश्नोत्तरभाष्यम्)

अस्ति प्रयोजनमेतत् ? किं तर्हीति ?

(वृत्तिपृथक्त्वाधिकरणम्)

(५१५-आक्षेपवार्तिकप्रथमखण्डम्-११)

।।।। वृत्तिपृथक्त्वं तु नोपपद्यते ।।*।।*

(भाष्यम्)

वृत्तेस्तु पृथक्त्वं नोपपद्यते ।।

(५१५-आक्षेपवार्तिकद्वितीयखण्डम्)

।।।। तस्मात्तत्र तपरनिर्देशात्सिद्धम् ।।*।।*

(भाष्यम्)

तस्मात्तत्र तपरनिर्देशः कर्तव्यः ।।

(समाधानभाष्यम्)

न कर्तव्यः । क्रियते न्यास एव— "अतो भिस ऐस्" इति ।। –अणुदित्सवर्णस्य चाप्रत्ययः ।।६८।।

(तपरसंज्ञासूत्रम्)

तपरस्तत्कालस्य ।।१।१।६९।।

(तत्कालपदसाधनाधिकरणम्)

(आक्षेपभाष्यम्)

अयुक्तोऽयं निर्देशस्तत्कालस्येति[१] । तदित्यनेन कालः प्रतिनिर्दिश्यते, तदित्ययं च वर्णः । तत्रायुक्तं वर्णस्य कालेन सह सामानाधिकरण्यम् ।।

(प्रत्याक्षेपभाष्यम्)

कथं तर्हि निर्देशः कर्तव्यः ?

(प्रत्याक्षेपसमाधानभाष्यम्)

तत्कालकालस्येति ।।

(आक्षेपभाष्यम्)

किमिदं तत्कालकालस्येति ?

(समाधानभाष्यम्)

तस्य कालस्तत्कालः । तत्कालः कालो यस्येति सोऽयं तत्कालकालस्तत्कालकालस्येति ।।

(तटस्थाक्षेपभाष्यम्)

स तर्हि तथा निर्देशः कर्तव्यः ।।

(सिद्धान्तिसमाधानभाष्यम्)

न कर्तव्यः । उत्तरपदलोपोऽत्र द्रष्टव्यः । तद्यथा— उष्ट्रमुखमिव मुखं यस्य सोऽयमुष्ट्रमुखः । खरमुखः । एवं तत्कालकालस्तत्कालस्तत्कालस्येति ।।

---

१. 'तत्कालस्येति' क्वचिन्न ।

(समाधानान्तरभाष्यम्)

अथ वा साहचर्यात्ताच्छब्द्यं भविष्यति । कालसहचरितो वर्णोऽपि काल एव ॥

(विध्यर्थत्वनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरिदं नियमार्थम् अहोस्वित् प्रापकम् ?

(प्रत्याक्षेपभाष्यम्)

कथं च नियमार्थं स्यात् ? कथं वा प्रापकम् ?

(प्रत्याक्षेपसमाधानभाष्यम्)

यद्यत्राऽणूग्रहणमनुवर्तते ततो नियमार्थम् । अथ निवृत्तम्, ततः प्रापकम् ॥

(विशेषजिज्ञासाभाष्यम्)

कश्चात्र विशेषः ?

(५१६-नियमपक्षे दूषणवार्तिकम्-१)

॥॥ तपरस्तत्कालस्येति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नाऽग्रहणम् ॥*॥*

(भाष्यम्)

"तपरस्तत्कालस्य" इति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नानां ग्रहणं न प्राप्नोति ॥ केषाम् ? उदात्तानुदात्तस्वरितानुनासिकानाम् ॥

(प्रापकपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि प्रापकम् ॥

(५१७-प्रापकपक्षे दूषणवार्तिकम्- २)

।।।। प्रापकमिति चेद् ह्रस्वग्रहणे दीर्घप्लुतप्रतिषेधः ।।*।।*

(भाष्यम्)

प्रापकमिति चेद् ह्रस्वग्रहणे दीर्घप्लुतयोः प्रतिषेधो वक्तव्यः ।।

(समाधानभाष्यम्)

न वक्तव्यः ।

(५१८-समाधानवार्तिकम्- ३)

।।।। विप्रतिषेधात् सिद्धम् ।।*।।*

(भाष्यम्)

अण् सवर्णान् गृह्णातीत्येतदस्तु ''तपरस्तत्कालस्य'' इति वा । ''तपरस्तत्कालस्य'' इत्येतद्भवति विप्रतिषेधेन ।। अण् सवर्णान् गृह्णातीत्यस्यावकाशः— ह्रस्वा अतपरा अणः । 'तपरस्तत्कालस्य' इत्यस्यावकाशः—दीर्घास्तपराः । ह्रस्वेषु तपरेषूभयं प्राप्नोति । ''तपरस्तत्कालस्य'' इत्येतद्भवति विप्रतिषेधेन ।।

(स्फोटस्यैकत्वनिरूपणाधिकरणम्)

(भाष्यम्)

यद्येवम्—

(५१९-आक्षेपवार्तिकम्- ४)

।।।। द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात् ।।*।।*

(भाष्यम्)

द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यम् । तथा मध्यमायां द्रुतविलम्बितयोः । तथा विलम्बितायां द्रुतमध्यमयोः ।। किं पुनः कारणं न सिध्यति[1] ?

'कालभेदात्' । ये हि द्रुतायां वृत्तौ वर्णास्त्रिभागाधिकास्ते मध्यमायाम् । ये च मध्यमायां वर्णास्त्रिभागाऽधिकास्ते विलम्बितायाम् ।

(५२०-समाधानवार्तिकप्रथमखण्डम्-५)

।।*।। सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराऽचिरवचनाद् वृत्तयो विशिष्यन्ते ।।*।।

(भाष्यम्)

सिद्धमेतत् ।। कथम् ? अवस्थिता वर्णा द्रुतमध्यमविलम्बितासु ।। किं कृतस्तर्हि वृत्तिविशेषः ?

वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते । वक्तैव कश्चिदाश्वभिधायी भवति, आशु वर्णानभिधत्ते कश्चिच्चिरेण कश्चिच्चिरतरेण [कश्चिच्चिरतमेन[2]] । तद्यथा — तमेवाध्वानं कश्चिदाशु गच्छति, कश्चिच्चिरेण[3] कश्चिच्चिरतरेण[3] । [कश्चिच्चिरतमेन[2]] । रथिक आशु गच्छति, आश्विकश्चिरेण, पदातिश्चिरतरेण [शिशुश्चिरतमेन[2]] ।।

(समाधानबाधकभाष्यम्)

---

१. 'सिद्ध्यन्ति' । २. क्वचिन्न ।
३. क्वचिदत्र 'गच्छती'ति अधिकः ।

विषम उपन्यासः । अधिकरणमत्राध्वा व्रजिक्रियायाः[1] । तत्राऽयुक्तं यदधिकरणस्य वृद्धिह्रासौ स्याताम् ।।

(समाधानसाधकभाष्यम्)

एवं तर्हि—स्फोटः शब्दः । ध्वनिः शब्दगुणः ।।

(आक्षेपभाष्यम्)

कथम् ?

(५२०-समाधानवार्तिकदृष्टान्तखण्डम्)

।।।।भेर्याघातवत् ।।*।।*

(भाष्यम्)

तद्यथा—भेर्याघातः भेरीमाहत्य कश्चिद्विंशतिपदानि गच्छति, कश्चित्त्रिंशत्, कश्चिच्चत्वारिंशत् । स्फोटस्तावानेव भवति । ध्वनिकृता वृद्धिः ।।

ध्वनिः स्फोटश्च शब्दानां
ध्वनिस्तु खलु लक्ष्यते ।
अल्पो महांश्च केषांचि-
दुभयं तत्स्वभावतः ।।१।।

—तपरस्तत्कालस्य ।।६९।।

विमला - वृत्ताविति । वृत्तिशब्देनाऽत्र यत्नो विवक्षितः । **वृत्तिविशेष इति** । यत्नविशेष इत्यर्थः । **वृत्तयो विशेष्यन्ते** । यत्ना भिद्यन्ते । **ध्वनिःस्फोटश्चेति** । स्त इति शेषः । कश्चिच्छब्दः ध्वनिरूपो भवति । कश्चित् स्फोटरूपो भवतीत्यर्थः ।

१. 'व्रजतिक्रियायाः' ।

शब्दानामिति । अत्र निर्द्धारणे षष्ठी । ध्वनिस्फोटात्मकानां शब्दानां मध्ये इत्यर्थः । ध्वनिः अल्पोमहांश्च लक्ष्यते इत्यन्वयः । **लक्ष्यते इति** । प्रतीयते इत्यर्थः । स्फोटस्तु तथा न प्रतीयते इति विशेषः तुना बोध्यते । **केषांचिदिति** । योगेन प्राप्तवैभवानां योगिनामित्यर्थः । **उभयमिति** । ध्वनिस्फोटावित्यर्थः । लक्ष्यते इत्यध्याहारः । **स्वभावत इति** । स्वस्य यो भावः । योगसहायेन जनितो धर्मविशेषः तस्मादित्यर्थः ।

(प्रत्याहारसंज्ञासूत्रम्)

आदिरन्त्येन सहेता ।।१।१।७०।।

(संज्ञिनिरूपणाधिकरणम्)

(५२१-आक्षेपवार्तिकम्-१)

।।*।। आदिरन्त्येन सहेतेत्यसंप्रत्ययः संज्ञिनोऽनिर्देशात् ।।*।।

(भाष्यम्)

आदिरन्त्येन सहेतेति असंप्रत्ययः ।। किं कारणम् ?। 'संज्ञिनोऽनिर्देशात्' । नहि संज्ञिनो निर्दिश्यन्ते ।।

(५२२-न्यासान्तरेण समाधानवार्तिकम्-२)

।।*।। सिद्धं त्वादिरिता सह तन्मध्यस्येति वचनात् ।।*।।

(भाष्यम्)

सिद्धमेतत् ।। कथम् ? आदिरन्त्येन सहेता गृह्यमाणः स्वस्य च रूपस्य ग्राहकस्तन्मध्यानां[1] चेति वक्तव्यम् ।।

---

१. 'तन्मध्यपतितानां' इति क्वचित् ।

(५२३-यथान्यासेनैव समाधानवार्तिकम्-३)

॥*॥ संबन्धिशब्दैर्वा तुल्यम् ॥*॥

(भाष्यम्)

संबन्धिशब्दैर्वा तुल्यमेतत्। तद्यथा— संबन्धिशब्दाः-मातरि वर्तितव्यम्, पितरि शुश्रूषितव्यमिति। न चोच्यते—स्वस्यां मातरि, स्वस्मिन् पितरीति। संबन्धाच्च गम्यते—या यस्य माता, यो[1] यस्य पितेति। एवमिहाप्यादिरन्त्य इति संबन्धिशब्दावेतौ। तत्र संबन्धादेतद्गन्तव्यम्—यं प्रति य आदिरन्त्य इति च भवति, तस्य ग्रहणं भवति, स्वस्य च रूपस्येति॥ —आदिरन्त्येन सहेता॥७०॥

(संज्ञासूत्रम्)

येन विधिस्तदन्तस्य ॥१।१।७१॥

(तदन्तविधिविषयनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

इह कस्मान्न भवति-"इको यणचि"। दध्यत्र मध्वत्र?

विमला - इह कस्मान्नेति। येनेत्यत्र कर्तृतृतीयाभिमानेन शङ्का। इक इत्यादेरुद्देश्यस्यापि वैवक्षिकं विधानकर्तृत्वमस्तीत्यभिप्रायः।

(समाधानभाष्यम्)

अस्तु। अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति॥

---

१. 'यश्च'।

(अनिष्टापत्तिभाष्यम्)

नैवं शक्यम् । ये अनेकालं आदेशास्तेषु दोषः स्यात्—"एचोऽयवायावः" इति ।।

(अनिष्टापत्तिनिराकरणभाष्यम्)

नैष दोषः । यथैव प्रकृतितस्तदन्तविधिर्भवति एवमादेशतोऽपि भविष्यति । तत्रैजन्तस्याऽयाद्यन्ता आदेशा भविष्यन्ति ।।

(आक्षेपभाष्यम्)

यदि चैवं क्वचिद्द्वैरूप्यं तत्र दोषः स्यात्—ब्रह्मेन्द्रः ब्रह्मोदनः ब्रह्मोदकम् ।।

(आक्षेपान्तरभाष्यम्)

अपि चान्तरङ्गबहिरङ्गे न प्रकल्पेयाताम् ।।

तत्र को दोषः ? स्योनः स्योना । अन्तरङ्गलक्षणस्य यणादेशस्य बहिरङ्गलक्षणो गुणो बाधकः प्रसज्येत । ऊनशब्दमाश्रित्य[1] यणादेशो, नशब्दमाश्रित्य गुणः ।।

विमला - अन्तरङ्गलक्षणस्येति । अन्तरङ्गलक्षणत्वेनाभिमतस्येत्यर्थः । बहिरङ्गलक्षण इति । बहिरङ्गलक्षणत्वेनाभिमत इत्यर्थः । अयम्भावः । सिद्धान्ते सिव्धातोर्नप्रत्यये सिव्नेत्यवस्थायां गुणवलोपोठाम्प्रसङ्गे अपवादत्वाद्वलोपं नित्यत्वाद्गुणञ्च बाधित्वोठि कृते यण्गुणयोः प्राप्तौ अन्तरङ्गत्वाद्यणि स्यूनेत्यवस्थायां सार्वधातुकार्धधातुकयोरिति गुणे स्योन इति सिद्ध्यति । गुणस्तु न नित्यः, ऊठि सति यणा बाधितत्वेन बाधकाबाधितफलोपहितप्रसङ्गाभावात् । अधुना यणः ऊनशब्दाश्रितत्वेन नशब्दमात्राश्रितगुणमपेक्ष्य बहिरङ्गत्वेनोठि कृतेऽपि अन्तरङ्गत्वाद्यणं प्रबाध्य प्रसक्तस्य

१. 'शब्दं ह्याश्रित्य' ।

गुणस्य बाधकाबाधितफलोपहितप्रसङ्गसम्भवेन गुणस्यापि नित्यत्वेनोठो बाधकत्वव्यवस्थानापत्त्या परत्वेन लघूपधगुणस्य चापत्त्या स्योन इति न सिद्ध्येदिति ।

(आक्षेपान्तरभाष्यम्)

अल्विधिश्च न प्रकल्पेत—द्यौः पन्थाः स इति ।।

विमला - अल्विधिश्च न प्रकल्पेतेति । एवञ्चानल्विधाविति निषेधस्य निर्विषयत्वापत्तौ द्यौः, पन्थाः इत्यादौ सुलोपापत्तिरिति भावः ।

(न्यासान्तरोपसंहारभाष्यम्)

तस्मात्-"प्रकृते तदन्तविधिः" इति वक्तव्यम् ।।

विमला - प्रकृते तदन्तविधिरिति । विशेष्ये इति शेषः। एवञ्च प्रस्तुते विशेष्ये सति विशेषणं स्वबोध्यार्थनिष्ठचरमावयवतानिरूपकस्य संज्ञेत्यर्थः । इको यणचीत्यादौ विशेष्यस्याप्रस्तुतत्वान्न तदन्तविधिरिति भावः ।

(न्यासान्तरनिराकरणभाष्यम्)

न वक्तव्यम् । येनेति करण एषा तृतीया । अन्येन चाऽन्यस्य विधिर्भवति । तद्यथा—देवदत्तस्य समाशं शरावैरोदनेन च यज्ञदत्तः प्रतिविधत्ते । यथा—संग्रामं हस्त्यश्वरथपदातिभिः । एवमिहाप्यचा धातोर्यतं विधत्ते । अकारेण प्रातिपदिकस्य इञं विधत्ते ।।

(विशेषणविशेष्यभावयोर्यथेष्टत्वाधिकरणम्)

(५२४-आक्षेपवार्तिकम्-१)

।।*।। येन विधिस्तदन्तस्येति चेद् ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गः[१] ।।*।।

१. 'तदन्तोपाधिताप्र०' ।

(भाष्यम्)

येन विधिस्तदन्तस्येति चेद् ग्रहणोपाधीनां तदन्तोपाधिताप्रसङ्गः । ये ग्रहणोपाधयस्तेऽपि तदन्तोपाधयः स्युः ।। तत्र को दोषः ? "उतश्च प्रत्ययादसंयोगपूर्वाद्" इति असंयोगपूर्वग्रहणमुकारान्तविशेषणं स्यात् ।। तत्र को दोषः ? असंयोगपूर्वग्रहणेन इहैव पर्युदासः स्यात्—अक्ष्णुहि, तक्ष्णुहीति । इह न स्यात्—आप्नुहि शक्नुहीति ।। तथा "उदोष्ठ्यपूर्वस्य" इति ओष्ठ्यपूर्वग्रहणमृकारान्तविशेषणं स्यात् ।।

तत्र को दोषः ? ओष्ठ्यपूर्वग्रहणेन इह प्रसज्येत—संकीर्णम्, संगीर्णमिति । इह च न स्यात्—निपूर्ताः पिण्डा इति ।।

विमला - ग्रहणोपाधीनामिति । उच्चार्यमाणस्य विशेषणानामित्यर्थः ।

तदन्तोपाधितेति । तदन्तविशेषणत्वमित्यर्थः । **तक्ष्णुहीतीति** । उकारान्तप्रत्ययस्य संयोगपूर्वकत्वाभावादिति भावः । **संकीर्णमिति** । ऋकारान्तस्य धातोः समो मकारपूर्वकत्वेन ओष्ठ्यपूर्वकत्वादिति भावः ।

इह च न स्यादिति । ऋकारान्तस्य ओष्ठ्यपूर्वकत्वाभावादिति भावः । **तदन्तान्तस्येति वक्तव्यमिति** । सूत्रे तदन्तस्येत्यपहाय तदन्तान्तस्येति वक्तव्यमित्यर्थः । **इति पण्डित[illegible]शझाशर्म्म - विरचितायाम् महाभाष्यव्याख्यायां विमलाख्यायां प्रथमाध्यायस्य प्रथमे पादे नवममाह्निकम् ।।९।।**

याचकजनसुरशाखी गुणगणसिन्धुः सदब्जवनभानुः ।
श्रीमान् सिंहपदान्वित-कृष्णानन्दोऽवनीपतिर्जयति ।।१।।
तद्भुजनिविडच्छाया-विगतश्रमजदुःखभूमा यः ।
विरचितवानहमेनां चिरमधमर्णं स मन्ये स्वम् ।।२।।

(५२५-समाधानवार्तिकम्-२)

।।*।। *सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वात्* ।।*।।

(भाष्यम्)

सिद्धमेतत् ।। कथम् ? यथेष्टं विशेषणविशेष्ययोर्योगो भवति । यावता यथेष्टम् । इह तावत्– "उतश्च प्रत्ययादसंयोगपूर्वात्" इति नाऽसंयोगपूर्वग्रहणेन उकारान्तं विशेष्यते ।। किं तर्हि ?

उकार एव विशेष्यते–उकारो योऽसंयोगपूर्वस्तदन्तात्प्रत्ययादिति ।। तथा–"उदोष्ठ्यपूर्वस्य" इति नौष्ठ्यपूर्वग्रहणेन ऋकारान्तं विशेष्यते ।। किं तर्हि ? ऋकार एव विशेष्यते—ऋकारो य ओष्ठ्यपूर्वस्तदन्तस्य धातोरिति ।।

(तदन्तसंज्ञाप्रतिषेधाधिकरणम्)

(५२६-आक्षेपवार्तिकम्-३)

।।*।। *समासप्रत्ययविधौ च प्रतिषेधः* ।।*।।

(भाष्यम्)

समासविधौ प्रत्ययविधौ च प्रतिषेधो वक्तव्यः ।। समासविधौ तावत्–द्वितीया श्रितादिभिः समस्यते—कष्टश्रितः, नरकश्रितः । कष्टं परमश्रित इत्यत्र मा भूत् ।। प्रत्ययविधौ—[नडादिभ्यः फक्[1]] नडस्यापत्यं नाडायनः । इह न भवति–सूत्रनडस्यापत्यं सौत्रनाडिः ।।

(प्रत्याक्षेपभाष्यम्)

---

१. लुप्तं स्यात् ।

किमविशेषेण ?

(समाधानभाष्यम्)

नेत्याह ।

(५२७-आक्षेपपरिशेषवार्तिकम्-४)

॥॥ उगिद्वर्णग्रहणवर्जम् ॥*॥*

(भाष्यम्)

उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वा ।

उगिद्ग्रहणम्–[उगितश्च] भवती अतिभवती महती अतिमहती ॥ वर्णग्रहणम्—"अत इञ्" । दाक्षिः प्लाक्षिः ॥

(आक्षेपभाष्यम्)

अस्ति चेदानीं कश्चित्केवलोऽकारः प्रातिपदिकं यदर्थो विधिः स्यात् ?

(समाधानभाष्यम्)

अस्तीत्याह–अततेर्डः, अः, तस्यापत्यम् । "अत इञ्" । इः ॥

(तन्मध्यपतितन्यायाधिकरणम्)

(५२८-आक्षेपवार्तिकम्-५)

॥॥ अकच्श्नम्वतः सर्वनामाव्ययधातुविधावुपसंख्यानम् ॥*॥*

(भाष्यम्)

अकज्वतः सर्वनामाव्ययविधौ श्नम्वतो धातुवि-

धावुपसंख्यानं कर्तव्यम् ।। अकज्वतः सर्वनामाव्ययविधौ—सर्वके विश्वके । अव्ययविधौ—उच्चकैः नीचकैः ।। श्नम्वतः—भिनत्ति छिनत्ति ।।

किं पुनः कारणं न सिध्यति ?

इह—तस्य वा ग्रहणं भवति, तदन्तस्य वा । न चेदं तत्, नाऽपि तदन्तम् ।।

(५२९-समाधानबाधकवार्तिकम्-६)

।।*।। सिद्धं तु तदन्तान्तवचनात् ।।*।।

(भाष्यम्)

सिद्धमेतत् ।।

कथम् ? 'तदन्तान्तवचनात्' । तदन्तान्तस्येति वक्तव्यम् ।। किमिदं तदन्तान्तस्येति ? तस्यान्तस्तदन्तस्तदन्तोऽन्तो यस्य तदिदं तदन्तान्तं, तदन्तान्तस्येति ।

(तटस्थाक्षेपभाष्यम्)

स तर्हि तथा निर्देशः कर्तव्यः ?

(सिद्धान्तिसमाधानभाष्यम्)

न कर्तव्यः । उत्तरपदलोपोऽत्र द्रष्टव्यः । तद्यथा-उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुखः । एवमिहापि तदन्तः अन्तो यस्य सोऽयं तदन्तस्तदन्तस्येति ।।

(५३०-यथान्यासेऽपि समाधानवार्तिकम्-७)

।।*।। तदेकदेशविज्ञानाद्वा सिद्धम् ।।*।।

(भाष्यम्)

तदेकदेशविज्ञानाद्वा पुनः सिद्धमेतत् । तदेकदेशभूतस्तद्ग्रहणेन गृह्यते ।। तद्यथा—गङ्गा यमुना देवदत्तेति । अनेका नदी गङ्गां यमुनां च प्रविष्टा गङ्गायमुनाग्रहणेन गृह्यते । तथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते ।।

(समाधानबाधकभाष्यम्)

विषम उपन्यासः । इह केचिच्छब्दा अव्यक्तपरिमाणानामर्थानां वाचका भवन्ति—य एते संख्याशब्दाः परिमाणशब्दाश्च । पञ्च सप्तेति, एकेनाप्यपाये न भवन्ति । द्रोणः खारी आढकमिति, नैवाधिके भवन्ति, न न्यूने । केचिद् यावदेव तद्भवति तावदेवाहुः—य एते जातिशब्दा गुणशब्दाश्च । तैलं घृतमिति, खार्यामपि भवन्ति द्रोणेऽपि ।। शुक्लो नीलः कृष्ण इति, हिमवत्यपि भवति वटकणिकामात्रेऽपि द्रव्ये ।। इमाश्चापि संज्ञा अक्तपरिमाणानामर्थानां क्रियन्ते ताः केनाधिकस्य स्युः ।।

(समाधानसाधकभाष्यम्)

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति— 'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति, यदयं "नेदमदसोरकोः" इति सककारयोरिदमदसोः प्रतिषेधं शास्ति ।। कथं कृत्वा ज्ञापकम् ? इदमदसोः कार्यमुच्यमानं कः प्रसङ्गो यत्सककारयोः स्यात् । पश्यति त्वाचार्यः— 'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति । ततः सककारयोः प्रतिषेधं शास्ति ।।

(तदन्तसंज्ञोदाहरणाधिकरणम्)

(आक्षेपभाष्यम्)

कानि पुनरस्य योगस्य प्रयोजनानि ?

(५३१-प्रयोजनवार्तिकम्-८)

|||| प्रयोजनं सर्वनामाव्ययसंज्ञायाम् ||*||*

(भाष्यम्)

सर्वनामाव्ययसंज्ञायां प्रयोजनम् । सर्वे परमसर्वे । विश्वे परमविश्वे । उच्चैः परमोच्चैः । नीचैः परमनीचैरिति ॥

(५३२-प्रयोजनवार्तिकम्-९)

|||| उपपदविधौ भयाढ्यादिग्रहणम् ||*||*

(भाष्यम्)

उपपदविधौ भयाढ्यादिग्रहणं प्रयोजनम् । भयंकरः । अभयंकरः । आढ्यंकरणं स्वाढ्यंकरणम् ॥

(५३३-प्रयोजनवार्तिकम्-१०)

|||| ङीब्विधावुगिद्ग्रहणम् ||*||*

(भाष्यम्)

ङीब्विधावुगिद्ग्रहणं प्रयोजनम् । भवती अतिभवती । महती अतिमहती ॥

(५३४-प्रयोजनवार्तिकम्-११)

|||| प्रतिषेधे स्वस्त्रादिग्रहणम् ||*||*

(भाष्यम्)

ङीप्प्रतिषेधे स्वस्रादिग्रहणं प्रयोजनम् । स्वसा परमस्वसा । दुहिता परमदुहिता ।।

(५३५-प्रयोजनवार्तिकम्-१२)

।।*।। अपरिमाणविस्तादिग्रहणं च[1] ।।*।।

(भाष्यम्)

अपरिमाणबिस्तादिग्रहणं च ङीप्प्रतिषेधे प्रयोजनम् ।। "अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि" । द्विबिस्ता द्विपरमबिस्ता । त्रिबिस्ता त्रिपरमबिस्ता । द्व्याचिता द्विपरमाचिता ।

(५३६-प्रयोजनवार्तिकम्-१३)

।।*।। दिति ।।*।।

(भाष्यम्)

दितिग्रहणं च [ण्यविधौ[2]] प्रयोजनम् ।। दितेरपत्यं दैत्यः । अदितेरपत्यमादित्यः । "दित्यदित्यादित्य" इत्यदितिग्रहणं न कर्तव्यं भवति ।।

(५३७-प्रयोजनवार्तिकम्-१४)

।।*।। रोण्या अण् ।।*।।

(भाष्यम्)

रोण्या अण्ग्रहणं च प्रयोजनम् । आजकरौणः । सैंहिकरौणः[3] ।।

(५३८-आक्षेपवार्तिकम्-१५)

१. "च प्रतिषेधे" इत्यंशः क्वचिदधिकः ।
२. क्वचिन्न । ३. 'सैंहकरौणः' ।

।।*।। तस्य च ।।*।।

(भाष्यम्)

तस्य चेति वक्तव्यम् ।। रौणः ।।

(प्रत्याक्षेपभाष्यम्)

किं पुनः कारणं न सिध्यति ? न तदन्ताच्च तदन्तविधिना सिद्धम्, केवलाच्च व्यपदेशिवद्भावेन ?

(समाधानभाष्यम्)

'व्यपदेशिवद्भावोऽप्रातिपदिकेन' ।।

(आक्षेपभाष्यम्)

किं पुनः कारणं 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' ?

(समाधानभाष्यम्)

इह सूत्रान्ताट्ठग्भवति, दशान्ताड्डो भवतीति केवलादुत्पत्तिर्मा भूदिति ।।

(समाधानबाधकभाष्यम्)

नैतदस्ति प्रयोजनम् । सिद्धमत्र तदन्ताच्च तदन्तविधिना, केवलाच्च व्यपदेशिवद्भावेन । सोऽयमेवं सिद्धे सति यदन्तग्रहणं करोति तज्ज्ञापयत्याचार्यः— सूत्रान्तादेव दशान्तादेवेति ।।

(समाधानसाधकभाष्यम्)

नाऽत्र तदन्तादुत्पत्तिः प्राप्नोति । इदानीमेव ह्युक्तम्—'समासप्रत्ययविधौ प्रतिषेधः' इति ।।

(गौरवाक्षेपभाष्यम्)

सा तर्ह्येषा परिभाषा कर्तव्या ।।

(गौरवनिराकरणभाष्यम्)

न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति—'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति। यदयम्—""पूर्वादिनिः"" ""सपूर्वाच्च"" इत्याह ।।

(ज्ञापकनिराकरणभाष्यम्)

नैतदस्ति ज्ञापकम् ।। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ।

किम् ?

सपूर्वात्पूर्वादिनिं वक्ष्यामीति ।।

(ज्ञापकान्तरभाष्यम्)

यत्तर्हि योगविभागं करोति । इतरथा हि ""पूर्वात्सपूर्वादिनिः"" इत्येव ब्रूयात् ।।

(आक्षेपभाष्यम्)

किं पुनरयमस्यैव शेषः—'तस्य च' इति ।।

(समाधानभाष्यम्)

नेत्याह । यच्चानुक्रान्तं, यच्चानुक्रंस्यते, सर्वस्यैव शेषः–'तस्य च' इति ।।

(५३९-प्रयोजनवार्तिकम्-१६)

।।*।। रथसीताहलेभ्यो यद्विधौ ।।*।।

(भाष्यम्)

रथसीताहलेभ्यो यद्विधौ प्रयोजनम् ।। रथ्यः परमरथ्यः । सीत्यं परमसीत्यम् । हल्या परमहल्या ।।

(५४०-प्रयोजनवार्तिकम्-१७)

॥॥ सुसर्वार्धदिक्छब्देभ्यो जनपदस्य ॥*॥*

(भाष्यम्)

सुसर्वार्धदिक्शब्देभ्यो जनपदस्य प्रयोजनम् ।

सु—सुपाञ्चालकः सुमागधकः । सु ।।

सर्व—सर्वपाञ्चालकः सर्वमागधकः । सर्व ।।

अर्ध—अर्धपाञ्चालकः । अर्धमागधकः । अर्ध ।।

दिक्छब्द—पूर्वपाञ्चालकः । अपरपाञ्चालकः । पूर्वमागधकः । अपरमागधकः । दिक्छब्द ।।

(५४१-प्रयोजनवार्तिकम्-१८)

॥॥ ऋतोर्वृद्धिमद्विधाववयवानाम् ॥*॥*

(भाष्यम्)

ऋतोर्वृद्धिमद्विधाववयवानां[1] प्रयोजनम् ।। पूर्वशारदम् । अपरशारदम् । पूर्वनैदाघम् । अपरनैदाघम् ।।

(५४२-प्रयोजनवार्तिकम्-१९)

॥॥ ठञ्विधौ संख्यायाः ॥*॥*

(भाष्यम्)

ठञ्विधौ संख्यायाः प्रयोजनम् ।। द्विषाष्टिकं पञ्चषाष्टिकम् ।

---

१. 'वृद्धिमदवयवानां' इति क्वचित् ।

(५४३-प्रयोजनवार्तिकम्-२०)

॥॥धर्मान्नञः॥*॥*

(भाष्यम्)

धर्मान्नञः प्रयोजनम्॥ धर्मं चरति धार्मिकः। अधर्मं चरति अधार्मिकः। 'अधर्माच्च' इति न वक्तव्यं भवति॥

(पदाङ्गाधिकारपरिभाषाधिकरणम्)

(५४४-आक्षेपवार्तिकम्-२१)

॥॥पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च॥*॥*

(भाष्यम्)

पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति वक्तव्यम्॥ पदाधिकारे किं प्रयोजनम्?

(५४५-प्रयोजनवार्तिकम्-२२)

॥॥[1]प्रयोजनमिष्टकेषीकामालानां चिततूलभारिषु॥*॥*

(भाष्यम्)

इष्टकेषीकामालानां चिततूलभारिषु प्रयोजनम्॥ इष्टकचितं चिन्वीत। पक्वेष्टकचितं चिन्वीत। इषीकतूलेन। मुञ्जेषीकतूलेन। मालभारिणी कन्या। उत्पलमालभारिणी कन्या॥

(प्रयोजनप्रश्नभाष्यम्)

अङ्गाधिकारे किं प्रयोजनम्?

---

१. इतः पूर्वं 'पदाधिकारे' क्वचित्।

(५४६-प्रयोजनवार्तिकम्-२३)

॥*॥ [1]महदप्स्वसृनप्तृणां दीर्घविधौ ॥*॥

(भाष्यम्)

महदप्स्वसृनप्तृणां दीर्घविधौ प्रयोजनम् ॥
महत्—महान् । एवं परममहान् । महत् ॥

अप्—आपस्तिष्ठन्ति । एवं स्वापस्तिष्ठन्ति । अप् ॥ स्वसृ—स्वसा स्वसारौ स्वसारः । एवं परमस्वसा परमस्वसारौ परमस्वसारः । स्वसृ ॥ नप्तृ—नप्ता नप्तारौ नप्तारः । एवं परमनप्ता परमनप्तारौ परमनप्तारः । नप्तृ ॥

(५४७-प्रयोजनवार्तिकम्-२४)

॥*॥ पद्युष्मदस्मदस्थ्याद्यनडुहो नुम् ॥*॥

(भाष्यम्)

पद्भावः प्रयोजनम् । द्विपदः पश्य ।

(आक्षेपभाष्यम्)

अस्ति चेदानीं कश्चित्केवलः पाच्छब्दो यदर्थो विधिः स्यात् ?

(समाधानभाष्यम्)

नास्तीत्याह ॥

(प्रयोजनदर्शकभाष्यम्)

एवं तर्हि अङ्गाधिकारे प्रयोजनं नास्तीति कृत्वा

१. इतः पूर्वमत्र 'अङ्गाधिकारे प्रयोजनं' इति लुप्तं स्यात् ।

पदाधिकारस्य प्रयोजनमुक्तम्—"हिमकाषिहतिषु च" । यथा पत्काषिणौ पत्काषिणः । एवं परमपत्काषिणौ परमपत्काषिणः ।।

(आक्षेपभाष्यम्)

यदि तर्हि पदाधिकारे पादस्य तदन्तविधिर्भवति "पादस्य पदाज्यातिगोपहतेषु" । यथेह भवति—पादेनोपहतम् । पदोपहतम् । एवमत्रापि स्यात्—दिग्धपादेनोपहतं दिग्धपादोपहतमिति ।।

(समाधानभाष्यम्)

एवं तर्ह्यङ्गाधिकार एव प्रयोजनम् ।।

(आक्षेपभाष्यम्)

ननु चोक्तम्—नास्ति केवलः पाच्छब्द इति ।।

(समाधानभाष्यम्)

अयमस्ति पादयतेरप्रत्ययः पात् पदः पदा पदे । पत् ।। युष्यत् अस्मत्—यूयं वयम् । परम यूयं परमवयम् ।। अस्थ्यादि—अस्थ्ना दध्ना सक्थ्ना । परमास्थ्ना परमदध्ना परमसक्थ्ना ।। अनडुहो नुम्—अनड्वान् परमानड्वान् ।।

(५४८-प्रयोजनवार्तिकम्-२५)

|||| द्युपथिमथिपुंगोसखिचतुरनडुत्त्रिग्रहणम् ||*||*

(भाष्यम्)

द्युपथिमथिपुंगोसखिचतुरनडुत्त्रिग्रहणं

प्रयोजनम् ।। द्यौः । सुद्यौः । पन्थाः सुपन्थाः । मन्थाः सुमन्थाः परममन्थाः । पुमान् परमपुमान् । गौः सुगौः परमगौः । सखा सखायौ सखायः । सुसखा सुसखायौ सुसखायः । परमसखा परमसखायौ परमसखायः । चत्वारः परमचत्वारः । अनड्वाहः परमानड्वाहः । त्रयाणां परमत्रयाणाम् ।।

(५४९-प्रयोजनवार्तिकम्-२६)

।।*।। त्यदादिविधिभस्त्रादिस्त्रीग्रहणं च ।।*।।

(भाष्यम्)

त्यदादिविधिभस्त्रादिस्त्रीग्रहणं च प्रयोजनम् ।। सः । अतिसः ।। भस्त्रका भस्त्रिका । बहुभस्त्रका, बहुभस्त्रिका । निर्भस्त्रका निर्भस्त्रिका ।। स्त्रीग्रहणं च प्रयोजनम् । स्त्रियौ स्त्रियः । राजस्त्रियौ राजस्त्रियः ।।

(५५०-प्रयोजनवार्तिकम्-२७)

।।*।। वर्णग्रहणं च सर्वत्र ।।*।।

(भाष्यम्)

वर्णग्रहणं च सर्वत्र प्रयोजनम् ।।

क्व सर्वत्र? अङ्गाधिकारे चाऽन्यत्र च । अन्यत्रोदाहृतम् ।। अङ्गाधिकारे-"अतो दीर्घो यञि, सुपि च" इहैव स्यात्- आभ्याम् । घटाभ्यामित्यत्र न स्यात् ।।

(५५१-प्रयोजनवार्तिकम्-२८)

।।*।। प्रत्ययग्रहणं चाऽपञ्चम्याः ।।*।।

(भाष्यम्)

प्रत्ययग्रहणं च अपञ्चम्याः प्रयोजनम् ।। यञिञोः फग्भवति । गार्ग्यायणः । वात्स्यायनः । परमगार्ग्यायणः परमवात्स्यायनः । दाक्षायणः । परमदाक्षायणः ।।

अपञ्चम्या इति किमर्थम् ? दृषत्तीर्णा परिषत्तीर्णा ।।

(५५२-प्रयोजनवार्तिकम्-२९)

।।*।। अलैवानर्थकेन ।।*।।

(भाष्यम्)

अलैवानर्थकेन, नान्येनानर्थकेनेति वक्तव्यम् ।।

किं प्रयोजनम् ? हनूग्रहणे प्लीहनूग्रहणं मा भूत् । उदूग्रहणे गर्मुदूग्रहणम्[१] । स्त्रीग्रहणे शस्त्रीग्रहणम्[१] । संग्रहणे पायसंग्रहणं मा भूत् ।।

(वार्तिकवैयर्थ्याक्षेपभाष्यम्)

किमर्थमिदमुच्यते, न 'पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च' इत्येव सिद्धम् ?

(वार्तिकसार्थक्यभाष्यम्)

न चेदं तत्, नापि तदुत्तरपदम् ।।

(परिभाषानावश्यकत्व-लाघवभाष्यम्)

तन्न वक्तव्यं भवति ।।

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः ?

१. इतः परं 'मा भूत्' इति लुप्तं स्यात् ।

(समाधानभाष्यम्)

तदन्तविधिरेव ज्यायान् । इदमपि सिद्धं भवति— परमातिमहान् । एतद्धि नैव तद्, नापि तदुत्तरपदम् ।।

(५५३-प्रयोजनवार्तिकम्-३०)

।।*।। अनिनस्मन्ग्रहणानि च[1] ।।*।।

(भाष्यम्)

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ।। अन्—राज्ञेत्यर्थवता, साम्नेत्यनर्थकेन । अन् ।। इन्—दण्डीत्यर्थवता, वाग्मीत्यनर्थकेन । इन् ।। अस्— सुपया इत्यर्थवता, सुस्रोता इत्यनर्थकेन । अस् ।। मन्—सुशर्मा इत्यर्थवता, सुप्रथिमा इत्यनर्थकेन । मन् ।।

(तदन्तसंज्ञापवादनिरूपणम्)

(५५४-आक्षेपवार्तिकम्-३१)

।।*।। यस्मिन्विधिस्तदादावल्ग्रहणे ।।*।।

(भाष्यम्)

अल्ग्रहणेषु[2] यस्मिन्विधिस्तदादाविति वक्तव्यम् ।।

किं प्रयोजनम् ? "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" इति इहैव स्यात्—श्रियौ भ्रुवौ । श्रियो भ्रुव इत्यत्र न स्यात् ।। —येन विधिस्तदन्तस्य ।।७१।।

---

१. 'अनिनस्मन् ग्रहणान्यर्थवता चानर्थकेन' इति क्वचित् ।

२. क्वचिन्न ।

(अथवृद्धसंज्ञाप्रकरणम्)

(वृद्धसंज्ञासूत्रम्)

वृद्धिर्यस्याचामादिस्तद् वृद्धम् ।।१।१।७२।।

(तत्तत्पदकृत्यनिर्वचनाधिकरणम्)

(आक्षेपभाष्यम्)

वृद्धिग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

'यस्याऽचामादिस्तद् वृद्धम्' इतीयत्युच्यमाने 'दात्ताः' 'राक्षिताः' अत्रापि प्रसज्येत । वृद्धिग्रहणे पुनः क्रियमाणे न दोषो भवति ।।

(आक्षेपभाष्यम्)

अथ 'यस्य' ग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

यस्येति व्यपदेशाय ।।

(आक्षेपभाष्यम्)

अथाऽज्ग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

'वृद्धिर्यस्यादिस्तद्वृद्धम्' इतीयत्युच्यमाने इहैव स्यात्—ऐतिकायनीयाः औपगवीयाः । इह न स्यात्—गार्गीया वात्सीया इति । अज्ग्रहणे पुनः क्रियमाणे न दोषो भवति ।।

(आक्षेपभाष्यम्)

अथाऽऽदिग्रहणं किमर्थम् ?

(समाधानभाष्यम्)

'वृद्धिर्यस्याचां तद् वृद्धम्' इतीयत्युच्यमाने—सभासंनयने भवः साभासंनयनः—इत्यत्रापि प्रसज्येत। आदिग्रहणे पुनः क्रियमाणे न दोषो भवति ।।

(सूत्रोपपादनाधिकरणम्)

(५५५-आक्षेपवार्तिकम्-१)

।।।। वृद्धसंज्ञायामजसंनिवेशादनादित्वम् ।।*।।*

(भाष्यम्)

वृद्धसंज्ञायामजसंनिवेशादादिरित्येतन्नोपपद्यते। नह्यचां संनिवेशोऽस्ति ।।

(आक्षेपबाधकभाष्यम्)

ननु चैवं विज्ञायते—अजेवादिरजादेरिति ।।

(आक्षेपसाधकभाष्यम्)

नैवं शक्यम्। इहैव प्रसज्येत—औपगवीयाः। इह न स्यात्-गार्गीयाः इति ।।

(आक्षेपभाष्यम्)

एकान्तादित्वं तर्हि विज्ञायते ।।

(५५६-आक्षेपसाधकवार्तिकम्-२)

।।।। एकान्तादित्वे च सर्वप्रसंगः ।।*।।*

(भाष्यम्)

इहापि प्रसज्येत–सभासन्नयने भवः साभासन्नयन इति ।।

(५५७-समाधानवार्तिकम्-३)

।।।। सिद्धमजाकृतिनिर्देशात् ।।*।।*

(भाष्यम्)

सिद्धमेतत् ।। कथम् ? 'अजाकृतिनिर्देशात्' । अच आकृतिर्निर्दिश्यते ।।

(आक्षेपभाष्यम्)

एवमपि व्यञ्जनैर्व्यवहितत्वान्न प्राप्नोति ।।

(५५८-आक्षेपवार्तिकम्-४)

।।।। व्यजनस्याऽविद्यमानत्वं यथान्यत्र ।।*।।*

(भाष्यम्)

व्यञ्जनस्याऽविद्यमानवद्भावो वक्तव्यो यथाऽन्यत्रापि व्यञ्जनस्याविद्यमानवद्भावो भवति ।।

क्वान्यत्र ? स्वरे ।।

(न्यूनतापूर्त्यधिकरणम्)

(५५९-आक्षेपवार्तिकम्-५)

।।।। वा नामधेयस्य ।।*।।*

(भाष्यम्)

वा नामधेयस्य वृद्धसंज्ञा वक्तव्या ।। देवदत्तीयाः । दैवदत्तीयाः[1] । दैवदत्ताः ।। यज्ञत्तीयाः । याज्ञदत्ताः ।।

---

१. क्वचिन्न ।

(५६०-आक्षेपवार्तिकम्-६)

॥॥ गोत्रोत्तरपदस्य च ॥*॥*

(भाष्यम्)

गोत्रोत्तरपदस्य च वृद्धसंज्ञा वक्तव्या ॥

कम्बलचारायणीयाः । ओदनपाणिनीयाः । घृतरौढीयाः ॥

(५६१-वार्तिकन्यासान्तरम्-७)

॥॥ गोत्रान्ताद्वाऽसमस्तवत् ॥*॥*

(भाष्यम्)

गोत्रान्ताद्वा असमस्तवत्प्रत्ययो भवतीति वक्तव्यम् ॥ एतान्येवोदाहरणानि ॥

(आक्षेपभाष्यम्)

किमविशेषेण ?

(समाधानभाष्यम्)

नेत्याह ।

(५६२-शेषवार्तिकम्-८)

॥॥ जिह्वाकात्यहरितकात्यवर्जम् ॥*॥*

(भाष्यम्)

जिह्वाकात्यं हरितकात्यं च वर्जयित्वा । जैह्वाकाताः । हारितकाताः ।

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः ?

(समाधानभाष्यम्)

'गोत्रान्ताद्वाऽसमस्तवद्' इत्येव ज्यायः । इदमपि सिद्धं भवति—पिङ्गलकाण्व्यस्य छात्राः पैङ्गलकाण्वाः ।। (एतानि वृद्धसंज्ञानि स्युः[1]) । वृद्धिर्यस्याचामादिस्तद्वृद्धम् ।।७२।।

(वृद्धसंज्ञासूत्रम्)

त्यदादीनि च ।।१।१।७३।।

(अनुवृत्तिनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

यस्याचामादिग्रहणमनुवर्तते, उताहो न ?

(भाष्यम्)

किं चातः ?

(अनुवृत्तिपक्षे दूषणभाष्यम्)

यद्यनुवर्तते, इह च प्रसज्येत—त्वत्पुत्रस्य च्छात्रास्त्वात्पुत्राः मात्पुत्राः । इह च न स्यात्—त्वदीयो मदीय इति ।।

(निवृत्तिपक्षे दूषणभाष्यम्)

अथ निवृत्तम्, "एङ् प्राचां देशे" । यस्याचामादिग्रहणं कर्तव्यम् ।।

(अनुवृत्तिपक्षाभ्युपगमभाष्यम्)

एवं तर्ह्यनुवर्तते ।।

---

१. क्वचिन्न ।

(आक्षेपभाष्यम्)

कथं त्वात्पुत्रा मात्पुत्रा इति ?

(समाधानभाष्यम्)

संबन्धमनुवर्तिष्यते—"वृद्धिर्यस्याचामादिस्तद् वृद्धम्" । "त्यदादीनि च" । वृद्धसंज्ञानि भवन्ति । वृद्धिर्यस्याचामादिस्तद् वृद्धम् ।। "एङ् प्राचां देशे" । यस्याचामादिग्रहणमनुवर्तते, वृद्धिग्रहणं निवृत्तम् । तद्यथा—कश्चित्कान्तारे समुपस्थिते सार्थमुपादत्ते । स यदा निष्क्रान्तकान्तारो भवति तदा सार्थं जहाति ।। —त्यदादीनि च ।।७३।।

(वृद्धसंज्ञासूत्रम्)

एङ् प्राचां देशे ।।१।१।७४।।

(विषयनिर्णयाधिकरणम्)

(५६३-आक्षेपवार्तिकम्-१)

।।।। एङ् प्राचां देशे शैषिकेषु ।।*।।*

(भाष्यम्)

एङ् प्राचां देशे शैषिकेष्विति वक्तव्यम् । सैपुरिकी सैपुरिका[1] । स्कौनगरिकी स्कौनगरिकेति ।। —एङ् प्राचां देशे ।।७४।।

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमे पादे नवममाह्निकम् ।।

पादश्च प्रथमः समाप्तः ।। इति नवाह्निकम् ।।

---

१. 'सौपुरिकी सौपुरिका' इति क्वचित् ।